Rashtriya Sanskrit Sansthan
New Delhi
(Kendriya Sanskrit Vidyapeetha, Tirupati, Series No. 31)

NYĀYA KUSUMĀÑJALI OF UDAYANĀCĀRYA
with the KUSUMĀÑJALIVISTARA, a lucid Commentary, and ANNOTATION on PARTICULAR TOPICS

By
UTTAMUR T. VIRARAGHAVACHARYA
Tarkārṇava, Paṇḍitaratna, Śiromaṇi and
Recipient of President's Award.

KENDRIYA SANSKRIT VIDYAPEETHA
TIRUPATI
1980

Rashtriya Sanskrit Sansthan
New Delhi
(Kendriya Sanskrit Vidyapeetha, Tirupati, Series No. 31)

NYĀYA KUSUMĀÑJALI OF UDAYANĀCĀRYA
with the KUSUMĀÑJALIVISTARA, a lucid Commentary, and ANNOTATION on PARTICULAR TOPICS

By
UTTAMUR T. VIRARAGHAVACHARYA
Tarkārṇava, Paṇḍitaratna, Śiromaṇi and
Recipient of President's Award.

KENDRIYA SANSKRIT VIDYAPEETHA
TIRUPATI
1980

First Edition : 1941

Reprint, 1980

Price Rs.

Published for the
RASHTRIYA SANSKRIT SANSTHAN
Ministry of Education and S. W.,
Government of India,
NEW DELHI

by

Dr. M. D. BALASUBRAHMANYAM,
Principal, Kendriya Sanskrit Vidyapeetha,
TIRUPATI (A.P.)

Printed by N. R . VIJAYARAGHAVAN at Udhaya Printers. Madras-33

राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

[केन्द्रीय-संस्कृत-विद्यापीठ-ग्रन्थमाला, संख्या—31]

उदयनाचार्यकृतः

न्यायकुसुमाञ्जलिः

तर्कार्णवेन पण्डितरत्नेन शिरोमणिना

(उत्तमूर्) ति. वीरराघवाचार्येण विरचिताभ्यां

कुसुमाञ्जलिविस्तरसमाख्यविशदव्याख्यान-

विशेषविषयटिप्पणाभ्यां समुल्लासितः

केन्द्रीयसंस्कृतविद्यापीठम्, तिरुपतिः

1980

प्रथमप्रकाशनम्, तिरुपतिः, 1941

पुनर्मुद्रणम्, तिरुपतिः, 1980

मूल्यम्—रू.

शिक्षा-समाज-कल्याण-मन्त्रालयान्तर्गत-देहलीस्थ-
राष्ट्रियसंस्कृतसंस्थानस्य कृते
तरुपतिस्थ-केन्द्रीयसंस्कृतविद्यापीठस्य प्राचार्येण
डा. मल्लादि द. बालसुब्रह्मण्यशर्मणा प्रकाशितः
उदय प्रिण्टर्स, मद्रास्......इत्येतैः पुनर्मुद्रितश्च ।

प्रस्तावना

1...ईश्वरसाधनाय कुसुमाञ्जलेः प्रादुर्भावः

प्रायः सर्वेषां भारतीयानामास्तिकानां जनानामस्ति अनादिकालादनुवर्तमानो विश्वासः, यत् सकलजगत्सृष्टिस्थितिसंहारादिहेतुः ईश्वरः कश्चित् वर्तते, तेन विना तृणमपि न चलति, तस्य भजनं विना नान्योऽस्त्युपायो मानवानामिहामुत्र च श्रेयःप्राप्तये इति । श्रूयते च 'यज्ञेन यज्ञमयजन्त देवाः' इति । स्मर्यते च—'सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज' (गीता 18-66) इति, 'मदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर' (गीता 3-9) इति च । एवं कर्मयोगसमाराध्यस्येश्वरस्य सात्त्विककर्माचरणनिर्मलीकृतेन मनसा भावनमपि पातञ्जले योगशास्त्रे प्रसिद्धम् ; 'ईश्वरप्रणिधानाद्वा' (यो. सू. 1-23) इत्यारभ्य 'तज्जपस्तदर्थभावनम्' (यो. सू. 1-28) इत्यन्तेन प्रणवजपविशिष्टेश्वरभावनरूपस्य, 'तपस्स्वाध्यायेश्वरप्रणिधानानि क्रियायोगः' (यो. सू. 2-1) इत्यादिना सर्वकर्मणां तस्मिन्नर्पणरूपस्य च प्रणिधानस्योक्तत्वात् । तमेतं सर्वज्ञं सत्यसङ्कल्पं स्वसङ्कल्पाधीनस्वेतरसमस्तवस्तुप्रवृत्तिभेदमीश्वरं ज्योतिष्टोमादिभिर्यज्ञैः, प्रासादतटाकनिर्माणादिना पूर्तेन, शीतातपसहनादिना तपसा, अहिंसादिभिर्यमैः शौचसन्तोषादिभिर्नियमैः, आसनप्राणायामादिना योगेन महर्षयोऽपि विविदिषन्ति । तस्मिन् ज्ञाते सर्वमिदं जगत् ज्ञातं भवतीति विज्ञाय श्रेयस्कामैर्मानवैः ईश्वरप्रणिधानपरैर्भाव्यमिति अध्यात्मशास्त्राण्युद्घोषयन्ति । गीतं च भगवता—

"मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ।। (गीता 1-34)

"भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् ।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति ।।" (गीता 5-29)

इति । एतादृशमीश्वरं येऽपलपन्ति शैलसारहृदयाः तेऽवश्यं पुरुषार्थात् भ्रश्येरन् । उक्तं हि कुसुमाञ्जलावन्ते—

"इत्येवं श्रुतिनीतिसंप्लवजलैर्भूयोभिराक्षालिते
येषां नास्पदमादधासि हृदये ते शैलसाराशयाः ।।"

(कुसुमाञ्जलिः 5-18)

इति । श्रुतिस्मृतिपुराणेतिहासानुभवप्रमाणैर्दृढं प्रमितोऽपीश्वरः यावत् युक्तिभिः न साध्यते तावत् युक्तिमात्रप्रमाणकाः ईश्वरानभ्युपगन्तारो मतान्तरस्थाः दुर्युक्तिभिः ईश्वरो नास्तीति साधने प्रवर्तमानाः न निरस्ता भवेयुः, तेषां वचसि प्रामाण्यभ्रान्त्या आस्तिका अपि कलुषितमतयः स्युः इति पर्यालोच्य परमकारुणिकाः पदवाक्यप्रमाणपारावारपारीणाः आस्तिकाग्रेसराः उदयनाचार्याः युक्तिभिरीश्वरसाधनतत्परं न्यायकुसुमाञ्जलिनामकं प्रबन्धरत्नं प्राणैषुः । उक्तं च कुसुमाञ्जल्यारम्भे—

"न्यायचर्चेयमीशस्य मननव्यपदेशभाक् ।
उपासनैव क्रियते श्रवणानन्तरागता ॥" इति ।

(कुसुमाञ्जलिः 1-3)

2……कुसुमाञ्जलेः महत्त्वम्

स चायं कुसुमाञ्जलिनामा ग्रन्थः दुरूहप्रौढशैल्या ग्रथितः नानायुक्तिजालजटिलः पञ्चस्तबकात्मा विराजते । तत्र प्रथमे स्तबके अदृष्टाधिष्ठातृत्वेन, द्वितीये स्तबके अदृष्टबोधकश्रुतिप्रणेतृत्वेन, तृतीये स्तबके प्रत्यक्षादिसकलप्रमाणाबाध्यत्वेन, चतुर्थे स्तबके प्रमातृत्वेन चेश्वरं प्रसाध्य, पञ्चमे स्तबके अन्यैर्बहुभिरनुमानैस्तर्कैश्च ईश्वरः साध्यते । एवं प्राधान्येनेश्वरसाधनपरेऽप्यस्मिन् प्रबन्धरत्ने न्यायवैशेषिकदर्शनसंमतानि बहूनि तत्त्वानि मतान्तरनिरसनपूर्वकं विमृश्य निष्कृष्यन्ते । अतोऽयं प्रबन्धः शास्त्रपाण्डित्यकामैः प्रमाणप्रमेयतत्त्वजिज्ञासुभिः सर्वैरपि विद्वद्भिः सश्रद्धमाद्रियते । प्राक्तनाः सर्वेऽपि दार्शनिकाः ग्रन्थेऽस्मिन् बहुमानमावहन् । सावधानमिमं ग्रन्थं अधीयानः आलोडयंश्च विद्वान् सकलशास्त्रमर्मज्ञो भवेत् । युक्त्या कमप्यर्थं साधयितुं दूषयितुं च प्रभवेदिति नेयमत्युक्तिः ।

3……कुसुमाञ्जलिव्याख्यानेषु विस्तरव्याख्यानस्य वैशिष्ट्यम्

यद्यप्यस्य कुसुमाञ्जलेः प्राचीनानि वरदराजकृतबोधनी वर्धमानकृतप्रकाशः, शङ्करमिश्रकृत आमोद इत्यादीनि त्रिचतुराणि व्याख्यानानि उपलभ्यन्ते, तथापि अनपेक्षितानां बहूनां विषयाणां कथनात् न तानि मूलापेक्षितमात्रनिरूपणेदम्पराणि, तथा सङ्ग्रहेण मूलार्थकथनात् अपर्याप्तानि चेति कृत्वा न्यायमीमांसावेदान्तादिशास्त्राध्ययनाध्यापनादिपरिपक्वमतिभिः विश्वविख्यातवैदुष्यैः

उत्तमूर् श्रीवीरराघवाचार्यस्वामिभिः सरलमधुरवचोगुम्फिता मूलापेक्षितार्थ-विशदीकरणक्षमा अनपेक्षितविस्तरविवर्जिता विस्तराख्या व्याख्या निरमीयत । प्रौढतमस्य मूलग्रन्थस्य प्रतिपङ्क्ति प्रतीकधारणेन व्याख्याने क्रियमाणे संपिण्डितार्थोऽपि प्रदर्शनीय इति व्याख्यानम् अतिविस्तृतं भवेत् प्रेक्षकाणां च क्लेशः स्यादिति मत्वा छायारूपैवेयं व्यरचि । प्रथमतः अधस्तात् इमां व्याख्यां दृष्ट्वा पश्चात् मूलं पश्येयुश्चेत् प्रतिपङ्क्त्यर्थः संपिण्डितार्थश्च सम्यगवगम्येयातामिति एतद्व्याख्यानपरिशीलिनां छात्राणामध्यापकानां च कुले प्रसिद्धम् । अत इयं व्याख्या इतरेभ्यो विलक्षणा सर्वेषां विदुषां चात्यन्त-मुपकारिणीति निश्चप्रचम् ।

4......विस्तरव्याख्याकारपरिचयः

व्याख्यातार एते श्रीवीरराघवाचार्यस्वामिनः प्रख्यातानां विदुषां सकाशात् अधीतन्यायमीमांसावेदान्तादिशास्त्राः श्रीवेंकटेश्वरप्राच्यकलाशालायां बहूनि वर्षाणि बहून् अन्तेवासिनः न्यायमीमांसादिशास्त्राण्यध्याप्य, ततो निवृत्त्यनन्तरं मद्रपुरीं प्राप्य राष्ट्रपतिना संमानितास्सन्तः तत्रैवातीतपञ्चविंशतिवर्षेभ्यः विदुषां लौकिकजिज्ञासुजनानां च प्राधान्येन वेदान्ताध्यापनं बहुमुखग्रन्थरचनां च कुर्वन्तो विराजन्तेतमाम् । एतैः शताधिकाः प्रबन्धा विरचिताः । **न्यायशास्त्रे**—उदयनाचार्यकृतस्य कुसुमाञ्जलेः **विस्तरनाम्नी** छायाव्याख्या, न्यायभाष्यस्य विस्तृता **प्रदीपनाम्नी** व्याख्या, वैशेषिकदर्शनस्य **रसायननाम्नी** विस्तृता व्याख्या, अन्नंभट्टकृतस्य तर्कसंग्रहस्य **सुखप्रवेशिनीनाम्नी** व्याख्या, **मीमांसाशास्त्रे**—आपदेवीयापरनाम्नो न्यायप्रकाशस्य **सुधास्वादनाम्नी** विस्तृता व्याख्या, श्रीभाष्यादिषु तत्र तत्रोपात्तानां मीमांसान्यायानां विशदनिरूपिका **उपयुक्तमीमांसा,** भाट्टादिसिद्धान्तितप्रमेयप्रतिपादकः **मीमांसामेयसंग्रहः,** सेश्वरमीमांसायाः **सूक्ष्मार्थटीकानाम्नी** व्याख्या, मीमांसापादुकायाः **सत्पथसंचार-नाम्नी** व्याख्या, **वेदान्ते**—रङ्गरामानुजस्वाम्यादिकृतानां दशोपनिषद्भाष्यादीनां **परिष्कारनाम्नी** व्याख्या, अद्वैतामोदखण्डनरूपा **परमार्थप्रकाशिका,** शत-भूषणीखण्डनरूपं **परमार्थभूषणम्,** श्रीभाष्यव्याख्या **दर्पणः,** तत्त्वमुक्ताकलापस्य **अलभ्यलाभनामकं** व्याख्यानम् इत्यादयो ग्रन्था: एतैर्निर्माय प्रकाशिताः ।

एवं श्रीमद्वेदान्तदेशिकविरचितानामष्टोत्तरशतग्रन्थानां स्वव्याख्यया सह मुद्रणमेतैः संपादितम् । व्याप्रियमाणैर्बहुभिर्विद्वद्भिर्भूषितया कयाचित् संस्थयापि कर्तुमशक्यानि एकाकिभिरेतैः कृतानि क्रियमाणानि च कर्माणि पश्यतां सर्वेषां सचेतसां चेतांसि चित्रीयन्ते । आल्वार्पदाभिधेयैः भक्तसूरिभिः विरचितानां द्रविडभाषामयपद्यप्रबन्धानां द्रमिडव्याख्यानमप्येतैः कृत्वा प्रकाशितम् । अधुना चतुरशीतितमे वयसि वार्धके वर्तमाना अप्येते अहोरात्रम् अध्यापनग्रन्थनिर्माणप्रकाशनादौ व्यापृताः भारते अद्वितीयपण्डिताः प्रकाशन्ते ।

5......निगमनम्

एतैः 1941 तमे वत्सरे प्रकाशिता कुसुमाञ्जलेर्विस्तराख्या व्याख्या दशवर्षेभ्यः पूर्वमेव अलभ्या संवृत्ता । तदलाभेन विद्वांसः छात्राश्च महान्तं क्लेशमनुभवन्ति । अतस्तस्याः पुनर्मुद्रणमुचिततममित्यालोच्य राष्ट्रियसंस्कृत-संस्थानीयपुनर्मुद्रणयोजनायां तद्व्याख्यासहितो ग्रन्थोऽयमन्तर्भावितः तिरुपति-विद्यापीठेन पुनर्मुद्रितश्च विदुषामामोदाय कल्पेतेति द्रढीयान् नः विश्वासः । व्याख्याकर्तृभिर्वीरराघवाचार्यस्वामिभिरस्य पुनर्मुद्रणार्थमनुमतिर्दत्तेति तद्विषये तेभ्यः सनमोवाकं कार्तज्ञ्यमाविष्करोमि । तथा राष्ट्रियसंस्कृतसंस्थानेन एतत्पुनर्मुद्रणमनुमतमिति तदर्थं संस्थानाधिकारिभ्यः कृतज्ञतामावेदयामि । समुचितसमये पुनर्मुद्रणं कृतवतां मद्रपुरीस्थ—उदयमुद्रणालयाधिकारिणां कृतज्ञता आविष्क्रियते ।

तिरुपतिः
18-3-80

मल्लादि. द. बालसुब्रह्मण्यम्
प्राचार्यः

भूमिका

संवत्सरद्वयादारभ्य प्रतन्यमानेन परदेशीयपारस्परिकसंग्रामेण पत्रादिकमधिकमूल्यमलभ्यञ्च संवृत्तमिति ग्रन्थमुद्रण एव सुबहु व्ययितवता मया किञ्चिदेव संप्रति निवेद्यते । अस्य न्यायकुसुमाञ्जलिप्रकरणस्य प्रणेता न्यायाचार्यः श्रीमान् उदयनः तत्पश्चात्तनैस्सर्वैरपि तार्किकैरसमकण्ठमाचार्यपदेनाभिष्टुतस्तथा किल सुप्रसिद्धः, यथा परमर्षिबोधायनादिप्रचारितस्य भगवद्बादरायणसिद्धान्तस्य विशिष्टाद्वैतस्य प्रतिष्ठापकैः परस्सहस्रप्रचण्डपण्डितपरमैकान्तिबृन्दवन्दितपदारविन्दैः जगद्गुरु श्रीभगवद्रामानुजाचार्यचरणैः स्वपरमान्तरङ्गशिष्यः श्रीमान् (किडम्बि आच्चान्) प्रणतार्तिहरो वेदान्तोदयनविरुदेन मानितः, 'यथा न्याये स उदयनः, तथा वेदान्तेऽयं अनन्यसामान्यं वैशिष्ट्यं लभत ' इत्यभिसंधाय । एतद्विरुदप्रदर्शनञ्च स्वयं श्रीमन्निगमान्तमहादेशिकैरप्यकारि श्रीमति रहस्यत्रयसारेऽन्ते, 'इति यतिराजमहानसपरिमलपरिवाहवासितां पिबत । विबुधपरिषन्निषेव्यां वेदान्तोदयनसंप्रदायसुधाम्'॥ इति । यद्यपि श्रीमन्निगमान्तमहादेशिकाः, तदाचार्याः न्यायकुलिशनिर्मातारः श्रीवादिहंसाम्बवाहाश्चोदयनाशयं तत्र तत्रानूद्य खण्डयन्ति, तथापि ततो भूयस्तमाद्रियन्तेऽपि ॥

अस्य स्थितिकालः, एतत्कृतलक्षणावलीग्रन्थान्तगते ' तर्काम्बराङ्कप्रमितेष्वतीतेषु शकान्ततः । वर्षेषूदयनश्चक्रे सुबोधां लक्षणावलीम् ' ॥ इति श्लोके ९०६ शकाब्दे अनेन लक्षणावल्याः कृतत्वनिर्देशात्स्पष्टमेव ज्ञायते । अयञ्च मीमांसकमूर्धन्यात्पार्थसारथिमिश्रादर्वाचीन इति तृतीयस्तबके अनुमानार्थापत्त्यादिषु तद्दृष्टपद्धतिपरिहरणात्, पञ्चमे तदभिमताभिधाविधिपक्षस्य विशिष्य खण्डनाच्चावसीयते । अयं शब्दप्रमाणविषये प्राभाकरमतखण्डनावसरे प्रकरणपञ्चिकाकारं शालिकानाथं, ' गौडमीमांसकस्ये ' ति परिहसतीति अयं न गौडस्स्यादिति तर्क्यते । दीधितिकारश्रीरघुनाथशिरोमणिकालादारभ्यैव वङ्गदेशेष्वधिकस्तर्कप्रचारः; ततः प्राक्तु मैथिलदेश एवेति हेतोरुदयनोपि मैथिल एवेति मन्यन्ते । पुराणवचनमपि तत्रानुकूलम् । गौडत्वेन शालिकानाथपरिहसनात्पञ्चगौडविलक्षणो द्राविडोऽयं मिथिलां प्राप्त इत्यपि संभावयेयुः । अस्मै च बौद्धादिबाह्यनिरासिने जगन्नाथः पुरुषोत्तमः स्वालयकवाटं स्वयमेव विघटितं विधाय स्वसेवां कदाचिददादिति तत्पुराणगता कथा अस्य महात्मनो भगवत्प्रावण्यातिशयं दर्शयति । न्यायवार्तिकपुस्तकभूमिकायां भविष्यपुराणात्रिंशाध्याय उद्धृतो द्रष्टव्यः । कुसुमाञ्जल्यादिगतश्लोकदर्शनेऽयं विशिष्य शिवभक्त इति बुध्येत । तार्किकसरण्या तु, तदा तदा कार्यार्थविचित्रशरीरपरिग्रहसंभवेपि स्वभावतोऽशरीर एवेश्वरः, ब्रह्मविष्णुरुद्ररूपाणि सृष्टिस्थितिसंहारविशेषार्थमिति नास्य क्वचिन्निर्भर इति मन्यते । अत एव वासुदेवविषयाणि गीतावचनानि बहुलं भगवत्प्रशंसायै पञ्चमादौ स्तबके उदाजहार । अयं विष्णोरंश इति पूर्वदृष्टपुराणवचनम् ।

अस्य मतम् । यद्यप्ययं कुसुमाञ्जल्यारम्भे 'शुद्धबुद्धस्वभाव इत्यौपनिषदा' इति अद्वैतमतं सर्वमतप्रस्तावे प्रथमं दर्शयति । पञ्चमस्तबके, प्रपञ्चं पुरस्कृत्य निष्प्रपञ्चतयोपनिषत्सु इत्याह । द्वितीये, ब्रह्मपरिणतिरिति भास्करगोत्रे युज्यत इति भास्कराद्वैतेऽनादरमाविष्करोति । आत्मतत्त्वविवेके, 'न ग्राह्यभेदमवधूय धियोऽस्ति वृत्तिः तद्बाधने बलिनि वेदनये जयश्रीः' (५२९) इति अद्वैतमतस्य बलित्वं जयश्रीमत्त्वं च मुक्तकण्ठं कीर्तयति । अथापि नायमद्वैती, यतः स्वातन्त्र्येण प्रवर्तितेऽपि कुसुमाञ्जलौ आत्मतत्त्वविवेके च सर्वथा न्यायनयमेवानुरुध्य सर्वं स्थापयति । अद्वैतश्रवणमेव सम्यगित्यध्यवस्यन् कथं हि न्यायनयेन श्रवणानन्तरभाविमननं निरूपयेत् ? तृतीयस्तबके च 'सर्वं मिथ्या भविष्यतीति वाक्यव'दिति अनतिप्रसङ्गेऽपि मिथ्यात्वपक्षं दूषयति । एवमात्मतत्त्वविवेकेऽपि । विशिष्टाद्वैतिमर्यादां मनसिकृत्येव च क्वचिदाह 'सर्वोपेशनिबन्धनश्च सर्वतादात्म्यव्यवहारः, आत्मैवेदं सर्व' (५५) मिति । आत्मतत्त्वविवेकेऽपि पूर्वोपात्तश्लोकात्पूर्वमिदं वाक्यम् , 'प्रविश वा अनिर्वचनीयख्यातिकुक्षिम् , तिष्ठ वा मतिकर्दममपहाय न्यायनयानुसारेण नीलादीनां पारमार्थिकत्वे' इति । तेनानिर्वचनीयख्यातिपक्षेऽपि मतिकर्दममावेदयति । किं बहुना आत्मतत्त्वविवेकान्ते सर्वश्रुत्यैकरस्यं न्यायनयेऽभिसंधायान्येषां मतानां चार्वाकादीनां, अद्वैतस्यापि कतिपयश्रुतिवाक्यादरेण प्रवृत्तत्वं, तेषां मतानामांशिकमुपयोगं, तेषां परप्रामाणिकार्थदूषणतात्पर्याभावं, तत्तन्मतस्य दृश्यमानसर्वरूपेणाग्राह्यत्वं, हेयत्वञ्च गम्भीरं संक्षिप्य भाषमाणः स्वस्य तार्किकद्वैतवादित्वं स्पष्टमेव बोधयति । 'तद्बाधने बलिनी' ति श्लोकेऽपि नीलपीतादीनां वस्तूनां बाधपक्षे वैलक्षण्याभावात् ज्ञानक्षणिकत्वसाधकयुक्त्यभावात् स्थिरज्ञानवादिवेदान्तपक्ष एव विजयेतेति बौद्धमध्ये क्षणिकविज्ञानसंततिरूपात्मवादिन पक्षात् अद्वैतपक्षस्य बलित्वमुच्यते; न तु सर्वपक्षापेक्षया । यदा तु बलवद्बाधकस्य दुर्वचत्वान्नीलपीतादीनामबाधनमेव, तदा सुतरां न विज्ञानमात्रवादिपक्ष इति न्यायपक्षस्य बलिष्ठत्वमुत्तरार्धेनाह – 'नो चेदनिन्द्यमिदमीदृशमेव विश्वं तथ्यं तथागतमतस्य तु कोऽवकाशः' इति । प्रपञ्चं पुरस्कृत्य निष्प्रपञ्चत्वेनेत्येतदपि– जीवात्मनां स्वभावतोऽशेषविशेषगुणशून्यत्वात्तेषां तद्दशाप्राप्त्यर्थं प्रपञ्चं निर्मिमाणस्य न सर्वदा स्वभाविकं प्रपञ्चनिर्माणैदम्पर्यम् , नापि सृज्यमानप्रपञ्चाधीनो लेपस्तस्येति आत्मनां अन्ततश्शुद्धस्वत्वदस्याप्यन्ततः कार्यविरहान्निष्प्रपञ्चत्वमित्येवं बोधयतीति । दोषसत्यत्वं विना दुर्वचं मिथ्यात्वमित्यप्यात्मतत्त्वविवेके । अलं बहुना ।

अनेन विरचिता अन्ये ग्रन्थाः बौद्धाधिकारापरनामा आत्मतत्त्वविवेकः, प्रबोधसिद्धिः, तात्पर्यटीकापरिशुद्धिः, किरणावली, लक्षणावली च । प्रबोधसिद्धिरेवबोधसिद्धिर्बोधशुद्धिर्न्यायपरिशिष्टमिति ॥

अस्य च न्यायकुसुमाञ्जलिप्रकरणस्य वरदराजकृता बोधनीनाम्नी व्याख्या वर्धमानोपाध्यायकृता प्रकाशाख्या च संप्रत्युपलभ्यते । आत्मतत्त्वविवेकादेरिवास्यापि व्याख्या दीधितिकारादिभिः कृता न वेति न ज्ञायते । प्रकाशव्याख्यानञ्च मकरन्दनामकं श्रीरुचिदत्तकृतमुप-

लभ्यते। तत्र व्याख्याने (३. स्त. २१. पु.) निर्दिष्टं परिमलाख्यं प्रकाशव्याख्यानं तु नोपलभ्यते। प्रकाश एव प्रचारे वर्तते, न तथा बोधनी। तत्र चतुर्थपञ्चमस्तवकव्याख्यानममुद्रितत्वाद् दुर्लभमपि। सकलशास्त्रपारदृश्वनो दुरूहतर्ककल्पनाकल्पतरोर्गभीरभाषिण उदयनस्य ग्रन्थं सर्वशास्त्रविदपि न कश्चिद् व्याख्यानं विना प्रायो बोद्धुं प्रभवति। तत्र च प्रकाशव्याख्याने स्वपितृचरणगङ्गेशोपाध्यायकृततत्त्वचिन्तामणिग्रन्थोक्तानां, तदुपरि स्वाभिमतानाञ्च बहूनां घटनाद्वर्धमानो न मूलापेक्षितमात्रनिरूपणैदम्पर्यमुवाह। तत्र संग्रहेण मूलार्थकथनादपर्याप्तिश्च। अतश्च बहोः कालात्प्रचारमनागतस्य, अद्यत्वे प्रायःपञ्चविंशत्या वत्सरैर्विश्वविद्यालय इह पाठ्यतया कल्पितस्य न्यायकुसुमाञ्जलिग्रन्थस्य यथाश्रुतार्थं बहुतर्कमीमांसादिग्रन्थाध्ययनसिद्धबुद्धिवैशद्यबलेन प्रकाशसाहाय्येन च बुद्धवता, पश्चाद्वेदान्तग्रन्थाध्ययनसमेधितसंपारिपक्वमतिना मया पाठनावसरेषु तत्तद्व्याख्यानादृष्टमप्यर्थं तत्रतत्र परिशीलितवता सरलविशदया सरण्या सर्वार्थबुबोधयिषया कुसुमाञ्जलिविस्तरोऽयं शनैश्शनैस्तृतीयस्तवकपर्यन्तं कृतः वर्षत्रयात्प्राक् मध्येमध्ये श्रीवेङ्कटेशकल्याणचरितकाव्यस्य परमार्थप्रकाशिकादेश्च निर्माणादलब्धावकाशेन ततः क्रमेण समाप्य संप्रति मुद्रितस्सारासारविवेकविचक्षणेभ्यस्सादरमुपह्रियते। प्रौढतमस्यास्य मूलग्रन्थस्य प्रतीकधारणेन व्याख्याने संपिण्डितार्थोपि विस्पष्टं प्रदर्शनीय इति व्याख्यानमत्यन्तविस्तृतं भवेत्, प्रेक्षणे मुद्रणे च क्लेशस्स्यादिति च च्छायाव्याख्यां व्यरचयम्। मूलोपयोगायैव च तत्र तत्र स्वतन्त्रविचारमप्यकरवम्। तदपि सहृदयास्संप्रष्टुमर्हन्ति। तत्रतत्र पूर्वव्याख्यानं, प्राचीनं एष्याटिक्सोसैटिमुद्रितपुस्तकञ्च विलोक्य विचिन्त्य मूलपाठ इह यथाशक्ति शोधितः। ऐषियाटिक्पुस्तकस्य. क.१ इति, तत्रैवाधोदर्शितपाठविषये क.२. इति, चौखाम्बापुस्तकस्य ख. इति च संज्ञाऽत्र कृता। तत् मूलमात्रश्रद्धालूनामपीदं मुद्रणमादरार्हं भविष्यति। तत्र तत्र विस्तरोक्तानुगुणत्वमन्यथात्वं पाठसाक्षित्वं च दर्शयितुं व्याख्यान्तरभागोपि टिप्पणे न्यवेशि। क्वचिन्मूलार्थवैशद्यमपि स्वयं तत्राकारि। अयञ्च ग्रन्थः तृतीयस्तवकेऽनुमानघट्टपर्यन्तं श्रीपञ्चनदश्रीनिवासमुद्रणालये मुद्रितः। तदुत्तरभागश्च शीघ्रं निर्वर्तनायात्रैव वाणीमुद्रणालये मुद्रितः। तत् उभयेष्वपि प्रीतिपूर्वं कृतवत्सु कृतज्ञस्सन् अभिनवपरिष्कारमिमं ग्रन्थमधुना प्रकाशयामि। तदनुगृह्णन्तु सन्तो महान्तः इति सविनयं प्रार्थये॥

श्रीरङ्गलक्ष्मणमुनिर्महितो ममैष त्र्यन्तशास्त्रगुरुरास्ति यतः प्रसन्नः।
देवः प्रसीदति ततो जगदन्तरात्मा मन्ये जनेभ्य इह सद्गुणदर्शनाय॥

तिरुपति।
22—9—41

इति ग्रन्थकर्ता
ति. वीरराघवाचार्यः

कृत्स्नकुसुमाञ्जलिस्थूलविषयसूची।

समूलकारिकासूची ॥

तत्त्वप्रदानाः

उत्तरभागकारिकासूची ।

॥ श्रीः ॥

न्यायकुसुमाञ्जलिः ॥

प्रथमस्तवकः ।

सत्पक्षप्रसरस्सतां परिमलप्रोद्बोधबद्धोत्सवो
विम्लानो न विमर्दनेऽमृतरस १ प्रस्यन्दमाध्वीकभूः ।
ईशस्यैष निवेशितः पदयुगे भृङ्गायमाणं भ्रमत्
चेतो मे रमयत्वविघ्नमनघो(घं) २ (घ)न्यायप्रसूनाञ्जलिः ॥ १ ॥

श्रीगुरुभ्यो नमः ॥

कुसुमाञ्जलिविस्तरः ॥

अयमनघविभूतिर्वत्सलो वेङ्कटाद्रौ विनतजनविशिष्टाभीष्टविश्राणनाय ।
श्रुतिशतशुभतर्कैर्व्यक्तरूपः श्रियेह स्वयमधिगतवासः श्रीनिवासः श्रियै नः ॥

वेदापहारि मधुकैटभदर्पहारि वेधोमुखार्तिपरिहारि विहारि लक्ष्म्या ।
तत्किञ्चिदच्छसरसीरुहधाम धाम तुङ्गं तुरङ्गममुखं शुभमातनोतु ॥

कणचरणमक्षचरणं कृतकृत्यं योऽकृत स्वयं कृतिभिः ।
न्यायाचार्यः श्रीमान् उदयननामा जगद्गुरुर्जयति ॥

१ प्रकाशे, 'अमृतं मोक्षस्तत्र रस इच्छा ; रस्यमानममृतमिति यावत् । तस्य प्रस्यन्दः उत्पत्तिः तदेव माध्वीकं तस्य भूः' इति । २ बोधन्यां, 'अनघमिति व्यस्तपाठे चेतोविशेषणं, क्रियाविशेषणं वा' इति ।

अदृष्टमधितिष्ठति स्वयमदृष्टबोधिश्रुतिप्रणेतरि कथञ्चिदप्यनधिगम्यबाधाङ्कुरे ।
प्रमातरि तथा बहुप्रबलतर्कसिद्धेऽर्पितः परे स्तवकपञ्चकप्रथित एष पुष्पाञ्जलिः ॥

शङ्कोत्तरविवेकार्थे नव्यशैल्या विशुद्धया ।
अत्यक्तप्राच्यमार्गोऽहं व्याकुर्वे कुसुमाञ्जलिम् ॥

प्रतीकधरणे प्रायः क्लेशं द्रष्टृषु पश्यता ।
कारिकाभिन्नभागेषु च्छायाव्याख्या विधीयते ॥

तत्रभवानुदयनो न्यायाचार्यस्तर्कशास्त्रं प्रणीतवतोर्महर्षिकणादगौतमयोः परमोद्देश्यभूतं आत्मेश्वरविवेचनं अद्भुतप्रबन्धमुखेनाऽऽधित्सुः आत्मतत्त्वविवेकं प्रणीय संप्रति विशिष्य सर्वेश्वरमननरूपं न्यायकुसुमाञ्जलिनामकं ग्रन्थमारभमाण इष्टदेवतावस्तुनिर्देशरूपं मङ्गलमाचरति— **सत्पक्षे**ति । अत्र **अमृतरसे**त्यनेन प्रयोजनं, **ईशस्ये**ति विषयः, **निवेशित** इति सम्बन्धः **भ्रमचेतो मे** इत्यधिकारी चादर्शि । **न्यायाः** समस्तरूपोपपन्नलिङ्गप्रतिपादकवाक्यानि ; तान्येव कुसुमानि तेषामञ्जलिः । न्यायपक्षे अञ्जलिशब्देन ग्रन्थो विवक्षितः । करद्वयकृतकुसुमसन्निवेशविशेष इवायं न्यायनिकुरुम्बसन्निवेशात्मा ग्रन्थः । एष कुसुमाञ्जलिर्भ्रमतो मच्चेतोभृङ्गस्य भ्रमनिवर्तनेन रतिहेतुर्भवत्विति वाक्यार्थः । सत्पक्षप्रसरत्वादीन्युभयानुगतानि विशेषणानि ।

तत्र पुष्पाञ्जलिपक्षे **सत्पक्षप्रसरत्वं** समीचीनदलविकासवत्त्वम् । **सतां परिमलप्रोद्बोधबद्धोत्सवत्वं** अनुपहतघ्राणानां सौरभसंवेदनकल्पितप्रीतिकत्वम् । **विमर्देऽप्यविम्लानत्वं** दिव्यपुष्पाञ्जलित्वात् । **अमृतरसप्रस्यन्दमाध्वीकभूत्वं** अमृततुल्यरस्यताकप्रस्यन्दमानमकरन्दस्थानत्वम् । **अनघत्वं** शास्त्रप्रतिषिद्धविलक्षणत्वात् । **ईशस्य पदयुगे निवेशितत्वं** अर्चनाबुद्ध्याऽर्पितत्वम् । **भृङ्गस्य, भ्रमत्वं** अमधुममधुविवेकविरहेणततस्ततस्सञ्चारित्वम् ॥ न्यायग्रन्थपक्षे तु **सत्पक्षप्रसरत्वं** निर्दुष्टपक्षताशालिधर्मिबोधकत्वम् । अनेन पक्षसत्त्व-सपक्षसत्त्व-विपक्षासत्त्व-अबाधितत्व-असत्प्रतिपक्षितत्वात्मकेषु पञ्चसु रूपेषु हेतोरपेक्षितेषु पक्षसत्त्वमस्तीति बोधितम् । **हेतोः परिमलो** नाम सपक्षसत्त्वविपक्षासत्त्वसम्पादितान्वयव्यतिरेकव्याप्तिमत्तारूपो विशेषः ; सत्सु परामर्शकुशलेषु तद्बोधनेन सम्पादितानन्दत्वमेव **बद्धोत्सवत्वम्** । **विमर्देने न विम्लान** इति अबाधितत्वासत्प्रतिपक्षितत्वात्मकावशिष्टरूपद्वयमुक्तं भवति । **अमृतरसप्रस्यन्दमाध्वीकभूत्वम्** माध्वीकतुल्यमोक्षेच्छाप्रवाहविधायित्वम् ; कुतर्कविच्छिन्नमोक्षेच्छादाढ्यकरणात् ; यद्वा मोक्षेच्छाधीनप्रवृत्तिकयोगाभ्यासरसात्मकमाध्वीकवहत्वम् । **एषः** **पञ्च-**

स्वर्गापवर्गयोर्मार्गमामनन्ति मनीषिणः ।
यदुपास्तिमसावत्र परमात्मा निरूप्यते ॥ २ ॥

स्तबकात्मा ; यत्रैकैकस्तबके कारिकोक्ता हेतवः प्रसूनानि, अवान्तरविचारहेतवो दलानि । **ईशस्य पदयुगे** निवेशितत्वं तत्प्रतिपादकत्वम् ॥ ननु तार्किकमते ईश्वरस्याशरीरत्वात् कथं पदयुग इत्युच्यते ? सत्यम्, ईश्वरस्य सृष्ट्यर्थशरीराभावेऽपि सम्प्रदायप्रवर्तनाय कथञ्चित्तात्कालिकशरीर-परिग्रहस्याभ्युपगतत्वात् ध्यानालम्बनतया कल्पितप्रतिमादिपदविषयकत्वाद्वा न दोषः । यद्वा पदयुगे पदयोरीश्वरबोधकयोः प्रमाणतर्कयोर्युगे ; अथवा पदयोरीश्वरानुमानयोः शब्दार्थरूप-योर्युगे ; श्रुतिरूपशब्देन कार्यादिरूपार्थेन च हीश्वरमनुमास्यति ॥ पूर्वार्धे प्रथमेन विशेषणेन पक्षधर्मताविरोधिनां दोषाणां, द्वितीयेन व्याप्तिविरोधिनां , तृतीयेनानुमितिविरोधिनां चाभावस्य ज्ञापनेनार्थदोषराहित्यावगमात् **अनघपदं** ग्रन्थे शब्ददोषराहित्यपरम् । तत्रापि शब्दस्य स्वरसतो विवक्षितार्थाप्रतिपादकत्वरूपदोषराहित्यं 'निवेशित' इत्यनेन सूचितमिति अपशब्द-राहित्यमत्र विवक्षितम् । चेतसो **भ्रमत्त्वं** न्यायपरिशीलनात् प्राक् विपरीतबुद्धिमत्त्वं सन्देहवत्त्वं वा । यद्वा **भ्रमत्** भ्रान्तिजननयोग्यम् अविघ्नं रमयतु भ्रमप्रमासाधारणत्वात् कदाचित् भ्रान्तिं लभेतापि ; तथा विघ्नमनुत्पाद्य निश्चिततत्त्वं करोतु । अथ वा एष मे न्यायप्रसूनाञ्जलिः पठितॄणां भ्रमच्चेतोऽविघ्नं रमयतु । यद्वा पदयुगेऽविघ्नं निवेशित एष ग्रन्थश्चेतो रमयतु ; अनेनाविघ्नसमाप्तिरभ्यर्थिता भवति । **अनघ**मिति पाठे चेतसः साहजिक-मुचितार्थप्रावण्यमुच्यते । ईदृशग्रन्थशतावतारेऽप्यघिचेतोरमणमशक्यम् ; अनघं तु चेतो रमयितुमयं ग्रन्थः पर्याप्त इति ग्रन्थान्ते दर्शयिष्यमाणोऽर्थ इह सूच्यत इति संक्षेपः ॥ १ ॥

नन्वीश्वरसाधकन्यायग्रन्थस्यामृतरसावहत्वमुक्तं न सम्भवति ; स्वात्मस्वरूपस्य तद्गतपुण्या-पुण्यानां च योगमहिम्ना प्रत्यक्षे सति नित्यनैमित्तिकाचरणेन युगपदेव स्वानुभाव्यमनुजभुजग-विहगादिसर्वशरीरपरिग्रहेण च पुण्यपापे विधूय 'दुःखजन्मे'ति सूत्रोक्तरीत्या पुमान् मुक्तो भवति । तत्रेश्वरज्ञानं क्वोपयुज्यते इति चेन्नैवं शङ्क्यम्—यस्योपासनं स्वर्गादेस्त्रिवर्गस्य अपव-र्गस्य च हेतुं शास्त्रविदो वदन्ति , स उपासनार्थं ज्ञातव्यः परमात्मा निरूप्यते । ईश्वरोपासन-जनिततदनुग्रहाभावे स्वात्मयोग एव न सुकरः , नतरां च स्वात्मगतपुण्यापुण्यादिसाक्षात्कारः । तथा च गीयते—'ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्' (८. १३) इत्यादि । अतस्तन्निरू-पणमावश्यकम् । श्लोके उपास्तिशब्दः क्तिपा निर्दिष्टो धातुपरस्सन् उपासनारूपार्थलक्षक इति ध्येयम् ॥ २ ॥

[2] इह यद्यपि यं कमपि पुरुषार्थमर्थयमानाः— शुद्धबुद्धस्वभाव इत्यौपनिषदाः, आदिविद्वान् सिद्ध इति कापिलाः, क्लेशकर्मविपाकाऽऽशयैरपरामृष्टो निर्माणकायमधिष्ठाय संप्रदायप्रद्योत१(वर्त)कोऽनुग्राहकश्चेति पातञ्जलाः, लोकवेदविरुद्धैरपि निर्लेपः स्वतन्त्रश्चेति महापाशुपताः, शिव इति शैवाः, पुरुषोत्तम इति वैष्णवाः, पितामह इति पौराणिकाः, यज्ञपुरुष इति याज्ञिकाः, २ सर्वज्ञ इति सौगताः, निरावरण इति दिगम्बराः, उपास्यत्वेन देशित (नोदित) इति मीमांसकाः, लोकव्यवहारसिद्ध इति चार्वाकाः, ३ यावदुक्तोपपन्न इति नैयायिकाः, किं बहुना—कारवोऽपि यं विश्वकर्मेति —उपासते, तस्मिन्नेवं जातिगोत्रप्रवरचरणकुलधर्मादिवदासंसारं प्रसिद्धानुभा(भ)वे भगवति भवे सन्देह एव कुतः ? किं निरूपणीयम् ?—

---

[2] यद्यपीह निरूपण एवमाशङ्क्येत–

अनपेक्षितमिदं न्यायतः परमात्मनिरूपणम् ; 'नानुपलब्धे न निर्णीतेऽर्थे न्यायः प्रवर्तते किं तु संशयितेऽर्थे' इति न्यायेन सन्देहे सत्येव निरूपणस्य कार्यत्वात् ; परमात्मनि च सन्देहाभावात् । धर्मार्थकाममोक्षेषु यं कमपि पुरुषार्थमपेक्षमाणाः—निर्मलस्वप्रकाशस्वभाव इत्येवंरूपेणौपनिषदाः, सर्गादौ विद्वान् अणिमाद्यष्टसिद्धिसम्पन्न इति सांख्याः, अविद्याऽस्मितारागद्वेषाभिनिवेशरूपैः क्लेशैः विहितनिषिद्धरूपेण कर्मणा ब्राह्मणादिजाति-आयु-र्भोगरूपैस्त्रिविधैर्विपाकैः फलपर्यन्तास्थायिपुण्यपापात्मकैराशयैश्चासंसृष्टो वेदादिनिर्माणार्थं शरीरमाश्रित्य वेदादिसम्प्रदायप्रकाशकः फलप्रदानेनानुग्राहकश्चेति योगमतस्थायिनः, दृष्टादृष्टानिष्टहेतुभिर्लोकवेदविरुद्धैरपि कर्मभिरनुष्ठीयमानैरनाधेयफलसङ्गो जगत्कर्ता चेति महाव्रतचारिणः पाशुपताः, अन्वर्थशिवनामधेय इति शैवाः, सर्वज्ञत्वसर्वशक्तित्वादिना पुरुषेषूत्तमः पुरुषः सन् अन्तर्यामी शरीरात्विशिष्टःसन्नुत्तमः अखिलहेयप्रत्यनीककल्याणगुणैकतानोऽप्राकृतदिव्यमङ्गलविग्रहः श्रीमन्नारायण इति वैष्णवाः, पितामहश्चतुर्मुख इति पौराणिकाः, यज्ञरूपी यज्ञाराध्यः पुरुष इति याज्ञिकाः,

---

१ शं- 'संप्रदायो वेदो घटपटादिव्यवहारश्च ; तत्प्रवर्तकः ; वक्ता प्रवक्ता च वेदे, कर्ता ग्राहयिता चान्यत्र ।' २ 'निरावरण इति दिगम्बराः सर्वज्ञ इति सौगताः' इति बोधनीपाठक्रमः । ३ अन्ते नैयायिकमतनिवेश एव स्वरसः सर्वव्याख्यासंमतश्च । प्र- 'यावदुक्तेषु यदुपपन्नं सर्वज्ञत्वादि तेनोपपन्न इति मध्यमपदलोपी समासः । यावदुक्तेषूपपन्नः प्रामाणिको धर्मो यस्येति बहुव्रीहिर्वा' इति । यावच्छब्दस्तच्छब्दनिरपेक्षः सकलार्थक इति युक्तम् । विग्रहो विस्तरे द्रष्टव्यः ।

[3] तथाऽपि—

न्यायचर्चेयमीशस्य मननव्यपदेशभाक् ।
उपासनैव क्रियते श्रवणानन्तरागता ॥ ३ ॥

श्रुतो हि भगवान् बहुशः श्रुतिस्मृतीतिहासपुराणेष्विदानीं मन्तव्यो भवति ; 'श्रोतव्यो मन्तव्य' इति श्रुतेः ;

'आगमेनानुमानेन ध्यानाभ्यासरसेन च ।
त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तमम् ॥' इति स्मृतेश्च ।

[4] तदिह संक्षेपतः पञ्चतयी विप्रतिपत्तिः—अलौकिकस्य परलोकसाधनस्याभावात् ; अन्यथाऽपि परलोकसाधनानुष्ठानसम्भवात् ; तदभावाऽऽवेदकप्रमाणसद्भावात् ; सत्त्वेऽपि तस्याप्रमाणत्वात् ; तत्साधकप्रमाणाभावाच्चेति ॥

क्षणिकसन्तानरूपत्वसांवृतिकसत्यत्वादिना सर्वविदेति बौद्धाः, धर्माधर्मशरीरात्मकावरणरहित इति जैनाः, जपहोमादिरूपोपासनविषयत्वेन विहितमन्त्रादिरूप एवेति मीमांसकाः, प्रजापालकमहाराजरूपेण वा आलयादिष्वभिमन्यमानप्रतिमादिरूपेण वा विलक्षणप्रभावशालिश्रीरामकृष्णादिरूपेण वा लोकव्यवहारसिद्ध इति लोकायतमतस्थाः, उक्तेषूपपन्नानि यावन्ति यस्य स युक्तियुक्तसर्वांशविशिष्ट इति नैयायिकाः—किं बहुना तत्त्वविचारप्रवृत्तवादिवृन्दाशयवर्णनेन—अतत्पराः कर्माजीवाः शिल्पिनोऽपि विश्वकर्मेत्येवंरूपेण, यमुपासते ; तस्मिन् ब्राह्मणत्वादिजाति- श्रीवत्सादिगोत्र-भार्गवादिगोत्रर्षिगणकीर्तनरूपप्रवर-शाखापरपर्यायचरण-सत्सन्तानादिरूपकुल - धर्माधर्मादिवत् सृष्टिमारभ्य प्रसिद्धमहिमनि परमात्मनि विषये विचाराङ्गभूतसन्देह एव कुतः ? कुतस्तरां तदज्ञानम् ? अतः किं निरूपणीयमिति—

[3] तथाऽप्याचार्यमुखादर्थग्रहणरूपश्रवणानन्तरकर्तव्या मनननाम्नी न्यायैः परीक्षणरूपेयमुपासना क्रियत इति न कश्चिद्दोषः । उपासनं नामोत्कृष्टं निकृष्टेन प्रीत्या यद्यत्क्रियते तत्सर्वम् । 'श्रोतव्यो मन्तव्य' इति श्रुतिर्हि श्रुतिस्मृतीतिहासपुराणेभ्यो गुरुमुखाद्बहुशः श्रुतस्य भगवतो मननं विदधाति । स्मृतिश्च प्रथमत आगमेन, पश्चादनुमानेन ततः प्रीतिरूपापन्नध्यानावृत्त्या एवं प्रकारत्रयेण सम्पादितप्रज्ञः साक्षात्कारापरपर्यायमुत्तमं योगं लभत इति ब्रुवती मननस्य आवश्यकतां दर्शयति । मननं च हेतुभिरनुचिन्तनम् ; तदत्र क्रियत इति ॥

[4] तदिह संक्षेपतः पञ्चतयी विप्रतिपत्तिः । ननु पूर्वं 'परमात्मा निरूप्यत' इति परेभ्यस्तद्व्युत्पादनं प्रतिज्ञातम् । अथ कस्यापि सन्देहाभावाद्व्युत्पादनं व्यर्थमित्याक्षेपे शास्त्रविहितं मननं स्वयमनुष्ठीयत इति समाधानमुक्तम् । पुनश्च 'तत्र पञ्चतयी विप्रतिपत्ति' रिति संशयोपन्यासः क्रियते । एवं च प्रतिज्ञातत्यागः, पुनस्त्यक्तनिरूपणस्वीकारः, अविद्यमानसन्देहोपन्यास-

श्चेति दोषा इति चेन्न—व्युत्पादनं प्रतिज्ञातं न त्यक्तमिति न प्रथमदोषद्वयम् ; न च संशयाभावे न्यायप्रवृत्त्ययोगात् किमिति निरूपणारम्भः, कथं च तर्हि मननं क्रियत इति शङ्क्यम्—एवं तात्पर्यात् । तत्तद्वादिनामीश्वरविषये कथञ्चिज्ज्ञानसद्भावात् सन्देहो नास्त्येव । एवं श्रुत्यादिमुखेन श्रुतत्वात् स्वस्यापि सन्देहो नास्ति । एवमपि मननं भवितुमर्हति । अत एव श्रोतव्यो मन्तव्य इति श्रुतार्थे मननमाम्नायते । न च सिद्धसाधनं दोषः ; परव्युत्पादनार्थन्यायप्रयोग एव तस्य दोषत्वात् । स्वयं सिषाधयिषया च पुनः पुनः साधनसम्भवात् । अत एव 'मन्तव्यश्चोपपत्तिभि'-रित्यनुमितानुमानमपि स्मर्यते । सुनिश्चितस्याप्यर्थस्य युक्तिभिरजस्रमवधारणमासाक्षात्कारं पुंसः सहजो धर्मः । अतः श्रुतमेव संप्रति मन्यते । एवमपि येऽन्य एवं श्रुतमर्थं मन्तुं व्यवस्यन्ति परं तु नानागुल्मकण्टकाकीर्णे तर्कारण्ये पदं निधातुं न पारयन्ति—तेषामुपकारायेयमस्मन्मननपद्धतिर्ग्रन्थरूपेण निबद्ध्यते । इदमेव प्राक् प्रतिज्ञातं निरूपणमपि । यत्तु कथं पश्चाद्विप्रतिपत्त्युपन्यास इति——तत्रोच्यते—न हि विप्रतिपत्तिरित्यस्य संशयस्तज्जनकवाक्यमिति वाऽर्थः ; किं तु विरुद्धार्थप्रतिपादकवाक्यद्वयं विप्रतिपत्तिः । अतः साध्यकोटिविपरीतकोट्युल्लेखाद्विप्रतिपत्तित्वमक्षतम् । किं च 'विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णय' इति सूत्रे न्यायप्रवृत्त्यङ्गतयोक्तस्य संशयस्य सार्वत्रिकत्वं नास्तीति, 'शास्त्रे वादे च विमर्शवर्ज'मिति भाष्य एवोक्तम् । अतस्तत्त्वनिरूपणार्थे ग्रन्थे संशयो नापेक्षितः । सुतरां च स्वकृतमनननिबन्धरूपेऽत्र । अतः श्रवणाधिगतानां मन्तव्यकोटीनां वस्तुतो यादृशकोटिविरोधित्वं तादृशकोट्युल्लेखार्थोऽयं विप्रतिपत्तिशब्दप्रयोग इति । अत्र 'यद्यपि-तथापी'त्यनेन वस्तुतो निरूपणीयत्वमस्त्येवेति सूच्यते । तदेवम्——तत्तद्वादिनां पृथक्पृथगसन्दिहानत्वेऽपि यथावस्थितार्थश्रवणानन्तरं सर्वमतदर्शिनो मध्यस्थस्य विरुद्धनानाप्रकारग्रहणेन सन्देहो भवेदेव । मननानन्तरमप्यातत्त्वसाक्षात्कारं मात्रया संशयानुवृत्तिरिति पक्षस्यानुपगमेऽपि मनननिष्पत्तिपर्यन्तं तदनुवृत्तिरस्तीति युक्तम् । किंच तैस्तैरन्यथाऽन्यथा गृहीतत्वात् स्थितमपि धर्मिज्ञानं शुक्तिरजताहमर्थशरीरभ्रमवन्न पुमर्थहेतुः । अतो भ्रमोऽपि निरस्यः । अतो नैयायिकोक्तयावदुक्तोपपन्नत्वविवेचनाय किमत्रोपपन्नमिति न्यायैश्शोधनरूपं मननं क्रियते । तेनोपपन्नप्रकारेष्वश्रद्धामलक्षालनं भवति । अतो निरूपणस्य कार्यत्वात् संशयविषयविपरीतकोटिपरविप्रतिपत्तिनिर्देशः कामं युज्यत इति ॥

एवं निरूपणीयत्वात्परमात्मनि विप्रतिपत्तयोऽवान्तरविप्रतिपत्त्यविवक्षया पञ्च प्रदर्श्यन्ते, अप्रत्यक्षस्य परलोकसाधनस्यादृष्टाख्यस्याभावात् ; ईश्वराभावेऽपि नित्यनिर्दोषवेदमूलकत्वाङ्गीकारेण वा वेदस्य कपिलादिकृतत्वाङ्गीकारेण वा परलोकसाधनयागाद्यनुष्ठानसम्भवात् ; ईश्वराभावसाधक-

प्रमाणसद्भावात् ; ईश्वरस्य सत्त्वेऽपि प्रमाणभूतत्वाभावात् ; ईश्वरसाधकप्रमाणाभावाच्चेति । कः पुनरिह पञ्चम्यर्थः ? उच्यते । इमास्तावत् पञ्चम्यन्तप्रतिपाद्याः पञ्च विपरीतकोटयः । तत्प्रतिपादकवाक्यं च विप्रतिपत्तिः । अथ बुद्धा शब्दरचनेति विप्रतिपत्त्यात्मकशब्दप्रयोगं कोटिज्ञानं कारणमिति कोटीनां विषयविधया जनकतावच्छेदकत्वात्प्रयोजकत्वमस्तीति तदेव पञ्चम्यर्थ इति । यद्वा इह ईश्वरोऽस्ति न वेति विप्रतिपत्तिरुक्तलौकिकसाधनाभावादिपञ्चहेत्वधीनत्वात् पञ्चतयी । तदधीनत्वं च तत्साधनास्तित्वविषयकत्वम् ।

इदमत्र बोध्यम्—अदृष्टाधिष्ठातृतया परलोकसाधनबोधकवेदोपदेष्टृतया क्षित्यादिकार्यकर्तृत्वेन चेश्वरः सिषाधयिषितः । तत्रालौकिकसाधनस्यैवाभावे सुतरां न तदधिष्ठातृतयेश्वरसिद्धिरिति चार्वाकप्रत्यवस्थानम् । अत्र प्रथमेऽवान्तरविप्रतिपत्तिविवेचने तु वेदोपदेष्टृत्वादिना तत्साधनमपि निरस्तं भवति । तथा हि—पर एव लोको नास्ति, यस्य साधनमन्विष्यत इति यदि ब्रूयात् तर्हि तद्बोधकस्य वेदस्य प्रामाण्याभावेन न तदुपदेष्टृतयाऽयं साधनीयः । यदि तु कार्यकारणभाव एव नास्ति, कुतः परलोकस्य साधनविचार इति शङ्केत, तदा सामान्यतः कार्यकारणभावस्यैवास्वीकारात् क्षित्यादिकर्तृतयेश्वरसाधनं दुष्करमिति । एवं सर्वथेश्वरनिराकरणं चार्वाकचिकीर्षितम् । तत्र च प्रथमविप्रतिपत्त्यन्तर्गता अवान्तरविप्रतिपत्तयः पञ्च । कार्यकारणभावस्यानङ्गीकारेण कार्यस्य कारणसापेक्षत्वाभावात्, क्वचित्सापेक्षत्वदर्शनेऽपि सर्वत्र तन्नियमाभावात्, सत्यपि नियमे सर्वत्रैकरूपकारणजन्यत्वसम्भवात्, विलक्षणविविधकारणावश्यकत्वेऽपि परलोकतत्साधनस्वीकारस्यानावश्यकत्वात्, आवश्यकत्वेऽपि यागदानादेरेव साधनत्वसम्भवेनात्मसमवेतादृष्टसद्भावे प्रमाणाभावाच्चेति । आसां निरसनेनात्र प्रथमविप्रतिपत्तिर्निरस्ता भवति ।

अथ मीमांसकस्य सांख्यादेश्च द्वितीया विप्रतिपत्तिः । तदवान्तरविप्रतिपत्तयस्तु—ज्ञानानां स्वतः प्रामाण्याङ्गीकारेण वेदप्रामाण्यसिद्धये तज्ज्ञतयेवाऽऽप्तोक्तत्वस्यानपेक्षितत्वात्, अन्यत्र सर्वत्र परतः प्रामाण्यसिद्धावपि वेदस्य नित्यत्वेन तत्प्रामाण्यस्य परायत्तत्वायोगात्, तत्प्रामाण्यज्ञप्तेश्च महाजनपरिग्रहबलादेव सम्भवात्, वेदानित्यत्वेऽपि अनादौ संसारे प्रवाहाविच्छेदेन सर्वदा तत्स्थितिस्वीकारेण तत्प्रणेतृतयेश्वरसिद्धेरयोगात्, सृष्टिप्रलयावश्यकतया प्रवाहनित्यत्वस्याप्यसंभवेऽपि कपिलादिकारुणिकमहर्षिकृतत्वेनैव प्रामाण्यसम्भवाच्चेति । अत्र अन्तिमा विप्रतिपत्तिः सांख्यादेः, अन्याः मीमांसकस्य । ततस्तृतीयस्तबके—यथाऽग्निरनुष्णः प्रमेयत्वादित्यनुमानं प्रत्यक्षप्रमाणबाधितम्, एवमीश्वरसाधकानुमानमपि प्रत्यक्षेणानुमानेनोपमानेन शब्देनार्थापत्त्या ऽनुपलब्ध्या वा बाधितुं शक्यमिति—पुनर्मीमांसकस्य तृतीया विप्रतिपत्तिः । तत्र प्रत्यक्षादि-

[5] तत्र न १ प्रथमः कल्पः-यतः—

२ सापेक्षत्वादनादित्वाद्वैचित्र्याद्विश्ववृत्तितः ।
प्रत्यात्मनियमाद्भुक्तेरस्ति हेतुरलौकिकः ॥ ४ ॥

प्रमाणभेदेन षडवान्तरविप्रतिपत्तयः । ततश्चतुर्थी विप्रतिपत्तिः—एवं बाधितविषयकत्वाभावेन वेदकर्तृतयेश्वरानुमानेऽपि न वेदप्रामाण्यसिद्धिः । आप्तप्रामाण्येन हि तद्ग्रन्थप्रामाण्यमिष्यते । ईश्वरस्याप्रामाण्याच्च नेदं सम्भवतीति मीमांसकस्यैव । तदवान्तरविप्रतिपत्तयश्च—अज्ञातार्थग्राहकत्वरूपप्रमात्वस्येश्वरज्ञाने दुर्वचत्वात्, सर्वविषयकस्य तस्यास्मदीयभ्रमविषयकत्वस्याप्यावश्यकत्वेन भ्रमत्वस्यावर्जनीयत्वात्, तस्य प्रमात्वेऽपि नित्यत्वाङ्गीकारेण तत्कारकत्वरूपप्रमाणत्वस्य परमात्मन्यसम्भवाच्चेति । एतन्निरसनानन्तरमीश्वरसाधकत्वेनाभिमतानां हेतूनां कार्यायोजनेत्यादीनामेकैकस्यापि हेत्वाभासत्वशङ्कारूपावान्तरविप्रतिपत्तिबहुला तत्साधकप्रमाणाभावरूपा सर्वानीश्वरवादिकृता पञ्चमी विप्रतिपत्तिः पञ्चमेन स्तबकेन परास्यत इति ग्रन्थसारः ।

[5] आसु च पञ्चसु महाविप्रतिपत्तिषु न प्रथमः कल्पः, यस्मादेतन्निषेध्यमलौकिकं साधनं सापेक्षत्वादिभिः प्रमाणैर्गम्यमस्ति । तथा चालौकिकं परलोकसाधनं नास्तीति प्रथमविप्रतिपत्तिवाक्यमप्रमाणं प्रामाणिकार्थनिषेधरूपत्वादित्युक्तं भवति ।

सापेक्षत्वादित्यादि—अयमर्थः—सर्वस्य निर्हेतुकत्वाददृष्टरूपहेतुविशेषेऽपि नेति न युक्तम्—सहेतुकत्वात् निर्हेतुकत्वरूपहेतोरसिद्धत्वात् । कार्यं सापेक्षं कादाचित्कत्वादिति सहेतुकत्वरूपसापेक्षत्वसिद्धेः । न च— कादाचित्कस्य सर्वस्यापि पूर्वपूर्वकारणस्य सापेक्षत्वस्वीकारेऽनवस्था स्यादित्येकं कादाचित्कमप्यकारणकं स्वीकार्यम्; एवं च तद्दृष्टान्तेन सर्वस्याकारणकत्वं साध्यमिति वाच्यम्—कुत्राप्यकारणकत्वास्वीकारात् । अनवस्थायाश्चात्र बीजाङ्कुरवदनादित्वेनादोषत्वात् । न चैवमपि दृष्टैकमात्रकारणकत्वान्नादृष्टमावश्यकमिति वाच्यम्—कार्यं विचित्रकारणकं विचित्रत्वादिति एककारणपक्षनिरासात् । न च तावता घटपटादौ दण्डवेमादिनानाकारणसिद्धा-

---

१ प्र- 'न प्रथमः पक्षः, कल्पो यतः कल्पनाऽसत्ख्यातिस्तद्विषयः । कार्यकारणभावानभ्युपगमे ....वचनप्रयोगानुपपत्तेः....व्याघात एवेत्यर्थः । तथापि साधकं विना न तत्सिद्धिरिति चेत्तत्राह—'सापेक्षत्वा' दिति । इदं च क्लिष्टं व्याख्यानं मकरन्दे विमृष्टम् ।

२ प्र- 'सापेक्षत्वात् कादाचित्कत्वादित्यर्थः' इति । बो-'विवादाध्यासितं हेतुमत् सापेक्षत्वात् सापेक्षत्वं च कादाचित्कत्वात्' इति । मूले, 'तदा हि....न तु कदाचित् स्या' दिति, 'नियमस्यैवापेक्षार्थत्वात्तस्यैव च कारणत्वा'दिति च दर्शनात् सापेक्षत्वं सहेतुकत्वमिति प्रतीयते ।

[6] न ह्ययं संसारः १ अनेक (नैक)विध (विधो) दुःखमयो निरपेक्षो भवितुमर्हति । तदा हि—स्यादेव, न स्यादेव वा—न तु कदाचित् स्यात् ॥ अकस्मादेव भवतीति चेन्न—

हेतुभूतिनिषेधो न स्वानुपाख्यविधिर्न च ।
स्वभाववर्णना नैवमवधेर्नियतत्वतः ॥ ५ ॥

[7] हेतुनिषेधे भवनस्यानपेक्षत्वेन २ सर्वदा भवनम्, अविशेषात् । भवनप्रतिषेधे, प्रागिव पश्चादप्यभवनम् , अविशेषात् । उत्पत्तेः पूर्वं स्वयमसतः स्वोत्पत्तावप्रभुत्वेन

वापि परलोकसाधनं न सिद्ध्यतीति वाच्यम्-विश्वमहाजनप्रवृत्तेस्सफला प्रेक्षावत्प्रवृत्तित्वादिति तत्सिद्धेः । न चैवमपि यागादेरेव साधनत्वादन्यथासिद्धिरिति शङ्क्यम्—आशुविनाशिनस्तस्य फलजनने व्यापारापेक्षायां सुखदुःखानुभवरूपो भोगः प्रत्यात्मनियतगुणाधीनः प्रत्यात्मनियतत्वादित्यनुमानेन तत्सिद्धेः । एतेन कथमसौ व्यापारो भोग्यनिष्ठ एव न भवतीति शङ्काऽपि निरस्ता, उक्तानुमानविरोधात् । अतोऽदृष्टमस्तीति ॥ अथ सर्वमिदं विस्तरेणोपपादयामः ।

[6] अयं हि संसारो देशकालदशाभेदभिन्नबहुविधदुःखप्रचुरत्वान्न निरपेक्ष एव भवितुमर्हति । निरपेक्षत्वे हि कादाचित्को न भवेत् । किं तु सत्त्वपक्ष आकाशादिवत् सर्वदैव स्यात् ; असत्त्वपक्ष शशविषाणवत् कदाऽपि न स्यात् ; न पुनरित्थ कदाचिदवर्तमानः कदाचिद्वर्तमानश्च स्यात् । एवं चोपलभ्यमानत्वाद्दुःखमयस्य शशविषाणतुल्यत्वायोगात् सदातनत्वप्रसक्तौ जनः पूर्वं पश्चाच्च सदैकरूपदुःखस्स्यात् । अतः कादाचित्कत्वात्सहेतुकः संसार इति । अथ सर्वोऽयमकस्मादेव भवतीति ब्रूम इति चेन्न-विकल्पासहत्वात् । तथा हि—हेतुभूतीत्यादि—अयं भावः—अकस्माद्भवतीत्यस्य कोऽर्थः ? किं, न कस्माच्चिद्भवतीति जायमानस्यास्य हेतुनिषेधः क्रियते ? किं वा कस्माच्चिन्न भवतीति उत्पत्तिनिषेधः ; यद्वा अकस्मात् किञ्चिद्भिन्नात् स्वेतरव्यक्तिभिन्नात् स्वस्माद्भवतीति स्वजन्यत्वं स्वस्य विधीयते ; आहो अकस्मात्किञ्चित्पदार्थभिन्नात् अपदार्थादलीकादुपाख्यातुमशक्याच्छशविषाणाद्भवतीति असज्जन्यत्वं विधीयते ; अथवा अकस्माच्छब्दस्य स्वभावे रूढिमूरीकृत्य स्वभावात् भवतीति वर्ण्यते । इमे पञ्चापि पक्षाः न भवन्ति, कार्याणां नियतावधिकत्वस्यावश्यकत्वादिति ।

[7] तथा हि—प्रथमे हेतोर्निषेधपक्षे कार्यसत्तायाः किञ्चिदपेक्षत्वाभावेन गगनादिवत् सर्वदा सत्त्वप्रसङ्गः, प्रागसत्त्वसाधकाभावात् । द्वितीये भूतेरुत्पत्तेर्निषेधपक्षे प्रागिव पश्चादप्य-

---

१ बो- 'नैकविधः सर्वकालं न एकरूपःकादाचित्क इति यावत् । अनेकविध इति पाठे वक्ष्यमाणहेतुवैचित्र्योपयुक्ततया कार्यवैचित्र्यमुक्तम्' इति । २ क. अनपेक्षत्वे ।

स्वस्मादिति पक्षानुपपत्तेः । पौर्वापर्य १ नियमश्च कार्यकारणभावः । न चैकं पूर्वमपरं च, तत्त्वस्य भेदाधिष्ठानत्वात् । अनुपाख्यस्य हेतुत्वे प्रागपि सत्त्वप्रसक्तौ पुनः सदातनत्वापत्तेः।

[8] स्यादेतत्—न अकस्मादिति कारणनिषेधमात्रं वा भवनप्रतिषेधो वा स्वात्महेतुकत्वं वा निरुपाख्यहेतुकत्वं वाऽभिधित्सितम् । अपि त्वनपेक्ष एव कश्चिन्नियतदेश- २ स्वभाववान्नियतकालस्वभाव इति ब्रूमः— ३ न, निरवधित्वे अनियतावधिकत्वे वा

सत्त्वमेव वस्तुनः स्यात्, सद्भावनियामकाभावात् । तथा स्वस्माद्भवतीति तृतीयः पक्षोऽप्यनुपपन्नः; स्वोत्पत्तेः पूर्वं स्वयमवर्तमानस्य स्वोत्पादनसामर्थ्याभावात् । न च स्वमेव स्वं प्रति कारणम् । कार्यकारणभावो हि नाम पौर्वापर्यनियमः । न चैकस्य वस्तुनः पूर्वत्वमपरत्वं च भवितुमर्हति, स्वपूर्वत्वस्वापरत्वरूपपौर्वापर्यस्य विभिन्नव्यक्तिनिष्ठत्वात् । अनुपाख्याद्भवतीति चतुर्थपक्षे चेदानीमिव प्रागपि तस्मादेवानुपाख्यादुत्पत्तिरापाद्यत इति पुनरपि सदा सद्भावप्रसङ्ग एव ।

[8] ननु—अस्तु तावदेषु चतुर्ष्वपि पक्षेषु दोषः । नैते पक्षा अस्माभिर्विवक्षिताः । किं तु निरपेक्षमेव वस्तु नियतकालस्वभावकं भवतीति स्वभावतो भवनरूपं पञ्चमं पक्षमेव वयं ब्रूमः । न चैतत्पक्षे कादाचित्कत्वानुपपत्तिः । यथा तदेव कार्यं घटादिकं दण्डचक्रकपालाद्यनेककारणजन्यत्वेनाभिमतमपि तेषु मध्ये कपालादिरूपदेशमात्रवर्ति भवति, न दण्डादिवर्ति । तत्र हि स्वभाव एव नियामकः । तद्वत्कादाचित्कत्वे किञ्चित्कालसम्बन्धेऽपि स्वभाव एव नियामकोऽस्तु—इति चेत्—नैवम् । नियतदेशत्वमपि हि वस्तुना न निष्कारणं भवितुमर्हति । किं तर्हि—अनुभवबलात् कपालस्य स्वस्मिन् घटोत्पादनसामर्थ्यम् दण्डचक्रादेश्च कपाले घटोत्पादनसामर्थ्यमिति कल्प्यते । अतः कारणबलादेव तदिति, दृष्टान्तस्तावदसिद्धः । प्रकृते च यदि नियतावधित्वं न स्वीक्रियते, न स्यादेव कादाचित्कत्वम् । किं भवता अवधिरेव न स्वीक्रियते । किं वा तत्स्वीकारेऽपि अस्य कार्यस्यायमवधिरिति अवधिनियमो न स्वीक्रियते । प्रथमे सर्वदा भवनं स्यादेव । द्वितीयेऽप्यनियतावधिकतया सर्वमपि पूर्वपूर्वमवधीभवतीति सदातनत्वप्रसङ्ग एव । न च सदातनत्वेऽपि न कादाचित्कत्वव्याघातः, किञ्चित्कालसम्बन्धित्वस्यैव तदर्थत्वा-

---

१ बो॰ "चो हेत्वर्थः ? यस्मात् पौर्वापर्यनियमः कार्यकारणभावः, तस्मादिति अथवेतश्च न स्वस्मादुत्पत्तिरित्याह पौर्वापर्येति ।"   २ अयं क॰ रीत्या पाठः । 'नियतदेशवत्' पा॰ ।

३ बो॰ "अत्राप्यवधेर्नियतत्वत इत्येतदेवोत्तरयति 'न निरवधित्व' इति । प्रकाशेऽपि 'परिहरति न निरवधित्व' इति पाठो युक्तः ; नञोऽभावे मूले पञ्चम्यन्तस्यालभ्यत्वात्" ।

कादाचित्कत्वव्याघातात् । न ह्युत्तरकालसिद्धित्वमात्रं कादाचित्कत्वम्; किं तु प्रागसत्त्वे सति । सावधित्वे तु स एव प्राच्यो हेतुरित्युच्यते।

[9] अस्तु प्रागभाव एवावधिरिति चेन्न, अन्येषामपि तत्काले सत्त्वात् अन्यथा तस्यैव निरूपणानुपपत्तेः । तथा च न तदेकावधित्वमविशेषात् । इतरनिरपेक्षस्य प्रागभावस्यावधित्वे प्रागपि तदवधेः १ कार्यस्य सत्त्वप्रसङ्गात् ।

[10] सन्तु ये केचिदवधयः, न तु तेऽपेक्ष्यन्त इति स्वभावार्थ इति चेत्—'नापेक्ष्यन्त' इति कोऽर्थः ? किं न नियताः, आहोस्विन्नियता अप्यनुपकारकाः ? प्रथमे धूमो

दिति वाच्यम्—तावन्मात्रस्य तदर्थत्वे आकाशादावपि कादाचित्कत्वव्यवहारापत्तेः । अतः प्रागसत्त्वे सति कालसम्बन्धित्वं कादाचित्कत्वम् । नियतावधिकत्वास्वीकारे च प्रागसत्त्वं दुरुपपादम् । ततस्तत्स्वीकारे च लोके एकैककार्यस्याप्यवधिः पूर्व उत्तरश्चेति द्विविध इति तत्रायमवधिः पूर्व इत्ययमेव हेतुशब्दार्थ इति सिद्धं सकारणकत्वम् ।

[9] नन्वस्तु सकारणकत्वम् । अथापि प्रागभावमात्रं कारणम्; न तु दण्डचक्रादिभावपदार्थोऽपीति चेन्न–विनिगमकाभावात् । घटोत्पत्तिप्राक्काले तस्यैव दण्डादीनामपि सत्त्वात् । दण्डाद्यसत्त्वे च घटप्रागभावस्यैव दुर्निरूपत्वात् । कारणकलापदर्शने ह्यत्र घटो भविष्यतीति प्रागभावो गृह्यते । एवञ्च प्रथमगृहीतानां दण्डादीनां कारणत्वमत्याज्यम् । अतो न प्रागभावमात्रावधिकत्वम् । न चावश्यं प्रागभावस्य कारणत्वमेषितव्यम्; अन्यथा घटवति घटान्तरोत्पत्त्यापत्तेः । अतो गौरवान्न तेषां कारणत्वमिति वाच्यम्-प्रागभावमात्रस्य कारणत्वे तस्यानादित्वेन दण्डादिसमवधानात्प्रागपि तस्मादेव प्रागभावरूपादवधेः कार्यसत्त्वप्रसङ्गात् ।

[10] नन्वन्येऽपि भावा अवधित्वेन स्वीक्रियन्ताम् । अथापि कार्यस्य तदवधिकत्वमात्रं स्वीक्रियते, न तु तदपेक्षत्वम् । तथा च स्वभावतो भवतीत्यस्य तदनपेक्षं भवतीत्येवार्थ इति चेत्–किमिदं तेषामनपेक्ष्यमाणत्वम् ? किं कार्यनियतपूर्ववर्तित्वाभाववत्त्वम् किं वा कार्यानुपकारकत्वम् ! नाद्यः, दहनस्येव गर्दभस्यापि धूमं प्रत्यवधित्वेन व्यवहारापत्तेः नियतपूर्ववर्तिभिन्नस्याप्यवधित्वे गर्दभे तद्वारकाभावात् । नान्त्यः, इष्टत्वात् । न ह्युपकारः कश्चिद्भवतीति वयं ब्रूमः; किं तु नियतत्वमेवापेक्ष्यमाणत्वं तदेव च कारणत्वमित्येव । इदं चेद्भवद्भिरुच्यते, न कश्चिदावयोर्भेद इति ।

---

१ बो-'तदवधेः प्रागभावैकावधिकस्य कार्यस्य, तस्मादवधेर्वा' इति । अनेन कार्यसत्त्वेति समासं विना कार्यस्येति व्यस्य पाठः सिद्धः ।

दहनवत् गर्दभमप्यवधीकुर्यात्, नियामकाभावात् । द्वितीये तु किमुपकारान्तरेण, नियमस्यैवापेक्षार्थत्वात्, तस्यैव च कारणात्मत्वात्, ईदृशस्य च स्वभाववादस्येष्टत्वात् ।

[11] 'नित्यस्वभावनियमवदेतत् । न ह्याकाशस्य तत्स्वभाकस्मिकमिति सर्वस्य किं न स्यादिति वक्तुमुचितम्' इति चेन्न, सर्वस्य भवतः स्वभावत्वानुपपत्तेः । न ह्येकमनेकस्वभावं (वो) १ नाम, व्याघातात् । नन्वेवमिहापि सर्वदा भवतः कादाचित्कत्वस्वभावव्याघात इति तुल्यः परिहारः—न तुल्यः—निरवधित्वे अनियतावधित्वे वा कादाचित्कत्वव्याघातात् नियतावधित्वे हेतुवादाभ्युपगमात् ॥

---

[11] अथ नैव किञ्चित् कारणं स्वीकुर्मः । कारणानपेक्षत्वेऽपि कादाचित्कत्वं न भज्यते स्वभावरूपत्वात् नित्यस्वभाववदिति ब्रूमः । यथा हि नित्यस्याकाशस्याकाशत्वं कारणनिरपेक्षत्वादाकस्मिकमेवसदप्यात्मनि न भवति ; आत्मत्वं वाऽऽकाशे । तत् कस्य हेतोः । तस्य तस्य तत्तत्स्वभावत्वात् । न हि पूर्वं घटादीनां कपालादिगते सद्भावे कारणसामर्थ्यस्य नियामकत्ववदत्र कस्यचिन्नियामकत्वकथनं सम्भवति, आकाशत्वादेर्नित्यत्वेन कारणानपेक्षणात् । अतः स तस्य स्वभाव इत्येवोत्तरम् । तद्वद्घटादीनां कादाचित्कत्वं स्वभाव इति चेदुच्यते । सत्यमिदं, यद्दृष्टान्ते कथ्यते अन्यथाऽऽत्मादेरप्याकाशत्वं चेद्भवेत् तस्य स्वभावत्वमेव न स्यात् । स्वासाधारणो हि भावो धर्मः स्वभाव इत्युच्यते । न ह्येकं वस्त्वनेकतत्तत्प्रतिनियतधर्मविशिष्टं भवति । न ह्येकमेकस्वभावात्मकमनेकेषां स्वभावो भवति । प्रतिनियतत्वे एकत्रासमावेशात् समाविष्टत्वे प्रतिनियमाभावात् । अतो दृष्टान्ते स्थितिरेवमेव । अथापि दार्ष्टान्तिके नेष्टसिद्धिः । ननु प्रतिनियतस्याकाशत्वस्यात्मन्यङ्गीकारे यथा प्रतिनियतत्वभङ्गः, तथा कादाचित्कस्य सदातनत्वे कादाचित्कत्वभङ्ग इति भवदाशङ्कापरिहारस्तुल्य इति चेन्न—अतुल्यत्वात् । मिथो विरुद्धयोरेकत्राङ्गीकारायोगात् । तथा हि निरपेक्षत्वं ब्रुवता निरवधित्वमिष्यते न वा । आद्ये निरवधित्वमवधिराहित्यं पूर्वोत्तरकालवृत्त्यभावाप्रतियोगित्वरूपम् ; कादाचित्कत्वं च पूर्वकालिकाभावप्रतियोगित्वमित्युभयं मिथो विरुद्धम् । अन्त्येपीदं सावधित्वमनियतावधित्वरूपं नियतावधित्वरूपं वा । आद्ये अनियतावधित्वं नाम नियतावधित्वेनासदर्भमतकपालादितत्तत्कारणासमवधानकालाव्यवहितकालस्थत्वम् । तदपि प्रागसत्त्वरूपकादाचित्कत्वविरोधि । अन्त्ये तु नियतावधित्वेऽस्मन्मतस्वीकार एव । अतो न कार्यकारणभावासिद्धिरिति ॥

---

१ धो- "न ह्येकमनेकस्वभावो नाम' इति संप्रदायवतां पाठः" इति ।

[12] स्यादेतत्—उत्तरस्य पूर्वः, पूर्वस्योत्तरो मध्यमस्योभयमवधिरस्तु ; दर्शनस्य दुरपह्नवत्वात् । तथाऽप्येतदभ्युपगन्तव्यम् । न हि भाववदभावेऽप्युभयावधित्वमस्ति । तद्वद्भावेष्वप्यनुपलभ्यमानैकैककोटिषु स्यात्—न स्यात्, अनादित्वात् ।

[13] प्रवाहो नादिमानेष न विजात्येकशक्तिमान् ।
तत्त्वे यत्नवता भाव्यमन्वयव्यतिरेकयोः ॥ ६ ॥

[14] प्रागभावो ह्युत्तरकालावधिरनादिः ; एवं भावोऽपि घटादिः स्यात् । अनुपलभ्यमानप्राक्कोटिकघटादिविषयं नेदमनिष्टमिति चेन्न—तावन्मात्रावधिस्वभावत्वे तदहर्वत पूर्वेद्युरपि तमवधीकृत्य तदुत्तरस्य सत्त्वप्रसङ्गात् ; अपेक्षणीयान्तराभावात् । एवं पूर्व-

---

[12] नन्वस्तु सापेक्षत्वम् ; अथापि नेदं सर्वत्र । यत्तावत् उत्तरत्वेनैवोपलभ्यते, न तु किञ्चित्पूर्वत्वेन, तस्य भावस्योत्तरोऽवधिर्न स्वीकार्यः । तथा पूर्वत्वेनैवोपलब्धस्य किञ्चित्प्रत्युत्तरत्वेनानुपलब्धस्य न पूर्वावधिरेष्टव्यः । मध्यवर्तित्वेनोपलभ्यमानस्य तु काममुभयोऽप्यवधिरस्तु, नियतावधित्वेनोपलब्धस्यापलापायोगात् । कादाचित्कत्वस्वभावव्याघातवर्णनेन च भवद्भिरुपलम्भानुसारावश्यकत्वस्योपपादितत्वात् । न चैकमात्रावधिकत्वं कुत्रापि नेष्टमिति वाच्यम्—प्रागभावे ह्युत्तरावधिमात्रम् ; प्रध्वंसे च पूर्वावधिमात्रम् । अतोऽभाव इव भावेऽपि, यत्र नैकोवधिरुपलभ्यते, तत्र स मास्तु । यद्यनुपलम्भेऽपि पूर्वावधिः कल्प्येत । सर्वस्यापि पूर्वपूर्वस्य पूर्वपूर्वावधिकल्पनादनवस्था स्यात्—इति चेन्न, अनादित्वादनवस्थाया अदोषत्वात् । अन्यथा कार्यानादित्वप्रसङ्गात् । तथा हि—

[13] एष कार्यप्रवाह आदिमान् न ; किं तु बीजाङ्कुरवदनादिः । नन्वेवमप्येकजातीयस्य कार्यस्यैकजातीयमेव कारणं भवतीति न नियमः, तृणारणिमणिभ्योऽग्निदर्शनादिति चेत्—नैकजातीयप्रवाहः विजातिमान् विभिन्नजातिककारणवान् भवति । ननु तेषां विलक्षणानामप्येकशक्तिमत्त्वेन कारणत्वमस्त्विति चेत्–नायं प्रवाह एकशक्तिककारणवानपि भवति । यद्वा नायं प्रवाहो विजातिकवस्तुनिष्ठैकशक्त्यधीन इत्येक एव द्वितीयपादार्थः । तर्हि किं तवेष्टमिति चेत्—तृणारणिमणिस्थलेऽप्यन्वयव्यतिरेकयोस्तत्त्वे याथात्म्यविषये प्रयत्नवता पुरुषेण भाव्यम् । अवधानेन तृणादिकारणभेदेन कार्येऽभावपि विलक्षणजातिमवबुद्ध्य तत्तदवच्छिन्नं प्रति तत्तत्कारणमित्यन्वयव्यतिरेकावधिगन्तव्याविति ।

[14] न तावदभावदृष्टान्तेन भावेऽपि पूर्वावधिराहित्यं युक्तम् । तथा सति प्रागभावस्येव तस्याप्यनादित्वप्रसङ्गात् । अथ तत्र भावे घटादावनादित्वमिष्टमिति चेन्न—तस्योत्तरावधिमात्रत्वे

पूर्वमपि । भावे, तदेव सदातनत्वम् । तदहरेवानेन भवितव्यमिति अस्य स्वभाव इति चेन्न—तस्याप्यहः पूर्वन्यायेन पूर्वमपि सत्त्वप्रसङ्गात् । तस्मात्तस्यापि तत्पूर्वकत्वं, एवं तत्पूर्वस्यापीत्यनादित्वमेव ज्यायः । न त्वपूर्वानुत्पादे कस्यचिदपूर्वस्य सम्भव इति ।

[15] तथाऽपि व्यक्त्यपेक्षया नियमोऽस्तु, न जात्यपेक्षयेति चेन्न, नियतजातीयस्वभावताव्याघातात् । १ यदि हि यतःकुतश्चिद्भवन्नेव तज्जातीयस्वभावस्स्यात्, सर्वस्य सर्वजातीयत्वमेकजातीयत्वं वा स्यात् । एवं (यदि) तज्जातीयेन यतःकुतश्चिद्भवितव्यमिति अस्य स्वभावः, तदाऽपि सर्वस्मात्सर्वजातीयमेकजातीयं वा स्यात् ।

तस्मिन्नहनीव पूर्वदिनेऽपि तत्सत्त्वप्रसङ्गेन तदवधिकत्वेनाङ्गीकृतस्य तत्कार्यस्यापि कस्यचित्तस्मिन्नहनीव पूर्वेद्युरपि तमेव घटमवधीकृत्य सत्त्वप्रसङ्गात् । यद्धि तत्कार्यं प्रत्यवधित्वेन स्वीकृतं, तत् पूर्वेद्युरप्यस्ति ; यत्त्वकारणम् , तत्तावन्नापेक्ष्यमिति । एवमेव तत्पूर्वपूर्वदिनेष्वप्यनादितया तस्य स्थितेस्तत्कार्यस्यापि तदा सत्त्वप्रसङ्गः । इष्टापत्तौ च पूर्वोक्तं सदातनत्वं पुनरापद्यते । ननु घटादेरवधेरनादित्वेऽपि, अस्मिन्नेवाहन्यनेन भाव्यमिति तत्कार्यस्य स्वभाव इति चेन्न—अहोऽप्युपाधिविशेषावच्छिन्नकालरूपत्वात् उपाधेश्चानुपलभ्यमानावधिककार्यन्यायेन पूर्वेद्युः सत्त्वप्रसक्तौ तस्य दिनस्यापि प्राक्कालसत्त्वापादनसम्भवात् । तथा चेदं कार्यमपि पूर्वं स्यादेवेति । नन्वेवं सदातनत्वप्रसङ्गपरिहाराय पूर्वावधेरप्यवध्यङ्गीकारेऽनवस्था स्यात् । अतोऽवध्यस्वीकारेण कादाचित्कत्वभङ्गपरिहारोऽन्वेषणीय इति चेन्न—प्रवाहानादित्ववर्णनस्यैव ज्यायस्त्वात् । अनवस्थायाः ईदृशविषयेऽदोषत्वात् । अनुपलभ्यमानप्राक्कोटिकस्य घटादेरपि अपूर्वस्य प्रागस्थितस्य सतः पश्चात् सामग्रीबलादुत्पाद इत्यस्याभावे तत्कार्यस्याप्यपूर्वस्य पूर्वमस्थितस्यैव पश्चादुत्पत्तिर्दृश्यमाना न घटेत ; अवधिसदातनत्वेन कार्यसदातनत्वस्यैवापत्तेः । अतः सर्वमपि कार्यं सपूर्वावधिकमिति ।

[15] नन्वयं कार्यकारणभावो घटजातीयं प्रति कपालजातीयं कारणमिति जात्यपेक्षया तावन्न भवति, विजातीयेभ्यस्तृणारणिमणिभ्योऽग्निजातीयस्यैवोत्पत्त्या व्यभिचारात् । अतस्तद्व्यक्तिं प्रति तद्व्यक्तिः कारणमिति दर्शनानुरोधाद्व्यक्त्यपेक्षयैव नियमः कल्प्यः । न चैतेन किञ्चिदिष्टसिद्धिः ; कार्यार्थिनः कारणे प्रवृत्तेर्वा कार्यात्कारणानुमानादेर्वा प्रसक्त्यभावात् । अतो व्यर्थमिदं नियमकल्पनमिति चेन्न—विभिन्नजातीयादप्येकजातीयकार्योत्पादोपगमे कपाला-

---

१ यदीत्यादिवाक्ये यतःकुतश्चिद्भवन्तमुद्दिश्य तज्जातीयस्वभावत्वं विधीयते । एवमित्यादिवाक्ये तज्जातीयमुद्दिश्य यतःकुतश्चिद्भवनं विधीयते इति व्याख्यानान्तरं बोधन्याम् ।

[16] कथं तर्हि तृणारणिमणिभ्यो भवन्नाशुशुक्षणिरेकजातीयः ? १ एकशक्तिमत्त्वादिति चेन्न ; यदि हि विजातीयेष्वप्येकजातीय २ कार्यकरणशक्तिः समवेयात्, न कार्यात्कारणविशेषः क्वाप्यनुमीयेत ; कारणव्यावृत्त्या च न तज्जातीयस्यैव कार्यस्य व्यावृत्तिरवसीयेत । तदभावेऽपि तज्जातीयशक्तिमतोऽन्यस्मादपि तदुत्पत्तिसम्भवात् । यावद्दर्शनं व्यवस्था भविष्यतीति चेन्न , निमित्तस्यादर्शनात् , दृष्टस्य चानिमित्तत्वात् ॥ एतेन ३ सूक्ष्मजातीया (सूक्ष्मादेकजातीयत्वा)दिति निरस्तम् , अवह्नेरपि तत्सौक्ष्म्यात् धूमोत्पत्त्यापत्तेः।

जातो घट एव भवतीति कार्यजातिस्वभावासिद्धिप्रसङ्गात् । यदि तज्जातीयं कार्यं यादृशतादृशकारणादुत्पन्नमपि तज्जातीयमेव भवतीति कार्यस्य स्वभावः, तदा घटजातीयस्य पटजातीयकारणात्तन्त्वादितोऽप्युत्पत्तिसम्भवात् पटेऽपि घटजातीयता स्यादिति सर्वस्मिन्कार्ये सर्वा जातयः स्युः । अथ तासां सर्वासामपि जातीनां समनियतत्वप्राप्त्या घटत्वकलशत्वादिवत् भिन्नत्वे प्रमाणाभाव इति चिन्त्यते , तर्हि सर्वत्रैकैव जातिः स्यात् । एवं यदि तज्जातीयेन यतःकुतश्चिद्भवितव्यम् । अभवनेऽस्य स्वातन्त्र्यं नास्ति । यत्किमप्यस्तु कारणम्, तत् तज्जातीयमुत्पादयत्येवेति कारणस्य स्वभाव इत्युच्यते–तदाऽपि सर्वस्मादपि कारणात् सर्वकार्योपपत्तिरिति पूर्ववत् सर्वं सर्वजातीयमेकजातीयं वा स्यादेव । अतो न विभिन्नजातीयादेकजातीयोत्पत्तिः ।

[16] अथ तर्हि तृणारणिमणिभ्यः कथमेकजातीय उत्पद्यते ?

ननु मीमांसकसम्मतं त्रयाणामप्येकानुगतशक्तिमत्त्वेन कारणत्वं स्वीक्रियत इति न व्यभिचार इति चेन्न–विजातीयेष्वप्येकजातीयोत्पादनशक्तिस्वीकारे , लोके कार्यबलात्कारणविशेषानुमानस्य तादृशकारणाभावेन तज्जातीयकार्याभावावधारणस्य च कुत्राप्यसम्भवप्रसङ्गात् । शक्तेरन्यत्रापि संभावितत्वेनोक्तकारणाभावेऽपि कार्योत्पत्तिसम्भवात्। न च यद्धर्मावच्छिन्नसत्त्व एव कार्यं दृश्यते, तद्धर्मावच्छिन्न एव शक्तिः , नान्यत्रेति व्यवस्थेति नान्यतः कार्योत्पत्तिरिति वाच्यम्_यद्धर्मपदेन शक्तिं गृहीत्वा 'शक्त्यवच्छिन्ने सति कार्यं दृश्यत' इत्यस्य दुर्वचत्वात् ; शक्तेर्निमित्तस्यादर्शनात्।

---

१ बो- एकशक्तित्वात् । २ क. ख. कारण. ३ कथमेकजातीय इति प्रश्ने, पूर्वं 'एकशक्तिमत्त्वा' दित्युत्तरवदत्रापि सूक्ष्मजातिमत्त्वादित्येवोत्तरं शुद्धम् । न पुनर्धर्मिपर्यन्तवाचि 'सूक्ष्मजातीया'दिति पदप्रयोगशैली रम्या । क² 'सूक्ष्मादेकजातीया'दिति पाठान्तरं लक्ष्यते । बोधन्यां–'सूक्ष्मात्' इति प्रतीको धृतः । प्रकाशस्वारस्यादपि धर्ममात्रवाचिपदं युक्तम् । एकजातीये तु सौक्ष्म्यं बाधितम् । अत उपरि नीर्दिष्टस्ततो रम्यतरो वा पाठो भाव्यः ।

[17] कार्यजातिभेदाभेदयोः समवायिभेदाभेदावेव तन्त्रम्, न निमित्तासमवायिनी इति चेन्न, तयोरकारणत्वप्रसङ्गात् । न हि सति भावमात्रं तत्; किं तु सत्येव भावः। न च जातिनियमे समवायिकारणमात्रं निबन्धनम्, अपि तु सामग्री । अन्यथा द्रव्य-

---

'तृणत्वावच्छिन्ने सत्येव कार्योत्पत्ति'रित्यस्यापि दुर्भणत्वात्; तृणत्वरहितान्मणेरपि कार्यदर्शनेन तृणत्वादेरनवच्छेदकत्वात् ॥ एतेन एकशक्तिमत्त्वपक्षे कार्यत्कारणविशेषस्य कारणव्यावृत्त्या कार्यव्यावृत्तेश्चावधारणासम्भवप्रसङ्गरूपेण हेतुनैव, 'तृणादिष्वेकातीन्द्रियानुगतजातिसत्त्वात्तेभ्योऽग्निरेकजातीय' इति पक्षोऽपि निरस्तः। अयं हि जातिवादिनामाशयः—शक्तिस्तावल्लोके प्रतिबन्धकविनाश्या आश्रयनाशनाश्या प्रतिव्यक्तिभिन्ना चानन्तैव भवति। अतस्तस्या एकत्वमेकजातीयत्वरूपमेव पर्यवस्यति । एवं चानन्तशक्ति-तद्भिन्नजातिविशेषकल्पनापेक्षया तृणादिष्वेव शक्तिस्थाने नित्यैकजातिकल्पनं युक्तम् । अतीन्द्रियत्वाच्च शक्तेरिव तस्या अपि न प्रत्यक्षमिति । एवमेतन्मते लाघवसत्त्वेऽपि अतीन्द्रियतया तृणादिष्वेव सत्त्वे मानाभावेनान्यतोऽपि तज्जातिमतोऽग्न्युत्पत्तिप्रसङ्गेनोक्तो दोषस्तदवस्थः । तथा च दृष्टकारणतावच्छेदकत्यागाविशेषेणाग्नित्वस्यापि धूमजनकतावच्छेदकत्वमस्वीकृत्याग्निगतातीन्द्रियजातेर्जनकतावच्छेदकत्वसम्भावनयाऽग्निभिन्नादपि तज्जातिमतो धूमोत्पत्त्यापत्तिरिति।

[17] न च तृणादिष्वेकजात्यनङ्गीकारेऽपि न दोषः, तेषामग्निं प्रति निमित्तत्वात् । समवायिकारणगतवैजात्यसाजात्ये एव च कार्य वैजात्यसाजात्यप्रयोजके, न निमित्तासमवायिकारणगते इति वाच्यम् । एवं सति तत्तदजन्यव्यक्तिष्वपि कार्यतावच्छेदकसत्त्वेन तृणादेः कारणत्वस्यैवासिद्धिप्रसङ्गात् । न हि कारणे सति कार्यसत्त्वमात्रं कारणत्वप्रयोजकम्; किं तु कारणे सत्येव कार्यस्य भाव इत्येवकारसिद्धो व्यतिरेकांशोऽपि । प्रकृते च तृणाभावेऽप्यग्निभावात् कारणत्वमेव न स्यात् । किं च कार्यवैजात्ये समवायिवैजात्यमेव प्रयोजकमित्यपि नास्ति; किं तु सकलकारणसमावेशरूपा सामग्र्येव प्रयोजिका । अन्यथा द्रव्यगुणकर्मणां द्रव्यमेव समवायिकारणमिति समवायिकारणवैजात्याभावात् त्रयाणां वैजात्यं न स्यात् । न च कार्यवैजात्यं सर्वं समवाय्यधीनमिति न ब्रूमः, किं तु कार्यभूतं यत् द्रव्यं तस्य तत्समवायिकारणाधीनं वैजात्यमित्येव । अतो गुणादेर्विजातीयत्वेऽपि न दोष इति वाच्यम्——दुग्धद्रव्यारम्भकपरमाणुभिरेव दधिद्रव्यारम्भदर्शनेन समवायिकारणभेदाभावेऽपि कार्यवैजात्यस्य स्वीकार्यत्वात् । तत्र दध्यारम्भकपरमाणुषु पाकवशाद्रसादिवैलक्षण्ये सत्यपि द्रवात्मकदुग्धविलक्षणकाठिनावस्थदध्युत्पत्तौ परमाणुमात्रस्यातन्त्रत्वात्। तस्मात् सामग्र्येव कार्यवैजात्ये निबन्धनम् । ततः सामग्रीनिविष्टस्यैकैकस्यापि कार्यं प्रति कारणत्वस्यावश्यकतया तृणादेरपि तदुपपादनीयम् । तच्चैकशक्तिमत्त्वेनैकजातिमत्त्वेन वा न संभवतीत्युक्तम् ।

गुणकर्मणामेकोपादानकत्वे विजातीयत्वं १ न स्यात्। न च कार्यद्रव्यस्यैषा रीतिरिति युक्तम्; आरब्धदुग्धैरेवावयवैर्दध्यारम्भदर्शनात् ॥

[18] एतेनापोहवादे नियमो निरस्तः; "कार्यकारणभावाद्वे" २ त्यादिविप्लवप्रसङ्गात्। तस्मान्नियतजातीयतास्वभाव ३ भङ्गेन व्यक्त्यपेक्षयैव नियम इति—

[19] ४ न; फूत्कारेण तृणादेरेव, निर्मन्थनेनारणेरेव प्रतिफलिततरणिकिरणैर्मणेर-

[18] एतेनोक्तपक्षद्वयनिरासकेन हेतुना बौद्धसम्मतापोहवादेऽपि नियमो निरस्तः। तथा हि—अपोहो ह्यतद्व्यावृत्तिः। एवं च सर्वसम्मतापोहेनैव व्यवहारनिर्वाहेऽतिरिक्ता जातिर्न कल्प्येति वह्नित्वरूपजात्यभावात् धूमं प्रति वह्नेरवह्निव्यावृत्तिरूपेण वह्निभिन्नभिन्नत्वेन कारणत्वमिति वदद्भिर्बौद्धैः वह्नित्वेन सर्ववह्निक्रोडीकारासम्भवात्, यावत्स्थले स्वयं धूमदर्शनं तावद्वह्निव्यक्तीर्गृहीत्वा तावदन्यान्यत्वेन कारणत्वस्वीकारेऽन्यत्रवह्निव्यक्तितो धूमाभावप्रसङ्गात्सर्वव्यक्तिनिवेशावश्यकत्वे सति, 'कतीनां व्यक्तीनां कुर्वद्रूपत्वं तदपि हि किञ्चित् अपोहरूपमेव। 'कासां च पृथक्पृथग्ग्रहणेन कारणत्वं वर्ण्यत' इत्यत्र व्यवस्थाया दुर्वचतया कदाचिदवह्नेरपि धूमसम्भावनया धूमं प्रति वह्नेर्नियमो न सिद्ध्यति। एवमेकजातीयस्थल एव नियमासिद्धौ का कथा तृणारणिमणिस्थले। अतश्चापोहवादे 'कार्यकारणभावाद्वे' ति तदुक्तमपि विप्लुतं भवति। ते ह्यनुमानोपयोगी हेतुसाध्यभावो न साध्यवति हेतुदर्शनरूपादन्वयाद्भवति, नापि विपक्षे तददर्शनरूपाद्व्यतिरेकाद्भवति; किं तु यत्र कार्यकारणभावो वा तादात्म्यापरपर्यायस्वभावो वा, यथा—अग्निमान् धूमात्, अयं वृक्षः शिंशपाया इत्यादौ—तत्रैव भवति। अतस्तदुभयमेव नियामकमिति, 'कार्यकारणभावाद्वा स्वभावाद्वा नियामकात्। अविनाभावनियमो ५ ऽदर्शनान्न, न दर्शनात्' इति वर्णयन्ति। उक्तरीत्या च कार्यकारणभाववर्णनासम्भवात्सर्वमिदं विप्लुतमेव स्यात्। अतोऽपोहवादोऽपि न युक्तः। अतश्शक्तिजात्यपोहपक्षाणामयुक्ततया सामान्यापेक्षया नियमस्य दुर्वचतया व्यक्त्यपेक्षयैव नियमः स्वीकार्यः। तथा च यथोपलम्भं तद्व्यक्तिस्तद्व्यक्तेः कारणमिति किमनेनैतत्स्थापनप्रयासेनेति ॥—

[19] नैवम्— कार्ये वैजात्याङ्गीकारेण सामान्यापेक्षयैव कार्यकारणभावोपपत्तेः। तथा हि—यथा तृणादिकमग्नेः कारणं, तथा फूत्कारादिव्यापारोऽपि। तत्र फूत्कारस्तृणादित एवाग्निं जनयति, निर्मन्थनमरणित एव, दिनकरकरप्रतिफलनमपि सूर्यकान्तमणित एवेति व्यापारव्यवस्था

१ क[2] 'विजातीयत्वानुपपत्तेः' पा० २ कार्यकारणभावादिविप्लवेति क्वचित्।

३ क. भङ्गे। ४ बो. 'सिद्धान्त्याह नेति। एवशब्दो भिन्नक्रमः। तृणादेः फूत्कारेणैवेत्यादि' इति। ५ 'दर्शनान्न न दर्शनात्' इति पाठे न दर्शनात् इति नञ्शब्दसमासः।

षेति प्रकारनियमवत् तेनैव व्यज्यमानस्य कार्यजातिभेदस्य भावात्। दृश्यते च पावकत्वाविशेषेऽपि प्रदीपः प्रासादोदरव्यापकमालोकमारभते ; न तथा ज्वालाजालजटिलोऽपि दारुदहनः, न तरांच कारीषः। यस्तु तं नाकलयेत्, स कार्यसामान्येन कारणमात्रमनुमिनुयादिति किमनुपपन्नम् ॥

[20] एवं तर्हि धूमादावपि कश्चिदनुपलक्षणीयो विशेषः स्यात्, यस्य दहनापेक्षेति, न धूमादिसामान्याद्वह्निसामान्यादिसिद्धिः। एतेन व्यतिरेको व्याख्यातः। तथा च कार्यानुपलब्धिलिङ्गभङ्गे स्वभावस्याप्यसिद्धे[1] गतमनुमानेनेति चेत्—[2] न। प्रत्यक्षानुप-

---

तावद्दृश्यते। अतः सहकारिवैलक्षण्यवत् कार्यवैलक्षण्यमपि युक्तम्। अन्यथा हि शक्तिस्वीकारे तृणादाविव फूत्कारादावपि सा कल्प्या। एवं च निर्मन्थनविशिष्टात् तृणादप्यग्न्यापत्तिः। एवमनन्तकारणेष्वनन्तशक्तिकल्पनामपेक्ष्यात्र लाघवमपि लक्ष्यते। तृणत्वादेरनिमित्तत्वे दोषश्च दर्शितः। अतो व्याप्यधर्मावच्छिन्नं प्रत्येव तृणादेः कारणत्वम्। लक्ष्यते चाग्नित्वव्याप्यमनेकं वैलक्षण्यम्। तैलवर्त्यादिसामग्री खलु प्रभाभरितप्रदीपहेतुः। दार्वादिकं यद्यपि ज्वालामालभारिणं महत्तममेव दहनं जनयति, अथापि न तत्र तादृशी प्रभा। करीषादितस्तु निष्प्रभो विलक्षण एवाग्निः। अतो नानाजात्यनुभवादनुमीयते। तृणादिजन्योऽग्निररण्यादग्निविजातीयः, तद्भिन्नकारणजन्यत्वात् प्रदीपवदिति। अत्र यो यत्कारणातिरिक्तकारणजन्यः स तत्कारणजन्यविजातीय इति सामान्यमुखी व्याप्तिरपि सुवचा। तथा अयमरण्यग्निरग्नित्वव्याप्यजातिमान् अग्नित्वात् प्रदीपवदित्यप्यनुमानम्। शक्यते च ब्राह्मणमातापितृसम्बन्धज्ञानादिव्यञ्जकसहकृतेनेन्द्रियेण ब्राह्मणत्वरत्नत्वादेरिवोक्तप्रकारविशेषरूपव्यञ्जकसहकारिबलादीदृशजातिभेदस्य व्यज्यमानत्वं प्रत्यक्षविषयत्वमेवास्तीत्यपि वक्तुम्। अतस्तादृशजातिरूपसामान्यापेक्षयैव कार्यकारणभावो न व्यक्त्यपेक्षयेति सर्वं सुस्थम्। न चेदृशजातिभेदमगृह्णतः पुंसोऽग्निदर्शने सति कार्यात्कारणानुमानं न सम्भवेदिति वाच्यम्—विशेषजात्यविवेकेन विशेषकारणानुमानासम्भवेऽपि तेनाग्निसामान्यं प्रति यत् कारणं तदनुमानसम्भवात्, तावताऽनुपपत्त्यभावात्।

[20] ननु तर्ह्यग्नौ दुर्ग्रहं वैजात्यं स्वीकृत्य तस्य तृणापेक्षत्ववर्णनवत् धूमेऽपि अवान्तरविशेषं स्वीकृत्य तस्यैव दहनसापेक्षत्ववर्णनसम्भवात् धूमसामान्येनाग्न्यनुमानं क्रियमाणं न सिद्ध्येत्। अनेनैवाग्न्यभावतो धूमाभावानुमानासिद्धिरपि सिद्धा। तथा च कार्यकारणभावनिर्णयासम्भवादनुमानप्रमाणमेव गतम्। न चैतदभावेऽपि तादात्म्यापरपर्यायस्वभावबलेनानुमानं सम्भवतीति

---

१ क[2] 'कृतं'। २ वो· 'परिहरति नेति'

लम्भगोचरो जातिभेदो न कार्यप्रयोजक इति वदतो बौद्धस्य शिरस्येष प्रहारः । अस्माकं तु यत्सामान्याक्रान्तयोर्ययोरन्वयव्यतिरेकवत्ता, तयोस्तथैव हेतुहेतुमद्भावनिश्चयः । तथा चावान्तरविशेषसद्भावेऽपि न नो विरोधः ॥

[21] किं पुनस्तार्णादौ दहनसामान्यस्य प्रयोजकम्; तृणादीनां विशेष एव निय-

---

वाच्यम्–तत्रापि कार्यकारणभावापेक्षाध्रौव्यात् । तथा हि–अयं वृक्षः शिंशपाया इति तादात्म्यानुमाने हेतुरस्तु साध्यं मास्त्वित्यप्रयोजकशङ्कायां विपक्षे बाधकमुपन्यसनीयम् । तदित्थम्—शिंशपायाः वृक्षसामग्रीजन्यतया शिंशपायां सत्यां वृक्षसामग्र्याऽपि भाव्यम् । अतो वृक्षोऽप्यावश्यकः । अन्यथा कार्यकारणभावभङ्ग इति । यद्वा वृक्षकारणानुपलब्धौ शिंशपाऽभावदर्शनात् सत्यां शिंशपायां वृक्षोऽप्यावश्यक इति । अत्र प्रथमं कार्यात्कारणानुमानमूलकम्; द्वितीयं कारणानुपलब्ध्या कार्याभावानुमानमूलकम् । किञ्च बौद्धैरभवसाधनीनामनुपलब्धीनां मध्ये कार्यानुपलब्धिरेका वर्णिता, यथा–'नेहाप्रतिबद्धसामर्थ्यानि धूमकारणानि सन्ति धूमानुपलब्धे'-रिति (न्यायबिन्दुः 1.) तथा कारणानुपलब्धिरपि, 'नात्र धूमोऽग्न्यभावा' दिति । अतश्च प्रकृते वृक्षाभावे वृक्षसामग्र्यभावः, तदभावे च शिंशपाभाव इति कार्यानुपलब्धिरेव परम्परया स्वभावसिद्धौ लिङ्गम् । एवं च कार्यकारणभावासिद्धिवर्णनात् कार्यरूपलिङ्गस्य, कारणानुपलब्धिरूपलिङ्गस्य, कार्यानुपलब्धिरूपलिङ्गस्य च भङ्गे सिद्धे विपक्षे बाधकस्य वर्णनासम्भवेन स्वभावोऽप्यसिद्ध एवेति सर्वात्मनैवानुमानप्रमाणं गतमिति चेत्–अयमाक्षेपो बौद्धं प्रत्येव युज्यते । स हि–यत्सत्त्वे कार्यसत्त्वं, यदभावे च कार्याभावश्चानुभविकम् — तस्यान्वयव्यतिरेकापरपर्यायप्रत्यक्षानुपलम्भविषयस्य बीजत्वादेः कारणतावच्छेदकत्वमस्वीकृत्याप्रामाणिकं कुर्वद्रूपत्वं कल्पयति । तथा च तन्मतेऽसम्भावितकारणतावच्छेदककल्पनवत् असम्भावितकार्यतावच्छेदककल्पनसम्भवेन दृश्यमानाग्नित्वधूमत्वादिसामान्यानां प्रयोज्यप्रयोजकभावासिद्ध्या धूमादिना वह्न्याद्यनुमानासम्भवादनुमानमेव गतमिति । अस्माभिस्तु दृष्टकारणतावच्छेदकनानाधर्मानुसारेण कार्यवैजात्यं क्वचिदभ्यूह्यते । सर्वथा दृष्टं धर्ममादाय कार्यकारणभावो न त्यज्यते । अतो धूमसामान्यस्याग्निसामान्यस्य चान्वयव्यतिरेकभङ्गादर्शनात् तत्राप्रामाणिकधूमावान्तरविशेषो न सिद्ध्येत् । अतः प्रमाणतः क्वचिदवान्तरविशेषसद्भावेऽपि न सर्वत्र तदापत्त्यादिविरोधप्रसक्तिः । एवं स्वभावस्थल इव कार्यकारणस्थल इव चास्वभावभूतेष्वकार्यकारणरूपेष्वपि भूयो दर्शनबलादविनाभावं वदतामस्माकं मतेऽनुमानविलोपरूपविरोधप्रसञ्जनमपि नावकाशं लभत इति ॥

[21] नन्वेवं सामान्यकार्यकारणभावस्यापि स्वीकारे तार्णातार्णदहनसामान्यकारणं किमिति चेदुच्यते । तेजस्त्वावच्छिन्नं प्रति वायुर्निमित्तकारणम् । तत्र तत्रावयवसंयोगा असमवायि-

त्वादिति चेत्— १ न । तेजोमात्रोत्पत्तौ पवनो निमित्तम् ; अवयवसंयोगोऽसमवायी ; तेजोऽवयवास्समवायिनः । इयमेव सामग्री गुरुत्ववद्द्रव्यसहिता पिण्डितस्य । इयमेव तेजोगतमुद्भूतस्पर्शमपेक्ष्य दहनं, तत्रापि जलं प्राप्य दिव्यं, पार्थिवं प्राप्य भौमं, उभयं प्राप्योदर्यमारभत इति स्वयमूहनीयम् ॥

[22] तथाऽप्येकमेकजातीयमेव वा किञ्चित्कारणमस्तु कृतं विचित्रेण । दृश्यते ह्यविलक्षणमपि विलक्षणानेककार्यकारि । यथा—प्रदीप एक एव तिमिरापहारी वर्तिविकारकारी रूपान्तरव्यवहारकारीति चेन्न—वैचित्र्यात् कार्यस्य ।

एकस्य न क्रमः क्वापि वैचित्र्यं च समस्य न ।
शक्तिभेदो न चाभिन्नः स्वभावो दुरतिक्रमः ॥ ७ ॥

[23] न तावदेकस्मादनपेक्षादनेकम्, अक्रमात् क्रमवत्कार्यानुपपत्तेः । क्रमवत्त्वावत्कार्य(क)कारणस्वभावत्वात्तस्य, तत् तथा ; यौगपद्यवदिति चेत्— २ अयमपि च क्षणभङ्गे परिहारो न तु सहकारिवादे । पूर्वपूर्वानपेक्षायां क्रमस्यैव व्याहतेः । क्रमनियमे त्वनपेक्षानुपपत्तेः ॥

कारणम् । अवयवाश्च समवायिकारणम् । तेजोविशेषेषु च सुवर्णाद्यपिण्डितं प्रति गुरुत्ववद्द्रव्यरूपं विशेषनिमित्तकारणम् । तेजोऽवयवानामेवोद्भूतस्पर्शवत्त्वे दहनोत्पत्तिः । तत्र च केवलजल-केवलपृथिवी-तदुभयरूपनिमित्तभेदात् दिव्यभौमोदर्याणामुत्पत्तिरित्येवमूह्यताम् ॥

---

[22] नन्वस्तु सापेक्षत्वमनादित्वं च ; अथापि कृत्स्नस्यैकमेव कारणं भवितुमर्हति । एकस्यैवाऽविचित्रस्य प्रदीपस्य तमोहरण-वर्तिविनाश-घटादिरूपव्यवहारात्मकानेककार्यजनकत्वदर्शनात् । यदि त्वेकस्य युगपदनेककार्यजनकत्वेऽपि न क्रमेणानेकजनकत्वमित्याशंक्यते — तर्हि यदेकं प्रथमकार्यकरणं तज्जातीयमेव विभिन्नं द्वितीयादिकार्यकरणमस्तु । सर्वथा न विचित्रकारणस्यावश्यकतेति चेन्न—कार्यवैचित्र्यात्कारणवैचित्र्यानुमानात् ॥

[23] एकस्य न क्रमः क्वापि । नह्येकस्य सहकार्यन्तरनिरपेक्षस्य कार्ये क्रमः क्वापि दृष्टः । सहकार्यपेक्षत्वे तु सामग्र्याः सहकारिमेलनरूपायाः क्रमभावित्वात्कार्यायौगपद्योपपत्तिः । अन्यथा तु क्रमप्रसक्तिरहितात्कारणान्न क्रमेण कार्यसम्भवः ; अपेक्षणीयान्तराभावात् । अथ कारणस्य क्रमशालितावत्कार्यजनकत्वस्वभावकत्वाच्चत् कार्यं तथा क्रमिकं भवति, यथा दीपस्य युगपज्जनक-

---

१ बो- 'किं पुनरिति किमाक्षेपे....अनुवृत्तं तु न किञ्चित् दृश्यत इति भावः । नेति'

२ बो- "अपि चेति समुच्चयो 'नौद्धस्य शिरस्येष सं(?)प्रहारः' इत्येतदपेक्ष्य"इति ।

[24] नाप्यनेकमविचित्रम्। १यदि ह्यन्यूनमनतिरिक्तं वा दहनकारणमदहनस्यापि हेतुः, नासावदहनो दहनो वा स्यात्; उभयात्मको वा स्यात्। न चैवम्। शक्तिभेदादयमदोष इति चेन्न—धर्मिभेदाभेदाभ्यां तस्यानुपपत्तेः। असङ्कीर्णोभयजननस्वभावत्वादयमदोष इति चेन्न। न हि स्वाधीनमस्यादहनत्वम्; अपि तु तज्जनकस्वभावाधीनम्। 'तथा च तदायत्तत्वाद्दहनस्यापि तत्त्वं केन वारणीयम्। न हि तस्मिन् जनयितव्ये नासौ तत्स्वभावः। तस्माद्विचित्रत्वात् कार्यस्य कारणेनापि विचित्रेण भवितव्यम्।

स्वभावकत्वात्तत्र कार्ये यौगपद्यं तद्वदिति चेत्तर्हि प्रथमकार्यजननकाले तद्वस्तु द्वितीयकार्यजननस्वभावं न वा; नाद्यः, प्रथमस्येव द्वितीयस्यापि तदानीमेवोत्पत्त्यापत्तेः। नान्त्यः, स्वभावो हि दुरतिक्रमः। अतः सति वस्तुनि तत्स्वभावत्यागायोगात् स्वभावो नास्तीति वदता वस्तु नास्तीत्येव वक्तव्यम्। तथा च क्षणभङ्गपक्षावलम्बनेन परिहारोऽयम्। न सहकारिवादपर्यवसायिवस्तुस्थैर्यपक्षे। स च बौद्धपक्षो नावयोरिष्टः। स्थैर्यैककारणतादिना च त्वया सहकारिवादमनिच्छताऽपि स स्वीकर्तव्य एव भवति। तादृशस्वभावं तत्कारणं यदि तृतीयक्षणे कार्योत्पादनाय द्वितीयक्षणं नापेक्षते, तर्हि तृतीयक्षणभाव्यपि द्वितीयक्षण एव स्यादिति क्रमभङ्गः। यदि क्रम आवश्यकस्तर्हि पूर्वक्षणापेक्षास्त्येवेति सिद्धं कारणानेकत्वं सहकारिवादश्च।

[24] अस्त्वनेकं कारणम्; अथापि तत्कुतः कार्यान्तरकारणापेक्षया विचित्रमिति चेत्—**वैचित्र्यं च समस्य न**। न सजातीयस्य कार्ये वैचित्र्यं भवितुमर्हति। अतोऽनेकमपि नाविचित्रं सत् कारणम्। अविचित्रकारणाद्विचित्रकार्यवादिना हि यावत् दहनं प्रति कारणं तावदेवादहनं प्रत्यपि कारणमित्युक्तं भवति। तत्र च दहनत्वादहनत्वयोर्विरोधस्य स्थिततया कारणस्य परस्परविरोधिसामग्रीरूपत्वात् तत्कार्यं दहनोऽदहनो वा न भवेत्। दहनत्वादहनत्वयोराविरोधस्वीकारे तु कार्यं दहनादहनोभयरूपं स्यात्। ननु दहनशक्तिविशिष्टं तदेव दहनं जनयति, अदहनशक्तिविशिष्टं त्वदहनमिति चेत्—शक्तिभेदो न चाभिन्नः स हि शक्तिविशेषो न धर्म्यभिन्नः, तथा सति पूर्वदोषतादवस्थ्यात्। अतो धर्मितो भेदः स्वीकार्यः। तथा च विभिन्नशक्तिसमावेशप्रयुक्तं सामग्रीवैचित्र्यमवर्जनीयम्। ननु मास्तु शक्तिः। तदेव कारणं परस्परासङ्कीर्णद्विविधकार्यजनकत्व-

---

१ वो.'किं तत् कारणं दहनैकजननस्वभावं, अदहनैकजननस्वभावं, उभयजननस्वभावं वेति विकल्पं हृदि निधाय प्रथमे दोषमाह यदि हीति....द्वितीयेऽप्याह दहनो वेति। 'तृतीयेऽप्याह उभयात्मक इति'। प्रकाशे तु आद्यपक्षद्वयदूषणं नासावित्यनेन। नासावदहनः किन्तु दहनस्स्यात् नासौ दहनः किं त्वदहनस्स्यादिति च योजना दर्शिता।

न च तत् स्वभावतस्तथा । ततः सहकारिवैचित्र्यानुप्रवेशः । न तु(च)१ क्षणोऽपि तदनपेक्षस्तथा भवितुमर्हतीति ॥

[25] अस्तु दृष्टमेव सहकारिचक्रम्; किमपूर्वकल्पनयेति चेन्न—विश्ववृत्तितः।

विफला विश्ववृत्तिर्नो न दुःखैकफलाऽपि वा।
दृष्टलाभफला नापि विप्रलम्भोऽपि नेदृशः ॥ ८ ॥

यदि हि पूर्वपूर्वभूतपरिणतिपरम्परामात्रमेवोत्तरोत्तरनिबन्धनम्, न परलोकार्थी कश्चिदिष्टापूर्तयोः प्रवर्तेत। न हि निष्फले दुःखैकफले वा कश्चिदेकोऽपि प्रेक्षापूर्वकारी घटते; प्रागेव जगत् ।

स्वभाववत्त्वात् पृथगेव दहनमदहनं चोत्पादयतीति निर्दुष्टोऽयं पक्ष इति चेत्—स्वभावो दुरतिक्रमः। तत्रापि हि दहनस्य कस्माददहनत्वं नेत्याशङ्कायामदहनसामग्र्यजन्यत्वादित्येवोत्तरस्य वाच्यतया तदर्थं दहनोत्पत्तिकाले तस्या दहनजननस्वभावास्वीकारेण पश्चात्तत्स्वीकारे तस्य स्वभावस्वभङ्गापत्तेः, तदर्थं कालभेदभवत्स्वभावभेदशालिनो वस्तुनोऽपि भेदाङ्गीकारे क्षणभङ्गपक्षापत्तेः, दुरतिक्रमोऽयं स्वभावस्तदाऽपि स्वीकार्य इत्युभयस्वभावानन्तरभाविनो दहनस्य कथमदहनत्वं न भविष्यति । तस्मात्कार्यवैचित्र्यं कारणवैचित्र्यायत्तमेव सर्वत्र । न च तत् कारणं सहकार्यसमावेशे स्वयमेव तथा विचित्रं भवति । अतो विभिन्नसहकारिसम्बन्धः स्वीकार्यः। नन्वेककारणत्वरक्षणाय क्षणभङ्गपक्षमवलम्ब्य क्षणस्यैव कारणत्वं स्वीक्रियत इति चेन्न हि क्षणोऽपि सहकार्यनपेक्षः कारणं भवितुमर्हति । अन्यथा कुसूलादाहृत्य क्षेत्रे समुप्तबीजस्येव कुसूलस्थबीजस्यापि तावति काले कुर्वद्रूपत्वविशिष्टबीजोत्पादकत्वसम्भवेन तत्रैवाङ्कुरोत्पत्त्यापत्तेः बौद्धैरपि सहकार्यपेक्षताया वक्तव्यत्वात्; प्रत्यक्षे इन्द्रियस्यालोकादिसहकारिकत्वस्य तैरुक्तत्वाच्चेति ॥

---

[25] ननु विचित्रकारणत्वेऽपि दृष्टसहकारिकलापेनैव निर्वाहान्नादृष्टसिद्धिरिति चेन्न—परलोकादिसाधनविश्वमहाजनप्रवृत्तित एवादृष्टसिद्धेः । तथा हि—इयं विश्वप्रवृत्तिः निष्फला सफला वा; अन्त्येऽपि दुःखैकफला सुखफला वा । तत्र चान्त्ये किं लाभादिजन्यसुखफला आहो विप्रलम्भफला अथ वा विलक्षणसुखफलैवेति विकल्पाः । न तावदाद्यः कल्पः—पृथिव्या ओषधयः, ओषधीभ्योऽन्नं, अन्नात्पुरुष इति यथा दृष्टं पूर्वपूर्वमुत्तरोत्तरकार्यजनकं स्वीक्रियते; न तु विश्ववृत्त्यादेरपि किञ्चित्फलमदर्शनादिति यदि; तर्हि न कश्चित् परलोकमुद्दिश्य यागहोमादि-

---

१ बौ. 'क्षणभङ्गवादेऽपि सहकारिवैचित्र्यमादरणायमित्याह 'न च क्षणोऽपी' ति' । प्र. 'नत्विति ।

[26] लाभपूजाख्यात्यर्थमिति चेत्—लाभादय एव किन्निबन्धनाः ? न हीयं प्रवृत्तिः स्वरूपत एव तद्धेतुः । यतो वानेन लब्धव्यं यो वैनं पूजयिष्यति, स किमर्थम् ? ख्यात्यर्थमनुरागार्थं च । जनो दातरि मानयितरि च रज्यते । 'जनानुरागप्रभवा हि सम्पदः' । इति चेन्न—नीतिनर्मसचिवेष्वेव तदर्थं दानादिव्यवस्थापनात् । त्रैविद्यतपस्विनो धूर्तबकाः एवेति चेन्न—तेषां दृष्टसम्पदं प्रत्यनुपयोगात् ।

[27] सुखार्थं तथा करोतीति चेन्न—नास्तिकैरपि तथा करणप्रसङ्गात्, सम्भोगवत् ।

रूपेष्टे तटाकनिर्माणादिरूपपूर्ते च प्रवर्तेत । साध्यादिप्रेक्षणपूर्वमेव कस्यचित्करणात् । प्रयोजनमनुद्दिश्य हि न मन्दोऽपि प्रवर्तते । अत एव न द्वितीयः । न च दृश्यत एव यागाद्यनुष्ठाने कायक्लेशार्थव्ययादिना दुःखमिति वाच्यम्—तस्य पाकादाविव नान्तरीयकत्वेनाफलत्वात् ; तावताऽपि दुःखैकफलकत्वस्याप्रसक्तेश्च । अतस्तथाविधे नैकोऽपि प्रवर्तेत नितरां च सर्वमेव जगत् ।

[26] ननु लाभाय पूजायै ख्यातये वेति तृतीयः पक्षोऽस्त्विति चेन्न कृषिसस्ययोरिव यागलाभयोः कार्यकारणभावस्यासिद्धत्वात् । न खलु यागे कृते स्वयमेव लाभः पूजा वा भवितुमर्हति ; तयोः पुरुषान्तरद्वारकत्वेन यागमात्रादसम्भवात् । पुरुषान्तरद्वारैवास्त्विति चेत्—यो हि पुरुष एनमर्थं दानेन लम्भयति, पूजयति वा , स किमर्थं तत् करिष्यति, स्ववृत्तिनैष्फल्ये जोषमेव स्थितिप्रसक्तेः । ननु सोऽपि दानादौ कृते ख्यातिर्भवति, प्रतिग्रहीतुश्च स्वस्मिन्ननुरागो भवतीति तत्करोति । अनुरागस्य दानपूजाफलत्वं च लोकसिद्धम् । अनुरागसम्पादनमप्यावश्यकम् ; संपदां जनानुरागमूलकत्वस्य प्रसिद्धत्वात् । अतः सर्वो व्यापार एतदन्यतमे फले पर्यवस्यतीति चेन्न—ये राज्यभरणाङ्गभूताः नीतिसचिवाः, ये च केलिसचिवास्तेष्वेव ख्यात्यनुरागार्थतया दानस्य व्यवस्थितत्वात् ; वनवासितपस्विप्रभृतिभ्यः प्रदानस्य तत्फलत्वायोगात् । न च तैरपि यागाद्यनुष्ठाने ख्यातिरस्त्येवेति वाच्यम्—ख्यातेः स्वयंफलत्वाभावात् दृष्टसम्पत्पर्यवसायित्वस्य वक्तव्यत्वात् तस्याश्च ततो विरहात् । ननु त्रयीविद्याविदस्तपस्विनो बकवद्धूर्ता अर्थकामाः कथञ्चिदागत्य गृह्णन्तीति चेत्—तेषां तथात्वेऽपि स्वापेक्षितदृष्टसंपदं प्रत्यनुपयोगात् विवेकिभिर्दानविधानस्याप्रसक्तत्वात् । नन्वदाने तेऽनेकमनर्थमावहेयुरिति दीयत इति चेन्न—तेषामर्थग्रहणेन सम्पाद्यस्य कस्यचित् दृष्टस्याभावात् । यागादिना सर्वस्य तदात्व एव व्ययविधानात्; स्वयं चाम्बरभूषणाद्याडम्बरमन्तरेण कन्दमूलफलादिनैव जीवनात् । अतो दातृप्रतिग्रहीतृदृष्टसम्पदुपयुक्तत्वाभावान्न दानप्रसक्तिरिति ॥

[27] ननु मास्त्वन्या दृष्टसम्पत् ; सुखमेवोद्दिश्य तथा दानादि करोतीति चेत्—यदि ततः सुखं; नास्तिका अपि सम्भोग इव तत्र सहसा प्रवर्तन्ताम् । ननु मा भूत् फलम् ;

लोकव्यवहारसिद्धत्वादफलमपि क्रियते, वेदव्यवहारसिद्धत्वात्सान्ध्योपासनवदिति चेत्-गुरु मतमेतत्, न गुरोर्मतम् । ततो नेदमनवसर एव वक्तुमुचितम् ।

[28] वृद्धैर्विप्रलब्धत्वाद्बालानामिति चेन्न-वृद्धानामपि प्रवृत्तेः । न च विप्रलम्भकाः स्वात्मानमपि विप्रलभन्ते । तेऽपि वृद्धतरैरित्येवमनादिरिति चेत्—न तर्हि विप्रलिप्सुः कश्चिदत्र, यतः प्रतारणशङ्का स्यात् । इदंप्रथम एव कश्चिदनुष्ठायापि धूर्तः परान् अनुष्ठापयतीति चेत्—किमसौ सर्वलोकोत्तर एव ; यः सर्वस्वदक्षिणया सर्वबन्धुपरित्यागेन सर्वसुखविमुखो ब्रह्मचर्येण तपसा श्रद्धया वा केवलपरवञ्चन १ कुतूहली यावज्जीवमात्मानमवसादयति । कथं चैनमेकं प्रेक्षा पूर्वकारिणोऽप्यनुविदध्युः ? केन वा चिह्नेनायमीदृशस्त्वया लोकोत्तरप्रज्ञेन प्रतारक इति निर्णीतः ? न ह्येतावतो दुःखराशेः प्रतारणसुखं गरीयः । ३ यतः पाखण्डाभिमतेष्वप्येवं दृश्यत इति चेन्न—हेतुदर्शनादर्शनाभ्यां

निष्फलेऽपि प्रवृत्तिसम्भवात् । इष्टसाधनताज्ञानं हि न साक्षात्प्रवृत्तिं प्रति कारणम् , किं तु कार्यताज्ञानद्वारा । तच्चेत्कार्यताज्ञानं प्रकारान्तरेण भवति । किमनेनेष्टेन । अत एव नित्यं सन्ध्योपासनं निष्फलमपि वेदतः कार्यत्वस्यावगतत्वात् क्रियते । तद्वदेव लोकाचारबलेन कार्यताज्ञानादत्रापि प्रवृत्तिरिति चेत्—एतत् किल नित्यस्य निष्फलत्वमतं प्रभाकरगुरुमतमिति प्रथमानं गुर्वेव मतम् , न वस्तुतो गुरुत्वार्हस्य मतम् । को ह्याचार्य एवमुपदेष्टुमर्हति , निष्फले प्रवृत्तिर्भवतीति । अतः कार्यत्वबोधित्वेऽपि श्रुतेरिष्टसाधनत्वेऽपि तात्पर्यमस्त्येव । नित्यनैमित्तिकयोश्च दुरितक्षयः फलं कण्ठोक्तमेव । अतः प्रभाकरपक्षं गृहीत्वैष पर्यनुयोगः प्रथमपक्षखण्डनावसरे कर्तव्यो न संप्रति कर्तुमुचितः ॥

[28] नापि विप्रलम्भः फलम् तद्बुद्ध्युपदेशादर्शनात् स्वयं च कर्मकरणात् । ननु वृद्धैर्विप्रलब्धत्वात् फलभ्रान्त्या बालानां प्रवृत्तिरिति चेन्न-वृद्धानामपि प्रवृत्तिदर्शनात् । प्रतारणं ह्येकेनान्यस्य भवति ; न स्वस्यैव । ननु तेऽपि वृद्धाः वृद्धतरैर्विप्रलब्धाः । वृद्धतराणामनुष्ठानमप्येवं तत्पूर्ववृद्धविप्रलम्भायत्तमित्येवमनादिः प्रवाह इति चेत्—एवं तर्हि स्वपूर्वपूर्वकृतोपदेशाधीनप्रवृत्तिकतयोत्तरोत्तरस्य , न कस्यापि विप्रलम्भबुद्ध्युपदेशकत्वमिति सर्वत्राविप्रलम्भकत्वमेव सिद्धम् । अथ नात्यन्तानादिः प्रवाहः ; किं तु प्रथमतः कश्चिदन्योपदेशमन्तरेणैव स्वबुद्ध्या विप्रलम्भोपायमध्यवसाय पराननुष्ठापितवान् ; स्वयमननुष्ठाने च परे न प्रवर्तेरन्निति जागरूकः स्वयमनुष्ठितवांश्च । तदारभ्यैष प्रवाह इति चेत्—स एष भवता सुदृढमभ्यूहितो हन्त सर्वलोकविलक्षणो

---

१ क धन्वन. २ क. ख. प्रेक्षाकारिणः । ३ बो. अथ

विशेषात् । अनादौ चैवंभूतेऽनुष्ठाने प्रतायमाने प्रकारान्तरमाश्रित्यापि बहुवित्तव्ययायासोपदेशमात्रेण प्रतारणा स्यात् ; १ नत्वनुष्ठानागोचरेण कर्मणा । अन्यथा प्रमाणविरोधमन्तरेण पाखण्डित्वप्रसिद्धिरपि न स्यात् ॥

लक्ष्यते । सर्वो हि लोकः स्वयमणुमात्रमपि दुःखमपारमभिमन्यमानः सर्वतोऽप्यर्थमार्जयन् समस्तबन्धुसम्भावितः सकलविधसुखोपायेदम्परः कामचारगात्रपोषणादिपरायणः सुखसमुद्रसम्मग्नतायै स्पृहयते । अयं पुनः सर्वस्वमर्थिभ्यः प्रदायाखिलं बन्धुसम्बन्धमवधूय ऐहिकसुखमल्पमप्यनिच्छन् विजितमन्मथो विशिष्टशरीरक्लेशो विश्वासभूमिर्ना यत् आमरणमात्मानं दुःखश्वभ्र एव धीरं पातयति, तन्नूनं केवलपरवञ्चनकुतूहलबलादितीदृशस्तावददृष्टश्रुतपूर्व एव । ईदृशस्यैकस्य विप्रलम्भकस्य वशे इमे सर्वे पूर्वे परे च प्रेक्षापूर्वकारिणः स्थिताः ; एष्वेकस्याप्ययं विवेको नोदमूदितीदमप्यद्भुतम् । एवं सर्वैरपि समकण्ठं सम्मानितोऽपि स पुरुषो भवता सर्वदेशकालवेदिना सकलजनातिशायिशेमुषीसमृद्धेन विप्रलम्भकत्वेन विशेषतः साक्षादेवाध्यक्षित इत्यद्भुततरस्ते प्रभावः । ननु प्रत्यक्षाभावेऽपि युक्त्या पर्यालोचयामीति चेत् — किमेतावतोऽर्थकामबन्धुपरित्यागदुःखनिवहादप्यतिशायितं प्रतारणसुखम् ; येन स वा तथा करिष्यति ; त्वं वा तादृशमनुमास्यसि ॥ ननु पाखण्डत्वाभिमतेषु बौद्धार्हतादिषु यत ईदृशविप्रलम्भनं दृश्यते , अतोऽनुमीयते ; अन्यथा तत्रापि प्रतारणसुखप्राबल्याभावयुक्त्या तदाचारसाधुतास्थापनप्रसङ्गादिति चेत्— न ; तत्राप्रामाणिकतायां कर्म लाघवादयो हेतवो लक्ष्यन्ते, अत्र नैवं वैलक्षण्यात् । तदिदं द्वितीयस्तबके विवरिष्यते । किं च यदि परलोकफलकं बहुप्रकारं यज्ञदानादि पारम्पर्यागतं नाभविष्यत्— तदैवमनुष्ठानागोचरे सति कर्मणि बौद्धप्रभृतिकृतं प्रतारणमपि नावकाशमलप्स्यत । बहुवित्तव्ययादिसाध्यविविधवैदिककर्मानुष्ठाने सर्वतः प्रसृते तु स्वयमपि तादृंशि कर्माणि कल्पयित्वा स्वयमनुष्ठायैव कल्पितोपदेशमात्रेण तैः प्रतारणाशक्यकरणा । वैदिकश्च घण्टापथोऽयमनादिः, अन्यस्त्वर्वाचीनस्तैस्तैस्तदा तदा समुत्थितैस्सहसा परिकल्पित इति निश्चप्रचमेतत् । अतो विश्वजनप्रवृत्त्यन्यथानुपपत्त्या बौद्धादिबाह्यकल्पितप्रकारान्यथानुपपत्त्या च सिद्धं वैदिककर्मणां सफलत्वम् ।

---

१ 'अनुष्ठानगोचरेण कर्मणा' पा० बो. 'इह दुःखात्मके कर्मणि स्वयमनुष्ठायैव परमनुष्ठापयति ; तस्मान्न प्रतारणेयमित्याह अनादाविति ....अनुष्ठानागोचरेण कर्मणेति केचित् पठन्ति । तत्रायमर्थः—यदि वैदिकानुष्ठानात् पूर्वसिद्धं किञ्चिदनुष्ठानं स्यात्—ततः पश्चात्तनं वैदिकमनुष्ठानं तत्र प्रतारणपरं स्यात् । न तु पूर्वसिद्धानुष्ठानागोचरेण कर्मणा प्रतारणं सम्भवति । सर्वत्र प्रसिद्धानुष्ठानविषयत्वात् प्रतारणस्येति' ॥

29 अस्तु दानाध्ययनादिरेव विचित्रो हेतुर्जगद्वैचित्र्यस्येति चेन्न—क्षणिकत्वात्। अपेक्षितस्य कालान्तरभावित्वात्।

चिरध्वस्तं फलायाऽलं न कर्मातिशयं विना।
[1] सम्भोगो निर्विशेषाणां न भूतैः संस्कृतैरपि ॥ ९ ॥

तस्मादस्त्यतिशयः कश्चित्। ईदृशान्येवैतानि स्वहेतुबलाऽऽयातानि, येन नियतभोगसाधनानीति चेत्—तदिदममीषामतीन्द्रियं रूपं सहकारिभेदो वा? न तावत् ऐन्द्रियकस्यातीन्द्रियं रूपम्, व्याघातात्। द्वितीये त्वपूर्वसिद्धिः ॥

30 सिद्ध्यतु भूतधर्म एव गुरुत्वादिवदतीन्द्रियः। अवश्यं त्वयाऽप्येतदङ्गीकरणीयम्। कथमन्यथा मन्त्रादिभिः प्रतिबन्धः। तथा हि—करतलानलसंयोगात् यादृशादेव दाहो दृष्टः, तादृशादेव मन्त्रादिप्रतिबन्धे सति दाहो न जायते; असति तु जायते। तत्र न दृष्टवैगुण्यमुपलभामहे। नापि दृष्टसाद्गुण्येऽदृष्टवैगुण्यं सम्भावनीयम्; तस्यैताव-

अपि च बाह्यानां प्रमाणखण्डिततत्त्वबोधकपाखण्डिशब्दव्यवहार्यताऽपि तेषामप्रामाणिकत्वं, एषां प्रामाणिकत्वं च व्यवस्थापयति। अतः प्रकारान्तरासंभवाद्विश्ववृत्तेर्विलक्षणफलवत्त्वं सिद्धम् ॥

29 नन्वस्तु विश्ववृत्तिसाफल्यम्। तथाऽपि तत एव दानाध्ययनादेस्तत्फलसम्भवे किमदृष्टेनेति चेन्न, दानादेः शीघ्रनाशित्वात् फलस्य च कालान्तरभावित्वात् मध्ये व्यापारस्यावश्यकल्प्यत्वात्। न हि बहोः कालात् प्रागेव ध्वस्तं कर्म स्वजन्यमतिशयमदृष्टं विना फलजनने समर्थम्। अस्तु तर्हि सः, परं तु संभूतेष्वेवेति चेन्न, आत्मनां निर्विशेषत्वे भूतानां संस्कृतत्वेऽपि सम्यग्व्यवस्थितभोगासम्भवात्। अतः प्रत्यात्मनियमाद्भुक्तेरस्त्येवात्मन्यतिशयः। ननु येनातिशयेन नियतभोगसाधनानि भवेयुः एवम्भूतातिशयरूपाण्येवेमानि भूतानि स्वहेतुबलेन क्रियन्त इति चेत् सोऽयमतिशयोऽतीन्द्रियत्वेनाभिमतः किं कारण-कारणतावच्छेदकजात्यन्यतरात्मकं रूपमुत भूतानां सहकारी? नाद्यः, इन्द्रियग्राह्यरूपस्यातीन्द्रियत्वासम्भवात्। अन्त्ये तु अन्यनिष्ठस्यापि सहकारित्वासम्भवादात्मनिष्ठादृष्टसिद्धिः।

30 ननु कर्मजन्योऽयं भूतनिष्ठ एवास्तु कश्चित्। तस्यातीन्द्रियत्वं तु गुरुत्वशक्त्यादिवत्। गुरुत्वस्यावयविगतस्यावयवगुणमात्रजन्यस्य यावदाश्रयभाविनोऽन्यादृशप्रकृतातिशयापेक्षया वैलक्षण्येऽपि शक्तिस्तुल्यरूपा सम्यग्दृष्टान्तः। अतो मन्त्रादिकृतदाहप्रतिबन्धान्यथानुपपत्त्याऽग्न्यादौ शक्तेस्त्वयाऽपि स्वीकार्यत्वेन, तद्वदेवास्यापि भूतनिष्ठत्वमुपपद्यते। न च तत्रापि शक्ति-

[1] 'सम्भाग' इति पाठः क. ख. पु. दृश्यते। (भोग) संविभाग इत्यर्थोऽपि घटते। परं तु उपरितनपाठो व्याख्यातृसम्मतः।

न्मात्रार्थत्वात् । अन्यथा, कर्मण्यपि विभागः कदाचिन्न जायेत । न च प्रतिबन्धकाभावविशिष्टा सामग्री कारणम् ; अभावस्याकारणत्वात् । तुच्छो ह्यसौ । प्रतिबन्धकोत्तम्भकप्रयोगकाले च तेन विनाऽपि कार्योत्पत्तेः । प्राक्प्रध्वंसादिविकल्पेन चानियतहेतुकत्वापातात् । अकिञ्चित्करस्य प्रतिबन्धकत्वायोगात् ; किञ्चित्करत्वे चातीन्द्रियशक्तेः स्वीकारात् । मन्त्रादिप्रयोगे चेतरेतराभावस्य सत्त्वेऽपि कार्यानुदयात् । अतोऽतीन्द्रियं किञ्चिद्दाहानुगुणमनुग्राहकमग्नेरुन्नीयते, यस्यापकुर्वतां प्रतिबन्धकत्वमुपपद्यते ; यस्मिन्नविकले कार्यं जायते १ यस्यैकजातीयत्वादनियतहेतुकत्वं निरस्यत इति ॥

[31] अत्रोच्यते—

भावो यथा तथाऽभावः कारणं कार्यवन्मतः ।
प्रतिबन्धो विसामग्री तद्धेतुः प्रतिबन्धकः ॥ १० ॥

मस्वीकृत्य अदृष्टरूपकारणाभावादेव दाहासिद्धिः सम्भावनीया ; अदृष्टस्य सकलकारणमेलनमात्रफलकत्वेन सति दृष्टकारणकलापे कार्यविरहायोगात् । अन्यथा कर्मजन्यस्य विभागस्य कर्मणि सत्यपि कदाचिदजननप्रसङ्गात् । न च मण्यभावः कारणम् ; अभावस्य तुच्छत्वेन कारणत्वायोगात् ; प्रतिबन्धकोत्तेजकसमावेशे च कार्यसिद्ध्या मण्यभावस्य व्यभिचरितत्वाच्च ; प्रागभावस्य, प्रध्वंसस्यात्यन्ताभावस्य च पृथक्पृथक्कारणत्वे व्यभिचाराच्च । किञ्च मणेः प्रतिबन्धकरूपकिञ्चिज्जनकत्वं स्वीक्रियते, न वा ; न चेत्-प्रतिबन्धकत्वं न सिद्ध्येत् । आद्ये तु प्रतिबन्धस्य शक्तिनाशरूपतया तत्प्रतियोगिभूतशक्तिः स्वीकृतैव भवति । अतोऽभावकारणत्वासम्भवात् प्रतिबन्धकत्वस्यान्यथानुपपत्त्या च शक्तिसिद्धिः । प्रागभावादेरभावत्वेनानुगतरूपेण कारणत्वस्वीकारेण व्यभिचारपरिहारे तु मणिसत्त्वेऽप्यग्नौ मणिभेदरूपाभावसत्त्वाद्दाहापत्तिः । अतोऽग्नेः सहकारि किञ्चिदस्तीति कल्प्यम् । तद्विनाशका एव प्रतिबन्धकपदवाच्याः । तस्मिन् सत्येव दाहः । तस्य च शक्त्यपरपर्यायस्य नश्यतो जायमानस्य च भिन्नभिन्नत्वेऽप्यनुगतरूपेण कारणत्वाङ्गीकारान्न व्यभिचारः । अतस्तन्न्यायेन यागादिजन्योऽतिशयोऽपि भूतेष्वेवेति चेत्—

31 न दृष्टान्तासिद्धेः । न तावदभावकारणत्वायोगः, अन्वयव्यतिरेकरूपयत्प्रकारवत्तया भावस्य कारणत्वम्, तत्प्रकारवत्तयाऽभावस्य कारणत्वं मनने क्रियमाणे सिद्धम् । कार्यवदिति । यथा तुच्छत्वेऽप्यभावः कार्यं, तद्वत्कारणमपीत्यर्थः । नापि प्रतिबन्धकत्वान्यथानुपपत्तिः,

---

१ प्र. 'शक्तेः प्रदेशान्तरेऽप्युपयोगमाह यस्येति । तृणादीनां व्यभिचारात्कारणत्वमनुपपद्यमानमनुगतसामर्थ्यं .... कल्पयतीति ।'

न ह्यभावस्याकारणत्वे प्रमाणमस्ति । न हि विधिरूपेणासौ तुच्छ इति स्वरूपेणापि तथा ; निषेधरूपाभावे विधेरपि(रेव) तुच्छत्वप्रसङ्गात् । कारणत्वस्य भावत्वेन व्याप्तत्वात्तन्निवृत्तौ तदपि निवर्तेत इति चेन्न— परिवर्तप्रसङ्गात् । अन्वयव्यतिरेकानुविधानस्य च कारणत्वनिश्चयहेतोर्भाववदभावेऽपि तुल्यत्वात् । अभावस्यावर्जनीयतया सन्निधिः, न तु हेतुत्वेनेति चेत्—तुल्यम् । प्रतियोगिनमुत्सारयतस्तस्यान्यप्रयुक्तस्सन्निधिरिति चेत्—तुल्यम् । भावस्याभावोत्सारणं स्वरूपमेवेति चेत्—अभावस्यापि भावोत्सारणं स्वरूपान्नातिरिच्यते । तस्मात् यथा 'भावस्यैव भावो जनक' इति नियमोऽनुपपन्नः, तथा 'भाव एव जनक' इत्यपि । को ह्यनयोर्विशेषः ॥

न हि वयं मणिं प्रतिबन्धकं ब्रूमः , किं तु प्रतिबन्ध एव सः । प्रतिबन्धो नाम सामग्रीविरहः । प्रतिबन्धकत्वं तद्विरहहेतुत्वं मणिसन्निधापकानां पुरुषाणामेव । अतो न शक्तिसिद्धिरिति ।

तथा हि—अभावस्याकारणत्वे किं प्रमाणम् ; तुच्छत्वं प्रमाणमिति चेत्—किमिदं तुच्छत्वम् ? न तावत् सर्वात्मनाऽसत्त्वम् ; तस्य शशशृङ्गादावनुपाख्य एव सम्भवात्, (विधिना भावत्वेन रूपेण) विधेर्भावस्य रूपेण भावत्वेन तस्यासत्त्वेऽप्यभावत्वेन रूपेण सत्त्वात्सर्वात्मनाऽसत्त्वासम्भवात् । किञ्चिद्रूपेणासत्त्वेऽपि तुच्छत्वस्वीकारे निषेधस्याभावस्य रूपेणाभावत्वेनासत्त्वात् भावेऽपि तुच्छत्वप्रसङ्गादुक्तानुमाने व्यभिचारः । नन्वभावो न कारणं भावत्वाभावादित्यनुमानेनाकारणत्वसिद्धिः । अत्र च व्यतिरेकव्याप्तिः कारणत्वव्यापकत्वस्य भावत्वे दर्शनादिति चेन्न—भावो न कारणं अभावत्वाभावादिति अभावत्वस्य कारणत्वव्यापकत्वाङ्गीकारेणानुमानसम्भवात् । नन्वन्वयव्यतिरेकाभ्यां भावे कारणत्वनिश्चयादभावत्वे कारणत्वव्यापकत्वं नास्तीति चेत्—मण्यभावादावप्यन्वयव्यतिरेकाभ्यां कारणत्वनिश्चयाद्भावत्वेऽपि कारणत्वव्यापकत्वाभावेन पूर्वानुमानभङ्गात् । ननु मण्यभावस्यान्वयव्यतिरेकशालित्वेऽपि घटं प्रति दण्डत्वादेरिवानपेक्षायामप्यवर्जनीयः सन्निधिरित्यन्यथासिद्धत्वान्न कारणत्वमिति चेत्—तुल्यरीत्या भावेष्वप्यवर्जनीयसन्निधित्वेनान्यथासिद्धेस्सुवचतया कारणत्वानिश्चय एव । ननु मण्यभावस्य मणिरूपप्रतियोग्यपनयनार्थं सन्निधिः, न दाहोत्पादनार्थमित्यन्यथासिद्धिर्युक्तेति चेत्—भावस्यापि स्वाभावापनयनार्थमेव सन्निधिः। स्वाभावे सति कार्यादर्शनादित्यन्यथासिद्धिस्तुल्यैव । ननु किमिदं स्वाभावापनयनं नाम ? अन्ततः स्वाभावाभाव एव । स च भाव एवेति भावकारणत्वमत्याज्यमिति चेत्— मण्यपनयनमप्यन्ततो मण्यभाव एवेति सिद्धं तस्यापि कारणत्वम् । किं च कारणत्वव्यापकतायाः भावत्वेऽङ्गीकारे तुल्ययुक्त्या कार्यत्वव्यापकत्वस्यापि तत्र सम्भवादभावस्य ध्वंसस्य कार्यत्वमपि न सिद्ध्येत्, विशेषाभावात् । अतः कार्यत्ववत् कारणत्वस्याप्यभावे सिद्धिरिति ।

[32] प्रतिबन्धकोत्तम्भकप्रयोगकाले तु व्यभिचारस्तदा स्यात् ; यदि यादृशे सति कार्यानुदयः, तादृश एव सति उत्पादः स्यात् । न त्वेवम् ; तदाऽपि प्रतिपक्षस्याभावात् । असत्प्रतिपक्षो हि १ प्रतिबन्धकाभिमतो मन्त्रः प्रतिपक्षः । स च तादृशो नास्त्येव । यस्त्वस्ति , नासौ प्रतिपक्षः । तथापि विशेष्ये सत्येव विशेषणमात्राभावस्तत्र ; स चोत्तम्भकमन्त्र एवेत्यन्यैव सामग्रीति चेत्—न, विशिष्टस्याप्यभावात् । न हि दण्डिनि सति अदण्डानामन्येषां नाभावः , किन्तु दण्डाभावस्यैव केवलस्येति युक्तम् । यथा हि केवलदण्डसद्भावे, उभयसद्भावे, द्वयाभावे वा केवलपुरुषाभावः सर्वत्राविशिष्टः , तथा

---

[32] ननु मण्यभावो न कारणं, मणिसत्त्वेऽप्युत्तेजके सति दाहदर्शनादिति चेत्—यादृशस्य मणेः प्रतिपक्षत्वमस्मदिष्टं , तादृशस्य सत्त्व एव दाहोत्पादे हि व्यभिचारः स्यात् । न ह्युत्तेजकदशायां दाहोत्पादस्तादृशमणिसत्त्वकालिकः , तादृशमणेरभावात् । यो हि युष्माभिः प्रतिबन्धकत्वेनाभिमतः (वस्तुत उत्तेजकाऽऽहितशक्तेस्तद्दशायामनाशकत्वेनासम्भावितप्रतिबन्धजनकताकः अत एव उत्तेजकाभावविशिष्टमणित्वेन युष्माभिः कल्पनीयप्रतिबन्धकताकः)अस्मन्मते च पुंसामेव प्रतिबन्धकतया कारणीभूताभावप्रतियोगित्वमात्रेण प्रतिपक्ष इत्येवोच्यमानः , स तावन्न केवलमण्यादिः , किंतु यस्य स्वप्रतिपक्षःस्वविरोधी उत्तेजकोऽसन् , तादृश एव । सोऽयमुत्तेजकाभावविशिष्टमणिस्तदानीं नास्ति । ननु तथाऽप्युत्तेजकमण्युभयसत्त्वे भवन्नुत्तेजकाभावविशिष्टमण्यभाव उत्तेजकाभावरूपविशेषणाभाव एव ; स चोत्तेजकमेवेति कदाचिदुत्तेजकं कदाचिन्मण्यभावः कारणमिति सामग्रीद्वयमुक्तं भवति, न त्वनुगतः कार्यकारणभाव इति चेन्न—सामग्र्या एकत्वात् । न हि विशिष्टाभावो विशेषणाभाव एव । तथा सति दण्डाभावविशिष्टपुरुषाभावोऽपि दण्डाभावाभाव एव स्यात् । तच्च न युक्तम् । दण्डविशिष्टपुरुषे वर्तमाने 'दण्डाभावविशिष्टपुरुषो नास्ती'ति प्रतीयमानेऽभावे प्रतियोगिकोटौ दण्डाभावस्येव दण्डाभावविशिष्टपुरुषाणामपि प्रतियोगितया भाने स्पष्टे सति, 'अयमभावो दण्डाभावमात्रस्य, न त्वदण्डानामपी'ति न हि युक्तं वक्तुम् । तस्मात् केवलपुरुषाभावो दण्डाभावविशिष्टपुरुषाभावः, दण्डमात्रसद्भावे विशेषणविशेष्योभयाभावाद्भवति, दण्डपुरुषोभयसद्भावे च विशेषणमात्राभावात्, तदुभयाभावे च विशेष्याभावमात्रादित्यनेकत्र प्रतीयमाने विशिष्टाभावे वर्तमानं विशिष्टाभावत्वं विशेषणमात्राभाववृत्तिधर्मातिरिक्तमिति निश्चेयम् । तद्वत् उत्तेजकाभावविशिष्टमण्यभावत्वमप्यतिरिक्तम् । तेन रूपेण च कारणत्वमिति । ननु किमर्थमयं क्लेशः,

---

१. प्र. 'प्रतिबन्ध एव प्रतिबन्धकः । स्वार्थे कः । तत्त्वेनाभिमत इत्यर्थः । अतो न विरोधः ।'

केवलोत्तम्भकसद्भावे, प्रतिबन्धकोत्तम्भकसद्भावे, द्वयाभावे वा केवलप्रतिबन्धकाभावोऽविशिष्ट इत्यवधार्यताम्। अथैवंभूतसामग्रीत्रयमेव किं नेष्यते? कार्यस्य तद्व्यभिचारात्; जातिभेदकल्पनायां च प्रमाणाभावात्; यथोक्तेनैवोपपत्तेः। भावे वा काममसावस्तु; का नो हानिः।

[33] प्राक्प्रध्वंसविकल्पोऽपि नानियतहेतुकत्वापादकः, यस्मिन् सति कार्यं न जायते, तस्मिन्नसत्येव जायत इति, अत्र संसर्गाभावस्यैव प्रयोजकत्वात्। यस्तु संसर्गाभावतादात्म्यनिषेधयोर्विशेषमनाकलयन्नितरेतराभावेन प्रत्यवतिष्ठते, स प्रतिबोधनीयः। तथाऽप्यभावेषु जातेरभावात् कथं त्रयाणामुपग्रहः स्यात्; अनुपगृहीतानां च कथं कारणत्वावधारणमिति चेत्—मा भूज्जातिः। न हि तदुपगृहीतानामेव व्यवहाराङ्गत्वम्। सर्वत्रोपाधिमद्व्यवहारविलोपप्रसङ्गात्।

विशेषणाभाव-विशेष्याभावोभयाभावानां त्रयाणां पृथगेव कारणत्वमस्त्विति चेन्न—दाहत्वरूपकार्यतावच्छेदकैक्याद्व्यभिचारापत्तेः। न च तृणारणिमणिस्थल इव कार्यवैजात्यं कल्प्यतामिति शङ्क्यम्—तत्र तृणाद्यनुगतानतिप्रसक्तधर्माभावात्तथा कल्पनेऽपि प्रकृत उक्तरीत्या तल्लाभाद्वैजात्यकल्पनायोगात्। अभ्युपेत्य च ब्रूमः—प्रमाणसद्भावे, स्यात् कामं जातिभेदः। अथापि शक्यसिद्ध्या तवैव हानिरिति॥

[33] न च प्राक्प्रध्वंसादिविकल्पाद्व्यभिचारस्य दुष्परिहरत्वम्; 'अत्र नास्ती'ति प्रतीतिगम्येन संसर्गाभावत्वेनानुगतरूपेण कारणत्वस्वीकारात्। यस्त्वाक्षिपति, 'संसर्गाभावत्वं नाम न सम्बन्धप्रतियोगिकाभावत्वं सम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वं वा; ध्वंसे प्रागभावे च तदनङ्गीकारात्; अन्योन्याभावस्यापि तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकतयाऽतिप्रसङ्गाच्च। अतः प्रागभावादिसाधारणं संसर्गाभावत्वमभावत्वमेवेति मणिसत्त्वेऽपि तद्भेदात्मकाभावसत्त्वाद्दाहापत्तिरिति'—स एवमन्योन्याभावव्यावृत्तं संसर्गाभावत्वं बोधनीयः, 'वृत्तिनियामकसम्बन्ध एव लोके स्वरसतः संसर्ग इति व्यवह्रियते। तादात्म्यं च न तादृशम्। स च वृत्तिनियामकसम्बन्ध आधाराधेयभावप्रतिपादकेन 'अस्ति'पदेन सप्तम्या चावगम्यते, यथा—अत्र घटोऽस्तीति। एवं सप्तम्यादिनिर्देशेन प्रदर्श्यमानोऽभावः संसर्गाभावः। स च त्रितयात्मकः; अत्र घटो नास्तीत्येकरूपेण त्रयाणां यथायथं प्रतीतेः। अन्योन्याभावस्तु 'इदमिदं न भवती'त्येवं बोध्यमानः। अतः संसर्गबोधकपदनिर्देशप्रयोजकीभूताभावत्वं संसर्गाभावत्वम्। तादात्म्यसम्बन्धानवच्छिन्नप्रतियोगिताकाभावत्वं संसर्गाभावत्वमिति तु प्रसिद्धमेव। अतो न कश्चिद्दोष इति। न च तथाऽपि द्रव्यगुणकर्मणामेव जातिमत्त्वात् निरुक्तधर्मस्य जातित्वाभावात्कथं तेन त्रितयक्रोडीकरणमिति

[34] एते (मने)न प्रतिबन्धके सत्यपि तज्जातीयान्यस्याभावसम्भवात् कार्योत्पादप्रसङ्गः, अनुत्पादे वा ततोऽप्यधिकं किञ्चिदपेक्षणीयमस्तीति निरस्तम् । यथा हि 'तज्जातीये सति कार्यं जायते, अर्थात् असति न जायते' इति स्थिते तद्भावेऽपि तज्जातीयान्तराभावान्न भवितव्यं कार्येणेति १ न, तथैतदपि ; अनुकूलवत् प्रतिकूलेऽपि सति तज्जातीयान्तराभावानामकिञ्चित्करत्वादिति ॥

[35] यत्तु 'अकिञ्चित्करस्ये'ति-तदप्यसत् । सामग्रीवैकल्यं प्रतिबन्धपदार्थो मुख्यः । स चात्र मन्त्रादिरेव । न त्वसौ प्रतिबन्धकः । ततः किं तस्याकिञ्चित्करत्वेन ? तत्प्र-

---

वाच्यम् - भूतत्वमूर्तत्वाद्युपाधिविशिष्टतयाऽपि वस्तूनामनुगतव्यवहारविषयत्वदर्शनेन जातित्वाभावेऽप्यदोषात ॥

[34] ननु मण्यभावस्य कारणत्वे एकस्मिन् मणौ सत्यप्यन्यस्य तज्जातीयस्य मणेरभावसत्त्वाद्दाहापत्तिः । तत्र दाहानुत्पादे तु मण्यभावतोऽतिरिक्तं कारणं स्वीकर्तव्यमापतितमिति चेत्—इदमुक्तेन व्यवहारविलोपप्रसङ्गेनैव निरस्तम् । न ह्येकस्मिन् मणौ सति मणिर्नास्तीति व्यवहारो लोके भवतीति । एकव्यक्तिमात्रसत्त्वेऽपि कारणत्ववत प्रतिबन्धकत्वस्यापि सम्भवात् । कपाले सति घटो जायत इत्युक्तौ अर्थात् कपालाभावे घटो न भवतीति व्यतिरेकोऽपि सिद्ध्यति । एतस्मिन् स्थित, 'तर्ह्येककपालसत्त्वेऽपि कपालान्तरासत्त्वात् कार्यं मा भू'दिति प्रश्नो यथा न भवति; तथैवैकप्रतिबन्धकसत्त्वेऽपि प्रतिबन्धकान्तरासत्त्वात्कार्यं भवत्वित्यपि न भवति ; कारणवत् प्रतिबन्धकेऽप्येकस्मिन् सति अन्यासत्त्वस्याप्रयोजकत्वात् । अतो यत्र प्रतिबन्धकं नास्तीति सामान्याभावस्तत्रैव कार्यमिति ॥

[35] यत्तु शक्त्यस्वीकारे मन्त्रादेः प्रतिबन्धकत्वं न घटत इति—तदिष्टमेव । प्रतिबन्धपदमुख्यार्थो हि सामग्रीविरहः । प्रकृते च मण्याद्यभावविरहरूपः प्रतिबन्धो मण्यादिरेव । प्रतिबन्धकत्वं तु मण्यादिसन्निधापकानां पुंसामेव । ते च सन्निधापनकरत्वात् किञ्चित्करा एवेति । एकदेशिनस्तु 'प्रतिबन्धः कार्यानुत्पादः, तत्प्रयोजकत्वरूपं प्रतिबन्धकत्वमेव मण्यादेरित्याहुः । तन्न, मणौ मुख्यस्य प्रतिबन्धकत्वस्यासिद्धेरुपचारस्यैवाश्रयणीयत्वात् । तथा हि—कार्यस्यानुत्पादो नाम किं कार्यप्रागभावः उत कार्यप्रागभावस्य कालान्तरसम्बन्धः । आद्ये प्रागभावस्यानादित्वात् मणेस्तदजनकत्वादप्रतिबन्धकत्वं सिद्धम् । नान्त्यः, कालशब्दमुख्यार्थस्य महाका-

---

१ नञ् क पु. नास्ति । 'यथा तथे'ति साजात्यमयुक्तत्वेन रूपेण विवक्षितं चेत् तदभावेऽपि न दोषः । प्र. 'यथा ....बीजान्तराणामभावादङ्कुरेण न भाव्यमित्युक्तम्, तथैतदपीत्यर्थः' इति ।

योकारस्तु प्रतिबन्धारः ; ते च किञ्चित्करा एवेति किमसमञ्जसम् ॥ ये तु व्युत्पादयन्ति; 'कार्यानुत्पाद एव प्रतिबन्ध' इति-- तैः १ 'प्रतिबन्धमकुर्वन्त एव प्रतिबन्धकाः' इत्युक्तं भवति । तथा हि—कार्यस्यानुत्पादः प्रागभावो वा स्यात्, तस्य कालान्तरप्राप्तिर्वा । न पूर्वः, तस्यानुत्पाद्यत्वात् । न द्वितीयः, कालस्य स्वरूपतोऽभेदात् । तदुपाधेस्तु मन्त्रमन्तरेणापि स्वकारणाधीनत्वात् । प्रागभावावच्छेदककालोपाधिस्तदपेक्ष इति चेन्न—मन्त्रात्पूर्वमपि तस्य भावात् । तस्मात् सामग्रीतत्कार्ययोः पौर्वापर्यनियमात्तदभावयोरपि पूर्वापरभाव उपचर्यते ; वस्तुतस्तु तुल्यकालत्वमेवेति नायं पन्थाः ।

[36] न चेदेवं, शक्तिस्वीकारेऽपि कः प्रतीकारः ? तथा हि प्रतिबन्धकेन शक्तिर्वा विनाश्यते, तद्धर्मो वा, धर्मान्तरं वा जन्यते, न जन्यते वा किमपीति पक्षाः । तत्रा-

---

लस्यैकत्वात् कालान्तरेत्यस्य दुर्वचत्वात् । वस्तुतः कालस्यैकत्वेऽपि तदुपाधीनां भिन्नत्वात् पूर्वोपाधिभिन्नोपाधिसम्बन्ध एव कालान्तरप्राप्तिरिति चेत्—उपाधिसम्बन्धस्यापि कालिकस्वरूपसम्बन्धतयोपाधिस्वरूपत्वात्तादृशोपाधिजनकत्वमेव प्रतिबन्धकत्वं वक्तव्यम् । तच्च न सम्भवति, उपाधीनां सूर्यपरिस्पन्दादिरूपाणां सूर्यादिकारणायत्तत्वेन प्रकृतमणिमन्त्राद्यायत्तत्वाभावात् । ननु तेषां परिस्पन्दत्वादिना मण्याद्यजन्यत्वेऽपि, यादृश कालोपाध्यवच्छेदेन दाहप्रागभावः, तादृशप्रागभावावच्छेदकोपाधित्वेन रूपेण मण्यादिजन्यत्वमिष्यत इति चेन्न—मण्यादेः पूर्वमपि प्रागभावावच्छेदकोपाधिसत्त्वेन तत्त्वस्यापि कार्यतानवच्छेदकत्वात् । तस्मान्मण्याद्यभावस्य दाहं प्रति कारणत्वात् तयोर्दाहमण्याद्यभावयोर्यः कार्यकारणभावः, स एव तदभावयोरारोप्यते । आरोप्य च मण्याद्यभावाभावाद्दाहाभाव इति व्यवह्रियते । एवमेव कारणाभावात् कार्याभाव इति व्यवहारः सर्वत्र । न तु कार्याभावः कारणाभावकालावृत्तिः । अतः मण्यभावाभाव मणौ प्रागभावात्मकदाहानुत्पादजनकत्वमौपचारिकमिति, नायं पन्था वस्तुतत्त्वशोधनावसरेऽनुसर्तव्यः । अतो मणिः प्रतिबन्धः ; प्रतिबन्धकस्तु पुरुष इत्येव मुख्या रीतिः ॥

[36] मीमांसकैरपि यदि मन्त्रादेरमुख्यं प्रतिबन्धकत्वं अभावस्य कारणत्वं वा नेष्यते, किन्तु शक्तिरेव स्वीक्रियते, तदाऽप्यनियतहेतुकत्वप्रयुक्तस्य व्यभिचारस्य परिहारः कथम् ? तथा हि—प्रतिबन्धकत्वं किं वह्निगतदाहानुकूलशक्तिनाशजनकत्वं, यद्वा तादृशशक्तिनिष्ठदाहानुकूल्यरूपधर्मनाशजनकत्वं, आहो दाहप्रतिकूलधर्मजनकत्वं, किं वा किञ्चिज्जनकत्वस्यैवास्वीकारेणौपचारिकं दाहानुत्पादहेतुत्वमिष्यते । तत्र चतुर्थपक्षे प्रतिबन्धकत्वममुख्यम् । अतोऽकिञ्चित्करतया मुख्यप्रतिबन्धकत्वायोगाच्चतुर्थपक्षास्वीकारे विपरीतधर्मजनकत्वरूपतृतीयपक्षावलम्बने, तादृशप्रतिकूलधर्मे

---

१. प्रतिबन्धनिरूपितमुख्यजनकताशून्या एव प्रतिबन्धकशब्दार्था इति तैरुक्तप्रायमित्यर्थः ।

किञ्चित्करस्य प्रतिबन्धकत्वानुपपत्तेः विपरीतधर्मान्तरजनने, तदभावे सत्येव कार्यमित्य-
भावस्य कारणत्वस्वीकारः, प्रागभावादिविकल्पावकाशश्च । तद्विनाशे तद्धर्मविनाशे
वा पुनरुत्तम्भकेन तज्जननेऽनियतहेतुकत्वम् ; पूर्वं स्वरूपोत्पादकात् इदानीमुत्तम्भका-
दुत्पत्तेः । न च समानशक्तिकतया तुल्यजातीयत्वान्नैवमिति साम्प्रतम् ; विजातीयेषु
समानशक्तिनिषेधात् । न च प्रतिबन्धकशक्तिमेवोत्तम्भको विरुणद्धि , न तु भावशक्ति-
मुत्पादयतीति साम्प्रतम् ; तदनुत्पादप्रसङ्गात् । कालविशेषात्तदुत्पादे तदेवानियत-
हेतुकत्वमिति ॥

[37] स्यादेतत्—मा भूत्सहजशक्तिः ; आधेयशक्तिस्तु स्यात् । दृश्यते हि प्रोक्षणा-
दिना व्रीह्यादेरभिसंस्कारः । कथमन्यथा कालान्तरे तादृशानामेव कार्यविशेषोपयोगः ।
न च मन्त्रादीनेव सहकारिणः प्राप्य ते कार्यकारिण इति साम्प्रतम्—तेषु चिरध्वस्तेष्वपि

सति न दाहः, असति दाह इति तादृशधर्माभावस्य दाहं प्रत्यपेक्षितत्वात् अभावकारणत्वापातः ;
एवं प्रागभावादिविकल्पेन व्यभिचारोऽप्यनुगतसंसर्गाभावत्वास्वीकारे आपतति । अतस्तृतीयपक्षमप्यु-
पेक्ष्य शक्तिविनाश-शक्तिधर्मविनाशरूपपक्षद्वयावलम्बने मणिमात्रसमवधाने तन्नाशात्पुनरुत्तेजकेनापि
कार्यं न स्यादिति नष्टस्योत्तेजकेन पुनरुत्पादस्वीकारे, पूर्वमुत्तेजकानपेक्षं वह्निस्वरूपोत्पादकसामग्री-
बलात्तदुत्पादात् , इदानीं मन्त्रादिना तन्नाशानन्तरमुत्तेजकबलात्तदुत्पादाच्च तत्रानियतहेतुकत्व-
मवर्जनीयम् । न च सामग्र्यामुत्तेजके चानुगतैकशक्तिस्वीकारान्न व्यभिचार इति युक्तम् । तृणा-
रणिमणिविचारावसर एव विजात्येकशक्तेर्निरासात् । न च प्रतिबन्धकगतशक्तिनाशकत्वमेवोत्तेज-
कस्य , न तु वह्निशक्त्युत्पादकत्वमिति वाच्यम्—तर्हि शक्तिरूपकारणाभावादुत्तेजककाले दाहा-
नुत्पादप्रसङ्गात । ननु तत्रोत्तेजकसमवधानकाल एव हेतुरिति चेत्—तर्हि कदाचिच्छक्तिः
कारणम् दाहं प्रति, कदाचित् स काल इत्यानियतहेतुकत्वमेव । अतः शक्तिस्वीकारेऽनियत-
हेतुकत्वापातात् तृतीयचतुर्थपक्षावलम्बनमेव युक्तमिति सिद्धमभावकारणत्वं अमुख्यप्रतिबन्धकत्वं
वा । न च मुख्यप्रतिबन्धकत्वनिर्वाहाय तृतीयपक्ष एवेष्यत इति वाच्यम् । प्रतिबन्धकजनिते
विपरीतधर्मेऽपि कदाचित् प्रतिबन्धकत्वव्यवहारसम्भवेन तत्रैव सर्वत्र मन्त्रादावमुख्यत्वसम्भवा-
दतीन्द्रियधर्मोत्पादिविकल्पने गौरवात् । अतस्तुर्य एव ज्येष्ठ इति ॥

[37] ननु सामग्रीबलाद्वह्निना सह जायमाना सहजशक्तिशब्दव्यपदेश्या शक्तिर्मा भूत् दृष्टान्तः,
पूर्वसिद्धेषु व्रीहिषु पश्चात् प्रोक्षणादिभिराधातव्या शक्तिर्दृष्टान्तः स्यात् । अवश्यमियमङ्गी-
कार्या ; व्रीहीन् प्रोक्षतीत्यादिश्रुतौ द्वितीयया व्रीह्यादेः प्रोक्षणादिसंस्कार्यत्वदर्शनात् । तत्र
शक्त्यभावे प्रोक्षिताप्रोक्षितवैलक्षण्याभावेन प्रोक्षितानामेव पश्चादभ्युपगतः पुरोडाशतत्साध्य-
यागादावुपयोगो न स्यात , व्रीह्यन्तरेणापि तत्सम्पादनसम्भवात् । न च मन्त्रोच्चारणप्रोक्षणादीनि

कार्योत्पादात् । नापि प्रध्वंससहायास्ते तथा ; एवं हि यागादिप्रध्वंसा एव स्वर्गादीनुत्पादयन्तु ; कृतमपूर्वकल्पनया । तेषामनन्तत्वादनन्तफलप्रवाहः प्रसज्यत इति चेत्—अपूर्वेऽपि कल्पिते तावानेव फलप्रवाह इति कुतः? अपूर्वस्वाभाव्यादिति चेत्—तुल्यमिदमिहापि । तावताऽपि तत्प्रध्वंसो न विनश्यतीति विशेषः ॥

[38] स्यादेतत्—'उपलक्षणं प्रोक्षणादयः ; न तु विशेषणम् । तथा चाविद्यमानैरपि तैरुपलक्षिता व्रीह्यादयस्तत्र तत्रोपयोक्ष्यन्ते, यथा गुरुणा टीका ; कुरुणा क्षेत्रम्—इति चेत्— तदसत् । न हि स्वरूपव्यापारयोरभावेऽप्युपलक्षणस्य कारणत्वं कश्चिदिच्छति ; अतिप्रसङ्गात् । व्यवहारमात्रं तु तज्ज्ञानसाध्यम् , न तु तत्साध्यम् । तज्ज्ञान-

---

शक्तिमनुत्पाद्यैव सहकारिकारणानि भवन्तु ; अलं शक्त्येति वाच्यम्—तेषां क्रियारूपतया प्रागेव ध्वस्ततया स्वरूपेण कारणत्वायोगात् । न च प्रोक्षणादिध्वंससहकृता एव व्रीह्यादयः कार्यकारिण इति वाच्यम्——तथा सति प्रोक्षणादिसन्निपत्योपकारकस्थल इव यागादिकर्मणामपि स्वध्वंसद्वारैव स्वर्गादिसाधनत्वसम्भवात् परलोकसाधनादृष्टस्य संप्रति सिषाधयिषितस्यासिद्ध्यापत्तेः । ननु ध्वंसानामविनाशित्वात् तेषां व्यापारत्वे कारणसत्त्वात्पुनः पुनः फलप्रसङ्ग इति चेन्न——अपूर्वकल्पनेऽपि तस्य द्विक्षणस्थायिबहुसुखसन्तानजनकतया तावानेव फलप्रवाहः, न तदुपरीति व्यवस्थापकं किमिति प्रश्नसम्भवात् । नन्वपूर्वस्य तदनन्तरमभावादेव न फलापत्तिः । न च क्षणिकप्रथमसुखमात्रेणाविनश्य तावत्कालानुवृत्तिवत् तदनन्तरमनुवृत्तिः कुतो नेति शङ्क्यम्—अस्मात् कर्मण एतावत्कालानुभाव्यं फलमित्थं भवतीत्यस्य प्रमाणप्रतिपन्नतया तत्तन्नियतकालफलजनकत्वेनैव तत्तदपूर्वस्य कल्पितत्वात् । अतस्तावत् फलजनकत्वमेव तस्य स्वभाव इति तत एव फलप्रवाहव्यवस्थेति चेत्—तुल्यमिदं ध्वंसेऽपि ; यागादिजन्यतया प्रमिततावत्फलप्रवाहजनकत्वेनैव तस्य व्यापारतायाः स्वीकर्तव्यत्वात् । परं त्वपूर्वस्य भावकार्यतया तज्जन्यफलप्रवाहान्तर्गतान्तिमफलेन तन्नाशः, प्रध्वंसस्तु तावत्फलप्रवाहैकजनकोऽपि ततो न विनश्यतीत्यपूर्वादस्य विशेषः । अतो ध्वंसस्य व्यापारत्व एवमनुपपत्त्यभावात् प्रकारान्तरेणैव तत्र तद्व्यापारकत्वोपपादनेन यागादिजन्यापूर्वसम्मतिरिति तद्वदेव प्रोक्षणादेरपि न ध्वंसव्यापारकत्वमिति ॥

[38] ननु सत्यं न ध्वंसव्यापारकत्वम् ; अथाप्यतिशयमन्तरेणैव प्रोक्षणादिस्थले निर्वाहः । तथा हि-प्रोक्षिताप्रोक्षितसाधारण्येन व्रीहीणां यागान्वयव्यावृत्तौ हि प्रोक्षणादेरुपयोगः । तत्र नष्टस्यापि विशेषणविधया तस्य व्रीह्यन्तरव्यावर्तकत्वासम्भवेऽप्युपलक्षणतया व्यावर्तकत्वं घटते । एवं च कृतप्रोक्षणैरेव व्रीहिभिर्यागः साध्य इति शास्त्रतोऽवगमान्न व्रीह्यन्तरग्रहणप्रसक्तिः । यथा गुरुणा प्रभाकरेण संप्रत्यवर्तमानेनाप्युपलक्षिता तत्कर्तृका शाबरभाष्यटीका गुरुटीकेति व्यवहारे

मपि स्वकारणाधीनम् । न तु तेन निरन्वयध्वस्तेन जन्यते । (अस्तु तावत्) अस्तु वा तत्राप्यतिशयकल्पना ; किन्नश्छिन्नम् ? यद्वा यागादेरप्युपलक्षणत्वमस्तु । तदुपलक्षितः कालो यज्वा वा स्वर्गादि साधयिष्यति कृतमपूर्वेण ॥

[39] न च देवदत्तस्य स्वगुणाकृष्टाः शरीरादयो भोगाय , तद्भोगसाधनत्वात् स्रगादिवदित्य(नुमाना)न्वयिबलादपूर्वसिद्धेर्नाविरोध इति साम्प्रतम् ; इच्छाप्रयत्नज्ञानैर्यथायोगं सिद्धसाधनात् । न च तद्रहितानामपि भोग इति युक्तिमत् , येन ततोऽप्यधिकं सिद्ध्येत् । नापि स्वगुणोत्पादिता इति साध्यार्थः, मनसाऽनैकान्तिकत्वात् । नापि कार्यत्वे सतीति विशेषणीयो हेतुः ; तथाप्युपलक्षणैरेव सिद्धसाधनात् । असतां तेषां कथमुत्पादकत्वमिति चेत्—तदेतदभिमन्त्रणादिष्वपि तुल्यम् ॥

उपयुज्यते , यथा च कुरुणा राज्ञा भूतपूर्वेणाप्युपलक्षितं क्षेत्रं कुरुक्षेत्रमिति व्यवहारे ; तद्वत् इति चेन्न-साक्षात् स्वरूपस्य वा स्वव्यापारस्य वा कार्यकालेऽभावे कारणत्वायोगात् । अन्यथा नष्टादपि दण्डाद्घटोत्पत्त्यापत्तेः । दृष्टान्तश्च विषमः ; व्यवहारे व्यवहर्तव्यज्ञानस्यैव कारणत्वेन गुरुटीकेति व्यवहारे गुरोस्तट्टीकायाश्च ज्ञानमेव कारणमिति, व्यवहारस्य गुरुसाध्यत्वाभावात् । न च तथाऽपि व्यवहर्तव्यस्य स्वज्ञानं प्रत्युपलक्षणविधया कारणत्वमस्त्येवेति वाच्यम्-ज्ञानसामान्ये विषयस्याकारणत्वात् ; प्रत्यक्षं प्रत्येव तस्य तत्त्वात् । अतः संप्रति गुर्वादिव्यवहर्तव्यज्ञानं स्मृत्यनुमित्यादिरूपं स्वस्वकारणाधीनम् , न तु स्वरूपतो व्यापारतश्चावर्तमानतया निरन्वयध्वस्तगुर्वाद्यधीनमिति । यदि च दृष्टान्तेऽपि कारणत्व आग्रहः तर्ह्युपलक्षणस्य कारणत्वेऽतिप्रसङ्गात् तत्रापि टीकादौ गुर्वाद्याहितः कश्चिदतिशयः स्वीकार्य इति तवैव दृष्टान्तासिद्धिः । किञ्चोपलक्षणस्यापि कारणत्वे यागादेरप्युपलक्षणत्वं स्वीकृत्य तदुपलक्षितस्य महाकालस्य तादृशस्य यजमानस्यैव वा स्वर्गादिसाधनत्वसम्भवाददृष्टसिद्धिप्रसक्त्यभावात्कुत एष तदाधारविचारः ?

[39] न च न वयं प्रकारान्तरेणानिर्वाहात् यागादेरदृष्टं स्वीकुर्मः; किन्त्वनुमानप्रमाणसद्भावात् तच्चेदम्— देवदत्तस्य गात्रक्षेत्रकलत्रादयो भोगार्थं तद्गुणाऽऽकृष्टाः तद्भोगसाधनत्वात् तन्निर्मितस्रगादिवदिति । अनेन चान्वय्यनुमानेन तद्गुणस्यादृष्टस्य सिद्ध्या यागादेः प्रोक्षणादिवैषम्यमिति वाच्यम्—अनेनादृष्टासिद्धेः । तथा हि—किमिदं तद्गुणाकृष्टत्वम् ? किं भोगजननाय तद्गुणरूपसहकारिकारणापेक्षत्वं किं वा तदुत्पादितत्वम् ? नाद्यः, पुरुषेणेच्छाप्रयत्नपूर्वकमेव तत्तद्वस्तूपयोजनेन सुखसम्पादनात्तादृशेच्छादिगुणमादायानुमानपर्यवसानेनार्थान्तरात् । यत्र परकृतचन्दनलेपादिना स्वेच्छाप्रयत्नावन्तरेण सुखानुभवः तत्राप्यन्ततस्सुखात्पूर्वं तत्संवेदनस्यावश्यकतया ज्ञानमादायैवानुमानपर्यवसानम् । ईदृशगुणाभावेऽपि भोग इत्यस्य प्रामाणिकत्वे ह्येतदतिरिक्तगुणसिद्धिः । नान्त्यः , मनसि नित्ये उत्पादितत्वरूपसाध्याभावेन व्यभिचारात् । न च

[40] तस्माद्भावभूतमतिशयं जनयन्त एव प्रोक्षणादयः कालान्तरभाविने फलाय कल्पन्ते । प्रमाणतस्तदर्थमुपादीयमानत्वात् यागकृषिचिकित्सावदिति । अन्यथा कृष्यादयो दुर्घटाः प्रसज्येरन् ; बीजादीनामापरमाण्वन्तभङ्गात् तेषु चावान्तरजातेरभावान्नियतजातीयकार्यारम्भानुत्पपत्तेः । अत्रोच्यते—

[41] संस्कारः पुंस एवेष्टः प्रोक्षणाभ्युक्षणादिभिः ।
स्वगुणाः परमाणूनां विशेषाः पाकजादयः ॥ ११ ॥

कार्यत्वे सति तद्भोगसाधनत्वादिति हेतुरुच्यत इति वाच्यम् एवमपि शरीरादिकारणतया त्वदभिमतादृष्टहेतुयागहोमादिविषयकज्ञानेच्छाप्रयत्नानां गुणपदेन ग्रहणेन सिद्धसाधनाददृष्टासिद्धेः । न च तेषां नष्टानां कथमुत्पादकत्वमिति वाच्यम्—उपलक्षणतयाऽपि हेतुत्वसम्भवस्य प्रोक्षणाभिमन्त्रणादिविषये त्वदुक्तत्वात् । अत्र तदसम्भवे तत्रापि तदसम्भवात् सिद्ध्यत्येव प्रोक्षणजन्योऽतिशयः ॥

[अथैतदनुमानेनैव यागादिजन्यादृष्टस्यात्मधर्मत्वसिद्धौ कथमितःपरं भूतधर्मत्वाशङ्केति चेत् न वयमेतदनुमानं स्वीकुर्मः, अप्रयोजकत्वात । किन्तु त्वदुक्तप्रमाणसत्त्वे त्वद्रीत्यैव प्रोक्षणादिजन्यातिशयसिद्धिरित्युपापीपदाम । अस्मन्मतं तु—स्वयं स्वव्यापारद्वारा वाऽव्यवहितपूर्ववृत्तित्वविरहिणः कारणत्वेऽतिप्रसङ्गात् 'चिरध्वस्तं फलायाल न कर्मातिशयं विने'त्येवापूर्वसिद्धिरिति । न च ध्वंसेन निर्वाहः, तथात्वे दण्डस्यापि स्वध्वंसद्वारा घटकारणत्वापत्तेः ; पुण्यपापयोः कीर्तनप्रायश्चित्तनाश्यत्वस्य प्रमाणसिद्धत्वाच्च ध्वंसस्य चानाश्यत्वात् ।]

[40] तस्माद्यागकृषिचिकित्सावत् प्रोक्षणादिकमपि व्रीह्यादिषु ध्वंसविलक्षणं भावात्मकमतिशयमुत्पाद्यैव स्वर्गादिहेतुयागापूर्वजनकम्—पुत्रेष्टिपितृयज्ञादेः पुत्रपित्राद्यर्थत्वेनेव, यजेत स्वर्गकाम इति स्वर्गकामाधिकार्यर्थत्वेन च यागादेरिवास्यापि प्रमाणमुखेन व्रीह्युद्देशेनोपादेयत्वात् । न चात्र कृषिचिकित्साभ्यामतिशयोऽप्रामाणिक इति मन्तव्यम्—तत्राप्युपात्तानां बीजभेषजादीनामभिमतकार्यात्मना भवनाय परमाणुपर्यन्तं विनाशस्यावश्यकतया अन्ततः शिष्टेषु पृथिवीपरमाणुष्ववान्तरवैजात्यस्यानङ्गीकारात् भूतव्याप्यजातिरहितेभ्यस्तेभ्यस्तृणरोगादेरप्युत्पत्तिप्रसङ्गेन तत्परिहारेण विलक्षणाङ्कुरारोग्यनियतोत्पादकत्वसम्पत्तये परमाणुष्वतिशयोत्पत्तेरावश्यकत्वात् । तस्मात्तन्न्यायेन सिद्धः प्रोक्षणादिना व्रीह्यादेरतिशयः । व्रीहीनवहन्तीत्यादौ व्रीह्यादेः कर्मत्वश्रवणात्, क्रियाजन्यफलभागित्वरूपकर्मत्वोपपत्तयेऽपि तत्रैवातिशयः स्वीकार्यः । एवं चाधेयशक्तिदृष्टान्तेन यागादिजन्यातिशयस्यापि भूतधर्मत्वमेव युक्तमिति ॥

[41] अत्रोच्यते—इष्ट एवास्माकं प्रोक्षणादिजन्योऽतिशयः, अथापि स पुरुषनिष्ठ एवेष्टः, न भूतनिष्ठः । कृषिचिकित्सास्थलेऽपि पाकसम्भवस्थले पाकजानामन्यत्र चान्यादृशानां परमाणु-

यथा हि देवताविशेषोद्देशेन हुताशने हविराहुतयः समन्त्राः प्रयुक्ताः पुरुषमभिसंस्कुर्वते, न वह्निं, नापि देवताः; तथा व्रीह्याद्युद्देशेन प्रयुज्यमानः प्रोक्षणादिः पुरुषमेव संस्कुरुते, न तम् । यथा च कारीरीजनितसंस्काराधारपुरुषसंयोगाज्जलमुचां सञ्चरणजलक्षरणरूपा क्रिया, तथा व्रीह्यादीनां तत्तदुत्तरक्रियाविशेषाः । यथा चैकत्र कर्तृकर्मसाधनवैगुण्यात्फलाभावस्तथा परत्रापि; आगमिकत्वस्योभयत्रापि तुल्यत्वात् ॥

[42] न तर्हि बर्हिष इव व्रीह्यादेः पुनरुपयोगान्तरं स्यात् । उपयोगे वा तज्जातीयान्तरमप्युपादीयेत; अविशेषात् । न। विचित्रा ह्यभिसंस्काराः । केचिद्ध्रियमाणा-द्रेश्यसहकारिण एव कार्ये उपयुज्यन्ते । किमत्र क्रियताम्? विधेर्दुर्लंघत्वात् । यथा-चाभिचारसंस्कारो यं देहमुद्दिश्य प्रयुक्तस्तदपेक्ष एव तत्सम्बद्धस्यैव दुःखमुपजनयति नान्यस्य; न वा तदनपेक्षः । एवमभिमन्त्रणादिसंस्कारा अपि भवन्तो न मनागपि नोपयुज्यन्ते । कथं तर्हि व्रीह्यादीनां संस्कार्यकर्मतेति चेत् प्रोक्षणादिफलसम्बन्धादेव ॥

गतगुणानामेवेतरवैलक्षण्यवहतया विश्वरूपत्वान्न तत्राप्याधेयशक्तिसिद्धिः । तथा हि मीमांसकैः प्रोक्षणाद्यतिशयस्य व्रीह्यादौ (पू- मी २. १. ४) स्वीकृतत्वेऽस्माभिरात्मनिष्ठत्वमेवेष्यते- प्रोक्षणादिकमात्मसमवेतादृष्टजनकं अदृष्टहेतुकर्मत्वात् अर्थकर्मवदित्यनुमानात् । याः खलु मन्त्रपूर्वं क्रियमाणा हविराहुतयः, तास्वेकैकापि त्यागप्रक्षेपोभयात्मिका। तत्र त्यागांशो देवतोद्देशेन क्रियमाणः, प्रक्षेपांशश्चाहवनीयाद्युद्देशेन । न च तत्र यागस्य देवतायां प्रक्षेपस्य चाग्न्यादावतिशयाधायकत्वमिष्टम्; किं त्वात्मनि । तथैव प्रोक्षणादेरपि । ननु तत्रातिशयाभावेऽसंस्कृतैरेव व्रीह्यादिभिर्यागनिष्पत्तिरुक्ता स्यादिति चेत्—तर्हि कारीरीरूपप्रधानकर्मजन्यादृष्टस्यात्मनिष्ठतया निरदृष्टैरेव मेघैः सञ्चरणवर्षणादिनिष्पत्तिरुक्ता स्यात् । यदि तत्रादृष्टस्य स्वाश्रयात्मसंयोगद्वारा मेघसम्बन्धः, तर्ह्यत्रापि तद्द्वारैव प्रोक्षणाद्यतिशयस्य व्रीह्यादिसम्बन्धः । ननु पुंस्यदृष्टपक्षे पातकादिदुष्टे तत्र तत् कथं भवेदिति चेत्—व्रीहीणामन्यायार्जितत्वादिना दुष्टत्वे तत्र कथं भवेदिति तुल्यम् । 'कर्मकर्तृसाधनवैगुण्या'दिति सूत्रोक्तदिशाऽपेक्षितांशलोपे वैगुण्यमेव, अन्यदा न किञ्चिदिति चोभयत्र तुल्यम्; कारीरीप्रोक्षणयोः कर्तृविशेषव्रीहिविशेषयोश्चागमसिद्धसाधनतया अविशिष्टत्वात् ॥

[42] ननु तर्हि व्रीहीन् प्रोक्षतीत्यत्र प्रोक्षणस्यात्मगतादृष्टजनकत्वे सक्तून् जुहोतीत्यत्रेव धात्वर्थप्राधान्येनार्थकर्मत्वापत्त्या व्रीहीणां तदङ्गत्वमेव वाच्यम् । एवञ्च प्रोक्षितव्रीहीणामवहननसम्बन्धो यागसम्बन्धश्च न स्यात् । व्रीहिसंस्कारकत्वे हि प्रोक्षणस्य, संस्कृतानामुत्तरत्र विनियोगस्यावश्यकतया यागे तेषामेवोपयोगः स्यात्—यथा बर्हिः स्तृणातीति स्तरणसंस्कृतस्य बर्हिषः, बर्हिषि हवींष्यासादयतीति विहितहविरासादने विनियोगस्तद्वत्—न तु तदसंस्कारकत्वेऽपि । न

[43] ननु यदुद्देशेन यत्क्रियते तत्तत्र किञ्चित्करम्, यथा पुत्रेष्टिपितृयज्ञौ। तथा चाभिमन्त्रणादयो व्रीह्याद्युद्देशेन प्रवृत्ताः इत्यनुमानमिति चेत्—तन्न—हविस्त्यागादिभिरनैकान्तिकत्वात्। न हि ते कालान्तरभाविफलानुगुणं किञ्चित् हुताशनादौ जनयन्ति। किं वा न दृष्टमिन्द्रियलिङ्गशब्दव्यापाराः प्रमेयोद्देशेन प्रवृत्ताः प्रमातर्येव किञ्चिज्जनयन्ति, न प्रमेये इति ॥

चोपस्थितव्रीहित्यागे मानाभावात्त एव कार्यान्तरेऽपि गृह्यन्ते। एवमात्मनिष्ठादृष्टजनकत्वमात्रेणार्थकर्मत्वप्रसञ्जनमपि न युक्तम्—व्रीह्युद्देशेन प्रोक्षणविधानात् द्वितीयया व्रीहीणां प्राधान्यावगमात् प्रोक्षणस्य गुणकर्मत्वादिति वाच्यम्—गुणकर्मत्वसिद्धावप्यदृष्टस्यात्मनिष्ठत्वेऽदृष्टवदात्मसंयोगरूपसम्बन्धस्य व्रीह्यन्तरेऽपि तुल्यत्वेन तद्ग्रहणेऽपि दोषानापत्तेरिति चेत्—उच्यते। व्रीहीन् प्रोक्षतीत्यादौ व्रीह्यनुवादेन प्रोक्षणविधानात् अनुवादस्य च सति सम्भवे सन्निहितगामित्वात् व्रीहिभिर्यजेतेति वाक्यविहितानामेवात्र ग्रहणम्। एवं व्रीहिभिरिति तृतीयया तेषां यागं प्रति करणत्वावगमात् साङ्गस्यैव करणत्वात्, प्रोक्षणाद्यङ्गजन्योपकारसङ्गतैर्व्रीहिभिर्यागं भावयेदिति मीमांसकसम्मतवाक्यार्थस्थाने प्रोक्षणाद्युद्देश्यभूतैर्व्रीहिभिर्यागं कुर्यादिति वाक्यार्थस्वीकारात् एवंविधविधेर्दुर्लङ्घ्यतया न व्रीह्यन्तरग्रहणप्रसक्तिः। अतःप्रोक्षणादिकमीदृशोद्देश्यसहकृतमेव कार्योपयोगि। अन्यथा श्येनेनाभिचरन् यजेतेति विहितश्येनयागजन्यादृष्टस्यात्मनिष्ठत्वेऽविवादाद्गुणकर्मतया यः शत्रुरिह उद्दिष्टस्तदतिरिक्तशत्रुदेहेऽपि स्वाश्रयसंयुक्तत्वसम्बन्धेनादृष्टसत्त्वात्तदवच्छेदेनापि दुःखजननप्रसङ्गः। अतो यथा श्येनकर्म नान्यशत्रुदुःखजनकम्; न वा तच्छत्रुविषयेऽपि तद्देहानपेक्षम्, जन्मान्तरे तदभावात्—तथा प्रोक्षणादिकमप्युद्देश्ये भवत् न मात्रयाऽप्यनुपयुक्तं भवति। किं त्वदृष्टद्वारेणोद्देश्यभूतस्यैव यागान्वयविधानादुपयुक्तं भवतीति। अथोत्पत्त्याप्तिविकृतिसंस्कृतिभेदाच्चतुर्विधे कर्मत्वे संस्कार्यत्वरूपकर्मत्वस्यैव प्रकृते वाच्यतया तत्रादृष्टानङ्गीकारे क्रियाजन्यफलशालित्वरूपं कर्मत्वमेव दुर्घटमिति चेन्न—प्रोक्षणजन्यतया तत्फलभूतजलसंयोगशालित्वादेव तदुपपत्तेः। एवं च तन्मीमांसागतं 'तानि द्वैधं' अधिकरणमपि प्रोक्षणादेर्गुणकर्मत्वबोधनेदम्परम्, न त्वदृष्टस्य व्रीह्यादिनिष्ठत्वसाधकमिति ॥

[43] यत्तु मीमांसकानुमानं—प्रोक्षणादिकं व्रीहिनिष्ठादृष्टजनकं व्रीह्युद्देशेन क्रियमाणत्वात्; यत् यदुद्देशेन क्रियते तत्तत्र किञ्चिज्जनकम्; यथा पुत्रेष्टिः 'वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते' इति विहिता, 'तेजस्व्यन्नाद इन्द्रियावी पशुमान् भवति' इत्युक्तफलहेतुमदृष्टं पुत्रोद्देशेन क्रियमाणतया तत्र जनयति; यथा चामावास्यायामपराह्णे पिण्डपितृयज्ञेन चरन्तीति विहितः पितृयज्ञः पितृष्विति—तत्र त्यागप्रक्षेपादेर्देवताहुताशनाद्युद्देशेन क्रियमाणत्वेऽपि तत्र किञ्चिज्जनक-

[44] कृषिचिकित्से अप्येवमेव स्यातामिति चेन्न-दृष्टेनैव पाकजरूपादि १ परिणतिभेदेनोपपत्तावदृष्टकल्पनायां प्रमाणाभावात् । २ तथा च लाक्षारसावसेकादयो ३व्याख्याताः । अत एव बीजविशेषस्य आपरमाण्वन्तभङ्गेऽपि, परमाणूनामवान्तरजात्यभावेऽपि, प्राचीनपाकजविशेषैरेव ४ विशिष्टाः परमाणवस्तं तं कार्यविशेषमारभन्ते । यथा हि कलमबीजं यवादेः, नरबीजं वानरादेः, गोक्षीरं महिषादेः जात्या व्यावर्तते ; तथा

त्वाभावात् । न च जनयन्त्येव देवतायां प्रीतिं वह्नौ ज्वालावृद्धिं स्वसंयोगमेव वेति वाच्यम्—त्वन्मते देवताया अविग्रहत्वेन प्रीत्यप्रसक्तेः । प्रोक्षणादेरपि व्रीह्यादौ जलसंयोगजनकत्वेन सिद्धसाधनाददृष्टासिद्धिप्रसङ्गाच्च । न चादृष्टजनकत्वमेव सामान्यमुखव्याप्तौ साध्यमिति वाच्यम् । देवताहुताशनादौ तदभावेन व्यभिचारात् । एवं स्वर्गदर्शाद्युद्देशेन क्रियमाणदर्शप्रयाजादेःस्वर्गादौ किञ्चिदजनकत्वेनापि व्याप्तिभङ्गः । एवं लोकेपोन्द्रियसन्निकर्ष-लिङ्गज्ञान-शब्दज्ञानरूपाणां प्रमाणानां प्रमेयोद्देशेनोत्पाद्यमानानां तत्राकिञ्चित्करत्वदर्शनाद्व्यभिचारः । न च दुष्टेन हेतुना तदनुमातुं शक्यते ; तथा सति प्रोक्षणादिकमात्मनिष्ठादृष्टजनकं क्रियात्वात् हविस्त्यागेन्द्रियसन्निकर्षादिवदित्यप्यनुमानंसम्भवात् । न चोद्देश्यतयोपस्थितव्रीहिनिष्ठत्वं परित्यज्य कर्तृनिष्ठत्वकल्पनं न युक्तमिति वाच्यम्—कर्तुरपि प्रोक्षतेत्याख्यातोपस्थितत्वात् । कर्मतासम्बन्धेन प्रोक्षणस्य स्वरूपसम्बन्धेनादृष्टं प्रति कारणत्ववत् कर्तृतासम्बन्धेन तस्य समवायेनादृष्टं प्रति कारणत्वस्यापि युक्तत्वात् । कर्तृत्वं स्वानुकूलकृतिमत्त्वरूपं गुरुभूतमिति चेत्—कर्मत्वं क्रियाजन्यफलशालित्वमिति तत् किं लघुभूतमिति । अन्यच्च वक्ष्यते ॥

[44] ननु प्रोक्षणादेरात्मगतातिशयकरत्वे ऐकरूप्यस्योचितत्वात् कृषिचिकित्से अपि तथैव स्यातामिति चेन्न तत्रादृष्टस्यैवाभावात् । दृष्टेन पाकजरूपादिभेदेनैव तत्तत्कारणवैलक्षण्यस्य सिद्धतया तत एव विलक्षणकार्योपपत्तावदृष्टकल्पनस्यानपेक्षितत्वात् । यत्र कारणे साक्षात् पाकजरूपादि न दृश्यते तत्राप्यवयविगतरूपादिवैलक्षण्यानुसारेणावयवेऽपि तदनुमानात् दृष्टप्रायत्वमस्त्येव । ईदृशपाकजवत्तयैव लाक्षारसावसेकादिस्थलेऽपि निर्वाहो मन्तव्यः । तत्रापि तदवसेक-

---

१ परिणतिपदं क पु. । बो. 'परिणतिर्निष्पत्तिः सहकारीति वा' । २ क[2] पा०एतेन । ३ अयं पाठः क[2] पु ; अन्यत्र तु 'लाक्षारसावसेको व्याख्यात' इति । बो. 'इममेव प्रकारमुदाहरणान्तरेणातिदिशति तथा चेति ।' ४ सर्वत्र 'विशेषादेवे'ति पाठः । 'यैः पाकजविशेषैर्यवबीजमारब्धवन्तः प्राचीनैस्तैरेव तज्जातीयैरेव वा विशिष्टाः परमाणव' इति बोधन्यनुसारेणोपरितनपाठः ।

तत्परमाणवोऽपि मूलभूताः पाकजैरेव व्यावर्तन्ते । न ह्यस्ति सम्भवो गोक्षीरं सुरभि मधुरं शीतम् ; तत्परमाणवश्च विपरीताः। १ तस्मात्तथाभूतपाकजा एव परमाणवः ; यथाभूतैरेवाद्यातिशयोऽन्त्यातिशयो (वा) २ ऽङ्कुरादिर्वेति किमत्र शक्तिकल्पनया ॥

[45] कल्पादावप्येवमेव । इदानीं बीजादिसन्निविष्टानामस्मदादिभिरुपसम्पादनम् । तदानीं तु विभक्तानामदृष्टादेव ३ केवलान्मिथः संसर्ग इति विशेषः। न च वाच्यमिदानीमपि तथैव किं न स्यात् ; यतः कृष्यादिकर्मोच्छेदे तत्साध्यानां भोगानामुच्छेदप्रसङ्गादव्यवस्थाभयाच्चादृष्टानि ४ (कर्माणि) दृष्टकर्मव्यवस्थयैव भोगसाधनानीत्युन्नीयते ॥

सहकृतपाकविशेषेण बीजावयवेष्वरुणरूपादौ जाते तेषां, तत्संश्लेषादिबलसिद्धारुण्यादिगुणानां वृक्षोत्पादकावयवान्तराणां च कालान्तरे यथायथं समाहारेणारुणपुष्पाद्युत्पत्त्युपपत्त्या तादृशावसेकेन मूलावयवेषु शक्तिविशेषाधानकल्पनस्य व्यर्थत्वात् । यथोक्तमात्मतत्त्वविवेके , 'क्षीरावसेकादम्लत्वं परिहृत्य माधुर्यमुपादायानुवर्तमानामलकी कालान्तरेऽपि माधुर्यमुन्मीलयति ; लाक्षारसावसेकाद्वा धवलिमानमपहाय रक्ततामुपादायानुवर्तमानं कर्पासबीजं कुसुमेषु रक्तता' मिति । एवं च यदुक्तम् यवबीजस्याङ्कुरोत्पत्तिसमये परमाणुरूपावधिपर्यन्तं नष्टतया परमाणुषु यवसम्बन्धिषु धान्यान्तरसम्बन्धिषु च वैलक्षण्याभावात् यवबीजात्कलमाङ्कुरोत्पत्तिः स्यादिति—तदपरिहृतम्—कार्यविशेषप्रागभावि-पाकाधीनरूपरसादिभिरेव मिथो व्यावृत्तानां तत्तत्कार्यपरमाणूनां विभिन्नकार्यारम्भकत्वसम्भवात् व्यावृत्तिश्चावयविषु जात्यैव, परमाणुषु जात्यभावेऽपि गुणविशेषैर्घटते । अवयविषु दृष्टैर्गुणविशेषैरेव तदवयवेषु परमाणुषु गुणविशेषोन्नयनम् ; कारणगुणपूर्वकत्वादवयविगुणस्य । अतः परमाणुगततथाभूतविशेषबलादेव तरतमभावापन्न-तत्तदवस्थवस्तूत्पत्तिक्रमेणाङ्कुरोत्पत्तिरिति ।

[45] ननु सृष्ट्यारम्भे बीजाभावात् जलावसेकक्षेत्रवापादिना च पुरुषेण परिणामपरम्परासम्पादनप्रसक्त्यभावात्कथमङ्कुरोत्पत्तिरिति चेत्—इदानीं यादृशविशेषशालिभिः परमाणुभिः क्रमात् कार्यनिष्पत्तिस्तादृशविशेषवद्भिस्तैरेव तदानीमपि कार्योत्पत्तिः । परं तु बीजादिरूपेण सन्निवेश-

---

१ 'तथा भूताः पाकजा एवे'ति सर्वत्र पाठः । परमाणूनां पाकजत्वं बाधितमित्यौचित्यादेवं शोधितम् । २ प्र. 'आद्यातिशयो द्व्यणुकम् । अन्त्यातिशयोऽङ्कुरादिरित्यभेदेनान्वयः । अन्त्यातिशयो वाङ्कुरादिरिति पाठेऽन्त्यातिशयोऽङ्कुरादिः (अङ्कुरस्यादिः ?) समवायिकारणमित्यर्थः । यद्वाऽऽद्यातिशयो बीजस्योच्छूनत्वमन्त्यातिशय उच्छूनतरत्व'मिति ।

३ मिथो मिथः क² पु.। ४ कर्माणीति पदं सर्वत्र दृश्यते । अत्र दृष्टपदेनात्मगुणग्रहणादिदमनान्वितम् । अस्यादृष्टवाचित्वेऽदृष्टपदसत्त्वात् पौनरुक्त्यम् । अदृष्टसाधनप्राक्तनकर्माणीति वा 'अदृष्टानि कर्माणी'त्यस्यार्थः स्यात् । व्याख्याग्रन्थे तु इदं न लक्ष्यते ।

[46] तस्मात्पाकजविशेषैः संस्थानविशेषैश्च विशिष्टाः परमाणवः कार्यविशेषमारभन्ते । ते च तेजोऽनिलतोयसंसर्गविशेषैः ; ते च क्रियया ; सा च नोदनाभिघातगुरुत्ववेगद्रवत्वादृष्टवदात्मसंयोगेभ्यो यथायथमिति न किञ्चिदनुपपन्नम् ॥ निमित्तभेदाश्च पाके भवन्ति । तद्यथा—हारीतमांसं हरिद्राजलावसिक्तं १ हरिद्राग्निप्लुष्टं उपयोगात् सद्यो व्यापादयति । 'दशरात्रोषितं कांस्ये घृतं चापि विषायते' । ताम्रपात्रे पर्युषितं क्षीरमपि तिक्तायत इत्यादि ॥

[47] यत्र तर्हि तोये तेजसि वायौ वा न पाकजो विशेषः, तत्र कथमुद्भवानुद्भव-

---

भावौ परमाणुषु पुरुषप्रयत्नेन तादृशत्वं सम्पाद्यते । तदानीं तु तादृशविशेषवन्त एव परमाणव आत्मसमवेतदृष्टवशान्मिलन्तीत्येतावानेव भेदः । न चेदानीमपि तद्वत्पुरुषव्यापारानपेक्षं किं न स्यादिति वाच्यम्--कृष्यादिकर्मसत्त्व एव कृषीवलस्य तात्कालिकसुखादिप्राप्तिः सस्यादिप्राप्तिश्चेत्यन्वयव्यतिरेकसिद्धतया तदभावे तदुच्छेदप्रसङ्गात् । व्यापारमन्तरेणादृष्टादेव सर्वसम्पत्तौ स्वीकृतायां 'अस्येदं वस्तु, इदानीमीदृशपरिमाणार्थमेवं परमाणुमेलनमित्यादिव्यवस्थाऽभावप्रसङ्गाच्च, 'दृष्टानां पुरुषकर्मणामेव फलोत्पादकत्वम्, अदृष्टानां तु सति सम्भवे दृष्टसामग्रीमेलकत्वमात्र'-मित्युन्नयनात् ।

[46] ननु रूपादिवैलक्षण्यस्य कार्यगतरूपादिवैलक्षण्यनियामकत्वेऽपि यवबीजात्कलमाङ्कुराकारेण कथं न कार्यनिष्पत्तिरिति चेत्—तत्र नियमतो यवाद्यङ्कुरोत्पत्त्युपयोगितया विलक्षणपदेशेषु तदारम्भकत्र्यणुकादेः संयोगविशेषरूपः संस्थानविशेष एव नियामकः, विलक्षणपाकजविशेषशालियवबीजपरमाणुजन्यद्व्यणुकत्र्यणुकादेर्यवाङ्कुरानुपमर्दकसंयोगविशेषं प्रत्येव कारणत्वावधारणात । तस्मान्न परमाणुषु शक्तिः । पाकजविशेषोत्पत्त्यर्थमपि न शक्तिरपेक्षिता, तेषां भूतान्तरसंसर्गायत्तत्वात्, भूतान्तरसंसर्गस्य क्रियाजन्यत्वात्, क्रियायाश्च नोदनाख्येनाभिघाताख्येन वा संयोगेन गुरुत्वेन वा वेगेन वा द्रवत्वेन वाऽदृष्टवदात्मसंयोगमात्रेण वा सम्भवात् । पाकश्च न यथा कथञ्चिद्भूतसंयोगमात्रम् ; किं तु विजातीयः संयोगः । यथा उपयोजनमात्रेण सद्यो मारणानुगुणहारीतमांसपरिणामौपयिके परमाणुगतविशेषे हरिद्राजलावसेचनं हरिद्राग्निप्लोषश्च हेतुः । घृतस्य विषात्मना परिणामाय कांस्ये दशरात्रनिक्षेपः । क्षीरस्य तिक्तद्रव्यरूपपरिणामाय ताम्रपात्रे कियन्तमपि कालं निक्षेप इत्येवम् ॥

[47] नन्वेवमपि जलादौ पाकासम्भवात्का गतिः ? तत्रापि हि शीकरचक्षुरुष्मादौ रूपादे-

---

१ हरिद्रानलसाधितम् का॰ पा॰ ।

द्रवत्वकठिनत्वादयो विशेषाः? कथं वा (च) पार्थिवे प्रतिमादौ प्रतिष्ठादिना संस्कृते ऽपि विशेषाभावात् पूजनादिना धर्मो व्यतिक्रमे त्वधर्मः अप्रतिष्ठिते तु न किञ्चित्। न च तत्र यजमानधर्मेणान्यस्य साहायकमाचरणीयम्; अन्यधर्मस्यान्यं प्रत्यनुपयोगात् उपयोगे वा साधारण्यप्रसङ्गात्॥ अत्रोच्यते—

निमित्तभेदसंसर्गादुद्भवानुद्भवादयः।
देवता१सन्निधानेन प्रत्यभिज्ञानतोऽपि वा॥ १२॥

यथायथमनुद्भूतत्वमन्यत्रोद्भूतत्वं; हिमकरकादौ काठिन्यमन्यत्र द्रवत्वं, क्वचिद्वायौ स्तैमित्यमन्यत्र सदागतित्वम्; जलीयत्वाद्यविशेषेऽपि रसनादीनामेव विषयग्राहित्वं, नान्यजलादेरित्यादयो विशेषाः प्रामाणिकाः। किं च पृथिव्यामेव क्वचित्प्रतिमादौ असत्येव पाके प्रतिष्ठातः परं पूजनतद्व्यतिक्रमाभ्यां धर्माधर्मोत्पत्तिः, अप्रतिष्ठितत्वे तु न ततो धर्माधर्मावितीदं शक्त्यभावे कथमुपपद्यते। न च तत्र प्रतिष्ठासंस्कृतत्वमेव विशेष इति वाच्यम्—प्रतिष्ठाक्रियायास्तदैव नष्टत्वात् ततः परं तस्या अप्रतिष्ठिताविशेषात्। न च प्रतिष्ठाक्रियाजनितं प्रतिष्ठापकपुरुषसमवेतं यददृष्टं स्वाश्रयसंयुक्तत्वसम्बन्धेन तद्विशिष्टा सती प्रतिमाधर्माधर्महेतुरिति वाच्यम्—प्रतिष्ठापकादृष्टस्य पूजनप्रणमनादिकर्तृसदिष्टादिहेतुत्वासम्भवात्। अन्यादृष्टस्यान्यफलाहेतुत्वात्। अन्यथा सर्वधर्माधर्माणामपि साधारण्यापातात्। अतोऽपाकजस्थले कथं निर्वाह इति चेत्—अदृष्टादिरूपनिमित्तविशेषसंसर्गादपार्थिवेऽप्युद्भवादयः। प्रतिमादयश्च देवतासन्निधानेन प्रत्यभिज्ञानविशेषेण वाऽऽराधनीयत्वं भजन्ति। यद्वा उद्भवानुद्भव-द्रवत्वकठिनत्व-प्रतिष्ठितप्रतिमापूजनापूजनमूलकधर्माधर्म-पयःपल्वलतुलाद्यभीष्टानिष्टादयो यथायथं निमित्तविशेषसंसर्गात् देवतासन्निधानप्रत्यभिज्ञानान्यतरस्माद्वा भवन्तीति कारिकायामस्यां विशिष्टमेकं वाक्यमिति। अपिना प्रत्यभिज्ञाने स्वासम्मतिर्द्योत्यते।

---

१ देवताः सन्निधानेनेति सर्वत्र पाठः। प्रकाशेऽपि 'देवता इत्यत्राराधनीयतामासादयन्तीत्यध्याहार्यम्' इति लक्ष्यते। एवमपि 'प्रत्यभिज्ञानेन' इत्येतदन्वयाय प्रतिमादय इति पदान्तरमध्याहार्यम्। अत उभयत्र तदन्वयेन देवतासन्निधानेनेत्येकपदस्थितिर्युज्यते। बोधन्यां 'देवतानां सन्निधानादाराधनीयाः प्रतिमादय' इति वाक्यमेकपद्यपक्षमुपष्टम्भयति। वस्तुतोऽध्याहर्तव्यबहुपदसापेक्षपदमात्रनिर्देशेन कारिकानिर्माणमित्यस्यायुक्तत्वात्, विनाऽध्याहारं, विना च वाक्यभेदं पूर्वमाक्षिप्तसर्वांशग्राहि कारिकायामादिपदमिति विमृश्य विस्तरोक्तार्थवर्णनप्रकार उचिततम इति इदमेकपदमेव।

[48] उपनायकादृष्टविशेषसहाया हि परमाणवो द्रव्यविशेषमारभन्ते। तेषां विशेषा-दुद्भूता[१]नुद्भूतभेदाः प्रादुर्भवन्ति । तथा स्वभावद्रवा अप्यापो निमित्तभेदप्रतिबद्धद्रवत्वाः कठिनं करकाद्यारभन्ते इत्यादि स्वयमूहनीयम् । प्रतिमादयस्तु तेन तेन विधिना सन्निधापितरुद्रोपेन्द्रमहेन्द्राद्यभिमानिदेवताभेदास्तत्र तत्राराधनीयतामासादयन्ति; दष्ट-मूर्च्छितं राजशरीरमिव विषापनयनविधिनाऽऽपादितचैतन्यम् । सन्निधानं च तत्र तेषामहङ्कारममकारौ, चित्रादाविव स्वसादृश्यदर्शिनो राज्ञ इति नो दर्शनम् ॥ अन्येषां तु पूर्वपूर्वपूजितप्रत्यभिज्ञानविषयस्य प्रतिष्ठितप्रत्यभिज्ञानविषयस्य च तथात्वमवसेयम् ॥ एतेनाभिमन्त्रितपयःपल्लवादयो व्याख्याताः ॥

---

[48] न हि सर्वत्र पाकज एव विशेषः ; अन्यतोऽपि विशेषसम्भवात् । उद्भूतस्यानुद्भूतस्य वा द्रव्यविशेषस्यारम्भकाः ये परमाणवस्तेषां पृथक्स्थितानां परस्परसमीपप्रापणरूपमुपनयनं यस्मादात्मसमवेतादष्टाद्भवति , तददृष्टसंयोग एव तत्रोद्भवादौ नियामकः । एवं सांसिद्धिकद्रवत्वशालिनोऽपि जलस्यानुष्णालोकसंसर्गादिना द्रवत्वप्रतिबन्धे काठिन्योपलम्भः । सुवर्णादौ तेजस्यग्निसंयोगात् द्रवत्वमिति सर्वत्र द्रष्टव्यम् । यत्तु प्रतिमादिविषये पृष्टम्, तत्रापि— प्रतिष्ठापनक्रियया विधिवत्कृतया तत्तद्देवतासन्निधाने सति सैव देवताराधनीया भवति, यथा विषदंशदष्टं अत एव मूर्छितं राजशरीरं तदानीं कार्यक्षममपि विषापनयनेन पुनश्चैतन्यापादने सति आराध्यतामासादयति, तद्वत् । ननु देवतात्मनामपि विभुत्वात्प्रागेव सन्निहितत्वात्किमिदं प्रतिष्ठाधीनसान्निध्यमिति चेत्—एतत्प्रतिमावच्छेदेनाहम्बुद्धिः, ममेदमिति बुद्धिश्चैव सान्निध्यम्, यथा राज्ञः स्वचित्रादौ । एवं तावदनपह्नुतदेवतास्वरूपाणामस्माकं सिद्धान्तः । पूर्वपक्षिणां तु मीमांसकानां तथोक्तयसम्भवेऽपि, प्रतिष्ठाक्रियाया नष्टत्वेन प्रतिष्ठावत्प्रतिमात्वेन कारणत्ववर्णनासम्भवेऽपि च शक्त्यस्वीकारेणैव प्रतिष्ठितत्वप्रकारकप्रत्यभिज्ञाविषयत्वेन धर्माधर्महेतुत्वं सुवचम्; प्रत्यभिज्ञायास्तदा तदा सद्भावात् । ये तु प्रतिष्ठितत्वं न जानन्ति , तेऽपि पूर्वपूर्वपुरुषपूजितत्वप्रकारकप्रत्यभिज्ञाविषयीकृत्यैव ता आराधयन्तीति तादृशप्रत्यभिज्ञाविषयत्वेनैव फलहेतुता । एवं च राष्ट्रक्षेमाद्युद्देशेनैव प्रतिष्ठापनात् प्रतिष्ठाक्रियातः सर्वात्मस्वदृष्टोत्पत्तिरपि परास्ता ; प्रत्यभिज्ञानत एव निर्वाहे तत्कल्पनायोगात् ॥ एवं पयसि पल्लवेऽन्यत्र चाभिमन्त्रणादिना यत्कार्यहेतुत्वं, तत्राप्यभिमन्त्रणप्रीतमन्त्रार्थभूतदेवतासन्निधिबलाद्वा परमतेऽभिमन्त्रितप्रत्यभिज्ञाविषयत्वेन वा तत्सम्भव इति न कुत्राप्याधेयशक्तेरावश्यकता ॥

---

१ अयं पाठः क[2] पु । 'उद्भवविशेषाः' इति क. ख.

[49] घटादिषु का वार्ता ? कुशलैवेति चेन्न—न हि सामग्रीदृष्टं विघटयति ; नाप्यदृष्टम् ; ज्ञापकत्वात् । नाप्यदृष्टमुत्पादयति ; धर्मजनने सर्वदा विजयप्रसङ्गात् ; विपर्यये सर्वदा भङ्गप्रसङ्गात्—अत्रोच्यते—

[50] जयेतरनिमित्तस्य वृत्तिलाभाय केवलम् ।
परीक्ष्य समवेतस्य परीक्षाविधयो मताः ॥ १२ ॥

यद्यपि 'धर्माद्यभिमानिदेवतासन्निधिरत्रापि क्रियते ; ताश्च कर्मविभवानुरूपं लिङ्गमभिव्यञ्जयन्ती'त्यस्माकं सिद्धान्तः— तथाऽपि परविप्रतिपत्तेरन्यथोच्यते । तेनापि हि विधिना तदेव जयस्य पराजयस्य वा निमित्तमभिव्यक्तं १ तद्विभावकं कार्यमुन्मी-

49 ननु स्तेयादिशङ्कायां पुंसः सपाप निष्पापत्वान्यतरावधारणार्थं घटे तुलायामारोहणं कार्यते । तत्र सपापस्यावनतिः, निष्पापस्य तदभाव इति कथम् ; प्रतिष्ठाद्यभावेन तुलायां देवतासान्निध्याद्ययोगात् । अथ तत्रावनतिहेतुसमवधानासमवधानाभ्यामेवोभयोपपत्तिरिति चेन्न — विकल्पासहत्वात् । किमत्रावनतिसामग्रीप्रविष्टस्य दृष्टस्य विघटनं तुलारोहणसामग्री करोति ; तादृशादृष्टविघटनं वा ; अथ वा कारणान्तरमदृष्टमुत्पादयति ? न प्रथमद्वितीयौ ; तस्या ज्ञापकत्वात् । तुलादिसामग्र्या ह्यात्मगतसपापत्वादिज्ञापकत्वमात्रम् , न तु किञ्चिद्विघटकत्वमिति । एवमवनतिहेतुभूतस्य गुरुत्वादेर्दृष्टस्यादृष्टस्य वा यस्य विघटिका तुलादिसामग्रीं मन्यते , तस्यैव सा कदाचित् ज्ञापिका लक्ष्यते । परीक्षाव्यतिरिक्तकाले, परीक्षासमयेऽपि कदाचित् तुलारोहणे सत्यवनतिदर्शनेन तदा गुरुत्वादिस्थितेस्तुलादिसामग्र्या ज्ञापितत्वात् । तथा च या जातु यद्विषये ज्ञापिका, सा कालान्तरे तद्विघटिकेति न युक्तम् । अतो न प्रथमद्वितीयौ । नापि तृतीयः ; तत्र किं विजयहेतुं धर्मं जनयति, पराजयहेतुमधर्मं वा ? आद्ये कदाऽप्यवनतिर्न स्यात् । अन्त्ये कदाऽपि विजयो न स्यादिति—उच्यते ॥

[50] निष्पापे तुलामधिरूढे धर्माद्यभिमानिनी देवता तदनुग्रहाय तुलायां सन्निधाय स्वप्रयत्नेन पुरुषाविशिष्टां तुलां धारयति । अतः करधृतग्रावादीनामिव तद्गुरुत्वप्रतिबन्धादवनत्यभावः । सपापत्वे त्वीदृशविधरणाभावात् पतनम् । तथा च परीक्ष्यसमवेतस्य जयतदितरनिमित्तस्य देवताधार्यत्वतदभावरूपस्य सम्पत्तये परीक्षाविधय इति । यद्वा जयेतरनिमित्तस्य पापाकरणतत्करणरूपस्य देवतासान्निध्यबलेन वृत्तिलाभायाभिव्यक्तत्वसिद्धये परीक्षाविधय इति ।

१ तद्विभावकमिति पदं क [2] पु ; नान्यत्र । वो, "तद्विभावकमभिशस्तकृतस्तेयाद्यनुमापकं कार्यं नमनोन्नमनादि जनयति' । '

लयति । कर्मणश्चाभिव्यक्तिः सहकारिलाभ एव । तच्च सहकारि 'सोऽहमनेन विधिना तुलामधिरूढः, योऽहं पापकारी निष्पापो वे'ति प्रत्यभिज्ञानम् । यदाहुः— 'तांस्तु देवाः प्रपश्यन्ति स्वश्चैवान्तरपूरुषः ।' अथ वा प्रतिज्ञानुरूपां विशुद्धिमपेक्ष्य तेन धर्मो जन्यते, निमित्ततो विधानाद्विजयफलश्रुतेश्च । अविशुद्धिं चापेक्ष्याधर्मः । पराजयलक्षणानपेक्षितफलोपदर्शनेन फलतो १ निषेधात् ॥

[51] अथ शक्तिनिषेधे किं प्रमाणम् ? न किञ्चित् । तत्किमस्त्येव ? बाढम् । न हि नो दर्शने शक्तिपदार्थ एव नास्ति । कोऽसौ तर्हि ? कारणत्वम् । किं तत् ? पूर्व-

---

तथा च देवताः सन्निधाय पुरुषकर्मानुगुण्येन तदीयसपापत्वादिज्ञापकं नमनादिकं निर्वर्तयन्तीत्यस्माकं वास्तवं समाधानम् । एवमपि मीमांसकानां देवताचैतन्ये विप्रतिपन्नत्वात्तदनुगुणमित्थं ब्रूमः । परीक्ष्य समवेतं यत् जयपराजयनिमित्तं तुलारोहणं तस्याभिव्यक्तये सहकारिलाभाय परीक्षाविधयो भवन्तीति । तुलारोहणमुभयसाधारणमपि सहकारिविशेषसम्पन्नं सत् जयपराजयज्ञापकमुन्नमनावनमनरूपं कार्यं जनयति । तच्च तुलारोहणकर्मणः सहकारि, पापकारिणः, अहं पापकारी विधिनानेन तुलामधिरूढ इति प्रत्यभिज्ञानम् ; निष्पापस्य च 'अहं निष्पापोऽनेन विधिना तुलामारूढ' इति ज्ञानम् । न च सपापश्चान्निष्पापत्वेनात्मानं मन्यते तर्हि कथमिति वाच्यम्–मिथ्याकथनेऽपि तेन स्वस्वरूपस्य ज्ञातत्वात्तथा मननासम्भवात् । 'तांस्तु देवाः प्रपश्यन्ति स्वश्चैवान्तरपूरुषः' इत्यत्रोत्तरः पादश्चेममेवार्थमाह । ननु सपापस्यापि पापविस्मरणे विपरीतभ्रमे च सति तथा मतिसम्भवात् कथमुपपत्तिरिति चेत्—तर्हीत्थं ब्रूमः । परीक्षायां निमित्ते जयकामः सत्यप्रतिज्ञस्तुलामारोहेदिति विधिश्रवणात् यथार्थप्रतिज्ञाकपुरुषाधिकारिकं तुलाधिरोहणं विजयहेतुधर्मजनकम् । एवमयथार्थप्रतिज्ञत्वे पराजयरूपानिष्टफलश्रवणात् साक्षान्निषेधवाक्यश्रवणाभावेऽप्यनिष्टफलश्रवणस्थले निषेधकल्पनस्य सर्वसम्मततया 'असत्यप्रतिज्ञस्तुलां नारोहे'दिति निषेधस्यार्थासिद्धेस्तादृशपुरुषकृतमारोहणं निषिद्धत्वादधर्मजनकमिति । तथा च परीक्ष्यसमवेतस्य धर्मस्याधर्मस्य च तत्तन्निमित्तस्य सम्पत्तये प्रवर्तकनिवर्तकवाक्यभूताः परीक्षाविधयोऽभ्युपगम्यन्त इति ॥ अतो न कुत्राप्यधेयशक्तिकल्पनमिति ॥

[51] नन्वेवं पृच्छामः, शक्तिनिषेधे किं प्रमाणं, सिद्ध्यसिद्धिभ्यां व्याघातादिति चेत्–श्रूयताम् । उक्तमेव तावत्, यद्वक्तव्यम् । एवमपि जल्पकथा त्वया संप्रति जयार्थिनाऽवलम्ब्यते । तत्रेदमुच्यते—किं प्रमाणमिति प्रश्ने, न किञ्चित्प्रमाणमित्युत्तरमिति । तर्हि कि-

---

१ साक्षान्निषेधशब्दाभावेऽपि निषेधस्य फलितत्वात् । निषेधस्य शब्दबोध्यत्वाभावेऽपि शब्दफलभूतपराजयविषयकबोधगम्यत्वादित्यर्थः ।

कालनियतजातीयत्वं, सहकारिवैकल्यप्रयुक्तकार्याभाववत्त्वं वेति । ततोऽधिकनिषेधे का वार्ता ? न काचित् । तत् किं विधिरेव ? सोऽपि १ नास्ति ; प्रमाणाभावात् । सन्देहस्तर्हि कथमेवं भविष्यति ; अनुपलब्धचरत्वात् । २ विवादस्तर्हि, कुत्र ? अनुग्राहकत्वसाम्यात्सहकारिष्वपि शक्तिपदप्रयोगात् सहकारिभेदे । तत्रापि—दहनादेरनुग्राहकोऽधिकोऽस्त्येव, यः प्रतिबन्धकैरपनीयत इति यदि, तदा न विवदामहे । अस्मदभिप्रेतस्य त्वभावादेरनुग्राहकत्वमङ्गीकृत्य निःसाधना मीमांसका अपि न विप्रतिपत्तुमर्हन्ति । ततः—अभावादिरनुग्राहक इत्येके, नेत्यपरे, इति विवादकाष्ठायां व्युत्पादितं चैतस्यानुग्राहकत्वम् । किमपरमवशिष्यते, यत्र प्रमाणमभिधानीयमित्यलमतिविस्तरेण ॥

मङ्गीक्रियत इति चेत् सत्यम् । न चैतावताऽपसिद्धान्तः । अस्माभिरपि शक्तिरिति लोकव्यवहारगतस्य पदस्य किञ्चिदर्थसम्मतेः । कस्तदर्थ इति चेत्--कारणत्वम् । ननु पूर्वकालनियतत्वरूपं कारणत्वं शक्तिरिति न प्रसिद्धमिति चेन्न—अग्नेर्दाहजननशक्तिर्हि नाम तद्योग्यता । योग्यता चासाधारणधर्मः । तथा च स्वरूपयोग्यत्वरूपं कारणत्वं कार्यपूर्वकालव्यापक-

---

१ एतदपि क. ख. । वो, 'न हि निषेधवद्विधिरपि निष्प्रमाणः सिद्ध्यतीत्युत्तरमाह-सोऽपीति' ।

२ स्वयमनुपलब्ध्या सन्देहायोगेऽपि वादिनोर्विवादः स्यादिति पृच्छति विवाद इति । विवादोऽप्यत्यन्तानुपलब्धे कथमित्याशंक्य सिद्धान्ती पृच्छति कुत्रेति । पर आह अनुग्राहकेति । असत्कल्पनतशक्तिविवादिनांवेषां सहकारिणामप्यनुग्राहकत्वसाम्याल्लोके शक्तिव्यपदेशात् अनुग्राहकविषये विवाद इत्यर्थः । सिद्धान्त्याह तत्रापीति । तत्रापि सहकारिभेदेऽपि न विवदामह इत्यन्वयः । अथ वा तत्रापीत्यस्य विवादकाष्ठायामित्यत्रान्वयः । ततः इत्यस्य प्रतिबन्धकापनेयानुग्राहकं किञ्चिदस्तीत्यत्रोभयोर्विवादाभावादित्यर्थः । एतत्तच्छब्दार्थकथनार्थमेव 'दहनादेरित्यारभ्य अर्हन्तीत्यन्तपदजातम् । तथा च सहकारिभेदेऽपि विवादस्य 'अनुग्राहकमस्ति न वे'त्येवंरूपत्वाभावात् अभावोऽनुग्राहको न वेत्येवंरूपत्वमेवेति भावः । अथ वा सन्देहवत् विवादोऽप्यनुपलब्धे न भवतीति कुत्र विवाद इति परः पृच्छति विवादस्तर्हि कुत्रेति । सिद्धान्त्याहानुग्राहकेति । न विलक्षणशक्तौ विवादसम्भवः ; किन्तु कारणत्वात्मिकायाः नियतपूर्ववृत्तिगतजातेरग्नित्वादेरिव सहकारिणामपि प्रधानकारणे विशेषणत्वरूपानुग्राहकत्वसाम्यात् शक्तिपदव्यवहारेतेति सहकारिविषये विवादः । सोऽपि न, सोऽस्ति न वेत्येवंरूपः किन्तु अभावः सहकारी न वेत्येवंरूपः । स च प्रागेव शमित इति विशिष्टार्थः ॥

[52] तथाऽपि चेतन एवायं संस्क्रियते, न भूतानीति कुतो निर्णय इति चेत्— उच्यते । भोक्तॄणां नित्यविभूनां सर्वदेहप्राप्तावविशिष्टायां विशिष्टैरपि भूतैर्नियामकाभावात्प्रतिनियतभोगासिद्धेः । न हि तच्छरीरं तन्मनस्तानीन्द्रियाणि विशिष्टान्यपि तस्यैवेति नियमः ; नियामकाभावात् । (विशेषाभावात् ।) तथा च साधारणविग्रहवत्त्वप्रसङ्गः । न च भूतधर्म एव १ कश्चिच्चेतनं प्रत्यसाधारणः ; विपर्ययदर्शनात् ॥ द्वित्वादिवदिति चेन्न—तस्यापि शरीरादितुल्यतया पक्षत्वात् । नियतचेतनगुणोपग्रहेणैव तस्यापि नियमः, न तु तज्जन्यतामात्रेण ; स्वयमविशेषात् ॥

जातीयस्वरूपं प्रसिद्धमेवेति । यद्वा शक्तिर्योग्यता । सहकार्यभावात् कार्यं न जनयति । सत्त्वे तु जनयेदेवेति हि योग्यतोपपादनीया । तथा च सहकार्यभावप्रयुक्तकार्याभाववत्त्वं कारणत्वम् ।

ननु कार्याभावस्य प्रागभावरूपतया साक्षात्प्रयोज्यत्वाभावात् कार्यस्य सहकारिणश्च स्थितः प्रयोज्यप्रयोजकभाव एवाभावयोरारोप्यत इति वक्तव्यम् । एवं कारणत्वशरीरे सहकारित्वादिविवेचने कारणत्वघटनादात्माश्रय इति चेन्न—प्रयुक्तत्वं व्यापकत्वं ; सहकारिणश्च किञ्चिदित्येव लक्षणे प्रवेशः, न तु सहकारित्वेन, यदोषात् । तथा च किञ्चिदभावविशिष्टयद्वस्तुसत्ता कार्याभावव्याप्या तत्त्वं कारणत्वम् । भवति च दण्डाभावविशिष्टचक्रसत्ता घटाभावव्याप्येति चक्रं कारणमिति ।

नन्वीदृशकारणत्वातिरिक्तशक्तिस्वरूपनिषेधविषये भवता किमुच्यत इति चेत्—न किञ्चिदुच्यते । तत् किं तत्सद्भाव एवेति चेन्न—साधकप्रमाणस्याप्यभावात् । ननु साधकबाधकप्रमाणयोरभावात्सन्देहः स्यादिति चेत्—इदमपि कथं भविष्यति ; धर्म्युपलब्धेः यत्र क्वचित्कोट्युपलब्धेश्च संशयं प्रति कारणत्वात् ; शक्तेश्च कथमप्यनुपलब्धत्वात् । एवं चात्यन्तानुपलब्धतया तद्विषयविवादस्याप्ययोगात् , सहकारिष्वपि लोके शक्तिशब्दप्रयोगात् , सहकारिविषय एव विवादो वाच्यः । तत्रापि—प्रतिबन्धकापनेयस्य कस्यचित्सहकारिण उभयसम्मतत्वेनोभाभ्यामपि सहकार्यस्ति न वेति विवादकरणायोगात्—अभावः सहकारी नवेत्येव विवादपर्यवसानम् । तत्र चाभावस्यानुग्राहकत्वं प्रागेव समर्थितमिति कथमितः कथाया अवकाश इति ॥ तथा च सहजशक्तेराधेयशक्तेश्च भूतेष्वभावान्न तद्दृष्टान्तेन यागाद्यतिशयस्य भूतधर्मत्वं प्रष्टुं युक्तमिति ॥

[52] नन्वेवमसिद्धत्वाच्छक्तेर्दृष्टान्तीकरणं मा भूत् । अथापि सर्वमदृष्टं प्रोक्षणादिजन्यं यागादिजन्यं च भूतनिष्ठमेवास्तु ; आत्मनिष्ठमेवेत्यत्र विशेषप्रमाणाभावादिति अनुपदर्शितदृष्टा-

---

१ अयं व्याख्यासंमतः पाठः । **कश्चित्** इति क. ख ।

[53] तथाऽपि तज्जन्यतयैव नियमोपपत्तौ विपक्षे बाधकं किमिति चेत्—कार्यकारणभावभङ्गप्रसङ्गः; शरीरादीनां चेतनधर्मोपग्रहेणैव तद्धर्मजननोपलब्धेः। तद्यथा-इच्छोपग्रहेण प्रयत्नः, ज्ञानोपग्रहेणेच्छादयः, तदुपग्रहेण सुखादय इत्यादि। प्रकृतेऽपि चेतनगता एव बुद्ध्यादयो नियामकाः स्युरिति चेन्न; शरीरादेः प्राक् तेषामसत्त्वात्।

न्ता एव पृच्छाम इति चेत्—उच्यते। अदृष्टविशिष्टैरपि भूतैर्भोगव्यवस्थापनं न सम्भवति। आत्मनिष्ठत्वे ह्यदृष्टस्य, समवायेन भोगं प्रति समवायेनादृष्टस्य कारणत्वाङ्गीकारात् यत्रादृष्टं तत्रैव फलमिति सिद्ध्यति। भूतनिष्ठत्वे तु समवायेन भोगं प्रति स्वाश्रयभूतसंयुक्तत्वसम्बन्धेनैवादृष्टं कारणमास्थेयम्। तथा चात्मनां नित्यत्वाद्विभुत्वाच्च सर्वकालसर्वदेशभवसर्वदेहेन्द्रियादियुक्तत्वात् सर्वदेहगतानामप्यदृष्टानामेकस्मिन्नात्मनि तेन सम्बन्धेन सत्त्वात् कार्यावश्यकतया व्यवस्था न सिद्ध्येत्। न चादृष्टं स्वाश्रयवस्तु स्वामित्वसम्बन्धेन कारणम्, न तु संयुक्तत्वसम्बन्धेनेति न दोष इति वाच्यम्—अस्यैव स्वामित्वमित्यत्र नियामकाभावात्। न चादृष्टमेकस्मिन्नेव भोगं जनयतीति वाच्यम्—भूतधर्मस्य तत्स्वभावत्वायोगात्; नीलपीतादीनां भूतधर्माणां सर्वसमवेतप्रत्यक्षजनकत्वेन साधारण्यस्यैव दर्शनात्। ननु द्वित्वादिसंख्यापरत्वापरत्वादिकमेकैकस्यैव स्वानुभवं जनयति, एकोत्पादितद्वित्वादेरपरेणाग्रहणात्; दात्रा संख्याय दत्ते पुनः प्रतिग्रहीत्रापि संख्यानदर्शनात्। अतस्तद्वदृष्टमप्येकस्यैव भोगं जनयत्विति चेन्न—नीलपीतादिवत् कस्मात् द्वित्वादिकं न साधारणमिति तत्रापि शरीरादिविषय इवास्माभिः प्रश्नस्यावतारणात्। न च तद्भूतजन्यत्वे द्वित्वस्य तत्पुरुषानुभाव्यत्वमिति भूतजन्यतामात्रेण व्यवस्था सम्भवति; एकस्मिन्नेव वस्तुनि चैत्रानुभाव्यस्येव मैत्रानुभाव्यस्यापि द्वित्वस्योत्पत्तिदर्शनात् भूतस्याविशिष्टत्वात् तत्तदनुभाव्यद्वित्वादेरपि स्वरूपे विशेषाभावाच्च तदसम्भवात्। अतो द्वित्वादेरपि चेतनधर्मोपग्रहेणैव नियमो न तु तज्जन्यतामात्रेण। अतोऽत्रापि चेतनधर्मसिद्धिः। तथा च देवदत्तशरीरादिकं तत्समवेतगुणाकृष्टं कार्यत्वे सति तद्भोगसाधनत्वात् तन्निर्मितस्रग्वदिति पूर्वोक्तमनुमानं द्रष्टव्यमिति॥

[53] नन्वप्रयोजकमिदमनुमानम्। न चैतदस्वीकारे उक्तव्यवस्थाभङ्ग इति वाच्यम्—अभङ्गात्। तथा हि—द्वित्वादेश्चेतनधर्मोपग्रहेणैव प्रत्यक्षादिजनकत्वमित्यस्य कोऽर्थः ? किं चेतनधर्मजन्यत्वमात्रेण नियम इति, किं वा चेतनधर्मसहकारिकत्वेनैव नियम इति। नाद्यः, अपेक्षाबुद्धिजन्यत्वस्य द्वित्वादौ सत्त्वेन तस्यासादिष्टत्वात्। तद्रीत्या प्रकृतेऽपि शरीरादेः परम्परया जन्मान्तरीययागादिकृत्यात्मकचेतनधर्मजन्यतया व्यवस्थासम्भवात्। नान्त्यः चेतनधर्म इति किमदृष्टमुतापेक्षाबुद्धिः। नाद्यः तस्यासिद्धतया द्वित्वप्रत्यक्षे तत्सहकारिकत्वायोगात्। नान्त्यः,

तथा च निरतिशयाश्चेतनाः साधारणानि भूतानीति न भुक्तिनियम उपपद्यते ॥

अपेक्षाबुद्धेर्द्वित्वं प्रत्येव कारणत्वात्, द्वित्वप्रत्यक्षं प्रत्यकारणत्वात् । न चैकपुरुषापेक्षाबुद्धिजन्यद्वित्वेऽप्यन्यपुरुषेन्द्रियसंयुक्तसमवायरूपसन्निकर्षात् तस्य तत्प्रत्यक्षापत्तिरित्यपेक्षाबुद्धेः प्रत्यक्षं प्रति कारणत्वमावश्यकमिति वाच्यम्—एवमपि तद्द्वित्वाजनकापेक्षाबुद्धिमति पुरुषे तद्द्वित्वप्रत्यक्षापत्तेरनिवारणात् । अतस्तत्पुरुषाधीनद्वित्वस्यैव तत्पुरुषप्रत्यक्षयोग्यत्वमित्यङ्गीकारादन्यद्वित्वस्यान्यविषयेऽयोग्यतया गुरुत्वादिवदग्रहणोपपत्तिः । अतो न प्रत्यक्षस्यापेक्षाबुद्धिसहकारिकत्वम् । एवं 'तज्जन्यतामात्रेणे' त्यस्य कोऽर्थः ? किमपेक्षाबुद्धिजन्यतामात्रेणेति, किं वा भूतजन्यतामात्रेणेति । आद्ये न काचिदनुपपत्तिः, अपेक्षाबुद्धिसहकारिकत्वं विना तज्जन्यतामात्रेणापपत्तेरुक्तत्वात् । अन्त्येऽपि न दोषः, भूतस्यापि तत्पुरुषापेक्षाबुद्धिसहकारेण तन्मात्रानुभाव्यद्वित्वजनकत्वं स्वभाव इति तज्जन्यतयाऽपि नियमोपपत्तेः । एवंच प्रकृतेऽपि तदीयकृतिजन्यत्वादेव तददृष्टं तदाश्रयभूतवर्गश्च तद्भोगसाधनमिति व्यवस्थेति चेत्—चेतनगुणसहकारिकत्वानङ्गीकारे कार्यकारणभावभङ्गप्रसङ्गः । शरीरादीनां चेतनविशेषगुणसहकारिकतयैव चेतनविशेषगुणजनकत्वदर्शनात् चेतने समवायेन विशेषगुणं प्रति समवायेन विशेषगुणस्य कारणत्वात् । यथा प्रयत्ने इच्छा सहकारिकारणम्, इच्छाद्वेषादौ ज्ञानं, इच्छाद्वेषादि च सुखदुःखादाविति । प्रकृते च शरीरादिना प्रथममुत्पाद्यमाने ज्ञाने न ज्ञानादिकं सहकारि, पूर्वं तदभावात् । ज्ञानादौ शरीरस्य कारणत्वात् । अतः सिद्ध्यन् विशेष गुण एवादृष्टम् । तच्च शरीरद्वारा ज्ञानसुखादिकमुत्पादयितुं शरीरादिकमपि स्वयमुत्पादयतीति शरीरादेरपि तदधीनत्वम् । अतः शरीरादेस्तद्गुणाकृष्टत्वं तद्गुणसहकारिकत्वतद्गुणाधीनत्वोभयरूपम् । तथा च पूर्वोक्तमनुमानं निर्दुष्टम् । एवं चानेन विशेषगुणेनैव नियमनिर्वाहे भूतधर्मस्य नियामकत्वं न स्वीकर्तव्यमिति भूतानां साधारण्यमेव । अतो भोगव्यवस्थानुपपत्त्या चेतनानां सातिशयत्वसिद्धिरिति ॥

[ननु प्रयत्नत्वावच्छिन्नं प्रतीच्छाया इच्छात्वाद्यवच्छिन्नं प्रति ज्ञानादेर्विशिष्यैव कार्यकारणभावः ; न पुनरात्मविशेषगुणत्वावच्छिन्नं प्रति आत्मविशेषगुणस्य ; मानाभावात् । अतो नादृष्टस्यात्मनिष्ठत्वमिति चेन्न—यद्विशेषयोः कार्यकारणभावः स तत्सामान्ययोरपीति न्यायेन सामान्यकार्यकारणभावस्यापि सिद्धेः । नन्वदृष्टरूपात्मविशेषगुणस्यात्मविशेषगुणजन्यत्वाभावाद्व्यभिचारः ; होमादिस्थले तस्य प्रक्षेपाद्यात्मकशारीरव्यापारजन्यत्वेऽप्यात्मगुणजन्यत्वाभावात् । न च तत्र तादृशव्यापारानुकूलकृतिजन्यत्वमस्तीति वाच्यम्— कृतेर्व्यापारं प्रत्येव कारणत्वेनान्यथासिद्धत्वादिति चेत्—तस्य कृतिजन्यत्वस्यापि स्वीकारान्न दोष इति ॥ इदमत्र बोद्धव्यम्—अदृष्टस्य भूतधर्मत्वं तावन्न सम्भवति । स्वर्गसाधनयागोत्पाद्यं ह्यदृष्टं किं यागाद्यवच्छेदकदेहे उत्पद्येत,

[54] एतेन सांख्यमतमपास्तम् । एवं हि तत् । अकारणमकार्यः कूटस्थचैतन्यस्वरूपः पुरुषः । आदिकारणं प्रकृतिरचेतना परिणामिनी । ततो महदादिसर्गः। न हि चितिरेव विषयबन्धनस्वभावा ; अनिर्मोक्षप्रसङ्गात् । नापि प्रकृतिरेव तदीयस्वभावा ; तथाऽपि नित्यत्वेनानिर्मोक्षप्रसङ्गात् । नापि घटादिरेवाहत्य तदीयः ; दृष्टादृष्टत्वानुपपत्तेः । नापीन्द्रियमात्रप्रणाडिकया ; व्यासङ्गायोगात्। नापीन्द्रियमनोद्वारा ; स्वप्न-

---

स्वर्गलोकभाविभोगसाधने शरीरेन्द्रियादौ वा । नाद्यः ; भोगकाले तस्य नाशात् । नान्त्यः ; यागोत्पत्तिकाले तदभावेन तत्र तदुत्पादनायोगात् । न च परम्परया तादृशशरीरादिहेतुषु परमाणुषु तदुत्पादनमिति वाच्यम्—अदृष्टवतामेव भूतानां भोगसाधनत्वेन तद्रहितशरीरादेरसाधनत्वापत्तेः । न च परमाण्वादिगतमदृष्टं तज्जन्ये शरीरादौ क्रमेण संक्रामेत्—अमूर्तस्य संक्रमासमर्थत्वात । न च सजातीयादृष्टान्तरजननमेव संक्रम इति वाच्यम्-—अनन्तादृष्टधाराकल्पनप्रसङ्गात । एवं देहगेहक्षेत्रकलत्राद्यनन्तभोगसाधनसम्बन्धिषु परमाणुष्वपरिमितेषु प्रतिव्यक्तिभिन्नादृष्टकल्पने एकस्यैवादृष्टस्य तावदधिकरणत्वकल्पने वा महद्गौरवम् । तथा समवायेनादृष्टं प्रति स्वानुकूलकृतिमत्त्वसम्बन्धेन होमादेः कारणत्वमिति लघुसम्बन्धमुपेक्ष्य, स्वानुकूलकृतिमत्पुरुषसंयुक्तत्वसम्बन्धेन होमादेः कारणत्वमिति कारणस्य परमाण्वादिवृत्तित्वसम्पादनाय गुरुसम्बन्धग्रहणेनापि गौरवम् । पुनरप्यत्र समवायेन भोगं प्रति समवायेनादृष्टं कारणमिति लघुरीतित्यागेन पूर्वोक्तकारणतावच्छेदकसम्बन्धस्वीकारेण भोगकारणत्ववर्णनेऽपि गौरवम् । यागफलयोर्व्यवहितयोः कार्यकारणभावासम्भवबलकल्पितस्यादृष्टस्यापि तदैकाधिकरण्ये सुखोपस्थिते सति तत्त्यागेनानुपस्थिताधिकरणग्रहणाच्च गौरवम् । एवं व्रीहीन् प्रोक्षतीत्यादौ भवता प्रोक्षणादिजन्यादृष्टस्य व्रीह्यादिषु कल्प्यतयाऽऽश्रयनाशात्तन्नाशावश्यंभावेन पिष्टादिकाल एव तदभावे यागापूर्वासिद्धिप्रसङ्गः । पिष्टादावदृष्टान्तरोत्पत्त्यङ्गीकारे चानन्तादृष्टकल्पना । तस्यादृष्टस्य तावत् व्रीहिपर्याप्तत्वे एकव्रीह्यपायेऽपि तन्नाशापत्तिः । प्रत्येकपर्याप्तत्वेऽनन्तादृष्टप्रसङ्गः । अनेकाधिकरणकल्पनगौरवं च । सर्वमिदं 'न भूतैः संस्कृतैरपि, 'विशिष्टैरपि भूतै' रिति भूतानामदृष्टविशिष्टत्वासम्भवज्ञापकेन अपिशब्देन सूचितमिति ॥]

[54] एतेन भूतादृष्टपक्षे नित्यविभुसर्वात्मसम्बन्धाविशेषात् सर्वस्य सर्वसाधारण्यापत्तिदोषवर्णनेनान्तःकरणगतमदृष्टं नित्यविभूनात्मनश्च स्वीकुर्वतः सांख्यस्य मतमपि निरस्तम् । इत्थं हि तन्मतम्—प्रपञ्चान्तर्गतानि तत्त्वानि पञ्चविंशतिः । पुरुषः, प्रकृतिः, महान्, अहङ्कारः, एकादशेन्द्रियाणि, पञ्च तन्मात्राणि, पञ्च भूतानि चेति । तत्र पुरुषः केवलचैतन्यं निर्विकारत्वात् कूटस्थपदवाच्यः अत एव न कस्यचित् कारणं कार्यं

दशायां वराहव्याघ्राद्यभिमानिनो नरस्यापि नरत्वेनात्मो[१]पधानायोगात् । नाप्यह-ङ्कारपर्यन्तव्यापारेण ; सुषुप्त्यवस्थायां तद्व्यापारविरमेऽपि श्वासप्रयत्नसन्तानावस्थानात् । तद् यदेतास्ववस्थासु सव्यापारमेकमनुवर्तते, यदाश्रया चानुभववासना, तदन्तःकरणमुपारूढोऽर्थः पुरुषस्योपधानी भवति । भेदाग्रहाच्च निष्क्रियेऽपि तस्मिन् पुरुषे कर्तृत्वाभिमानः, तस्मिन्नचेतनेऽपि चेतनाभिमानः तत्रैव कर्मवासना । पुरुषस्तु पुष्करपलाशवत् [२] सर्वथा निर्लेपः ॥

वा । प्रकृतिर्जडापरिणामस्वभावा, प्रकरोति जनयतीति व्युत्पत्त्याऽवधारणगर्भया किञ्चिद-जन्यत्वे सति कारणभूता । प्रकृतितोऽन्येषां क्रमेण सृष्टिः । ननु किमिति महदहङ्कारादि-तत्त्वस्वीकार इति चेदुच्यते—यतावच्चैतन्यस्वरूपस्यात्मनो विषयविषयकत्वं तच्चेत्स्वाभाविकं, तर्हि मोक्ष एव न स्यात् । एवं प्रकृतेः स्वयमेव चैतन्यसम्बन्धित्वस्वीकारे स एव दोषः । विषयाणां साक्षादेव चैतन्यसम्बन्धित्वस्वीकारे कुड्यादिव्यवहितस्यापि तदीयत्वापत्त्या दृष्टादृष्टव्यवस्था न स्यात् । अत इन्द्रियमावश्यकम् । एवमप्येकत्र व्यासङ्गदशायामपरस्यापि सन्निकृष्टस्य ग्रहणापत्त्या मनःकल्पनम् । तथाऽपि स्वप्नदशायां कदाचिन्नरत्वेन स्वाभिमाने सत्यपि व्याघ्रोऽहमित्याद्यभिमान-दशायां नरोऽहमित्यात्मग्रहणस्यायुक्तत्वात्, मनोमात्राधीनत्वे कदाचिदिव सर्वदा नरत्वेन ग्रहण-प्रसङ्गात् मनसस्तत्रासामर्थ्ये स्वप्ने कदाऽपि नरत्वेनात्मग्रहणायोगात् तद्व्यवस्थापकत्वस्वभावशाली अहङ्कार इष्यते । एवमिन्द्रियाद्यहङ्कारपर्यन्तवस्तुव्यापारमात्रेणापि न विषयस्य चैतन्यसम्बन्धि-त्वोपपादनं युक्तम्—सुषुप्तौ तावद्व्यापाराभावेऽपि श्वासप्रश्वासहेतुप्रयत्नसन्तानानुवृत्त्या तद्धेतोस्त-त्त्वान्तरस्यावश्यकत्वात् । एवं श्वासादिव्यापारशालितया जाग्रदादिसर्वावस्थानुवर्तित्वात् संस्का-राणां तत्रैव स्वीकारसम्भवाच्चान्तःकरणस्यैव प्राधान्यम् । तदुपारूढाः विषयाः पुरुषं संबध्न-न्ति । यत्तु अहमिदं करोमीति पुंसो विषयकर्तृत्वानुभवः स न वास्तवः । किं तु पुंसो महतश्च मिथो भेदाग्रहणात् महत्तत्त्वनिष्ठस्य कर्तृत्वस्य स्वस्मिन्नभिमानः । महत्तत्त्वस्य कर्तृत्वं चोक्तभेदाग्रहाधीनात् स्वस्मिन् पुरुषस्वरूपचैतन्याभिमानात् । अतो वास्तवकर्तृत्वाश्रयं महत्त्वे-वादृष्टमपि । न तु पुरुषे ; तस्य निर्विकारत्वात् ॥

---

१ 'नरत्वेनार्थोपधानाभावादिति केचित्पठन्ति । तत्र यथा वराहोऽहमिममर्थं जानामीत्यभिमन्यते । तथा नरोऽहमिममर्थं जानामीत्यर्थोपधानं नास्ति । तस्मान्नियतविषयाभिमानवानन्यः स्वीकर्तव्यः ।' इति वो. ।

२ वो 'सर्वथेति अनुभवतद्वासनातत्फलैः कर्म तद्वासना तत्फलैश्चेत्यर्थः ।' सर्वथेति पदं नान्यत्र

[55] आलोचनं व्यापार इन्द्रियाणां; विकल्पस्तु मनसः ; अभिमानोऽहङ्कारस्य ; कृत्यध्यवसायो बुद्धेः। सा हि बुद्धिरंशत्रयवती ; पुरुषोपरागो विषयोपरागो व्यापारावेशश्चेत्यंशाः। भवति हि मयेदं कर्तव्यमिति। तत्र मयेति चेतनोपरागो दर्पणस्येव मुखोपरागो भेदाग्रहादतात्त्विकः । इदमिति विषयोपराग इन्द्रियप्रणाडिकया परिणतिभेदो दर्पणस्येव निश्वासाभिहतस्य मलिनिमा पारमार्थिकः । एतदुभयायत्तो व्यापारावेशोऽपि । तत्रैवंरूपव्यापारलक्षणाया बुद्धेर्विषयोपरागलक्षणं ज्ञानम् । तेन सहयः पुरुषोपरागस्यातात्त्विकस्य सम्बन्धो दर्पणप्रतिबिम्बितस्य मुखस्येव मलिनिम्ना, सोपलब्धिरिति ॥ तदेवमष्टावपि धर्मादयो भावा बुद्धेरेव ; तत्सामानाधिकरण्येनाध्यवसीयमानत्वात् । न च बुद्धिरेव स्वभावतश्चेतनेति युक्तम्-परिणामित्वात् ; पुरुषस्य तु कूटस्थनित्यत्वादिति ।

---

[55] ननु कथमर्थानामन्तःकरणारूढत्वं, कथं च महतः पुंसश्च भेदाग्रहः, कथं चार्थानां पुरुषोपधानत्वमिति चेदुच्यते । इन्द्रियव्यापारो निर्विकल्पकं; सविकल्पकं मनसः ; अहमित्यभिमानोऽहङ्कारतत्त्वस्य ; मयेदं कर्तव्यमित्यध्यवसायो महत्तत्त्वस्य । अस्मिंश्चाध्यवसाये यत्तावत् महत्तत्त्वेन चेतनापरपर्यायासदर्थोल्लिखेन मयेत्येवं स्वस्वरूपग्रहणम्, तत् स्वस्मिन् चेतनोपरागात । अयं च चेतनोपरागश्चेतनतादात्म्यं स्वच्छत्वान्महत्तत्त्वस्य तत्र कृत्स्नांशे प्रतिफलिताच्चेतनतो विवेकाग्रहणाद्भवति । तदयं दर्पणात् दूरस्थस्य मुखस्य दर्पणे संबन्ध इवातात्त्विकः । अन्तःकरणस्येन्द्रियकुल्याद्वारा बहिः प्रसृत्य, केदारे जलस्येव, घटादौ तत्तदाकारपरिणामेन यः सम्बन्धः स एव विषयोपरागः इदमित्यंशसम्बन्धः। स च तात्त्विको दर्पणस्येव निश्वासमलिनिमा । एवं महत्तत्त्वस्य चेतनाभिमाने विषयसम्बन्धे च सति कर्तव्यमिति कृत्यध्यवसायो भवतीति । एवं तावद्भेदाग्रहणे अर्थानामन्तःकरणोपारोहणं चोक्तम् । एषां चार्थानां पुरुषोपधानमुपलब्धिरित्युच्यते । अस्मिन् हि मते न बुद्धिचैतन्यज्ञानोपलब्धिपदानां पर्यायता। बुद्धिर्महत्तत्त्वम्, चैतन्यमात्मा। प्रागुक्तो विषयसम्बन्धाय घट इत्याकारकज्ञानम् ।। एवमुपरक्तेन विषयेणान्तःकरणगतचैतन्यप्रतिबिम्बस्य, दर्पणगतमुखप्रतिबिम्बस्य, मलिनिम्नेव, यः सम्बन्धः अहमिदं जानामीत्याकारकः, सैवोपलब्धिरिति । स चायमतात्त्विकः । तस्मात्पुरुषस्य निर्विकारत्वात्, विकारभूतकृतिसामानाधिकरण्येन गृह्यमाणा धर्मादयो बुद्धिगता एव । ते चाष्टौ भावाः—धर्माधर्मसुखदुःखेच्छाद्वेषज्ञानप्रयत्नाः एवं अध्यवसायसामानाधिकरण्येन गृह्यमाणत्वात् अध्यवसायाश्रयबुद्धिनिष्ठतया सांख्यशास्त्रे, 'अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यम्। सात्त्विकमेतद्रूपं तामसमस्माद्विपर्यस्त'-मित्युक्ताः धर्मज्ञानवैराग्यैश्वर्याधर्माज्ञानावैराग्यानैश्वर्यात्मकाश्च । ननु किमर्थमात्मान्तराङ्गीकारः, महत्तत्त्वमेव वस्तुतश्चेतनमस्त्विति चेन्न-परिणामिनः सविकारस्य कूटस्थत्वासम्भवादिति ॥

[56] तदेतदपि प्रागेव निरस्तम् । तथा हि—

कर्तृधर्मा नियन्तारः चेतिता च स एव नः।
अन्यथाऽनपवर्गः स्यादसंसारोऽथवा ध्रुवः॥ १४ ॥

कृतिसामानाधिकरण्यव्यवस्थितास्तावद्धर्मादयो नियामका इति व्यवस्थितम्। चेतनोऽपि कर्तैव ; कृतिचैतन्ययोः सामानाधिकरण्येनानुभवात्। न चायं(नायं) भ्रमः ; बाधकाभावात्॥ परिणामित्वाद्घटवदिति बाधकमिति चेन्न—कर्तृत्वेऽपि समानत्वात्। तथा च कृतिरपि १ (स्वा)भाविकी महतो न स्यात्॥ दृष्टत्वादयमदोष इति चेत् तुल्यम्॥ २ अचेतनाकार्यत्वं बाधकं, कार्यकारणयोस्तादात्म्यादिति चेन्न—असिद्धेः। न हि कर्तुः कार्यत्वे प्रमाणमस्ति । प्रत्युत 'वीतरागजन्मादर्शना' (न्या-३. १. २५)दिति न्याया-दनादितैव सिद्ध्यति। यद्यच्च कार्ये रूपं दृश्यते तस्य तस्य कारणात्मकत्वे रागादयोऽपि प्रकृतौ स्वीकर्तव्याः स्युः । तथा च सैव बुद्धिः, न प्रकृतिः ; भावाष्टकसम्पन्नत्वात्॥

---

[56] इदं च सांख्यमतमित्थं निरस्यते—कर्तृधर्माः नियन्तारः ; चेतिता च स एव नः। कृतिसामानाधिकरण्य सत्येव धर्माधर्मयोः प्रतिनियतभोगसाधनत्वं भवतीति भूतादृष्टवादनिरासा-वसरे निरूपितम्। अतः अदृष्टानि कर्तृनिष्ठानि भोगनियामकानीत्यत्र न विवादः । एवं कर्तैव चेतनोऽपि भवतीत्येतावत्सांख्यं प्रति ब्रूमः ; चेतनोऽहङ्करोमीति कृतिचैतन्ययोः सामा-नाधिकरण्यग्रहणात् । न च भेदाग्रहादेवं व्यवहार इत्युक्तमिति वाच्यम्—अस्याः प्रतीतेः प्रमात्वे बाधकाभावाद्भेदाग्रहकल्पनस्यायुक्तत्वात् । ननु बुद्धिर्न चेतना परिणामित्वात् घटव-दित्यनुमानं बाधकमिति चेन्न—बुद्धिर्न कर्त्री परिणामित्वादित्यप्यनुमानसंभवात् । तथा च महत्तत्त्वस्य चैतन्यमिव कर्तृत्वमपि स्वाभाविकं न स्यात्। ननु ज्ञानं तावद्विषयोपरागरूपं बुद्धिनिष्ठ-मिति प्राग्वर्णितम् । ततश्च जानन् करोमीति सामानाधिकरण्यस्य प्रत्यक्षसिद्धत्वाद्बुद्धिरनुष्ण इत्यनुमानस्येवाकर्तृत्वानुमानस्य प्रत्यक्षबाध इति चेन्न—चेतनोऽहङ्करोमीति कृतिसामानाधिकरण्य-प्रतीत्याऽचेतनत्वानुमानस्यापि बाधात् । अथ कर्ता अचेतनोऽचेतनकार्यत्वादित्यनुमानमस्तु। न चात्रापि बाधः शङ्क्यः ; अचेतनकार्यत्वेऽपि चैतन्याङ्गीकारे कार्यकारणयोस्तादात्म्यस्य प्रमाण-सिद्धस्य भङ्गप्रसङ्गाच्चेतनोऽहं करोमीति प्रतीतेर्भेदाग्रहमादायैवोपपादनादिति चेन्न—हेत्वसिद्धेः। कर्तुः कार्यत्वसाधकाभावात् । जातमात्रस्यैव प्रथमतः स्तन्यपानादिप्रवृत्तिदर्शनेन तत्कारण-भूतस्य स्तन्यपाने रागस्यावश्याङ्गीकार्यतया सरागस्यैव जन्मदर्शनात् तद्रागमूलस्येष्टसाधनता-ज्ञानस्य संप्रति स्मरणात्मकस्य पूर्वानुभवसापेक्षतया जन्मान्तरसिद्धौ अनयैव युक्त्या कर्तुरना-

---

१ प्रकाशे भाविकीति पाठः । २ बोधन्याद्यनुसारेण स्त्रीलिङ्गनिर्देशः ।

स्थूलतामपहाय सूक्ष्म(रूप)तया ते तत्र सन्तीति चेत् चैतन्यमपि तथा भविष्यति। तथाऽप्यसिद्धो हेतुः ॥ तथा सति घटादीनामपि चैतन्यप्रसङ्गः, तादात्म्यादिति चेत्—रागादिमत्त्वप्रसङ्गोऽपि दुर्वारः ॥ सौक्ष्म्यं च समानमिति ॥ तस्माद् यज्जातीयात् कारणाद्यज्जातीयं कार्यं दृश्यते, तथा भूतात्तथाभूतमात्रमनुमातव्यम्; न तु यावद्धर्मकं कारणं तावद्धर्मकं कार्यं, व्यभिचारादिति किमनेनाप्रस्तुतेन ॥

[57] यदि च बुद्धिर्नित्या; अनिर्मोक्षप्रसङ्गः । पुंसः सर्वदा सोपाधित्वे स्वरूपेणानवस्थानात् । अथ प्रलीयते, ततो नाऽनादेर्विलय इत्यादिमत्त्वे, तदनुत्पत्तिदशायां को नियन्ता? प्रकृतेः साधारण्यात् । तथा चासंसारः । पूर्वपूर्वबुद्धिवासनानुवृत्तेः साधारण्येऽप्यसाधारणीति चेत्—बुद्धिनिवृत्तावपि तद्धर्मवासनानुवृत्तिरित्यपदर्शनम् ।

दित्वसिद्ध्या कार्यत्वे बाधकस्यैव दर्शनाच्च । किं च कथं त्वदुक्तकार्यकारणभावभङ्गप्रसङ्गः । न हि तादात्म्यमात्रेण कार्यगतयावद्धर्मवत्त्वं कारणस्य त्वदिष्टम् । तथा सति तत एव तादात्म्यात् बुद्धिगतरागद्वेषादिगुणाष्टकस्यापि प्रकृतौ स्वीकारापत्तेः । न चेष्टापत्तिः; तर्हि गुणाष्टकसम्पन्नत्वरूपबुद्धिलक्षणाक्रान्तत्वात्तस्याः बुद्धित्वमेव स्यात्, न प्रकृतित्वम् । न च तादात्म्यात्तद्वत्त्वस्यावश्यकत्वेऽपि सूक्ष्मगुणाष्टकवत्त्वमेवेष्यते । बुद्धिलक्षणं त्वनुभवयोग्यस्थूलगुणाष्टकवत्त्वमिति वाच्यम्—तर्हि चैतन्यमपि हि सूक्ष्मं तत्र भवितुमर्हति । तथा चोक्तानुमाने कर्तृत्वेन पक्षमनिर्दिश्य बुद्धित्वेन तन्निर्देशे पूर्वोक्तरीत्याऽसिद्ध्यभावेऽपि कारणस्य प्रकृतेरुक्तरीत्या चेतनत्वादचेतनत्वाभावाद्धेतुतावच्छेदकविशिष्टहेत्वसिद्धिरस्त्येव । ननु प्रकृतौ सूक्ष्मचैतन्यस्वीकारे तत्कार्यघटादेरपि चेतनत्वप्रसङ्ग इति चेत्—रागादिमत्त्वप्रसङ्गोऽपि भवेदेव । अस्तु तत् सूक्ष्मं तत्रेति चेत्—रागादिकमप्येवमस्तु । इष्टापत्तिरिति चेत्—तर्हि बुद्धावपि रागादेः सौक्ष्म्यं तुल्यं स्यात् घटादिवत् प्रकृतिकार्यत्वाविशेषात् । अतो रागादिविधुरप्रकृतिजन्याऽपि बुद्धी रागादिमतीत्येव युक्तम् । तस्माद्व्यभिचारादेकजातीयात्कारणादन्यजातीयमपि कार्यं भवतीति यथादर्शनं स्वीकार्यम्; न तु कारणवृत्तियावद्धर्मवत्त्वं कार्यस्येति प्रकृतेरचेतनत्वेऽपि बुद्धेरचेतनत्वाभावो युज्यत इति किमनेन यावद्धर्मवत्त्वाभावे मिथः कार्यकारणयोस्तादात्म्यं सिद्ध्यति न वेत्यप्रस्तुतेन विचारेण । कारणात्कार्ये कश्चिदतिशयस्तु प्रामाणिक इति । अतश्चेतनोऽहं करोमीति प्रतीत्या बाधितमचेतनत्वानुमानमिति ॥

[57] अन्यथानपवर्गः स्यादसंसारोऽथवा ध्रुवः । एवं कर्तुश्चेतनत्वमनभ्युपगम्य निर्लेपचेतनान्तरस्वीकारे कथं बन्धमोक्षोपपादनम् । तादृशबुद्धिसम्बन्धाद्भेदाग्रहादिति चेत्—सेयं बुद्धिर्नित्याऽनित्या वा । आद्ये सर्वदा बुद्धिसम्बन्धान्मोक्ष एव न स्यात् । अन्त्ये तस्या

सौक्ष्म्यान्न दोष इति चेत्—मुक्तावपि पुनःप्रवृत्तिप्रसङ्गः । निरधिकारत्वान्नैवमिति चेत्—तर्हि साधिकारा १ प्रसुप्तस्वभावा बुद्धिरेव प्रकृतिरस्तु, कृतमन्तरा प्रकृत्यहङ्कार-मनःशब्दानामर्थान्तरकल्पनया । सैव हि तत्तद्व्यापार २ योगात्तेन तेन शब्देन व्यपदिश्यते शारीरवायुवदिति आगमोऽपि संगच्छते इत्यतोऽपि हेतुरसिद्धः । अधिकार-निवृत्त्या बुद्धेरप्रवृत्तिरपवर्गः । वासनायोगश्चाधिकारः । ततः संसारः ॥

[58] धर्मधर्मिणोरत्यन्तभेदे च कौटस्थ्याविरोधः । भेदश्च विरुद्धधर्माध्यासलक्षणो घटपटादिवत् प्रत्यक्षसिद्धः । न च सामानाधिकरण्यादभेदोऽपि । तद्धि समान-शब्दवाच्यत्वं, एकज्ञानगोचरत्वं, एकाधिकरणत्वं, आधाराधेयभावः, विशेष्यत्वं, स-

---

अनादित्वेऽनादिभावस्य नाशायोगेनानित्यत्वासिद्ध्या सादित्वमपि स्वीकार्यमिति बुद्ध्युत्पत्तेः पूर्वं बन्धकाभावादसंसारापत्तिः । न च प्रकृतिरेव बन्धिका; तस्याः निर्विशेषतया मोक्षकाल इव बन्धकत्वायोगात् । नन्वनादिसंसारे पूर्वोत्पन्नबुद्धिजनिता वासना पुनर्बुद्ध्युत्पत्तिपर्यन्तं प्रकृतावनुवर्तते, तद्विशिष्टा साबन्धिकेति चेत् —त्वन्मते धर्मधर्मिणोरभेदाद्बुद्धिनिवृत्तौ कथं तद्गतवासनानुवृत्तिः ? बुद्धिरपि सूक्ष्मरूपेण सर्वदाऽस्तीति चेत् मुक्तावपि तर्हि संसारप्रवृत्तिः स्यात् । ननु वासनाविशिष्टा बुद्धिर्बन्धिका ; तदा तु वासनारूपोऽधिकारो नास्तीति चेत्—तर्हि सर्वदा बुद्धिस्वीकारे तस्या एव प्रबुद्धवासनत्वे बुद्धित्वं, प्रसुप्तवासनत्वे च प्रकृतित्वमिति सुवचत्वाद-तिरिक्तप्रकृतिर्न स्यात् । एवमहङ्कारमनोरूपपरिणामद्वयमपि मध्ये न स्वीकर्तव्यम्— तत्र तत्र स्वीकृतासाधारणव्यापारस्य बुद्धावेव सुस्वीकरत्वात् । आगमेषु प्रकृत्यादिविभिन्नशब्दव्यपदेशोऽपि एकस्मिन् प्राणवायौ प्राणापानादिव्यपदेशवत् तत्तद्व्यापारभेदमात्रादेकनिष्ठादेव सङ्गच्छते । तथा चैवंप्रकारेणापि बुद्धेः प्रकृत्यनतिरिक्ततयाऽचेतनकार्यत्वरूपोक्तहेतोरसिद्धिरवधार्यताम् । एवं चास्या एव बाधकप्रमाणाभावादस्मदुक्तचेतनत्वसिद्धौ अदृष्टात्मकवासनासत्त्वे बन्धः, तदभावे मोक्ष इत्यस्मदुक्तप्रकार एवावलम्ब्येतेति, बुद्धिरिति नामभेदमात्रं, स एवात्मेति ॥

[58] नन्वात्मनः कृत्यादिमत्त्वे कूटस्थत्वासिद्धिरिति चेन्न—धर्मधर्मिणोरत्यन्तभिन्नत्वेन कृत्यादिनाशेऽपि धर्मिणो नित्यत्वोपपत्तेः । घटपटादौ भेदस्य हि विरुद्धधर्माध्यास एव ज्ञापकः । स चात्रापि अहं करोमि, अहमकार्षमित्येवं नित्यत्वानित्यत्वाधारत्वाधेयत्वादिरूपः समस्त्येव । न चात्यन्ताभेदे घटो घट इतिवत् अत्यन्तभेदेऽपि घटः पट इति सामानाधिकरण्यादर्शनात्,

---

१ बां. 'अप्रसुप्तस्वभावा' तत्तत्कार्यपरिणामोन्मुखी । प्र. मुक्तौ तु प्रसुप्तस्वभावा प्रवृत्त्यजनिकेति' । २ प्र. 'तत्तद्व्यापारयोगात्-आदिकारणत्वाभिमानकारणत्वादियोगात्' बो. 'तत्तद्व्यापार-भेदात्प्रकृत्यादिव्यपदेशः' । तत्तद्व्यवहारगोचरेति पाठान्तरं व्याख्यातसंमतं क्लिष्टार्थं च ।

म्बन्धमात्रं वा भेदे एव भेदेऽपि चोपपद्यमानं, नाभेदं स्पृशतीति सर्वमवदातम् ॥

[59] स्यादेतत्। नित्यविभुभोक्तृसद्भावे सर्वमेतदेवं स्यात्। स एव कुतः? भूतानामेव चेतनत्वात्। कायाकारपरिणतानि (भू) तानि तथा; अन्वयव्यतिरेकाभ्यां तथोपलब्धेः। कर्मज्ञानवासने तु सर्वत्र प्रतिभूतनियते अनुवर्तिष्येते, यतो भोगप्रतिसन्धाननियम इति चेत्—उच्यते।

नान्यदृष्टं स्मरत्यन्यो नैकं भूतमपक्रमात्।
वासनासंक्रमो नास्ति न च गत्यन्तरं स्थिरे ॥ १५ ॥

'नीलो घटः', 'अहं करोमि' इत्येवं सामानाधिकरण्यस्य दर्शनाच्च न धर्मधर्मिणोरत्यन्तभेदः; किंतु, भेदाभेदाविति वाच्यम्—शब्दयोः सामानाधिकरण्यस्यैकार्थवाचित्वरूपत्वेऽपि प्रकृतेऽर्थयोर्धर्मधर्मिणोः सामानाधिकरण्यस्य तद्रूपत्वायोगात् किमिदं सामानाधिकरण्यमिति विचार्यम्। तत्र यद्यधिकरणपदेन शब्दः, ज्ञानं, कालादिकमधिकरणं वा गृह्यते—तर्हि समानशब्दवाच्यत्वं, समानज्ञानविषयत्वं, समानकालाद्यधिकरणकत्वं वा तत् सिद्धयति। यदि तु तावद्विवक्षां विना नीलो घट इति प्रतीतिसिद्ध आधाराधेयभावः, विशेषणविशेष्यभावः, सम्बन्धमात्रं वा सामानाधिकरण्यमितीष्यते—सर्वथा सामानाधिकरण्यमिदं भेद एवोपपद्यमानं, न त्वभेदे; सर्वस्यास्योभयमादायैव निरूप्यत्वात्। कथञ्चित् सम्बन्धमात्रादिरूपं सामानाधिकरण्यं तादात्म्यसम्बन्धादिकमादायापि सुवचत्वादभेदे उपपद्यमानमपि भेदेऽप्युपपद्यमानं, न त्वभेदमात्रे; तादात्म्यसम्बन्धस्यैव विशिष्य ग्रहणे प्रमाणाभावात्। अतः सामानाधिकरण्यमिदं नाभेदं साधयति। अतः पूर्वोक्तविरुद्धधर्माध्यासबलेन धर्मधर्मिणोरत्यन्तभेद एव सिद्धयतीति सिद्धं चेतन एव कूटस्थः कर्ता भोक्ता प्रकृतादृष्टवांश्चेति ॥

[59] नन्वदृष्टस्य भूतधर्मत्वे यदिदं नित्यविभुसर्वचेतनसम्बन्धाविशेषात् भूतस्य सर्वसाधारण्यप्रसञ्जनं, तच्चेतनस्य कस्यचिन्नित्यविभोः सत्त्वे किल भवति। तदेव न; भूतातिरिक्तचेतनसत्त्वे मानाभावात्। न च घटादीनामपि चेतनत्वापत्तिः; अन्वयव्यतिरेकाभ्यां शरीरात्मकं भूतमेव चेतनमित्यङ्गीकारात्; संस्थानविशेषविशिष्टस्यैव ज्ञानं प्रति कारणत्वात्। तत्र च येन शरीरेण किञ्चित् कृतमनुभूतं वा तत्रैवादृष्टाख्यायाः कर्मवासनायाः संस्काराख्यायां ज्ञानवासनायाश्चानुवृत्त्यङ्गीकारात् अन्यत्रानुवृत्त्यभावाद्भोगनियमः स्मरण(प्रतिसन्धान)नियमश्च भवत इति चेन्न—विकल्पासहत्वात्। उत्पद्यमानमिदं ज्ञानं सर्वावयवनिष्ठं वा यत्किञ्चिदवयवनिष्ठं वा। आद्ये उपचयापचयाभ्यां प्रतिदिनं शरीरभेदात्पूर्वदिन एकेनानुभूतं परदिनेऽन्येन न स्मर्येत। अन्त्ये यदेकं करश्चरणं वा ज्ञानाधिकरणं तस्य कदाचिदपक्रमादन्यावयवेन तत्स्मरणं न स्यात्। न च

न हि भूतानां समुदायपर्यवसितं चैतन्यम्; प्रतिदिनं तस्यान्यत्वे पूर्वपूर्वदिवसानुभूतस्यास्मरणप्रसङ्गात् । नापि प्रत्येकपर्यवसितम्; करचरणाद्यवयवापाये तदनुभूतस्य स्मरणायोगात् । नापि मृगमदवासनेव वस्त्रादिषु, संसर्गादन्यवासनाऽन्यत्र संक्रामति; मात्रानुभूतस्य गर्भस्थेन भ्रूणेन स्मरणप्रसङ्गात् । न चोपादानोपादेयभावनियमो गतिः; स्थिरपक्षे परमाणूनां तदभावात् । खण्डावयविनं प्रति च विच्छिन्नानामनुपादानत्वात् । पूर्वसिद्धस्य चावयविनो विनाशात् ॥

[60] अस्तु तर्हि क्षणभङ्गः । न चातिशयो १ व्यतिरिच्यते; किं तु सादृश्यतिरस्कृतत्वात् द्रागेव न विकल्प्यते । कार्यदर्शनादध्यवसीयते अन्त्यातिशयवत् । तथा च भूतान्येव तथा तथोत्पद्यन्ते, यथा यथा प्रतिसन्धाननियमादयोऽप्युपपद्यन्ते ॥ क्षणिकत्वसिद्धावेवमेतत् । तदेव त्वन्यत्र विस्तरेण प्रतिषिद्धम् ॥ अपि च—

मृगमदगन्धस्य वस्त्र इवान्यस्मिन्नप्यन्यगतवासनायाः संक्रम इष्यते; नैतावताऽव्यवस्था; संसर्गस्यैव नियामकत्वाच्चैत्रवासनाया असंसृष्टमैत्रे संक्रमाप्रसक्तेरिति वाच्यम्-गर्भस्थशिशोर्मातृसंसर्गसत्त्वेन वासनासंक्रमेण मात्रानुभूतस्मर्तृत्वापत्तेः । न च न केवलसंसर्गो नियामकः किन्तूपादानोपादेयभाव इति गत्यन्तरमस्ति; अतो न भ्रूणेन स्मरणमिति वाच्यम्—वस्तुक्षणिकत्वपक्षास्वीकारान्मयेव त्वयाऽपि तस्य दुर्वचत्वात् । तथा हि—किं परमाणुपुञ्ज एव शरीरमुतावयव्यन्यदस्ति । आद्ये कस्य केनोपादानोपादेयभावः । क्षणिकत्वपक्षे तु पूर्वपरमाणुक्षणः उत्तरपरमाणुक्षणोपादानं स्यात् । न त्वस्मिन् पक्षे । अन्त्ये यो ज्ञानाश्रयः करचरणादिरूपैकदेशः, तद्गतवासना किं खण्डशरीरे संक्रामति महाशरीरे वा । नाद्यः; खण्डशरीरं प्रति तस्य विच्छिन्नस्यानुपादानत्वात् । नान्त्यः; तस्य नष्टत्वेन प्रकृतभोगस्मरणोपपादनासम्भवादिति ॥

[60] तर्हि क्षणभङ्गपक्षमेव स्वीकुर्मः । कोऽयं क्षणभङ्ग इति चेदुच्यते । एकैकमपि वस्तु प्रतिक्षणं भिन्नम् । एवं च क्षणमात्रभावित्वाद्वस्तून्येव क्षणा इत्युच्यन्ते । तत्र च पूर्वपूर्वक्षणानामुत्तरोत्तरक्षणोत्पादकत्वम् । एकैकस्य च क्षणरूपवस्तुन उत्तरक्षणे भङ्गो ध्वंस इति । ननु कारणावृत्त्यतिशयविशिष्टस्य तदनन्तरभाविनस्तत्कार्यत्वं लोके दृष्टम् । यथा कपालावृत्तिजलाहरणाद्यतिशयशालिनो घटस्य कपालकार्यत्वम्; बीजावृत्तिपल्लवकारित्वाद्यतिशयवतोऽङ्कुरस्य बीजकार्यत्वम् । इह पूर्वबीजक्षणापेक्षयोत्तरबीजक्षणे कस्यचिदतिशयस्याभावान्न पूर्वक्षणकार्यत्वमुत्तरक्षणस्येति चेन्न—अत्राप्यतिशयसद्भावात् । न चायमतिशयो नास्ति । किन्तु प्रदीपज्वालानां प्रतिक्षणं भिन्नत्वेऽपि मिथः सादृश्यातिशयेन भेदतिरस्कारवदत्रापि बीजक्षणानां

---

१ ऽव्यतिरिच्यते इति क. ख. । प्र. 'विविच्य न गृह्यते' इत्यत्र विविच्येति पदं वीत्युपसर्गं ज्ञापयति । बो. 'व्यतिरेको नास्तित्वं; न च भेदो नास्तीत्यर्थः' ।

[61] न वैजात्यं विना तत्स्यान्न तस्मिन्ननुमा भवेत् ।
विना तेन न तत्सिद्धिर्नाध्यक्षं निश्चयं विना ॥ १६ ॥

न हि, 'करणाकरणयोस्तज्जातीयस्य सतः सहकारिलाभालाभौ तन्त्र'मित्यभ्युपगमे क्षणिकत्वसिद्धिः; तथैकव्यक्तावप्यविरोधात्। तद्वा तादृग्वेति न कश्चिद्विशेष इति न्यायात् । ततस्तावनादृत्य वैजात्यमप्रामाणिकमेवाभ्युपेय(गन्तव्य)म् ॥

सौसादृश्यबलेन तिरस्कारात् वस्तुतो वर्तमानोऽप्यतिशयो झटिति सविकल्पप्रत्यक्षेण न गृह्यत इत्येतावदेव । कार्यदर्शनात्पुनरध्यवसीयतेऽन्त्यातिशयवत् । तथा हि—कुसूलस्थबीजस्याङ्कुरकारित्वाभावात्क्षेत्रस्थेन चाङ्कुरकरणादङ्कुराव्यवहितप्राक्क्षणबीजे कुर्वद्रूपत्वात्मकः कश्चिदतिशयोऽस्ति । अन्यथा पूर्ववदनुत्पादकत्वप्रसङ्गात् । अतः क्षेत्रस्थबीजं कुसूलस्थादन्यदतिशयितम् । तथा च तद्वदेव बीजानां प्रतिक्षणं भेदसिद्धिः । अङ्कुराव्यवहितप्राक्क्षणबीजस्य हि यदि कुसूलस्थेनेव कारणं स्यात्—तर्हि तत्र द्वितीयक्षण एवैदृशबीजोत्पत्त्यापत्त्या तृतीयक्षण एवाङ्कुरः स्यात् । अतोऽङ्कुराव्यवहितप्राक्क्षणाव्यवहितप्राक्क्षण एव बीजे तत्क्षणकारित्वरूपोऽतिशय एष्टव्यः । एवं तत्क्षणकारित्वातिशयस्तत्पूर्वक्षण इति । एवंरीत्या खलपिटककुसूलक्षेत्रस्थबीजानां प्रतिक्षणमुत्तरोत्तरकार्यकारित्वरूपातिशयवत्त्वसिद्धिः । अतश्च क्षणिकत्वम् । तथा चेदमनुमानम्—भावाः क्षणिकाः सत्त्वात् यत्सत् तत्क्षणिकम् यथा दीपज्वालेति । सत्त्वं नामार्थक्रियाकारित्वम् । अर्थक्रिया नामार्थनिष्पत्तिरिति न्यायबिन्दुः । तथा च प्रतिक्षणमतिशयस्य क्षणिकत्वस्य च सिद्ध्या परमाणुपुञ्जात्मकानां भूतानां यदा यदा यादृशातिशयवत्त्वे भोगस्मरणनियमोपपत्तिः तदा तदा तादृशातिशयवत्त्वेनोत्पत्तिर्स्वीकारात् पूर्वपूर्वपरमाणोश्चोत्तरोत्तरोपादानतया कर्मवासनानुभववासनयोः क्रमेण संक्रमसम्भवाच्च न कश्चिद्दोष इति न भूतातिरिक्तं चेतनतत्त्वमिति चेत्—क्षणिकत्वसिद्धौ स्यादेवं भोगानियमाद्युपपादनम् । क्षणिकत्वमेव त्वात्मतत्त्वविवेके विस्तरेण प्रतिषिद्धम् । अपि चेह ब्रूमः—

[61] न वैजात्यं विना तत्स्यात् । कुर्वद्रूपत्वात्मकं वैजात्यं विना तावत् (तत्) क्षणिकत्वं न सिद्ध्यति । वैजात्यमेव त्वप्रामाणिकम् । बीजेन क्षेत्रेऽङ्कुरकरणात् कुसूलस्थतादशायां चाकरणात् करणाकरणयोश्च भावाभावयोर्विरुद्धयोरेकत्र समावेशासम्भवाद्धि क्षेत्रकुसूलस्थबीजयोर्वैजात्यं वक्तव्यम् । तत्रैकजातीयस्याविजातीयस्यैव बीजस्य सलिलकर्दमादिसहकारिलाभालाभावेव करणाकरणविषये प्रयोजकाविति स्वीकारे कुतो वैजात्यसिद्धिः ? तर्हि वैजात्याभावेऽपि सजातीयमनेकं बीजमित्यस्त्विति चेन्न—वैजात्याभावे तदेव वा तत्सदृशं वेत्यत्र विशेषाभावेनैकव्यक्तावपि करणाकरणयोः कालभेदेनाङ्गीकारसम्भवेनानेकव्यक्ताविवाविरोधात् । अतो वैजात्यमप्रामाणिकम् ॥

[62] एवं च, 'कारणवत् कार्येऽपि किञ्चिद्वैजात्यं स्यात् यस्य कारणापेक्षा, न तु दृष्टजातीयस्य' इति शङ्कया न तदुत्पत्तिसिद्धिः । दृष्टजातीयमाकस्मिकं स्यादिति चेन्न— तत्रापि किञ्चिदन्यदेव प्रयोजकं भविष्यतीत्यविरोधात् ॥ 'न कार्यस्य विशेषस्तत्प्रयुक्ततयोपलभ्यते ; नापि कार्यसामान्यस्यान्यत्प्रयोजकं दृश्यते' इति चेत्—तत् किं कारणस्य विशेषःस्वगतस्तत्प्रयोजकतयोपलब्धः, कारणसामान्यस्य वाऽन्यत्प्रयोज्यान्तरं दृश्यते ; यतो विवक्षितसिद्धिः स्यात् । शङ्का तूभयत्रापि सुलभेति ॥ कार्यजन्माजन्मभ्यामुन्नीयत इति चेन्न–सहकारिलाभालाभाभ्यामेवोपपत्तेः । उन्नीयतां वा ; कार्येषु शङ्किष्यते ; निषेध-

---

[62] न तस्मिन्ननुमा भवेत् । एवमप्रामाणिकवैजात्यस्वीकारे सत्यनुमानं सर्वमुच्छिद्येत । त्रिविधं ह्यनुमानं बौद्धवर्णितम्–अनुपलब्धिः स्वभावः कार्यं चेति । तत्रानुपलब्धिरभावानुमापिका । स्वभावस्तादात्म्यम् । कार्यं कारणानुमापकम् । तत्र प्रथमं कार्यात् कारणानुमानप्रकारस्योच्छेद उपपाद्यते—एवं कारणेऽप्रामाणिकवैजात्ये सति तादृशवैजात्यावच्छिन्नकारणतानिरूपितकार्यतावच्छेदकतया कार्येऽपि किञ्चिद्वैजात्यं सिद्ध्यतु । तत्रैव पूर्वोक्तवैजात्य निबन्धनमस्तु ; न तु दृष्टाङ्कुरत्वावच्छिन्ने इति तस्य न तत उत्पत्तिः सिद्ध्येत् । तथा च तादात्म्यतदुत्पत्तिभ्यामविनाभाव इति वर्ण्यमानतदुत्पत्तिरूपनियामकासिद्धिः । नन्वङ्कुरत्वावच्छिन्नं प्रति तस्याकारणत्वे तदाकस्मिकं स्यात् । न च कादाचित्कस्याकस्मिकत्वं युज्यत इति चेत्—न— तस्य कारणत्वासम्भवेऽप्यन्यस्य तत्र कारणत्वसम्भवात । ननु कार्ये तादृशवैजात्यं नोपलभ्यते । तथाङ्कुरत्वसामान्यावच्छिन्नस्य प्रयोजकमप्यन्यन्नोपलभ्यत इति चेत्—तर्ह्यनुपलब्ध्या तन्निषेधे कारणगतवैजात्यस्याप्यनुपलम्भादभावः स्यात् । तथा बीजत्वरूपकारणसामान्येनोत्पाद्यस्य कार्यस्यानुपलम्भात् बीजत्वेन रूपेण किञ्चित्कारणत्वं न स्यात् । न चेष्टापत्तिः ; तस्य तेन रूपेण सत्त्वस्येष्टत्वात् । सत्त्वस्य चार्थक्रियाकारित्वरूपत्वात् । यद्यनुपलब्धस्यापि सद्भावशङ्का ; सा तथा कार्यवैजात्येऽपि भविष्यति । कारणाकारणयोस्तु सहकारिलाभालाभाभ्यामुपपत्तिरुक्ता । अथ वा तत उन्नीयतां तद्वैजात्यम्, तदा कार्येऽपि वैजात्यं शङ्क्यते । या तु कार्यवैजात्याभावेऽनुपलब्धिः प्रमाणतयोपन्यस्ता, सा नैव भवितुमर्हति । अनुपलब्धिर्हि स्वभावानुपलब्धिः कार्यानुपलब्धिर्व्यापकानुपलब्धिः कारणानुपलब्धिरित्येवमादिः । तत्र कुर्वद्रूपत्वविशिष्टवह्निप्रयोज्यतया धूमे शङ्क्यमानस्य वैजात्यस्य न स्वभावानुपलब्धिर्बाधिका ; कारणवैजात्यवत्तस्यातीन्द्रियत्वस्वीकारात् ॥ तर्हि बाधकाभावे कारणगतवैजात्यवत्तस्य कस्मान्न निश्चयः ? निश्चयाभावादेव हि शङ्क्यमानत्वमुपन्यस्यत इति चेत्—उच्यते । वैजात्यं हि कार्यदर्शनबलान्निश्चेयम् । अत्र तु धूमे वह्निप्रयोज्यवैजात्यसाधकस्य तादृशवैजात्यावच्छिन्नधूमं प्रति कार्यभूतस्य कस्यचिदनुपलम्भात्तन्निश्चयो न भवेत् । तथा चानिश्चयोपपत्तेर्नास-

कार्याभावात् । न हि धूमस्य विशेषं दहनप्रयोज्यं प्रतिषेद्धुं स्वभावानुपलब्धिः प्रभवति । कार्यैकनिश्चेयस्य तदनुपलब्धेरेवानिश्चयोपपत्तेः । कार्यस्य चातीन्द्रियस्यापि सम्भवात् ; अत एवानुपलब्ध्यन्तरमपि निरवकाशमिति ॥

[63] एवं विधिरूपयोर्व्यावृत्तिरूपयोर्वा जात्योर्विरोधे सति न समावेशः । समाविष्टयोश्च परापरभावनियमः ; अन्यूनानतिरिक्तवृत्तिजातिद्वयकल्पनायां प्रमाणाभावात् । व्यावर्त्यभेदाभावेन विरोधानवकाशे भेदानुपपत्तेः । परस्परपरिहारवत्योश्च समा-

---

च्छङ्कनस्य परिहारो भवतीति । ननु सति तस्मिन् तत्कार्यमपि स्यादेव ; समर्थश्चेत् कुर्यादिति न्यायात् । अतः कार्यानुपलम्भात्तद्वैजात्यं नास्तीति निश्चीयत इति चेन्न—कार्यस्यातीन्द्रियस्यापि सम्भावितत्वेन तदनुपलब्धिमात्रेण किञ्चिन्निश्चयायोगात् । तथा च स्वभावानुपलब्धिः कार्यानुपलब्धिश्च न वैजात्यबाधिकेति सिद्धम् । एवं व्यापकानुपलब्ध्यादिकमपि न बाधकम् । अनुपलब्धिर्ह्येकादशधा न्यायबिन्दूक्ता । अन्यैश्च बौद्धैः षोडशधा । तत्र स्वभावानुपलब्धिः कार्यानुपलब्धिः व्यापकानुपलब्धिः कारणानुपलब्धिरिति चतस्रोऽनुपलब्धयः । तत्र स्वभावादीनां चतुर्णां प्रत्येकं ग्रहणेन तत्तद्विरुद्धविषयकोपलब्धिः तत्तद्विरुद्धकार्यविषयकोपलब्धिः तत्तद्विरुद्धव्याप्तविषयकोपलब्धिरितीमाः प्रत्येकं पूर्वोक्तानुपलब्धिभिर्मेल्यन्ते । इमाश्चोपलब्धयोऽभावसाधकत्वाविशेषादनुपलब्धिपदेन व्यवह्रियन्त इति अनुपलब्धीनां षोडशविधत्वं मन्यते । अन्ततः सर्वासामप्यनुपलब्धीनामुपलब्धिलक्षणप्राप्तविषय एव प्रसरस्य बौद्धैरभिमततयाऽतीन्द्रियवैजात्यविषये प्रसक्त्यभावादबाधकत्वम् । तथा चाङ्कुरत्वावच्छिन्नस्य बीजत्वावच्छिन्नकार्यताया बौद्धैरस्वीकारात् कुर्वद्रूपत्वावच्छिन्नबीजप्रयोज्यवैजात्यस्य चान्यस्याङ्कुरे शङ्कितत्वेनाङ्कुरत्वावच्छिन्नस्य तदकार्यत्वादङ्कुरेण बीजानुमानायोगात्, शङ्कितस्य च कार्यवैजात्यस्याप्रत्यक्षत्वेनानिश्चिततया तन्मुखेनापि बीजानुमानासम्भवात्, कार्यात् कारणानुमानं क्वापि न सम्भवतीति सिद्धम् ॥

[63] एवमनुपलब्धिरूपानुमानमपि कार्यानुमानवन्न भवतीति निरूप्यते । अङ्कुराव्यवहितप्राक्क्षणवर्तिबीजे बीजत्वकुर्वत्त्वरूपजातिद्वयं खलु स्वीकृतम् । जातिश्चास्मन्मत इव भावरूपा बौद्धमतातद्व्यावृत्तिरूपा वा स्यात् । सर्वथा तावत् जात्योः परस्पराभावसामानाधिकरण्यरूपविरोधे सति नैकत्र समावेशः । सति तु समावेशेऽवश्यमेव व्याप्यव्यापकभावापन्नत्वम् । अन्यथा समाविष्टयोर्व्याप्यव्यापकभावास्वीकारे किं तुल्यव्यक्तिवृत्तित्वमिष्यते उतातुल्यव्यक्तिवृत्तित्वम् । नाद्यः, घटत्वव्यावर्त्यापेक्षया कलशत्वव्यावर्त्यस्य भेदाभावेन तादृशजातिद्वयकल्पनस्याप्रामाणिकत्वात् । नान्त्यः ; तथा सत्येकत्र समावेशस्य परस्पराभावसामानाधिकरण्यस्य च स्वीकारसिद्धौ गोत्वाश्वत्वयोरपि विरुद्धयोः समावेशापत्तेः । तथा हि—असमावेशः किं गवाश्वसामग्रीविरोधात् उत कार्ययोर्गवाश्वयोर्विरोधात् । सामग्र्योर्विरोधादिति चेत्—तयोरेव कुतो विरोधः । सर्वास्मिन्नपि

वेशे गोत्वाश्वत्वयोरपि तथा भावप्रसङ्गात् ॥ सामग्रीविरोधान्नैवमिति चेत्— १ कुत एतत् ? परस्परपरिहारेण सर्वदा व्यवस्थितेरिति चेत्—नेदमप्यध्यक्षम् । एकदेशसमावेशेन तु सामग्रीसमावेशोऽप्युन्नीयते २ यावत् ॥ ३ तत्कार्ययोः परस्परपरिहृतिस्वभावत्वादिति चेत्तर्हि कम्पशिंशपयोः परस्परपरिहारवत्योर्न समावेशः स्यात् ॥ दृश्यते तावदिदमिति चेत्–गोत्वाश्वत्वयोरपि न द्रक्ष्यत इति का प्रत्याशा ? तथा च गतमनुपलब्धिलिङ्गेनापि , क्वचिदपि विरोधासिद्धेः ॥

[64] ततो विपक्षे बाधकाभावात् स्वभावहेतुरप्यपास्तः ॥ ननु—अस्ति तत् । तथा हि—वृक्षजनकपत्रकाण्डाद्यन्तर्भूता शिंशपासामग्री । सा वृक्षमतिपत्य भवन्ती स्वका-

---

काले मिथः सम्बन्धादर्शनादिति चेन्न ; सर्वकालासम्बन्धस्य प्रत्यक्षेण ग्रहणासम्भवात् । प्रत्युत गवाश्वयोः पशुजातीयतयोभयानुगताकृतिसामग्रीसमावेशदर्शनेन कदाचित्सर्वसमावेशस्यापि सम्भव उन्नीयत एव । तर्हि कार्ययोर्गवाश्वयोर्मिथो भिन्नत्वदर्शनादसमावेश इत्यन्त्यपक्षोऽस्त्विति चेत्तर्हि क्वचिद्भेददर्शनमात्रेणासमावेशे चलत्वशिंशपात्वयोरसमावेशापत्तिः । प्रतिक्षणभिन्नानां शिंशपानां मध्ये हि चलशिंशपायां चलत्वं शिंशपात्वं च जाती स्वीक्रियेते । तयोश्च निश्चलशिंशपायां चलन्यग्रोधे च परस्परपरिहारो दृष्ट इति क्वचिदपि समावेशानापत्तिरिति । तत्र दर्शनबलात्स्वीकारेऽत्रापि, 'न द्रक्ष्यत इति नियन्तुं न शक्यम् । तथा च कार्यप्राक्क्षणभूते बीजेऽबीजे च कुर्वत्त्वस्य सत्त्वात् बीजत्वस्य कुर्वदकुर्वत्साधारणत्वाच्च विरुद्धयोर्बीजत्वकुर्वत्त्वयोरेकत्र समावेशस्वीकारे विरुद्धयोरपि समावेशसिद्ध्या अनुकूलानुपलब्धिप्रतिकूलोपलब्धिरूपानुपलब्धिपदार्थान्तर्गतेन गोत्वविरुद्धाश्वत्वोपलब्धिरूपहेतुना गोत्वासत्त्वानुमानं न भवति ; अनुपलब्धेर्वस्तुसत्तायाश्च क्वचिद्विरोधदर्शनेऽपि क्वचित्समावेशसम्भवेन वस्त्वसत्तानुमाने तस्या असामर्थ्यात् । एवञ्च कार्यानुमानवदनुपलब्ध्यनुमानमपि गतमिति ॥

[64] अनेनैव क्वचिदपि विरोधासिद्धिरूपहेतुना तादात्म्यानुमानमप्यपास्तं भवति ; शिंशपाया अपि क्वचिद्वृक्षत्वे विरोधाभावात् । नन्वस्ति विपक्षे बाधकम् । स्वभावानुमानं हि प्रचुरशिंशपे प्रदेशे कांचिदुच्चां शिंशपां प्रदर्श्यायं वृक्ष इत्युक्तौ अन्येषु वृक्षत्वबुद्धेर्वृक्षशब्दव्यवहा-

---

१ एतत् कुत इति क. ख । उपरितनानुपूर्वी बोधन्याम् । प्रकाशेऽपि कुत इति पूर्वं धृत्वा एतदिति पश्चाद्व्याख्यातम् । २ बो. 'सामग्र्योरपि समावेशसम्भवोऽनुमीयते, यावत् बाधकं दर्शनं तावदिति' प्रकाशदर्शनादिति यावदित्यवधारणार्थमिति भाति । सर्वथा पूर्वान्वयि यावत्पदम् । ३ बो. तत्कार्ययोरिति....सामग्रीद्वयकार्ययोर्गवाश्वयोः' ॥ क. ख. पु० तादिति विहाय कार्ययोरित्येव पाठः ।

रणमेवातिपतेत् । एवं शाखादिमन्मात्रानुबन्धी वृक्षव्यवहारः ; तद्विशेषानुबन्धी च शिंशपाव्यवहारः। स कथं तमतिपत्यात्मानमासादयेदिति—चेत्—एवं तर्हि शिंशपासामग्र्यन्तर्भूता चलनसामग्री । ततस्तामतिपत्य चलनादिरूपता भवन्ती स्वकारणमेवातिपतेत् । तथा शाखादिमद्विशेषानुबन्धी शिंशपाव्यवहारः, तद्विशेषानुबन्धी च चलनव्यवहारः । स कथं तमतिपत्यात्मानमासादयेदिति तुल्यम् ॥

[65] नोदनाद्यागन्तुकनिबन्धनं चलनत्वं , न तु तद्विशेषमात्राधीनमिति चेत्—यदि नोदनादयः स्वभावभूताः ; ततस्तद्विशेषा एव । अथास्वभावभूताः ; ततः सहकारिण एव। ततः (तथा च) तानासाद्य निर्विशेषैव शिंशपाचलनस्वभा(वत्वमा)(वान् आ) वमारभत इति । तथा च कुतः क्षणिकत्वसिद्धिः ?

रस्य चायुक्ततामध्यवस्यतस्तद्भ्रमनिवृत्तये अयं वृक्षः शिंशपात्वात्, अयं वृक्षव्यवहारयोग्यः शिंशपाव्यवहारवत्त्वादिति द्विविधमुच्यते । उभयत्राप्यप्रयोजकशङ्कायां हेतोः स्वनिमित्तातिक्रम एव बाधकम् । तत्र प्रथमे [शिंशपासामग्र्या वृक्षसामग्रीबहिर्भूतत्वाभावात] वृक्षसामग्रीं विना शिंशपासामग्र्या अभावात् वृक्षत्वानङ्गीकारे वृक्षसामग्र्यभावापत्त्या शिंशपासामग्र्यसत्त्वप्रसङ्गेन शिंशपात्वस्य स्वसामग्र्यतिक्रमः । द्वितीये—वृक्षव्यवहारयोग्यत्वाभावे तस्य योग्यत्वस्य सामान्यतः शाखादिनिमित्तकतया शाखादिमत्त्वरूपनिमित्तस्याभावापत्तौ सामान्याभावेन शाखादिविशेषस्याप्यभावे सति तादृशविशेषनिमित्तकस्य शिंशपाव्यवहारस्य स्वनिमित्तातिक्रमो भवेत्। तस्मात्स्वभावानुमानं सुस्थमिति चेत–न ; तथा सति इयं शिंशपा चलत्वात्, अयं शिंशपाव्यवहारविषयश्चलव्यवहारविषयत्वादित्यप्यनुमानापत्तेः ? । प्रतिक्षणभिन्नासु शिंशपासु शिंशपात्वस्य साधारणतया चलत्वस्य चाचलशिंशपावृत्तित्वाभावेन ततो विशेषरूपतया शिंशपासामग्र्यविनाभूतसामग्रीकस्य चले सत्त्वात्, तथा शिंशपाव्यवहारस्य वृक्षविशेषनिमित्तकत्वाच्चलव्यवहारस्य वृक्षविशेषात्मकशिंशपान्तर्गतकिञ्चिद्विशेषनिमित्तकत्वाच्च तत्रापि स्वनिमित्तातिक्रमस्य सुवचत्वात् ॥

[65] ननु शिंशपात्वं वृक्षसामग्रीविशेषमात्राधीनम् ; न तथा चलत्वं शिंशपासामग्रीविशेषमात्राधीनम्, वाय्वादिकृतनोदनाभिघातादितात्कालिकवस्तुकृतत्वादिति चेत्—बौद्धमते सहकारिलाभालाभप्रयुक्तकरणाकरणानङ्गीकारात् नोदनादिदशायां चलशिंशपोत्पत्त्युपयोगिवैजात्यरूपस्वभावविशिष्टक्षणोत्पत्तेः स्वीकार्यतया नोदनादेस्तादृशक्षणासाधारणत्वाङ्गीकारे तस्य क्षणस्य चलसामग्रीभूतस्य शिंशपासामग्रीविशेषत्वस्य दुर्वारत्वात् । यदि तन्मतर्रातिमनवलम्ब्य शिंशपासामग्र्याश्चलोत्पादने नोदनादिसहकारिकारणमिष्यते—तर्हि सहकारिबलादेव वैलक्षण्योपपत्तौ कारणे वैजात्यरूपविशेषस्यानावश्यकतया क्षणिकत्वासिद्धिः ॥

[66] स्वभावभूता एवागन्तुकसहकार्यनुप्रवेशाद्भवन्तीति चेत्—एवं तर्हि वृक्षसामग्र्यामागन्तुकसहकार्यनुप्रवेशादेव शिंशपाऽपि जायत इति न कश्चिद्विशेषः ॥

[67] एवमेतत् । किंतु शिंशपाजनकास्तरुसामग्रीमुपादायैव चलनजनकास्तु न तामेव ; किं तु मूर्तमात्रं ; तथा दर्शनादिति चेन्मैवम् ; कम्पजनकाः शिंशपाजनकविशेषा अपि सन्तस्तानतिपतन्ति ; न तु वृक्षजनकविशेषाः शिंशपाजनकास्तानिति नियामकाभावात् ॥

[68] शिंशपाजनकास्तद्विशेषा एव । कम्पकारिणस्तु न तथा ; किन्त्वागन्तवः [न्तुक]सहकारिण इति चेत्-एवं तर्हि तानासाद्य सदृशरूपा अपि केचित् कम्पकारिणः, अनासादितसहकारिणस्तु न तथा । तथा च तद्वा तादृग्वेति न कश्चिद्विशेष १ इति स्यात् ॥

[69] तस्माद्विरुद्धयोरसमावेश एव । समाविष्टयोश्च परापरभाव एव । अनेवंभूतानां द्रव्यगुणकर्मादिभाविनोपाधित्वमात्रम् । तेषां तु विरुद्धानां न समावेशो व्यक्तिभे-

---

[66] ननु नोदनादीनां तत्क्षणस्वभावत्वाङ्गीकारेऽपि वाय्वादिसहकार्यधीनत्वस्वीकारात् शिंशपासामग्र्यामिवान्यत्रापि नोदनादयो भवितुमर्हन्तीति चेत्—एवमेव वृक्षसामग्र्यां सहकारिसमावेशबलात् शिंशपोत्पत्त्युपयोगिस्वभावस्वीकारसम्भवेन वृक्षसामग्र्यामिवान्यत्रापि तादृशसहकारिबलात्तादृशशिंशपाप्रयोजकस्वभावोत्पत्त्यापत्तेः ॥

[67] ननु सत्यं सहकारिणैव शिंशपोपयोगि स्वभावोत्पादनम् । अथापि शिंशपास्थले वृक्षसामग्रीं प्रत्येवागन्तुकानां सहकारित्वम् । चलस्थले तु घटादावपि चलनदर्शनात् शिंशपासामग्रीं प्रत्येव सहकारित्वमिति नास्ति ; किंतु मूर्तमात्रं प्रत्येवेति चेत्-चलजनकानां शिंशपाजनकविशेषत्वं स्वीक्रियते न वा । आद्ये चलहेतोर्न शिंशपापेक्षया वैलक्षण्यम् ॥

[68] न स्वीक्रियत इति चेत्—तर्हि नोदनादेः सहकारित्वमेव सिद्ध्यति । तथा च सहकार्यासत्त्यनासत्तिभ्यामेवोपपत्तौ चलशिंशपाकारणानि अचलशिंशपाकारणसदृशान्येवेति न वैजात्यसिद्धिः । न चैवं वैजात्याभावेऽपि सामग्रीभेदाद्वस्तुक्षणिकत्वसिद्धिरिति वाच्यम्-तदेव वा तत्सदृशं वेत्यत्र विशेषाभावेन पूर्वोत्पन्नशिंशपायामेव सहकारिबलात्कम्पाक्रियोत्पत्तिमात्रस्वीकारसम्भवात् ॥

[69] तस्मादेकस्यामेव शिंशपायांकदाचित्कम्परूपक्रियोत्पत्तिरिति कम्पत्वजात्यभावात् कम्पत्वशिंशपात्वानुरोधेन विरुद्धसमावेशस्वीकारस्यानावश्यकत्वात् विरुद्धयोरसमावेशस्य, समाविष्टयोर्घट-

---

१ इति शब्दः क[२] पुस्तके ; नान्यत्र ।

दात् । जातीनां च भिन्नाश्रयत्वात् । तथा च कुतः क्षणिकत्वम् ? वैजात्याभ्युपगमे च कुतोऽनुमानवार्ता ॥

[70] मा भूदनुमानमिति चेन्न—तेन हि विना १ न तत् सिद्ध्येत् । न हि क्षणिकत्वे प्रत्यक्षमस्ति ; तथा निश्चयाभावात् । गृहीतनिश्चित एवार्थे तस्य प्रामाण्यात् । अन्यथा ऽतिप्रसङ्गात् ॥

[71]ननु वर्तमानः क्षणोऽध्यक्षगोचरः । न चासौ २ पूर्वापरक्षणात्मा । ततो वर्तमानत्वनिश्चय एव भेदनिश्चय इति चेत्—किमत्र तदभि[पि] मतमायुष्मतः ? यदि धर्म्येव नीलादिः, न किञ्चिदनुपपन्नम् ; तस्य स्थैर्यास्थैर्यसाधारण्यात् ॥ अथ धर्मः, तद्भेद-

---

त्वपृथिवीत्वयोरिव व्याप्यव्यापकभावस्य च सिद्धिः । यानि तु समावेशेऽपि परापरभावानापन्नवस्थितानि , तेषां कार्यत्वभूतत्वमूर्तत्वकम्पत्वादीनां न जातित्वं, किं तूपाधित्वम् । उपाधीनां च यथायथं द्रव्यादिरूपत्वम् । यथा कार्यत्वमव्यवहितोत्तरक्षणसम्बन्धरूपं क्षणात्मकालरूपं द्रव्यम् ; भूतत्वं बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वं गुण एव ; मूर्तत्वं कम्पत्वं च क्रियैवेत्येवम् । तथा च तेषां न विरोधसमावेशोभयशालित्वम् ; तत्तद्भूतादिवर्तिभूतत्वादिव्यक्तीनां भेदात् समाविष्टव्यक्तेरन्यत्र स्थितव्यक्तेश्च भिन्नत्वात् । न चैष उपाधिन्यायो जातिषु ग्राह्य, जातीनामनेकव्यक्त्याश्रितत्वेन व्यक्तिभेदेन भेदायोगात् । तथा च चलशिंशपास्थल इव सहकारिसमावेशवशादेव सर्वोपपत्तौ सर्वत्र सहकारिकलापसम्बन्धातिरिक्तस्य वैजात्यस्यासिद्धौ क्षणिकत्वं कुतः सिद्ध्येत् ? अन्यथा कार्येऽपि वैजात्यशङ्कया कार्यानुमानोच्छेदात्, विरुद्धसमावेशापत्त्या चानुपलब्ध्यनुमानविलयात् कार्यानुपलब्धिलिङ्गभङ्गे स्वभावस्याप्यसिद्धेः प्रागेव दर्शितत्वात् कुतोऽनुमानप्रमाणकथेति ।

[70] विना तेन न तत्सिद्धिर्नाध्यक्षं निश्चयं विना । अनुमासद्भावेन विना वैजात्यमेव न सिद्ध्येत् । न च प्रत्यक्षं तत्र प्रमाणम् ; भवतैव तस्याविकल्प्यमानत्वस्य कार्यदर्शनकल्प्यत्वस्य चोक्तत्वात् । नापि निर्विकल्परूपमध्यक्षं, सविकल्पनिश्चयं विना तदप्रसक्तेः । निर्विकल्पगृहीते सविकल्पनिश्चित एवार्थे प्रत्यक्षस्य प्रमाणत्वात् अन्यत्र निर्विकल्पानङ्गीकारात् । अत एव क्षणिकत्वेऽपि न निर्विकल्पं प्रमाणम् । अन्यथा शशशृङ्गादेरपि निर्विकल्पतः सिद्ध्यापत्तेः ; सर्वैरपि वादिभिः स्वाभिमतस्य निर्विकल्पेन सिद्धेर्वर्णनापत्तेश्च । अतो न वस्तुक्षणभङ्गसिद्धिरिति ॥

[71] ननु वैजात्यमुखेन निर्विकल्पेन वा क्षणिकत्वं मा सैत्सीत् । घटोऽयमिति वर्तमानतया घटादिरूपक्षणावगाहिना सविकल्पकेन तत् सेत्स्यति । न हि वर्तमानोऽर्थः पूर्वः पश्चात्तनश्च

---

१ विना कुतस्तत्? कः २ पूर्वापरवर्तमानक्षणात्मेति सर्वत्र पाठः ।

निश्चयेऽपि धर्मिणः किमायातम् ? तस्य ततोऽन्यत्वात् ॥ वर्तमानावर्तमानत्वमेकस्य विरुद्धमिति चेत्—यदि सदसत्त्वं तत्' तन्न ; अनभ्युपगमात् । ताद्रूप्येणैव प्रत्यभिज्ञानात् ॥ सदसत्सम्बन्धश्चेत्—किमसङ्गतम् ? ज्ञानवत्तदुपपत्तेः ॥ क्रमेणानेकसम्बन्ध एकस्यानुपपन्न इति चेन्न—उपसर्पणप्रत्ययक्रमेणैव तस्याप्युपपत्तेः ॥ प्रत्यभिज्ञानमप्रमाणमिति चेत्—अस्ति तावदतो निरूपणीयम् । क्षणप्रत्ययस्तु भ्रान्तोऽपि नास्तीति विशेषः ॥

[72] स्यादेतत् । मा भूत्प्रत्यक्ष[1]मनुमानं वा क्षणिकत्वे ; तथाऽपि सन्देहोऽस्तु । एतावताऽपि सिद्धं समीहितं चार्वाकस्येति चेत्—उच्यते ।

भवति । तस्माद्वर्तमानत्वनिश्चयः पूर्वापरभेदनिश्चयरूप एवेति सिद्धः प्रतिक्षणं पदार्थभेद इति चेत्—अत्र विकल्प्यते । किमिदं वर्तमानत्वम् ? यदि घटरूपधर्म्येव ; तर्ह्यनेन प्रत्यक्षेण घट एव गृहीतः । न तस्य पूर्वापरभेद इति स्थैर्यवदस्थैर्यस्यापि न ततः सिद्धिः । यदि घटवर्तिधर्म एव वर्तमानत्वम् , तर्हि तस्य धर्मस्य पूर्वत्वादिधर्मापेक्षया भेदः सिद्ध्यतु । तावता घटस्यानेकत्वं,कथम् ? न च धर्मधर्मिणोरभेदः ; तस्यानङ्गीकारात् । ननु वर्तमानत्वावर्तमानत्वयोर्मिथो विरुद्धत्वात्तदाधारभेदासिद्धिरिति चेत् कथं विरोधः । यदि वर्तमानावर्तमानत्वं सदसत्त्वरूपं स्यात् तर्हि विरोधः स्यात् । सोऽयं घट इति पूर्वं पश्चाच्च सद्रूपेणैव प्रत्यभिज्ञायमानतयाऽसत्त्वानङ्गीकारे कुतो विरोधः । अतो वर्तमानावर्तमानत्वं सत्कालासत्कालसम्बन्ध इति वक्तव्यम् । तत्र च विरोध एव नास्ति ; सदसत्सम्बन्धस्याविरुद्धत्वात् । ज्ञानस्य नानाविषयकस्य प्रत्यभिज्ञादेर्विषयतया सदसदुभयसम्बन्धित्वदर्शनात् । ननु ज्ञानं युगपदेव सदसत्सम्बन्धं लभते, न तथा घटः ; पूर्वकालसम्बन्धस्योत्तरकालसम्बन्धस्य च क्रमेणैव भावादिति चेन्न—उपसर्पणं सम्बन्धे यत् प्रत्ययभूतं कारणभूतं तस्य क्रमभावितया क्रमोपपत्तेः । ननु सोऽयं घट इति प्रत्यभिज्ञानात् किलैकस्य सदसत्सम्बन्धोऽङ्गीकार्यः । तदेवाप्रमाणमिति चेत् ; प्रमाणं वा स्यादप्रमाणं वा । तत्पश्चान्निरूप्यम् । प्रतीतिस्तावत् स्थैर्यविषयिणीयमस्ति । न ह्येवं क्षणिकत्वे कश्चित्प्रत्ययो भ्रमात्मकोऽप्यस्तीति कुतः क्षणिकत्वम् ॥ तस्माच्चार्वाकस्य स्वपक्षरीत्या स्थापयितुमप्रगल्भमानस्य बौद्धमतं वैजात्यवर्तमानप्रत्ययाभ्यां वस्तु क्षणिकत्वं परिगृह्य नित्यविभुचेतनापलापेन भूतचैतन्यमत्याऽदृष्टस्य भूतधर्मत्वप्रत्यवस्थानं क्षणिकत्वस्यैवासिद्ध्या न युक्तमिति सिद्धम् ।

[72] अथ क्षणिकत्वनिश्चायकाभावेऽपि सन्देहसम्भवात् भूतचैतन्यभूतादृष्टपक्षसम्भावनया विलक्षणचेतनधर्मत्वानिश्चयमात्रं स्यादिति चेदुच्यते । किं सोऽयं घट इति प्रत्यभिज्ञानविषय-

---

[1] मा भूत्प्रत्यक्षं मा च भूदनुमानम् क॰ ।

स्थैर्यदृष्ट्योर्न सन्देहो न प्रामाण्ये विरोधतः।
एकतानिश्चयो येन क्षणे, तेन स्थिरे मतः ॥ १७ ॥

न हि स्थिरे तद्दर्शने वा स्वरसवाही सन्देहः; प्रत्यभिज्ञानस्य दुरपह्नवत्वात्। नापि तत्प्रामाण्ये; स हि न तावत्सार्वत्रिकः; व्याघातात्। तथा हि—प्रामाण्यासिद्धौ सन्देहोऽपि न सिद्ध्येत्; तत्सिद्धौ वा तदपि सिद्ध्येत्। १ निश्चयस्य तदधीनत्वात् कोटिद्वयस्य चादृष्टस्यानुपस्थाने कः सन्देहार्थः? तद्दर्शने च कथं सर्वथा तदसिद्धिः॥ एतेनाप्रामाणिकस्तद्व्यवहार इति निरस्तम्; सर्वथा प्रामाण्यासिद्धौ तत्प्राप्त्यसिद्धेः?

[73] प्रकृते प्रामाण्यसन्देहः, लूनपुनर्जातकेशादौ व्यभिचारदर्शनादिति चेत्—न एकत्वनिश्चयस्य त्वयाऽपीष्टत्वात्। अनिष्टौ वा न किञ्चित्सिद्ध्येत्। सिद्ध्यतु, यत्र

घटस्थैर्ये सन्देहः, किं वा प्रत्यभिज्ञास्वरूपे, आहो प्रामाण्ये? नाद्यौ; अनुभवविरोधात्। नाप्यन्तिमः; तत्रापि किं सर्वस्य ज्ञानस्य प्रामाण्ये सन्देहः उत प्रकृतप्रत्यभिज्ञानस्य। नाद्यः; सार्वत्रिकप्रामाण्यविरहस्य सन्देहसत्त्वस्य च विरोधात्। कथमिति चेत्—सन्दिहानो हि लोके जिज्ञासमानो वस्तुतत्त्वं निश्चिनोतीति सिद्ध्यति निश्चयस्य प्रामाण्यम्। अन्यथा तत्प्रामाण्यासिद्धौ तद्धेतुजिज्ञासासंशययोः किमर्थं सत्ता। अतो निश्चयस्य सन्देहाधीनत्वादस्ति प्रामाण्यम्। यद्वा सर्वज्ञानाप्रामाण्ये सन्देहोऽस्तीति ज्ञानस्याप्यप्रामाण्यात् सन्देहासिद्धिः स्यात्; सन्देहसत्तानिश्चयस्य सन्देहग्राहिज्ञानप्रामाण्यसिद्ध्यधीनत्वात्। किं च कस्यापि प्रामाण्याभावे प्रामाण्यकोटेरेवाप्रसिद्ध्याऽदृष्टान्यकोट्युपस्थित्यप्रसक्त्या प्रामाण्यसन्देह इति कोऽयमर्थस्त्वयोच्यते। तदर्थं कोटिप्रसिद्धिसम्पादने च न सर्वाप्रामाण्यम्। अप्रामाणिक एवायं प्रामाण्यव्यवहार इति चेदिदमप्युक्तहेतुनैव निरस्तम्—अस्यैव त्वद्वाक्यस्य त्वया प्रामाण्यस्य स्वीकार्यत्वात्। अन्यथा कुत्राप्यप्रामाण्यासिद्धेः।

[73] अस्तु तर्हि प्रकृतप्रत्यभिज्ञानमात्रे प्रामाण्यसन्देह इति द्वितीयः पक्षः। न हि प्रत्यभिज्ञानं प्रमाणमिति नियमः; लूने पुनर्जाते च केशे सोऽयं केश इति प्रत्यभिज्ञाया अप्रामाण्यदर्शनादिति चेन्न—**एकतानिश्चयो येन क्षणे, तेन स्थिरे मत** इति। एकैकस्य क्षणस्यैकत्वनिश्चये यो विरुद्धधर्मासंसर्गो हेतुस्तेनैव स्थिरेऽप्येकत्वनिश्चयो मत इति। एवमेकत्वस्थिरत्वनिश्चयात्क्षणिकत्वसंशयनिवृत्तिः। क्षणे ह्येकत्वनिश्चयस्त्वयाऽपीष्यते। नेष्यते चेदेकत्वस्यैवाप्रसिद्ध्या नैकत्वमपि वस्तूनां दुर्वचम्। ननु वर्तमानावर्तमानत्वरूपविरुद्धधर्मविरहो

---

१ 'निश्चयवत्तस्य तदधीनत्वादिति केचित् पठन्ति। तत्रायमर्थः—यथा निश्चयः प्रामाण्याधीनस्तथा सन्देहोऽपीति' चो.

विरुद्धधर्मविरहं इति चेत्—तेनैव स्थिरत्वमपि निश्चीयते । स इह सन्दिह्यत इति चेत्—तुल्यमेतत् । कचिन्निश्चयोऽपि कथञ्चिदिति चेत्—समः समाधिः ॥

[74] नन्वेतत् कारणत्वं यदि स्वभावो भावस्य, नीलादिवत्, तदा सर्वसाधारणं स्यात् । न हि नीलं १ कञ्चित्प्रत्यनीलम् । अथौपाधिकम्; तदोपाधेरपि स्वाभाविकत्वे तथात्वप्रसङ्गः । औपाधिकत्वे त्वनवस्था । अथासाधारणत्वमप्यस्य स्वभाव एव; तत उत्पत्तेरारभ्य कुर्यात्; स्थिरस्यैकस्वभावत्वादिति चेत्—उच्यते—

[75] हेतुशक्तिमनादृत्य नीलाद्यपि न वस्तुसत् ।
तद्युक्तं तत्र तत् शक्तमिति साधारणं न किम् ॥ १८ ॥

सर्वसाधारणनीलादिवैधर्म्येण काल्पनिकत्वं कार्यकारणभावस्य व्युत्पादयता

यत्र तत्र क्षण एकत्वं सिद्ध्यतु, न त्वत्रेति चेत्—स्थिरेऽपि तयोर्धर्मयोरविरोधस्य प्रागुक्तत्वेनैकत्वनिश्चयसम्भवात् । ननु धर्मयोस्तयोरिहाविरोधविषये सन्देह इति चेत्तर्हि क्षणरूपस्यापि बीजस्यैकत्र देशे कार्यकरणमन्यत्राकरणम्, एकत्र सन्निधानमन्यत्रासन्निधिरित्येवं विरुद्धधर्मसन्देहादेकत्वानिश्चयो न स्यादिति तुल्यम् । नन्वेतद्देशे करणस्यैतद्देशेऽकरणेन, एतद्देशसन्निहितत्वस्यैतद्देशासन्निहितत्वेन सहैव विरोधः, न तु देशान्तराकरण-देशान्तरासन्निधानादिनेति चेत्—तर्ह्येतत्कालसम्बन्धित्वरूपवर्तमानत्वस्यैतत्कालासम्बन्धित्वरूपावर्तमानत्वेन सहैव विरोधः, न तु कालान्तरसम्बन्धरूपावर्तमानत्वेनेति समं समाधानमिति ॥

[74] ननु स्थिरत्वे बाधकसत्त्वादेव क्षणिकत्वसिद्धिः । स्थैर्ये हि कार्यकारणभावस्य काल्पनिकत्वमेव स्यात् । तच्च ते नेष्टम् । तथा हि किमिदं कारणत्वं भावनिष्ठं तस्य स्वाभाविकमुतौपाधिकम् । आद्ये एकैकस्यापि कारणत्वं सर्वं प्रति स्यादिति सर्वोत्पादकत्वापत्तिः । यथा स्वाभाविकनीलमुत्पलादि सर्वं प्रत्येव नीलं भवति; न तु कञ्चित्प्रत्यनीलम् । अन्त्ये स उपाधिः स्वाभाविकः न वा । आद्ये सर्वसाधारण्यरूप उक्त एव दोषः । अन्त्ये उपर्युपर्युपाधिकल्पनादनवस्था । अथ स्वाभाविकत्वमेव स्वीकुर्मः । एवमपि कारणत्वस्य कार्यविशेषनिरूप्यतयाऽसाधारण्यमपि स्वभावः अतो बीजादेरङ्कुरादिनिरूपितमेव कारणत्वमिति न सर्वोत्पादकत्वप्रसङ्ग इति चेत्—तर्हि वस्तुस्थैर्ये तत् क्रमेण यावत्कार्यजनकं तावत्कारणत्वस्य तस्मिन् स्वाभाविकतया युगपदेव स्वोत्पत्तिकालादारभ्य सर्वस्वकार्यजननापत्तिः; स्वभावत्वात्कारणत्वस्येति चेत्—उच्यते ।

[75] किं ते कार्यकारणभावस्य काल्पनिकत्वं नीलादिवैधर्म्याद्वक्तव्यमित्याशयः यद्वा स्थैर्ये

---

१ किञ्चिदिति सर्वत्र पाठः ।

नीलादि पारमार्थिकमेवाभ्युपगन्तव्यम्, अन्यथा तद्वैधर्म्येण हेतुफलभावस्यापारमार्थिकत्वानुपपत्तेः । न च कार्यकारणभावस्यापारमार्थिकत्वे नीलादि पारमार्थिकं भवितुमर्हति, निस्यत्वप्रसङ्गात् । तस्मादस्य पारमार्थिकत्वेऽपरमपि तथा, नवोभयमपीति ॥

[76] 'कथमेकमनेकं परस्परविरुद्धं कार्यं कुर्यात् । तत्स्वभावत्वादिति यदि, तदोत्पत्तेरारभ्य कुर्यादविशेषात्' इत्यपि न युक्तम्; तत्तत्सहकारिसाचिव्ये तत्तत्कार्यं करोतीति स्वभावव्यवस्थापनात् (स्वभावव्यवहारस्थापनात्) । इदं च साधारणमेव, सर्वैरपि तथोपलम्भात् । न हि नीलादेरप्यन्यत् साधारण्यमिति ॥

[77] स्यादेतत् । अस्तु स्थिरम्; तथाऽपि नित्यविभोर्न कारणत्वमुपपद्यते । तथा हि—अन्वयव्यतिरेकाभ्यां कारणत्वमवधार्यते, नान्वयमात्रेण; अतिप्रसङ्गात् । न च

त्याज्यमिति । नाद्यः; कार्यकारणभावो न पारमार्थिकः असाधारणत्वात् यन्नैवं तन्नैवं यथा नीलादीति विवक्षतस्ते नीलादि सत्यमिति सिद्ध्यति । अन्यथा दृष्टान्ताभावाद्धेतुहेतुमद्भावे काल्पनिकत्वानुमानं न युज्यते । तत्र नीलादिकार्यतया पारमार्थिकं अकार्यतया वा । अन्त्ये नित्यत्वापत्तिः । आद्ये कार्यकारणभावः पारमार्थिकः ।

[76] यत्तु कथमेकस्य विरुद्धानेककार्यकारित्वम् । यदि तादृशस्वभाववत्त्वाददोष इत्युच्यते तदुत्पत्तेरारभ्य सर्वं करोतु । अतः स्थैर्यं त्याज्यमित्यवास्मदिष्टमिति इदमपि न युक्तम् । तत्तत्सहकारियुक्तं सत् तत्र कार्ये तत् कारणं शक्तमिति हि ब्रूमः । अतः सहकारिसमावेशस्य युगपदभावान्न सर्वकार्ययौगपद्यम् । सहकारिसमावेशे कार्यकरत्वस्यैव तत्स्वभावत्वात् । इदं च तद्युक्तस्य तत्र शक्तस्वरूपं कारणत्वं सर्वसाधारणमेव नीलादिवत् । नीलादौ हि साधारण्यं सर्वपुरुषज्ञेयत्वमेव । तदत्राप्यस्ति; बीजादेरङ्कुरादिमात्रनिरूपितस्य कारणत्वस्य सर्वज्ञेयत्वात् । यदि सर्वप्रतिसम्बन्धिकत्वं साधारण्यं । न तन्नीलादावपि । न हि नैल्यं शंखप्रतिसम्बन्धिकमिति । अतस्तद्वत् कारणत्वं साधारणं न किमिति ।

तस्मात्कार्यकारणभावासिद्ध्यादिदोषाभावात् प्रत्यभिज्ञाबलेन स्थैर्यसिद्धौ क्षणिकत्वे प्रमाणाभावेन क्षणभङ्गासिद्धौ च सत्यां भूतचैतन्याङ्गीकारे, 'न च गत्यन्तरं स्थिरे' इति पूर्वोक्तयुक्त्या शरीरस्य परमाणुपुञ्जत्वे उपादेयत्वस्यैवाभावात् अवयविरूपत्वे च विच्छिन्नकर्तृ प्रत्यवशिष्टावयविन उपादेयत्वायोगाद्वासनासंक्रमासम्भवेन भोगप्रतिसन्धाननियमायोगान्नित्यविभुचेतनसिद्धिरिति ।

[77] नन्वस्तु तावदुक्तयुक्त्या स्थैर्यम् । भूते चैतन्यादृष्टादिसत्त्व इवात्मनि तत्सत्त्वेऽपि बाधकमस्ति, आत्मनो नित्यत्वात्कालिकव्यतिरेकस्य । विभुत्वाद्दैशिकव्यतिरेकस्य च दुर्वचतया, 'आत्माभावे ज्ञानाद्यभाव' व्यतिरेकमुद्रावगम्यस्य कारणत्वस्य तत्रासम्भवात् । अन्वयमात्रेण

नित्यविभूनां व्यतिरेकसम्भवः । न च सोपाधेरसावस्त्येवेति साम्प्रतम् ; तथाभूतस्योपाधिसम्बन्धेऽप्यनधिकारात् । जनितो हि तेन स तस्य स्यात्, नित्यो वा । न प्रथमः, पूर्ववत् । नापि द्वितीयः, पूर्ववदेव । तथाऽपि चोपाधेरेव व्यतिरेकः ; न तस्य ; अविशेषात् । तद्वत इति चेत्—(न तस्य । अविशेषात्तद्वत इति चेत्—)न ; स चोपाधिश्चेत्यतोऽन्यस्य तद्वत्पदार्थस्याभावात् । भावे वा स एव कारणं स्यात् ॥ अत्रोच्यते—

[78] पूर्वभावो हि हेतुत्वं मीयते येन केनचित् ।
व्यापकस्यापि नित्यस्य धर्मिधीरन्यथा न हि ॥ १९ ॥

भवेदेवं, यद्यन्वयव्यतिरेकावेव कारणत्वम् ; किं तु कार्यान्नियतः पूर्वभावः ।

कारणत्वे चात्माकाशादेः सकलकारणत्वप्रसङ्गात् । न च शरीरविशिष्टात्मव्यतिरेकः शरीरशून्यदेशकालावच्छेदेन सुवच इति न व्यतिरेकासिद्धिरिति युक्तम्—शरीरावच्छिन्नत्वस्य शरीरसंयोगरूपतया तस्यात्मजनितत्वाङ्गीकारे पूर्ववदात्मनो व्यतिरेकासम्भवेन तदुत्पादनेऽनधिकारात् । तस्य नित्यत्वाङ्गीकारे चोपाधिविशिष्टस्य पूर्ववत् कालिकव्यतिरेकस्य दुर्वचतया ज्ञानादिजनकत्वायोगात् ननूपाधिविशिष्टस्य क्वचिद्देशेऽभावाद्दैशिकव्यतिरेकादेव कारणत्वमस्त्विति चेत्—अयं दैशिकव्यतिरेकोऽप्युपाधेर्विभुत्वे पूर्ववत् दुर्घटः । उपाधित्वाद्विभुद्वयसंयोगाच्चाविभुरेवोपाधिरिति चेत्तथाऽपि विशिष्टाभावोऽयं विशेषणाभाव एव, विशेष्यस्य सर्वत्रान्वितत्वाविशेषात् । विशेष्येऽपि प्रतियोगित्वमानाविशेषात् विशिष्टाभावोऽयं न विशेषणाभाव इति चेन्न—विकल्पासहत्वात् विशिष्टमनन्यदन्यद्वा ; आद्ये विशिष्टात्मनेऽप्युपाध्यात्मोभयातिरिक्तत्वाभावेन विशेष्यवति विशिष्टाभावस्य विशेषणाभावपर्यवसानेनात्मव्यतिरेकासिद्धिः । विशिष्टस्यान्यत्वे तु विशिष्टव्यतिरेकात्कार्यव्यतिरेके विशिष्टमेव कारणं स्यात् ; नात्मेति ॥ अत्रोच्यते—

[78] नित्यस्यापि विभोरपि च वस्तुनः पूर्वभावरूपं कारणत्वमन्वयव्यतिरेकाभावेऽपि धर्मिग्राहकप्रमाणेन मीयते । यद्यन्वयव्यतिरेकावेव कारणत्वं स्यात् आत्मनो व्यतिरेकाभावादकारणत्वं भवेत् । नियतपूर्वकालसत्त्वस्यैव कारणपदार्थत्वात् तस्य क्वचिदन्वयव्यतिरेकबलादिवान्यत्र मानान्तरेण निर्णयो भवति । अन्यथा अन्वयव्यतिरेकत एव कारणत्वावधारणस्वीकारे स्पर्शादिकार्यव्यक्त्या वाय्वादिकारणव्यक्त्यनुमानासम्भवात् तादृशधर्मिधीरेव न स्यात् । तयोर्व्यक्त्योरन्वयव्यतिरेकानुपलम्भात् । अवश्यं चानुपलम्भस्थल एवानुमानप्रसरः । अन्यथा प्रत्यक्षत एव सिद्धेऽर्थे किमित्यनुमानम् । तस्मादनुमेयव्यक्त्यन्वयव्यतिरेकाग्रहणेऽपि यद्धर्मावच्छिन्नं प्रति यद्धर्मावच्छिन्नस्य कारणत्वं तद्धर्माक्रान्तयोरन्वयव्यतिरेकानुविधानं क्वचित् दृष्ट्वा तेन रूपेण व्यक्त्यन्तरसिद्धिरिति वक्तव्यम् । सा च सिद्धिर्व्यतिरेकरहितेऽपि क्वचिन्न न भवति ।

स च क्वचिदन्वयव्यतिरेकाभ्यामवसीयते, क्वचिद्धर्मिग्राहकात्प्रमाणात्। अन्यथा कार्यात् कारणानुमानं क्वापि न स्यात्; तेन तस्यानुविधानानुपलम्भात् उपलम्भे वा कार्यलिङ्गानवकाशात्। प्रत्यक्षत एव तत्सिद्धेः। तज्जातीयानुविधानदर्शनात्सिद्धिरन्यत्रापि न वार्यते॥

[79] तथाऽपि कीदृगस्यानुविहितान्वयव्यतिरेकमेव कार्यात् कारणं सिद्ध्येत्; अन्यत्र तथा दर्शनादिति चेन्न—बाधेन सङ्कोचात्; विपक्षे बाधकाभावेन चाव्याप्तेः। दर्शनमात्रेण चोत्कर्षसमत्वात्। अस्य चेश्वरे विस्तरो वक्ष्यते। सर्वव्यापकानां सर्वान् प्रत्यन्वयमात्राविशेषे कारणत्वप्रसङ्गो बाधकमिति चेन्न—अन्वयव्यतिरेकवज्जातीयतया विपक्षे बाधकेन च विशेषेऽनतिप्रसङ्गात्। तथा हि—कार्यं समवायिकारणवद् दृष्ट-

---

[79] ननु तज्जातीयान्वयव्यतिरेकबलसिद्धकारणत्वस्यान्यत्रानुमानेऽपि अनुमेयकारणव्यक्तिरपि यथादर्शनं विशिष्यान्वयव्यतिरेकशालिन्येव सिद्ध्येदिति चेन्न—कारणस्यैवानुमानात्; अन्वयव्यतिरेकशालित्वस्य प्रकृतसाध्यकोटिप्रवेशाभावात्; नियतपूर्ववर्तित्वमात्रानुमानेऽनुमीयमानस्य तस्य युक्त्यन्तरेण व्यतिरेकासम्भवे निश्चिते बाधादेव तस्यार्थतः सिद्ध्यसम्भवात्। न चान्वयव्यतिरेकवत्कारणकत्वमेवानुमीयते, न तु सकारणकत्वमात्रमिति वाच्यम्—विपक्षे बाधकाभावेन हेतौ तादृशसाध्यनिरूपितव्याप्तिग्रहाभावात्। व्याप्तिग्रहेऽपि दृष्टान्ते दर्शनमात्रेणापि तत्कथनस्य चोत्कर्षसमाख्यजातिरूपदोषदुष्टत्वात्। अस्य चोत्कर्षसमदोषदुष्टत्वस्य पञ्चमस्तबके ईश्वरे सशरीरत्वादिकमन्यत्र दर्शनमात्रेणोद्भावयन्तं प्रति विस्तरः करिष्यते। नन्वन्वयव्यतिरेकवत्कारणत्वानुमाने विपक्षे बाधकं नास्तीति न वक्तुं शक्यम्। अन्वयमात्रेण कारणत्वे सर्ववस्तुव्यापकानां विभूनां सर्वान्वयाविशेषात्सर्वकारणत्वप्रसङ्ग इति बाधकसत्त्वादिति चेन्न—अभिमतसाध्यस्यान्वयव्यतिरेकवज्जातीयत्वात्, हेतोर्विपक्षे बाधकसत्त्वात्, प्रकृतसाध्यविशेषस्य व्यतिरेकवत्त्वे बाधकसत्त्वाच्चेतरबाधसहकृतेन हेतुना विशेषेऽनुमीयमाने उक्तातिप्रसङ्गाभावात्। तथा हि—यद्यन्वयमात्रदर्शनेनात्मनो ज्ञानादिकारणत्वं कल्पयेम, तर्हि सर्वं प्रति कारणत्वमापद्येत। नत्वेवम्। किं तु यद्धर्मपुरस्कारेणान्वयव्यतिरेकौ दृष्टौ तद्धर्मवत्कारणानुमानमेव ब्रूमः। तत्र च भावकार्यत्वावच्छिन्नं प्रति समवायिकारणवत्त्वं दृष्टम्। समवायिकारणसत्त्वे कार्यसत्त्वं तदभावे तदभाव इत्यन्वयव्यतिरेकौ च दृष्टौ। एवं च यस्य न दृष्ट आश्रयो ज्ञानादेः, तस्य भावकार्यत्वरूपहेतुना समवायिकारणत्वरूपानुगतधर्मापरपर्यायजात्याक्रान्तवस्तुजन्यत्वमनुमीयते। अत्र चास्ति विपक्षे बाधकम्—'समवायिकारणाभावे कुत्र प्रत्यासन्नस्यासमवायिकारणत्वं स्यात्। कस्यानुग्राहकतया च किञ्चिन्निमित्तं स्यात्। तथा च सर्वविधकारणस्याप्यभावे ज्ञानादेरकार-

मित्यदृष्टाश्रयमपि तज्जातीयकारणकम्—आश्रयाभावे किं प्रत्यासन्नं असमवायिकारणं स्यात् । तदभावे निमित्तमपि किमुपकुर्यात् । तथा चानुत्पत्तिः सततोत्पत्तिर्वा सर्वत्रोत्पत्तिर्वा स्यात् एवमपि निमित्तस्य सामर्थ्यादेव नियतदेशोत्पादे स एव देशोऽवश्यापेक्षणीयः स्यात् । तथा च सामान्यतो देशसिद्धौ इतरपृथिव्यादिबाधे तदतिरिक्तसिद्धिं को वारयेत् । एवमसमवायिनिमित्ते चोहनीये ॥

णकत्वादनुत्पत्तिरेव स्यात् । कारणं विनाऽऽश्रयं विना चोत्पादे सततमुत्पत्तिः सर्वस्थलेऽप्युत्पत्तिश्च स्यात्' इत्येवं रूपम् । ननु भावकार्यत्वात्समवायिकारणानुमानं मा भूत् । ज्ञानं किञ्चिदाश्रितं गुणत्वादिति देशमात्रानुमानं स्यात् । निमित्तानां च तत्रैव तदुत्पादकत्वं स्वभावोऽस्त्विति चेत्-एवं हि देशः कश्चिदपेक्षणीय एव । एवं च कार्यस्य तत्र समवायेनोत्पद्यमानतया तस्य तदपेक्ष्यत्वात् समवायिकारणत्वमपि सिद्ध्यति । नन्वेवं किञ्चित्सिद्धावपि नित्यविभुरूपविशेषपर्यवसानं कुत इति चेत्-अन्वयव्यतिरेकयोग्यपृथिव्यादिरूपत्वे भूतचैतन्यपक्षोक्तदोषादेव । नित्यविभुत्वसिद्धिश्च वीतरागजन्मादर्शनादिना अणुमध्यमपरिमाणत्वासम्भवेन चेति । एवञ्च सामान्यानुमाने बाधकवशादतिरिक्तसिद्धिं निषेद्धुं कः प्रभवतीति । अत्र प्रत्यासन्नतया चात्ममनःसंयोगोऽसमवायिकारणं भौतिकशरीरादि च निमित्तकारणमिति परिशीलनीयम् । अतोऽसमवायिकारणाश्रयत्वनिमित्तोपकार्यत्वबलादपि तत्सिद्धिः ॥

अतो नित्यविभोः कारणत्वासम्भवरूपदोषाभावात् भूतचैतन्यपक्षे च दोषस्योक्तत्वात् नित्यविभुचेतनसिद्धौ भुक्तिप्रातिनियमोपपत्तये क्षणभङ्गुरयागादिजन्यस्यादृष्टस्य चेतनधर्मत्वं स्वीकर्तव्यमिति सिद्धमलौकिकं लोकावगतपदार्थावृत्तिपरलोकसाधनमिति । तथा च तदधिष्ठातृतयेश्वरः सेद्धुमर्हतीति ॥

[नन्वदृष्टासिद्धावपि विश्ववृत्त्यन्यथानुपपत्त्यैव यागादेः फलसाधनत्वे सिद्धे तद्बोधकवेदोपदेष्टृतयैवेश्वरः सिद्ध्येत् । एवमदृष्टस्य भूतधर्मत्वेऽपि तदधिष्ठातृतया स सिद्ध्येदिति किं तदात्मधर्मत्वविचारेणेति चेत्-उच्यते । यागादेः कृष्यादिवत् दृष्टविधया फलहेतुत्वे चेतनैः स्वयमेव बहुधा परिश्रम्य तादृशोपायाभ्यूहनसम्भवान्नात्यन्तमीश्वरोऽपेक्षितः स्यात् ; दृष्टद्वारा भावेऽदृष्टस्याप्यभावे विश्ववृत्तेर्भ्रान्तिमूलत्वमेव कल्प्यं भवेदित्यदृष्टस्थापनम् । एवं भूतातिरिक्तचेतनासिद्धौ चैतन्याधारयागादिकर्तृशरीरान्तर्गतभूतांश एव कृतिसामानाधिकरण्येनादृष्टोत्पत्तेरेष्टव्यतया पारलौकिकादिशरीरान्तर्गतभूतांशेन तज्जन्यफलानुभवस्य वैयधिकरण्येनायोगाद्विश्ववृत्तिदौःस्थ्यं तदवस्थमित्येवमभिसन्धाय तस्य भूतातिरिक्ते स्थापनमित्यलमधिकेन ॥]

[80] इत्येषा सहकारिशक्तिरसमा माया दुरुन्नीतित-
मूलत्वात्प्रकृतिः प्रबोधभयतोऽविद्येति यस्योदिता ।
देवोऽसौ विरतप्रपञ्चरचनाकल्लोलकोलाहलः
साक्षात्साक्षितया मनस्यभिरतिं बध्नातु शान्तो मम ॥ २० ॥

इति
श्रीन्यायकुसुमाञ्जलौ
प्रथमः स्तबकः ॥

---

[80] एवमनेन स्तबकेनोपपादितं यदधिष्ठितमदृष्टं स्वयं प्रतिजीवं विषमतयेश्वरवैषम्यनैर्घृण्यपरिहारकत्वेन मुख्यसहकारितया शक्तिरिति, इदमेतज्जन्यमेतज्जनकमिति विना शास्त्रं दुःसाधतया मायेति, सकलजगन्मूलतया प्रकृतिरिति, 'क्षीयन्ते चास्य कर्माणी'त्युक्तरीत्या विद्याविनाश्यत्वादविद्येति शास्त्रेणोदितम् , स देवः समयविशेषे विचित्ररचनप्रपञ्चपरिभ्रमणभावितविविधक्षोभविरतिहेतुः कामक्रोधविदूरः सर्वव्यापारसाक्षात्कारी भवन् निरन्तरसन्निधानाय मनसि मेऽभ्यधिकां प्रीतिमाधत्तामिति ॥

फणिपतिपर्वतवल्लभकृपया कुसुमाञ्जलेरयं प्रथमः ।
समवर्णि शिरोमणिना स्तबकः श्रीवीरराघवेणैवम् ॥

इति
कुसुमाञ्जलिविस्तरे
प्रथमः स्तबकः ।
शुभमस्तु ।

॥ श्रीः ॥

न्यायकुसुमाञ्जलौ द्वितीयस्तवकः ।

[1] तदेवं सामान्यतः १सिद्धे अलौकिके हेतौ-तत्साधनेनावश्यं भवितव्यम् । नच तच्छक्यमस्मदादिभिर्द्रष्टुम् । नचादृष्टेन व्यवहारः—ततो लोकोत्तरः सर्वानुभावी संभाव्यते ॥

[2] २ ननु नित्यनिर्दोषवेदद्वारको योगकर्मसिद्धसर्वज्ञद्वारको वा धर्मसंप्रदायः स्यात् किं परमेश्वरकल्पनयेति चेत्— ३ अत्रोच्यते—

प्रमायाः परतन्त्रत्वात् सर्गप्रलयसम्भवात् ।
४ तदन्यस्मिन्ननाश्वासान्न विधान्तरसंभवः ॥ १ ॥

॥ श्रीः ॥

अथ कुसुमाञ्जलिविस्तरे द्वितीयस्तबकः ।

यस्य निःश्वसितं वेदाः ऋक्सामयजुरादयः ।
सुपर्णशैलशृङ्गारः श्रीनिवासः श्रियेऽस्तु नः ॥

[1] उक्तैः प्रथमविप्रतिपत्तिनिरासकैर्हेतुभिः प्रपञ्चवैचित्र्यनिर्वाहके प्रतिनियतभोगहेतावलोकप्रत्यक्षेऽदृष्टे सिद्धे सर्वलोकातिशायी सर्वज्ञः कश्चिदीश्वरस्तर्कपुरस्सरमनुमीयते । कथम् ? उच्यते । अस्य खल्वदृष्टस्य साधनमवश्यमङ्गीकर्तव्यम् । अन्यथा तदनुत्पादप्रसङ्गात् । तत्र यद्यपि विश्ववृत्त्यन्यथानुपपत्त्यैवादृष्टस्यानुमितत्वाददृष्टमिव तत्साधनमपि सामान्यतो ज्ञातमेव ; अथाप्येतत्फलजनकादृष्टसाधनमिदं कर्मेति विशिष्य तत्साधनत्वेन तन्नास्माभिरस्मत्पूर्वपुरुषैर्वा स्वयमेव द्रष्टुं शक्यम् । नच तददर्शने सति तदनुष्ठानरूपः कायिकः, तदवबोधिवाक्यात्मकवेदरचनारूपो वाचिकश्च व्यवहारो घटते । अतोऽदृष्टसाधनं अभिज्ञपौरुषेयकृतिविज्ञेयम् । अन्यागम्यत्वादित्यस्मदनुष्ठेयादृष्टसाधनावबोधिवाक्यवक्तृतयाऽदृष्टबलादीश्वरसिद्धिरिति ।

(2) अत्र द्वितीयविप्रतिपत्त्या प्रत्यवस्थानम्—नादृष्टबलादीश्वरसिद्धिः, अन्यथैवोपपत्तेः । वेदस्यापौरुषेयतया नित्यत्वात् अत एव भ्रमप्रमादादिदोषसम्भावनाविरहेण निर्दोषत्वात । वेदाध्ययनसामान्यस्य गुर्वध्ययनपूर्वकत्वनियमेन धर्मावबोधिवेदप्रवचनरूपः संप्रदायोऽयमविच्छिन्नः

---

१ सिद्धे इत्यस्य स्थिते इत्यर्थे हेतावित्यन्तस्य भवितव्यमित्यनेनान्वयः । अनुमिते इत्यर्थे तु संभाव्यत इत्यनेनान्वयः । तदा तत इत्येतदर्थज्ञानाय तत्साधनेनेत्यादि अवान्तरवाक्यत्रयम्, २ बोधन्यां स्यादेतादिति पाठः । ३ अत्रेति नास्ति । ४ ततोऽन्यस्मिन्निति पा० ।

[3] तथा हि....प्रमा ज्ञानहेत्वतिरिक्तहेत्वधीना कार्यत्वे सति तद्विशेषत्वात् अप्रमावत् । यदि च तावन्मात्राधीना भवेत्, अप्रमाऽपि प्रमैव भवेत् । अस्ति हि तत्र ज्ञानहेतुः । अन्यथा ज्ञानमपि सा न स्यात् ॥

प्रवहतीत्यङ्गीकारसंभवात्; वेदस्यानित्यत्वेष्टावपि योगेन कर्मणा च ये सिद्धाः कपिलादयस्तैरेव सर्वज्ञैर्धर्मसंप्रदायप्रवर्तनोपपत्तेश्चेति ॥ अत्रोच्यते—वेदपौरुषेयत्वसाधकस्य सद्धेतुत्वस्थापनं पञ्चमे करिष्यते । अत्र वेदापौरुषेयत्व-कापिलादिकृतत्वसाधकत्वाभिमतपूर्वपक्षिहेतुदूषणं क्रियते । न तावन्नित्यनिर्दोषवेदद्वारकत्वसंभवः, प्रमात्वविशिष्टस्य सर्वस्योत्पत्तौ ज्ञप्तौ च परतन्त्रत्वात् गुणायत्तत्वात् वेदजन्यशाब्दप्रमाया अपि वक्तृयथार्थज्ञानाधीनत्वस्यावश्यकत्वात् वक्तरि यथार्थज्ञानाभावे तदुक्तवाक्यात्प्रमानुत्पत्तेः वेदेऽपि वक्तृगुणापेक्षणात् तन्निर्दोषत्वमात्रस्याप्रयोजकत्वात् । न च नित्यत्वाद्वेदस्य वक्त्रपेक्षाऽभावात्सुतरां गुणापेक्षा नास्तीति न तज्जन्यप्रमायाः गुणाधीनत्वम् । यद्यप्येवं तदुत्पत्तौ तदनपेक्षत्वेऽपि तद्गतप्रामाण्यस्य ज्ञप्तौ पराधीनत्वं स्वतःप्रामाण्यास्वीकारे आवश्यकम्, अथापि महाजनपरिग्रहादेव प्रामाण्यसिद्धिरिति न तदर्थमपि गुणापेक्षेति वाच्यम्—वर्णादेरनित्यत्वेन सृष्टिप्रळयसद्भावेन वेदनित्यत्वमहाजनपरिग्रहयोरसंभवेन सर्वथा गुणापेक्षाया आवश्यकत्वात् । नापि सिद्धसर्वज्ञद्वारकत्वम्; ईश्वरादन्यत्रैतादृशवेदविधानौपयिकगुणसद्भावे आश्वासाभावात् । अतो नेश्वरद्वारकत्वातिरिक्तप्रकारसम्भवः ॥

[3] तत्रादौ प्रमाया उत्पत्तौ परतस्त्वमुपपाद्यते—यद्यपि कार्यसामान्यस्य स्वभिन्नकारणजन्यत्वादुत्पत्तौ परतस्त्वं निर्विवादम्; अथापि प्रमा ज्ञानहेत्वतिरिक्तहेत्वधीना कार्यत्वे सति ज्ञानविशेषत्वात् अप्रमावदितीदृशसाध्यात्मकं परतस्त्वं साध्यते । स च हेतुः प्रमायां गुणः, अप्रमायां दोषः । न च तयोरपि प्रमाऽप्रमारूपज्ञानहेतुत्वात् । ज्ञानहेत्वतिरिक्तत्वं कथमिति शङ्क्यम्—प्रमाऽप्रमोभयनिरूपितकारणतावद्भिन्नकिञ्चित्कारणकत्वं साध्यमिति विवक्षितत्वात् । उभयसाधारणकारणता आत्ममनःप्रभृतिकम् । नन्वत्र कार्यत्वे सतीति व्यर्थम् । ईश्वरतज्ज्ञानतन्नित्यत्वानामसिद्धतया नित्यज्ञाने व्यभिचारवारणाय तदिति च दुर्वचमिति चेदुच्यते—नात्र सामान्यमुखी व्याप्तिः—यः कार्यत्वे सति यद्विशेषः स तद्धेत्वतिरिक्तहेत्वधीन इति; अङ्कुरविशेषघटविशेषकारणस्य बीजविशेषकुलालविशेषादेरङ्कुरसामान्यघटसामान्यकारणबीजसामान्यकुलालसामान्यातिरिक्तत्वाभावेनातिरिक्तहेत्वधीनत्वस्य कार्ये दुरुपपादत्वात् । अतो विशेषव्याप्तिरेव । अत एव कार्यत्वादेर्हेतुत्वापेक्षा । तत्र ज्ञानविशेषत्वमात्रस्य हेतुत्वे, 'तदस्तु । अधीनत्वरूपसाध्यं मास्तु, नित्यस्यापि ज्ञानस्य स्वीकारसंभवा'दित्यप्रयोजकशङ्का स्यात् । तत्परिहाराय स्वयं ज्ञाननित्यत्वखण्डनायोगादयमुक्तो विशिष्टो हेतुः । संभवति हि प्रमा ज्ञानहेत्वतिरिक्तहेत्वधीनत्वाकार्यत्वा-

[4] ज्ञानत्वेऽप्यतिरिक्तदोषानुप्रवेशादप्रमेति चेत्—एवंतर्हि दोषाभावमाधिकमासाद्य प्रमाऽपि जायेत ; नियमेन तदपेक्षणात् । अस्तु दोषाभावोऽधिकः, भावस्तु नेष्यत इति चेत्—भवेदप्येवम् , यदि नियमेन दोषैर्भावरूपैरेव भवितव्यम् । न त्वेवम् ; विशेषादर्शनादेरभावस्यापि दोषत्वात् । कथमन्यथा ततः संशयविपर्ययौ ? ततस्तदभावो भाव एवेति कथं स नेष्यते ?

[5] स्यादेतत्—शब्दे तावत् विप्रलिप्सादयो भावा एव दोषाः । ततस्तदभावे स्वत एव शाब्दी प्रमेति चेत्—न—अनुमानादौ लिङ्गविपर्यासादीनां १ भावानामपि दोषत्वे तदभावमात्रेण प्रमानुत्पत्तेः ॥ 'अन्यत्र यथातथाऽस्तु । शब्दे तु विप्रलिप्साद्यभावे

न्यतरवती ज्ञानविशेषत्वादित्यनुमाय पश्चात्प्रकृतप्रमायामकार्यत्वांशत्यागेनाधीनत्वांशनिर्धारणार्थं, प्रमा तादृशहेत्वधीना अकार्यत्वाभावे (कार्यत्वे) सति ज्ञानविशेषत्वादित्यनुमानं निर्दुष्टम् । तदत्र भाव्यम् । न चायं हेतुरप्रयोजकः ; यदि प्रमा किञ्चिदसाधारणकारणमनपेक्ष्य ज्ञानसामान्यकारणमात्राधीना स्यात् , तर्ह्यप्रमाऽपि प्रमैव भवेत् । (अत्र यदि प्रमात्वं ज्ञानसामान्यकारणमात्रप्रयोज्यं स्यात् ; अप्रमावृत्त्यपि स्यादिति निष्कर्षः । तथा च नापाद्यापादकयोः सामानाधिकरण्यहानिः ।) अन्यथा सामान्यकारणाधीनत्वस्याप्रमायामस्वीकारे सा ज्ञानमेव न स्यात् । कुतस्तस्या अप्रमात्वरूपो विशेषः ?

[4] ननु ज्ञानसामान्यहेत्वतिरिक्तदोषरूपसहकारिप्रयोज्यं तत्राप्रमात्वमिति चेत्—तर्हि ज्ञानसामान्यकारणं दोषसहकृतमप्रमां जनयति ; तदसहकृतत्वे तु प्रमामिति दोषाभावस्य नियमेनापेक्षितस्य प्रमाकारणत्वं सिद्धमिति कथं प्रमाया असाधारणकारणानपेक्षत्वम्? ननु ज्ञानसामान्यकारणातिरिक्तभावकारणानधीनत्वं प्रमायामसन्दिग्धम् । अतः सामान्यतस्तदतिरिक्तहेत्वधीनत्वसाधने सिद्धसाधनम् ; तादृशभावरूपहेत्वधीनत्वसाधने चाप्रयोजकत्वमिति चेत्—भवेदिदमप्रयोजकत्वम् । यदि दोषो भावरूप एव स्यात् । न त्वेवम् । स्थाणुत्वपुरुषत्वव्याप्यवक्रकोटर-करचरणाद्यदर्शने हि स्थाणुर्वा पुरुषो वेति संशयः , कदाचिद्विपर्ययश्चोदेतीति विशेषादर्शनरूपोऽभावोऽपि क्वचिद्दोषः । एवमसामीप्यादिरपि । तत्र तस्यादोषत्वे दोषसापेक्षौ संशयविपर्ययौ तज्जन्यौ न स्याताम् । तथा च तद्दर्शनरूपो दोषाभावः संशयोत्तरप्रमायां हेतुरिति कथं प्रमायां भावरूपहेतुर्नेष्यत इति वक्तुं शक्यमिति ॥

[5] नन्वस्तु क्वचिद् भावरूपस्यापि दोषाभावस्य कारणत्वम् । सर्वथा दोषाभावातिरिक्तभावापेक्षा कुत्रापि प्रमायां नेष्यते । विशिष्य तु शब्दे भ्रमो विप्रलिप्सा, विषयान्तरव्यासङ्गः ,

---

१ प्रो. 'अपिशब्दो भिन्नक्रमः , दोषत्वे सत्यपीत्यर्थः । अवधारणे वा ।

वक्तृगुणापेक्षा नास्ती'ति चेन्न-गुणाभावे तदप्रामाण्यस्य वक्तृदोषापेक्षा नास्तीति विपर्ययस्यापि १ तुल्यत्वात् ॥ अप्रामाण्यं प्रति दोषाणामन्वयव्यतिरेकौ स्त इति चेन्न—प्रामाण्यं प्रत्यपि गुणानां तयोः सत्त्वात् ॥

[6] पौरुषेयविषये इयमस्तु व्यवस्था । अपौरुषेये तु दोषनिवृत्त्यैव प्रामाण्यमिति चेन्न—गुणनिवृत्त्याऽप्रामाण्यस्यापि संभवात् ॥ तस्या अप्रामाण्यं प्रति सामर्थ्यं नोपलब्धमिति चेत्—दोषनिवृत्तेः प्रामाण्यं प्रति क्व सामर्थ्यमुपलब्धम् ? 'लौकिकवचसी'ति चेत्—तुल्यम् ॥ तदप्रामाण्ये दोषा एव कारणम् ; गुणनिवृत्तिस्त्ववर्जनीयसिद्धसन्निधिरिति चेत्—प्रामाण्यं प्रति गुणेष्वपि तुल्यमेतत् ॥ गुणानां दोषोत्सारणप्रयुक्तः सन्निधिरिति चेत्—दोषाणामपि गुणोत्सारणप्रयुक्त इत्यस्तु ॥ निःस्वभावत्वमेवमपौरुषेयस्य वेदस्य स्यादिति चेत्—आत्मानमुपालभस्व । तस्मात् यथा—द्वेषरागाभावाविनाभावेऽपि रागद्वेषयो-

---

करणापाटवापरपर्यायः करणे किञ्चित्प्रतिबन्धकवस्तुसंयोग इतीमे भावा एव दोषा इति दोषाभावस्यापि भावरूपस्य न प्रसक्तिरिति चेन्न—दोषाभावमात्रस्य प्रमाकारणत्वासंभवात् । तथा सति भ्रमात्मकपरामर्शादेरेवानुमानादौ दोषतया तदभावमात्रेण प्रमात्मकानुमित्यापत्तेः । अतः प्रमात्मकपरामर्शादिरूपो गुणोऽप्यपेक्षित इति दोषाभावातिरिक्तभावापेक्षत्वमपि सर्वत्र स्वीकार्यमिति । नन्वन्यत्रान्वयव्यतिरेकबलात् गुणस्य भावस्यापेक्षायामपि शब्दे वक्तृगुणं विना दोषाभावमात्रेण प्रमा संपद्यत इति चेन्न—दोषे सत्यप्रामाण्यं, तदभावे च प्रामाण्यमिति यत् त्वदुक्तं, तद्वैपरीत्यस्य 'गुणे सति प्रामाण्यं, तदभावे चाप्रामाण्यमिति अप्रामाण्ये दोषो न हेतु'रित्येवंरूपस्य त्वदुक्तरीतितुल्यत्वात् । दोषाणामप्रामाण्यान्वयव्यतिरेकाविव गुणानां प्रामाण्यान्वयव्यतिरेकौ स्त एव ।

[6] ननु सर्वत्र गुणाधीनमेव प्रामाण्यमस्तु । अथापि वेदस्यापौरुषेयत्वात्तत्र परं दोषनिवृत्तिमात्राधीनमेव तत् स्वीक्रियत इति चेन्न—अन्यत्र सर्वत्राप्रामाण्यस्य दोषाधीनत्वेऽपि वेदे परं गुणाभावमात्राधीनत्वस्वीकारेणाप्रामाण्यापत्तेः ॥ अक्लृप्तकल्पनं पुनरुभयोरविशिष्टम् ॥ लौकिकवाक्ये गुणनिवृत्त्या सह दोषाणामिव, दोषनिवृत्त्या सह गुणानामपि समावेशदर्शनेन दोषनिवृत्तेरपि प्रामाण्यप्रयोजकत्वासिद्धेः ॥ एवं सत्यपौरुषेयतया निवृत्तगुणदोषे वेदे उभयमपि न स्यात् । कथं चेदं घटत इति चेत्—अपौरुषेयवादिनमात्मानमुपालभस्व । वयं तु पौरुषेयत्वमेवातिष्ठामह इति न गुणाभावः । तथा च यथा—रागस्थले द्वेषाभावस्य । द्वेषस्थले रागाभावस्य च सत्त्वात् प्रवृत्तिप्रयत्नस्य द्वेषाभावेन, निवृत्तिप्रयत्नस्य रागाभावेन चाविनाभावे सत्यपि, नियमेन रागद्वेषयो-

---

१ अयं पाठो व्याख्याद्वयानुसारी । सुवचत्वादिति क. ख. पाठः ।

१ रनुविधाननियमात् प्रवृत्तिनिवृत्तिप्रयत्नयो रागद्वेषकारणकत्वम्; न तु निवृत्तिप्रयत्नो द्वेषहेतुकः, प्रवृत्तिप्रयत्नस्तु सत्यपि रागानुविधाने द्वेषाभावहेतुक इति विभागो युज्यते; विशेषाभावात्—तथा प्रकृतेऽपि॥

[7] तथाऽपि वेदानामपौरुषेयत्वे सिद्धे अपेतवक्तृदोषत्वादेव प्रामाण्यं सेत्स्यति। ततः सिद्धे प्रामाण्ये गुणाभावेऽपि तदिति दोषाभाव एव हेतुः; अकारणं गुणा इति चेन्न—अपेतवक्तृगुणत्वेन सत्प्रतिपक्षत्वप्रसङ्गात्॥ 'स्वत एव प्रामाण्यनिश्चयः। किं तु शङ्कामात्रमनेनापनीयते; दोषनिबन्धनत्वात्तस्य तदभावेऽभावात्। अतो नेदमनुमानवत् (अनुमानं) सत्प्रतिसाधनीकर्तुमुचितमिति चेत्—न-गुणनिवृत्तिनिबन्धनायाश्शङ्कायास्सुलभत्वात्॥ तस्याः केवलाया अप्रामाण्यं प्रत्यनङ्गत्वान्न शङ्केति चेत्—दोषनिवृत्तेरपि केवलायाः प्रामाण्यं प्रत्यनङ्गत्वान्न तथा शङ्कानिवृत्तिरिति तुल्यमिति॥

रनुसरणात् तयोः प्रयत्नयो रागद्वेषावेव कारणभूतौ; न तु निवृत्तिप्रयत्नस्य द्वेषहेतुकत्वेन प्रवृत्तिप्रयत्नस्य द्वेषाभावहेतुकत्वस्वीकारेण रागहेतुकत्वास्वीकारः; एकस्य भावहेतुकत्वमपरस्याभावहेतुकत्वमिति विभागनियामकाभावात्—तथा प्रकृतेऽपि गुणदोषानुविधानसाम्यात् न प्रामाण्यस्य गुणहेतुकत्वास्वीकार इति।

[7] ननु द्वेषाभावस्य प्रवृत्तिहेतुत्वे उपेक्षाबुद्धिस्थलेऽपि प्रवृत्त्यापत्तिरिति राग एव कारणम्। तथाऽपि वेदापौरुषेयत्वस्य प्रमाणसिद्धत्वात् वेदप्रामाण्यस्य चोभयसम्मतत्वात् साधकपर्यालोचनायां वेदः प्रमाणं अपेतवक्तृदोषत्वादिति प्रामाण्यसिद्धौ प्रामाण्यप्रयोजकाकांक्षायां गुणाभावेऽपि वेदे तत्सत्त्वेन गुणस्य कारणत्वासम्भवेन दोषाभावस्य तत्त्वस्वीकार इति चेन्न—प्रामाण्यस्यासिद्धिप्रसङ्गात्। उक्तानुमानस्य वेदो न प्रमाणमपेतवक्तृगुणत्वादिति सत्प्रतिपक्षितत्वात्। ननु न वयं प्रामाण्यमनुमानात्सिद्ध्यतीति ब्रूमः; स्वतःप्रामाण्यस्वीकारात्। अतो न प्रामाण्यानुमानस्थल इव सत्प्रतिपक्षकार्यम्। किं तु स्वतो निश्चितेऽपि प्रामाण्ये क्वचिदप्रमायामपि प्रामाण्यनिश्चयात् प्रकृतेऽपि तथाऽप्रामाण्यशङ्कायां सर्वत्राप्रामाण्यस्य दोषनिबन्धनत्वात् प्रकृते च तदभावात् कारणाभावज्ञानात् तच्छङ्कानिरासमात्रमिति चेन्न—तन्निरासस्यैवासंभवात्। गुणाभावस्थलेऽप्रामाण्यस्यान्यत्र दर्शनेनात्रापि गुणाभावरूपकारणसत्त्वेनाप्रामाण्यशङ्काया अवस्थानात्। अथ गुणनिवृत्तिः केवला नाप्रामाण्यहेतुः, किं तु दोषे सतीति चेत्—दोषनिवृत्तिरपि केवला न प्रामाण्यहेतुः। किं तु गुणे सतीति उक्तशङ्का तदवस्थेति॥ तस्मादुत्पत्तौ पारतन्त्र्यस्येत्थमुपपादनात् प्रमा ज्ञानहेत्वतिरिक्तहेत्वधीनैवेति, सिद्धा प्रकृतेऽपि वक्तृयथार्थज्ञानरूपगुणापेक्षा॥

---

१ अन्वयदर्शनादिति क. २. पा०।

[8] एवं प्रामाण्यं परतो ज्ञायते अनभ्यासदशायां सांशयिकत्वात् अप्रामाण्यवत्। यदि तु स्वतो ज्ञायेत, कदाचिदपि प्रामाण्यसंशयो न स्यात् ज्ञानत्वसंशयवत्; निश्चिते तदनवकाशात्। नहि साधकबाधकप्रमा(साधकप्रमा)णाभावमवधूय समानधर्मादिदर्शनादेवासौ; तथा सति तदनुच्छेदप्रसङ्गात्॥

---

[8] यथा प्रामाण्यमुत्पत्तौ परतः, तथा ज्ञप्तावपि परत एव; आप्तोक्तवाक्यजन्यत्वेन वेदार्थज्ञाने प्रमात्वस्यानुमातव्यत्वात्। नच ज्ञानस्य स्वतःप्रामाण्यं सम्भवति, अनभ्यासदशायां सांशयिकत्वात्। अनभ्यासदशा नामाभ्यासाभावदशा। अभ्यास आवृत्तिः ज्ञानसजातीयज्ञानोत्पत्तिः। जातु जलाशये जलमालोक्य तत्र विहितस्नानपानादेः पुंसः परदिने मद्ध्याह्ने दूरात्तत्र यज्जलदर्शनं, तदभ्यासदशापन्नं ज्ञानम्। तत्र गृहीतप्रामाण्यकपूर्वज्ञानसजातीयतया मरीचिकासंशयस्य इदं ज्ञानं प्रमा न वेति संशयस्य च न प्रसक्तिः। गृहीतप्रामाण्यकज्ञानसजातीयत्वानुसन्धानाविषयभूतं तु ज्ञानं प्रामाण्यसंशयविषय एव भवति। अनेन सांशयिकत्वेन प्रामाण्यं परतो ज्ञायते। न स्वतो ग्राह्यं इत्यनुमीयते।

तत्राभ्यासदशापन्नज्ञानेऽपि सजातीयत्वानुसन्धानबलात्प्रामाण्यस्य ग्रहणात् यद्यपि परतो ग्राह्यत्वमस्ति; तथाऽपि तत्र संशयस्य स्वरसतोऽनुदयात्सांशयिकत्वरूपहेतुर्भागासिद्ध इति तद्वारणार्थं अनभ्यासदशायामित्युच्यते। न च विशेषणे कृतेऽपि सांशयिकत्वं तत्रासिद्धमेवेति वाच्यम्—तस्य पक्षविशेषणत्वात्। तथा च गृहीतप्रामाण्यकज्ञानसजातीयत्वानुसन्धानाविषयज्ञाननिष्ठप्रामाण्यं न स्वतो ग्राह्यं सांशयिकत्वादित्यनुमानम्। यदि तु ज्ञानव्यक्तिभेदेऽपि सजातीयज्ञानेषु सर्वत्र प्रामाण्यव्यक्तिरेकैव वर्तत इति मन्यते, तर्ह्यनभ्यासदशापन्नत्वविशेषणं पक्षांशेऽपि न देयम्; तस्य प्रामाण्यस्याभ्यासदशायामसांशयिकत्वेऽप्यन्यदा सांशयिकत्वेन भागासिद्ध्यभावात्। वस्तुतस्तु तस्य पक्षविशेषणत्वेऽपि उपेक्षात्मकानभ्यासदशापन्नज्ञाननिष्ठप्रामाण्ये यत्र संशयो न जातः तत्र भागासिद्धितादवस्थ्यात् प्रामाण्यविशेषस्यैव पक्षत्वं स्वीकार्यमिति न दोषः। अत एव पक्षकोटिबहिर्भावेनानभ्यासदशायामिति पृथगुक्तं केवलं समन्वयोपयोगिसमयपरिचयाय। अत्र परतो ग्राह्यत्वेन मीमांसकनैयायिकोभयमतमप्रामाण्यं दृष्टान्तः। ज्ञानस्य प्रामाण्यं यदि स्वत एव गृह्येत तर्हि ज्ञानग्रहणकाले ज्ञानत्वस्येव तत्प्रामाण्यस्यापि गृहीतत्वात्, यथा इदं ज्ञानं नवेति संशयो न जायते तथा, इयं प्रमा न वेत्यपि न जायेतेति। न च संशयं प्रति साधारणधर्मवत्ताज्ञानमसाधारणधर्मवत्ताज्ञानमितीदं कारणम्। तच्च प्रमाऽप्रमोभयसाधारणज्ञानत्वादिज्ञानं स्वतःप्रामाण्यनिश्चयानन्तरमप्यस्तीति न स्वतो ग्राह्यत्वस्य सांशयिकत्वविरोधित्वमिति वाच्यम्—संशयं प्रति सिद्धेर्बाधनिश्चयस्य च प्रतिबन्धकत्वेन, साधारणधर्मवत्ताज्ञानरूपकारणसत्त्वेऽपि प्रतिबन्धकाभाव-

[9] अथ प्रमाणवदप्रमाणेऽपि तत्प्रत्ययदर्शनात् विशेषादर्शनात् भवति शङ्केत्यभिप्रायः—तत् किं प्रमाणज्ञानोपलम्भेऽपि न तत्प्रामाण्यमुपलब्धम्, प्रमाणज्ञानमेव वा नोपलब्धम् ? आद्ये कथं स्वतः प्रामाण्यग्रहः; प्रत्ययप्रतीतावपि तदप्रतीतेः । द्वितीये कथं तत्र शङ्का ; धर्मिण एवानुपलब्धेरिति ॥

[10] यदपि झटिति प्रचुरतरसमर्थप्रवृत्त्यन्यथानुपपत्त्या स्वतःप्रामाण्यमुच्यते—तदपि नास्ति ; अन्यथैवोपपत्तेः । झटिति प्रवृत्तिर्हि झटिति तत्कारणोपनिपातमन्तरेणानुपपद्यमाना तमाक्षिपेत् । प्रचुरप्रवृत्तिरपि स्वकारणप्राचुर्यम् । इच्छा च प्रवृत्तेः कारणम् ।

घटितसामग्र्यभावेन प्रामाण्यसिद्धौ सत्यां संशयानवकाशात् । सिद्ध्याद्यभावस्य सामग्रीप्रवेशानङ्गीकारे च सर्वदैव साधारणधर्मज्ञानकाले संशयापत्तिरिति ।

[9] अथ प्रामाण्यं स्वतो ग्राह्यमेव । परं तु तत् प्रमाभूतज्ञान इवाप्रमाभूतेऽपि स्वतो गृह्यते । पश्चात्तु करणदोष-बाधकप्रत्ययादिनाऽप्रमायां स्वतो गृहीतप्रामाण्यत्यागः । एवं च प्रमायां प्रामाण्ये गृहीतेऽप्यप्रमावैलक्षण्यनियामकस्य विशेषस्यादर्शनात् पुनरप्यप्रमाणं किमिति संशयो भवितुमर्हतीति चेन्न—अप्रामाण्यसंशयं प्रति प्रामाण्यनियामकविशेषरूपतदभावव्याप्यवत्ताज्ञानस्येव तदभाववत्तानिश्चयस्यापि प्रतिबन्धकत्वात् स्वतःप्रामाण्यग्रहेऽप्रामाण्यसंशयाप्रसक्तेः । अप्रामाण्यज्ञानप्रतिबन्धकं हि ज्ञानं धर्मिप्रामाण्यरूपविपरीतकोट्युभयविषयकं वाच्यम् । विशेष्यप्रकारविशेषानवगाहित्वेऽप्रतिबन्धकत्वात् । स्वतःप्रामाण्यज्ञानं च तादृशमेव ; अन्यथा प्रामाण्यानवगाहने स्वतःप्रामाण्यासिद्धेः । विशेष्यानवगाहने च धर्मिण एवाग्रहणात् धर्मिज्ञानरूपकारणाभावात् संशय एव न स्यात् । नच प्रामाण्यनिश्चयो न प्रतिबन्धकः, किं तु विशेषदर्शनरूपव्याप्यवत्ताज्ञानाधीनावधारणात्मकज्ञानमेवेति वाच्यम्—निश्चयत्वावधारणत्वयोर्वैलक्षण्यात् । सर्वस्य च निश्चयस्य प्रतिबन्धकताया आनुभविकत्वादिति । तथा च सांशयिकस्थले प्रामाण्यग्रहः परत एव सफलप्रवृत्तिजनकत्वरूपात् पश्चादवगम्यमानाद्धेतोः ; न तु स्वतः । एवञ्चाभ्यासदशापन्नज्ञानेऽपि तुल्यनयेन प्रामाण्यग्रहः प्रज्ञातप्रामाण्यकज्ञानसजातीयत्वहेतोः परत एवेति न कुत्रापि प्रामाण्यं स्वतो गृह्यते ।

[10] एवं प्रामाण्यग्रहस्य परतस्त्वे साधकं समग्राहि । अथ स्वतस्त्वसाधकं क्षिप्यते । इत्थं खलु साधकमुपन्यस्यते—अर्थसन्देहादपि यद्यपि क्वचित्प्रवृत्तिः तस्याः प्रवृत्तेः सामर्थ्यं (सङ्गतार्थत्वं साफल्यं) चानुभूयत इति न प्रवृत्तिसामान्यं प्रति वा सफलप्रवृत्तिसामान्यं प्रति वा प्रामाण्यग्रहः कारणम् ; अथापि या प्रचुरतरा उत्कटा निष्कम्पा प्रवृत्तिस्तत्र प्रामाण्यज्ञानं कारणम् । अर्थनिश्चयं विना तादृशप्रवृत्त्ययोगात्, ज्ञानस्य चार्थांशे निश्चय-

तत्कारणमपीष्टाभ्युपायताज्ञानम् । तदपि तज्जातीयत्वलिङ्गानुभवप्रभवम् । सोऽपी- न्द्रियसन्निकर्षादिजन्मा । न तु प्रामाण्यग्रहस्य क्वचिदप्युपयोगः । उपयोगे वा स्वत एवेति कुत एतत् ? ततः समर्थप्रवृत्तिप्राचुर्यमपि प्रामाण्यप्राचुर्यात्तद्ग्रहणप्राचुर्याद्वा स्वतस्त्वं तु तस्य कोपयुज्यते । न हि पिपासूनां झटिति प्रचुरा समर्था च प्रवृत्तिरस्मीति पिपासोपशमनशक्तिस्तस्य प्रत्यक्षा स्यात् ॥

त्वस्य प्रामाण्यग्रहाधीनत्वात् । न चेदं प्रामाण्यज्ञानं तदा परतः ; ज्ञानसमनन्तरं झटित्येव प्रवृत्तिदर्शनात् ; परतस्त्वे च झाटित्यायोगादिति-तन्न— अन्यथैवोपपत्तेः । प्रामाण्यग्रहं विनाऽप्यर्थनिश्चयसम्भवात् , प्रामाण्यग्रहस्यावश्यकत्वेऽपि स्वतस्त्वं विनाऽपि संभवाच्च । तथा हि—कारणं विना कार्योदयायोगात् । शीघ्रभाविनी प्रवृत्तिः स्वकारणस्य शीघ्रो- पनिपातमाक्षिपेत् , न प्रामाण्यग्रहस्य स्वतस्त्वम् । न च प्रचुरप्रवृत्तौ प्रामाण्यग्रहस्य कारण- त्वात् सा शीघ्रं भवन्ती तत्स्वतस्त्वं ग्राहयतीति वाच्यम्—तत्र तस्याकारणत्वात् । प्रवृत्तिं प्रति यत् कारणं तत्प्राचुर्यबलेन प्रवृत्तिप्राचुर्यसिद्धेः । इच्छा हि तत्र कारणम् । अत उत्कटेच्छासत्त्वे उत्कटा प्रवृत्तिः । इच्छायाश्चेष्टसाधनताज्ञानं कारणम् । तच्च प्रकृतक्षीरादाविष्टसाधनताज्ञानं इष्टसाधनत्वेन निश्चितानुभूतक्षीरव्यक्तिजातीयत्वरूपहेतुज्ञानायत्तम् । इदं च तज्जातीयत्वज्ञा- नमिन्द्रियसन्निकर्षादिप्रमाणजन्यमित्यस्यां परम्परायां न कुत्रापि प्रामाण्यग्रहस्योपयोगः । न चो- क्तेष्टसाधनताज्ञानादेर्निश्चयरूपत्वस्यावश्यकत्वात् प्रामाण्यग्रहाभावे च अर्थांशे निश्चयत्वायोगाद- स्त्येवोपयोग इति वाच्यम्—प्रामाण्यसन्देहादर्थसन्देहस्य क्वचिदङ्गीकारेऽपि प्रामाण्यनिश्चयस्यार्थ- निश्चयहेतुत्वानङ्गीकारात् । तदभावेऽपि तस्यार्थांशे निश्चयरूपत्वात् । न चैवमप्रामाण्यग्रह- कालेऽप्यर्थज्ञाने निश्चयत्वस्याक्षततया प्रवृत्त्यापत्तिरिति शङ्क्यम्—अप्रामाण्यज्ञानानास्कन्दितार्थ- निश्चयस्यैव प्रवृत्तिहेतुत्वस्वीकारेणादोषात् । अथ बहुवित्तव्ययायाससाध्येषु वैदिकेषु व्यव- हारेषु प्रामाण्यनिश्चयमन्तरा न निष्कम्पप्रवृत्तिर्दृश्यत इति प्रामाण्यग्रहविशिष्टार्थनिश्चयस्यैव प्रवृत्तिहेतुत्वम् । युक्तं चैतत्—अप्रामाण्यज्ञानानास्कन्दितार्थनिश्चयत्वेन कारणत्वे, तच्छरीरे तद- भाववति तत्प्रकारकत्वरूपस्य तद्वति तत्प्रकारकत्वाभावरूपस्य चाप्रामाण्यस्य तथा अनास्कन्दित- त्वस्य च निवेशापेक्षया प्रामाण्यग्रहास्कन्दितत्वनिवेशे लाघवादिति चेत्—अस्तु कामं प्रामाण्य- ग्रहस्योपयोगः । अथापि स ग्रहः स्वत एवेत्येतत् कुतः ? समर्थप्रवृत्तिजनकपूर्वज्ञानसजाती- यत्वेन गुणजन्यत्वेन वा हेतुना प्रामाण्यानुमानसम्भवात् । ननु प्रचुरसमर्थप्रवृत्तौ प्रवृत्त्यंशे ज्ञानस्योपयोगः । अप्रमाजन्यप्रवृत्तावुत्सर्गतो वैफल्यदर्शनाच्च प्रवृत्तिगतसामर्थ्यांशे वस्तुसतः प्रमात्वस्योपयोगः । तत्प्राचुर्यांशे तु किं प्रयोजकम् ? न चाप्रामाण्यज्ञानानास्कन्दितत्वमेव कारणतावच्छेदकत्वाभिमतं तत्र प्रयोजकम् ; अनुत्कटप्रवृत्तावपि तस्य प्रयोजकत्वदर्शनादिति चेत्

[11] स्यादेतत्—प्रामाण्यग्रहे सति सर्वमेतदुपपद्यते । स च स्वतो यदि न स्यात्, न स्यादेव; परतःपक्षस्यानवस्थादुःस्थत्वादिति—चेत्— न—तदग्रहेऽप्यर्थसन्देहादपि सर्वस्योपपत्तेः । न चानवस्थापि; प्रामाण्यस्यावश्यज्ञेयत्वानभ्युपगमात् । अन्यथा स्वतःपक्षेऽपि सा स्यात् ॥

किमतः ? तुल्यन्यायेन प्रामाण्यनिश्चयविशिष्टार्थनिश्चयत्वेन कारणत्वपक्षेऽपि प्रामाण्यनिश्चयस्य न प्राचुर्योपयोगित्वम्; तत्सत्त्वेऽपि क्वचिदनुत्कटप्रवृत्तिदर्शनात् । स्वतस्त्वं तु तत्र नैवोपयुज्यते; तथाऽन्वयव्यतिरेकादर्शनात् । ततः स्वतस्त्वस्य प्राचुर्यांशोपयोगे प्रमाणाभावात् अन्यस्याप्रामाण्यज्ञानानास्कन्दितत्वादेस्तत्रानुपयोगस्य च स्थितत्वात् समर्थप्रवृत्तिप्राचुर्यमप्रामाण्यज्ञानानास्कन्दितत्वनिवेशपक्षे प्रामाण्यप्राचुर्याधीनं वाच्यम् । प्रामाण्यनिश्चयविशिष्टत्वेन कारणत्वपक्षे च प्रामाण्यग्रहणप्राचुर्याधीनमपि भवितुमर्हति । प्रामाण्यप्राचुर्यं नाम तद्वति तत्प्रकारकत्वरूपप्रामाण्यघटकस्य तद्वत्तांशस्य सार्वकालिकत्वम्, अथ वा प्रवृत्तिजनकीभूतेष्टसाधनताज्ञाननिष्ठं यत् इष्टसाधनत्ववतीष्टसाधनत्वप्रकारकत्वरूपं प्रामाण्यं तद्घटकेच्छागतमौत्कट्यमव। तथा च फलेच्छायामुत्कटायां प्रवृत्तिरुत्कटेति सिद्ध्यति । प्रामाण्यग्रहणप्राचुर्यं नामोत्कटो विश्वासविशेषः । अस्तु वा प्रथमपक्षेऽपि प्रचुरतरप्रवृत्तिमात्रे इच्छौत्कट्यस्य प्रामाण्यग्रहणप्राचुर्यस्य च सम्भूय हेतुत्वम् । सर्वथा स्वतस्त्वं नोपयुज्यते । न च झाटित्ये तदुपयोगः, परतस्त्वेऽपि तत्सम्भवात् । यथा ह्यम्भो ग्राहकेण प्रत्यक्षेणातीन्द्रियाम्भोगतपिपासाशमनशक्त्यग्रहणेऽपि शमितपिपासाम्भस्सजातीयत्वलिङ्गानुभवप्रभवेण पिपासाशमनशक्त्यनुमानेनाम्भसि पिपासूनां झटित्येवाभ्यासबलाद्भवति प्रवृत्तिस्तथेहापीति ॥

[11] ननु स्वतस्त्वसिद्धिरुक्तविधप्रवृत्त्यन्यथानुपपत्त्या माभूत् । परिशेषात्तु भविष्यति । तथा हि– प्रामाण्यग्रहस्य प्रवृत्तावुपयोगस्य प्रागुक्ततया तदभावे प्रवृत्तितत्कार्यादिकं सर्वं नोपपद्येत । तत्र परत इति पक्षे द्वयी अनवस्था । ज्ञानगतप्रामाण्याग्रहे ज्ञानस्य कार्यक्षमत्वाभावात् अनुमानफलभूतः प्रामाण्यग्रहो योऽनुमितिरूपस्तद्गतप्रामाण्यमनुमित्यन्तरेण ग्राह्यम्; एवं तद्गतमप्यनुमित्यन्तरेणेत्येका फलमुखी । अनुमापकज्ञानसन्तानमादाय चान्या कारणमुखीति । अतः परत इति पक्षस्य दुःस्थतया परिशेष इति चेत्–न प्रामाण्यग्रहस्य प्रवृत्त्युपयोगित्वमनवस्था च भवतः । तथा हि—न तावत्तस्यार्थनिश्चयहेतुतया प्रवृत्तिहेतुत्वम्; तस्यार्थनिश्चायकत्वेऽपि तदभावेऽप्यर्थसन्देहमात्रेणापि प्रवृत्तितःसाफल्यदर्शनात् । प्रामाण्यग्रहं विनैवार्थग्रहस्य निश्चयरूपत्वं च प्रागेवावोचाम । एवं सन्देहादपि प्रवृत्तिदर्शनादेव न प्रामाण्यग्रहविशिष्टार्थनिश्चयत्वेनापि प्रवृत्तिहेतुत्वम् । न च निष्कम्पप्रवृत्तौ तेन रूपेण कारणता; अप्रामाण्यज्ञानानास्क-

[12] लिङ्गं निश्चितमेव निश्चायकम् । ततस्तन्निश्चयार्थमवश्यं लिङ्गान्तरापेक्षायामनवस्थेति चेत्–तत्किमनुपपद्यमानोऽर्थः अनिश्चित एव स्वोपपादकमाक्षिपति ; येनानवस्था

न्दितत्वेन रूपेणैव कारणत्वसम्भवात् । न च प्रामाण्यग्रहविशिष्टत्वपक्षे प्रागुक्तं लाघवमपि ; प्रामाण्यग्रहस्य संशयरूपत्वे निष्कम्पप्रवृत्त्यसम्भवेन प्रामाण्यनिश्चयविशिष्टत्वेनैव हेतुता वाच्येति अप्रामाण्याप्रकारकत्वविशिष्टप्रामाण्यप्रकारकज्ञानत्वरूपप्रामाण्यनिश्चयत्वस्य तत्र प्रवेशेन तत्राप्रामाण्यद्वैविध्येन च गौरवस्यैव दर्शनात् । न चोत्कटतरप्रवृत्तौ प्रामाण्यग्रहस्योपयोगः ; अप्रामाण्यज्ञानानास्कन्दितत्वस्येच्छौत्कट्यस्य च सम्भूय प्रयोजकत्वोपपत्तेः । अथ यत्रार्थनिश्चयेऽप्रामाण्यशङ्का समापतति , तत्र तत्परिहाराय प्रामाण्यनिश्चयस्यैवापेक्षितत्वात् तस्मिन्ननुमित्यात्मके प्रामाण्यग्रहणमन्यथाऽनुमित्येति क्वचिदनवस्थापरमस्त्येवेति चेत्—न चानवस्थाऽपि ; प्रतिज्ञानं प्रामाण्यस्यावश्यज्ञेयत्वानभ्युपगमात् । प्रामाण्यग्रहस्य विषयनिश्चयहेतुत्वाभावेन तदावश्यकत्वाभावात् । अर्थज्ञानेऽप्रामाण्यशङ्कापरिहाराय प्रामाण्यानुमित्यपेक्षायामपि तत्रानुमितावपि प्रामाण्यग्रहस्यानपेक्षितत्वात् । अन्यथा उपर्युपर्यप्रामाण्यशङ्कापरिहारकत्वेन वा विषयनिश्चायकत्वेन वा प्रामाण्यग्रहधाराभ्युपगमे स्वतस्त्वपक्षेऽप्यनवस्था स्यात् । तथा हि—ज्ञानस्य स्वयंप्रकाशतया स्वगतप्रामाण्यं स्वेनैव गृह्यत इति गुरवः । ज्ञानस्यातीन्द्रियतया ज्ञानजन्यज्ञाततानुभवे सति तदन्यथानुपपत्त्या ज्ञानमाक्षिप्यत इति तस्मिन्नाक्षेपे ज्ञानेन सह प्रामाण्यं गृह्यत इति भट्टाः । ज्ञानस्यानुव्यवसायात्मकमानसप्रत्यक्षवेद्यतया तेन सह तद्ग्रहणमिति मुरारिमिश्राः । तत्र प्रथमपक्षे ज्ञानोत्पादकसामग्र्येव ज्ञानग्राहकसामग्री । अन्यत्र पुनरन्यैव । अथापि यद्विशेष्यकं यत्प्रकारकं यद् ज्ञानं जायते, तद्विशेष्यकत्वतत्प्रकारकत्वाभ्यां तद् ज्ञानं यया सामग्र्या प्रथमतो गृह्यते , तया सामग्र्या तद्गतप्रामाण्यमपि गृह्यत इति त्रयाणां साधारणम् । तथा च तद्वति तत्प्रकारकत्वरूपं प्रामाण्यं सर्वमपि स्वघटकविशेष्यप्रकारविशिष्ट-स्वाश्रयज्ञानविषयक(प्राथमिक)ज्ञानसामान्यविषयभूतमिति तन्मतम् । इदमेव च स्वतो ग्राह्यत्वम् । उक्तस्वतो ग्राह्यत्वाभाव एव प्राक् सांशयिकत्वहेतुना सिषाधयिषितः । अत्र च मतत्रयेऽप्यनवस्था—प्रामाण्यस्यावश्यज्ञेयत्वोपगमे गुरुमते एकेनैव ज्ञानेन घटांशे प्रामाण्यस्येव प्रामाण्यांशेऽपि प्रामाण्यस्य तत्प्रामाण्यान्तरेऽपि प्रामाण्यान्तरस्येत्येवमनन्तग्रहणाद्विषयनियमाभावादनवस्था । भट्टमते आक्षेपगृहीतप्रामाण्यांशे प्रामाण्यग्रहणार्थमाक्षेपान्तरमित्येवम् , मिश्रमते तदर्थमनुव्यवसायधारेति चानवस्था फलमुखी सर्वपक्षाविशिष्टेति ॥

12 या च कारणमुखी ; तत्रोच्यते—यदि न्यायपक्षे इयं प्रमा सफलप्रवृत्तिजनकत्वादित्यत्र योऽयं हेतुः , स हेतुत्वादेव न स्वरूपसन्ननुमापक इति तन्निश्चयोऽपेक्ष्यते । स च लिङ्गनिश्चयः

न स्यात् ॥ प्रत्यक्षेण तस्य निश्चयात्तस्य च सत्तयैव निश्चायकत्वान्नैवमिति चेत्—ममापि प्रत्यक्षेण लिङ्गनिश्चयात् तस्य च सत्तयैव निश्चायकत्वान्नैवमिति तुल्यम् ॥

[13] लिङ्गज्ञानस्य प्रामाण्यानिश्चये कथं तन्निश्चय(लिङ्गनिर्ण)यस्स्यादिति चेत्—अनुपपद्यमानार्थज्ञानप्रामाण्यानिश्चये कथं तन्निश्चय इति तुल्यम् ॥ न हि निश्चयेन स्वप्रामाण्यनिश्चयेन वा विषयं निश्चाययति प्रत्यक्षम्; अपि तु स्वसत्तयेत्युक्तमिति चेत्—तुल्यम् ॥

[14] तथापि यदि तत् लिङ्गाभासः स्यात्, तदा का वार्तेति चेत्—अनुपपद्यमानोऽप्यर्थो यद्याभासः स्यात्, तदा का वार्तेति तुल्यम् ॥ सोऽपि प्रामाण्यमाक्षिपतीत्युत्सर्गः । स च क्वचिद्बाधकेनापोद्यत इति चेत्—लिङ्गेऽप्येवमिति तुल्यम् ॥ तर्हि प्रामाण्यानुमानेऽपि शङ्का तदवस्थैवेति निष्फलः प्रयास इति चेत्—एतदपि तादृगेव ॥

केनापि लिङ्गेनेत्युपर्युपरि लिङ्गनिश्चयापेक्षयाऽनवस्थेति ; तर्हि भट्टमतेऽपि घटादिनिष्ठज्ञाततया अन्यथानुपपत्त्या ज्ञानाक्षेपकत्वादनवस्था तुल्या । न हि ज्ञातता स्वरूपसती स्वोपपादकीभूतं ज्ञानमाक्षिपति ; अपि त्वन्यथानुपपद्यमानत्वेन ज्ञातैव । इदं चान्यथाऽनुपपद्यमानत्वेन ज्ञातताविषयकं ज्ञानमुपपत्तिपुरःसरमेव संपाद्यमिति । अथ प्रत्यक्षप्रमाणेन चक्षुरादिना ज्ञाततानिश्चयोत्पादात् चक्षुरादेश्च स्वरूपसत एव कारणत्वान्नानवस्थेति चेत्—ममापि चक्षुरादित एव लिङ्गनिश्चय इत्यादि तुल्यम् ॥

[13] ननु ज्ञानगतप्रामाण्यनिश्चयाभावे ज्ञानविषयनिश्चयो न भवतीत्यस्मन्मतम् । अतो लिङ्गज्ञानप्रामाण्यनिश्चयाभावे लिङ्गनिश्चयो न भवतीति तत्प्रामाण्यस्यानुमेयत्वे तदर्थं लिङ्गान्तरापेक्षायां तत्रापि तथेति प्रामाण्यनिश्चयापेक्षयाऽनवस्थेति चेत्—तर्ह्यनुपपद्यमानज्ञातताविषयकज्ञानस्यापि प्रामाण्यनिश्चयाभावे ज्ञाततानिश्चयानुदयात् ज्ञानानुमितिरेव न स्यादिति तदर्थं ज्ञातताज्ञानाक्षेपायाक्षेपकान्तरे गृहीते तद्ज्ञानेऽपि प्रामाण्यनिश्चयापेक्षेत्यनवस्थोपपादनं तुल्यम् । ननु प्रत्यक्षप्रमाणस्य ज्ञाततानिश्चयजनकत्वं स्वरूपसत एव भवति । तत्र स्वविषयकनिश्चयस्येव प्रामाण्यनिश्चयस्यापि नापेक्षेति चेत्—तर्हि चक्षुरादेर्लिङ्गनिश्चायकत्वेऽपि न प्रामाण्यग्रहापेक्षेति तुल्यम् ॥

[14] तथाऽप्यहेतोरपि क्वचिद्धेतुत्वेन भानदर्शनात् तत् प्रामाण्यानुमापकलिङ्गं कदाचिल्लिङ्गाभासः स्यादिति लिङ्गज्ञाने प्रामाण्यनिश्चय आवश्यक इति चेत्—अन्यथोपपद्यमानस्यापि कदाचिदर्थोपपत्तितया भानादर्थापत्तिज्ञानेऽपि प्रामाण्यनिश्चयापेक्षा तुल्या । अथाभासोऽप्यर्थापत्तिज्ञानप्रामाण्यमनाभासवदुत्सर्गत आक्षिपति । परं तु स उत्सर्गः क्वचिद्बाधकबलादपोद्यत इति चेत्—लिङ्गाभासेऽपि तुल्यम् । तर्ह्याभासस्याप्यनुमापकत्वे अनुमितेऽपि प्रामाण्ये आभासत्व-

अनुपपद्यमानोऽर्थ एवासौ तथाविधः कश्चित् यः स्वप्नेऽपि नाभासः स्यात्। ततो नाऽऽशङ्केति चेत्—लिङ्गेऽप्येवमिति समः समाधिः॥

[15] कः पुनरसावर्थः, यः स्वप्नेऽपि नाभासः स्यात्? यदनुपलम्भे विभ्रमावकाशः, १ यादृगुपलम्भे च तद्बाधव्यवस्था। अन्यथा हि तथाभूतस्यापि व्यभिचारे साऽपि

शङ्कयाऽप्रामाण्यशङ्का नापैतीति किमनेनानुमानप्रामाण्यानुमानेनेति चेत्—इदमर्थापत्त्याभासेऽपि तुल्यमेव। नन्वनाभासत्वप्रसक्तिक्लेशरहितो विलक्षणोऽयमनुपपद्यमानार्थ इति कथमप्रामाण्यशङ्केति चेत्—लिङ्गमपि तथाविधमिति तुल्यमुत्तरम्।

[15] अयि भो नैयायिकमीमांसकौ! इदमहं वां पृच्छामि—कः पुनरसावर्थः; य आभासत्वप्रसक्तिरहितः स्वप्नेऽपि नाभासः स्यादिति॥ शृणु तावत्। यस्य शुक्तित्वादिविशेषविशिष्टस्यानुपलम्भे रजतादिभ्रमप्रसक्तिः; यस्य तु विशिष्टस्योपलम्भे तस्य भ्रमस्य बाधनियमः, स एवार्थोऽनाभासः। अन्यथा विशिष्टतयोपलब्धस्यापि भ्रमविषयत्वाङ्गीकारे बाधव्यवस्थाऽपि न स्यात्। मा भूद्व्यवस्थेति चेन्न—तत्त्वातत्त्वविभागस्यावश्यकत्वात्। बाधव्यवस्थानङ्गीकारे च बाधकज्ञानविषयस्तत्त्वम्; बाध्यज्ञानविषयोऽतत्त्वमिति विभाग एव न स्यात्। तस्याप्यस्वीकारे व्याघातः त्वदीयाक्षपादिव्यवहारस्यापि तत्त्वव्यवस्थापकत्वाभावो लोकमर्यादाविप्लवश्च। किं च विशिष्टग्रहणे सत्यपि भ्रमो भवतीत्येतदेवानुपपन्नम्। कथं हि इदमिदमेव; न तु तदित्येवं व्यवस्थापकनिखिलविशेषोपलम्भेऽपि भ्रमप्रसक्तिः? तथा हि— त्वदुक्तभ्रमस्य बाधकमस्ति न वा। नाद्यः; असाधारणधर्मात्मकसकलविशेषोपलम्भस्य प्रागेव जाततया विशेषान्तरस्योपलभ्यस्याभावेन तदसम्भवात्। नान्त्यः; बाधकाभावेऽबाध्यस्य तस्य भ्रमत्वमेव कथमिति। तस्मात् यदुपलम्भे भ्रमबाधव्यवस्था, सोऽनाभास इति।

[तस्मात् फलमुख्यायाः कारणमुख्यायाश्चानवस्थाया उभयपक्षाविशिष्टत्वात् प्रामाण्यस्यावश्यज्ञेयत्वानभ्युपगम एव सर्वेषां शरणम्। अतोऽर्थनिश्चये सति स्वयमेव प्रवृत्तिः। अन्य-

१ अत्र, 'यस्य तदितरव्यावर्तकधर्मविशिष्टस्य वस्तुनोऽनुपलम्भे भ्रान्तिर्भवति; यादृशस्योपलम्भे चासौ न भवति, सोऽर्थः स्वप्नेऽपि नाभासः स्यादिति। अनाभासस्योपलक्षणान्तरमाह बाधकेति। तदितरव्यावर्तकधर्मानुपलम्भोपलम्भाभ्यां हि ज्ञानयोर्बाध्यबाधकव्यवस्थेति। यद्वा यादृशस्योपलम्भे बाधकं व्यवतिष्ठते, नातः परं भवति, सोऽप्यर्थः' इति बोधनीदर्शनात्, 'यदनुपलम्भे विभ्रमावकाशो यादृगुपलम्भे च न; बाधकव्यवस्था च' इति पाठ उन्नीयते। बाधकेति वाक्ये यदनुपलम्भे यादृगुपलम्भे इत्युभयोरनुषङ्गाभिप्रायेण प्रथमव्याख्या द्वितीयपदमात्रानुषङ्गेण द्वितीयव्याख्या। उपरि निवेशितः पाठः प्रकाशानुसारी।

न स्यात् ॥ माभूदिति चेन्न—भवितव्यं हि तत्त्वातत्त्वविभागेन (तत्त्वातत्त्वव्यवस्थया) अन्यथा व्याघातात् । कथं हि नियामकनिःशेषविशेषोपलम्भेऽपि विपरीतारोपः ? तथाभावे वा तदतिरिक्तविशेषानुपलम्भे कथं बाधकम् ? तदभावे त्वबाधस्य कथं भ्रान्तत्वमिति ॥

व्यासङ्गादिना तादृशानिश्चयरूपधर्मिज्ञानाभावाच्चाप्रामाण्यशङ्काऽपि न । यदि कचिद्धर्मिज्ञानादिपूर्विका शङ्का, तत्र परतः प्रामाण्यनिश्चयः । लिङ्गज्ञानस्य च जातत्वेऽपि ज्ञातत्वाभावान्न तद्विषयेऽप्रामाण्यशङ्का । तत्रापि धर्मिज्ञानादिपूर्वकं कदाचिदाशङ्कायां तु तत्रापि परत एव प्रामाण्यं निश्चेयम् । एवं यावदाशङ्कं प्रामाण्यानुमितिप्रसक्तावपि नानवस्थाप्रसङ्ग इति परिशेषाभावात् पूर्वोक्तसांशयिकत्वयुक्तेश्च प्रामाण्यं न स्वतो गृह्यते । किन्तु सफलप्रवृत्तिकरत्वेन वा तादृशज्ञानजातीयत्वेन वा गुणजन्यत्वेन वाऽनुमीयत एवेति ॥

अत्रेदं बोध्यम्—अयं घट इति ज्ञाने घटे घटत्वं भासते । घटो विशेष्यः, घटत्वं प्रकारः । घटमहं जानामीति ज्ञानग्रहणे च घटविशेष्यकत्वं घटत्वप्रकारकत्वं च विषयीभवति । घटविशेष्यकत्वविशिष्टघटत्वप्रकारकत्वमेव च प्रामाण्यम् । तत् विशेष्यज्ञानग्रहणे कथं न गृह्यत इति स्वत एव गृह्यते । किं च प्रामाण्यं चेत् प्रामाण्यैकविधेयकानुमानगम्यम्—तर्ह्यनुमितेः प्राक् साध्यप्रसिद्ध्यभावेन व्याप्तिग्रहादनुमानमेव न स्यात् । अतोऽप्यगत्या स्वतोग्राह्यत्वमिति मीमांसकाः । अत्रोच्यते-अयं घट इति ज्ञानानन्तरं ज्ञानविषयकं हि ज्ञानं जायमानं, 'इमं घटं जानामि' 'इमं घटत्वेन जानामी'त्याकारकम् ; न तु घटं घटत्वेन जानामीति । प्रामाण्यं च न केवलं धर्मिविशेष्यकत्वविशिष्टघटत्वप्रकारकत्वम् ; तस्य प्रमाभ्रमोभयनिष्ठत्वात् । किन्तु घटत्ववद्विशेष्यकत्वविशिष्टघटत्वप्रकारकत्वम् । इदं च नानुव्यवसायादिज्ञाने भासते ; तत्र घटत्वविशिष्टनिष्ठतया विशेष्यताया अग्रहणात् । पूर्वज्ञाने घटत्वस्य केवलं प्रकारत्वात् घटत्वविशिष्टत्वेन घटस्य विशेष्यत्वाभावादनुव्यवसायेन तथा ग्रहणासम्भवात् । अतो न प्रामाण्यं स्वतो गृहीतमस्ति ॥ यत्त्वनुमानासम्भव इति—तत्र सांप्रदायिकाः—तद्वति तत्प्रकारकत्वरूपं प्रामाण्यं जन्मान्तरानुभूतं स्मर्यते । अतो व्याप्तिग्रहणे सति 'अयं घट इतीदं ज्ञानं तद्वति तत्प्रकारक' मित्यनुमितौ तच्छब्दस्य सर्वनाम्नः प्रकृतपरत्वात् घटे घटत्वप्रकारकत्वग्रहणमिति । मणिकृतस्तु न प्रामाण्यं साध्यते । किन्तु तदभाववति तत्प्रकारकत्वरूपाप्रामाण्याभाव एव । पक्षधर्मताबलाच्चानुमितौ प्रामाण्यविषयीकार इत्याहुः । वस्तुतस्तु—घटत्ववद्विशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वरूपं हि प्रामाण्यम् । तत्र घटत्वप्रकारकत्वस्य तत्र धर्मिविशेष्यकत्वावच्छिन्नत्वस्य चानुव्यवसायादिना ज्ञानेन सह ग्रहणात् । तद्विषये तावन्न संशयः । तस्मात्प्रामाण्यघटक-

[16] स्यादेतत्—परतःप्रामाण्येऽपि नित्यत्वाद्वेदानामनपेक्षत्वम्; महाजनपरिग्रहाच्च प्रामाण्यमिति को विरोधः? न; उभयस्याप्यसिद्धेः॥

[17] न हि वर्णा एव तावन्नित्याः। तथा हि—'इदानीं श्रुतपूर्वो गकारो नास्ति' (स्तीति) 'निवृत्तः कोलाहल' इति प्रत्यक्षेणैव शब्दध्वंसः प्रतीयते। न हि शब्द एवान्यत्र गतः; अमूर्तत्वात्। नाप्यावृतः; तत एव सम्बन्धविच्छेदानुपपत्तेः। नाप्यनवहितः श्रोता; अवधानेऽप्यनुपलब्धेः। नापीन्द्रियं दुष्टम्; शब्दान्तरोपलब्धेः। नापि सह-कार्यन्तराभावः; अन्वयव्यतिरेकवतः(कतः) तस्यासिद्धेः। १ नाप्यतीन्द्रियम्; तत्कल्प-

विशेष्यतायां घटत्वसामानाधिकरण्यांशे प्रामाण्यसंशयपर्यवसानम्। एवं चैतद्ज्ञानीयघटत्वप्रका-रतानिरूपितविशेष्यता घटत्वसमानाधिकरणा, यद्वा एतद्ज्ञानीयं घटत्वप्रकारकत्वं घटत्ववद्विशेष्यक-त्वावच्छिन्नं सफलप्रवृत्तिजनकज्ञानीयत्वादित्येवमनुमानेन घटत्ववद्विशेष्यकत्वावच्छिन्नघटत्वप्रका-रकत्वरूपप्रामाण्यं प्रथमतोऽवसीयते। अथ च व्याप्तिग्रहादिदं ज्ञानं प्रमेति पश्चादन्यत्रानु-मितिर्निष्प्रत्यूहा। घटत्ववद्विशेष्यकत्वावच्छिन्नत्वादिकं च घटो नील इति ज्ञानीयनैल्यप्रकारकत्वादौ प्रसिद्धमिति। तस्मात् स्वत ईदृशप्रामाण्यग्रहे सामग्र्यभावात् परतःप्रामाण्यपक्षेऽनुपपत्त्यभा-वात् अन्यथा सांशयिकत्वानिर्वाहाच्च न्यायमतं साधीय इति॥]

[16] नन्वस्त्वेवमुत्पत्तितो ज्ञप्तितश्च प्रमायाः परतन्त्रत्वम्। अथापि नेष्टसिद्धिः; प्रामाण्यस्य पौरुषेयवाक्ये दोषसम्भावनया गुणापेक्षत्वेऽपि वेदजन्यप्रमायां तदनपेक्षत्वात्। वेदस्य नित्य-त्वात्। प्रामाण्यज्ञप्तेः पुनः सर्वत्रानुमानाधीनत्वेऽपि नाप्तोक्तत्वरूपहेत्वधीनत्वनियमः; महाजन-परिगृहीतवाक्यजन्यत्वेनैव तदनुमितिसंभवात्। अतो नेश्वरसिद्धिरिति चेत्—न—वेदनित्य-त्वस्य सार्वकालिकमहाजनपरिग्रहस्य चासिद्धेरत्रापि प्रामाण्यस्योत्पत्तौ ज्ञप्तौ च वक्तृगुणापेक्षाया अक्षतत्वात्।

[17] तथा हि—न तावत् वेदनित्यत्वम्; वर्णनित्यत्वे सिद्धेऽपि लौकिकवचस इव वेदस्या-प्यनित्यत्वं वक्ष्यमाणं दुष्परिहरम्। वस्तुतो वर्णा अपि न नित्याः; 'पूर्वं श्रुतो गकार इदानीं नास्ति, 'निवृत्तः कोलाहल' इत्येवं ध्वंसप्रतियोगित्वेन प्रत्यक्ष्यमाणत्वात्। कोलाहलोऽपि हि जनतायामन्योन्याभिभवेनास्पष्टो वर्णस्तोम एव। न चेदं प्रत्यक्षमुपलब्धचरस्यानुपलम्भमात्रेण भ्रान्तिकल्पितमिति वाच्यम्—ध्वंसानङ्गीकारे उपलब्धस्य शब्दस्यानुपलम्भ हेतोर्दुर्वचत्वात्।

१ अत्र क्लीबनिर्देशात्, गत इत्यादाविव पुंलिङ्गाभावात्, पूर्वमुपलब्धस्य शब्दस्य सार्वकालि-कातीन्द्रियत्वस्य दुर्वचत्वाच्च प्रकृतसहकार्यन्तरविषयमिदम्; न तु शब्दविषयम्। तथैव च व्याख्यातम्।

नायां प्रमाणाभावात् । अन्यथा घटादावपि तत्कल्पनाप्रसङ्गात् । न च शब्द(स्य) नित्यत्वसिद्धौ तत्कल्पनेति युक्तम् ; निराकरिष्यमाणत्वात् ॥

[18] यत्त्वेकदेशिनो नैवमिच्छन्ति तान् प्रत्युच्यते—विवादाध्यासितः शब्दप्रध्वंस इन्द्रियग्राह्यः ऐन्द्रियिकाभावत्वात् घटाभाववत् ॥ नैतदेवम् ; इन्द्रियासन्निकृष्टत्वादतीन्द्रियाधारत्वाद्वेति चेन्न—इदं ह्युपाध्युद्भावनं वा स्यात् , व्यापकानुपलब्ध्या सत्प्रति-

---

किमस्योपलब्धस्यानुपलम्भः तस्य देशान्तरसम्बन्धात् , उतेन्द्रियसन्निकर्षभङ्गरूपादावृतत्वात् , अथ वा श्रोतुरनवधानात्, आहोस्विदिन्द्रियस्य दुष्टत्वात् , यद्वा उपलम्भ सहकारिविरहात् । न प्रथमः ; शब्दस्याक्रियत्वात् । न द्वितीयः ; भङ्गहेत्वभावात् । न तृतीयः ; कृतेऽप्यवधाने शब्दस्यानुपलम्भात् । न तुरीयः ; शब्दान्तरोपलब्धिबलाददुष्टत्वस्यावश्यकत्वात । न पञ्चमः ; क्लृप्तसहकारिसद्भावात ; अन्वयव्यतिरेकाभावेनान्यस्य सहकारिणः संप्रति कल्पनाऽयोगात् । नापि तत् सहकार्यन्तरमतीन्द्रियमन्वयव्यतिरेकवत्तया न दृश्यत इति वाच्यम्—तथा कल्पकाभावात । निष्कारणकल्पनायां तु घटादेरपि अनुपलम्भकालेऽतीन्द्रियसहकारिकल्पनयाऽनुपलब्धिर्वाच्या स्यात् । न च नित्यत्वस्य प्रमाणसिद्धत्वादेवमत्र कल्पनम् , न तु घटादाविति वाच्यम्—नित्यत्वप्रमाणस्य निराकरिष्यमाणत्वात् । तस्मादुपलब्धशब्दानुपलम्भस्यान्यथा निर्वाहासम्भवात् । उक्तध्वंसप्रत्यक्षस्याबाधितत्वादनित्या एव वर्णा इति ॥

[18] ये पुनर्नैयायिका एव केचिद्वर्णध्वंसमुपयन्तोऽपि तस्य प्रत्यक्षत्वं नेच्छन्ति , तान् प्रति प्रत्यक्षत्वेऽनुमानमुच्यते—विवादविषयः शब्दध्वंस इन्द्रियग्राह्यः ऐन्द्रियिकप्रतियोगिकाभावत्वात् घटाभाववदिति । अत्र ध्वंसप्रागभावयोः सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वाभावात् यः शब्दः श्रोत्रेण न गृहीतस्तद्व्यक्तिध्वंसस्यायोग्यव्यक्तिस्वरूपप्रतियोगितावच्छेदककस्य प्रत्यक्षस्वरूपयोग्यत्वं न स्वीक्रियत इति बाध-भागासिद्धिपरिहाराय तस्य पक्षत्वव्यावृत्तये विवादविषय इति विशेषणम् ॥ ननु नैतदुक्तहेतुसाध्यं, शब्दध्वंसस्येन्द्रियसन्निकर्षशून्यत्वादैन्द्रियिकपदार्थानाधारकत्वाच्चेति चेन्न—किमत्रेन्द्रियसन्निकर्ष-ऐन्द्रियिकाधारकत्वयोः पक्षेऽभाववर्णनेन तयोः साधनाव्यापकत्वसूचनेनोपाधित्वमभिमतम्, किं वा तयोः साध्यव्यापकत्वविवक्षया व्यापकाभावरूपप्रतिपक्षहेतुवर्णनेन पक्षे साध्याभावसाधनं चिकीर्षितम् ? न तावत् प्रथम उपाधित्वपक्षः ; तत्राऽऽद्यस्येन्द्रियसन्निकर्षस्य प्रत्यक्षकारणकलापान्तर्गतत्वेन विषयं प्रति सहकारितया सहकारियोग्यताशब्दितस्येन्द्रियग्रहणस्वरूपयोग्यतारूपसाध्यं प्रत्युपाधित्वासम्भवात् । स्वरूपयोग्यता हि कार्योपधानाय सहकारिकारणमपेक्षमाणा सहकारिसमवधानकालेऽसमवधानकाले च सर्वदा नियमेन स्वयमस्ति । अतः कादाचित्कसहकारिणो न सार्वकालिकस्वरूपयोग्यताव्यापकत्वमिति न स उपाधिः । नाप्यै-

पक्षत्वं वा । न प्रथमः ; स्वरूपयोग्यतां प्रति (ग्यतायां) सहकारियोग्यताया अनुपाधित्वात् । १ तस्यास्तामपेक्ष्यैव सर्वदा व्यवस्थितेः ॥ नाप्यैन्द्रियिकाधारत्वप्रयुक्तमभावस्य प्रत्यक्षत्वम् ; धर्माद्यभावस्यापि तथात्वप्रसङ्गात् ॥ अत एव नोभयप्रयुक्तम् ॥

[19] नापि द्वितीयः ; प्रथमस्यासिद्धेः । अस्ति हि श्रोत्रशब्दाभावयोः स्वाभाविको विशेषणविशेष्यभावः ॥ विशेष्यस्यातीन्द्रियत्वात्कथमैन्द्रियिकविशिष्टज्ञानविषयत्वम् ? तथा विशेष्यमव्यवस्थापयतश्च कथं विशेषणत्वमिति चेत्—न ; तथा विशेष्यव्यवस्था-

---

न्द्रियिकाधारकत्वमुपाधिः । उपाधिर्हि साध्यं प्रति स्वयंप्रयोजकीभवन् हेतोरप्रयोजकत्वं कल्पयति । न च प्रत्यक्षत्वरूपसाध्ये ऐन्द्रियकवृत्तित्वं प्रयोजकम् ; आत्म-शब्द-त्र्यणुकादीनामतथाभूतानामपि प्रत्यक्षत्वात् । नाप्यभावत्वरूपपक्षधर्मावच्छिन्नगतप्रत्यक्षत्वं तत्प्रयुक्तम्—तथा सत्यतीन्द्रियधर्माधर्मप्रतियोगिकाभावस्यापि मानसग्राह्यात्मवृत्तित्वेन प्रत्यक्षत्वापत्तेः । अत एव धर्माद्यभावप्रत्यक्षतापत्तेः उक्तस्येन्द्रियसन्निकर्ष ऐन्द्रियकत्वाधारत्वोभयस्य सम्भूयापि नोपाधित्वम् । धर्माभावे मनस्संयुक्तविशेषणतारूपसन्निकर्षस्याप्यक्षतत्वात् ।

[19] नापि द्वितीयः सत्प्रतिपक्षत्वपक्षः, तत्र प्रथमस्येन्द्रियसन्निकर्षाभावरूपप्रतिपक्षस्यासिद्धेः ; श्रोत्रस्याकाशरूपतया तस्य शब्दाभावस्य च विशेष्यविशेषणभावरूपसहजस्वरूपसम्बन्धवत्त्वात् । ननु न शब्दाभावे विशेषणत्वं सन्निकर्षः ; आकाशस्यातीन्द्रियतया 'आकाशः शब्दाभाववान्' इति विशिष्टज्ञानाभावेन तद्विषयत्वरूपविशेष्यत्वाभावात् ; विशेष्यमाकाशं विशिष्टज्ञानविषयत्वेनास्थापयतोऽव्यावर्तयतः शब्दाभावस्य प्रकारत्वासंभवाच्चेति चेन्न—विशेष्यव्यवस्थापना हि विशेष्यस्येतरव्यावृत्तिग्रहोपयोगि-विशेष्यनिरूपितप्रकारतारूपा प्रस्तुतविशेषणताख्यसन्निकर्षजन्यज्ञानीयतया विशेषणताप्रयोज्या , न तु विशेषणत्वाभिन्ना । समवायाभावयोर्ग्रहणे हि विशेषणता सन्निकर्षः । ग्रहणं च विषयतैव । विशेषणतायाः विषयतारूपत्वे चात्माश्रय इति । तस्मात्सन्निकर्षरूपं विशेषणत्वं न प्रकारता , किं तु स्वरूपातिरिक्तं वैशिष्ट्यादिसम्बन्धान्तरं विना समवायाभावयोः स्वभावतोऽधिकरणोपश्लिष्टस्वरूपकत्वमेव । तथा च यथा समवायस्य घटे सम्बन्धस्स्वरूपमेव, नातिरिक्तः ; अन्यथा सम्बन्धान्तरस्वीकारे तस्याप्यन्यः सम्बन्ध इत्यनवस्था-

---

१ प्र. "तस्याः प्रत्यक्षतायाः तां इन्द्रियसन्निकर्षरूपसहकारियोग्यतामित्यर्थः । तथा च पक्षवृत्तित्वेन साधनव्यापकत्वान्नोपाधिरिति भावः । यद्वा स्वरूपयोग्यतारूपं साध्यं प्रति सहकारियोग्यता नोपाधिः , साध्याव्यापकत्वादित्यर्थ इति । मकरन्दे , 'स्वरूपयोग्यतापदस्य फलोपधानपरत्वे अपदार्थव्याख्यानमित्यनुशयवानाह यद्वेति । एवं चात्र कल्पे ....सर्वदा अव्यवस्थितेरित्यकारप्रश्लेषेण मूलफक्किका योज्या । तेन साध्याव्यापकत्वं निर्वहति" इति ।

पनायाः फलत्वात् । न तु तदेव विशेषणत्वम् ; आत्माश्रयप्रसङ्गात्—विशेषणभावेन समवायाभावयोर्ग्रहणं, तथा ग्रहणमेव च विशेषणत्वमिति । तस्मात् सम्बन्धान्तरमन्तरेण तदुपश्लिष्टस्वभावत्वमेव हि तयोः । सैव च विशिष्टप्रत्ययजननयोग्यता विशेषणतेत्युच्यते । सा चात्र दुर्निवारा । प्रतियोग्यधिकरणेन स्वभावत एवाभावस्य मिलितत्वात् ॥

[20] तथाऽपि तया तथैव प्रतीतिः कर्तव्येति चेन्न—गृह्यमाणविशेष्यत्वाव(ष्याव)च्छिन्नत्वाद्व्याप्तेः । अन्यथा संयुक्तसमवायेन रूपादौ विशिष्टविकल्पधीजननदर्शनात् गन्धादावपि तथात्वप्रसङ्गात् ॥

[21]तथाऽपि नेन्द्रियविशेषणतया कस्यचित् ग्रहणं दृष्टम् ; अपि त्विन्द्रियसम्बद्धविशेषणतया ; सा चातो निवर्तत इति चेन्न—अस्य प्रतिबन्धस्येन्द्रियसन्निकृष्टार्थप्रतिसम्बन्धि-

---

प्रसङ्गात् , तथा—अभावस्यापि स्वरूपमेव सम्बन्ध इति । तस्मिंश्च स्वरूपसम्बन्धे विशेषणताव्यवहारो विना सम्बन्धान्तरं विशिष्टप्रत्ययजननयोग्यतारूपत्वात् । सेयं विशेषणता शब्दध्वंसेऽप्यस्ति, ध्वंसस्य स्वप्रतियोगिदेशवर्तित्वस्वाभाव्यात् ॥

[20] नन्वेवं विशेषणतायाः स्वरूपसम्बन्धपर्यायत्वेऽपि विशिष्टप्रत्ययजननयोग्यतारूपया तया आकाशः शब्दाभाववानिति विशिष्टप्रतीतिरुत्पाद्येति चेन्न—इन्द्रियग्राह्यविशेष्यकप्रत्यक्षं प्रत्येवेन्द्रियसन्निकर्षस्य कारणतया प्रत्यक्षरूपकार्यनियतकारणनिरूपितव्याप्यतायाः प्रत्यक्षनिष्ठायाः इन्द्रियग्राह्यविशेष्यकत्वावच्छिन्नत्वात् भूतलादाविन्द्रियग्रहणयोग्यतारूपकारणसत्वेन प्रत्यक्षविशेष्यतासम्भवात् आकाशादौ चासम्भवात्तथा प्रतीत्यनुपपत्तेः । तस्य व्याप्यतावच्छेदकत्वानङ्गीकारे चक्षुस्संयुक्तसमवायरूपसन्निकर्षस्य रूपादिप्रकारकद्रव्यविशेष्यकसविकल्पकबुद्धिजनकत्वदर्शनात् घ्राणसंयुक्तसमवायस्यापि गन्धप्रकारकद्रव्यविशेष्यकप्रत्यक्षजनकत्वप्रसङ्गात् । तथा चक्षुस्संयुक्तसमवायेन पुष्पगतरूपादिविषय इव गन्धादिविषयेऽपि 'अत्र गन्ध' इत्येवं प्रत्यक्षजननप्रसङ्गाच्च । अतस्तत्र तत्रैवायोग्यत्वादाकाशो न विशेष्यम् ॥

[21] नन्वेवं विशिष्टप्रतीतिपरिहारसम्भवेऽपि न शब्दध्वंसप्रत्यक्षसम्भवः ; संयुक्तविशेषणता संयुक्तसमवेतविशेषणतादिरूपेन्द्रियसम्बद्धविशेषणताया एव समवायाभावप्रत्यक्षजनकत्वक्लृप्तेरिति चेन्न—अस्य व्याप्त्यपरनाम्नः प्रतिबन्धस्येन्द्रियसम्बद्धवस्तुगताभावादिविषयकत्वात् तादृशाभावप्रत्यक्षे तथाविधसन्निकर्षस्यापेक्षितत्वेऽपि साक्षादिन्द्रियवृत्तिप्रतियोगिकाभावप्रत्यक्षे केवलविशेषणतायाः कारणत्वसम्भवात् । अन्यथाऽभावविषये परम्परासम्बन्धस्यैव सन्निकर्षत्वे गुणेऽपि गन्धादौ संयुक्तसमवायादेरेव सन्निकर्षत्वदर्शनात् शब्दरूपगुणेऽपि समवायो न सन्निकर्षः स्यात् । तस्मा-

विषयत्वात् । अन्यथा संयुक्तसमवायेन गन्धादावुपलब्धिदर्शनात् समवायेनादर्शनाच्छब्दस्याग्रहणप्रसङ्गात् ॥

[22] नाप्यभावत्वे सति अतीन्द्रियाधारत्वात्सत्प्रतिपक्षत्वम्; योग्यताविरहप्रयुक्तत्वाद्व्याप्तेः । न चातीन्द्रियाधारत्वमेव तस्य योग्यताविरहः; तद्विपर्ययस्यैव योग्यतात्वापत्तेः । न चैवमेव; धर्मादिप्रध्वंसग्रहणप्रसङ्गात् ॥ दृश्याधारत्वं दृश्यप्रतियोगिता चेति द्वयमप्यस्य योग्यतेति चेन्न—उभयनिरूपणीयत्वनियमानभ्युपगमात् । प्रतियोगिमात्रनिरूपणीयो ह्यभावः ॥

[23] अन्यथा 'इह भूतले घटो नास्ती'त्येषाऽपि प्रतीतिः प्रत्यक्षा न स्यात् । संयोगो ह्यत्र निषिध्यते । तदभावश्च भूतलवद् घटेऽपि वर्तते । तत्र यदि प्रत्यक्षतया भूतलस्योपयोगः, घटस्यापि तथैव स्यात् । अविशेषात् । अथ घटस्यान्यथोपयोगः; भूतल-

---

च्छब्द इव तद्ध्वंसेऽपि सन्निकर्षसद्भावात् प्रथमो हेतुरसिद्ध इति । अत्रेन्द्रियसन्निकर्षस्योपाधित्वपक्षे साध्याव्यापकत्वकथनात्सत्प्रतिपक्षपक्षे तदभावस्याव्याप्यत्वमर्थसिद्धम् । सत्प्रतिपक्षपक्षे अस्यासिद्धिकथनात उपाधित्वपक्षे सन्निकर्षस्य पक्षे साधनाव्यापकत्वभङ्गोऽर्थसिद्ध इति ॥

[22] एवमतीन्द्रियाधारत्वमपि न प्रतिपक्षहेतुः; गगनाधारकस्य द्रव्यत्वादेः पृथिव्यादौ ग्राह्यत्वेन व्यभिचारात् । न चैन्द्रियिकाधारकत्वाभावपर्यवसितमतीन्द्रियाधारत्वं हेतुः; शब्दवायवीयस्पर्शादौ व्यभिचारात् । अभावत्वे सतीति विशेषणान्न दोष इति चेत्——एवमपि तत्र योग्यताविरहस्योपाधित्वात् प्रकृतहेतौ प्रकृतसाध्यव्याप्तेस्तत्प्रयुक्तत्वात् व्याप्तिरियमारोपिता, न तु वस्तुतोऽस्तीति । न चैन्द्रियिकाधारकत्वाभाव एव योग्यताविरह इति हेतूपाध्योरैक्यमिति शङ्क्यम्—तर्ह्यैन्द्रियिकाधारत्वाभावाभावस्य योग्यतात्वापत्तेः । तथा चात्मनि धर्मध्वंसादेरिन्द्रियग्राह्यत्वप्रसङ्गः । ननु दृश्यप्रतियोगिकत्वविशिष्टदृश्याधारकत्वमभावप्रत्यक्षयोग्यता ; न तु केवलम् । अतो न तत्प्रसङ्गः । नाप्युक्तरूपयोग्यताविरहस्य प्रतिपक्षहेतावुपाधित्वम् ; साधनव्यापकत्वादिति चेन्न–आधारप्रतियोग्युभयनिरूप्यत्वनियमस्याभावेऽनभ्युपगमात् तस्य प्रतियोगिमात्रज्ञप्त्यधीनज्ञप्तिकत्वादाधारदृश्यत्वस्यानपेक्षितत्वेन विशिष्टस्य योग्यतात्वायोगात् ।

[23] अन्यथाऽभावप्रत्यक्षपूर्वक्षणेऽधिकरणप्रत्यक्षस्याप्यावश्यकत्वे 'इह भूतले घटो नास्ती'ति प्रतीतेः प्रत्यक्षता न स्यात् । अत्र हि घटस्य ध्वंसः प्रागभावो वा न विषयः ; तयोः स्वप्रतियोगिसमवायिदेशस्थत्वात् । नाप्यत्यन्ताभावः ; कदाचिदिह घटसत्त्वेन तस्य त्रैकालिकाभावस्य तत्रायोगात् । अतः नास्ति घटो गेह इति घटे गेहसंसर्गप्रतिषेधः (वै. द. ९.) इति सूत्रानुसारेण संयोगध्वंसादिरत्र विषयः । स च प्रतियोगिनः संयोगस्य द्विष्ठतया घटभूतलो-

स्याप्यन्यथैव स्यात्, अविशेषात्॥ कथमन्यथेति चेत्—प्रतियोगिनिरूपणार्थमभाव-सन्निकर्षार्थं च। तत्र प्रतियोगिनिरूपणं स्मरणलक्षणमनुपलभ्यमानेनापीति, न तदर्थमध्यक्षगोचरत्वमपेक्षणीयमन्यतरस्यापि; कुत उभयस्य। सन्निकर्षस्तु भूतलघटसंयोगाभावस्येन्द्रियेण साक्षान्नास्ति। येनास्ति, तेनापि यदीन्द्रियं न सन्निकृष्येत, कथमिव तं गमयेत्॥ न चोपलब्धोपलभ्यमानाभ्यामेवेन्द्रियं सन्निकृष्यते; इतरेतराश्रयप्रसङ्गात्॥

[24] तस्मात् सन्निकर्षे सति योग्यत्वात् भूतलमप्युपलभ्यते; न तु तस्योपलभ्यमानत्वमभावोपलब्धेरङ्गमिति युक्तमुत्पश्यामः॥ प्रकृते तु न प्रतियोगिनिरूपणार्थं तदुपयोगः

भयगत इति भूतलवदधिकरणत्वाविशेषात् घटस्यापि प्रत्यक्षविषयतयैव प्रकृतप्रतीतिकारणत्वापत्तिः। न चेष्टापत्तिः, घटसंयोगाभावप्रत्यक्षकाले घटप्रत्यक्षायोगात्। हस्तेन घटधारणावसर इव तदप्रत्यक्षावसरेऽपि भूतले घटाभावधियः प्रत्यक्षत्वस्येष्टत्वाच्च। अथ प्रतियोगिस्मरणं विनाऽभावप्रत्यक्षासम्भवात् घटसंयोगरूपप्रतियोगिस्मरणे घटस्योपयोग इति न तत्प्रत्यक्षमिति चेत्—भूतलस्याप्यन्यथैवोपयोगः। ननु कथमन्यथोपयोगः। भूतले घटो नास्तीत्यधिकरणतयैव तस्य ग्रहणात् प्रतियोगिस्मरणे उपयोगासम्भवादिति चेत्—अत्र भूतलानुयोगिकत्व-घटप्रतियोगिकत्व-विशिष्टसंयोगस्यैव निषिध्यमानतया विशिष्टप्रतियोगिज्ञापनार्थमस्योपयोगः। एवं भूतलस्य प्रतियोगिकोटिप्रवेशानङ्गीकारेऽपि स्वद्वारा अभावेऽक्षसन्निकर्षसंपत्त्यर्थं भूतलस्योपयोगः। एतावता कथं भूतलप्रत्यक्षं प्राङ्नापेक्षितमिति चेत्—उक्तोभयमध्ये प्रतियोगिनिरूपणं तावत् तत्स्मरणात्मकं तदानीमदृश्यमानेनापि सुकरमिति घटभूतलयोर्मध्ये एकतरप्रत्यक्षमपि तदा नापेक्षितमिति कुत उभयप्रत्यक्षापेक्षा। एकस्य प्रत्यक्षापेक्षायामन्यस्यापि सा प्रसज्येत। एवमस्याभावस्य भूतलादिनिष्ठस्य, शब्दध्वंसस्य श्रोत्रेणेव, चक्षुरिन्द्रियेण साक्षात् सन्निकर्षो नास्तीति येन भूतलेन सह साक्षाद्विशेषणतारूपसन्निकर्षस्तस्याभावस्यास्ति तेन भूतलेन साकमपीन्द्रियसन्निकर्षः संयोगाख्यो यदि न स्यात्—तर्हि संयुक्तविशेषणतया अभावेन कथमिन्द्रियमभावं गमयेदिति सन्निकर्षघटकतयाऽपि भूतलमुपयुज्यते। न च—अस्तु सन्निकर्षे उपयोगो भूतलस्य। तथाऽपि सन्निकर्ष एव प्रागुपलब्धेन वा संप्रत्युपलभ्यमानेन वा वस्तुना सह भवति; न त्वनुपलम्भेऽपीति तदर्थमेव भूतलस्य दृश्यत्वमपेक्षितमिति वाच्यम्—तर्ह्युपलम्भं प्रति सन्निकर्षस्येव सन्निकर्षं प्रत्युपलम्भस्याप्यपेक्षिततयाऽन्योन्याश्रयप्रसङ्गात्। अतो न भूतलप्रत्यक्षं प्रागपेक्षितम्।

[24) न च तर्हि घ्राणेन गन्धग्रहे यथा संयुक्तसमवायरूपसन्निकर्षघटकस्यापि द्रव्यस्य न विषयता; एवमिहाप्यभावप्रत्यक्षे भूतलस्याधारतया विषयत्वं न स्यात्। अतो विषयभावादाधारप्रत्यक्षमपेक्ष्यमिति वाच्यम्—योग्यत्वायोग्यत्वाभ्यां वैषम्यात्। तस्मात् सन्निकर्षे प्रथमतः

तस्य संयोगवत् आधारानिरूप्यत्वात्। नापि सन्निकर्षार्थम्; तदभावस्य साक्षादिन्द्रियसन्निकर्षादिति॥

[25] न चेदेवम्; कुत एषा प्रतीतिः, इदानीं श्रुतपूर्वः शब्दो नास्तीति? 'अनुमाना'दिति चेन्न शब्दस्यैव पक्षीकरणे १ हेतोरनाश्रयत्वात्। अनित्यत्वमात्रसाधनेऽभावस्य नियतकालत्वासिद्धेः। आकाशस्य पक्षत्वे तद्वृत्तयाऽनुपलभ्यमानत्वस्य हेतोरनैकान्तिकत्वात्। शब्दसद्भावकालेऽपि तस्य सत्त्वात्। एवं कालपक्षेऽपि दोषात्।

सति योग्यत्वात् भूतलमपि सह विषयीभवति। न पुनराधारोपलब्धिः प्रागभाविनी अभावोपलब्धिहेतुरिति युक्तमुत्पश्यामः। न चाभावस्याधारप्रत्यक्षाधीनप्रत्यक्षकत्वरूपतन्निरूप्यत्वाभावेऽपि प्रतियोगियोग्यत्व इवाधारायोग्यत्वेऽप्यभावोपलम्भो न भवतीतीदृशदृश्याधारकत्वमपेक्षितमेवेति वाच्यम्—गन्धादिभावात्मकधर्मग्रहणे घ्राणग्राह्याधारकत्वादेरिवाभावग्रहणेऽपीदृशदृश्याधारकत्वस्यानपेक्ष्यत्वात्। आधारापेक्षायाश्च भवन्त्या अन्यथोपयोगस्य वर्णितत्वात्। एवं च प्रकृते शब्दाभावप्रत्यक्षे गगनस्य किं प्रतियोगिनिरूपणार्थमुपयोगो मन्यते, सन्निकर्षघटकतया वा। नाद्यः; संयोगस्य ससम्बन्धिकस्य द्विष्ठस्य भूतलापेक्षायामपीह शब्दस्य तदभावात्। नान्त्यः; श्रोत्रसन्निकर्षस्य विशेषणताख्यस्य शब्दाभावे साक्षादेव सत्त्वेन घटकानपेक्षणात्। अत इह प्रकारान्तरेणाप्याधारनिरूप्यत्वाभावान्नाधारनिरूप्यत्वानियमोऽभावस्य॥

[25] यदि च प्रतियोगिमात्रनिरूपणीयोऽभाव इति नेष्यते; आधारनिरूप्यत्वस्वीकारेण शब्दध्वंसस्याप्रत्यक्षत्वमागृह्यते—तर्हि इदानीं श्रुतपूर्वो गकारो नास्तीत्येवं प्रतीतिरेषा कुतः प्रमाणादिति पृच्छामः। अनुमानादिति चेत्—तर्ह्यत्र शब्द आकाशः काल आत्मा अवच्छेदकदेशो वा कः पक्षः? नाद्यः; शब्द इदानीं ध्वस्तोऽनुपलभ्यमानत्वादित्यत्र हेतोरनुपलभ्यमानत्वस्य शब्दसत्तादशायामसिद्धिः। असत्तादशायां च पक्षस्याभावान्न तत्र हेतुसत्त्वम्। न च शब्दस्य धर्मिणः कदाचित्प्रसिद्धत्वात्तत्तत्कालावच्छिन्नोपलब्धिविषयत्वाभावः प्रकृतहेतुर्नासिद्ध इति वाच्यम्—हेतोरप्यभावरूपतया आधारनिरूप्यत्वस्यावश्यकत्वात्, असतश्चाधारस्याग्रहणेन तदग्रहणात्। तस्याप्यनुमानान्तरेण साधने चानवस्थेति। न च कृतकत्वमेव हेतुः; तस्य ध्वंसप्रतियोगित्वमात्रसाधकतया 'इदानीं नास्ती'ति ध्वंसस्य प्रकृतकालकत्वासिद्धेः॥ न द्वितीयः; आकाश इदानीं शब्दध्वंसवान् शब्दवत्तयाऽनुपलभ्यमानत्वादित्यत्राकाशस्यातीन्द्रियतया शब्दसत्ताकालेऽपि हेतुसत्त्वेन व्यभिचारात्। तथा शब्दनित्यत्वेऽप्येतद्धेतुसम्भवेनाप्रयोजकत्वात्॥ अत एव न तृतीयः।

---

१ प्र. 'शब्दसत्त्वकालेऽनुपलभ्यमानत्वं हेतुः स्वरूपासिद्धः। तदसत्त्वकाले तु हेतोः पक्षे वृत्तावपि ध्वंसवत्त्वरूपस्य साध्यस्य तत्रावृत्तेर्बाधितविषयत्वेनापक्षधर्मत्वा(पक्षताविशिष्टधर्म्यवृत्तित्वा)-दित्यर्थः। ननु ध्वंसप्रतियोगित्वे साध्ये न बाध इत्यत आह अनित्यत्वेति।'

[26] अहमिदानीं निःशब्दश्रोत्रवान् शब्दोपलब्धिरहितत्वात् बधिरवदिति चेत्-न-दृष्टान्तस्य साध्यविकलत्वात् , व्याहतत्वाच्च ; बधिरश्च श्रोत्रवांश्चेति व्याहतम्। तस्यापि च श्रवसो निश्शब्दत्वे प्रमाणं नास्ति ॥ अनुपभोग्यस्योत्पादवैयर्थ्यं प्रमाणमिति चेत्—न— आद्यादिशब्दवदुपपत्तेः ॥ तेषां शब्दान्तरारम्भं प्रत्युपयोगः ; अन्त्यस्य न तथेति चेत्—न—अन्त्यत्वासिद्धेः । सर्वेषां चोत्पादवतां प्रयोजनतदभावयोरस्मादृशैरनाकलनात् ; सुषुप्त्यवस्थायां श्वासप्रश्वासप्रयोजनवच्च तदुपपत्तेः । आरम्भे सति प्रयोजनमवश्यमिति व्याप्तेः । न त्वापाततः प्रयोजनानुपलम्भमात्रेणारम्भनिवृत्तिः ; तथा सति कर्णशष्कुल्यवच्छेदोत्पाद एव नभसस्तं प्रति निवर्तेत ; बधिरस्य तेनानुपयोगात् । विवादकाले बधिरकर्णः शब्दवान् योग्यदेश१स्थानावृतकर्णशष्कुलीसुषिरत्वात् तदितरकर्णशष्कुलीसुषिरवदिति ॥

[26] नन्वहमिदानीं निःशब्दश्रोत्रवान् शब्दोपलम्भशून्यत्वाद्बधिरवदित्यात्मपक्षकानुमानं तुरीयमस्त्विति चेन्न—दृष्टान्ते श्रोत्रवत्त्वरूपसाध्यवैकल्यात्; बधिरपदस्य श्रोत्रहीन इत्यर्थकतया श्रोत्रवान् श्रोत्रहीन इति मिथो विरुद्धवचनेन व्याघाताच्च । ननु बधिरपदं न श्रोत्रहीनार्थकम् । कर्णशष्कुल्यवच्छिन्नाकाशश्च श्रोत्रम् । तत्तस्याप्यस्ति विभुत्वादिति नैतौ दोषाविति चेत्—तथाऽपि तस्य निःशब्दत्वे प्रमाणाभावात् निश्शब्दश्रोत्रवत्त्वरूपसाध्यवैकल्यमेव । ननु शब्दो न बधिरश्रोत्रवृत्तिः तदभोग्यत्वादिति प्रमाणमस्ति । न चाप्रयोजकत्वम् ; अनुपभोग्यस्योत्पादवैयर्थ्यादिति चेन्न—नह्यनुपभोग्यत्वेऽनुत्पत्तिः ; शब्दसन्ताने प्रथमशब्दादेः स्वदेशेऽनुत्पत्तिप्रसङ्गात् । वीचीतरङ्गन्यायजातस्यैव भोग्यत्वात् । ननु तत्र भोग्यशब्दान्तरोत्पादनेन तत्सार्थक्यम् । बधिरश्रोत्रे तूच्यमानः शब्दोऽन्त्य इति नास्य तथा सार्थतेति चेन्न–अन्त्यत्वासिद्धेः । शब्दो हि वीचीतरङ्गन्यायेन भवन् मध्यवर्तिबधिरश्रोत्रं व्याप्य तदुपर्यपि शब्दं जनयितुमलमिति । किञ्च बधिराऽनुपभोग्यत्वमात्रेण वैयर्थ्यमपि दुर्वचम्, नह्युत्पद्यमानेषु सर्वेषु अस्येदं प्रयोजनमस्ति, अस्येदं नेति विशिष्य ज्ञानमस्माकमल्पदृशां भवितुमर्हति । सुषुप्तौ भवतोः श्वासप्रश्वासयोः प्रयोजनस्येवाज्ञायमानस्य प्रयोजनस्येहापि सम्भवात । यत् उत्पन्नं, तत् साक्षात् प्रणाल्या वा सप्रयोजनमित्येव व्याप्तिः । न पुनरविवेचनदशायामनुपलभ्यमानप्रयोजनत्वादनुत्पद्यमानत्वासिद्धिः । तथा सति बधिरकर्णशष्कुल्यवच्छिन्नत्वमपि नभसो न स्यात् । तेन नभोंगवेनावच्छेदेन बधिरस्य का-

१ देशस्यानावृत इति क. ख. पाठः । बो. 'यदा शब्दसन्तानः श्रूयते, योग्ये च देशे अनावृतकर्णविवरो बधिरस्तिष्ठति तदा तत्कर्णो न शब्दवानिति परेणोच्यते तस्मिन् विवादकाल इत्यर्थः।' इति । योग्यदेशस्येति पाठे योग्यदेशकस्य बधिरस्येत्यर्थः ।

[27] निःशब्दाः पणववीणावेणवः १ तदेकज्ञानसंसर्गयोग्यत्वे सति तदनुपलम्भेऽप्युपलभ्यमानत्वात् । यत् यदेकज्ञानसंसर्ग २ योग्यं(य) तस्यानुपलम्भेऽप्युपलभ्यते तत् तदभाववत्, यथाऽघटं भूतलमिति चेत्—न—एकज्ञानसंसर्गयोग्यत्वाभावात्; शब्दस्य श्रौत्रत्वात, वीणादीनां चाक्षुषत्वात् ॥ अभिमानमात्रादिति चेन्न, तथाऽपि शब्दप्रध्वंसस्यातद्देशत्वात्; अत्यन्ताभावस्य च कालनियमात् ॥

[28] स्यादेतत्—शब्दवदाकाशोपाधयो हि भेर्यादयः। तेन तेषु विधीयमानः शब्दः

र्याभावात् । अतो बधिरश्रोत्रस्य निःशब्दत्वे न प्रमाणम् । प्रत्युत सशब्दत्वे प्रमाणम्—विवादकालावच्छिन्नबधिरकर्णः शब्दवान् शब्दोत्पत्तियोग्यप्रदेशस्थितनिरावरणकर्णशष्कुलीरन्ध्रत्वात् अबधिरकर्णवदिति । न खलु तदा तत्कर्णः कार्पासादिना पिहितः । अश्रवणं पुनरिन्द्रियस्य दुष्टत्वात् । न खल्वबधिरमण्डलमध्यगस्य बाधिरस्य परं कर्णे शब्दो नोद्भवतीति युक्तिसहम् । अतः श्रोत्रसत्त्वेऽसत्त्वे च साध्यवैकल्यमक्षतमिति ।

[27] अथ पणवादयोऽवच्छेदकदेशाः निःशब्दाः, शब्देन सहैकज्ञानविषयत्वार्हत्वे सति शब्दानुपलम्भेऽप्युपलभ्यमानत्वात् । यत् येन सहैकज्ञानविषयत्वार्हं सत् तस्यानुपलम्भेऽप्युपलभ्यते, तत् तदभाववत्; यथा घटेन सहोपलब्धुमर्हं भूतलं घटानुपलम्भे सत्युपलम्भात् घटाभाववत् तथेति । अत्रोपलभ्यमानत्वमात्रस्य हेतुत्वे सशब्दतादशायां व्यभिचारः । सत्यन्तानुक्तौ सामान्यमुखव्याप्तिभङ्गः; सगन्धपुष्प-सादृष्टपुरुषादेर्गन्धादृष्टाद्यनुपलम्भेऽप्युपलभ्यमानत्वात् । तदेवं शब्दध्वंसानुमानमित्यस्तु पञ्चमः पक्ष इति चेत्—न–शब्दस्य श्रोत्रग्राह्यतया पणवादेश्च चाक्षुषतया सत्यन्तविरहेण हेत्वसिद्धेः । ननु वीणा वाद्यते, वेणुः पूर्यत इत्येवमनुभवात् सुरभि चन्दनमित्यादिवदेकज्ञाने उपनीतभानमात्रेण पणवादेः शब्दस्य चैकज्ञानीयलौकिकविषयताशालित्वाभिमानो लोकानाम् । अतस्तन्मात्रदृष्ट्या हेतूपपादनमिति चेत्—एवमपि साध्यं निःशब्दत्वं किं शब्दध्वंस उतात्यन्ताभावः? आद्ये बाधः, तस्य गगनगतस्य पणवाद्यधिकरणकत्वाभावात् । अन्त्ये सर्वदैव तदस्तितायाः सिद्धत्वात् कालविशेषे तत्साधनमयुक्तमशक्यं च ।

[28] ननु शब्दवतो गगनस्य भेर्यादय उपाधिभूताः, तदवच्छेदेन तत्र तदुत्पत्तेः । अतो

---

१ तदेकज्ञानसंसर्गयोग्यत्वस्य इति क. ख. पाठः स चाशुद्धः । श्रो. 'धर्माद्यनुपलम्भेऽप्युपलभ्यमानेनात्मना व्यभिचारो मा भूदिति उक्तं तदेकज्ञानसंसर्गयोग्यत्वे सती'ति ।

२ योग्यस्यानुपलम्भे इति क. ख. पाठः । तस्यानन्वितत्वात् उक्तहेत्वनुरोधेनेदमुपरि शोधितम् ।

आकाश एव विहितो भवति ; प्रतिषिध्यमानश्च तत्रैव प्रतिषिद्धो भवति , शरीरे सुखादिवत् इति चेत् न— तत्र सोपाध्यावात्मनि प्रत्यक्षसिद्धे सुखादिनिषेधस्यापि प्रत्यक्षसिद्धत्वात् । न चैवमिहापि ; तदुपाहितस्य नभसोऽप्रत्यक्षत्वात् ॥ उपाधयस्तावत् प्रत्यक्षा इति चेन्न—तैरभावानिरूपणात् । निरूपणे वा प्रत्यक्षेणापि ग्रहणप्रसङ्गात् । न चैवं सति पारमार्थिकाधिकरणनिरूपणीयत्वमभावस्य । न च तेऽपि प्रत्यक्षसिद्धाः १ सर्वत्र ; शब्दकारणव्यवधानेऽप्युपलब्धस्य शब्दस्य नास्तिताप्रतीतेः । आनुमानिकैस्तैस्तथा व्यवहार इति चेन्न—हेतोस्तद्वत्तयानुपलभ्यमानत्वस्यानैकान्तिकत्वात् ; अभावप्रतीतिकाले सन्दिग्धाश्रयत्वाच्च । उपलभ्यमानविशेष्यत्वपक्षे चासिद्धेः; इन्द्रियव्यवधानात् , शब्दालिङ्गस्य चानुपलम्भात् ॥

भेर्यादिषु शब्दास्तित्वोक्तौ गगन एव तत्सत्त्वं सिद्ध्यति । तेषु नास्तीत्युक्तावाकाशे नास्तीति सिद्ध्यति—यथा शरीरे सुखादिकं विहितं निषिद्धं च चेत्, आत्मनि तथा कृतं भवति तद्वत् । अत आकाशे तत्सिद्ध्यर्थमेव तेषु तत्साधनमिति न सिद्धसाधनमिति चेत्–न । किमत्र भेर्याद्यवच्छिन्नमाकाशं पक्षीकृत्य तत्र ध्वंसः साध्यते , भेर्यादिमात्रं वा । नाद्यः ; शरीररूपोपाध्यवच्छिन्नस्यात्मनो मनसा ग्राह्यस्येव, आकाशस्य प्रत्यक्षत्वाभावेनोपलभ्यमानत्वरूपहेतोरसिद्धेः । अथोपाधयः प्रत्यक्षा एवेति तन्मात्रपक्षकत्वपक्षोऽस्त्विति चेन्न—उपाधिभिरभावस्यानिरूप्यमाणत्वात् । प्रतियोगिनिरूप्यतामिवाधारनिरूप्यतामभावस्य स्वीकुर्वतस्तव मतेऽप्याकाशेनैव तस्य निरूप्यत्वात् । आकाशस्य स्वरूपसम्बन्धेनाधारत्वेऽपि तेषामप्यवच्छेदकत्वेनाधारत्वं स्वीकृत्य तन्निरूप्यमाणत्वेऽभिमते तु दृश्याधारकत्वविशिष्टदृश्यप्रतियोगिकत्वरूपत्वदिष्टयोग्यतासत्त्वेन ध्वंसस्य प्रत्यक्षत्वप्रसङ्गादनुमानानवकाशात् । किञ्चैतन्निरूप्यत्वाङ्गीकारे स्वरूपसम्बन्धेनाधारतया यत् मुख्यभूतमधिकरणं तन्निरूप्यत्वं त्वदिष्टं न सिद्ध्यति ॥ अपि च भेर्यादीनां कुड्यादिना व्यवधानेऽपि इदानीं श्रुतपूर्वः शब्दो नास्तीति प्रतीतिभावात्, शब्दप्रत्यक्षस्थले सर्वत्र भेर्यादिप्रत्यक्षनियमस्याभावात् तादृशपक्षे हेत्वसिद्ध्या न निरुक्तपणवादिपक्षकानुमानसम्भवः ॥ ननु पूर्वं शब्दश्रवणबलादुपाधयोऽनुमिताः । ततस्तैरानुमानिकैः, पणवादयो निःशब्दास्तद्वत्तयानुपलभ्यमानत्वादित्यनुमानेन व्यवहारनिर्वाह इति चेन्न—शब्दसत्ताकालेऽपि व्यवहितेषु तेषु हेतुसत्त्वेन व्यभिचारात् । किं च तेषां पक्षीभूतानामदृश्यमानानां नाशस्यापि सम्भाविततया शब्दाभावप्रतीतिकाले सद्भावसन्देहात् तत्र तदनुमानं न सम्भवति । उपलभ्यमानत्वविशिष्टभेर्यादिपक्षत्वपक्षेऽपि विशिष्टाश्रयासिद्धिरेव ; उपलभ्यमानत्वस्य हेतुदलत्वे च स्वरूपासिद्धिः , तेषामिन्द्रियव्यवहितत्वात् । न

---

१ प्रत्यक्षसिद्धाः । सर्वत्र शब्दकारण इत्येवं वाक्यच्छेदः ख. पु०

[29] अपि च नष्टाश्रयाणां द्रव्यगुणकर्मणां नाशोपलम्भः कथम्? न कथञ्चिदिति चेत्—आश्रयनाशात्कार्यनाश इति कुत एतत्? अनुमानतस्तथोपलम्भादिति चेत्-न—तुल्यन्यायेनोक्तोत्तरत्वात्॥ तन्तुषु नष्टेष्वपि यदि पटो, न नश्येत्, तद्वदेवोपलभ्येतेति चेत्—एतस्य तर्कस्यानुग्राह्यमभिधीयताम्॥

[30] यदत्रोपलभ्यते न तत् कार्यपरम्परावत्, योग्यस्य तथानुपलभ्यमानत्वे सति उपलभ्यमानत्वादिति चेत्—न—तन्त्ववयवानां पटानाधारत्वे साध्ये सिद्धसाधनात्। पटप्रध्वंसवत्त्वे साध्ये बाधितत्वात् तस्य स्वप्रतियोगिकारणमात्रदेशत्वात्॥

[31] ये पटध्वंसवन्तस्तन्तवः, तदभाववन्त एते अंशवः इति साध्यमिति चेन्न—तन्तुनाशोत्तरकालं पटनाशात्तद्वत्तानुपपत्तेः॥ योग्यतामात्रसाधने च पटप्रध्वंसासिद्धेः; तस्य नाशान्नाशयोः समानत्वात्॥

चेदानीं तेषां शब्देनानुमानम्; शब्दस्य सांप्रतमनुपलम्भात्। ननु वीणादेः सन्दिग्धत्वेऽपि वीणादितो वीचीतरङ्गन्यायेन श्रोत्रदेशं यावदुत्पन्नानां शब्दानां येऽवच्छेदकदेशास्तेषूपलभ्यमानेषु निःशब्दत्वं साध्यते; एवं स्थूले वीणादिदेशेऽपीति चेत्—एवं किञ्चिद्दूरस्य देशनिरूप्यत्वोक्तौ प्रत्यक्षत्वमेवाऽऽपद्यते; मुख्याधारनिरूप्यत्वं च न सिद्ध्यतीति॥]

[29] अपि च स्वप्रतियोगिसमवायिदेशरूपमुख्याधारनिरूपितस्यैवाभावस्य प्रत्यक्षीकारे आश्रयनाशजन्यानां पटादिद्रव्यगुणकर्मनाशानां प्रत्यक्षमेव न स्यात्। ननु न तेषां प्रत्यक्षमिति चेत् तर्ह्याश्रयनाशात् कार्यनाश इत्येतद्वचनं किंप्रमाणकम्? अनुमानतो नष्टत्वेन ग्रहणात्तद्वचनमिति चेन्न-शब्दध्वंसानुमानोक्तन्यायेन नाशप्रतियोगिनस्तदाश्रयस्य वा पक्षत्वे आश्रयासिद्धेः; कालपक्षेऽपि तथैवानैकान्तिकत्वात्॥ नन्ववश्यं पटनाशः स्वीकार्यः; अन्यथा तन्तुनाशेऽपि तदाश्रितपटानाशे पूर्ववदेव पटोपलम्भप्रसङ्गादिति चेत् सत्यम्। एष खल्वनुकूलतर्कः। तर्कश्च प्रमाणानुग्राहको न तु स्वतन्त्रः। अत एतदनुग्राह्यं प्रमाणमुच्यताम्।

[30] ननूपलभ्यमानानां तन्त्ववयवानामंशूनां पक्षत्वं स्वीकृत्य, 'इदमुपलभ्यमानं न स्वकार्यतन्तु-तत्कार्यपटतत्कार्यगुणकर्मयुक्तं, तत्सत्त्वादशायां तद्वत्त्वेनोपलब्धुं योग्यस्य स्वस्य तद्वत्त्वेनानुपलभ्यमानत्वे सत्युपलभ्यमानत्वात्' इत्यनुमानमुच्यत इति चेन्न—अत्र पटात्यन्ताभावसाधने सिद्धसाधनात्। पटध्वंससाधने च तस्य तन्तुगततयांशुषु बाधात्।

[31] ननु पटध्वंसवत्तन्त्वभाववत्त्वं साध्यमिति चेन्न—आश्रयनाशजन्यपटनाशस्यैव प्रकृतत्वात् नष्टे तन्तौ पटध्वंसरूपसाध्यैकदेशवत्त्वाप्रसिद्धेः। पटध्वंसाधिकरणत्वार्हतन्तुप्रतियोगिकाभाववत्त्वस्य साध्यत्वे च पटे सत्यपि तद्ध्वंसाधारत्वयोग्यतामात्रसत्त्वान्न ध्वंसस्येदानींतनत्वसिद्धिः॥

[32] अनन्यगतिकतया विशिष्टनिषेधे कृते विशेषणानामप्यभावः प्रतीतो भवति; गुणक्रियावत्पटाधारास्तन्तवो न सन्ति स्वावयवेष्विति हि प्रत्यय इति चेत्—तथाऽपि गुणकर्मणां पटस्य च प्रध्वंसः किमधिकरणः प्रतीयत इति वक्तव्यम् ॥ अंश्वधिकरण एवेति चेत्—भ्रान्तिस्तर्हीयम् ; तस्यातद्देशत्वात् ॥ आश्रयावच्छेदकतया तेषामप्यदूरविप्रकर्षेण तद्देशत्वम् एवंभूतेनापि देशेन तन्निरूपणम् ; योग्यताया अव्यभिचारादिति चेत्—न तर्हि प्रतियोगिसमवायिदेशेनैव प्रध्वंसनिरूपणमिति नियमः ; प्रकारान्तरेणापि निरूपणात् ॥

[33] तस्मात् यस्य यावती ग्रहणसामग्री, तं विहाय तस्यां सत्यां तदभावो यत्र कचिन्निरूप्यो देशे काले वा । इयांस्तु विशेषः—सा सती चेत्, प्रत्यक्षेण । असत्येव ज्ञाता चेत्, १ अनुमानादिनेति स्थितिः ॥

---

[32] ननु गुणक्रियाविशिष्टपटविशिष्टतन्त्वभावस्तदवयवेष्वंशुषु साध्यते । गत्यन्तराभावादेवं विशिष्टाभावे कथिते विशिष्टाभावस्य विशेष्याभावविशेषणाभावोभयात्मकतया पटाभावोऽपि सेत्स्यतीति चेत्—एवमपि पटध्वंसस्तद्गुणक्रियाध्वंसश्च किन्निष्ठः ? विशिष्टाभावस्थले तदाधार एव विशेषणाभाववर्णनादत्रापि पटध्वंसोंऽश्वधिकरणक इति चेत्—तर्ह्यनुमितिर्भ्रमात्मिका स्यात् । तस्य ध्वंसस्य वस्तुतस्तदधिकरणकत्वाभावात् । ननु ध्वंसाश्रयतन्त्ववच्छेदकतयांशूनामपि ध्वंसाधारत्वम् , अवयवावयविभावापन्नपदार्थवहिर्भावाभावात् । एवंभूतदेशस्यापि निरूपकत्वं स्वीक्रियते , अनुभवबलेनाभावाधिकरणतार्हताया अनपायादिति चेत्— तर्ह्याकाशस्यातीन्द्रियतया शब्दध्वंसो न ग्राह्य इत्येतत् साधनार्थं स्वीकृतस्य स्वप्रतियोगिसमवायिदेशेनैव ध्वंसनिरूपणमिति नियमस्यासिद्धिः ; अमुख्याधारेणापि तन्निरूपणात् ॥

[33] तस्मात्स्वप्रतियोगिसमवायिदेशस्य दृश्यत्वमप्रयोजकम् । ध्वंसस्तावत् स्वरूपसम्बन्धेन स्वप्रतियोगिसमवायिनि, दैशिकविशेषणतासम्बन्धेन स्थूलदेशे कालिकसम्बन्धेन काले च वर्तते । तत्र ध्वंसग्राहकसामग्र्यांसत्यां स तत्र यत्र क्वापि निरूप्यते । सामग्री च यस्य भावपदार्थस्य ग्रहणे या सामग्री विषयभूतवस्तु-तद्ग्राहकेन्द्रिय-तत्सहकार्यालोकादिरूपा क्लृप्ता , सैव तद्भावपदार्थवर्जं तदभावग्रहणेऽपि भवति । प्रतियोग्यनुपलब्धिविशिष्टा प्रतियोगिग्राहकसामग्री अभावग्राहिकेति यावत् । एवं च तस्यां सामग्र्यां सत्यामभावस्य देशे काले वा कुत्रापि निरूपणं भवति ; न तु स्वप्रतियोगिसमवायिदेश एव । एवं च निरुक्तपटध्वंसाद्यनुमित्यभ्रमत्वाय स्वप्रतियोगिसमवायिदेशभिन्नस्यापि तदाधारत्वस्वीकारे तादृशदृश्याधारमादाय तत्प्रत्यक्षत्वस्यापि सम्भवात्तुल्यन्यायेन

---

१ प्र. 'आदिग्रहणात् आप्तोपदेशेनापीत्यर्थः'

[34] एतेन 'सङ्ख्यामभावो निरूप्यते' इत्यादिशास्त्र [1]विरोधः परिहृतो वेदितव्यः; उभयनिरूपणीयप्रतियोगिविषयत्वात् अनुमानविषयत्वाच्च। अन्यथा आश्रयासिद्धिप्रसङ्गात्। तत्रापि न ग्रहणे नियमः, ज्ञानमात्रं तु विवक्षितम्; तावन्मात्रस्यैव तदुपयोगात्। क्वचित् ग्रहणस्य सामग्रीसम्पातायातत्वात्॥

शब्दध्वंसस्याप्याकाशातिरिक्तदेशनिरूप्यतया प्रत्यक्षत्वमवर्जनीयम्। एवं च स्वप्रतियोगिसमवायिनिरूप्यत्वाभावात्, प्रत्यक्षस्य वर्तमानमात्रग्राहितयाऽभावप्रत्यक्षे तादात्विककालभानस्य तथा 'अत्र'मिति यत्किञ्चिद्देशभानस्य चावर्जनीयत्वात्तदधीननिरूपणकत्वस्वीकारस्य व्यर्थत्वात्, अभावग्रहणात्पूर्वमाधारग्रहणं प्रतियोगिग्रहणवन्नापेक्षितमित्युक्तचरत्वाच्च प्रतियोगिमात्रनिरूप्य एवाभावः। तथा च प्रतियोगिन ऐन्द्रियिकत्वेऽभावस्यैन्द्रियिकत्वमिति सिद्धम्। तत्र त्वयं विशेषः—यदि भावग्राहकसामग्री संप्रति वर्तमाना तदा प्रत्यक्षेणाभावो निरूप्यः। यदा त्वविद्यमाना प्राक् स्थितत्वेन ज्ञायते—यथा 'प्रातश्चत्वरे किं गजः स्थित' इति सायं केनचित् पृष्टः कश्चिन्मन्यते, 'नूनं न स्थितो गजः, मदीयचक्षुरालोकसंयोगादिसामग्र्यां स्थितायामपि तस्य प्रातस्तत्रानुपलब्धत्वा'दिति। तत्र हि चक्षुःसंयोगादिसामग्री प्रातःकालिकी अभावग्राहिका। सा च सामग्र्यसत्येवेति—तदाऽभावोऽनुमानेन निरूप्यः। मीमांसकस्य तु सत्यामपि प्रतियोगिग्राहकसामग्र्यां वर्तमाना प्रतियोग्यनुपलब्धिरनुपपद्यमाना अभावमाक्षिपतीतित्यर्थापत्त्यापि स निरूप्यः स्यात्। एवमाप्तोपदेशेनापि स निरूप्यः, यथा तत्र गजो नासीदित्युक्त्या। परं तु तत्र शब्दादेवार्थप्रत्ययात् प्रतियोगिग्राहकसामग्री असती ज्ञाता तत्रोपयुज्यत इति नास्ति। तत् सिद्धं शब्दध्वंसः प्रत्यक्ष इति॥

[34] एवमधस्तात्क्वचिदाधारस्यान्यथोपयोगस्योक्तत्वेन, अनुमानग्राह्यत्वस्येदानीं कथितत्वेन च 'सङ्ख्यामभावो निरूप्यत' इति प्रतियोग्यधिकरणोभयज्ञप्त्यधीनज्ञप्तिकत्वमभावे बोधयता शास्त्रेणास्मदुक्तार्थविरोधः परिहृतो वेदितव्यः। सर्वस्याप्यभावस्य यत्र क्वचिद्देशे काले वा निरूप्यत्वेऽपि तादृशाधारज्ञानस्य प्रतियोगिज्ञानवत् पूर्वापेक्षितत्वाभावात् प्रकृतवाक्ये प्रतियोगितुल्यतया प्रागाधारस्य ज्ञेयत्वं स्वरससिद्धं न सङ्गच्छत इति हि शास्त्रविरोधः शङ्कनीयः। स न भवति; भूतले घटो नास्तीत्यादौ प्रतियोगिभूतस्य संयोगादेरुभयनिष्ठतयोभयज्ञानाधीनमेव ज्ञानमिति तादृशप्रतियोगिविषयकत्वात्तद्वाक्यस्य। ननु तर्हि प्रतियोगिग्रहण एव तदुपयोगात्राभावपदस्वारस्यमिति चेत्—तर्हि निरूप्यत इत्यत्र विवक्षितमभावज्ञानमनुमानरूपमस्तु। तत्र ह्यभावस्य साध्यत्वे

---

१ मकरन्दे, 'यद्यपि निरधिकरणाभावप्रतीत्यनभ्युपगमे विरोधशङ्कैव नास्ति, तथाऽप्यधिकरणपदस्य प्रतियोगिसमवायिपरत्वेऽपि न विरोधः, विशेषविषयत्वादित्याशयः'।

[35] यदि चाधिकरणग्रहे शास्त्रस्य निर्भरः स्यात्, 'वह्नेर्दाह्यं विनाश्यानुविनाशवत्तद्विनाशः' इति नोदाहरेत् ; असिद्धत्वात् । न हि वह्निविनाशस्तदवयवपरम्परास्वक्ष [1]निरूप्यः तासामनिरूपणात् । नाप्यन्यत्र गमनाभावादिना पारिशेष्यादनुमेयः ; हेतोरेव निरूपयितुमशक्यत्वात् ; आश्रयानुपलब्धेः । नापि निमित्तविनाशात् सर्वमिदमेकवारेण सेत्स्यतीति युक्तम् ; तस्यानैकान्तिकत्वात् ॥ तेजसा विशेषितत्वादयमदोष इति चेन्न—व्याप्त्यसिद्धेः । न हीन्धनविनाशात् तेजोद्रव्यमवश्यं विनश्यतीति क्वचित्सिद्धम् ; [2] प्रत्यक्षवृत्तेरनभ्युपगमात् ॥

आश्रयः पक्षो नियमेन प्राक् ग्राह्यः ; अन्यथाऽऽश्रयासिद्धेः । न च प्रतियोग्यनुयोग्युपरागेण विना नञोऽप्रयोगात् अस्य वाक्यस्य शब्दरूपाभावप्रमाणविषयकत्वमपि सुवचमिति वाच्यम्—अभाववाचिनञ्पदप्रयोगे तथा नियमेऽपि घटो ध्वस्त इत्येवं शब्दान्तरेणाभावबोधनं उभयनिरूप्यत्वाभावात् अभावबोधकशब्दसामान्यविवक्षणायोगात् । अनुमानं तु सर्वदा दृश्यादृश्यसर्वविधाभावानुमानेऽप्याश्रयसापेक्षम् ; अन्यथाश्रयासिद्धेः । अतोऽनुमानविषयमिदं शास्त्रवाक्यम् । एवं द्विष्ठप्रतियोगिविषयतयाऽनुमानविषयतया च शास्त्रसमर्थनेऽपि तत्रापि भवदिष्टदृश्याधारकत्वसमर्थनं नैव भवति । प्रतियोगिज्ञानायाश्रयासिद्धिपरिहाराय चाधारज्ञानस्य सामान्यरूपेणैव शास्त्रे विवक्षितत्वात् ; दर्शनरूपज्ञाननियमाभावात् । भूतले घटो नास्तीत्यत्राधारदर्शनं तु अभावग्राहकसामग्र्या सहाधारग्राहकसामग्र्याः सद्भावात् । न तावता तस्य पूर्वं ग्रहणमपेक्षितमित्यप्युक्तम् ।

[35] नन्वयं विरोधपरिहारप्रकारः क्लिष्ट इति चेत्—अन्यथा सूत्रविरोधः । सर्वस्याप्यभावस्याधिकरणग्रहाधीनग्रहविषयत्वे, 'तदनित्यत्वमग्नेर्दाह्यं विनाश्यानुविनाशवत्' (न्या ४. १-२७) इति सूत्रकारो वह्निविनाशं न दृष्टान्तयेत् । अत्र हि जगति सर्वमनित्यमिति वादी, 'सर्वगतमनित्यत्वं नित्यमनित्यं वा । नित्यत्वे न सर्वानित्यत्वम् ; अनित्यत्वे तस्यानित्यत्वस्य नाशे नित्यसर्ववस्तुसिद्धिः' रिति स्वं प्रति क्रियमाणमाक्षेपं परिहर्तुं, 'यथा—वह्निः काष्ठं विनाश्य स्वयमपि विनश्यति । न च तत्र पुनः काष्ठोन्मेषः—तथा सर्वनित्यत्वं सर्वमनित्यं विधाय स्वयमप्यनित्यं भवती'त्याह । अत्र वह्निविनाशो दृष्टान्तः । वादिप्रतिवादिभ्यां दृष्ट एव धर्मी दृष्टान्तो भवति । स च न त्वन्मते ; असिद्धत्वात् । न हि वह्निविनाशस्य ग्रहणमाधारनिरूप्यत्वाङ्गीकारे

---

१ परम्परास्वनिरूप्यः इति सर्वत्र पाठः । परम्परासु अनिरूप्यः इति छेदोऽसङ्गतः, परम्परात्मकं यत् स्वं तन्निरूप्य इति च क्लिष्टम् । उपरि अनुमेयत्वाशङ्कनात् अत्र अक्षनिरूप्य इति युक्तम्, अक्षेण इन्द्रियेण निरूप्य इति । परम्परास्वस्तु निरूप्यः इति वाऽस्तु ।

२ प्रत्यक्षप्रवृत्तेरिति पा० । बो. 'प्रत्यक्षप्रवृत्त्यनभ्युपगमात्' ।

[36] तस्माद् यस्यागेनान्यत्र गमनं न सम्भाव्यते, तेन निमित्तादिनापि देशेन प्रध्वंसो निरूप्यते इत्यकामेनापि स्वीकरणीयम्; गत्यन्तराभावात्। अत एव तमसः प्रत्यक्षत्वेऽप्यभावत्वमामनन्त्याचार्याः॥ एतेन शब्दप्रागभावो व्याख्यातः॥

[37] एवं १ व्यवस्थितं अनुमानमप्युच्यते-शब्दोऽनित्यः २ उत्पत्तिधर्मकत्वात् घटवत्।

घटेत। वह्निध्वंसस्य वह्न्यवयवपरम्परासु खल्वक्षेण निरूपणं कार्यम्। तासामेवादर्शनाच्च तन्न भवति। न च--वह्निर्नष्टः सत्ताकालिकानुपलम्भप्रयोजकरहितत्वे सत्यनुपलभ्यमानत्वादित्यनुमेयो नाशः। वह्निसत्त्वेऽपि तदनुपलम्भप्रयोजकं चान्यत्र गमनतिरोधानादि। न च तद्वह्निरस्तीति हेतुसत्त्वं-इति वाच्यम्-शब्दपक्षकध्वंसानुमानोक्तन्यायेन हेतुभूताभावस्यैव निरूपणासम्भवात्। तस्याधारनिरूप्यत्वात्। आश्रयस्य चानुपलब्धेः॥ नापि-वह्निरन्यत्र गतो विनष्टश्च विनष्टनिमित्तकत्वादिति सर्वानुमान—मिति वाच्यम्—विनष्टदण्डादिनिमित्तकस्यापि घटादेर्नष्टत्वाद्यभावेन व्यभिचारात्॥ तेजस्त्वे सतीति विशेषणाद्धेतुर्निर्दुष्ट इति चेन्न—क्वचिदपीन्धनविनाशात्तेजोविनाशस्याधारनिरूप्यत्वाभावेन प्रत्यक्षस्य भवताऽनभ्युपगमेन व्याप्तेरग्रहणात्।

[36] अतो वह्निविनाशे दृष्टत्वस्य प्रकारान्तरेण निरूपणायोगात्, यादृशभूतलादिकं त्यक्त्वा वह्न्यादेरन्यत्र गमनप्रसक्तिर्नास्ति, तादृशभूतलादिनाऽपि तन्निरूपणम्, न तु प्रतियोगिसमवायिदेशेनैवेत्यगत्या स्वीकार्यम्। तदपि भूतलादिकं न पूर्वमवश्यं ग्राह्यम्। एवमधिकरणग्रहस्याभावग्रहात्पूर्वमनपेक्षितत्वादेव तमसस्सत्यपि प्रत्यक्षत्वेऽनुभवसिद्धेऽभावत्वमाचार्या आमनन्ति। तथा च सूत्रं, 'द्रव्यगुणकर्मनिष्पत्तिवैधर्म्याद्भा * ऽभावस्तमः' (वै. ५. २-१७)इति। नहि प्रभाऽभावरूपान्धकारग्रहणे कस्यचिदधिकरणस्य ग्रहणमास्ति; नतरां च प्रभावयवपरम्परायाः। तस्मात्सर्वत्राभावप्रत्यक्षे आधारनिरूप्यत्वाभावात् पूर्वोक्तविषयमेव 'सङ्ख्या'मित्यादिशास्त्रमिति॥ तथा चाकाशस्यातीन्द्रियत्वेऽपि शब्दध्वंसोऽध्यक्ष्यत एव। एवं ध्वंसप्रत्यक्षोपपादनेन, 'उत्तरक्षणभावी शब्द इदानीं नास्ती'त्येवं शब्दप्रागभावोऽपि प्रत्यक्षतयोपपादित इति। अतो ध्वंसप्रागभावयोः प्रत्यक्षेण ग्रहणान्न वर्णाः नित्या इति॥

[37] एवमनन्यथासिद्धप्रत्यक्षेण वर्णानित्यत्वे व्यवस्थितेऽनुमानमप्युच्यते—शब्दोऽनित्यः भावत्वे सत्युत्पत्तिमत्त्वात् घटवदिति। न चाद्य श्रुते गकारे 'सोऽयं गकार' इति पूर्वश्रुतगकारैक्य-

---

१ एवं स्थिते इति क. ख. पाठः। बो. 'एवं—अनित्यत्वं प्रत्यक्षसिद्धमिति व्यवस्थिते'। प्र. एवमिति, प्रत्यक्षेणानित्यत्वे साधिते इत्यर्थः।

२ उत्पत्तिमत्वात् इति क.२. पाठः। प्र. उत्पत्तिमत्त्वाद्, स्वसमानकालीनप्रतियोगिध्वंसानाधारक्षणाधारत्वादित्यर्थः। भावत्वेन विशेषणात् न ध्वंसे व्यभिचारः इति-।

* सूत्रपाठो भाऽभावः इति, न त्वभाव इत्यस्मदीये वैशेषिकविमर्शे द्रष्टव्यम्।

न चेदं प्रत्यभिज्ञानबाधितम् ; तस्य ज्वालादिप्रत्यभिज्ञानेनाविशेषात् ॥

[38] नैवम् ; अबाधितस्य तस्य स्वतःप्रमाणत्वादिति चेत्-तुल्यम् ॥ 'ज्वालायां तन्नास्ति ; विरुद्धधर्माध्यासेन १ बाधितत्वात् । अन्यथा भेदव्यवहारविलोपप्रसङ्गः । निमित्ताभावात् । आकस्मिकत्वे वाऽतिप्रसङ्ग' इति चेत्—तुल्यम्, २ शब्देऽपि तीव्रतीव्रतरत्वमन्दमन्दतरत्वादेर्भावात् ॥

[39] तदिह न स्वाभाविकमिति चेन्न—स्वाभाविकत्वावधारणन्यायस्य तत्र तत्र सिद्धस्यात्रापि तुल्यत्वात् । न ह्यपां शैत्यद्रवत्वे स्वाभाविके, तेजसो वा औष्ण्यभास्वरत्वे इत्यत्रान्यत्प्रमाणमस्ति प्रत्यक्षाद्विना ॥ 'तत्तथैव युज्यते ; अन्यस्योपाधेरनुपलम्भात्, नियमेन तद्गतत्वेन चोपलम्भा'दिति चेत्—तुल्यमेतत् ॥

प्रत्यभिज्ञानेन एकस्मिन् पूर्वापरकालद्वयवर्तित्वविषयीकरणात् ध्वंसस्य मध्यकालस्थितिर्दुर्वचेति, 'तावत्कालं स्थिरश्चैनं कः पश्चान्नाशयिष्यती'ति न्यायेन ध्वंसाप्रतियोगित्वस्य सिद्धत्वात् इदं ध्वंसप्रतियोगित्वानुमानं प्रत्यभिज्ञानबाधितमिति वाच्यम्—सोऽयं गकार इति प्रत्यभिज्ञानस्य सेयं दीपज्वालेति प्रत्यभिज्ञानेन तुल्यत्वात् भ्रान्तिरूपत्वेन बाधासिद्धेः ।

[38] ननु नैवं भवति ; प्रकृतप्रत्यभिज्ञानस्य पश्चात्तनबाधादर्शनेन भ्रान्तित्वग्राहकाभावेन स्वतः प्रमात्वादिति चेत्—ज्वालाप्रत्यभिज्ञायामपि प्रामाण्यं तुल्यमस्तु ॥ ननु ज्वालायामबाधितप्रत्यभिज्ञानं नास्ति ; दीर्घत्वह्रस्वत्व-क्रमिकविभिन्नवर्तितैलभागजन्यत्वादिविरुद्धधर्मसमावेशेन पूर्वोत्तरज्वालयोर्भेदानुमानेनाभेदग्राहिप्रत्यभिज्ञानस्य तस्य बाधितत्वात् । अन्यथा विरुद्धधर्मसमावेशेऽपि बाधास्वीकारे भेदव्यवहारः कुत्रापि न स्यात् ; व्यवहारनिमित्तस्य भेदस्याभावात् । आकस्मिकत्वे तु व्यवहारस्य, सर्वत्र सर्वदा भेदव्यवहारापत्तिरिति चेत्—ज्वालायामिव शब्देऽपि तीव्रत्व-तीव्रतरत्व-मन्दत्व-मन्दतरत्व-प्रतिकण्ठवैजात्यरूपविरुद्धधर्मसमावेशेन भेदग्रहणाद् बाधितप्रत्यभिज्ञानासत्त्वं तुल्यम् ।

[39] ननु तीव्रत्वादिकं शब्दे न स्वाभाविकमिति चेन्न—स्वाभाविकत्वनिश्चायकस्य हेतोरन्यत्र सिद्धस्यात्रापि तुल्यरूपं सत्त्वात् । अपां शैत्यं द्रवत्वं च स्वाभाविकम् ; तेजस औष्ण्यं भास्वरत्वं च तथेत्यादौ प्रत्यक्षं विहाय हि नान्यत्प्रमाणम् । तदत्राप्यविशिष्टम् ; शब्दस्य तीव्रत्वादिमत्तायाः प्रत्यक्षत्वात् ॥ नन्वबादौ तत् शैत्यं तथा स्वाभाविकमेव युज्यते । अन्यथा यादृशोपाधिगतं

---

१ अयं प्रकाशानुसारी पाठः । बोधन्यनुसारे बाधितत्वादिति पदं नास्ति विरुद्धधर्माध्यस्तत्वादिति पाठ इत्यूह्यते ।

२ तुल्यं शब्देऽपीति वाक्यच्छेदः, ख. पु० । शब्देऽपीत्यस्योत्तरत्रान्वयो बोधन्याम् ।

[40] तथाऽप्यतीन्द्रियान्यधर्मत्वशङ्का स्यादिति चेत्—एतदपि तादृगेव ॥ तत् किं यद्गतत्वेन यदुपलभ्यते, तस्यैव स धर्मः ? नन्वेवं पीतः शङ्खः, रक्तः स्फटिकः, नीलः पट इत्यपि तथा स्यात् ; अविशेषात्। न ; पीतत्वादीनामन्यधर्मत्वस्थितौ शङ्खादीनां च तद्विरुद्धधर्मत्वे स्थिते, जपाकुसुमाद्यन्वयव्यतिरेकानुविधानाच्च बाधेन भ्रान्तत्वावधारणात्। न चेह तार-तारतरत्वादेरन्यधर्मत्वस्थितिः ; नापि शुकशारिकादिगकाराणां तद्विरुद्धधर्मत्वम् ; नाप्यन्यस्य तद्धर्मिणोऽन्वयव्यतिरेकावनुविधत्ते ॥ तथाऽपि शङ्का स्यादिति चेत्—एवमियं सर्वत्र। तथा च न क्वचित् १ कस्यचित् किञ्चित्कुतश्चित् सिद्ध्येत् ॥ न चैतच्छङ्कितुमपि शक्यते ; अप्रतीते संस्काराभावात्; संस्कारानुपनीतस्य चारोपयितुमशक्यत्वात् ॥

शैत्यादिकमबादावारोपितमिति वक्तव्यम्, तादृशोपाधेरदर्शनात् सर्वदाऽबादिगतत्वेनैव च शैत्यादेर्दर्शनादिति चेत्–तुल्यमिदं तीव्रत्वादावपि ॥

[40] ननूपाधिदर्शनाभावेन दृश्यमानोपाधिगतत्वाभावनिश्चयेऽपि तीव्रत्वादेरतीन्द्रियोपाधिनिष्ठत्वशङ्का स्यादिति चेत्—इदमपि पूर्वोक्ततुल्यमेव ; शैत्यादेरप्यतीन्द्रियोपाधिनिष्ठत्वशङ्कासम्भवात् ॥ ननु–तर्हि किं यन्निष्ठत्वेन यद् दृश्यते, तन्निष्ठत्वेनैव तत् स्वीक्रियते ? एवं खलु सति पीतः शंखः, रक्तः स्फटिकः, नीलः पट इति दृश्यमानं पीतादिरूपमपि पाण्डरे शंखादौ स्वाभाविकं स्यात् ; तद्गतत्वेनैवोपलभ्यमानत्वात्—इति चेन्न—वैषम्यात्। पीतरक्तनील. रूपाणां पित्तद्रव्य-जपाकुसुम-रञ्जकनीलद्रव्यनिष्ठत्वस्य, शंखादीनां तद्विरुद्धपाण्डररूपकत्वस्य च निश्चयात्, उक्तपित्तद्रव्याद्युपाध्यन्वयव्यतिरेकानुविधानदर्शनाच्च पीतःशंख इत्यादेर्बाधितार्थविषयकतया भ्रमत्वावधारणात्। तद्वदिह तारत्वादेरन्यधर्मत्वस्य, शुकशारिकादिगकारेषु तारत्वादिप्रकृतसकलधर्मविरुद्धधर्मकत्वस्य, तारत्वाद्युक्तधर्मवद्वस्त्वन्तरान्वयव्यतिरेकानुविधानस्य चाग्रहणात् ॥ ननु तथाऽप्यगृहीतमपीदं सर्वं शङ्क्यत इति चेत्—इयं निर्हेतुकशङ्का सर्वत्र सम्भाविनी। तथा च कस्मादपि मानात्किमपि वस्तु कुत्रापि न निश्चीयेत ; अतश्च कस्मादपि हेतोः कुत्रापि विषये कस्यापि पुंसः प्रवृत्तिनिवृत्त्यादिकं किमपि न स्यात् ; सर्वत्र सर्वस्योपाधिकत्वशङ्कासम्भवात् उपाधित्वेनाभिमतेऽपि तदसद्भावशङ्कयाऽनवस्थाप्रसङ्गात् ॥ वस्तुतस्तारत्वादेरन्यधर्मत्वं शङ्कितुमपि न शक्यते। तथाहि सति पित्तद्रव्यगतं पीतरूपादिकमिवान्यगतं तारत्वादिकमत्राऽऽरोपणीयम्।

१ कस्यचिदिति पदं क. ख. पु० नास्ति । वं. 'क्वचिदपि.... कुतश्चित्प्रमाणात्। कस्यचिद्धर्मिणः कश्चिद्धर्म इति न स्यात्। यद्वा कस्यचित्प्रमातुः किञ्चित्प्रवृत्तिनिवृत्त्यादिकं न सिद्ध्ये'दिति।

[41] न च ध्वनिधर्मा एव गृह्यन्ते ; स्पर्शाद्यनन्तर्भावेण भावेषु त्वगादीनामव्यापारात् न च श्रवणेनैव तद्ग्रहणम् ; अवायवीयत्वेन तस्य वायुधर्माग्राहकत्वात् चक्षुर्वत्। तार-तारतरत्वादयो वा न वायुधर्माः श्रावणत्वात् कादिवत् । वायुर्वा न श्रवणग्राह्यधर्मा मूर्तत्वात् पृथिवीवत् ॥ यदि च नैवम् ; कादीनामपि वायवीयत्वप्रसङ्गः ॥ ततः किम् ? अवयविगुणत्वेऽनित्यत्वम् ; परमाणुगुणत्वेऽग्रहणम्। द्वयमप्येतदनिष्टं भवतः ॥ अवश्यं च श्रवसा ग्राह्यजातीयगुणवता भवितव्यम् , बहिरिन्द्रियत्वात् घ्राणादिवत् ॥

न चास्मर्यमाणमारोप्येत । न च संस्काराभावे धर्मस्योपनयः (उपस्थितिः—स्मरणम्)। न चाननुभूते संस्कारः। अतोऽस्य तारत्वादेः प्रागन्यत्र प्रतीतिरपेक्षिता । तदभावादत्तारोपो दुष्करः।

[41] न च गकारग्रहणकाले सहैवानुभूयमानास्तारत्वादयो गकारे आरोप्यन्ते इति वाच्यम्—अन्यधर्मत्वे तारत्वादेर्ग्रहणायोगात् । तथा हि—तारत्वाद्याश्रयाः ध्वनयः किं वायवीयाः किं वा नाभसाः ? नाद्यः ; तथा सति तेषां तारत्वादीनां किं त्वगादीन्द्रियान्तरैर्ग्रहणम् उत श्रवसैव। न प्रथमः, त्वगादिग्राह्यतया ये व्यवस्थिताः स्पर्शादयस्तेष्वनन्तर्भाविणेषु स्पर्शादिसाहित्येनागृह्यमाणेषु तारत्वादिष्वर्थेषु तेषामप्रवृत्तेः । न द्वितीयः ; श्रवसो वायुप्रकृतिकत्वाभावेन वायवीयगुणजातीयगुणवत्त्वाभावेन वायुधर्मग्राहित्वाभावात् ; श्रवणं न वायुधर्मग्राहकम् अवायवीयत्वात् चक्षुर्वदिति । एवं तारत्वादयो न वायुधर्माः श्रावणत्वात् ककारादिवत् ; वायुर्न श्रवणग्राह्यधर्मको मूर्तत्वात् पृथिवीवदित्यनुमानाभ्यां तारत्वादेर्ध्वनिधर्मत्वासिद्धिश्च । यदि चानुमानयोरनयोरप्रयोजकत्वं , तर्हि ककारादीनामपि वायवीयत्वापत्तिः ॥ 'ततः किं, तावताऽपि तारत्वादेरौपाधिकत्वानिषेधा'दिति चेत्—कादेर्नित्यत्वस्य ग्राह्यत्वस्य च भवदिष्टतयाऽवयविभूतवायुगुणत्वेऽनित्यत्वापत्तिः , वायुपरमाणुगुणत्वे चाग्रहणापत्तिरिति भवदनिष्टप्रसङ्गः ॥ यदपि प्राथमिकमनुमानं तदपि नाप्रयोजकम् ; श्रवणं ग्राह्यजातीयगुणवत् बहिरिन्द्रियत्वात् ग्राह्यगन्धादिजातीयगन्धादिमद्घ्राणादिवदिति श्रवणे ग्राह्यजातीयगुणवत्त्वस्य सिद्धतया तारत्वादेर्वायवीयध्वनिधर्मत्वे श्रवणे तारादिध्वनिजातीयगुणाभावेन तारत्वादिग्रहणासम्भवात् ।

[ननु तदर्थं श्रवणस्यापि वायवीयत्वाङ्गीकारात् प्राथमिकहेतुरसिद्धः । न च तर्हि त्वगिन्द्रियवत् स्पर्शग्राहितापत्तिः ; इन्द्रियाणां ग्राह्यजातीयगुणवत्त्वस्योक्ततया त्वचि स्पर्शस्य, श्रवणे ध्वनेश्चैव स्थितिकल्पनाद्व्यवस्थोपपत्तेः—इति चेत्—न—एवं तर्हि बहिरिन्द्रियाणां स्वगतगुणजातीयतदधिकरणद्रव्य-तत्समानाधिकरणगुणक्रियादियोग्यग्राहिताया एव सत्त्वेनान्यादृशककारादिग्राहकत्वासम्भवात् । त्वन्मते वर्णानां, वायवीयत्वे अवयविशब्दस्य तात्वादिव्यापारकृतस्यावयवशब्दाजन्यत्वेन रूपादिषु विशेषगुणेषु दृष्टायाः व्यवस्थायाः भङ्गेन अवयवावयविष्वनेकतद्व्यक्तिध्वंस-

व

[42] सन्तु ध्वनयोऽपि नाभसाः। तथा च तद्धर्मग्रहणं श्रवसोपपत्स्यत इति चेन्न—तारस्तारतरो वाऽयं गकार इत्यत्र ध्वनीनामस्फुरणात्। न च व्यक्त्या विना सामान्यस्फुरणम् कारणाभावात्। व्यक्तिस्फुरणसामग्रीनिविष्टा हि जातिस्फुरणसामग्री॥ कुत एतत्। अन्वयव्यतिरेकाभ्यां तथाऽवगमात्; ऐन्द्रिकेष्वेव घटादिषु सामान्यग्रहणात्; अतीन्द्रियेषु च मनःप्रभृतिष्वग्रहणात्॥ स्वरूपयोग्यतैव तत्र निमित्तम्; अकारणं व्यक्तियोग्यतेति चेत्—एवं तर्हि सत्ताद्रव्यत्वपार्थिवत्वादीनां स्वरूपयोग्यत्वे परमाण्वादिष्वपि ग्रहणप्रसङ्गः; अयोग्यत्वे घटादिष्वपि तदनुपलम्भापत्तिरिति दुरुत्तरं व्यसनम्। तस्माद्व्यक्तिग्रहणयोग्यतान्तर्गतैव जातिग्रहणयोग्यतेति तदनुपलम्भे जातेरनुपलम्भ एव॥

प्रागभावादिकल्पनागौरवेण च लाघवान्नित्यत्वस्यावायवीयत्वस्य च स्वीकृततया तेषामग्रहणप्रसङ्गात्। न च तद्वस्तुग्रहणार्थमेव श्रोत्रकल्पनान्नायं दोष इति वाच्यम्—श्रोत्रस्य वायवीयत्वे, तीव्रादिध्वनीनां च तथात्वे तद्ग्राहितयैव श्रोत्रसिद्ध्यौचित्येन नित्यवर्णग्रहणान्यथानुपपत्त्या तत्कल्पनाऽभावात्। अतो नित्यवर्णग्राहकं श्रोत्रमवायवीयमेवाभ्युपेतव्यमिति तस्य परिशेषात् नभोगुणवर्णग्राहित्वाच्च नभोरूपस्य न वायवीयध्वनितद्गततीव्रत्वादिग्राहकता। न चावायवीयत्वेऽपि तद्ग्राहित्वम्; बहिरिन्द्रियत्वहेतुना ग्राह्यजातीयगुणवत्त्वावश्यकतया उक्तत्वात् तदभावे च तद्ग्रहणासम्भवात्॥]

[42] अस्तु तर्हि द्वितीयः पक्षः—वर्णवत् ध्वनयोऽपि नाभसा इति। एवं च नाभसध्वनिगततीव्रत्वाद्यारोपेणैवोपपत्तौ वर्णानां लाघवेन नित्यत्वसिद्धिः। नभोगुणत्वाङ्गीकाराच्च श्रोत्रग्राह्यत्वोपपत्तिरिति चेत् न तारस्तारतरो गकार इति प्रतीतौ तारत्वादेर्वर्णस्य चैव ग्रहणेन ध्वनेरस्फुरणेन तारत्वादेर्ध्वनिनिष्ठत्वाभावात्। न हि ध्वनिरूपव्यक्त्यविषयीकरणे तारत्वादिधर्मविषयीकरणं सम्भवति। प्रत्यक्षे सन्निकर्षस्य कारणतया धर्मे सन्निकर्षस्य च धर्मिद्वारैव वक्तव्यत्वेन जातिस्फुरणसामग्र्याः व्यक्तिस्फुरणसामग्र्याविष्टत्वेन घटकाभावे घटितायोगेन कारणाभावात्। ननु जातिसन्निकर्षस्य व्यक्तिसन्निकर्षघटितत्वेऽपि नैतत्सामग्र्यास्तत्सामग्रीघटितत्वम्; सामग्र्यां वस्तुयोग्यताया अपि घटकत्वात्। जातौ सन्निकर्षश्चेन्द्रियसंयुक्तव्यक्तिसमवायादिमात्रम्; न त्विन्द्रियसंयुक्तयोग्यव्यक्तिसमवायः; मानाभावात्। अतोऽयोग्यव्यक्तेरपि सन्निकर्षघटकत्वसम्भवात् एतत्सामग्र्यां तत्सामग्र्याविष्टत्वं कुतोऽवगम्यत इति चेत्–अन्वयव्यतिरेकाभ्याम्। इन्द्रियग्राह्येषु घटादिष्वेव घटत्वादिग्रहणात् अतीन्द्रियमनःप्रभृतिषु च मनस्त्वादेरग्रहणात्। ननु सामान्यप्रत्यक्षे स्वस्वरूपगतयोग्यता प्रयोजिका; न तु व्यक्तिगतयोग्यता सन्निकर्षघटिका। अतः

[43] तथा च न तारत्वादीनामारोपसम्भव इति स्वाभाविकत्वस्थितौ विरुद्धधर्माध्यासेन भेदस्य पारमार्थिकत्वात्प्रत्यभिज्ञानमप्रमाणमिति न तेन बाधः ॥

[44] नापि सत्प्रतिपक्षत्वम् ; मिथो विरुद्धयोर्वास्तवतुल्यबलत्वाभावात् । एकस्यान्यतमाङ्गवैकल्यचिन्तायामस्य वैकल्ये तस्यैव १ वाच्यत्वात् । अवैकल्ये, त्वदीयेनैव विकलेन भवितव्यमिति हीनस्य न सत्प्रतिपक्षत्वम् ॥ 'तथाऽपि नित्यः शब्दः २ अद्रव्यद्रव्यत्वादित्यत्रापि साधनदशायां किञ्चिद्वाच्य'मिति चेत्—असिद्धिः ॥

स्वयमयोग्यत्वादेव मनस्त्वाग्रह इति चेत्—तर्हि सत्ताद्रव्यत्वपृथिवीत्वादीनां परमाणुद्व्यणुकादिद्वारकसन्निकर्षबलादपि ग्रहणापत्तिः । तदर्थं सत्तादेरयोग्यत्वस्वीकारे च घटादिष्वपि न तदुपलम्भः स्यादिति सर्वथा व्यसनादुत्तीर्णो न भविष्यसि । अतो योग्यव्यक्तिसमवायादेरेव सन्निकर्ष इति व्यक्तिग्रहणसामग्रीघटितैव जातिग्रहणसामग्रीति व्यक्तेरप्रत्यक्षे धर्मस्याप्रत्यक्षमेव ॥

[43] तस्मात्तारत्वादेरन्यधर्मत्वासिद्ध्या आरोपितत्वेन निर्वाहासम्भवात् स्वारसिकं स्वाभाविकत्वमप्रकम्प्यमिति तारत्वमन्दत्वादिविरुद्धधर्मसमावेशेन गकारेषु ज्वालास्थल इव भेदस्य वास्तवत्वात् न तेन प्रत्यभिज्ञानेनानित्यत्वरूपस्य साध्यस्य शब्दे बाध इति न बाधमादायोत्पत्तिमत्त्वरूपहेतोर्दुष्टत्वमिति ।

[44] एवं सत्प्रतिपक्षमादायापि न दुष्टत्वम् ; उक्तहेतोः प्रतिपक्षहेतोश्च द्वयोरपि पक्षसत्त्वसपक्षसत्त्वविपक्षासत्त्वाख्यरूपत्रयवत्त्वरूपबलवत्त्वं हि तावन्न भवति ; साध्यतदभावयोरिव तद्व्याप्ययोरपि विरोधेनैकत्र समावेशासम्भवात् । एवञ्चास्मद्धेतोः पक्षसत्त्वादिवैकल्यमवैकल्यं वा । आद्ये, तदेव वैकल्यमुच्यताम् ; किं तदधीनसत्प्रतिपक्षत्ववचनेन । अन्त्ये, त्वदुक्तहेतोर्वैकल्यमावश्यकमिति दुर्बलस्य न समीचीनप्रतिपक्षत्वम् । ननु त्वदुक्तहेतुदूषणदशायां अस्माभिरन्यतमाङ्गवैकल्यस्य वाच्यत्वेऽपि यदाऽस्माभिः स्वपक्षसाधनं क्रियते, तदाऽत्र साधनदशायामपि त्वया, अस्मत्कृतसत्प्रतिपक्षोद्भावनदशायां 'अङ्गवैकल्यमुद्भाव्यता'मिति यथोक्तं तथा, किञ्चिदङ्गवैकल्यं वाच्यम् । न चेत्, अर्थसिद्धं त्वदुक्तहेतोर्वैकल्यम् । आस्माकः साधनप्रकारश्च शब्दस्य द्रव्यत्वाङ्गीकारेण, गुणत्वस्वीकारेण, तदुभयविषयौदासीन्येन वा त्रेधा भवति । तत्र प्रथम इत्थम्–शब्दो नित्यः द्रव्यानाश्रितत्वे सति द्रव्यत्वादिति । द्रव्यत्वमात्रोक्तौ घटादौ व्यभिचार इति विशेषणम् । द्रव्यानाश्रितत्वं च द्रव्यासमवेतत्वम् । अन्यथा सर्वस्य कालिक-

---

१ अयं क. २. पाठः । पा०. उद्भाव्यत्वात् । बो, 'अतोऽन्यतरस्य वैकल्ये तदेव दूषणं वाच्यम् उपजीव्यत्वात्' ।

२ न विद्यते द्रव्यं समवायि यस्य तदद्रव्यं, तादृशद्रव्यत्वादित्यर्थः ।

[45] द्रव्यं शब्दः साक्षात्सम्बन्धेन गृह्यमाणत्वाद्धटवदिति सिद्ध्यतीति चेन्न—एतस्याप्यसिद्धेः । न हि श्रोत्रगुणत्वे द्रव्यत्वे वाऽसिद्धे साक्षात्सम्बन्धे शब्दस्य प्रमाणमस्ति ॥ 'परिशेषोऽस्ति । तथा हि—सदाद्यभेदेन सामान्यादित्रयव्यावृत्तौ मूर्तद्रव्यसमवायनिषेधेन कर्मत्वनिषेधात् द्रव्यगुणत्वपरिशेषे संयोगसमवाययोरन्यतरः सम्बन्ध' इति चेन्न—बाधकबलेन परिशेषे द्रव्यत्वस्यापि निषेधाल्लिङ्गग्राहकप्रमाणबाधापत्तेः। बाधके सत्यपि वा द्रव्यत्वाप्रतिषेधे कर्मत्वादीनामप्यप्रतिषेधप्रसक्तौ परिशेषासिद्धेः । तस्मादेकदेशपरिशेषो न प्रमाणम् । सन्देहसङ्कोचमात्रहेतुत्वात् ॥ अथ द्रव्यत्वे किं बाधकम् ? उच्यते- शब्दो न द्रव्यं बहिरिन्द्रियव्यवस्थाहेतुत्वाद्रूपादिवत् । इति परिशेषाद्गुणत्वेन १ समवायि(य)सिद्धौ लिङ्गग्राहकप्रमाणबाधितत्वान्नाव्यवहितसंबन्धग्राह्य-

सम्बन्धेन कालवृत्तितयाऽसिद्धिप्रसङ्गात् । एवं च प्रागभावे व्यभिचार इति विशेष्यदलमिति चेत् पक्षसत्त्वरूपाङ्गवैकल्यं त्वदीयहेतोरिति ।

[45] ननु शब्दो द्रव्यं साक्षादिन्द्रियसम्बन्धेन गृह्यमाणत्वात् घटवादित्यनुमानेन द्रव्यत्वसिद्धिरिति चेत्—साक्षात्सम्बन्धो हि संयोगसमवायान्यतरो विवक्षितः । द्रव्यत्वश्रोत्रगुणत्वान्यतरासिद्धौ च सोऽपि न सिद्ध्यतीति हेत्वसिद्धिः स्यादिति तत्र प्रमाणमुपन्यस्यताम् ॥ 'नन्वस्ति परिशेषानुमानम् । तेन द्रव्यगुणान्यतरत्वे सिद्धे उक्तपूर्वेण द्रव्यत्वमनुमीयते । एवं हि परिशेषः शब्दो न सामान्यादित्रयं, नाप्यभावः ; सत्त्वशब्दत्वरूपसामान्यविशेषवदभिन्नत्वात् । न च कर्म, मूर्तद्रव्यासमवेतत्वा'दिति चेन्न—एवं युक्त्याऽन्यतरपरिशेषे द्रव्यत्वस्यापि हेत्वन्तरेण निषेधसम्भवात् साक्षात्सम्बन्धेन गृह्यमाणत्वरूपलिङ्गग्राहकप्रमाणेन परिशेषेण नित्यत्वसाधकद्रव्यत्वरूपलिङ्गग्राहकप्रमाणस्य पूर्वोक्तहेतोर्बाधितत्वरूपदुष्टत्वापत्तेः । सत्यपि हेतौ द्रव्यत्वानिषेधश्चेत्, कर्मत्वादेरप्यनिषेधात् 'द्रव्यं गुणः कर्म सामान्यादिर्वा शब्द' इति सन्देहानपायाद्धेत्वसिद्धिः । तस्मादेकांशपरिशेषो न प्रमाणम् । परं तु सन्देहे किञ्चित्कोटिमात्रव्यावर्तनं स्यात् । किं तेन ? अथ द्रव्यत्वनिषेधे किं प्रमाणमिति चेत्—शब्दो न द्रव्यं बाहिरिन्द्रियव्यवस्थाहेतुत्वात् रूपादिवदित्यनुमानम् । व्यवस्थाहेतुत्वं च अन्यान्येन्द्रियभेदानुमापकोपलब्धिविषयत्वम् । रूपरसगन्धस्पर्शशब्दा हि स्वग्राहिणामिन्द्रियाणां मिथो भेदं स्थापयन्तीति । एवं परिशेषात् गुणत्वस्य, तत एव किञ्चिद्धर्मिणि समवायस्य च सिद्धिः ; न तु द्रव्यत्वस्य ; साक्षात्सम्बन्धेन गृह्यमाणत्वरूपलिङ्गग्राहकपरिशेषप्रमाणेन शब्दे द्रव्यत्वनिषेधेन तस्य लिङ्गस्य बाधरूपदोषदूषितत्वात् । एवं च

१ यद्यपि द्रव्यत्वासिद्धिकथनमेव प्रकृतम्—तथाऽपि परिशेषात् गुणत्वस्य अत एव समवायेन तदाधारस्य च सिद्धिकथनं हेतुघटकस्य अद्रव्यकत्वांशस्याप्यसिद्धिसूचनार्थम् ।

त्वेन द्रव्यत्वसिद्धिः । न चासिद्धेन सत्प्रतिपक्षत्वम् ; असिद्धस्य हीनबलत्वात् ॥

[46] ननु शब्दस्तावद[1]श्रोत्रगुणो नैवेति त्वयैव साधितं प्रबन्धेन । न च श्रोत्रगुणः, तेन गृह्यमाणत्वात् । यद् येनेन्द्रियेण गृह्यते, नासौ तस्य गुणः ; यथा गृह्यमाणो गन्धादिः । श्रोत्रं वा न स्वगुणग्राहकम् इन्द्रियत्वात् घ्राणवत् इति न गुणत्वसिद्धिरिति चेत्—ततः किम् ? न चैतदपि ; घ्राणादिसमवेतगन्धाद्यग्रहे स्वगुणत्वस्याप्रयोजकत्वात् । [2] अयोग्यत्वं हि तत्रोपाधिः ।

द्रव्यासमवेतत्वरूपविशेषणं द्रव्यत्वरूपविशेष्यं चासिद्धमिति तस्य हीनबलत्वान्न साधकत्वमिति न सत्प्रतिपक्षत्वम् ॥

[46] ननु शब्दः श्रोत्रातिरिक्तगुणो न भवतीति नैयायिकैरेव विस्तरेण साधितमस्ति । वयमत्र श्रोत्रगुणत्वमनुमानद्वयेन निषेधामः—शब्दो न श्रोत्रगुणः तद्ग्राह्यत्वात् । यत् यद्ग्राह्यं, न स तद्गुणः ; यथा घ्राणादिग्राह्यो गन्धादिः । न हि घ्राणनिष्ठो गन्धो गृह्यते ; किं तु बाह्य इति । एवं श्रोत्रं न स्वगुणग्राहकं इन्द्रियत्वात् घ्राणवदिति । एवञ्च न तस्य गुणत्वसिद्धिरिति चेत्—अस्तु तदसिद्धिः । ततः किम् ? द्रव्यत्वनिषेधः किल प्रकृतः । तत्र च हेतोर्न दुष्टत्वमिति । नन्वनेन गुणत्वासिद्धौ द्रव्यत्वनिषेधकानुमानं दुष्टं स्यादिति चेत्—न—गुणत्वासिद्ध्यभावात् । योग्यत्वमयोग्यत्वं च हि विषयनिष्ठमिन्द्रियनिष्ठं चेति द्विविधम् । तत्रायोग्यत्वं विषयनिष्ठमिन्द्रियनिष्ठं चाग्रहणे प्रयोजकमिति हेत्वोरप्रयोजकत्वमिति । तथा हि—प्रथमेऽन्वयव्यतिरेक्यनुमाने यो यद्गुणः, स न तद्ग्राह्य इति व्यतिरेकव्याप्तिस्तावन्न भवति ; तत्रायोग्यत्वस्योपाधित्वात् । न ह्यग्राह्यत्वे घ्राणादिगुणत्वं प्रयोजकम् ; अपि त्वयोग्यत्वम् । तद्गुणोऽतद्गुणो वाऽयोग्यश्चेन्न गृह्यत इति । एवं चातद्ग्राह्यत्वस्य तद्गुणत्वव्यापकत्वाभावे तद्ग्राह्यत्वस्य व्यापकाभावरूपत्वाभावेन अतद्गुणत्वस्य च व्याप्याभावरूपत्वाभावेन यत् येनेन्द्रियेण गृह्यते नासौ

---

१ पा० शब्दश्श्रोत्रगुणो नैवेति त्वयैव साधितं प्रबन्धेन ; न श्रोत्रगुणः इति । बो. 'केचित्तु शब्दः श्रोत्रगुणो नेति पठन्ति । तत्रायमर्थः–महता प्रबन्धेन शब्दस्य श्रोत्रग्राह्यत्वं प्रतिपादयता त्वयैव श्रोत्रगुणो नेति साधितं भवति । कथमेतेनैतत्प्रतिपादितं भवेदित्यत्रोक्तं, न श्रोत्रगुण इति' । २ प्रकाशे, 'प्रथमानुमाने श्रोत्रयोग्यगुणत्वव्याप्यजातिशून्यत्वमुपाधिः , अन्त्यानुमाने त्वयोग्यगुणकत्वमुपाधिरित्यप्रयोजकत्वमुभयत्रे'त्युक्तम् । अत्र प्रथमोपाधिर्मूलदर्शितसामान्यमुखव्याप्त्यन्तर्गतसाध्यप्रयोजको न भवति । मूले, 'गृह्यते तु योग्यो योग्येने'ति । विषयकरणयोर्योग्यत्वकथनानुसारेण यथाश्रुतमयोग्यत्वं स्वीकृत्य विस्तरोक्तमत्र साधु भाव्यम् ।

[47] अन्यथा—सुखादिर्नात्मगुणः तेन गृह्यमाणत्वात् रूपादिवत्। न वा तेन गृह्यते तत्समवेतत्वाददृष्टवत्। आत्मा वा न तद्ग्राहकः तदाश्रयत्वात् गन्धाद्याश्रयघटादिवदित्याद्यपि शङ्क्येत। तस्मात् स्वगुणः परगुणो वाऽयोग्यो न गृह्यते; गृह्यते तु योग्यो योग्येन। तत् किमत्रानुपपन्नम्॥

[48] अवश्यं च श्रोत्रेण विशेषगुणग्राहिणा भवितव्यम् इन्द्रियत्वात्। अन्यथा तन्निर्माणवैयर्थ्यात्। १ तदन्यस्येन्द्रियान्तरेणैव ग्रहणात्। न च द्रव्यविशेषग्रहणे तदुपयोगः; २ विशेषगुणयोग्यतामाश्रित्यैवेन्द्रियस्य द्रव्यग्राहकत्वात्; न द्रव्यस्वरूपयोग्यतामात्रेण। अन्यथा चान्द्रमसं तेजः स्वरूपेण योग्यमिति तदप्युपलभ्येत; आत्मा वा मनो-

---

तद्गुण इति व्याप्तिरपि न भवतीति तद्ग्राह्यत्वहेतुनाऽश्रोत्रगुणत्वसाधनं तावन्न भवति; साध्याभावे हेत्वभावाप्रयोजकत्वस्योपवर्णिततया हेतौ साध्याव्याप्यत्वस्यापि सिद्धत्वात्॥ एवं द्वितीयानुमाने इन्द्रियनिष्ठं स्वगुणग्रहणविषये अयोग्यत्वमुपाधिः; स्वगुणग्राहकत्वाभावरूपसाध्यं यत्र, तत्र तद्विषयेऽयोग्यत्वस्य सत्त्वात्; श्रोत्रे चेन्द्रियत्वरूपहेतुमति शब्दं प्रत्ययोग्यत्वस्याभावाच्च।

[47] अन्यथा अयोग्यत्वस्यानुपाधित्वे, 'सुखादिर्नात्मगुणः तद्ग्राह्यत्वात्; यो यद्ग्राह्यः, स न तद्गुणः यथा रूपादिः। सुखादिर्नात्मग्राह्यः आत्मसमवेतत्वाददृष्टवत्। यद्वा आत्मा न सुखादिग्राहकः तदाश्रयत्वात्; यो यदाश्रयः स न तद्ग्राहकः; यथा गन्धाद्याश्रयो घटादि'रित्याद्यनुमानमपि साधकतया शङ्क्येत। अत्र प्रथमानुमानीयव्यतिरेकव्याप्तिर्द्वितीयेन दर्शिता। तत्र वस्तुनिष्ठमयोग्यत्वं, उत्तरानुमाने कारणनिष्ठमयोग्यत्वं च ह्युपाधिः; तथैव त्वदुक्तेऽपीति। तस्मात्स्वगुणः परगुण इति न विशेषः। अयोग्यत्वे न ग्रहणम्। योग्यं चेद्वस्तु, कारणं च यदि योग्यम्, तर्हि तत्तेन गृह्यत एव। अतो गुणत्वबाधकानुमानयोर्दूषितत्वात् अस्मदुक्तद्रव्यत्वनिषेधकानित्यत्वसाधकहेत्वोर्मध्ये किमनुपपन्नमस्ति?

[48] न केवलं गुणत्वे बाधकाभावः; साधकमप्यस्ति। श्रोत्रं विशेषगुणग्राहि इन्द्रियत्वात् इत्यनुमानेन साध्यमानं विशेषगुणग्राहित्वं क्लृप्तानां विशेषगुणानां श्रोत्राग्राह्यत्वात् परिशेषाच्छब्दमेव विशेषगुणमादाय पर्यवस्यतीति। विशेषगुणग्राहित्वानङ्गीकारे च श्रोत्रेन्द्रियवैयर्थ्यादिन्द्रियत्वमेव न स्यादिति नाप्रयोजकत्वम्। न ह्यन्यो विशेषगुणोऽनेन ग्राह्यः; तस्य रूपादेश्चक्षुरादिग्राह्यत्वात्। न च ध्वन्यात्मकशब्दग्रहणादुक्तानुमानेऽर्थान्तरप्रसक्तिः; वर्णात्मकशब्दन्यायेन त्वन्मते तत्रापि नित्यत्वद्रव्यत्वासिद्धौ दोषाभावात्। न च शब्दरूपद्रव्यग्राहितयैव तत्क्लृप्तिरिति

---

१ अत्र तदर्थस्येति प्रतीकं कृत्वा श्रोत्रविषयस्य शब्दस्येति बोधन्यां व्याख्यातम्। तदनुगुणो मूलपाठो मृग्यः। २ विशेषणयोग्यतां क. ख. पा०।

ग्राह्य इति सुषुप्त्यवस्थायामप्युपलभ्येत; अनुद्भूतरूपेऽपि वा चक्षुः प्रवर्तेत । तस्मात् गुणयोग्यतामेव पुरस्कृत्येन्द्रियाणि द्रव्यमुपाददते; नातोऽन्यथेति स्थितिः । अत एव नाकाशादयश्चाक्षुषाः ॥

[49] अस्तु तर्हि शब्दो नित्यः नित्याकाशैक[1]गुणत्वात् तद्गतपरममहत्[2]परिमाणवदिति प्रत्यनुमानमिति चेन्न—अकार्यत्वस्योपाधेर्विद्यमानत्वात् । अन्यथा—आत्मविशेष-

---

न विशेषगुणग्राहित्वमावश्यकमिति वाच्यम्—शब्देन श्रोत्रसाधनं शब्दगतद्रव्यत्वगुणत्वादेरनपेक्षितत्वेनान्येन्द्रियाग्राह्यशब्दग्राहितया श्रोत्रसिद्धौ तस्य द्रव्यत्वगुणत्वान्यतरविचिकित्सायां इन्द्रियाणां विशेषगुणयोग्यतामपेक्ष्यैव द्रव्यग्राहकत्वदर्शनात्, 'तदिन्द्रियजन्यद्रव्यप्रत्यक्षत्वं यत्र, तत्र तद्योग्यविशेषगुणविषयकत्व'मिति नियमसद्भावात् गुणयोग्यतारूपसहकार्यभावे द्रव्ययोग्यतामात्रेण द्रव्यग्राहकत्वाभावात् श्रोत्रस्य विशेषगुणग्राहित्वावश्यकतापरामर्शात् । अन्यथा द्रव्ययोग्यतामात्रस्य कार्यकरत्वे—चन्द्रकिरणानामनुद्भूतस्पर्शानामपि त्वाचप्रत्यक्षापत्तिः । आत्मनश्च मनोग्रहणयोग्यत्वात् ज्ञानादिविशेषगुणाभावकाले सुषुप्तावपि केवलतदुपलम्भापत्तिः । अनुद्भूतरूपकं कापालपावकादिकमपि चक्षुषा गृह्येत । तस्मात् गुणयोग्यतां सहकारीकृत्यैवेन्द्रियाणां द्रव्यग्राहित्वम्; न तद्भिन्नप्रकारेणेति वस्तुस्थितिः । एवं गुणयोग्यतारूपसहकार्यभावादेव नीरूपाकाशादीनां सत्यपि सन्निकर्षेऽचाक्षुषत्वम् । एवं च शब्दस्य द्रव्यत्वे श्रोत्रग्राह्यगुणान्तराभावेन न तस्य ग्राह्यत्वम् ।

[न च तीव्रत्वमन्दत्वादिरेव गुणः; तस्य वर्णनिष्ठत्वस्य त्वदनभिमतत्वात् । न च—अतन्निष्ठत्वेऽपि न दोषः; द्रव्यविषयकप्रत्यक्षस्य तद्वृत्तिगुणविषयकत्वमिति नियमाभावात्; यत्किञ्चिद्गुणविषयकत्वमित्येव नियमात् । अत एव नीलं नभः, पीतः शंखः इत्यादिप्रतीतिः—इति वाच्यम् । तीव्रत्वादेर्गन्धरसादावपि सत्त्वेनागुणत्वात्, गुणे गुणानङ्गीकारात्, यन्निष्ठं तीव्रत्वादिसामान्यं तस्याः व्यक्तेरग्रहणे तस्य सामान्यस्य ग्रहणासम्भवस्य प्रागुक्तत्वात् । अतो न तत्पुरस्कारेण वर्णग्रहणसम्भवः । एतेन ध्वनेर्विशेषगुणत्वस्वीकारेण विशेषगुणग्राहित्वसमर्थनेऽपि न निस्तारः; गुणयोग्यतारूपसहकार्यभावेन वर्णग्रहणासम्भवात् ।]

अतः सिद्धं वर्णस्य गुणत्वम् । तस्माद्द्रव्यद्रव्यत्वरूपहेतुरसिद्ध इति ॥

[49] अस्तु तर्हि शब्दस्य गुणत्वस्वीकारेण द्वितीयः प्रकारः, शब्दो नित्यः नित्याकाशैकगुणत्वात् तन्निष्ठपरममहत्त्वाख्यपरिमाणवदिति । अत्र गुणत्वं द्वित्वादावपीति एकगुणत्वमुक्तम् । तच्चैक-

---

१ ध्वंसानवच्छिन्नसत्तायोगित्वं साध्यं, विशेषवारणाय गुणपदमिति, प्र. । गुणपदमप्रधानार्थकमिति मकरन्दे । २ तद्गतं परममहतः परिमाणं तदिवेति विग्रहः ।

गुणा नित्याः तदेकगुणत्वात्तद्गतपरममहत्त्ववदित्यपि स्यात् । 'अस्य प्रत्यक्षबाधितत्वादहेतुत्व'मिति चेन्न—निरुपाधेर्बाधानवकाशात् । स्वभावप्रतिबद्धस्य च तत्परित्यागे स्वभावपरित्यागप्रसङ्गात् । तस्माद्बाधेन वोपाधिरुन्नीयते, अन्यथा वेति न कश्चिद्विशेषः ॥

[50] **एतेन श्रावणत्वाच्छब्दत्ववदित्यपि परास्तम्; अत्रापि तस्यैवोपाधित्वात् । अन्यथा गन्धरूपरसस्पर्शा अपि नित्याः प्रसज्येरन्; घ्राणाद्येकैकेन्द्रियग्राह्यत्वात् गन्धत्वादिवदित्यपि प्रयोगसौकर्यात् ॥**

[51] **विरोधव्यभिचारावसंभावितावेवात्रत्यासिद्धिरेव [1] शिष्यते । साऽपि नास्ति। तथा हि—शब्दस्तावत् 'पूर्वोक्त[2]न्यायेन स्वाभाविकतीव्रमन्दतरतमादिभावेन प्रकर्षनि-**

मात्रवृत्तिगुणत्वम् । तत् अनित्यज्ञानादावपीति आकाशैकगुणत्वम् । तच्च आकाशमात्रवृत्तिगुणत्वम् । आकाशे नित्यत्वकथनं च शब्दस्याधारानित्यताप्रयुक्तानित्यताशङ्का नास्तीति ज्ञापनाय; न तु तस्य हेतौ प्रवेशः । आकाशमात्रवृत्तित्वादित्यलम् । गुणत्वकथनमपि प्रागुक्तद्रव्यत्वपक्षत्यागसूचनायेति चेन्न—ध्वंसाप्रतियोगित्वरूपनित्यत्वसाधनेऽनुत्पत्तिमत्त्वरूपाकार्यत्वस्योपाधित्वात् । तस्योपाधित्वाभावे आत्मविशेषगुणाः नित्याः तन्मात्रगुणत्वात् तन्निष्ठपरममहत्त्ववदित्यनुमानस्यादुष्टत्वापत्तेः । नन्वस्य हेतोर्ज्ञानाद्यनित्यत्वविषयकप्रत्यक्षेण नित्यत्वबाधाद्दुष्टत्वम् । न तूक्तोपाधिमत्त्वादिति चेन्न—पक्षे हेतुमत्त्वं स्वीकृत्य साध्यबाधे तत्रोपाधेरप्यावश्यकत्वात् । निरुपाधेर्हेतोः साध्यव्याप्यतया व्याप्यमत्त्वे साध्यबाधरूपदोषासम्भवात् । स्वाभाविकसाध्यव्याप्तिमतो हेतोः साध्यं परित्यज्य स्थितौ व्याप्यस्वभाववत्त्वहानिप्रसङ्गात् । अतोऽस्त्येव तत्रोपाधिः । स परं बाधेन वोन्नीयताम्; साध्यव्यापकत्वमाधनाव्यापकत्वग्राहकसामग्रीबलादिना वा प्रकारान्तरेण। उपाधिमत्त्वं तु सर्वथाऽविशिष्टम् । अतो नायमपि प्रतिपक्षः ।

[50] अनेनैवाकार्यत्वोपाधिना शब्दो नित्यः श्रावणत्वात् शब्दत्ववदिति तृतीयप्रकारेण प्रतिपक्षवर्णनमपि परास्तम्; तस्यानुपाधित्वे, गन्धादयो नित्याः घ्राणाद्येकैकेन्द्रियग्राह्यत्वात् गन्धत्वादिवदित्यप्यनुमानप्रयोगस्य सुकरतया तेषामपि नित्यत्वापत्तिः ।

[51] एवमुत्पत्तिधर्मकत्वस्याबाधितत्वमसत्प्रतिपक्षितत्वं च निरूपितम् । विरुद्धत्वव्यभिचारित्वे तु नैव सम्भवतः; अन्यत्र क्वचिदपि साध्याभावसामानाधिकरण्यादर्शनात् । अतोऽसिद्धिरेवोद्भाव्यतया शिष्यते, यदि हेत्वाभासत्वं विवक्षितम् । साऽपि किं स्वरूपासिद्धिर्व्याप्यत्वासिद्धिर्वा ।

---

१ अयं क.[2] पाठः। पा० असिद्धिरथशिष्यते वो. 'असिद्धिरेव संभाव्यतया शिष्टा'।

२ प्रकाशे पूर्वोक्तेति प्रतीकधारणम् । पा० पूर्वन्यायेन, क. ख. पु० ।

कर्षवानुपलभ्यते । इयं च प्रकर्षनिकर्षवत्ता कारणभेदानुविधायिनी सर्वत्रोपलब्धा । अकारणका हि नित्याः प्रकर्षवन्त एव भवन्ति, यथाऽऽकाशादयः; निकृष्टा एव वा, यथा परमाण्वादयः। न तु किञ्चिदतिशयानाः कुतश्चिदपकृष्यन्ते । तदियं नित्येभ्यो व्यावर्तमाना कारणवत्सु (तां) च भवन्ती जायमानतामादायैव विश्राम्यतीति प्रतिबन्धसिद्धौ प्रयुज्यते-शब्दो जायते, प्रकर्षनिकर्षाभ्यामुपेतत्वात् माधुर्यादिवत्। अन्यथा नियामकमन्तरेण भवन्ती नित्येष्वपि सा स्यात् (भवतीति नित्येऽपि स्यात्); नियमहेतोरभावात् ॥ शब्दादन्यत्रेयं गतिरिति चेन्न-साध्यधर्मिणं विहायेति प्रत्यवस्थानस्य सर्वानुमानसुलभत्वात् । न चेह १ व्यञ्जकतारतम्याद्व्यञ्जनीयतारतम्यम्; अस्वाभाविकत्वप्रसङ्गात् । व्यवस्थितं च स्वाभाविकत्वम्। न च व्यञ्जकोत्पादकाभ्यामन्यस्यानुविधानमस्ति । न च स्वाभाविकत्वौपाधिकत्वाभ्यामन्यः प्रकारः सम्भवति ॥

नाद्या; प्रकर्षनिकर्षवत्तारूपहेतुनोत्पत्तिमत्त्वस्य शब्दे साधनात् । न चात्राप्यसिद्धिः; तीव्रतीव्रतरत्व-मन्दमन्दतरत्वादेरुपलभ्यमानत्वात् । न चेदमौपाधिकम्; उपाध्यनुपलम्भविशिष्टशब्दवृत्तित्वोपलम्भरूपहेतुना स्वाभाविकत्वस्य पूर्वोक्तत्वात् । न चात्र व्याप्त्यग्रहणम्; यत इयं किञ्चिदवधिकप्रकर्षान्यावधिकनिकर्षोभयवत्ता कारणविशेषानुसारित्वेनैव सर्वत्र दृष्टा । अकारणकानां नित्यानां मध्ये आकाशादिषु सर्वापेक्षया प्रकर्षमात्रस्य परमाण्वादिषु च निकर्षमात्रस्य दर्शनात् । कश्चित्पदार्थमतिशय्य कस्माच्चिदपकृष्टतयाऽवस्थितस्यादर्शनात् । अतोऽन्वयवत् व्यतिरेकतोऽपि व्याप्तिरस्ति । तस्मादियं प्रकर्षनिकर्षवत्ता नित्यव्यावृत्तत्वात् कारणवदन्वयाच्चोत्पत्तिमत्त्वाविनाभूतेति व्याप्तिसिद्धिः । माधुर्यादिश्च दृष्टान्तः । अन्यथाऽप्रयोजकत्वशङ्कया व्याप्त्यस्वीकारे इयं प्रकर्षनिकर्षवत्ता कारणवैलक्षण्यमन्तरेण भवन्ती चेत्, नित्येष्वपि स्यात्; व्यवस्थाकारणाभावात् । ननु शब्दादन्यत्रास्याः कारणवैलक्षण्यसापेक्षता; न त्विहेति चेन्न—'पक्षं विहायान्यत्रायं नियम' इति पूर्वपक्षस्य सर्वत्रानुमाने सम्भवादनुमानोच्छेदापत्तेः । अतो नाप्रयोजकत्वमपि । न च वस्तुत इह प्रकर्षनिकर्षवत्त्वैव नास्ति; किन्तु मणिकृपाणादिभेदान्मुखे ह्रस्वदीर्घत्वादिवत् व्यञ्जकगततारतम्याधीनव्यञ्जनीयगततारतम्यमिहापीति वाच्यम् । तर्हि तारत्वादेरत्रास्वाभाविकत्वप्रसङ्गात् । लोके तारतम्यविषये व्यञ्जकोत्पादकान्यतरातिरिक्तानुविधानस्याभावेन अन्यतरानुविधानबलेन स्वाभाविकत्वौपाधिकत्वान्यतरप्रकारस्वीकारावश्यकत्वेन तत्रौपाधिकत्वासम्भवस्योक्तत्वेन च स्वाभाविकत्वस्य प्रागेव व्यवस्थितत्वात् । अतो नोत्पत्तिमत्त्वं स्वरूपासिद्धम् ।

---

१ न चेद्व्यञ्जकेति सर्वत्र पाठः ।

[52] 'स्यादेतत् । तथाऽप्युत्पत्तेर्नित्यत्वेन को विरोधः? येन प्रतिबन्धसिद्धिः स्यात्। असिद्धे च तस्मिन्, भवतां व्यापकत्वासिद्धः, अस्माकमप्रयोजकः, सौगतानां सन्दिग्धविपक्षवृत्ति(व्यावृत्ति) रयमुपक्रान्तो हेतुः' इति चेत्-न । इदं ह्युत्पत्तिमत्त्वं विनाशकारणसन्निधिविरुद्धेभ्यो नित्येभ्यः स्वव्यापकनिवृत्तौ निवर्तमानं विनाशकसन्निधिमति विनाशिनि विश्राम्यतीति ॥ 'विनाशकारणसन्निधानेनावश्यं जायमानस्य भवितव्यमिति कुतो निर्णीत'मिति चेत्— न तदसन्निधानं हि न तावदाकाशादेरिव स्वभावविरोधात्; उत्पत्तिविनाश(शक)योः संसर्गदर्शनात्। अविरुद्धयोरसन्निधिस्तु देशविप्रकर्षाद्धिमवद्विन्ध्ययोरिव स्यात् । देशयोरपि विप्रकर्षो विरोधाद्वा हेत्वभावाद्वा । पूर्वोक्तादेव न प्रथमः। द्वितीयस्तु पटकुङ्कमयोरिव स्यात्, यदि कुङ्कमसमागमादर्वागिव

---

[52] नन्वस्तु स्वरूपासिद्धिराहित्यम् । अथापि हेतुरस्तु, साध्यं मास्तु । न च नित्यत्वोत्पत्तिमत्त्वयोर्विरोधोऽस्ति, येन अनित्यत्वेन हेतोर्व्याप्तिसिद्धः स्यात् । एवमसिद्धे प्रतिबन्धे तार्किकमते व्यापकत्वासिद्ध इति हेतुर्व्यवहर्तव्यः; साध्यगतेन हेतुव्यापकत्वासिद्धिरूपदोषेण हेतोर्दुष्टत्वात् । अस्माकं तु मीमांसकानां मतेऽयमप्रयोजकनामा । सौगतमते च सन्दिग्धविपक्षवृत्तिसंज्ञः; सन्दिह्यते विपक्षे नित्येऽस्य वृत्तिरिति । अतः सर्वथा हेतुर्दुष्ट इति चेन्न— यत्रोत्पत्तिमत्त्वं, तत्र विनाशकारणसान्निध्यमिति विनाशकसन्निधिस्तावदुत्पत्तिमत्त्वव्यापकः । नित्यानि विनाशकसन्निधिरहितानि । अतो व्यापकाभावादुत्पत्तिमत्त्वमपि तेभ्यो निवर्तते । विनाशकसन्निधिमत्त्वे च विनाशित्वस्यावश्यकतया उत्पत्तिमत्त्वमनित्यत्वनियतमिति ॥ ननु तत्सन्निधेरुत्पत्तिमत्त्वव्यापकत्वमेव कुतो निर्णीतमिति चेत् —श्रूयताम् —उत्पत्तिमत्त्वे विनाशकासन्निधानं त्वया कुत उच्यते, किमुभयोर्विरोधमाश्रित्य किं वाऽविरोधेऽपि कारणान्तरात्? तत्र न तावत् आकाशादाविवोत्पत्तिमति तदसन्निधाने स्वभावविरोधो हेतुः; उत्पत्तिविनाशकयोः घटादिषु संसर्गदर्शनेन स्वभावविरोधासम्भवात् । न द्वितीयः; असति विरोधे विनाशकासन्निधिः हिमवद्विन्ध्यशैलयोरिव मिथो विप्रकृष्टदेशस्थत्वाद्वा विप्रकृष्टकालस्थत्वाद्वा । नाद्यः; उत्पत्तिमद्देशस्य विनाशकदेशस्य च विप्रकर्षः किं स्वभावतो विरोधात्, किं वा सन्निधापकहेत्वभावात् । न प्रथमः; उत्पत्तिविनाशकयोः क्वचिद्घटादौ सन्निधेरुक्तत्वेन स्वभावविरोधासम्भवात् । अतो द्वितीयो हेत्वभाव एव, पृथक्स्थितयोः पटकुङ्कुमयोरिव, विप्रकर्षनियामको वक्तव्यः । स च तदा स्यात्, यदि यथा कुङ्कुमसमागमात् प्रागेव पटो विनश्यति तथा विनाशकसन्निधानात् प्रागेव पटो नश्येत । तदा किल पटदेशस्य विनाशकदेशस्य च सन्निकर्षो न भवेदिति । न च विनाशकसन्निधानात् प्राग्विनाशप्रसक्तिः; कारणाभावे कार्यासम्भवात् । कुङ्कुमसमागमं विनाऽपि तु पटविनाशः सम्भवति, तस्य तत्राहेतुत्वात् । विनाशकं विना न विनाश इतिवत् कुङ्कुमसम्बन्धं विना न विनाश इत्यपि नियमो

प्रध्वंसकसंसर्गादर्वागेव पटो विनश्येत् । यथा हि विनाशकारणं विना न विनाशः, तथा यदि कुङ्कुमसमागमं विना न विनाशः पटस्येति स्यात, कस्तयोः संसर्गं वारयेत् । तस्मादविरुद्धयोरसंसर्गः कालविप्रकर्षनियमेन व्याप्तः । स १ चातो निवर्तमानः स्वव्याप्यमुपादाय निवर्तत इति प्रतिबन्धसिद्धिः ॥

[53] 'स्यादेतत् । यद्येवमस्थिरश्शब्दः, कथमर्थेन सङ्गतिरस्योपलभ्यते' इति चेत्-यथैषार्थस्यास्थिरस्य २ तेन ॥ 'जातिरेव पदार्थः, न व्यक्तिरिति चेन्न-शब्दात्तदलाभप्रसङ्गात् ॥ आक्षेपत इति चेत्—कः खल्वयमाक्षेपो नाम ? न तावदनुमानम्; अनन्ताभिःसह सङ्गतिवदविनाभावस्यापि ग्रहीतुमशक्यत्वात् । शक्यत्वे वा, सङ्गतेरपि तथैव सुग्रहत्वात्

लोके यदि स्यात्, तदा पटकुङ्कुमयोरपि संसर्गो वारयितुमशक्य एव स्यात् । परं तु नियमस्तथा न क्लृप्तोऽस्ति । अतो विनाशकसन्निधानात् पूर्वं विनाशासम्भवात् सन्निधानहेतोः सत्त्वात् उत्पत्तिधर्मके पटादौ विनाशकसन्निधिर्देशविप्रकर्षनिरस्यो न भवति । [न च विनाशकारणसमागमात् प्राक् पटनाशासम्भवेऽपि पटसमागमात प्राक् विनाशकारणविनाशसम्भवात् देशविप्रकर्षः सुवच इति वाच्यम्—कदाचित्तन्नाशसम्भवेऽपि सर्वदा तन्नाशे मानाभावात्कार्यनित्यत्वसिद्ध्यसम्भवात ।] तस्मात प्रकारान्तराभावादविरुद्धयोरुत्पन्नप्रध्वंसकयोः कालविप्रकर्षमादायासंसर्गो वाच्यः, यत्राविरुद्धासंसर्गस्तत्र नियतविप्रकृष्टकालकत्वमिति ; अत एव न कृष्णेन लक्ष्मणस्य समागमः । स च कालविप्रकर्षः अतः उत्पन्नप्रध्वंसकद्वयान्निवर्तते ; विनाशकालप्राप्तेः प्राग्विनाशासम्भवात् । अतो व्यापकस्य कालविप्रकर्षस्य निवृत्तौ व्याप्योऽसंसर्गोऽपि निवर्तत इति तत्संसर्गासिद्धावनित्यत्वव्याप्तिरुत्पत्तिमत्त्वे सिद्ध्यति । [न चोक्तदेशविप्रकर्षकालविप्रकर्षयोर्दुर्वचतया नित्यपदार्थेषु ध्वंसे च विनाशकसन्निधानापत्तिरिति तद्विनाशापत्तिरिति वाच्यम्—नित्येषु धर्मिग्राहकप्रमाणेन, ध्वंसे च विनाशाङ्गीकारे प्रतियोगिपुनरुन्मज्जनप्रसङ्गेन ध्वंसाप्रतियोगित्वसिद्धेर्विनाशकसन्निधानासम्भवात । अत उत्पत्तिमद्भावे विनाशकसन्निधानमपरिहार्यमिति न व्याप्यत्वासिद्धिरपीति ॥

[53] नन्वास्तामिदमुत्पत्तिमतो विनाशित्वम् । शब्दे पुनरनित्यत्वमुत्पत्तिमत्त्वं च न भवति ; शब्दो नित्यः सङ्गतिमत्त्वादित्यनेन विपरीतसिद्धेः । सङ्गतिर्वाच्यवाचकभावसम्बन्धः ।

१ अतः—अविरुद्धाभ्याम् ।

२ 'तेन-शब्देनेत्यर्थ' इति प्रकाशानुरोधादिदं पूर्वान्वयि । "येन हेतुनाऽस्थिरस्य व्यक्तिरूपस्यार्थस्य सङ्गतिर्दुर्ग्रहेति, तेनैवास्माकं जातिरेव पदार्थ इति सिद्धन्त इत्याह तेनेति" इति बोधन्यनुरोधे त्विदमुत्तरवाक्यगतम् ।

व्यक्तिमात्ररूपेणाविनाभाव' इति चेन्न—व्यक्तित्वस्य सामान्यस्याभावात् । भावे वा, तदाक्षेपेऽपि विशेषानाक्षेपात् । वाच्यत्वमपि वा तथैवास्तु ? किमाक्षेपेण; सङ्गतेरविरोधादिति ॥

[54] अर्थापत्तिराक्षेप इति चेन्न—व्यक्तया [किं] विना किमनुपपन्नम्? 'जाति'रिति चेन्न–तन्नाशानुत्पाददशायामपि सत्त्वात् ॥ 'तथाऽपि न व्यक्तिमात्रं विने'ति चेन्न—मात्रार्थाभावात् ॥ 'व्यक्तिज्ञानमन्तरेण जातिज्ञानमनुपपन्न'मिति चेन्न—तदभावेऽप्युत्पादात् ॥ 'व्यक्तिविषयतां(त्वं) विना जातिविषयता तस्यानुप(तानुप)पन्ने'ति चेन्न—

यद्येवमस्थिरः शब्दः स्यात् , तर्हि तद्व्यक्तीनामानन्त्यात् एकव्यक्तौ सङ्गतिग्रहस्यान्यत्रानुपयोगात् सकलव्यक्तीनां च दुर्ग्रहत्वात् । कथं तत्रार्थेन सङ्गतिग्रह इति चेत्-यथा गवाद्यर्थस्यास्थिरत्वेऽप्यनन्तत्वेऽपि शब्देन सङ्गतिग्रहः, तथैव शब्दस्यापि तादृशस्यार्थेनेति ॥ ननु जातिरेव पदार्थः, न व्यक्तयः । सा च स्थिरैका चेति न दोष इति चेन्न-तथा सति शब्दाद्व्यक्त्यबोधप्रसङ्गात् । अथ जातौ शक्त्या गृहीतायां व्यक्तेराक्षेपतो लाभ इति चेत्—कः पुनराक्षेपशब्दार्थः, किमनुमानमुतार्थापत्तिराहो अन्य इति । नाद्यः ; अनन्तव्यक्तिभिः सह सङ्गतेरिव व्याप्तेरपि दुर्ग्रहतया जात्या व्यक्त्यनुमानायोगात् । व्याप्तेः सुग्रहत्वे सङ्गतेरपि तुल्यन्यायेन तथात्वात् ॥ जातेः कृत्स्नव्यक्तिगतव्यक्तित्वाख्यरूपं प्रति व्याप्यत्वमिति चेन्न-जात्यतिरिक्तस्य व्यक्तित्वाख्यस्य सामान्यस्याभावात्; तस्य प्रतिव्यक्तिभिन्नत्वात् । तादृशसामान्यसत्त्वेऽपि व्यापकीभूततदनुमितावपि व्यक्त्यनुमित्यभावाच्च । यद्वा जातिवदेव तस्यापि सामान्यस्य वाच्यत्वमेवास्तु, किमनुमित्या ? अस्थिरत्वाऽऽनन्त्यरूपदोषाभावेन सङ्गतौ बाधकाभावादिति ॥

[54] न द्वितीयः ; अर्थापत्तिस्थले उपपादकं विना किञ्चिदनुपपन्नं हि सत् स्वोपपादकमाक्षिपति । तदत्रोपपादकत्वेनाभिमतया आक्षेप्यया व्यक्त्या विना कोऽर्थोऽनुपपन्न इति पृच्छामः । अथ सङ्गतिमती जातिरेवानुपपन्नेत्युच्यते- तन्न —व्यक्तिनाशव्यक्त्यनुत्पाददशायामपि तां विना जातेः सत्त्वात् । अथ एकव्यक्तिनाशानुत्पादसमये सा स्यात् । व्यक्तिमात्रं विना तु न तिष्ठतीति चेन्न-मात्रपदार्थाभावात् । किमत्र व्यक्तिमात्रमिति व्यक्तिसामान्यं व्यक्तित्वमभिमतं उत सर्वा व्यक्तयः ; नाद्यः, व्यक्तित्वरूपसामान्यस्यैवमाक्षेपेऽपि विशेषानाक्षेपस्य प्रागुक्तत्वात् । नान्त्यः, अनन्तानां तासां दुर्ग्रहतया आक्षेपायोगात् ; गामानयेत्यादौ सर्वत्र सर्वव्यक्त्याक्षेपासंभवाच्च । ननु न जात्या व्यक्त्याक्षेपः ; किं तु व्यक्तिज्ञानं विना जातिज्ञानमनुपपन्नमिति जातिज्ञानेन व्यक्तिज्ञानाक्षेप इति चेन्न —जातिमात्रशक्तिवादिनस्ते व्यक्तिज्ञानाभावेऽपि शब्दाज्जातिज्ञानस्योत्पादात् । अथ ज्ञानस्य जातिविषयताऽन्यथानुपपन्नेति जातिविषयतया व्यक्ति-

एवं तर्ह्येकज्ञानगोचरतायां किमनुपपन्नं १ किं प्रतिपादयेदिति ॥ 'जातीनामन्वयानुपपत्त्या व्यक्तिरवसीयत' इति चेन्न— २ परस्पराश्रयप्रसङ्गात् ॥

[55] स्यादेतत्—प्रतिबन्धं विनाऽपि पक्षधर्मताबलात् यथा लिङ्गं विशेषे पर्यवस्यति, तथा सङ्गतिं विनाऽपि शब्दः शक्तिविशेषाद्विशेषे पर्यवस्यति । स एवाऽऽक्षेप इत्युच्यते इति चेत्—न तावत् प्रतीतिः क्रमेण ; अपेक्षणीयाभावेन विरम्यव्यापारायोगात् ॥ जातिप्रत्यायनमपेक्षत इति चेत्— कृतं तर्हि शब्दशक्तिक(क्तिभेदक)ल्पनया ;

विषयताया आक्षेप इति चेत्—तर्हि व्यक्त्यविषयकत्वे जातिविषयकत्वासम्भवात् शब्दतो जायमानं ज्ञानं जातिव्यक्त्युभयविषयकमेव स्वीकार्यमिति किं प्रत्याक्षेपकत्वाभावे कस्यानुपपन्नत्वमस्ति । जातेरिव व्यक्तेरपि गृहीतत्वादुभयत्र सङ्गतिसिद्धेर्न तयोराक्षेप्याक्षेपकभावः । व्यक्तिविषयताया जातिविषयतायाश्चागृहीतत्वात् ग्रहणस्यानावश्यकत्वाच्च न तत्रैकस्य अनुपपन्नत्वज्ञानं, नाप्यन्यस्याः प्रतिपाद्यत्वम् । ननु व्यक्तिज्ञानं विना जातिज्ञानं भवत्येव ; किन्तु तस्याः व्यक्तिद्वारैवान्वयो वक्तव्यः ; गौः शुक्लेत्यादौ सर्वत्र व्यक्तिं विनाऽन्वयासम्भवादिति चेत्—तर्हि पदार्थान्तरान्वयोऽनुपपन्नः सन् व्यक्तिमाक्षिपतीति सिद्धम् । तथा चान्वये गृहीते तदन्यथानुपपत्त्या व्यक्त्याक्षेपः ; व्यक्त्याक्षेपे सति योग्यतादिबलादन्वयग्रहणमित्यन्योन्याश्रयः ।

[ननु गङ्गायां घोष इत्यादौ प्रवाहे घोषान्वयानुपपत्त्या लक्षणाऽऽश्रीयते । न हि तत्रान्योन्याश्रयः । तद्वदिहेति चेन्न—व्यक्तिशक्तिवादिभिः गङ्गायां मत्स्य इत्यादौ सप्तम्यर्थमत्स्याधिकरणत्वे प्रवाहान्वयस्य क्लृप्तत्वात् गङ्गायां घोष इत्यत्र घोषाधिकरणत्वं तदभावाधीरलक्षणा स्वीक्रियते । जातिशक्तिवादे तु गौः शुक्लेत्यादौ गवादिशब्दस्य व्यक्तिपरत्वनिश्चय एव विभक्तेरभेदार्थकत्वनिश्चयः, अभेदार्थकत्वनिश्चये सत्येव प्रकृतेर्व्यक्तिपरत्वनिश्चय इति दोषो दुरुद्धर इत्यलम् ।]

[55] अस्त्वेतत् । तृतीयः पक्षो गृह्यते । शक्तिविशेषाद्व्यक्तेग्रहणमेवाक्षेपः । शक्तिर्नाम स्वरूपसती कार्यकरी ; सङ्गतिस्तु ज्ञायमाना कार्यकरी । पूर्वा व्यक्तिविषयिणी ; परा जातिविषयिणी । तथा च—यथा धूमादिलिङ्गं सामान्यतो वह्निव्याप्यं पर्वतीयवह्निनिरूपितव्याप्त्यभावेऽपि विशेषस्यैव पक्षधर्मत्वात्तद्बलात्पर्वतीयवह्न्यनुमितिं जनयति तथा-शब्दो व्यक्तिविषये सङ्गत्यभावेऽप्युक्तशक्तिबलाद्व्यक्तिरूपविशेषमुपस्थापयतीति चेत्—उच्यते । किं जातिव्यक्तिप्रतीती क्रमेण

१ बो॰ 'अत्रानुपपन्नमात्रनिराकरणप्रकरणे किं प्रतिपादयेदिति प्रक्रिय(या?) या असङ्गतत्वात्प्रमादकृतः पाठ इति संप्रदायः' इति । २ प्र॰ 'जातिज्ञाने सति लक्षणया व्यक्तिज्ञानं व्यक्तिमादाय जातिज्ञानमित्यन्योन्याश्रयः ।'

तावतैव तत्सिद्धेः॥ ओमिति चेन्न—व्यक्त्यनालम्बनाया जातिप्रतीतेरसम्भवादित्युक्तत्वात्; प्रमाणान्तरापातप्रसङ्गाच्च॥ स्मरणं तदित्ययमदोष इति चेन्न—अननुभूतानन्वयप्रसङ्गात्॥ अस्त्वेकैव प्रतीतिरिति चेत्—कृतं तर्हि शक्तिभेद(द्वय)कल्पनया॥

(56) एवं च यथा सामान्यविषया शक्तिरेकैव तद्वति पर्यवस्यति, तथा सामान्याश्रयासङ्गतिस्तद्वति पर्यवस्येदिति॥ न च नित्या अपि वर्णाः स्वरानुपूर्व्यादिहीनाः पदार्थैः सङ्गम्यन्ते। न च तद्विशिष्टत्वमपि तेषां नित्यम्। तस्मात्तत्तज्जातीयक्रोडनिविष्टा एव पदार्थाः पदानि च संबध्यन्ते, नातोऽन्यथेति, नैतदनुरोधेनापि शब्दस्य नित्यत्वमाशङ्कनीयमिति॥

उत युगपत्। न तावत्क्रमेण, सङ्गतिज्ञानस्य स्वरूपसत्याः शक्त्याश्च कारणस्य सत्त्वेन, नान्यत्किञ्चिदपेक्षणीयमिति च, शक्तिविशेषस्य क्षणं जोषं स्थित्वा पश्चात्कार्यकरत्वायोगात्। यदि जातिज्ञानमपेक्ष्यं, तर्हि शब्दे किं शक्तिकल्पनया; संङ्गतिज्ञानाज्जातिज्ञानं, जातिज्ञानाच्च व्यक्तिज्ञानमित्येव सुवचतया तन्मात्रेणैव व्यक्तिज्ञानसिद्धेः। अस्तु तथैवेति चेन्न—व्यक्त्यविषयकजातिज्ञानासंम्भवान्न संङ्गतेर्जातिमात्रोपस्थापकत्वमित्युक्तत्वात्। जातिसामग्र्याः व्यक्तिसामग्रीघटितत्वनियमस्य प्रत्यक्षमात्रविषयकतया शब्दाज्जातिमात्रोपस्थितिसंम्भवेऽपि शब्दस्य जातिज्ञानकारणत्वम् जातेश्च व्यक्तिज्ञानकरणत्वमिति त्वन्मते जातिरूपससमप्रमाणकल्पनापत्तेः। नन्वाक्षेपादिपक्षस्य दूषितत्वादेकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमिति जातिज्ञानजन्यं व्यक्तिज्ञानं स्मरणात्मकमिति नानुभवरूपप्रमाकरणान्तरप्रसक्तिरिति चेत्—न—तथा सति अननुभूतव्यक्तिस्मरणासम्भवेन कविकाव्यादावननुभूतापूर्वार्थबोधासम्भवप्रसङ्गात्। अतो न क्रमिकी प्रतीतिः। अस्तु तर्हि युगपत्प्रतीतिः; तथा चैकैवोभयविषयिणीति चेत्, तर्ह्येकैव सङ्गतिर्जातिमिव व्यक्तिमप्युपस्थापयतीति सुवचमिति शक्तिभेदो व्यर्थ इति॥

(56) एवं च शक्तेर्गोव्यक्तिविषयत्वेऽपि गोत्वपुरस्कारेण तद्विषयत्वान्नास्थिरत्वानन्त्ये दोषमावहत इत्येव वक्तव्यम्। तथा शब्दानामस्थिरानन्तत्वेऽपि तद्गतसामान्यपुरस्कारेण सङ्गतेस्तन्निष्ठत्वकथनान्न दोषः। सामान्यवद्विषयकत्ववत् सामान्यवन्निष्ठत्वसम्भवात्। नन्वर्थनिष्ठस्य गोत्वादेःसामान्यस्य स्थिरत्वेऽपि गोशब्दादिनिष्ठस्य गकारोत्तरौकारत्वाद्यानुपूर्वी रूपस्य सामान्यस्य गकारोत्तरत्वांशघटकानेकानित्यपदार्थघटिततया स्थिरत्वाभावात् कथं तुल्यत्वमिति चेत्, तर्हि वर्णनित्यत्वपक्षेऽपि केवलवर्णेषु सङ्गत्यभावादस्थिरानुपूर्वीविशिष्टेष्वेव सा वाच्येति दोषः समानः। न खलु नित्या अपि वर्णाः स्वरानुपूर्व्यादिहीनाः पदार्थैः सङ्गम्यन्ते। वर्णसाम्येऽपि स्थूलपृषती इन्द्रशत्रुरित्यादौ बहुव्रीहितत्पुरुषभेदेनान्तोदात्ताऽऽद्युदात्तस्वरभेदेनार्थभेदात्; सरः रस

[57] यदा च वर्णा एव न नित्याः, तदा कैव कथा पुरुषविवक्षाधीनानुपूर्व्यादिविशिष्टवर्णसमूहरूपाणां पदानाम् ? कुतस्तरां च तत्समूहरचनाविशेषस्वभावस्य वाक्यस्य ? कुतस्तमां(मां च?) तत्समूहस्य वेदस्य ?

[58] परतन्त्रपुरुष[1]परम्पराधीनतया प्रवाहाविच्छेदमेव नित्यतां ब्रूम इति चेत्—एतदपि नास्ति ; सर्गप्रलयसम्भवात् ॥ अहोरात्रस्याहोरात्रपूर्वकत्वनियमात्, कर्मणां

इत्यादावानुपूर्वीभेदेनैवार्थभेदात् । न च वर्णानां स्वरूपनित्यत्ववत् स्वरादिविशिष्टत्वमपि नित्यम्—स्वरादीनां ध्वनिनिष्ठानामनित्यतयाऽऽरोपितत्द्वैशिष्ट्यस्याप्यनित्यत्वात् ; तद्रहितवर्णमात्रे च सङ्गत्यभावात् । अतो गकारोत्तरत्वविशिष्टौकारत्वरूपानुपूर्वीघटकपदार्थानां तत्तद्व्यक्त्यखण्डसामान्यरूपेण ग्रहणात्प्रतिगोशब्दमानुपूर्वीभेदेऽप्यैक्यं सम्पाद्यमिति तादृशसामान्यधर्मक्रोडीकृतानुपूर्वीविशिष्टतया गोशब्दानामनेकेषामप्यैक्यं निराबाधम् । तस्माद्गोजातीयत्वेन क्रोडीकृता अर्थव्यक्तयो गोशब्दजातीयत्वेन क्रोडीकृता गोशब्दव्यक्तयश्च सङ्गतिमत्य इत्येतस्मादन्यः प्रकारो न भवति । अतश्च न सङ्गतिमत्त्वानुरोधेन शब्दनित्यत्वमाशङ्कनीयमिति सिद्धमुत्पत्तिमत्त्वादनित्यः शब्द इति । तत्सिद्धं प्रत्यक्षानुमानाभ्यां शब्दध्वंसादिसिद्ध्या वर्णा अनित्या इति ।

[57] एवं च वर्णानामेवानित्यत्वे पुरुषविवक्षाधीनानुपूर्व्यादिविशिष्टवर्णसमूहरूपाणां पदानां नित्यत्वं कुतः ? तादृशपदसमुदायात्मनो वाक्यस्य तत्कुतस्तराम् ? तादृशवाक्यसमूहरूपस्य वेदस्य च तत्कुतस्तमाम् ? एवं वर्णनित्यत्वेऽपि रघुवंशादिवदनित्यत्वस्यावश्यकत्वे वर्णानित्यत्वे तदनित्यत्वं दुरपह्नवम् । तस्मादनित्यत्वाद्वेदस्य न वक्तृगुणानपेक्षं प्रामाण्यं सेत्स्यतीति ।

[58] ननु मा भूत् ध्वंसप्रागभावाप्रतियोगित्वरूपं नित्यत्वं वर्णानाम् । तथाऽपि परतन्त्राणां पूर्वपूर्वोच्चारणाधीनोच्चारणकृतां पुरुषाणां परम्परयोत्पाद्यत्वेन प्रवाहस्य एकापगमकालिकतज्जातीयान्यसम्बन्धरूपस्याविच्छेद एव नित्यत्वमिति ब्रूमः । एवं चैकैकप्रयुक्तस्यापि वेदशब्दराशेरन्यप्रयोगाधीनतया लौकिकवाक्य इव किञ्चित्पुरुषस्वातन्त्र्यमूलकत्वाभावेन न वक्तृगतयथार्थज्ञानादिगुणापेक्षत्वप्रसक्तिरिति अनपेक्षमेव प्रामाण्यमिति चेत्—एतदपि नित्यत्वं न भवति, सर्गप्रलयसम्भवात् प्रलयसम्भवात्प्रलयकाले विच्छेदस्यावश्यकत्वात् । ननु सर्गाऽऽद्यत्वेनाभिमतोऽहोरात्रोऽप्यहोरात्रपूर्वकः अहोरात्रत्वात् अद्यतनाहोरात्रवत्, पुण्यपापात्मककर्माणि न युगपन्निरुद्धस्वकार्याणि विषमविपाककालकत्वात्, ब्राह्मणादिवर्णगताश्वादिव्यक्तिविशेषाः तादृशव्यक्तिजन्याः ब्राह्मणादित्वात् । अन्यथा ब्राह्मणमातापितृजन्यत्वाद्यभावे आद्यस्यैव ब्राह्मणत्वाद्यसिद्ध्यापत्तेः ।

---

१ पुरुषपराधीनतया क. ख. पाठः । बो. 'पूर्वपूर्वोच्चारयितृपरतन्त्रोत्तरोच्चारयितृपरम्परा' इति । प्र. 'तज्जातीयानुपूर्वीज्ञानजन्यत्वव्याप्यज्ञानविषयत्वं परतन्त्रपुरुषपरम्पराधीनत्वम्' ।

विषमविपाकसमयतया युगपद्वृत्तिनिरोधानुपपत्तेः, वर्णादिव्यवस्थानुपपत्तेः, समयानुपलब्धौ(नुपपत्तौ) शाब्दव्यवहारविलोपप्रसङ्गात् , घटा(टपटा)दिसंप्रदायभङ्गप्रसङ्गाच्च कथमेवमिति चेत्—

[59] उच्यते—वर्षादिवद् भवोपाधिः वृत्तिरोधः सुषुप्तिवत् ।
उद्भिद्वृश्चिकवद्वर्णाः मायावत्समयादयः ॥ २ ॥

तत्पूर्वकत्वमात्रे सिद्धसाधनात् (नम्), अनन्तरतत्पूर्वकत्वे अप्रयोजकत्वात् ; वर्षादिदिनपूर्वकतद्दिननियमभङ्गवदुपपत्तेः। राश्यादिविशेषसंसर्गरूपकालोपाधिप्रयुक्तं हि तत् ;

अन्यथाऽपि प्रक्षणत्वाद्यङ्गीकारे सर्वत्र तदापत्त्या व्यवस्थानुपपत्तिः । एवं घटादिशब्दव्यवहारविशेषः तच्छब्दव्यवहारपूर्वकः शब्दव्यवहारत्वात् । अन्यथा पूर्वव्यवहाराभावे शक्तिग्राहकाभावात्सङ्केताग्रहणात्सर्वव्यवहारविलोपप्रसङ्गः । तथा घटादिनिष्पादनक्रियाविशेषः तन्निष्पादनक्रियान्तरपूर्वकः निष्पादनक्रियात्वात् । अन्यथा कर्तव्यप्रकारपरिज्ञानाभावेन तन्निष्पादनसंप्रदायभङ्गप्रसङ्गः । तदेभिः पञ्चभिरनुमानैः न कदाचिदनीदृशं जगदिति सिद्ध्यतीति कथं सर्गप्रलयसम्भव इति चेत्—

[59] उच्यते—अत्र तावदहोरात्रे वर्षर्तुदिनादाविवोपाधिरस्ति । स चोपाधिरिह भवो ब्रह्माण्डस्थितिः । युगपत् सर्वकर्मवृत्तिविरोधश्च सुषुप्तिवत्सम्भवति । आदौ सजातीयवर्णव्यक्त्यभावेऽपि वर्णादयः प्रथमिकतण्डुलीयकाद्युद्भिद्वत् वृश्चिकादिवच्च भवितुमर्हन्ति। प्रथमं पुरुषाभावेऽपि सङ्गतिग्रहनिष्पादनप्रक्रियादिकं संप्रति मायाबलादिव आदावीश्वरव्यापारबलादवगम्यते । अतो भवदुक्तमनुमानं सर्वमप्रयोजकम् ।

तथा हि—प्रथमेऽनुमानेऽहोरात्रपूर्वकत्वमात्रे साध्ये सिद्धसाधनम् । प्रलयपूर्वमव्यहोरात्रमादायापि प्रलयोत्तराहोरात्रे तत्पूर्वकत्वस्य सुवचत्वात् । अव्यवहिताहोरात्रपूर्वकत्वे साध्ये च हेतुरप्रयोजकः । इदं वर्षर्तुदिनं वर्षर्तुदिनपूर्वकं वर्षर्तुदिनत्वादिति वर्षर्तुदिनसामान्ये वर्षर्तुदिनपूर्वकत्वनियमस्य यथा भङ्गः, तथाऽत्र भङ्गसम्भवात् । तद्धि वर्षादिनं, सूर्यस्य सिंहराश्यादिसंसर्गरूपो यः कालोपाधिस्तत्प्रयुक्तम् । तादृशराशिसंसर्गाभावे वर्षादिनत्वव्यावृत्तेः । तथाऽत्रापि सृष्टेरुत्तरोत्तरानुवृत्तिनिमित्तभूतो यो ब्रह्माण्डस्थितिरूपः कालोपाधिस्तन्मूलकत्वादहोरात्रस्य मूलाभावे व्यावृत्तिरिति । न च ब्रह्माण्डस्थितिरेव सार्वकालिकी तस्यानुत्पन्नत्वादनश्वरत्वाच्चेति मन्तव्यम् । ब्रह्माण्डमुत्पन्नं नश्वरं च सावयवत्वादित्यनुमानाद्विपर्ययसिद्धेः ।

[ननु वर्षादिनपूर्वकत्वानुमाने सिंहकन्यासंसर्गः कथमुपाधिः ? शरदाद्यदिने साध्याव्यापकत्वात् ; वर्षाप्रथमदिनेऽप्युपाधिसत्त्वेन साधनव्यापकत्वाच्च । न च वर्षादिनत्वरूपसाधनावच्छिन्नसाध्यव्यापकत्वं विवक्षितमिति वाच्यम्—एवमपि साधनाव्यापकत्वाभावात् । एवं प्रकृते-

तदभाव एव व्यावृत्तेः । तथेहापि सर्गानुवृत्तिनिमित्तब्रह्माण्डस्थितिरूपकालोपाधिनिबन्धन(धिप्रयुक्त)त्वात्तस्य, तदभाव एव व्यावृत्तौ को दोषः । न च तदनुत्पन्नमनश्वरं वा ; अवयवित्वात् ॥

[60] वृत्तिनिरोधस्यापि सुषुप्त्यवस्थावदुपपत्तेः । न हि—'अनियतविपाकसमयानि कर्माणी'ति तदानीं कृत्स्नान्येव भोगा[1]विमुखानि । न ह्यचेतयतः कश्चिद्भोगो नाम ; विरोधात् ॥ कस्तर्हि तदानीं शरीरस्योपयोगः ? तं प्रति न कश्चित् । तर्हि किमर्थमनुवर्तते ? उत्तरभोगार्थं ; चक्षुरादिवत् ॥ प्राणिति किमर्थं ? श्वासप्रश्वाससन्तानेनाऽऽयुषोऽवस्थाभेदार्थम् ; तेन भो(भेदे भो)गविशेषसिद्धेः ॥

ऽहोरात्रपूर्वकत्वानुमानेऽपि ब्रह्माण्डस्थितिरूपाधिर्न भवतीति चेन्न—सिंहसंसर्ग इत्यनेन सिंहप्रथमदिनीयसंसर्गोपरितनसंसर्गमात्रविवक्षेति साधनाव्यापकत्वम् ; एवं प्रकृतेऽपीत्याहुः (प्र.म.)॥ एवमपि इहोपाधिशब्देन कालोपाधिरेव कालावच्छेदकरूपो विवक्ष्यते ; न तु हेतूपाधिः । तथा च वर्षादिनस्य सिंहादिसंसर्गप्रयुक्तत्वे कथिते हेतोरप्रयोजकत्वमुचितोपाधिकल्पनेन भाव्यमित्याशय इति सुवचम् ॥ यद्वा यथा साध्यव्याप्यत्वस्योपाधिनिष्ठस्य हेतावारोपादुपाधेरुपाधित्वम् , तथा साधनव्यापकत्वस्योपाधिनिष्ठस्य साध्ये आरोपादुपाधेरुपाधित्वमित्यपि सुदूरविमर्शेऽपि सुवचम् । एवं च प्रकृते वर्षादिनत्वं राशिविशेषसंसर्गप्रयुक्तम्, न तु वर्षादिनपूर्वकत्वप्रयुक्तमिति सिद्ध्यति । प्रयुक्तत्वं व्याप्यत्वम् ॥ अथ वाऽहोरात्राव्यवहितपूर्वकालोऽहोरात्ररूपः अहोरात्रपूर्वकालत्वादित्यनुमाने ब्रह्माण्डस्थितिरुपाधिः ; वर्षादिनपूर्वकालो वर्षादिनात्मकः वर्षादिनपूर्वकालत्वादित्यत्र सिंहकन्यासंसर्ग उपाधिः ; ग्रीष्मान्तर्भावेण साधनाव्यापकत्वम् । एवं च वर्षादिनपूर्वकालत्वावच्छेदेन वर्षादिनत्वासिद्धौ वर्षादिनस्य वर्षादिनपूर्वकत्वाभावस्तुल्यवित्तिवेद्य इति प्रकृतहेतोरपि दुष्टत्वम् ॥]

[60] एवं द्वितीयमप्यप्रयोजकम् ; कर्मणां भोगजननव्यापारनिरोधस्यापि सुषुप्त्यवस्थायामिव युगपत्संभवात् । कर्मणां विपाकसमयोऽव्यवस्थित इत्येतावता न खलु सुषुप्तिसमये कृत्स्नान्यपि कर्माणि स्वकार्यभोगनिष्पादनवैमुख्यं न बिभ्रति । विमुखान्येव हि भवन्ति ॥ अस्ति तदाऽपि भोग इति चेन्न —चेतनाहीनस्य भोगासम्भवात् । भोगो हि सुखदुःखसाक्षात्कारः कथं चैत-

---

१ भोगाविमुखानि क. ख. पाठोऽशुद्धः । बो. 'कृत्स्नान्यपि भोगाविमुखानि न हि भवन्ति । किं तु भोगविमुखान्येव' । क. २ पाठस्तु 'न हि .... न तदानीं कृत्स्नान्येव भोगविमुखानि' इति । वस्तुत आत्मतत्त्वविवेककारस्यदृष्टौ प्रवाहोच्छेदपदयोः सृष्टिप्रलयपरत्वमेव । तथा च अन्यथा कृतहानप्रसङ्गादित्यस्य पुनः सर्गानङ्गीकारे कृतहानं स्यादिति यथाश्रुत एवार्थ इति । गीराश्लोकेऽपि 'सर्गप्रलयविवक्षाऽपि भाव्ये'ति ॥

[61] **एकस्यैव तत् कथञ्चिदुपपद्यते, न तु विश्वस्येति चेत्—अनन्ततया अनियतविपाकसमयतया उपमर्द्योपमर्दकस्वभावतया च कर्मणां, विश्वस्य, एकस्य वा को विशेषः, येन तन्न भवेत् । भवति च सर्वस्यैव १ सुस्वापः ॥ क्रमेण, न तु युगपदिति चेन्न—कारणक्रमायत्तत्वात्कार्यक्रमस्य । न च स्वहेतुबलायातैः कारणैः क्रमेणैव भवितव्यम्; अनियतत्वादेव सर्वग्रासवत् । ग्रहाणां ह्यन्यदा समागमानियमेऽपि, तथा कदाचित् स्यात्, यथा कलाद्यनियमेऽपि सर्वमण्डलोपरागः स्यात्–त्रिदोषसन्निपातवद्वा । यथा हि वातपित्तश्लेष्मणां चयप्रकोपप्रशमक्रमानियमेऽपि एकदा सन्निपातः स्यात्, तदा देह-**

न्याभाव इति । शरीरस्य निद्राणं प्रत्यनुपयोगेऽपि तदा तदनुवृत्तिरुत्तरकाले भोगजननार्थम् ॥ तर्हि तदा किमर्थं प्राणवैशिष्ट्यमिति चेत्–आयुर्हि नाम पुरुषभेदेन प्रतिनियतसंख्याविशिष्टोच्छ्वासनिश्वाससन्तानः । तत्रैतत्संख्याकनिश्वासानन्तरं अयं भोग इति व्यवस्थाऽस्ति । अतस्तदुपयोग्यवस्थाभेदार्थं तत् ।

[61] नन्वेवं भोगवैमुख्यं कदाचिदेकस्य कथञ्चिदुपपद्यते; न तु सर्वस्यापि ब्रह्माण्डान्तर्गतस्य प्राणिन इति चेत्— अनन्तत्वात्, अनियतविपाकसमयत्वात्, दुर्बलान्यकर्मोपमर्देन प्रवृत्तिशीलत्वाच्चैकपुरुषीयकर्माण्येव कथं सर्वाणि विमुखानीति पृच्छामः । यद्यनन्तत्वादेव कञ्चित्कालं मिथः प्रतिबन्धककर्मसम्भावनया, 'नायं विपाकसमय' इति कृत्वा तद्वैमुख्यमेकविषये युक्तमित्युच्यते— तर्ह्येकस्य विश्वस्य वा को विशेषः, येन विशेषेण सर्वपुरुषकर्मवैमुख्यं युगपन्न भवेत् । भवति हि सर्वस्यैव सुषुप्तिः । ननु देशभेदेन रात्र्यादिभेदात्क्रमेण सुषुप्तिः सर्वस्य भवति, न तु युगपदिति चेत्-- कारणस्य क्रमिकत्वात्तत्र कार्यस्य क्रमिकता । यदा तु तत्तत्कार्योत्पादककारणयौगपद्यम् । तदा युगपदपि कार्यं भवितुमर्हति । न ह्येकस्य कारणं अन्यस्य कारणं च क्रमिकमेवेति नियमः; तस्य तस्य स्वस्वहेतुबलायत्तत्वेनाव्यवस्थितत्वात्, सर्वग्रासवत्; त्रिदोषसन्निपातवच्च । अथ दृष्टान्तौ विभज्येते । सूर्यादिग्रहाणां मिथः समागमस्तावन्न नियतः; कदाचिद्भवति, न भवति चेति । तत्रापि चन्द्रस्य राहुणा ग्रहणमेकद्व्यादिकलांशेष्वनियतम् । एवं सत्यपि तथा कदाचिद्भवति, यथा सर्वं मण्डलं ग्रस्यते । एवं वातः पित्तं श्लेष्मेति सन्ति शरीरे त्रयो दोषाः; येषां साम्यवैषम्याभ्यामारोग्यानारोग्ये । तेषां समावस्थारूपश्चयः कदाचित्, कदाचिदेकस्य प्रकोप आधिक्यम्, कदाचित्कस्यचित्प्रशमो ह्रास इत्येषां क्रमानियमेऽपि एकदा त्रयाणामपि बलवान् प्रकोपः, यः सन्निपात इत्युच्यते, यदा च देहः

---

१ सुप्वाप इति क. ख. पाठः । प्र. "सुस्वाप इति युक्तः पाठः; 'सुविनिर्दुर्भ्यः सुपि सूति समाः' इत्यनेन कृतसंप्रसारणस्यैव सुपेः षत्वविधानात्" इति ।

संहारः, तथा कालानलपवनमहार्णवानां सन्निपाते ब्रह्माण्डदेहप्रलयावस्थायां युगपदेव भोगरहिताश्चेतनास्स्युरिति को विरोधः ? ॥ तथाऽपि विदेहाः कर्मिण इति दुर्घटमिति चेत्—किमत्र दुर्घटम् ; भोगविरोधवत् शरीरेन्द्रियविषयनिमित्तनिरोधादेव तदुपपत्तेः॥

[62] वृश्चिकतण्डुलीय१कादिवत् वर्णादिव्यवस्थाऽप्युपपद्यते । यथा हि वृश्चिकपूर्वकत्वेऽपि वृश्चिकस्य, गोमयादाद्यः ; तण्डुलीयकपूर्वकत्वेऽपि तण्डुलीयकस्य, तण्डुलकणादाद्यः ; वह्निपूर्वकत्वेऽपि वह्नेः, अरणेराद्यः ; एवं क्षीरदधिघृततैलकदली २काण्डादयः तथा मानुषपशुगोब्राह्मणपूर्वकत्वेऽपि तेषां, प्राथमिकास्तत्तत्कर्मोपनिबद्धभूतभेदहेतुका एव । स एव हेतुः सर्वत्रानुगत इति सर्वेषां तत्सान्तानिकानां समान-

संहतो भवति । एवमेव ब्रह्माण्डाख्यस्य देहस्य प्रलयकालिकपावक-पवन-महार्णवाख्यानां वातपित्तश्लेष्मणां सन्निपाते ब्रह्माण्डं प्रलीयत इति युगादेव भोगराहित्यं जीवानां नानुपपन्नम् । ननु सुषुप्तिवत् भोगराहित्यसम्भवेऽपि तृणजलूकावत्संसरतां कर्मरूपकारणवतां देहरूपकार्यराहित्यं न सङ्गच्छते । अतः कथं प्रलय इति चेत्—सङ्गच्छत एव । यथा हि सत्यपि कारणे कदाचिद्भोगनिरोधः सहकार्यभावात्, तथा कर्मसत्त्वेऽपि शरीरेन्द्रियविषयाणामुत्पत्तौ यन्निमित्तं परमाणुगतद्रव्यारम्भकसंयोगादि तन्निरोधाद्विदेहत्वोपपत्तिरिति । तस्माद्युगपन्निरुद्धवृत्तिकत्वं विषमविपाकसमयत्वेऽप्युपपन्नमिति ।

(62) एवं तृतीयहेतुरप्यप्रयोजकः ; वृश्चिकतण्डुलीयकादिवत् वर्णादेर्व्यवस्थितत्वात् । वह्निवृश्चिकतण्डुलीयकादीनां स्वसजातीयोत्पन्नत्वव्यवस्थायामपि प्राथमिकोत्पत्तिररणिगोमयतण्डुलकणादिभ्यो विजातीयेभ्यो हि दृश्यते । एवं क्षीरादावपि । अन्तत आद्यक्षीरादेरक्षीरपरमाण्वादिजन्यत्वं प्रसिद्धम् । कदलीकाण्डानां कदलीव्यक्त्यन्तरजन्यत्वेऽपि कस्यचित्काण्डस्य दग्धवेत्रबीजाज्जन्म दृश्यते । यथेदं सर्वं, तथैव पशुमनुष्यरूपसामान्य ब्राह्मणवर्णादिविशेषाणां सजातीयपूर्वकत्वेऽपि प्राथमिकतत्तद्व्यक्तीनां तत्तत्पुण्यपापरूपकर्मसम्मिलितविलक्षणभूतविशेषाधीनत्वम् । प्राथमिकव्यक्तिकारणभूतविशेषस्वरूपहेतुकत्वादेव च सर्वेषां प्रथमव्यक्तिसन्तानगतानां तत्समान-

१ प्र. 'तण्डुलीयक उद्भिद्दृष्टान्तः' । म. 'उद्भित्पदेन शाकविशेष एव दृष्टान्ततयोक्त इति भावः' । अयं पत्रशाकविशेषः । वाचस्पत्ये, 'स्वादुः पाके त्वसृक्पित्तविषघ्नस्तण्डुलीयकः । हन्ति वातं विड्विबन्धं मूत्रवातकफहितः ॥' इति । एवं च उद्भिद्वृश्चिकवत, 'वृश्चिकतण्डुलीयकादिवदि' ति व्युत्क्रमपाठः पूर्वस्याल्पाच्तरत्वात् ।

२ भामत्यां (निर्णयसागरमुद्रणे पु. १५) 'यथा दावाग्निदग्धानां वेत्रबीजानां कदलीकाण्डजनकत्वम्' ।

जातीयत्वमिति किमसङ्गतम्॥ गतं तर्हि गोपूर्वकोऽयं गोत्वादित्यादिना। न गतम्; योनिजेष्वेव व्यवस्थापनात्। मानसास्त्वन्यथापीति॥ गोमयवृश्चिकादिवदिदानीमपि किं[पि तथा किं] न स्यादिति चेन्न-कालविशेषनियतत्वात्कार्यविशेषाणाम्। न हि वर्षासु गोमयाच्छालूक इति हेमन्तेऽपि स्या(पि किं न स्या)त्॥

[63] समयोऽप्येकेनैव, मायाविनेव, व्युत्पाद्यव्युत्पादकभावावस्थितनानाकार्याधिष्ठानात् व्यवहारत एव सुकरः। यथा हि मायावी सूत्रसञ्चाराधिष्ठितं दारुपुत्रकं, 'इद-

---

जातीयत्वमिति न दृष्टान्तोपबृंहितेऽर्थे काचिदनुपपत्तिः। ननु तर्हि प्रथमे गवादौ व्यभिचारात्, अयं गोपूर्वकः गोत्वादित्यादेरनुमानत्वं गतमिति चेत्—न गतम्—योनिजमात्रे तथाऽनुमानात्। अतो योनिजत्वे सतीति विशेषणान्न दोष इति। ये पुनर्महतां मन सङ्कल्पमात्राधीनाः ते सजातीयजनकानपेक्षाः भवन्तीति योनिजमात्र एवेयं व्यवस्थेति। नन्वेवमिदानीमपि गोमयवृश्चिकादिवत् सजातीयनिरपेक्षा गवाद्युत्पत्तिः सर्गादाविव स्यादिति चेन्न-तत्तत्कालस्यापि तथा तथा कार्यजनने कारणत्वेन तत्तत्कार्यस्य तदा तदा व्यवस्थितत्वात्। न खलु, गोमयाद्वृश्चिक उत्पद्यत इतीदं वर्षासु दृष्टं हेमन्तेऽपि स्यादिति युक्तं प्रष्टुम्। अत उद्भिद्वृश्चिकादिकार्यान्तरवदेव वर्णव्यवस्थापीति।

[63] यः पुनस्तुरीयो हेतुः, तत्राप्युच्यते। एक एव सर्गादौ नरनारायणादिवत् प्रतिपाद्यपुरुषात्मना प्रतिपादकपुरुषात्मना चानेकं कार्यं मायावी वाधिष्ठाय व्यवहारं प्रतिपादकरूपः सन् वाचिकं, प्रतिपाद्यरूपः सन् कायिकं च करोति। ततश्च शब्दार्थयोः सङ्गतिः सर्वेषामादौ सुग्रहा भवति॥ मायाविनोऽपि नानाकार्याधिष्ठानं न निश्चितं दृष्टमिति चेत्--उच्यते। स खलु दारुमयीं प्रतिमां बध्वा सूत्रं हस्ते कुर्वन् तां यथापेक्षं चालयन्नेवाह, 'इदमानये'ति। स च दारुपुत्रकस्तथैव कुर्वन्निव चलति। निकटस्थो बालश्चानयोर्व्यवहारादिव तस्मादपि व्यवहारात् दृश्यमानात् 'दारुपुत्रकक्रियाक्रियापरोऽयं मायाविव्यवहार' इति व्युत्पत्तिं लभते। एवमिहाप्यादौ शब्दार्थव्युत्पत्तिरेकाधीनैव भवति।

[न च प्रतिपादकपुरुषस्यैव प्रतिपाद्यशरीराधिष्ठातृत्वे तस्य प्रागेव ज्ञातृत्वात् तज्ज्ञानस्य प्रतिपादकवाक्याधीनत्वाभावात, अथ पुरुष एतच्छब्दाधीनैवंरूपज्ञानवान् एतच्छब्दानन्तरभाविहेत्वन्तरानधीन प्रवृत्तिमत्त्वादित्यनुमानासम्भवात् कथं शब्दस्य ज्ञानजनकत्वनिश्चयः; कथन्तरां च शब्दार्थसङ्गतिग्रह इति वाच्यम्—अचेतने दारुपुत्रके बोधाजनकादपि मायाविव्यवहाराच्छक्तिग्रहदर्शनेन तद्वदुपपत्तेः। वस्तुतः सर्गादावव्युत्पन्नानां एकस्यैव प्रतिपाद्यप्रतिपादकशरीरद्वयाधिष्ठातृत्वमित्यस्याग्रहीतत्वेन तदनुमानं निष्प्रत्यूहम्। न च पश्चात्पुरुषैक्यनिश्चये सत्यनुमानस्य

मानये'ति प्रयुङ्क्ते । स च दारुपुत्रकस्तथा करोति । तदा चेतनव्यवहारादिव १तद्दर्शी बालो व्युत्पाद्यते तथा-इहापि स्यात् ॥ क्रियाव्युत्पत्तिरपि तत्र एव कुलालकुविन्दादीनाम् ॥

[64] सर्गादावेव किं प्रमाणमिति चेत् विश्वसन्तानोऽयं दृश्यसन्तानशून्यैः समवायिभिरारब्धः सन्तानत्वात् आरणेयसन्तानवत् । वर्तमानब्रह्माण्डपरमाणवः पूर्वमुत्पादितसजातीयसन्तानान्तराः नित्यत्वे सति तदारम्भकत्वात् प्रदीपपरमाणुवदित्यादि ॥

बाधितत्वावगमान्न कार्यकरत्वमिति वाच्यम्—पश्चात्पुरुषैक्यनिश्चयवत् लोकव्युत्पादनार्थं शरीरद्वयपरिग्रह इत्यस्यापि ज्ञानसम्भवेन पूर्वानुमितसङ्ख्यांशस्याबाधितत्वेनादोषात् ।] एवं कुलालकुविन्दादीनामादौ क्रियाव्युत्पत्तेरपि तस्यैकस्य निर्माणकायमधितिष्ठतोऽनुष्ठानदर्शनादेव सम्भवात् पञ्चमहेतुरपि परास्त इति ।

[64] नन्वेवं सर्गप्रलयविषये व्यवहारकालेऽपि साधकं किमस्तीति चेत्—विश्वसन्तानोऽयं दृश्यसन्तानशून्यैः समवायिभिरारब्धः सन्तानत्वात् अरणिजन्याग्निसन्तानवत् वर्तमानब्रह्माण्डसम्बन्धिनः परमाणवः प्रागुत्पादित-प्रकृतसन्तानसजातीय सन्तानाः नित्यत्वे सत्यारम्भकत्वात् प्रदीपपरमाणुवदित्येवं कार्यपक्षकं कारणपक्षकं चानुमानमागमवत् प्रमाणमिति ॥ अत्र प्रागनुत्पादितसन्ताने कपालादौ व्यभिचारवारणाय नित्यत्वे सतीति । प्रथमानुमाने आरब्धत्वस्य सन्तानशून्यत्वांशस्य च साध्यान्तर्भावात् सर्गप्रलयसिद्धिः । द्वितीये सजातीयसन्तानान्तरोत्पादकत्वसाधनात्सर्गस्यैव; मध्ये विच्छेदाभावे एकसन्तानत्वप्रसङ्गेन सन्तानान्तरेत्यस्यायोगाद्विच्छेदसिद्ध्या प्रलयस्यापि सिद्धिः । नानासर्गसिद्ध्या सर्गप्रलयप्रवाहसिद्धिश्च । सन्तानो नाम कार्यकारणभावापन्नकार्यसमुदायः । तथा च द्व्यणुकमारभ्यान्त्यावयविपर्यन्तान्तर्गतपदार्थसमुदायः सन्तानः । तावच्छून्यकारणारभ्यत्वं तत्र साध्यते । यथाऽरणिदार्वन्तर्लीना अनलपरमाणवः प्राक् सन्तानशून्या एव सति मथने सन्तानमारभन्ते तथेति । प्रागपि सन्तानसद्भावे तूपलब्धिप्रसङ्गः । न चाग्नेर्द्व्यणुकात्मना स्थितत्वादनुपलब्धिः स्यादिति मथनात्प्राक् सर्वात्मना सन्तानशून्यत्वमारणेयेऽपि न निश्चितमिति वाच्यम्—अत एव दृश्यसन्तानशून्यारब्धत्वस्यैव साध्यत्वेनादोषात् । न च घटारम्भकपरमाणुजनितघटपर्यन्तसन्ताने व्यभिचारः; घटोत्पादविनाशतः प्राक् चूर्णात्मना तत्सत्त्वेन सर्वात्मना सन्तानशून्यारब्धत्वाभावादिति वाच्यम्—तस्यापि विश्वसन्तान इति पक्षीभूतसर्वसन्तानान्तर्गतत्वात् ॥ अथ वा घटपटादिषु संमार्जननिर्णेजनादिनाऽल्पावयवविश्लेषात्प्रतिदिन-

---

१ श्रीशतदूषणीव्याख्याने चण्डमारुते दृष्टोऽयमेव पाठो रम्य इत्यस्मदध्यात्मविद्यागुरवः । कारिकाव्याख्याने प्रकाशेपीदृशी रीतिर्लक्ष्यते । सर्वत्र पा० व्यवहारादिवत्तद्दर्शी ।

[65] अवयवानामावापोद्वापा[१] दुत्पत्तिविनाशौ च स्याताम्, सन्तानाविच्छेदश्चेति को विरोध इति चेन्न—एवं हि [२] प(घ)टादिसन्तानाविच्छेदोऽपि स्यात्।' विपर्ययस्तु दृश्यते। कन्थादि[३](कर्त्रादि) भोगविशेषसम्पादनप्रयुक्तोऽसाविति चेन्न—द्व्यणुकेषु तदभावात्। तथा च तन्ना(तद)वयवानामपगमाभावेऽनादित्वप्रसङ्गे द्व्यणुकत्वव्याघातः। तस्मात् यत्कार्यं यन्निबन्धनस्थिति, तदपगमे तन्निवृत्तिः। यत् यद्धेतुकम्, तदुपगमे तस्योत्पत्तिः। न च कार्यस्य स्थितिनिबन्धनं नित्यमेव; नित्यस्थितिप्रसङ्गात्। न च

मवयविनाशे सत्यपि स एवायमिति प्रत्यभिज्ञौपयिको योऽवशिष्टावयवाश्रितोऽविच्छेदेनानुवर्तमानो ऽवयविप्रवाहः स सन्तानः। तथा च ब्रह्माण्ड-तदन्तर्गतमहीमहीधरमहार्णवाद्यन्तर्गत एकै-कोऽप्यवयविसन्तानः प्रमाणसिद्धः स्वशून्यावयवारभ्य इति साध्यते। ईदृशसन्तानशून्यारभ्यत्वं च घटादावक्षतमिति सोऽपि दृष्टान्त इति।

[65] ननु सावयवे कतिपयावयवसंयोजन-वियोजनयोः सहजत्वात्तदधीनौ अवयविन एकैक-स्योत्पादो विनाशश्च स्यातां नाम। अथाऽप्येकावयविनाशसमयेऽन्यावयव्युत्पत्तिसम्भवेन सन्तान-विच्छेदासिद्ध्याऽनुमानमिदमप्रयोजकमिति चेन्न—एवं सति पटादिसन्तानस्याप्यविच्छेदप्रसङ्गात्। पटपरमाणुजनितपटान्तावयविसमुदाये तूलांशवत् पटाद्यंशोऽपि सर्वदोपलभ्येत। न चोपलभ्यते। विच्छेद एव तु दृश्यते। सन्तानपदद्वितीयार्थरीत्या त्वेवम्—ब्रह्माण्डमहीमहीधराद्यवयविधाराया अविच्छेदस्वीकारे पटादिरूपावयविधाराऽप्यविच्छिन्ना स्यात्। विच्छेद एव तु दृश्यत इति॥ ननु पटादिकर्तृप्रहीत्रादेः कन्थादिना यत् सुखदुःखान्यतरानुभवात्मकभोगसम्पादनं तत्प्रयुक्तः पटादिविच्छेदः, न सन्तानत्वप्रयुक्तः। तथा च विश्वसन्तानो विच्छिन्नः सन्तानत्वादित्यत्र विच्छेदप्रतियोगित्वरूपसाध्यव्यापकं भोगसम्पादकावयवकत्वमुपाधिरिति चेन्न—सन्तानविच्छेदो ह्यवयविधाराविनाशस्तत्तदवयविनाशसमुदायः। तत्रैकैकस्मिन्नपि नाशेऽवयवापगम एव कारणम्। यदि भोगसम्पादकावयवकत्वं विनाशेऽवयवापगमे वा प्रयोजकम्, तर्हि भोगसम्पादकावयव-कत्वाभावात् द्व्यणुकनाशो न स्यात्। एवं च प्रयोजकाभावेनावयवापगमाभावे विनाशाभावे च सति

---

१ अत्र समाहारादेकत्वम्। २ पा० एवं तर्हि। बो. 'एवं तर्हीति। यदि सन्ता-नानुच्छेदः स्यात् तर्हि अवयवापोद्धारलक्षणो विनाशोऽपि न स्यात्।'

३. बो. कन्थादीति न सन्तानत्वप्रयुक्तः पटादेर्विनाशः, किं तु विनष्टपटावयवारब्धकन्था-दिद्वारभोगविशेषप्रयुक्त इति। कर्त्रादिभोगविशेषेति पाठे त्वयमर्थः-पटादेः कर्तृणां कुविन्दा-दीनां पटाद्युत्पादनद्वारेण ये भोगास्तेषां तद्विनाशमन्तरेण विनाशानुपपत्तेस्तत्प्रयुक्तो विनाशः इति।' एतदनुसारेण पूर्वं 'घटादि' इति क. ख. पु० दृष्टमप्यत्र 'पटादि' इति शोधितम्।

नित्य एव हेतुः ; अकादाचित्कत्वप्रसङ्गात्। तत् अतिनिस्तरङ्गमेतत् ॥ ईदृश्यां च वस्तुस्थितौ भोगोऽपि कर्मभिरेवमेव वस्तुस्वभावानतिक्रमेण सम्पादनीय इति द्व्यणुकवत् पिपीलिकाण्डादेर्ब्रह्माण्डपर्यन्तस्यापि विश्वस्येयमेव गतिरिति प्रतिबन्धसिद्धिः॥

[66] तथा च ब्रह्माण्डे परमाणुसाद्भवितरि परमाणुषु च स्वतन्त्रेषु पृथगासीनेषु तदन्तःपातिनः प्राणिगणाः १ क वर्तन्ताम्, कुपितकपिकपोलान्तर्गतोदुम्बरमशकसमूहवत्, दवदहनदह्यमानदारूदरविघूर्णमानघुणसंघातवत्, प्रलयपवनोल्लासनीयौर्वानलनिपातिपोतसांयात्रिकसार्थवद्वेति ॥

भावकार्यस्य विनाशनियमात् अविनाशिनां द्व्यणुकानामनादित्वमपि स्यात्। अतश्च द्व्यणुकत्वोक्तिर्न घटते ; अणुद्वयोत्पाद्यस्यैव द्व्यणुकत्वात्। तस्मादेवं स्वीकर्तव्यम्—भोगोत्पादकावयवकत्वमस्तु मा वा। कार्यस्योत्पत्तिः स्थितिश्चेति द्वे स्तः। उत्पत्तिराद्यक्षणसम्बन्धः ; स्थितिरनुवृत्तिर्द्वितीयादिक्षणसम्बन्धः। तत्र यत् यदधीनस्थितिकं, तत् तदभावे स्थितिं न लभते। यत् यत्कारणं जन्यं, तस्य तत्प्राप्तावुत्पत्तिः। तत्र स्थितिहेतोर्नित्यत्वे नित्यस्थितिप्रसङ्गात्, उत्पत्तिहेतोर्नित्यत्वे च कार्यस्य कादाचित्कत्वभङ्गप्रसङ्गात् तयोरनित्यत्वम्। तदिदमतिनिष्प्रकम्पम्। एवं चैकावयवस्थितिकारणावयवसंयोगाद्यपगमेन तन्निवृत्तौ, अवयव्यन्तरोत्पादकहेतूपगमाभावे च तदनुत्पत्त्यावर्जनीयः सन्तानविच्छेदः॥ न च विश्वसन्तानविच्छेदकालेऽपि केषांचित्कर्मणां भोगसम्पादनार्थपरिपाकसम्भवात् कथं विच्छेदः? तदवश्यमवयव्यन्तरमुत्पद्येतैवेति वाच्यम्—कार्यं कारणाधीनं निवर्त्य चेत्येवमुत्पत्तिनिवृत्तिभागित्वरूपवस्तुस्थितौ सत्यां कर्मणां वस्तुस्वभावभञ्जकत्वासम्भवेन तदनतिक्रमेण कारणाधीनकार्योत्पत्तिसमयप्रतीक्षयैव तैर्भोगस्य सम्पाद्यत्वात्। अतो द्व्यणुकस्येव आ पिपीलिकाण्डात् आ च ब्रह्माण्डात सर्वस्य जातु सर्वथोच्छेद एव। ततः सन्तानस्वरूपहेतोर्विच्छेदरूपसाध्येन सह प्रतिबन्धस्य (व्याप्तेः) सिद्धिरिति सर्गप्रलयसिद्धिरिति।

[66] तथा च ब्रह्माण्डस्याऽऽपरमाण्वन्तभङ्गे सति परमाणुषु च विशीर्य कार्यारम्भककर्मरहितं स्थितेषु तदन्तर्गताः प्राणिगणा अपि कुपितकपिकपोलान्तर्गतोदुम्बरफलस्थितक्रिमिसमूहवत् दवदहनदह्यमानदारूदरविघूर्णमानघुणसङ्घातवत् अत्युग्रपवनपरिकम्प्यमानवडवानलपातिपोतमध्यस्थितसांयात्रिकपुरुषसार्थवच्च प्रलयपावकपवनादिपरीताः प्रणश्यन्ति ; न पुनः कथमपि वर्तन्त इति सिद्धमुच्चारयितृपुरुषाभावाद्वेदस्य प्रवाहतोऽपि न नित्यत्वमिति ॥

१ प्र. 'क वर्तन्तामिति विनश्यन्तीत्यर्थः। महाद्रव्यान्तरेण निहन्यमानाधारत्वात। महादहनदह्यमानाश्रयत्वात्, महापवनक्षुभितसमुद्रविलीयमानाधारत्वादिति अत्र हेतुत्रये क्रमेण दृष्टान्तत्रयमाह कुपितेति।' तृतीयोदाहरणे मूले प्रकाशानुरोधेन समुद्रवाचिपदं स्थितलुप्तं नवेति विमृश्यन्।

[67] १ अपि च— जन्मसंस्कारविद्यादेः शक्तेः स्वाध्यायकर्मणोः।
ह्रासदर्शनतो ह्रासः संप्रदायस्य मीयताम् ॥ ३ ॥

पूर्वं हि मानस्यः प्रजाः समभवन् ; ततोऽपत्यैकप्रयोजनमैथुनसम्भवाः ; ततः कामा(ला?)-वर्जनीयसान्निधिजन्मानः ; इदानीं देशकालाद्यवस्थया पशुधर्मादेव भूयिष्ठाः। पूर्वं चरुप्रभृतिषु संस्काराः २ समाधायिषत ; ततः क्षेत्रप्रभृतिषु ; ततो गर्भादितः ; इदानीं तु जातेषु लौकिक(लोक)व्यवहारमाश्रित्य। पूर्वं सहस्रशाखो वेदोऽध्यगायि ; ततो व्यस्तः; ततः षडङ्ग एकः ; इदानीं तु कचिदेका शाखेति। ३ पूर्वं ऋतवृत्तयो ब्राह्मणाः प्राद्योतिषत ; ततोऽमृतवृत्तयः ; ४ ततो मृतवृत्तयः; संप्रति प्रमृतसत्यानृतकुसीदपाशुपाल्यश्ववृत्तिप्रवृत्तयो भूयांसः। पूर्वं दुःखेन ब्राह्मणैरतिथयोऽलभ्यन्त ; ततः क्षत्रिया-

[67] अपि च न केवलं प्रलय एव वेदस्य विच्छेदः ; सृष्टावपि प्रति चतुर्युगमध्ययनानुष्ठानविषयकशक्तिह्रासदर्शनात्संप्रदायविच्छेदः प्रमीयते। संप्रदायो हि नाम पारम्पर्येण सम्यगनुवृत्तो वेदवेदार्थोपदेशादिः। शक्तिस्तु आयुरारोग्यबलवीर्यश्रद्धाशमदमग्रहणधारणशक्त्यादिरिति वक्ष्यते। प्रकृष्टबीजाधीनजन्मनां पुष्कलसंस्कारसंस्कृतानां चायुरारोग्यादिसम्पत्तिर्यथायथं लोकवेदसिद्धा। अतस्तद्धेतुत्वाज्जन्मसंस्कारविद्यावृत्त्यादेरेव स्वाध्यायाध्ययने कर्मणि च शक्तिः। अस्तु वा जन्माद्यपेक्षया शक्तिः पृथक्। तथा कारिकायां शक्तेश्चेति चकारोऽध्याहार्यः। एषां च ह्रासः सम्यगेव दृश्यते। तथा हि—पूर्वं सङ्कल्पत एव प्रजाः समभवन् ; पश्चादव्यर्थव्ययितवीर्याणां अत एव परिपुष्टानां विशिष्टविरक्तानामपत्यैकप्रयोजनकेन कादाचित्केन सङ्गमेन ; ततः

१ अत्र फक्किकायां, 'न केवलमनुमानं, दर्शनं च प्रलयसद्भावानुगुणमित्याह अपि चेति। जन्मादिह्रासदर्शनात् स्वाध्यायाध्ययने कर्मानुष्ठाने पुरुषाणां शक्तेश्च ह्रासदर्शनात संप्रदायस्य ह्रासोऽवगम्यत इति। जन्मनो ह्रासं व्याचष्टे पूर्वं हीति' इत्येतावत्येव बोधनी ॥ अत्र प्र. 'एवं सर्वस्य नाशेऽर्थाद्वेदोऽपि नश्यतीत्युपपाद्य वेदह्रासदर्शनेनापि तन्नाशोऽनुमेय इत्याह अपि चेति। वेदह्रासे दृष्टान्तार्थं जन्मादिह्रास उक्तः। श्रूयमाणा अपि वेदा उच्छेत्स्यन्ति वाक्यत्वात् उच्छिन्नशाखावदिति भावः। प्रतियुगं क्रमेण ह्रासमाह पूर्वं हीति।'

२ प्र. 'सम्यगाहिता इत्यर्थः।' ३ प्र. 'ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम्। मृतं तु याचितं भैक्ष्यं प्रमृतं कर्षणं स्मृतम्। सत्यानृतं तु वाणिज्यं कुसीदं च कलान्तरम्। पाशुपाल्यं—गोरक्षादि। श्ववृत्तिः सेवा।' ४ ततो मृतवृत्तय इति पुस्तकेषु न लक्ष्यते। तथाऽपि अत्रापि तृतीयस्यापेक्षितत्वादौचित्यात् पूर्ववाक्यसमानाकारतया मुद्रणप्रमादसम्भावनाबलाच्च निवेशितम्।

५ पाशुपाल्यश्ववृत्तय इति सर्वत्र पाठः। अत्रापि बहुव्रीहिसिद्धये औचित्यादिना 'वृत्ति' इत्यधिकमादृतम्।

तिथयोऽपि संवृत्ताः; ततो १ वैश्याऽऽवेशिनोऽपि; संप्रति शूद्रान्नभोजिनोऽपि। २ पूर्वममृतभुजः; ततो विघसभुजः; ततोऽन्नभुजः; संप्रत्यघभुज एव। पूर्वं चतुष्पाद्धर्म ३ आसीत्; ततस्तनूयमाने तपसि त्रिपात्; ततो म्लायति ज्ञाने द्विपात्; संप्रति जीर्यति यज्ञे दानैकपात्। सोऽपि पादो ४ दुरागतादित्रिपादिकाशतदुःस्थः अश्रद्धामलकलङ्कितः कामक्रोधादिकण्टकशतजर्जरः प्रत्यहमपचीयमानवीर्यतया इतस्ततः स्खलन्निवोपलभ्यते॥

[68] 'इदानीमिव सर्वत्र दृष्टान्नाधिकमिष्यते' इति चेन्न—स्मृत्यनुष्ठानानुमितानां शाखानामुच्छेददर्शनात्। स्वातन्त्र्येण स्मृतीनामाचारस्य च प्रामाण्यानभ्युपगमात्।

कामवशात्, 'ऋतौ भार्यामुपेया'दित्यादिशास्त्रश्रद्धया कालेऽप्यवर्जनीयाऽऽपतितात्सन्निधेर्बलात्; इदानीं पुनर्देशकालव्यक्तिव्यवस्थामन्तरेणात्यन्तशास्त्रलङ्घिनां पशुधर्मादेव प्रायेण। एवं संस्कार-विद्या-वृत्ति-वर्जनीयवर्जन-चरणीयचरण-विशेषधर्मेष्वपि क्रमेण ह्रासो द्रष्टव्यः। अत एवमेषां ह्रासात् संप्रदायह्रासो दुरपह्नव इति।

[68] ननु—'कर्तृमत्त्वे तु वेदस्य सम्यङ्निश्चयात्त्ववादिभिः। कर्ता गुणाश्च दोषाश्च महाजनपरिग्रहः॥ एवमादि, विना युक्त्या, कल्प्यम्; मीमांसकैः पुनः। इदानीमिव सर्वत्र दृष्टान्नाधिकमिष्यते' (श्लोकवार्तिके-१.१.२)। तथा च यथेदानीं वेदस्य शिष्याचार्यपरम्परया प्रततत्वम्, तथैव सर्वकालेऽपीति अपौरुषेयतया निर्दुष्टः स्वतःप्रमाणं च वेद इति, परतः प्रामाण्यवादिभिरिव कर्तृतद्गुणादिकं, अप्रामाण्यवादिभिरिव कर्तृतद्दोषादिकं चादृश्यमानं यथा मीमांसकैर्नेष्यते, तथा पारम्पर्येण साम्प्रतमधीयमानशाखातिरिक्तवेदभागोऽपि नेष्यत इति कथं संप्रदायह्रास इति चेत्—न—अष्टकादिस्मृतेर्वसन्तोत्सवाद्याचारस्य च शिष्टपरिगृहीततया वेदमूलकत्वस्येष्टत्वात् उपलभ्यमानशाखासु तदनुपलम्भाच्छाखान्तरानुमाने तेषां साम्प्रतमदर्शनेनोच्छेदस्य स्वीकार्यत्वात्। तथा हि—तादृशस्मृत्याचारयोरप्रामाण्यपक्षस्तावदुपर्युद्धाव्य निराकरिष्यते। अतः प्रामाण्यपक्षः शिष्यते। स एव च भवदभिमतः। तत्र पौरुषेययोः स्मृत्याचारयोः स्वातन्त्र्येण प्रामाण्यं तावदसम्भावि अनिष्टं च॥ 'स्मृतिप्रणेतॄणां च मन्वादीनां साक्षादतीन्द्रियार्थदर्शनमासीत्, यत एतत्प्रवृत्तिरि'त्यत्र च न किञ्चित्प्रमाणम्, अर्थस्यातीन्द्रियतयाऽस्मच्चक्षुषामिव

---

१ वैश्यावेशिनः वैश्यातिथयः' प्र.। २ प्र. अमृतभुजः यज्ञशेषभुजः। विघसभुजोऽतिथिशेषभुजः। अन्नभुजो भृत्यशेषभुजः। अघभुजः स्वार्थसाधितभुजः।

३ प्र. तपोज्ञानयज्ञदानानि चत्वारः पादाः। ४ दुरागतं दुष्टदुपायात् द्यूतादेरागतम्। तदेव त्रिपादिका पादरोगः।

मन्वादीनामतीन्द्रियार्थदर्शने प्रमाणाभावात् । आचारात् स्मृतिः, स्मृतेश्चाचार इत्यनादिताभ्युपगमे अन्धपरम्पराप्रसङ्गात् ॥

[69] आसंसारमनाम्नातस्य च वेदत्वव्याघातेनानुमानायोगात् । उत्पत्तितोऽभिव्यक्तितोऽभिप्रायतो वाऽनवच्छिन्नवर्णमात्रस्य निरर्थकत्वात् ॥

[70] यदि च शिष्टाचारत्वादिदं हितसाधनं, कर्तव्यं वेत्यनुमितम्, किं वेदानुमानेन ; तदर्थस्यानुमानत एव सिद्धेः । न च धर्मवेदनत्वात् इदमेवानुमानं अनुमेयो वेदः ; प्रत्यक्षसिद्धत्वात् ; अशब्दत्वाच्च ॥

[71] अथ शिष्टाचारत्वात्प्रमाणमूलोऽयमिति चेत्—ततस्सिद्धसाधनम् ; प्रत्यक्ष-

---

तच्चक्षुषामपि तद्दर्शने सामर्थ्यायोगात् ॥ तादृशस्मृतेस्तत्प्राक्तनाचारो मूलम् , तस्य च ततः प्राचीना स्मृतिरित्येवं प्रवाहानादित्वस्वीकारे च साक्षात्प्रमाणभूतकिञ्चिन्मूलकत्वाभावादन्धपरम्पराप्रसङ्गः । अतो जात्यन्धपरम्परामालकृतरूपविशेषवचनवदप्रमाणमेव स्यात् । यथोक्तम्–'यो यो ग्रहीता जात्यन्धः स स्वयं नोपलब्धवान् । स्वातन्त्र्येणागृहीते च प्रामाण्यं नावतिष्ठते' (तन्त्र· १-३·१) इति । अतोऽनुमातव्या एव कतिचिच्छाखाः ।

[69] अथ वेदानुमानमङ्गीक्रियते ; अथापि तदुच्छेदो नेष्यत इति चेत्—तर्ह्यस्माभिरिव मन्वादिभिरप्यनुमेयत्वान्नित्यानुमेयो वेद इति प्रभाकरपक्षो वा ग्राह्यः, प्रत्यक्ष एवात्र वा देशान्तरे वाऽनुच्छिन्न एवास्तीति कुमारिलभट्टपक्षो वा । नाद्यः—आ सृष्टेः कदाचिदप्यश्रुतस्य नित्यानुमेयस्य वेदत्वासम्भवात् । व्याहतं हीदं, यत् नित्यानुमेय इति, अथ च वेदे इति । वेदो हि विलक्षणो वर्णसमुदायः । वर्णानित्यत्वपक्षे ताल्वादितस्तदुत्पत्तिः, नित्यत्वपक्षे चाभिव्यक्तिः । पक्षद्वयेऽपि ताल्वादिव्यापाराभावे मौनिश्लोकादिवदभिप्रायस्थता वर्णानाम् । ईदृशैस्त्रिधानवच्छिन्नश्च न कश्चिन्नियतानुपूर्वीको वर्णसमुदायः । वर्णानित्यत्वपक्षेऽप्येतदनवच्छिन्नत्वे केवलं कादिवर्णमात्रं सम्भाव्यते , न तु काचिदानुपूर्वी । तच्च निरर्थकमिति नैवं वेद इति ।

[70] अथानुमानप्रकार एव विचार्यते । यद्युच्यते—अयमाचारो हितसाधनं शिष्टाचारत्वात् । एवमयमाचारः कर्तव्यः शिष्टाचारत्वादित्यनुमीयत इति—तर्हि वेदादवगन्तव्यस्येष्टसाधनत्वस्य कृतिसाध्यत्वस्य चानुमानत एव सिद्धेर्वेदानुमानमेव न स्यात् । न च वेदस्यैवास्यानुमानस्यापि हितसाधनधर्मवेदकत्वादिदमेवानुमानं नित्यानुमेयवेदशब्देनोच्यत इति वाच्यम्—अस्यानुमानस्य प्रत्यक्षसिद्धत्वेन नित्यानुमेयवेदत्वासम्भवात् ; धर्मवेदकशब्दविशेषस्यैव वेदशब्दवाच्यतायाः प्रामाणिकतया शब्दातिरिक्तस्यानुमानस्य वेदत्वासम्भवाच्च ।

[71] अथ नैवं हितसाधनत्वाद्यनुमानम् । किं तु अयमाचारः प्रमाणमूलः शिष्टाचारत्वादिति प्रमाणमूलकत्वानुमानमेव । तच्चानुमेयं प्रमाणं वेद इति वेदानुमानसिद्धिरिति चेत्— तर्हि सिद्ध-

मूलत्वाभ्युपगमात् ; तदसम्भवेऽप्यनुमानसम्भवात् ॥ नित्यमज्ञायमानत्वात्तत् अप्रत्यायकं कथमनुमानं कथं च मूलमिति चेत्—वेदः किमज्ञायमानः प्रत्यायकः, अप्रत्यायक एव वा मूलम् ; येन जडतम तमाद्रियसे ॥ अनुमितत्वात् ज्ञायमान एवेति चेत्–लिङ्गमप्येवमेवास्तु ॥ अनुमेयप्रतीतेः प्राक्तनी लिङ्गप्रतीतिरपेक्षिता ; कारणत्वात् ; न तु पश्चात्तनीति चेत्—शब्दप्रतीतिरप्येवमेव ॥

[72] आचारस्वरूपेण शब्दमूलत्वमनुमीयते । तेन तु शब्देन कर्तव्यता प्रतीयत इति चेन्न–आचारस्वरूपस्य प्रत्यक्षसिद्धत्वेन मूलान्तरानपेक्षणात् ॥ तस्मात्कर्तव्यतायां प्रत्यक्षाभावात्, अप्रमिततया च शब्दानुमानानवकाशात्, प्रत्यक्षश्रुतेरसम्भवात्, शिष्टाचारत्वेनैव

साधनम् । आचारस्य प्रत्यक्षदृश्यत्वेन प्रमाणमूलकत्वस्य सिद्धत्वात् । आचारस्येष्टसाधनत्वकर्तव्यत्वरूपेण प्रत्यक्षमूलकत्वासम्भवेऽप्यनुमानमूलकत्वसम्भवात् सिद्धसाधनमेव । ननु परोक्षानुभवप्रमाणस्यानुमानस्य ज्ञायमानतयैवानुमितिहेतुत्वम् । न चोक्तकर्तव्यत्वादिरूपेणाचारग्राहकं किञ्चिदनुमानं विशिष्य ज्ञातमस्ति । अतो नित्यमज्ञायमानत्वादुक्तरूपाक्रान्ताचाराप्रत्यायकस्य तस्य कथमनुमानत्वं मूलत्वं चेति चेत्—तर्हि त्वदभिमतप्रमाणस्य वेदस्यापि परोक्षानुभवप्रमाणतया ज्ञायमानतयैव हेतुत्वम्, तथा प्रत्यायकत्वे सत्येव च मूलत्वमिमि तुल्यो दोषः । ननु प्रकृतानुमानेनानुमीयमानत्वाद्वेदो ज्ञायमान एवेति कथमज्ञायमानत्वमिति चेत्–अनुमानमपि तर्हीत्थं ज्ञायमानमेव ॥ नन्वनुमेयविषयकज्ञानात् प्राग्लिङ्गज्ञानमपेक्षितम् ; तत्र तस्य हेतुत्वात् ; अग्निज्ञानात्प्रागिव धूमज्ञानम् । अत्र च प्रमाणमूलत्वं साध्यं न प्रमाणगम्यत्वरूपं, सिद्धसाधनादिति प्रमाणगम्यकर्तव्यताकत्वरूपं वाच्यम् । तत्र कर्तव्यतया सह प्रमाणमनुमीयते । तदनन्तरमेव तत् प्रमाणमनुमानरूपमेवम्भूतमिति विशिष्य ज्ञेयमिति अनुमेयकर्तव्यताप्रतीतेः प्रागनुमानस्य विशिष्याज्ञातत्वान्नास्य प्रमाणस्यानुमानत्वमिति चेत्–तर्हि लिङ्गप्रतीतिवच्छब्दप्रतीतिरप्यर्थप्रतीतेः प्रागपेक्षिता ; तथा प्रकृतानुमित्या कर्तव्यतारूपार्थस्य ग्रहणात्पश्चादेव तत्प्रमाणं शब्दरूपमिति विशिष्य ज्ञेयमिति न प्रमाणमिदं शब्दोऽपि भवितुमर्हति ॥

[72] एतेन 'प्रमाणमूलत्वमिति सामान्यनिर्देशत्यागेन शब्दमूलत्वमेव साध्यते । न च शब्दबोध्यकर्तव्यताकत्वरूपशब्दमूलत्वान्तर्गतशब्दांशानुमानवैयर्थ्यमिति वाच्यम् ; आचारस्वरूप एव शब्दगम्यत्वानुमानात् ; कर्तव्यत्वांशस्यानुमितशब्दबोध्यतया प्रकृतानुमानाविषयत्वात्– इति निरस्तम् । स्वरूपस्य प्रत्यक्षसिद्धत्वेन मूलजिज्ञासाभावान्मूलान्तरानपेक्षणात् । तस्मादाचारस्वरूपेण शब्दानुमित्ययोगात् कर्तव्यतयैव तदनुमानम् । कर्तव्यताविषये च प्रत्यक्षाभावात् तस्या अप्रतीतत्वेन तया शब्दस्यानुमानानवकाशात् तद्विषये प्रत्यक्षश्रुत्यभावाच्चानुमानमेव मानम् ।

कर्तव्यतामनुमाय तया मूलशब्दानुमानम्। तथा च किं तेन; तदर्थस्य प्रागेव सिद्धेः॥

[73] १ 'तथाऽप्यागममूलत्वमेव तस्य; व्याप्तेः' इति चेत्— अत एव तर्हि तस्य प्रत्यक्षानुमानमूलत्वमनुमेयम्॥ आदिमतस्तत्त्वं स्यात्; अयं त्वनादिरिति चेत्—आचारोऽपि २ तर्हीदम्प्रथमस्तथा स्यात्, अयं त्वनादिर्विनाऽप्यागमं भविष्यति॥ आचारकर्तव्यतानुमानयोरेवमनादित्वमस्तु; किं नश्छिन्नमिति चेत्—प्रथमं ताव'न्नित्यानुमेयो वेद'इति; द्वितीयं च 'देशनैव धर्मे प्रमाण'मिति॥

[74] ३ अथायमाशयः—वैदिका अप्याचाराः राजसूयाश्वमेधादयः समुच्छिद्यमानाः

तथा चायं कर्तव्यःशिष्टाचारत्वादित्यनुमाय ततस्तया शब्दानुमानम्— आचारश्शब्दमूलः कर्तव्यत्वादिति, यद्वा कर्तव्यतेयं शब्दमूला शिष्टाचारकर्तव्यतात्वादिति। एवं शब्दानुमानात्प्राक् कर्तव्यत्वासिद्धौ च शब्दानुमानं व्यर्थम्; शब्दफलस्य कर्तव्यताज्ञानस्य प्रागेव सिद्धत्वात्॥

[73] ननु कर्तव्यताप्यनुमानसिद्धैव। तथाऽपि तादृशकर्तव्यतायामागममूलत्वव्याप्तिदर्शनादाचारस्य प्रकृतस्याप्यागममूलकत्वमनुमीयत इति चेत्— तर्हि तुल्यरीत्या शब्दान्तराणां प्रत्यक्षानुमानान्यतरमूलकत्वदर्शनात्तस्यागमस्यापि तन्मूलकत्वमनुमेयम्॥ नन्वादिमतश्शब्दस्य तन्मूलकत्वमस्तु। अयं त्वनुमीयमानश्शब्दोऽनादिरिति चेत्—तत्र व्याप्त्यस्वीकारे इहाप्यादिमत एवाचारस्य शब्दमूलकत्वं, न त्वनादेरिति, विनाप्यागममयमाचारस्यादिति व्याप्तिभङ्गाच्छब्दमूलकत्वं न सिद्ध्येत्॥ नन्वस्तु काममाचारस्य कर्तव्यत्वानुमानस्य चैवमनादित्वम्; किन्नः प्राभाकराणां छिन्नमिति चेत्—उभयं छिन्नम्। किमिति चेत्— नित्यानुमेयो वेद इतीदं तावत् प्रथमं छिन्नम्; तथानुमानस्यापि प्रमाणत्वात् देशना चोदना श्रुतिरेव धर्मे प्रमाणमितीदं द्वितीयमपि छिन्नम्।

[यस्त्वाचारस्य कर्तव्यत्वानुमानस्य च परस्पराश्रयणेऽन्धपरम्परापत्तिर्दोषः प्रागुक्तः, सोऽपि न— यथा हि वेदस्यापौरुषेयत्वस्वीकारेणाध्ययनपारम्पर्येणोत्तरोत्तराध्ययनस्य पूर्वपूर्वाध्ययनमूलकत्वस्वीकारे ऽन्धपरम्परापत्तिर्नास्ति, वेदस्य स्वतः प्रामाण्यात्; तथा कर्तव्यत्वानुमानस्याप्यनादेस्स्वतः प्रामाण्यात्तद्दोषासम्भव इति।]

[74] अथायमाशयः— आचारस्यानादित्वमेवासिद्धम्; राजसूयादिवदुच्छेदानुमानात्।

---

१ अयं क २ पाठ। वो. 'वेदमूलत्वेव तस्यानुमीयते; कर्तव्यतायाः वेदमूलत्वेन ज्योतिष्टोमादौ व्याप्त्यवधारणात्।' पा० 'आगममूलत्वेनैव तस्य व्याप्तेः।' तदा तस्येत्यस्य, आचारसामान्यस्येति आचारत्वस्येति वाऽर्थः; व्याप्तेरित्यत्रान्वयः॥ २ अयं क. २ पाठः। वो. 'य आचारः .... आगममुपलभ्य प्रवर्तितः तस्यैवेदम्प्रथमस्य ज्योतिष्टोमादेरागममूलत्वमुपलब्धम्।' क. ख. पा० 'तर्हि प्रथमतस्तथा'। ३ प्र. 'आचारस्यागममूलकत्वव्याप्तौ प्रयोजकमाह अथेति। आचाराः वेदमूलाः उच्छेदानन्तरभाविप्रवाहवत्त्वात् राजसूयवदिति।'

दृश्यन्ते ; यत इदानीं नानुष्ठीयन्ते । न चैते प्रागपि नानुष्ठिता एव ; तदर्थस्य वेदराशेरप्रामाण्यप्रसङ्गात् समुद्रतरणोपदेशवत् ॥ न चैवमेवास्तु ; दर्शाद्युपदेशेन तुल्ययोगक्षेमत्वात् ॥ एवं, पुनः स कश्चित् कालो भविता, यत्रैतेऽनुष्ठास्यन्ते । तथाऽन्ये(था चान्ये) प्याचाराः समुच्छेत्स्यन्ते अनुष्ठास्यन्ते च , इति न विच्छेदः । ततस्तद्वदागममूलता-इति चेत्—एवं तर्हि प्रवाहादौ लिङ्गाभावे कर्तव्यत्वागमयोरननुमानात् , असत्यां प्रत्यक्षश्रुतौ आचारसङ्कथाऽपि कथमिति सर्वविप्लवः ॥ तस्मात् प्रत्यक्षश्रुतिरेव मूलमाचारस्य ; सा चेदानीं नास्तीति शाखोच्छेदः ॥

[75] अधुनाऽप्यस्ति साऽन्यत्रेति चेत्—अत्र कथं नास्ति ? किमुपाध्यायवंशानामन्यत्र गमनात्, तेषामेवोच्छेदाद्वा, आहोस्वित् स्वाध्यायविच्छेदात् । न प्रथमद्वितीयौ ; सर्वेषा-

---

वेदोक्ता अपि राजसूयाश्वमेधादयो विशिष्टक्षत्रियरूपाधिकारिवैकल्येन सम्प्रति समुच्छिन्नाः अननुष्ठीयमानत्वात् । प्राक्पुनरनुष्ठिताः, न तु नानुष्ठिताः ; सर्वदैवाननुष्ठाने तदर्थकस्य 'राजा राजसूयेन स्वाराज्यकामो यजेते'त्यादिवेदवाक्यस्य लौकिकसमुद्रतरणोपदेशवाक्यस्येवाप्रामाण्यप्रसङ्गात् । न चाप्रामाण्यं युक्तम् ; संप्रत्यनुष्ठीयमानदर्शपूर्णमासादि धर्मोपदेशतुल्यत्वाद्वैदिकस्य तदुपदेशस्य । एतावता राजसूयाश्वमेधादेरात्यन्तिक उच्छेदो न संमन्तव्यः, पुनरपि विशिष्टाधिकारिविशिष्टकालसम्भवात् । एवमाचारान्तरेष्वपि मध्ये मध्ये उच्छेदः पश्चादनुष्ठानं च भाव्यताम् । तस्मादाचारत्वाविशेषात् प्रकृतोऽपि शिष्टाचार उच्छेदोत्तर इति विवक्षितस्यानादित्वस्यासिद्धिरिति । अतो मानान्तरायोगात् राजसूयादिवदेवागममूलत्वानुमानमिति चेत्—तर्हि भवदुक्तां रीतिं भवानेव विभावयतु । यदा खल्वस्याचारस्योच्छेदात् पश्चात् पुनःप्रवाहारम्भः, तदा तदव्यवहितपूर्वमाचाररूपहेत्वभावात्कर्तव्यत्वानुमानमिव शब्दानुमानमपि नास्तीति प्रमाणाभावादाचारस्यैव नात्मलाभ इति प्रवाहस्यैवाप्रसक्तौ सम्प्रति दृश्यमानं सर्वं भ्रान्तिमूलकमेव भविष्यति । [न च प्रवाहादावुच्छिन्नशाखोपदेष्टृस्थाने आचरितृपुरुष एवेश्वररूपः कल्प्यताम् । अतश्चाचारकर्तव्यत्वानुमानमिति वाच्यम् -वर्णाश्रमकुलगोत्रादिभेदेनाचारभेदादनेकशरीरपरिग्रहमन्तरेण तदनुष्ठानस्य दुर्वचतया एकशरीरपरिग्रहेण सर्वांशनिर्विचिकित्सोपदेशकल्पनस्यैव युक्तत्वात् ।] अतः प्रवाहारम्भे प्रत्यक्षश्रुतित एवाचरणीयमर्थमधिगम्याचारः प्रवृत्त इति स्वीकार्यम् । अतो नित्यानुमेयत्वपक्षाभावाच्छाखोच्छेदपक्ष एव ग्राह्य इति ॥

[75] ननु प्रत्यक्षश्रुतिरेव मूलम् । अथापि न शाखोच्छेदः ; किन्त्वधुनाप्यास्ति साऽन्यत्र । अतः प्रभाकरपक्षस्य भट्टकुमारिलखण्डितस्यासंभवेऽपि तत्संमतो देशान्तरस्थशाखापक्ष एवास्त्विति चेत्—अन्यत्र स्थिता शाखाऽत्र कुतो नास्तीति पृच्छामः । तत्रोपाध्यायवंश्यानां सर्वेषामन्यत्र

मन्यत्र गमने उच्छेदे वा नियमेन भारतवर्षे शिष्टाचारस्याप्युच्छेदप्रसङ्गात् ; तस्याध्येतृसमानकर्तृकत्वात्। अन्यत आगतैराचारप्रवर्तने अध्ययनप्रवर्तनमपि स्यात॥ न तृतीयः ; आध्यात्मिक[1]शक्तिसम्पन्नानामन्तेवासिनामविच्छेदे तस्यासम्भवात्। तस्मा [2]दायुरारोग्यबलवीर्यश्रद्धाशमदमग्रहणधारणादिशक्तेरहरहरपचीयमानत्वात् स्वाध्यायानुष्ठाने शीर्यमाणे कथञ्चिदनुवर्तते ; विश्वपरिग्रहाच्च न सहसा सर्वोच्छेद इति युक्तमुत्पश्यामः॥

[76] [3] गतानुगतिको लोक इत्यप्रामाणिक एवाचारः, न तु शाखोच्छेदः ; अनेकशाखागतेतिकर्तव्यतापूरणीयत्वादेकस्मिन्नपि कर्मण्यनाश्वासप्रसङ्गादिति चेत्—न—

गमनात् अथवा तेषामुच्छेदादिति पक्षद्वयं तावन्न युक्तम् । तथा सति भारतवर्षे शाखाया इव तदुक्तस्य प्रकृताचारस्याप्युच्छेदप्रसङ्गात् ; अध्ययनार्थानुष्ठानयोरेककर्तृकत्वात। देशान्तरादागत्य यदि केचिदाचारं प्रवर्तयामासुः, अध्ययनं कुतो न प्रवर्तितवन्तस्स्युः। [न च सर्वमपि स्मृत्याचारसिद्धमेतद्देशाधीयमानप्रत्यक्षश्रुतिमूलमित्येव भट्टमतमिति वाच्यम्–तर्हि स्मृतिप्रणयनवैयर्थ्यात्। न चेतस्ततो विप्रकीर्णानां मन्त्रार्थवादगतसिद्धानुवादाभ्यूहनीयानां च वैशद्यमेव स्मृतिभिराधीयत इति वाच्यम्—'धन्वन्निव प्रपा असी'ति सिद्धानुवादबलात् 'मरुप्रदेशे प्रपा निर्मातव्ये'त्यादेरसिद्धेः ; यत्किञ्चित्कारुणिकजनकल्पितानुवादमात्रेणाप्युपपत्तेस्तत्र धर्मोत्पत्तौ प्रमाणाभावात्। न च स्मार्तानां कर्मणां स्मृत्युक्तकर्तृविशेषकालविशेषद्रव्यविशेषेतिकर्तव्यताविशेषादिकं सर्वं सिद्धानुवादावगम्यं विप्रकीर्णं वा। तस्मात्, पुराणादिप्रामाण्याच्चानन्तेषु वेदेषूच्छिन्नानेकशाखामूलत्वमेव युक्तम्।] अत एवाद्ये तच्छाखाभावस्य तदध्ययनविच्छेदादेवोपपादनमिति स एव स्वाध्यायविच्छेदः करणकलेवरशक्तिसम्पन्नेष्वन्तेवासिषु दुर्घट इति सिद्धः शक्तिह्रासः। तस्मादायुरारोग्यादेरहरहरपचीयमानत्वात्स्वाध्यायाध्ययनमर्थानुष्ठानं च शीर्यमाणे सती कतिपयास्तिकजनाऽऽश्रयेणेन कथञ्चिदनुवर्तते ; कालतो देशतश्च विस्तृताद्विश्वपरिग्रहाच्च न सहसा सर्वोच्छेद इति युक्तमुत्पश्यामः।

[76] ननु प्रत्यक्षवेदोक्तमेव प्रामाणिकम्। स्मृत्यर्थ आचारश्च, 'गतानुगतिको लोको न लोकस्तत्त्वचिन्तकः' इति न्यायेनाप्रामाणिक एव। अतो न शाखोच्छेदः। अन्यथा, 'सर्वशाखाप्रत्ययमेकं कर्मे'त्युच्छिन्नानेकशाखागतानामप्यङ्गानामुपसंहर्तव्यत्वात् अनुपलम्भेन च तत्पूरणायोगादेकस्मिन्नपि कर्मणि, सम्पूर्णमिदमनुष्ठितमिति साद्गुण्यविस्रम्भो न स्यात इति चेत—न महाजनपरिगृहीतत्वेन वेदवत् स्मृत्यादेरपि प्रमाणत्वात। अन्यथा महाजनपरिग्रहरूपहेतो-

---

१ बो. "आध्यात्मिकी शक्तिर्वक्ष्यमाणायुरादिकम्।' २ बो. 'आयुरादीनां ग्रहणादिशक्तेश्च प्रत्यहमपचय एव।' ३ बो. 'गतानुगतिको लोको न लोकस्तत्त्वचिन्तकः' इति तालतलवन्धन ? न्यायेन" ।

एवं हि १ महाजनपरिग्रहस्योपप्लवसम्भवे (प्लवे) वेदा अपि गतानुगतिकतयैव लोकैः परिगृह्यन्त इति, न वेदाः प्रमाणं स्युः । तथा च वृश्चिकभिया पलायमानस्याशीविषमुखे निपातः । २ एतमेव च कालक्रमभाविशाखोच्छेद ३ भाविनमनाश्वासमाशङ्कमानैर्महर्षिभिः प्रतिविहितम् । अतो नोक्तदोषोऽपि ॥

[77] न चायमुच्छेदो ज्ञानक्रमेण; येन श्लाघ्यः स्यात् । अपि तु प्रमादमदमानाऽऽलस्यनास्तिक्यपरिपाकक्रमेण । ४ ततश्चोच्छेदानन्तरं पुनः प्रवाहः, तदनन्तरं च पुन-

---

र्व्यभिचारितत्वेन वेदा अपि न प्रमाणं स्युः । तथा च कतिपयशाखोच्छेदलक्षणवृश्चिकभिया पलायमानस्य कृत्स्नवेदात्यन्ताप्रामाण्यरूपाशीविषमुखे निपातः ॥ तर्ह्यनाश्वासप्रसङ्गपरिहारः कथमिति चेत् —एतमेवाङ्गलोपप्रयुक्तं भाविनि शाखोच्छेदकाले भाविनमनाश्वासं पूर्वमालोच्य शिष्येषु सर्वशाखाग्रहणमान्द्ये अनुष्ठापनमात्रेण सर्वाङ्गानुष्ठानक्रमरक्षणासामर्थ्ये च साक्षात्कृतवद्भिर्महर्षिभिः सर्वशाखागतेतिकर्तव्यताकलापसङ्कलनेन कल्पसूत्रादिभिः प्रतीकारः कृत इति न अनाश्वासप्रसङ्ग इति ।

[77] ननूच्छेदे पुनः प्रवाह इति न नियमः, येन प्रवाहारम्भे उपदेष्टृकल्पना स्यात् । न हि संशयविपर्ययादिरुच्छिन्नः पुनरुत्पद्यते । न च नास्तिकमतानामस्तिकोच्छिन्नानां पुनःप्ररोहनियमोऽस्ति । न च महाप्रलयमुच्छिन्नस्य जगतः पुनःप्रवाहो नैयायिकैरिष्यते इति चेत्—न हि तादृशोच्छेदवत् अयमवान्तरप्रळय सुषुप्तिमध्यादिषु सम्भवन् शाखोच्छेदः उत्कृष्टज्ञानोत्पाद-

---

१. पा० चेत्— एवं हि । बोधन्यनुसारेण नञ्निवेशनम् । २. पा० एतमेव । प्र. 'अनेकेत्यादि दूषयति एतमिति ।' बो. 'इतश्च शाखोच्छेदोऽवगम्यत इत्याह एतमिति ।'

३. बो. 'कालक्रमवशात् भाविना शाखोच्छेदेनानुष्ठातॄणां त्वदुक्तमार्गेण भाविनमनाश्वासम् ।' क. ख. पा० कालक्रमभाविनमनाश्वासम् । ४ 'जन्मसंस्कारतिकारिकामारभ्य परिपाकक्रमेणेत्यन्तं कतिपयशाखोच्छेदपरम् । ततश्चेत्यादिकं तद्दृष्टान्तेन सर्ववेदोच्छेदपरम् । न चायमुच्छेद इति पूर्वग्रन्थश्च, नन्वप्रमाणत्वादेवोच्छिन्नशाखा प्रागुच्छेदं प्रापिता, नाध्यापितेति शङ्काशमनार्थः' इति प्रकाशाशयः । प्र. 'तदेवं वेदत्वादाचारानुमितवेदवत् वेदा उच्छेत्स्यन्तीत्युपसंहरति ततश्चेति । दिनरात्रिह्रासैश्च न व्यभिचारः तस्यापि पक्षत्वादिति भावः । ननु वर्तमानप्रवाहोच्छेदासिद्धावपि भाविप्रवाहोच्छेदसिद्धिः कुत इत्यत आह अन्यथेति । प्रागुपात्तादृष्टस्य देहाद्यभावेन भोगाजनकत्वादित्यर्थः । नन्वेवमपि प्राचयविच्छेदासिद्धौ परतन्त्रपुरुषपूर्वकोऽनादिरेवायं सम्प्रदाय इत्यत्र न किञ्चिदनिष्टमित्यत आह तथा चेति ।' बोधन्यामत्र न किञ्चिरस्पष्टम् । उपरितनगीतादिबलात् प्रागुक्तशाखोच्छेद विषयमेव सर्वमिति प्रतीयते ॥

रुच्छेद इति सारस्वतमिव स्रोतः ; अन्यथा कृतहानप्रसङ्गात्। १ तथा च भाविप्रवाहवद् भवन्नप्ययमुच्छेदपूर्वक इत्यनुमीयते ॥ स्मरति च भगवान्व्यासो गीतासु भगवद्वचनम्—

'यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यहम् ॥

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥' गी. (४. ७. ८) इति ।

[78] कः पुनरयं महाजनपरिग्रहः ? २ हेतुदर्शनशून्यैर्ग्रहणधारणार्थानुष्ठानादिः ॥ स ह्यत्र न स्यात् ऋते निमित्तम् ॥

क्रमकृतः । तथा हि सति स श्लाघ्यः बुद्धिपूर्वं ज्ञानपरिपाककल्पितोऽनुवर्तमान एव स्यात्) अपि स्वयमुच्छेदः प्रमादमदमानालस्यनास्तिक्यपरिपाकपर्वपरिकल्पित इतीदृशप्रमादादेः कर्मवैचित्र्याधीनस्य प्रवाहोच्छेदशालितया प्रकृत उच्छेदोऽपि पुनःप्रवाहान्तरित एव यथा सरस्वतीनदीप्रवाहो मध्ये मध्येऽन्तर्हितः प्राक् पश्चाच्च बहिः प्रवहति तथेति । एवं पुनःप्रवाहानङ्गीकारे आदरेण धर्मस्थापनार्थं कृतप्रवर्तितस्य ग्रन्थराश्यादेः सर्वात्मना हानप्रसङ्गः । एवंरीत्या कालक्रमेण सर्वशास्त्रोच्छेदे विशिष्टफलहेतुविविधधर्मसाधनदेहेन्द्रियादिसम्पत्त्यर्थप्राक्कृतबहुपुण्यहानप्रसङ्गः । अतः प्रवाहः सिद्धः । तस्य च प्रकृतप्रवाहस्येवोच्छेदोऽपि सिद्ध्यतीत्युत्तरोत्तरप्रवाहसिद्धिः । न चैवमपि दृश्यमानस्य प्रवाहस्योच्छेदानन्तरभावित्वं किमिति स्वीकार्यमिति शङ्क्यम्—अयं प्रवाह उच्छेदपूर्वकः प्रवाहत्वात् भाविप्रवाहवदित्यनुमानतस्तत्सिद्धेः ॥ एवं प्रतियुगमुच्छेदः प्रवाहस्तदर्थमुपदेष्टुर्भगवतोऽवतार इत्यादिकं युक्तिसिद्धं 'यदा यदा हीत्यादिना भगवतैव गीयतेऽपि । अतः आचारप्रवाहस्योच्छेदपूर्वकत्वात् प्रवाहादौ प्रत्यक्षश्रुतिरेव शरणमिति सा संप्रत्युच्छिन्नैवेति ॥

[78] ननु महाजनपरिग्रहेण स्मृत्याचारयोः प्रामाण्यनिश्चये हि शास्त्रोच्छेदकल्पना । स एव परिग्रहो यथावत् दुरुपपादः ॥ शिष्टपरिग्रह एव महाजनपरिग्रह इति चेत्—'के शिष्टाः ? ये सदाचाराः सदाचाराश्च तत्कृताः । इतीतरेतराधीननिर्णयत्वादनिर्णयः' (तन्त्र वा- १. ३. ३.) ॥

---

१. अयमेव पाठो व्याख्याद्वयसम्मतः क. पु. दृष्टश्च । ख. पु. 'तथा भावि ।' वस्तुत आत्मतत्त्वविवेकैकरस्यदृष्टौ प्रवाहोच्छेदपदयोः सृष्टिप्रलयपरत्वमेव । तथा च अन्यथा कृतहानप्रसङ्गादित्यस्य पुनः सर्गानङ्गीकारे कृतहानं स्यादिति यथाश्रुत एवार्थ इति । गीताश्लोकेऽपि 'सर्गप्रलयविवक्षाऽपि भाव्ये'ति ॥ २ प्र. 'अनन्यथासिद्धप्रवृत्तिविषयत्वमित्यर्थः ।'

[79] न ह्यत्रालस्यादिर्निमित्तम्; दुःखमयकर्मप्रधानत्वात्। नाप्यन्यत्र सिद्धप्रामाण्येऽभ्युपायेऽनधिकारेणास्मिन्ननन्यगतिकतयाऽनुप्रवेशः; परैः पूज्यानामप्यत्रा[1] प्रवेशात्। नापि भक्ष्यपेयाद्यद्वैतरागः; तद्विभागव्यवस्थापरत्वात्। नापि कुतर्काभ्यासाहितव्यामोहः; आकुमारं प्रवृत्तेः। नापि सम्भवद्विप्रलम्भपाषण्डसंसर्गः; पित्रादिक्रमेण प्रवर्तनात्। नापि योगाभ्यासाभिमानेनाव्यग्रताभिसन्धिः; प्राथमिकस्य कर्मकाण्डे

'यद्येवं प्रलीनशाखमूलता कल्प्येत—ततः सर्वासां बुद्धादिस्मृतीनामपि तद्द्वारं प्रामाण्यं प्रसज्येत। यस्यैव हि यदभिप्रेतं स एव तत् प्रलीनशाखामस्तके निक्षिप्य कुर्यात्' (१. ३. १)। अतः स्मृतित्वं बुद्धादिवचसामपीति तत्राप्यक्षतो महाजनपरिग्रह इति चेत्—उच्यते। प्रत्यक्षवेदाविहितधर्मक्रियां ये, विना हेतुदर्शनं, विहितत्वबुद्ध्याऽऽद्रियन्ते, ते शिष्टाः महाजनाः। तैः श्रुतीनामिव यासां स्मृतीनां ग्रहणधारणे क्रियेते, श्रुत्यर्थस्येव च यदीयार्थस्यानुष्ठानमनुष्ठापनं च तत्रैव तादृशं परिगृहीतत्वम्। 'शाक्यादयश्च सर्वत्र कुर्वाणा धर्मदेशनाम्। हेतुजालविनिर्मुक्तां न कदाचन कुर्वते॥ न च तैर्वेदमूलत्वमुच्यते गौतमादिवत्' (१. ३. २)॥ 'पारतन्त्र्यं तावत् बुद्धाद्यागमानां स्मर्यमाणपुरुषविशेषप्रणीतत्वाच्चैरेव प्रतिपन्नम्। शब्दकृतकत्वादिप्रतिपादनाऽऽदराच्च पार्श्वस्थैरपि ज्ञायते। वेदमूलकत्वं पुनस्ते तुल्यकक्षमूलत्वाक्षमयैव लज्जया च मातापितृद्वेषिदुष्टपुत्रवन्नाभ्युपगच्छन्ति' (१. ३. २)। अत उक्तरूपग्रहणधारणानुष्ठानादिरूपः स्मृत्याचारयोर्महाजनपरिग्रहो निमित्तान्तराभावात् प्रामाण्यमेव निमित्तमाश्रयतीति निश्चीयते॥

[79] तथा हि—न ह्यत्रालस्यं प्रमादो वा निमित्तम्, दुःखप्रचुरकर्मैकविषयकत्वात्। नापि सिद्धप्रामाण्यकशास्त्रान्तराद्यनधिकारिणो गत्यन्तराभावात्स्मृत्याचारकर्मण्यनुप्रवेशिता इति युक्तम्—बाह्यबहुमततमानामभ्यर्थ्यमानानामप्यत्र प्रवेशनस्याननुमन्यमानत्वात्। नापि सर्वेष्वपि भक्ष्यपेयानुभावेष्वविशेषेण निरङ्कुशप्रवृत्तः सर्वजनसम्भेदविषयकश्च राग इह निमित्तम्—भक्ष्यादिनिषेधविधिसहस्रपुरस्सरं वर्णादिभेदेन तद्विभागव्यवस्थापरत्वात् स्मृत्यादेस्तदनुकूलत्वाभावात्। नापि कुयुक्तिकल्पितो व्यामोहो निमित्तम्—युक्तिनिरूपणाक्षमत्वावस्थायामप्याकुमारं प्रवृत्तेः। नापि विप्रलम्भकैरस्वयंनष्टपाषण्डसंसर्गः—विप्रलम्भशङ्कातिदूरापित्रादिक्रमेण प्रवर्तनात्। नापि, 'योगाभ्यासे हि वयं प्रवीणाः। तत् किमिति कर्मानुष्ठान'मित्यभिमानेन स्वात्मनि कर्मानास्थाभिसन्धिरत्र निमित्तम्—स्मृत्याचारानुरोधिनो ब्राह्मणस्य तुर्याश्रमपूर्वाश्रमस्थस्य त्रिवर्गपरस्य कर्मकाण्डेऽत्यन्तं व्यग्रत्वात्तथाभिसन्ध्ययोगात्। नापि जीवनं निमित्तम्—'दृष्टलाभफला नापी'ति

---

१ अत्र परैः स्वमतप्रवेशार्थं पूज्यमानानामपि प्रवेश इहास्ति, न तु निष्कासितानामित्यर्थकं पाठान्तरं प्रदर्श्योपरितनपाठ एव शुद्ध इति स्थापितं मकरन्दे।

(काण्ड एव) सुतरां व्यग्रत्वात् । नापि जीविका ; प्रागुक्तेन न्यायेन दृष्टफलाभावात्। नापि कुहकवञ्चना ; प्रकृते तदसम्भवात् ॥

[80] सम्भवन्ति १ त्वेते हेतवो बौद्धाद्यागमपरिग्रहे । २ तथा हि, भूयस्तत्र कर्मलाघवमिति अलसाः—इतः पतितानामप्यनुप्रवेश इति अनन्यगतिकाः-भक्ष्याद्यनियम इति रागिणः—स्वेच्छया परि(यार्थपरि)ग्रह इति कुतर्काभ्यासिनः—पित्रादिक्रमाभावात् प्रवृत्तिरिति पाषण्डसंसर्गिणः—'उभयोरन्तरं ज्ञात्वा कस्य शौचं विधीयते' इत्यादिश्रवणादव्यग्रताभिमानिनः—सप्तघटिकाभोजनादिसिद्धेर्जीविकेति अयोग्याः-आदित्यस्तम्भनं, पाषाणपाटनं, शाखाभङ्गः, भूतावेशः, प्रतिमाजल्पनं, धातुवाद इत्यादिधन्धनात् (वञ्चनात्) कुहकवञ्चितास्तान् ३ परिगृह्णन्तीति सम्भाव्यते। अतो न ते महाजनपरिगृहीता इति विभागः ॥

प्रथमस्तबक एवोक्तत्वात् । नापि स्वयमभ्रान्तैर्वञ्चकैः कृता वञ्चना निमित्तम्—'विप्रलम्भोऽपि नेदृश' इति तत्रैव विस्तृतत्वात्तदसम्भवात् ॥

[80] यानीमानि निमित्तानीह विकल्प्यासाभिर्निषिद्धानि । नूनं बौद्धाद्यागमेष्वेवैते प्रवृत्तिहेतवः । तथा हि सम्भाव्यते । बहुविद्याकालवित्ताऽऽयाससाध्यानां कर्मणां तत्राभावादलसास्तान् परिगृह्णन्तीति तत्राऽऽलस्यं निमित्तम् ; इतो भ्रष्टानामेभिरनधिकारितया समुद्घोषितानामपि तत्र सुखमनुप्रवेशनमनन्यगतिकैस्तत्प्रतिग्रहे निमित्तम् ; भक्ष्याद्यव्यवस्थाऽपि रागिणाम् ; यथामतं वृत्तिरिति कुतर्काभ्यासिनाम् । पित्राद्याहृतक्रमनिर्बन्धं विना प्रवृत्तिरिति पाषण्डसंसर्गिणाम् ; 'अत्यन्तमलिनः कायो देही चात्यन्तनिर्मलः। उभयोरन्तरं ज्ञात्वा कस्य शौचं विधीयते ॥' इत्यादेर्विकल्प्यदूषणवैखर्याः श्रवणमव्यग्रताभिमानिनाम् ; मध्याह्नक्रमपञ्चमहायज्ञादिप्रबलकर्माभावात् सप्तघटिकभोजनादिसिद्धेर्जीविकाप्राप्तिरयोग्यानाम् ; तथा कञ्चित्कालमेकत्रैवाऽऽदित्यस्थापनाभिनयनम्, पाषाणपाटनम्, अकस्माच्छाखाभङ्गः, शरीरान्तरप्रवेशः, प्रतिमाजल्पनम्, लोहकरणविषयो धातुवाद इत्येवं वञ्चनोपायसद्भावात् तदाकर्पणं कुहकवञ्चितानां निमित्तमिति । अतस्तेषां हेतुदर्शन-

---

१ अयं बोधनीपाठः । पा० सम्भवन्ति चैते । २ उपपादयति तथा हीति । इति सम्भाव्यते परिगृह्णन्तीत्येतत् सम्भाव्यते। यद्वा तथा हीत्यस्य सम्भाव्यत इत्यत्रान्वयः । तत्तदभिप्रायेणालसादयस्तान् परिगृह्णन्तीति हेतोः तथा किल सम्भाव्यते, आलस्यादिर्हेतुरिति संभाव्यत इत्यर्थः । अत्र बोधन्यां यथा हीति प्रतीकधारणम् । ३ अयं क २ पाठः। तथा हीत्यारभ्य सम्भाव्यत इत्यन्तमेकं वाक्यम् । बो. 'अलसास्तान् परिगृह्णन्तीति सम्बन्धः ।' क. ख. पु. ततस्तानिति पाठः । अत्र तत इति पदमधिकं, नातीवान्वितम् ।

[81] स्यादेतत्—यद्येवं सर्वकर्मणां वृत्तिविरोधः, न किञ्चिदुत्पद्यते, न किञ्चिद्विनश्यतीति स्तिमिताकाशकल्पे जगति कुतो विशेषात् पुनः सर्गः? प्रकृतिपरिणतेरिति सांख्यानां शोभते। ब्रह्मपरिणतेरिति भास्करगोत्रे युज्यते। वासनापरिपाकादिति सौगतमतमनुधावति। कालविशेषादिति चोपाधिविशेषाभावादयुक्तम्। असतां चोपलक्षणानां न विशेषकत्वम्; सर्वदा तुल्यरूपत्वात्। न च ज्ञानद्वारा; अनित्यस्य तस्य तदानीमभावात्; नित्यस्य च विषयतः स्वरूपतश्चाविशेषादिति चेत्—न—

[82] शरीरसंक्षोभश्रमजनितनिद्राणां प्राणिनामायुःपरिपाकक्रमसम्पादनैकप्रयोजन-

---

शून्यत्वाभावान्न तदागमाः महाजनपरिगृहीताः। तथा चेदृशमहाजनपरिग्रहबलात् स्मृत्याचारयोरपि प्रमाणतया शास्त्रोच्छेदः स्वीकर्तव्य एवेति सिद्धं सृष्टिमध्येऽपि सम्प्रदायह्रासोऽप्रकम्प्य इति॥ सम्पूर्णोच्छेदशालिनी च प्रलयदशा प्रागेव स्थापिता। न चैषा प्रवाहारम्भे शास्त्रप्रवर्तकपुरुषकल्पनागौरवपरिहाराय शक्या निषेद्धुम्। आन्तरालिकोच्छेदानन्तरप्रवाहकल्पनक्रमेण निर्वाहादिति।

[81] ननु यद्येवं सर्वजीवधर्माधर्माणामपि कार्यक्षमत्वविरहः कदाचित्, तर्हि तस्यां प्रलयदशायां 'न किञ्चिदुत्पद्यते, न किञ्चिद्विनश्यती'ति निश्चलाकाशकल्पे परमाणुपरिशेषे जगति पुनरपि सर्गसम्भवः कुतो विशेषात्? न हि प्रलयप्रथमक्षणवर्तिपरमाणुविशेषातिरिक्तो विशेषः पश्चात् सम्भाव्यते। यत्तु मूलप्रकृतेर्महदादिरूपेण परिणामवशात् पुनः सृष्टिरिति—तदिदं सांख्यमतम्। शुद्धब्रह्मण एव परिणतिवशात्सृष्टिरिति त्रिदण्डिभास्करमतम्। चित्तवासनापरिपाकवशादिति तु बाह्यस्य बौद्धस्य मतम्। न च कालविशेष एव कारणमिति युक्तम्। महाकालस्य नित्यतया विशेषत्वाभावाज्जन्यमवच्छेदकविशेषमादायैव तस्य वाच्यत्वात्। तस्य चोपाधेरभावात्। न च तत्काले किञ्चिदभावेऽपि सृष्टिकाले स्थितानामेवोपाधित्वमिति वाच्यम्— विशेषणस्यैवोपाधित्वात्, तेषां चोपलक्षणत्वेन तदयोगात्। अन्यथा सर्वदाऽपि तदुपलक्षितकालरूपकारणसत्त्वेन कार्यविरहानापत्तेः। न च सृष्टिस्थितवस्तुज्ञानमुपाधिरिति वाच्यम्— अयोगात्। तद्धि ज्ञानमनित्यं नित्यं वा; नाद्यः, सर्गात्पूर्वमभावात्। नान्त्यः, तस्य सर्वविषयकत्वात् सार्वकालिकत्वाच्च सृष्टिस्थमात्रविषयकत्वरूपस्य सर्गप्राक्क्षणमात्रभावित्वरूपस्य च विशेषस्याभावात् 'इदानीं सर्गारम्भ' इति विशेषे नियामकत्वायोगात्। अत आनुमानिकयोः सर्गप्रलययोः सर्गसम्भवः कथमिति चेत्—

[82] न वृत्तिविरोधः सुषुप्तिवदिति ह्युक्तम्। तथा च सुषुप्तस्य पुनर्जागरः कुतो विशेषात्। तत्र श्वासविशेषरूपः कालोपाधिर्नियामकः। श्वाससन्तानश्च प्राणसमवेतः प्राणिनामायुःपरिपाक-

श्वाससन्तानानुवृत्तिवत् महाभूतसंप्लवसंक्षोभलब्धसंस्काराणां परमाणूनां मन्दतर-तमादिभावेन कालावच्छेदैकप्रयोजनस्य प्रचयाख्यसंयोगपर्यन्तस्य कर्मसन्तानस्येश्वर-निःश्वसितस्यानुवृत्तेः । कियानसाविस्यत्र, अविरोधात् आगमप्रसिद्धिमनतिक्रम्य तावन्तमेव कालमित्यनुमन्यते ॥ ब्रह्माण्डान्तरव्यवहारो वा कालोपाधिः । तदवच्छिन्ने काले पुनः सर्गः । यथा खल्वलाबुलतायां विततानि फलानि, तथा परमेश्वरशक्तावनु-स्यूतानि सहस्रशोऽण्डानीति श्रूयते ॥

[83] **१ एवं विच्छेदसम्भवे कस्य केन परिग्रहः, यतः प्रामाण्यं स्यात ॥ ज्ञापकश्चा-**

क्रमसंपादनार्थं पूर्वजागरकालजातशरीरसंक्षोभजनितनिद्रादशायामप्यनुवर्तते । तथाऽवान्तरप्रलये परमाणुषु कर्मसन्तानोऽनुवर्तते । स एव परमाण्वधिष्ठातुः प्रलयरात्रौ निद्राणस्य परस्य पुंसः श्वाससन्तानो भाव्यः । प्रलयकालिकानां च तेषां कर्मणां प्रचयाख्याशिथिलसंयोगजनकत्वेन संयोगस्थैर्याभावात् द्व्यणुकादिकं प्रलयमध्ये न भवति । ईदृशशिथिलसंयोगहेतुकर्मसन्तानोत्प-त्तिश्च तदा परमाणुगतवेगाख्यसंस्कारवशात् । स च वेगः कालानलपवनमहार्णवादिमहाभूत-संक्षोभात्मकप्रबलक्रियाकलितः । तस्य च वेगस्य प्रतिपरमाणु पृथक्स्थितस्य क्षिप्तेषुगतवेगस्येव स्वकारणवैचित्र्याधीनमाप्रलयावसानभावि तावत्क्रियासन्तानजननशक्तिशालित्वम् । अतो लोके वेगेषु तैव्रयमान्द्यतारतम्यसद्भावेन एकस्यैव वेगस्य तावत् क्रियाजनकत्वमविरुद्धं काणादनयानुरा-धेन । नैयायिकनयेन वा क्रियासन्तानासमवायिकारणतया वेगसन्तानोऽपि स्वीक्रियताम् । ईदृशकर्मसन्तानस्य च प्रयोजनं महाकालस्योपाध्यवच्छेदसम्पादनमेव । तेनैतावान् प्रलयकालः एतदनन्तरं सृष्टिरिति व्यवस्थोपपद्यते । तथा च यादृशक्रियोत्पत्त्यनन्तरं पुनः क्रियारम्भको वेगो नास्ति प्राक्तनसंक्षोभवैचित्र्याधीनस्य वेगस्य तावत् कालानुवृत्तिस्वाभाव्यात्—तादृशक्रिया-जनितः संयोगोऽशिथिलो द्व्यणुकारम्भाय भवतीति । एतावत्त्वमनुमानगम्यम् । स कर्मसन्तानः प्रलयकालिकः कियानित्यत्र तु, 'रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जनाः' इत्यादिरागम एव शरणम् ; बाधादर्शनात् । अत ईदृशोपाध्यवच्छिन्नकालविशेषात् पुनः सर्गः ॥ अथ वा एक-ब्रह्माण्डनाशकालेऽपि ब्रह्माण्डान्तरसद्भावस्वीकारात् कालिकसम्बन्धेन तद्गतव्यवहारविशेषावच्छिन्नः कालः पुनःसृष्टिकारणं भवतु । अलाबुलतायां फलानीव, भगवतः शक्तावण्डानि सहस्रशः सन्तीति हि श्रूयते । 'रोमकूपेष्वनन्तानि ब्रह्माण्डानि भ्रमन्ति ते' इति ह्यामनन्तीति ।

[83] तस्मात्प्रलयाङ्गीकारे पुनःसर्गस्य दुरुपपादत्वाभावेन दृश्यमानजगदुत्पत्तेः प्रलयसत्त्वेन वेदविच्छेदध्रौव्येण परिग्राह्यस्य वेदस्य परिग्रहीतुर्महाजनस्य चाभावेन कस्य केन परिग्रहः ? अतः,

---

१ एवमिति प्रकाशपाठः । बोधन्यां तस्मादिति ।

यमर्थः न कारकः । ततः कारकाभावान्निवर्तमानं कार्यं ज्ञापकाभिमतः कथङ्कारमास्थापयेत् ?

[84] स्यादेतत्—१ सन्ति कपिलादय एव साक्षात्कृतधर्माणः कर्मयोगसिद्धाः । त एव संसाराङ्गारेषु पच्यमानान् प्राणिनः पश्यन्तः परमकारुणिकाः प्रियहितोपदेशेनानुग्रहीष्यन्ति ; कृतं परमेश्वरेणानपेक्षितकीटादिसंख्यापरिज्ञानवता—इति चेन्न—

तदन्य(तोऽन्य)स्मिन्ननाश्वासात् । तथा हि— अतीन्द्रियार्थदर्शनोपायो भावनेत्यभ्युपगमेऽपि नासौ सत्यमेव साक्षात्कारमुत्पादयति ; यतः समाश्वसिमः ॥ प्रमा-

---

महाजनपरिग्रहाच्च प्रामाण्यमिति को विरोधः' इति प्रथनतः पृष्टमयुक्तम् । अतः सिद्धं नित्यत्वं प्रामाण्यं चेत्युभयमप्यसिद्धमिति । अत आप्तोक्तत्वेनैव प्रामाण्यं सर्गारम्भे निश्चेयमिति । किञ्चापौरुषेयत्वं तावदधस्तादेव निरस्तम् । अतः पौरुषेये वेदे प्रामाण्यस्योत्पादकः पुरुषगुण एव । अयं तु महाजनपरिग्रहो निष्पन्ने प्रामाण्ये तदनुमितिजनकत्वाज्ज्ञापकः ; न तु कारकः । अतः पुरुषगुणानङ्गीकारे कारकाभावात्प्रामाण्यमनुत्पन्नमिति कथमयं महाजनपरिग्रहोऽनुमापकत्वेन सम्भाव्यमानोऽपि यथावदनुमापको भविष्यतीति । सिद्धं वेदप्रामाण्यमुत्पत्तौ ज्ञप्तौ चाऽऽप्तत्वापेक्षमिति ।

[84] अस्तु काममाप्तसापेक्षत्वम् । अथापि कर्मणा योगेन च सिद्धाः धर्माधर्मसाक्षात्कारशालिनः कपिलहिरण्यगर्भादय एव सर्वाभ्युपगताः सन्ति । त एव संसाराङ्गारेषु पच्यमानान् प्राणिनः पश्यन्तः परमया करुणया प्रियहितोपदेशेनानुग्रहीष्यन्तीति त एव वेदकर्तारो भवन्तु ॥ असर्वज्ञास्त इति चेत्—अस्तु काममेतत् ? किं तावता ? उपदेष्टव्यज्ञानं त्वस्त्येव । अनपेक्षितं च क्रिमिकीटादिसंख्यापरिज्ञानमिति किं तथाभूतेन परमेणेश्वरेणेति चेन्न— तदन्यस्मिन्ननाश्वासात् । कपिलादिषु विषये चित्तसमाधानं न भवति, तेषामनित्यज्ञानत्वात् यथावस्थितज्ञानसामग्र्यास्तत्र दुर्वचत्वात् ।

तथा हि —तेषामतीन्द्रियार्थदर्शने क उपायः ? ध्यानरूपो भावनेति चेत्— तस्या अनुपलब्धदर्शनोपायत्वं नास्त्येव । उपायत्वाभ्युपगमेऽपि तज्जन्यः साक्षात्कारः सत्यो यथार्थ इत्यत्र न किञ्चित्प्रमाणम् ; अविद्यमानकामिन्यादिसाक्षात्कारस्यापि तदधीनत्वात् । अतो न समाश्वासः । प्रमाणान्तरसंवादात्तस्य यथार्थत्वनिश्चय इति चेन्न —अहिंसाव्रतादिधर्माणां हितरूपफलानां च साध्यसाधनभावस्य प्रमाणान्तराविषयत्वेन तत्साक्षात्कर्तव्यत्वेनाभिमते तत्र प्रमाणसंवा-

---

१ बो. 'कपिलहिरण्यगर्भादय एव सन्त्युपदेष्टारः । तेषां कारुण्यनिष्ठानाम् ।' अतः सन्तीति पाठो युक्तः । सन्तु कपिलादय इति तु दृश्यते ।

णान्तरसंवादादिति चेन्न-अहिंसादि। १ हितसाधनमित्यत्र तदभावात्॥ आगमोऽस्तीति चेन्न-भावनामात्रमूलत्वेन तस्याप्यनाश्वासविषयत्वात्॥ एकदेशसंवादेनापि प्रवृत्तिरिति चेन्न—२ स्वप्नाख्यानवदन्यथाऽपि सम्भवात्॥ न चानुपलब्धे भावनाऽपि। चोरसर्पादयो ह्युपलब्धा एव भीरुभिर्भाव्यन्ते॥

[85] न च कर्मयोगयोर्हितसाधनत्वं कुतश्चिदुपलब्धम्। न चैत(च त)योः स्वरूपेणोपलम्भः क्वचिदुपयुज्यते, भावनासाध्यो वा। न चास्मिन्नन्वयव्यतिरेकौ सम्भवतः; देहान्तरयोग्यत्वात्फलस्य; अप्रतीततया तदनु(दननु?)ष्ठाने ३ तदभावाच्च। न च कर्तृभोक्तृरूपोभयदेहप्रतिसन्धानादेव तदुपपद्यते; तदभावात्। न ह्येतस्य पूर्वकर्मणः फलमिदमनुभवामीति कश्चित्प्रतिसन्धत्ते॥

दस्य दुर्वचत्वात्। आगमस्तु कपिलादिगतभावनाजन्यत्वेन भवदभिमत इति, भावनायाः प्रमाणान्तरसंवादप्रश्नावसरे न शक्योपादानः॥ अथ प्रमाणान्तरसंवादाभावेऽपि भावनाजन्योपदेशे एकदेशसाफल्यदर्शनात् सर्वत्र प्रवृत्तिरिति चेन्न- स्वप्नाख्यानवदेकदेशसंवादोपपत्तेरप्रामाण्यस्यापि सम्भवात्। वस्तुतो भावनायाः प्रमाणान्तरोपलब्धविषये दर्शनसाधनत्वम्; न त्वनुपलब्धविषयेऽपि; चोरसर्पादीनामुपलब्धानामेव पश्चात्कदाचिद्भीरुभिर्भाव्यमानत्वात्, सर्वथा चोरादिकमजानतस्तद्विषयकभावनाऽभावात्। तथा च धर्माधर्माणां कपिलादिभिः पूर्वं कथमप्यगृहीतत्वात् तद्विषयकभावनैव तेषां दुर्वचेति कथं तत्प्रत्यक्षम्।

[85] किञ्च कर्मणो योगस्य च फलं प्रति साध्यसाधनभाव एव कपिलादिभिः प्रथमं न बुद्ध इति तदनुष्ठानासम्भवात् कथं सर्वधर्माधर्मसाक्षात्कारः। न च साध्यसाधनभावाज्ञानेऽपि कर्मयोगयोः स्वरूपेणोपलम्भात् तदनुष्ठानं तैः कृतमिति वाच्यम्--वस्तुत आदौ तदुपलम्भस्यापि दुर्वचत्वात्; इष्टसाधनत्वाज्ञाने प्रवृत्त्यसम्भवाच्च। एवं भावनासाध्यः साध्यसाधनभावोपलम्भः प्रवर्तक इत्यपि न भवति, भावनायामेवाप्रवृत्तेः। न चान्वयव्यतिरेकावेव सर्वकर्मफलहेतुहेतुमद्भावे

---

१ यद्यप्यहिंसा न धर्मः अविहितत्वात्। हिंसा तु निषिद्धा। तथापि तस्याः हितसाधनत्वं प्रत्यवायाभावप्रयोजकत्वरूपम्। अहिंसाव्रतं वा किञ्चित्कमत्र ग्राह्यम्।

२ बो. 'स्वप्ने श्रुतस्याख्यानस्य, यद्वाऽस्य स्वप्नस्येदमिति स्वप्नफलप्रतिपादकस्य।'

३ बोधन्यान्, 'तत्साधनत्वाप्रतीतौ कथमनुष्ठानं, कथं च फलदर्शनं, कथमन्वयव्यतिरेकावित्याह-अप्रतीततयेति। तदसम्भवादिति-फलस्यान्वयव्यतिरेकयोर्वाऽसम्भवादिति' इति दर्शनात् औचित्याच्च तदननुष्ठाने इति पाठो युक्तः। तदनुष्ठान इति पाठेऽपि निर्वाहो विस्तरेऽस्ति। एवमत्र तदभावादित्यत्र तदसम्भवादिति पा०।

[86] केचित्तथा भविष्यन्तीति सम्भावनामात्रेऽप्यनाश्वासात् । विनिगमनायां प्रमाणाभावात् ॥ प्रतिपन्निशीथनिद्राणप्रातःप्रतिबुद्धसमस्तोपाध्यायवत् अन्योन्यसंवादात् कपिलादिषु समाश्वास इति चेन्न—एकजन्मप्रतिसन्धानवत् जन्मान्तरप्रतिसन्धाने प्रमाणाभावात् । १ तथाऽपि चाधिकारिविशेषेण ब्राह्मणत्वाद्यप्रतिसन्धानेऽनुष्ठानरूपस्याश्वासस्याभावात् । न हि पूर्वजन्मनि मातापित्रोर्ब्राह्मण्यात्तदुत्तरत्र ब्राह्मण्य-

निश्चायकौ सम्भवत इति युक्तम्—कर्मजन्यफलस्य देहान्तरभोग्यत्वात् कार्यकारणयोरेकस्मिन् जन्मन्यन्वयव्यतिरेकग्रहणस्यायोगात् । किं च जाते हि कर्मणि फले चान्वयव्यतिरेकग्रहणम् । साध्यसाधनभावस्यैवाप्रतीततया कर्मणोऽननुष्ठाने सति, कर्मानुष्ठाने फलेन सहान्वयव्यतिरेकौ न भवत इत्यतोऽपि न तौ निश्चायकौ भवितुमर्हतः ॥ न च कृष्यादाविव योऽहं कर्ता सोऽहं भोक्तेति प्रतिसन्धानात् कार्यकारणभावनिश्चय उपपद्यत इति वाच्यम्—अत्र विभिन्नजातीयोभयदेहप्रतिसन्धानाभावात् ॥ नन्वहस्त्येव प्रतिसन्धानम् अकर्तृत्वे फलं न स्यादित्यनुमानादिति चेत्—सत्यं, सामान्यतः किमपि कर्मास्तीति ज्ञायेत । एतस्य कर्मणः फलमिदमनुभवामीति विशिष्य न प्रतिसन्धीयेत । अतोऽनुष्ठानमुपदेशश्च न सम्भवतीति ॥

[86] ननु जीववैचित्र्यात्काचिदन्यमपि देहं प्रतिसन्धास्यन्तीति चेन्न—अनाश्वासात् । किं सत्यमिदं प्रतिसन्धानं, किं वा भ्रान्तिविजृम्भितमिति शङ्कायां विनिगमकाऽलाभात् । अथ—कपिलादयस्तावदुपदेष्टारः । न चाबुद्ध्वोपदेशो भवतीति बोधोऽपि सिद्धः । स चेह जन्मन्यलब्धकारणो जन्मान्तराधीन इति निश्चीयते । तेषां च जातिस्मराणां तज्ज्ञानं जन्मान्तरानुभूतविषयकमेव, न त्वयथायथमित्येतत्तु—यथाऽनध्यायदिने निद्राय प्रातर्द्वितीयायां प्रतिबुध्योपदेष्टुमारभमाणानामुपाध्यायानामुदितं वेदज्ञानं पूर्वानुभूतानुपूर्वीविषयकमेवेति अन्योन्यसंवादान्निश्चीयते, तथा—कपिलहिरण्यगर्भाद्यन्योन्यसंवादान्निश्चीयेतेति चेन्न—वैषम्यात् । अनुभूतस्मरणं ह्येकस्मिन् जन्मनि भवति ; न त्वन्यस्मिन् । अन्यथाऽस्माकमपि तत्प्रसङ्गादुपदेशवैयर्थ्यात् । कथञ्चित् क्वचित् संवाददर्शनेन केषांचिन्मरणक्लेशादेर्जन्मान्तरसंस्कारप्रतिघातकत्वमस्वीकृत्य जातिस्मरत्वोपपादनेऽपि प्रथमोत्पन्नस्य कपिलादेः स्वगतं ब्राह्मणत्वमन्यद्वेत्यग्रहणात् कीदृशवर्णानुरोध्यनुष्ठानं सम्भवेत् । न हि जन्मान्तरे स्वगतब्राह्मणत्वप्रतिसन्धानं प्रकृते तत्सत्तां साधयेत् ; जन्मभेदेन जातिभेदसम्भवात् । न चादौ ब्राह्मण्यां ब्राह्मणाज्जातः पुरुषः ॥ न चेश्वरः कथं जानातीति

१ बो. 'जन्मान्तरानुभूतं प्रति सन्दधद्भिरपि कपिलादिभिः .... एतन्न निश्चीयेतेत्याह तथा चेति । यद्वा तथा चेति जन्मान्तरीयप्रतिसन्धानाभावे इत्यर्थः । ' इति । अत्र तथा चेत्येव दृश्यते ।

मिति नियमः ; येन सर्गादौ वर्णादिधर्मव्यवस्था स्यात् । ईश्वरवत् अदृष्टविशेषोपनिबद्धभूतविशेषा(तभेदा)नुपलम्भात् । अतीन्द्रियार्थदर्शित्वे चानाश्वासस्योक्तत्वात् ॥

[87] एतेन ब्रह्माण्डान्तरसञ्चारिवर्णव्यवस्थया सम्प्रदायप्रवर्तनमपास्तम्—सञ्चारशक्तेरभावात् । वर्षान्तरसञ्चरणमेव हि दुष्करम् । कुतो लोकान्तरसञ्चारः ? कुतस्तरां च ब्रह्माण्डान्तरगमनम् ? ॥ 'अणिमादिसम्पत्तेरेवमपि स्या'दिति चेन्न- १ अत्रापि प्रमाणाभावात् । सम्भावनामात्रेण समाश्वासानुपपत्तेः । २ अथ महाजनपरिग्रहान्यथानुपपत्तिरेवात्र प्रमाणमिति चेन्न— ३ एवंभूतैककल्पनयैवोपपत्तौ भूयःकल्पनायां गौरवप्रसङ्गात् । विदेहनिर्माणशक्तेरणिमादिविभूतेश्चावश्याभ्युपगन्तव्यत्वात् ॥ अस्त्वेक एवेति चेत्—न तर्हीश्वरमन्तरेणान्यत्र समाश्वास इति ॥

शङ्क्यम्—तस्य नित्यसर्वज्ञानकत्वाददृष्टविशेषाधीनब्राह्मणादिभूतविशेषोपलम्भसंभवात् । कपिलादेश्च कर्मयोगानन्तरमपि तादृशशक्तिसन्देहे प्रथमं स्वानुष्ठानोपयोगि तदुपलम्भस्य सुतरामसम्भवात् ।

[87] एतेन स्वगतवर्णविशेषनिश्चयदौर्लभ्येनैव—स्वयमनुष्ठानाशक्ततया ब्रह्माण्डान्तरसञ्चारिवर्णव्यवस्थादर्शनरूप-भावनातिरिक्तप्रमाणमूलकं तदनुसारेण संप्रदायप्रवर्तनमित्यप्यपास्तम् । भारतवर्षादिष्वेकवर्षस्थितस्य वर्षान्तरगमनमेव दुष्करमिति स्थिते च कथन्नु ब्रह्माण्डान्तरगमनसम्भावना । अत इतस्तत्र गमनं वा तत्रत्यानामिहाऽऽगमनं वा नैव सुकरमिति ॥ ननु प्राग्जन्मकृतकर्मविशेषाधीनया अणिमाद्यैश्वर्यसम्पत्त्या स्वगतब्राह्मण्यादिसाक्षात्करणवर्षान्तरगमनादि सर्वं सम्भवतीति चेन्न-तत्सम्पत्तौ प्रमाणाभावात् । सन्देहेऽप्यनाश्वासात् ॥ महाजनपरिग्रहान्यथाऽनुपपत्त्या तेषां तत्सम्पत्तिरप्यनुमीयत इति चेत्—तर्हि तदन्यथाऽनुपपत्त्या तथाविधशक्तिसम्पन्नस्यैकस्य कल्पनमेव युक्तम् ; न तु भूयसां कल्पनं ; गौरवात् । अस्मद्देहसलक्षणदेहरहितस्य कार्यनिर्माणशक्तिरणिमादिश्चावश्यं स्वीकर्तव्येति स्थितेऽनेककल्पनं हि व्यर्थमेव । न च सन्त्येव स्वयं कपिलादय इति कथं कल्पनेति वाच्यम्—कपिलाद्युक्तिषु मिथो विरोधदर्शनेनैषु तादृशशक्त्यभावात् प्रसिद्धविलक्षणकल्पनस्यावश्यकत्वात् । एवं चैकैककल्पेऽपि तादृशानेककल्पनं, प्रतिकल्पमन्यान्य एक इत्यनेककल्पनं वा व्यर्थमेवं ॥ अस्त्वेक एवेति चेत्—तर्हि स एकोऽसम्भवात् विनिगमनाविरहाच्च नासर्वज्ञाविश्वसनीयकपिलादिः क्रिमिकीटादिसंख्यादेरपि सकलधर्माधर्मफलप्रदेन ज्ञातव्यत्वादिति निर्हेतुकनिखिलज्ञानसम्पन्नः सर्वेश्वर एव स इति ॥

---

१ अयं व्याख्याद्वयसम्मतः पाठः । पा० तत्रापि क. ख. पु । २ बो. 'अथेति' । आद्यमहाजन पा० क. ख. पु । प्र. आद्येति प्रतीकधारणं दृश्यते । ३ बोधन्यनुसारेण नञ्निर्देशः । पुस्तकेषु तु न ।

[88] कारं कारमलौकिकाद्भुतमयं मायावशात् संहरन्
हारं हारमपीन्द्रजालमिव यः कुर्वन् जगत्क्रीडति ।
तं देवं निरवग्रहस्फुरदभिध्यानानुभावं भवं
विश्वासैकभुवं शिवं प्रति नमन् भूयासमन्त्येष्वपि * ॥ ४ ॥

इति न्यायकुसुमाञ्जलौ द्वितीयस्तबकः ॥

---

[88] यः खलु मायावशादिन्द्रजालमिवात्यद्भुतप्रचुरमशेषजीवकार्यविलक्षणं पूर्वस्तबकोक्तादृष्टरूपमायानुसारेण जगत् सृष्ट्वा संहरन् संहृत्य च सृजन् सृष्टिप्रलयपरम्परया क्रीडति—तं तत एव देवशब्दाभिधेयं नित्यस्फुरितनिश्शेषज्ञानमहिमानं सत्यसंकल्पं अत एवास्मद्विश्वासमुख्यभूमिं भगवन्तं अन्त्येष्वपि समयेषु नमन् भूयासम् । नमनरूपो महागुण एव कांक्षितः ; न पुनर्जातिविशेषः । अतो नमन् अन्त्येष्वपि जातिविशेषेषु जायेयेति ॥

इति सिंहशिखरिशेखरकृपया कुसुमाञ्जलेर्द्वितीयमिमम् ।
श्रीवीरराघवोऽयं व्यवृणुत तर्कार्णवस्तबकम् ॥

इति

द्वितीयस्तबकविस्तरः ॥

श्रीरस्तु ॥

---

* पा० अन्तेष्वपि । प्र. 'नमन्नन्तकालेष्वपि भूयासम्' । बो. 'अन्त्येष्वपि जननेषु नीचास्वपि जातिषु वर्तमानः शिवं प्रति नमन् भूयासम् । यदि शिवं प्रति नमन् भवेयं, अन्त्येष्वपि भूयासम् ।' इति ।

॥ श्रीः ॥

न्यायकुसुमाञ्जलौ तृतीयस्तबकः ॥

नन्वेतदपि कथम्, तत्र बाधक[1]सद्भावात् । तथा हि—यदि स्यात्, उपलभ्येत ॥ अयोग्यत्वात् सन्नपि नोपलभ्यत इति चेत्—एवं तर्हि शशशृङ्गमप्ययोग्यत्वान्नोपलभ्यत इति स्यात् ॥ नैतदेवम्, शृङ्गस्य योग्यतयैव व्याप्तत्वादिति चेत्—[2] चेतनस्यापि योग्योपाधिमत्तयैव व्याप्तत्वात् तद्बाधे सोऽपि बाधित एवेति तुल्यम् ॥ व्यापकस्वार्थाद्यनुपलम्भेनाप्यनुमीयते, नास्तीति । को हि प्रयोजनमन्तरेण किञ्चित्कुर्यादिति ॥

॥ श्रीः ॥

कुसुमाञ्जलिविस्तरे तृतीयस्तबकः ॥

अयमञ्जलिरञ्जनाद्रिकूटस्थिरनिक्षितपदाम्बुजाय धाम्ने ।
परितो भ्रमतः प्रसह्य येन प्रहितं मे हृदयं स्वयं प्रियेऽस्मिन् ॥

ननु विश्रान्तरासम्भोऽपि परलोकसाधनावबोधिवेदप्रामाण्यं ईश्वरस्य कर्तृत्वेनेत्येतदपि कथम् ; ईश्वरे बाधकप्रमाणसद्भावात् । तथा हि—प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यनुपलब्धिरूपेषु षट्सु प्रमाणेषु मीमांसकैरस्माभिः स्वीकृतेषु इन्द्रियरूपं प्रत्यक्षप्रमाणं यद्यपीश्वराभावं न ग्राहयेत् ; इन्द्रियस्याभावप्रत्यक्षहेतुतया अस्माभिरनभ्युपगमात्, अथापि तत्सहकारितया भवद्भिरपि स्वीकृता अनुपलब्धिरेव स्वतन्त्रा इन्द्रियसहकृता वाऽभिमतमीश्वराभावप्रत्यक्षं जनयिष्यति । अन्यथा, यदि स्यादीश्वरः, उपलभ्येत ॥ अथ योग्यानुपलब्धिर्हि प्रत्यक्षकारणम् ; न केवला । अतो वर्तमानोऽपीश्वरः प्रत्यक्षायोग्यत्वान्नोपलभ्यत इति चेत्—तर्हि शशशृङ्गमपि स्वीकृत्य, 'यदि स्यादुपलभ्येते'ति प्रश्ने, तदप्ययोग्यत्वान्नोपलभ्यत इति वक्तव्यं स्यात् ॥ ननु नैवं शशशृङ्गं सिद्ध्यति । तद्धि नायोग्यं भवितुमर्हति । यत्र शृङ्गत्वं तत्र प्रत्यक्षयोग्यत्वमिति व्याप्त्या

---

१ अयं क २ पाठः । पा० संभवात् । वे. 'तत्रेश्वरे बाधकसद्भावात्' ।

२. प्र. 'शरीरविशिष्टात्मनि कर्तृत्वेन कर्तृयोग्यतानियमात् विशेषणबाधेन विशिष्टबाध एवेत्याह चेतनस्यापीति । न तु कर्तृव्यापकशरीरबाधात् व्याप्यकर्तृबाधपरोऽयं ग्रन्थः प्रत्यक्षबाधस्योपक्रान्तत्वात् ॥'

[2] उच्यते—योग्यादृष्टिः कुतोऽयोग्ये प्रतिबन्दिः १ कुतस्तराम्।
कायोग्यं बाध्यते शृङ्गं क्वानुमानमनाश्रयम् ॥

शशशृङ्गे योग्यत्वसिद्ध्यावश्यकतया योग्यानुपलब्धेरेव सत्त्वादिति चेत्— तर्हि यथा शृङ्गसामान्यस्य योग्यत्वाद्योग्यानुपलब्ध्या शशशृङ्गं बाध्यते, तथा चेतनसामान्यस्य योग्य-शरीरात्मकोपाधिमत्त्वस्य दर्शनात् ईश्वरेऽपि तादृशोपाधिमत्त्वस्य स्वीकार्यत्वात् योग्यानुपलब्ध्या उपाधिबाधे तादृशोपाधिविशिष्टचेतनात्मक ईश्वरोऽपि बाधित एव ॥ एवं स्वरूपसत्याऽनुपलब्ध्या प्रत्यक्षित एवायमीश्वराभावो ज्ञायमानयाऽनुपलब्ध्या हेत्वन्तरेण वाऽनुमीयतेऽपि । चेतनस्य हि किञ्चिदपि कुर्वतः केनचित्प्रयोजनेन भाव्यम् । न चेश्वरः स्वार्थं परार्थं वा जगत्सृजति । स्वार्थं चेत्—अवाप्तसमस्तकामत्वभङ्गः; सुखित्वापत्त्या ज्ञानेच्छाकृतिरूपत्रिविधविशेषगुणमात्रवत्त्व-सिद्धान्तविरोधश्च । परार्थं चेत्—वैषम्यनैर्घृण्यापत्तिः । किं च कायव्यापारादि विना न कश्चित् करोतीति देहित्वादिकमपि चेतनव्यापकम् । तच्चेश्वरे नोपलभ्यते । अतः कर्तृत्वव्यापकस्य स्वार्थ-परार्थरूपस्वार्थितफलस्य देहित्वादेश्चानुपलब्ध्या हेतुना कर्तृत्वबाधाज्जगत्कर्त्रीश्वराभावः सिद्ध्यतीति चेत्—

[2] उच्यते—केवलमदृष्टिरनुपलब्धिरसाधिका; किं तु योग्यानुपलब्धिरेव । सा योग्येऽपि कदाचिन्न प्रसरतीति स्थिते प्रत्यक्षायोग्ये परमात्मनि प्रतिषेधाय कुतः प्रसरेत् ॥ ननु योग्योपाधि-विशिष्टचेतन एव हीश्वरः; स प्रतिषिद्ध्यत इति चेत्-एवं योग्यानुपलब्ध्या गृह्यमाणो योग्योपाधिविशिष्टचेतनाभावः किं विशेषणाभावः उत विशेष्याभावादिः । नाद्यः; तावता उपाधि-प्रतिषेधेऽपि ईश्वरव्यक्तेरबाधात् । नान्त्यः; अयोग्यत्वाद्विशेष्यांशस्य योग्यानुपलब्धेरनवकाशात् ॥ ईश्वरे योग्यानुपलब्धिप्रसक्तौ किल शशशृङ्गप्रतिबन्देरवकाशः । तस्या एवाप्रसक्तौ कुतस्तरां तत्प्रतिबन्दिः ? नन्वयोग्यस्यापि शशशृङ्गस्य निषेधवदयं निषेधोऽस्त्विति चेन्न—अयोग्यशृङ्गस्य योग्यानुपलब्धिबलेनास्माभिरनिषेधात् । तस्मान्नेश्वराभावप्रत्यक्षम् ॥ अनुमानं तु ईश्वरोऽविद्यमानः प्रयोजनशून्यत्वादित्यादिकमाश्रयासिद्ध्या क्व प्रभवतीति ॥

१. 'न हि शशशृङ्गमयोग्यं योग्यानुपलब्ध्या निषिद्ध्यते येन प्रतिबन्दिः स्यात् । अथ शृङ्गं योग्यमेव नायोग्यम्, ततोऽतितरां न प्रतिबन्दिः' इति । मक 'प्रतिबन्दिसामान्यनिषेधे कृते अतितरां न प्रतिबन्दिरिति युज्यत इति तदर्थपरतया प्रथमं तृतीयमेव पादं व्याख्याय द्वितीय-पादं व्याचष्टे अथेति' इति । परं तु मूले कुतः कुतस्तरामिति पदश्रवणात् प्रथमद्वितीयपाद-योरेव मिथः सम्बन्धो युक्तः ।

[3] स्वात्मैव तावत् योग्यानुपलब्ध्या प्रतिषेद्धुं न शक्यते ; कुतस्त्वयोग्यः परात्मा (परमात्मा)? तथाहि–सुषुप्तयवस्थायामात्मानमनुपलभमानः, नास्तीत्यवधारयेत् ॥ कस्यापराधेनपुनः योग्योऽप्यात्मा तदानीं नोपलभ्यते? सामग्रीवैगुण्यात् । ज्ञानादिक्षणिकगुणोपधानो ह्यात्मा गृह्यत इति अस्य स्वभावः ॥ ज्ञानमेव कुतो न जायत इति चिन्त्यते

---

[3] तदिदं विस्तृणीमः । प्रत्यक्षयोग्योऽपि घटादिरन्धकारादौ न निषिद्ध्यते । किं वाह्यार्थविषयेण ; आत्मविषयेऽपि प्रत्यक्षयोग्यः स्वात्माऽपि योग्यानुपलब्धिबलात् कदाचिन्न प्रतिषेद्धुं शक्यते इति स्थिते कथं सुतरामयोग्यः परमात्मा प्रतिषिद्ध्येत । स्वात्मा हि योग्योऽपि सुषुप्त्यवस्थायां नोपलभ्यते । एवं सत्यपि योग्यानुपलब्ध्या स्वात्माभावप्रत्यक्षं तदा न भवति ।

[ननु तदा स्वात्माभावप्रत्यक्षं किमाकारकमनुपलब्धिबलादापद्यते । न खलु, अहं नास्मीत्युपलम्भः सम्भाव्येत ; तदाऽहंपदार्थाभावे आश्रयाभावात् प्रकृतोपलम्भोत्पत्त्यसम्भवात्, अहंपदार्थसत्त्वे च तस्य तदातनाभावप्रतियोगित्वासम्भवात् । न च सुषुप्तिकाले अहं नास्मीत्यनुभवासम्भवेऽपि प्रबुद्धः प्राक्तनयोग्यानुपलब्धिपरामर्शेन, 'सुषुप्तिकाले नाहमासं' इति प्रातश्चत्वरन्यायेन गृह्णात्वित्यापादयाम इति वाच्यम्– यदि स्यात्तदुपलभ्येतेत्युपपाद्या योग्यानुपलब्धिर्हि उपलब्ध्यापादकसामग्र्यां सत्यामेव भवति । तत्र च सामग्र्यामुपलब्धिं प्रति समवायिकारणतयाऽहंपदार्थोऽपि निविष्ट इति योग्यानुपलब्धिः समवायिकारणसत्ताकालिकानुपलब्धिरेव । सा कथमात्माभावं साधयेदिति । अतः कथमापाद्यते । किञ्च यदि योग्यविषयेऽपि योग्यानुपलब्धिः प्रतिषेधाक्षमा, तर्हि कथं साऽभावप्रत्यक्षकारणम्–इति चेत् — न वयं योग्यानुपलब्धिरस्तीत्युक्त्वा स्वात्माभावप्रत्यक्षमापादयामः । किं तु योग्यानुपलब्ध्या आत्मा प्रतिषेद्धुं न शक्यते । अनुपलब्धिमात्रसद्भावेऽपि अभावप्रत्यक्षहेतुर्योग्यानुपलब्धिरस्तीति वक्तुं न शक्यत इति यावत् । तथा च योग्यविषय एव योग्यानुपलब्धेर्दुर्वचत्वे, योग्यादृष्टेः कुतोऽयोग्य इत्यत्र ब्रूमः ।]

ननु तदा स्वात्म-तन्मनस्संयोगरूपसमवाय्यसमवायिकारणादेरक्षतत्वात्कस्य हेतोर्वैकल्यादात्मायोग्योऽपि नोपलभ्यते । आशेरते च सुषुप्तावात्मभानमध्यात्मविदः । तथा चानुपलब्धिरेव कथमिति चेत् —कारणान्तरविरहप्रयुक्तसामग्रीवैगुण्यादेव । आत्मप्रत्यक्षं प्रति हि प्रत्यक्षयोग्यज्ञानादिरूपतद्गुणवैशिष्ट्यं कारणम् । स्वसमवेतकिञ्चिद्गुणोपहित एव चात्मा गृह्यते । यथा अहं जाने सुखीत्येवम् । सुषुप्तेः प्राचीनं ज्ञानादिकं तु तदैव नष्टम् । अतो गुणाभावादनुपलब्धिरस्ति । एवमपि न तत्र योग्यानुपलब्धिः । न हि योग्यस्यानुपलब्धिर्योग्यानुपलब्धिः । तथा हि सति सुषुप्तौ अनुपलभमानो नास्तीत्यवधारयेत् ; अनुपलब्धिवत् योग्यानुपलब्धेरपि सत्त्वात् । किं त्वनुपलब्धिर्योग्यताविशिष्टा योग्यानुपलब्धिः । योग्यता च प्रतियोगियोग्यता प्रतियोगि-

पश्चाद्वा कथमुत्पत्स्यत इति चेत्—मनसोऽनिन्द्रियप्रत्यासन्नतयाऽजननात्; तत्प्रत्यासत्तौ च पश्चाज्जननात् ॥

[4] मनोवैभववादिनामिदमसम्मतम् । तथा हि । मनो विभु सर्वदा स्पर्शरहितद्रव्यत्वात्, १ (सर्वदा) विशेषगुणशून्यद्रव्यत्वात् नित्यत्वे सत्यनारम्भकद्रव्यत्वात् ज्ञानासमवायिकारणसंयोगाधारत्वादित्यादे २ रिति चेत्—

[5] न सर्वेषामापाततः स्वरूपासिद्धत्वात् । तथा हि—यदि रू(यदा हि रू)पाद्युपलब्धीनां क्रियात्वेन करणतया मनोऽनुमितिः, न तदा द्रव्यत्वसिद्धिः; अद्रव्यस्यापि

ग्राहकसामग्री । अतश्च विशेषगुणस्यात्मरूपप्रतियोगिग्राहकसामग्रीघटकत्वात् सुषुप्तौ गुणाभावेन सामग्रीवैकल्यात् योग्यानुपलब्धिर्योग्यविषयेऽपि नास्तीति ॥ ननु कुतस्तदा ज्ञानं न जायत इति, तथा चेत्—प्रबोधवेलायां परं पुनः कथमुत्पत्स्यत इति च चिन्तनीयमिति चेत्—'आत्मा मनसा संयुज्यत' इतिवत् मनः इन्द्रियेणेत्यस्याप्यपेक्षितत्वादिन्द्रियमनःसंयोगाभावात् सुषुप्तौ ज्ञानाभावः; प्रबोधे च तत्सत्त्वाद्‌ज्ञानोत्पत्तिरिति ।

[4] ननु मनसो विभुत्वं वदतां मीमांसकानां नेदं सम्मतम् ; तस्य विभुन इन्द्रियसंयोगस्यावर्जनीयत्वात् । तदुक्तप्रकारेण हि मनो विभु स्पर्शप्रतियोगिकसार्वकालिकाभाववत्त्वे सति द्रव्यत्वात् । पृथिव्यादौ गुणादौ च व्यभिचारवारणाय दलद्वयम् । एवं विशेषगुणीयसार्वकालिकाभाववत्त्वे सति द्रव्यत्वादिति द्वितीयो हेतुः । दलकृत्यं पूर्ववत् । मनस्यपि गुणसत्त्वाद्विशेषेति । सार्वकालिकत्वविवक्षयोत्पत्तिक्षणं गुणशून्यपृथिव्यादिव्यावृत्तिः । नित्यत्वे सति द्रव्यानारम्भकद्रव्यत्वादिति तृतीयो हेतुः । अन्त्यावयविवारणाय विशेषणम् । परमाणुवारणायानारम्भकेति । मनसोऽपि संयोगाद्यारम्भकत्वात् द्रव्यारम्भकेति । गुणविशेषवारणाय द्रव्यत्वनिवेशः । त्रिष्वपि कालादिर्दृष्टान्तः । ज्ञानासमवायिकारणसंयोगाधारत्वादिति चतुर्थः । आत्मा दृष्टान्तः । इन्द्रियान्तरव्यावृत्तयेऽसमवायीति । एवमनित्यावृत्तिद्रव्यविभाजकधर्मवत्त्वात्, संयोगसमवायान्यतरसम्बन्धेन द्रव्यानाधारद्रव्यत्वादित्यपि हेतुरिति चेत्—

[5] उच्यते । अत्र यथाभूतं मनः, तथाभूततत्साधकसर्वयुक्तिपरिशीलनेन धर्मिसिद्धिमालोचयन्त्यनुमानमात्रे धीप्रवृत्तौ द्रव्यत्वासिद्ध्या स्वरूपासिद्धिः । तद्ध्यनुमानं सुखाद्युपलब्धिः

---

१ आवश्यकमपि सर्वदेति पदं व्याख्यानुसारे न मूलेऽस्ति; किं तु लभ्यम् । बो. 'अत्रापि सर्वदेत्यनुषज्यत' इति । २ बे. 'सर्वतोपलभ्यमानकार्यत्वादित्यादिशब्दार्थः' इति । परं तु हेतुर्द्रव्यत्वघटित एव युक्तः, परिहारानुसारात् ।

करणत्वात् ॥ अथासामेव साक्षात्कारितयेन्द्रियत्वेन तदनुमातव्यम्, तथाऽपि व्यापकस्य निरुपाधेर्नेन्द्रियत्वमित्युपाधिर्वक्तव्यः । तत्र–यदि(तद्यदि) कर्णशष्कुलीवत् नियतशरीरावयवस्योपाधित्वम्, तदा तावन्मात्रे वृत्तिलाभः तद्दोषे च वृत्तिनिरोधः श्रोत्रवत् प्रसज्येत । ततः शरीरमात्रमुपाधिरभिधेयः(रवसेयः] । तथा च तदवच्छेदेन वृत्तिलाभे, 'शिरसि मे वेदना, पादे मे सुखं'मित्याद्यव्याप्यवृत्तित्वप्रतीतिविरोधः ; असमवायिकारणानुरोधेन विभुकार्याणां प्रादेशिकत्वनियमात् । शरीरतदवयवादिपरमाणुपर्यन्तोपाधिकल्पनायां कल्पनागौरवप्रसङ्गः, १ नियमानुपपत्तिश्चेति—ततोऽन्यदेवैकं सूक्ष्ममुपाधित्वेनातीन्द्रियं कल्पनीयम् । तथा च तस्यैवेन्द्रियत्वे स्वाभाविकेऽधिककल्पनायां प्रमाणाभावात् धर्मिग्राहकप्रमाणबाधः ।

सकरणिका क्रियात्वाच्छिदादिक्रियावत् रूपाद्युपलब्धिवच्चेत्येवम् । तेन च, धात्वर्थः क्रियेति सुखाद्युपलब्धेरपि क्रियात्वेन मन सिद्धावपि करणत्वहेतुना वास्यादिवत् द्रव्यत्वसिद्धिर्न वक्तुं शक्यते, व्याप्तिज्ञानादौ व्यभिचारात् ।

अथापातगतिं परित्यज्योपलब्धीनां साक्षात्कारत्वविलक्षणविषयताशालित्वात् सुखाद्युपलब्धिरिन्द्रियजन्या उपलब्धित्वात् रूपोपलब्धिवदिति मनःसाधकयुक्तिपरिशीलनादिन्द्रियलक्षणाऽन्यथानुपपत्त्या द्रव्यत्वसिद्धिरित्युच्यते–तर्हि विभुत्वमसिद्धम् । तथा हि—तदा मनसो विभुत्वे विभुना गगनस्य कर्णशष्कुलीरूपोपाध्यवच्छिन्नस्यैव श्रोत्रेन्द्रियत्ववत् सोपाधेरेवेन्द्रियत्वं, न तु निरुपाधेः ; अन्यथा वक्ष्यमाणदोषापरिहारादिति कश्चिदुपाधिर्वक्तव्यः । तथा च सति किं कश्चिदेव देहावयव उपाधिः, किं वा देहरूपावयविमात्रम्, उत सर्वावयवावयविसङ्घ इति विचार्यम् । आद्ये श्रोत्रस्य तदुपाध्यवच्छेदेनैव शब्दोपलम्भकत्ववत् तदेकावयवावच्छेदेनैव सुखाद्युपलम्भकत्वं स्यात् ; तदुपघाते च बधिरश्रोत्रस्येव मनसः कार्यकरत्वं न स्यात् । अतोऽनुभवविरोधः । तदर्थं द्वितीयपक्षाभिधाने अवयव्यवच्छेदेनैव सुखाद्युपलब्धिः स्यादिति, शिरसि मे वेदना, पादे मे सुखमित्येकदेशावच्छिन्नत्वप्रतीतिविरोधः । विभुकार्यत्वेपि शब्दादीनां यत् अव्याप्यवृत्तित्वं तस्य, यदवच्छेदेनासमवायिकारणं संयोगस्तदवच्छेदेन कार्यमित्यसमवायिकारणानुरोधेनैव व्यवस्थाविधानात् प्रकृते शरीरस्योपाधित्वे शरीरावच्छिन्नमनःसंयोग आत्मनि पादावच्छेदेनैवास्तीत्यस्य दुर्वचतया, पादे मे सुखमिति प्रतीत्ययोगात् । तदर्थं तृतीयपक्षग्रहे शरीरादिपरमाणुपर्यन्तावयवधाराया उपाधित्वकल्पने गौरवम्, तथा तत्तदवयवावच्छिन्नमनःसंयोगदेहावच्छिन्नमनःसंयोगानां

---

१ सर्वेषामेव शरीरादीनामुपाधित्वे कुतो नियतदेशसुखाद्युत्पत्तिरित्यर्थः ।

[6] अथ ज्ञानक्रमेणेन्द्रियसहकारितया तदनुमानम्; ततः सुतरां प्रागुक्तदोषः। यदि च मनसो वैभवेऽप्यदृष्टवशात् क्रम उपपाद्येत, तदा मनसोऽसिद्धेराश्रयासिद्धिरेव वैभवहेतूनामिति ॥

[7] अथ यत्रादृष्टस्य दृष्टकारणोपहारेणोपयोगः, तत्र तत्पूर्णतायां कार्यमुत्पद्यत एव अन्यथा अन्त्यतन्तुसंयोगेभ्योऽपि कदाचित् पटो न जायेत; जातोऽपि वा कदाचिन्निर्गुणः स्यात्; बलवता कुलालेन दृढदण्डनुन्नमपि चक्रं न भ्राम्येत । यत्र तु दृष्टानुपहारेणादृष्टव्यापारः, तत्र तद्वैगुण्यात् कार्यानुदयः; यथा परमाणुकर्मणः । तदिहापि यदि विषयेन्द्रियात्मनां समवधानमेव ज्ञानहेतुः, तदा तत्सद्भावे सदैव कार्यं स्यात् । न ह्येतदतिरिक्तमप्यदृष्टस्योपहरणीयमस्ति । न च सदैव ज्ञानोदयः । ततोऽतिरिक्त-

---

समुच्चित्यासमवायिकारणत्वे पादावच्छिन्नत्वनियमानुपपत्तिः; विकल्पेन कारणत्वे व्यभिचारात् कारणत्वघटकनियमानुपपत्तिः; एकेन्द्रियजन्यज्ञानेनान्येन्द्रियजन्यज्ञानस्य युगपदनुत्पत्तिनियमानुपपत्तिश्च । अत ईदृशशरीरतदवयवभिन्नं अवच्छेदकत्वादेव विभुत्वायोगात् सूक्ष्मं, अप्रत्यक्षत्वाच्चातीन्द्रियं किञ्चित् उपाधित्वेन कल्प्यम् । तथा च तस्यैव मनस्त्वं युक्तम्, लाघवादिति मनस इन्द्रियत्वेन सिद्धिदशायामविभुत्वेनापि सिद्धिरिति मनःसाधकप्रमाणबाधितत्वाद्विभुत्वहेतवो दुष्टा इति ॥

[6] अथैतदनुमानापरिशीलनेऽपि यदि, 'युगपद्ज्ञानानुत्पत्तिर्मनसो लिङ्ग' '(न्या. १. १)मिति सौत्रहेतुना, ऐन्द्रियिकज्ञानानि क्लृप्तकारणातिरिक्तेन्द्रियसहकारिसापेक्षाणि क्रमिकत्वात् (युगपदनुत्पद्यमानत्वात्) इति प्रयोगेण, यत्संयोगे इन्द्रियं प्रत्यक्षजनकं यदसंयोगे चाजनकं तादृशसहकारित्वेन च ह्यप्रत्यक्षार्थमेव मनोऽनुमीयते—तदा सुतरां धर्मिग्राहकप्रमाणबाधो विभुत्वहेतूनाम् । प्रागिन्द्रियत्वेन मनःसाधने तस्याविभुत्वमुपाधिशोधनेन लाघवबलेनोपपाद्यमासीत् । इदानीं तु हेतोरेव साक्षादविभुत्वसाधकत्वमिति ॥ यदि तु मनसो विभुत्वमेव स्वीकृत्य युगपद्ज्ञानानुत्पत्तिमदृष्टवशान्निर्वोढुमिच्छसि, तर्ह्यन्यथा निरूढत्वाद्धेतुः सहकार्यन्तरसाधक एव न भवतीति मनस एवासिद्धत्वात्कुत्र विभुत्वं साध्येयः; आश्रयासिद्धत्वादुक्तानुमानानाम् ।

[7] अथादृष्टस्य द्वेधा कार्यहेतुत्वम्; क्वचित् दृष्टकारणसङ्घटनं विना साक्षात्; यथा सर्गादौ परमाणुषु कर्मजनकत्वम् । तथा च सूत्रम्—'अग्नेरूर्ध्वज्वलनं वायोस्तिर्यग्गमनमणुमनसोश्चाद्यं कर्मेत्यदृष्टकारितानि' इति (वै. द. 5. 2.); अन्यत्र परम्परया दृष्टकारणसङ्घटनेन । तस्मिंश्चोपहरणरूपे व्यापारे सिद्धे पुनरदृष्टापेक्षा न विद्यते । एवं च प्रकृते मनोऽनङ्गीकारे विषयेन्द्रियात्मसमवधानमात्रस्यैव ज्ञानहेतुतयाऽदृष्टेन तदुपहारे सति तदतिरिक्तस्यादृष्टोपहरणीयस्याभा-

मपेक्षितव्यम् । तच्च यद्यपि सर्वाण्येवेन्द्रियाणि व्याप्नोति, तथाऽपि करणधर्मत्वेन क्रियाक्रमः सङ्गच्छते। अकल्पिते तु तस्मिन्नायं न्यायः; प्रतिपत्तुरकरणत्वात्; चक्षुरादीनामनेकत्वात् इति चेत्—

[8] नन्वेवमपि युगपद्ज्ञानानि मा भूवन् युगपद्ज्ञानं तु केन वार्यते ॥ भवत्येव समूहालम्बनमेकं ज्ञानमिति चेन्न—एकेन्द्रियग्राह्येष्विव नानेन्द्रियग्राह्येष्वपि प्रसङ्गात् ॥ १ तेष्वपि भवत्येवेति चेन्न—तत्सङ्गकाले ज्ञानरूपेण विवादविषये क्रमानुमानात् ।

वायुगपदज्ञानोत्पत्तिः स्यादेव । तस्मान्मनोऽपेक्षितमेव । एवं सिद्धयतश्च तस्य विभुत्वस्वीकारे तस्य सर्वेन्द्रियव्यापित्वादनुपपत्तिर्यद्यपि तदवस्थैव; अथापि तस्यैकदा एकज्ञानजनकत्वमेव स्वभाव इति स्वीकारान्न दोषः । लोके च करणस्यैकदा एकत्रैकक्रियाजनकत्वमेव दृष्टमिति क्रियाक्रम एव करणधर्मः। अकल्पने तु मनसो नैषकरणधर्मन्यायः प्रवर्तेत; ज्ञातुरात्मनः कर्तृत्वेन करणत्वाभावात्तत्र करणस्वभावोक्त्यसम्भवात्; इन्द्रियाणां करणत्वेऽप्येकैकेन्द्रियस्यैकैकक्रियाजनकत्वरूपकरणस्वभावबलेन युगपदनुत्पत्तिनिर्वाहाभावाच्च । अतः सहकारित्वेन मनःसाधने विभुत्वमविकलमिति चेत्—

[8] ननु तर्ह्येवमतिरिक्तकरणस्वीकारेऽपि युगपद् ज्ञानोत्पत्तिवारणं कथमिति पृच्छामः । यद्यपि मनस एकदा एकज्ञानजनकत्वमेवेत्युक्तत्वात् चाक्षुषोत्पत्तिकाले त्वाचादिज्ञानान्तरमप्राप्त्यैवमनेकं ज्ञानं युगपन्नापादयितुं शक्यते; अथापि युगपत् रूपस्पर्शादिसर्वविषयकं सर्वेन्द्रियजन्यमेकं ज्ञानं कथं वार्यताम्; एकज्ञानजनकत्वस्वभावस्यैतदबाधकत्वात् ॥ ननु भवत्येव समूहालम्बनमेकं ज्ञानमिति चेत्—सत्यं इमौ घटपटौ, इमौ ध्वनिवर्णावित्येवमेकैकेन्द्रियग्राह्यानेकविषयकं भवति ? एवं विभिन्नेन्द्रियग्राह्यविषयकमपि, इमौ रूपरसावित्यादिकमापाद्यते ॥ ननु तेष्वपि नानेन्द्रियग्राह्येषु समूहालम्बनं ज्ञानं भवत्येव । यथा दीर्घशष्कुलीं सुरभिलां सकटात्कारं खादतो युगपदेतद्रूपरसगन्धस्पर्शशब्दविज्ञानमिति चेन्न—तत्रैव तत्तदिन्द्रियग्राह्यमात्रव्यासक्तचेतस इन्द्रियान्तरग्राह्यविषयकज्ञानादर्शनात् पश्चादेव तदुत्पत्तिदर्शनात्, प्रकृतविवादविषयशष्कुलीभक्षणकालिकरूपादिज्ञानं रसादिज्ञानेन सह नोत्पन्नम्, किं तु क्रमिकं चाक्षुषादिज्ञानत्वाद्यासङ्गकालिकज्ञानवदित्यनुमानेन क्रमिकत्वसिद्धया समूहालम्बनत्वासम्भवात् । क्षणभेदसूक्ष्मेक्षणवैधुर्यात् पुनः समूहालम्बनत्वभ्रम इति ।

---

१ इदं सांख्यमतमिति बोधन्याम् ।

[9] बुभुत्साविशेषेण व्यासङ्गे क्रियाक्रम इति चेत्—मै(नै)वम् नह्येष बुभुत्साया महिमा, यत् अबुभुत्सिते विषये ज्ञानसामग्र्यां सत्यामपि न ज्ञानम्। अपि तु न तत्र संस्कारातिशयाधायकः प्रत्ययः स्यात्। यदि त्वबुभुत्सिते विषये सामग्रीमेव सा निरुन्ध्यात्, घटायोन्मीलितं चक्षुः पटं नैव दर्शयेत्। तस्माद्बुभुत्सापीन्द्रियान्तरादाकृष्य बुभुत्सितार्थग्राहिणीन्द्रिये मनो निवेशयन्ती युगपद्ज्ञानानुत्पत्तावुपयुज्यते; न तु स्वरूपतः॥

[10] विभुनोऽपि मनसो व्यापारक्रमात् क्रम इति चेन्न—तस्य संयोगातिरिक्तस्य कर्मरूपत्वे वैभवविरोधात्, गुणरूपत्वे नित्यस्य क्रमानुपपत्तेः; अनित्यस्य च नित्यैक-

---

[9] ननु क्रमिकत्वे चाक्षुषज्ञानत्वादिकमप्रयोजकम्। तावता व्यासङ्गकालेऽपि यौगपद्यं तु नाऽऽपाद्यम्; तदा ज्ञानक्रमस्य बुभुत्साविशेषाधीनत्वात्; यत् बुभुत्सितं तद् गृह्यते—इति चेन्नैवम् बुभुत्साकाले ज्ञानक्रम एव कुत इति हि विमृश्यमस्ति। न ह्यबुभुत्सितविषये सत्यामपि सामग्र्यां ज्ञानप्रतिबन्धकत्वं वस्त्वन्तरबुभुत्सायाः प्रभावः; किं तु सामग्रीबलाज्जायमानस्यैव प्रत्ययस्य दृढतरकालान्तरमाविस्मरणोपयोगिसंस्कारानाधायकत्वं बुभुत्साधीनम्। अन्यथा ज्ञानप्रतिबन्धकत्वाङ्गीकारे घटदिदृक्षया चक्षुरुन्मीलने पटो न दृश्येत। अतो बुभुत्साया ज्ञानाप्रतिबन्धकत्वाद्व्यासङ्गकाले सर्वसम्मतः क्रियाक्रमोऽपि दुर्निरूपः स्यात्। तस्मादन्यथोपपादनासम्भवाद्व्यासङ्गकाले बुभुत्सा मनसोऽन्येन्द्रियसंयोगविघटनेन बुभुत्सितवस्तुग्राहकेन्द्रियसंयोगं सम्पादयति; अतोऽन्येन्द्रियमनःसन्निकर्षरूपकारणाभावादन्येन्द्रियजं ज्ञानं न भवतीत्येवमेव वक्तव्यम्। न तु बुभुत्सायाः स्वरूपतः प्रतिबन्धकता; एकेन्द्रियग्राह्यघटपटादिविषये घटायोन्मीलितेनापि चक्षुषा पटदर्शनात्। अतो व्यासङ्गकालिकक्रियाक्रमोऽपि मनसो विभुत्ववारकः। तथा च मनसोऽणुत्वसिद्धौ दीर्घशष्कुलीभक्षणादौ समूहालम्बनोपयोगिसर्वसामग्रीसमावेशासम्भवादन्यदेव तदाऽपि ज्ञानक्रम एव सम्मन्तव्य इति।

[10] ननु मनसो विभुत्वेऽपि न दोषः। तस्य हि व्यापारमन्तरेण करणत्वायोगात्तदावश्यकतया, यदा यद्ज्ञानानुगुणो व्यापारस्तदा तद् ज्ञानमिति व्यापारक्रमेणैव क्रियाक्रमः सम्पद्यत इति चेत्—स तावत् व्यापारः संयोगातिरिक्त एव त्वया वाच्यः; संयोगरूपत्वे मनसो विभुत्वेन सर्वेन्द्रियसंयोगस्य सदातनत्वेन क्रमासम्भवात्। अतः संयोगातिरिक्तस्स क इति विचार्यम्। किं कर्म किं वा गुणः? उभयोरेव लोके व्यापारत्वात्। तत्र नाद्यः; कर्मणो विभुत्वविरुद्धत्वात्। अन्त्ये-स किं नित्योऽनित्यो वा। आद्ये, सर्वेन्द्रियापेक्षितसर्वव्यापारानित्यतया क्रमानुपपत्तिरेव। अन्त्ये चानित्योऽयं गुणो [illegible] क्रमात्समवेतत्वादविभुद्रव्यसंयोगासमवायिकारणको

गुणस्याविभुद्रव्यसंयोगासमवायिकारणकत्वेन तदन्तरेणानुपपत्तेः ॥ तदपि कल्पयिष्यत इति चेत्—तदेव तर्हि मनस्स्थाने निवेश्यतां लाघवाय ॥ तस्मादण्वेव मन इति ॥

(11) तथा च तस्मिन्ननिन्द्रियप्रत्यासन्ने निरुपधानत्वादात्मनः सुषुप्त्यवस्थायामनुपलम्भः । एतदेव मनसः शीलमिति कुतो निश्चि(र्णी)तमिति चेत्—अन्वयव्यतिरेकाभ्याम् । न केवलं तस्य, किं तु सर्वेषामेवेन्द्रियाणाम् । न हि विशेषगुणमनपेक्ष्य चक्षुराद्यपि

वाच्यः ; नित्यवृत्तिद्वित्वसंयोगादेः एकमात्रवृत्तिरूपरसादेश्च तथात्वाभावेऽपि नित्यैकमात्रवृत्तेः शब्दपृथिवीपरमाणुरूपादेरविभुद्रव्यभेरीवह्न्यादिसंयोगसापेक्षत्वात् । तच्चाविभुद्रव्यं विलक्षणं न लक्ष्यते । अथ तदपि कल्प्यत इति चेत्—विभुद्रव्यस्य मनसः, तदर्थमविभुद्रव्यस्यान्यस्य च कल्पनामपेक्ष्य एकमविभुद्रव्यमेव मनस्त्वेन कल्प्यताम्, लाघवात् । अतो मनसोऽविभुत्वासम्भवात् मध्यमपरिमाणत्वे चानित्यत्वापत्तेरण्वेव मन इति ।

(11) तथा च मनसो विभुत्वस्य निरस्तत्वादणुनस्तस्य सुषुप्त्यवस्थायामिन्द्रियप्रत्यासत्त्यभावात् ज्ञानानुदयादात्मनो विशेषगुणोपहितत्वाभावान्न प्रत्यक्षम् ॥ विशेषगुणे सत्येव मनसः प्रत्यक्षजनकत्वमिति कुतः प्रमाणादिति चेत्–अन्वयव्यतिरेकाभ्यामेव । नेदं मनस एव शीलम् ; किं तु इन्द्रियसामान्यस्य । न हि चक्षुस्त्वगिन्द्रियं चोद्भूतरूपस्पर्शाभावे द्रव्यप्रत्यक्षं जनयति । तदिदं द्वितीयस्तबक एवावोचाम । अत एव हि तत्र तारत्वादेर्वर्णधर्मत्वविचारावसरे, स्पर्शाद्यनन्तर्भावेण भावेषु त्वगादीनामव्यापारादित्युक्तम् । तदिन्द्रियव्यवस्थाहेतुस्पर्शादिगुणमविषयीकृत्य त्वगादीन्द्रियं भावपदार्थं न गृह्णाति । स्पर्शाभावादिमभावपदार्थं तु स्पर्शादेस्तत्र प्रत्यक्षतया भानाभावेऽपि गृह्णीयात् । अतः स्पर्शाभानात्तारत्वं न त्वग्ग्राह्यमिति हि तदर्थः ॥ नन्विन्द्रियप्रत्यासत्तेर्ज्ञानहेतुत्वे स्वप्नावस्थायामिन्द्रियाणामव्यापृतत्वात् कथं ज्ञानमिति चेत्–तदा न किञ्चित्प्रत्यक्षम् । केवलं पूर्वानुभवनिवहाधीनतत्तत्संस्कारोद्बोधबलात्तत्तद्विषयस्मृतिसन्ततिर्भवति । ततो दोषवशात्साक्षात्कारात्मकरजतभ्रम इव तदा दोषादृष्टाद्वा स्मृतिविषयपदार्थानां परस्परोपरागेण स्वप्नविभ्रमा उत्पद्यन्ते । ननु सदृशवस्तुप्रत्यक्षादिकारणाभावात् संस्कारोद्बोध एव तदा कथमिति चेत्–इन्द्रियाणां बाह्यशब्दादिभिः प्रकृष्टसन्निकर्षाभावेऽपि प्रकृष्टशब्दादिविषयाभावेऽपि च कथञ्चिन्मन्दतरतमादिभावापन्नहेतुसम्पत्तिचिन्तनया बाह्यशब्दस्पर्शादेरुपलम्भस्य कथनीयत्वात् । सर्वात्मना तदसम्भवसमयेऽपि शरीरान्तरौष्ण्याद्प्रतिपत्तिबलात् संस्कारोद्बोधोऽस्तु । कथञ्चिदेवं प्राथमिकोद्बोधस्मरणसम्पत्तौ पूर्वपूर्वस्मरणवशादुत्तरोत्तरोद्बोधोऽपि शक्यवचनः ॥ नन्वेवमिन्द्रियसन्निकर्षाभावात्सुषुप्तौ बाह्यप्रत्यक्षनिरासेऽपि स्वप्न इव विभ्रमा एव किं न भवेयुः, कुतश्च सुषुप्तिप्राक्कालिकव्याप्तिज्ञानादिसामग्रीबलादनुमित्यादि नोत्पद्यते, कुतश्च नेच्छायत्नसुखदुःखादय

द्रव्ये प्रवर्तते ॥ १ स्वप्नावस्थायां कथं ज्ञानमिति चेत्— तत्तत्संस्कारोद्बोधे विषयस्मरणेन स्वप्नविभ्रमाणामुत्पत्तेः ॥ उद्बोध एव कथमिति चेत्—मन्दतरतमादिन्यायेन बाह्यानामेव शब्दादीनामुपलम्भात् । अन्ततः शरीरस्यैवोष्मादेः प्रतिपत्तेः । यदा च मनस्त्वचमपि परिहृत्य पुरीतति वर्तते, तदा सुषुप्तिः।

(12) स्यादेतत्— परात्मा तु कथं परस्यायोग्यः । न हि साक्षात्कारिज्ञानविषयतामेवायं न प्राप्नोति ; स्वयमप्यदर्शनप्रसङ्गात् । नापि ग्रहीतुरेवायमपराधः, तस्यापि

इति वाच्यम्—यदा हि शरीरौष्ण्यादिप्रतिपत्त्युपयोगित्वगिन्द्रियसम्बन्धमपि विहाय पुरीतति हार्दमांसपिण्डविशेषे मनो वर्तते तदा सुषुप्तिः। फलबलाच्च पुरीतद्भिन्नदेशावच्छिन्नमनःसंयोग एव विशेषगुणोत्पादे कारणमिति कल्पनाददोषात् ॥ [नन्वेवं पुरीतद्भिन्नदेशावच्छिन्नमनःसंयोगरूपकारणाभावत एव सुषुप्तावात्मज्ञानानुदयस्य सुवचत्वे कुत एतावान् विस्तर इति चेत्— उच्यते—मीमांसकेन मनसो विभुत्वस्वीकारात्. तन्मते, पुरीतति मनो वर्तत इत्येवं सुषुप्तिनिर्वाहायोगात् उभयसम्मतरीत्याऽऽत्मज्ञानाभावापपादनाय विशेषगुणाभाव एव सर्वसंप्रतिपन्नः प्रथमतो दर्शितः । तदुपरि त्वया विशेषगुण एव कुतो न जायत इति पृष्टत्वादनिन्द्रियप्रत्यासत्त्यादिकं तत्त्वं वक्तव्यमासीत् । एवं च पुरीतत्प्रवेशकथनार्थं सर्वथोपपादनीयमविभुत्वमपि मनसो निरूपितमभूदिति ।] तथा च योग्यस्यापि स्वात्मनः सुषुप्तिकालेऽनुपलम्भे सत्यपि अभावसमर्थकयोग्यानुपलब्धिवर्णनासम्भवे सति आत्मान्तरस्यायोग्यस्य योग्यानुपलब्ध्या बाधनं सुतरामशक्यम् । योग्यानुपलब्धिरित्यस्य योग्या चासावनुपलब्धिश्चेति वा योग्यस्यानुपलब्धिरिति वार्थोऽस्तु । द्विविधाऽपि सा परात्मविषये दुर्वचैवेति सुतरां तन्निषेधासम्भव एवेति ।

[12] स्यादेतत्—स्वात्मवत् परात्मानोऽपि कथं न गृह्यन्ते । न च तेषां लौकिकप्रत्यक्षविषयत्वस्यैवाभावः ; तथा सति तेन तेन स्वयं स्वस्वदर्शनस्याप्यसम्भवप्रसङ्गात् । न च तेषां ग्रहणविषयत्वयोग्यत्वेऽप्यस्य ग्रहीतुः परात्मग्रहणे योग्यताराहित्यम् ; परात्मनां प्रत्यक्षविषयतारूपयोग्यतावत् अस्यापि ज्ञानसमवायिकारणतारूपैव हि योग्यता । सा चास्तीति । न च मनसः करणस्यायमपराधः ; एकैकमनःसंयोगस्यापि स्वात्मनीव परात्मन्यप्यक्षतत्वात् ; विषयतासम्बन्धेनात्मप्रत्यक्षं प्रति आत्ममनःसंयोगस्य समवायेन कारणत्वात् । नन्वेकस्य मनस एकात्मग्राहकत्वमेवेत्यनादिरयं नियम इति चेत्–किं मनः किमात्मग्राहकम् ? तत्र किं नियामकम् ?

---

१ अयं बोधनीपाठः । पा० स्वापावस्थायां । प्र. 'स्वप्नप्रत्यया अपि न स्युरित्याह स्वापेति' । 'स्वापमुक्त्वा सुषुप्तिमाह यदा चेति' इति । निद्रासामान्यं स्वापः । तदातनज्ञानं स्वप्नः । गाढनिद्रा सुषुप्तिः ।

हि ज्ञानसमवायिकारणतैव[1] तद्योग्यता । नापि करणस्य ; साधारणत्वात् । न ह्यासंसारमेकमेव मन एकमेवात्मानं गृह्णातीत्यत्र नियामकमस्ति । स्वभाव इति चेत्—तर्हि [2] मुक्तौ निःस्वभावत्वप्रसङ्गः ; तदेकार्थनाया अपायादिति—न ; भोजकादृष्टोपग्रहस्य नियामकत्वात् । यद्धि मनो यच्छरीरं यानीन्द्रियाणि यस्यादृष्टेनाकृष्टानि, तानि तस्यैवेति नियमः । तदुक्तं प्राक्—'प्रत्यात्मनियमात् भुक्ते'रिति ॥ एतेन परबुद्ध्यादयो व्याख्याताः ॥

तन्मनसि तदात्मनिरूपितस्वत्वरूपस्स्वभावः, तस्मिन्नात्मनि तदेकमनःप्रतियोगिकस्वामित्वरूपः स्वभावो वा नियामक इति चेत्— तर्हि मुक्तिकाले स्वभावहानिः स्यात् ; स्वस्वामिभावस्यापायात् । न चेष्टापत्तिः ; अपायतः स्वभावत्वायोगात् । न च भाट्टैर्मुक्तौ नित्यसुखाभिव्यक्तिस्वीकारात्तत्र मनसोऽपेक्षितत्वान्न स्वभावहानिरिति वाच्यम्—'तदत्यन्तविमोक्षोऽपवर्गः' (न्या. १. १) इति सूत्रे तन्मतस्य भाष्य एव निराकृतत्वात् । तन्मतेऽपि देहादेरिव मनसोऽपि तदा तदर्थमनपेक्षितत्वसम्भवाच्च । न च मुक्तौ सहकार्यभावेन कार्यानुत्पादेऽपि स्वभावस्य हानिर्न स्वीकार्येति वाच्यम्—तदा मनसां मुक्तात्मनः प्रत्यनुपयोगात्, योगिनां च सौभरिवत् कायव्यूहं गृह्णतां प्रतिकायं मनसोऽपेक्षितत्वात् , 'धर्मिकल्पनातो वरं धर्मकल्पन'मिति न्यायेन मुक्तात्ममनसामेव तदायत्तत्वकल्पनस्य युक्तत्वात् तद्विरोधेन मुक्तात्मस्वामिकत्वस्य तदा तत्रायोगात् । तथा च तदेकार्थनाया अपायात् तदसाधारणनियामकस्य स्वभावस्य तदा हानिरवश्याभ्युपेयेति ॥ अतः स्वभावस्य दुर्वचत्वात् प्रतिनियतग्राह्यग्राहकभावे नियामकाभावात् सामग्रीसद्भावात् परात्माऽपि मानसप्रत्यक्षविषयः स्यादिति चेत्—न —भोगसाधनीभूतादृष्टपरिगृहीतत्वस्यैवैकात्ममात्रग्रहे नियामकत्वात् ; एकसङ्घातभावापन्नयन्मनश्शरीरेन्द्रियव्यापाराः सर्वेऽपि यदात्मसम्बन्ध्यदृष्टाधीना भवन्ति, तस्मिन् मनसि शरीरे इन्द्रिये च तन्निरूपितस्वत्वं तदात्मनमस्तीति तेन मनसा स एवात्मा तदा गृह्यत इत्यनुभवबलाद्व्यवस्थेति । तथा च स्वस्वामितत्समवेतगुणप्रत्यक्ष एव मनसः करणत्वमिति । उक्तश्चादृष्टबलात् भुक्तिनियमः प्रथम एव स्तबके, 'प्रत्या-

---

१ अयं क २ पाठः । पा० कारणतयैव ।

२ बो. 'यदि तदेकात्मसम्बन्धित्वमस्य स्वभावः, तर्हि मुक्तात्मनो मनःसम्बन्धाभावात् स्वभावहानिः स्यादित्याह मुक्ताविति' । प्र. 'भट्टानां तु....स्वाभाविक एव सम्बन्धः, यतो मुक्तावप्यात्मनो नित्यनिरतिशयानन्दसन्दोहाभिव्यक्तिः । एकात्ममात्रज्ञानजनकत्वं मनसः स्वभाव इत्याह स्वभाव इतीति । ....मुक्तौ जीवन्मुक्तौ ।' 'तत्र कायव्यूहे बहुतरमनस्स्वीकारात् योगिनामप्यात्मसाक्षात्कारजननात् ।'

(13) तदेवं योग्यानुपलब्धिः परात्मादौ नास्ति । तदितरा तु न बाधिकेति तवापि सम्मतम् । अतः किमधिकृत्य प्रतिबन्दिः। न हि शशशृङ्गमयोग्यानुपलब्ध्या कश्चिन्निषेधति । न च प्रकृते योग्यानुपलब्धिं कश्चिन्मन्यते ॥ अथायमाशयः—अयोग्यशशशृङ्गादावनुपलब्धिर्न बाधिका स्यात्-इति । ततः किम् ॥ तत्सिद्ध्येदिति चेत्—

त्मनियमात् भुक्तेरिति । तस्मात्परात्मा नान्यस्य योग्यः, एवं परात्मसमवेताः ज्ञानादयोऽप्यन्यस्यायोग्या इति ।

[13] तदेवं सिद्धं बाधकत्वेनाभिमता योग्यानुपलब्धिः परात्मतद्गुणेषु नास्ति, योग्यादृष्टिः कुतोऽयोग्य इति । केवलानुपलब्धिस्तु न बाधिकेति पिशाचादृष्टपरलोकादिकमभ्युपगच्छतस्तवापि सम्मतम् । अतः प्रतिबन्दिप्रसञ्जकस्य योग्यानुपलब्धिरूपहेतोरेवाभावे प्रतिबन्दिः कुतस्तराम् ? शशशृङ्गविषये योग्यानुपलब्धिः, प्रकृते परात्मादौ चायोग्यानुपलब्धिर्वस्तु सतीति उभयत्रैकस्याभावात् । न ह्ययोग्यानुपलब्ध्या शशशृङ्गनिरासः; न वा योग्यानुपलब्ध्या परात्मादिनिरासः; येन सारूप्यात् प्रतिबन्देरवतारः स्यादिति ।

अथ प्रतिबन्दिं प्रवर्तयतोऽयमाशयः-योग्यं शशशृङ्गं योग्यानुपलब्ध्या कामं निषिद्ध्यताम् । परात्मादिवत् अयोग्यं शशशृङ्गमनुपलब्धिबलेन न बाध्येतेति इति चेत्-ततः किम् ? कायोग्यं बाध्यते शृङ्गम् ? तर्हि तदपि सिद्ध्यतीति चेत्-न हि बाधकाभावमात्राद्वस्तुसिद्धिः, किं तु सति प्रमाणे । यदि प्रमाणं स्यात्—कामं सिद्ध्येदयोग्यं शृङ्गमिति । नन्वयं शृङ्गी पशुत्वात् प्राणित्वात् तिर्यक्त्वादिति पशुत्वादिकमनुमापकमस्तीति चेत्—तर्हि परसाधने प्रतिबन्दिः न तु तद्बाधने । अनया प्रतिबन्द्या हि शशशृङ्गमपि किञ्चित्साधितं भवति; न तु बाधितं भवति । एवं घटपटक्षित्यादिकं कर्तृमत् कार्यत्वान्मदीयकार्यवदिति परात्मसाधकानुमाने इयं प्रतिबन्दिर्भवेत्; न तु परात्मबाधने त्वया क्रियमाणे, मया च तदसम्भवे निरूप्यमाणे इयं प्रतिबन्दिर्युक्तेति । ननु परात्मसाधकानुमाने भवन्तीयं प्रतिबन्दिः शृङ्गनिषेधे तथा परात्मादिनिषेधे च पर्यवस्यतीति चेत्-तर्हि निरूप्यताम्, किं प्रतिबन्दिः साक्षादेव प्रकृतबाधिका उत समानन्यायसमर्पणद्वारा । आद्ये शशश्शृङ्गी पशुत्वादिति स्यादिति प्रतिबन्दिं प्रयुञ्जानेन पशुत्वे शृङ्गित्वासाधकत्वस्य सम्मतत्वादेव वक्तव्यम्—कार्यत्वं कर्तृमत्त्वासाधकं पशुत्वस्य शृङ्गित्वासाधकत्वादिति । तत्र यदि कार्यत्वगतकर्तृमत्त्वसाधकत्वं प्रति पशुत्वगतशृङ्गित्वसाधकत्वं व्यापकं स्यात्, तर्हि व्यापकाभावाद्व्याप्याभावानुमानं युज्यते । अतो येन व्याप्यव्यापकभावेन पशुत्वस्य शृङ्गित्वसाधकत्वे सति कार्यत्वस्य कर्तृमत्त्वसाधकत्वं प्रतिषिद्ध्येत, तस्याभावात्कथं कर्तुः परात्मनो बाधः ? द्वितीये त्वेवं वाच्यम्— यथा शृङ्गी पशुत्वादित्यनुमाने योग्यानुपलब्ध्या शृङ्गरूप-

एवमस्तु, यदि प्रमाणमस्ति ॥ पशुत्वादिकमिति चेत्—परसाधने प्रतिबन्दिस्तर्हि ; न तद्बाधने ॥ तत्रैव भविष्यतीति चेत्—तत् किं तत्र प्रतिबन्दिरेव दूषणम्, अथ कथञ्चित्तुल्यन्यायतया योग्या एव परात्मबुद्ध्यादयः ते च बाधिता एवेत्यपहृतविषयत्वम्? न प्रथमः अव्याप्तेः । न हि पशुत्वादेः शशशृङ्गसाधकत्वेन कार्यत्वादेः कर्तृमत्त्वसाधकत्वं व्याप्तं, येन तस्मिन्नसति तत् प्रतिषिद्ध्येत । न द्वितीयः ; मिथोऽनुपलभ्यमानत्वस्य वादिप्रतिवादिस्वीकारात् ॥ तथाऽपि पशुत्वादौ को दोष इति चेत्— न जानीमस्तावत् ; तद्विचारावसरे चिन्तयिष्यामः ॥

[14] स्यादेतत्—यत्प्रमाणगम्यं हि यत्, तदभाव एव तस्याभावमावेदयति । यथा रूपादिप्रतिपत्तेरभावश्चक्षुरादेरभावम् । कायवाग्व्यापारैकप्रमाणकश्च परात्मा ; तदभाव

विषयापहाराद्विषयापहारलक्षणबाधसत्त्वाद्धेतोर्बाधितत्वम्, तद्वत् कर्तृमत्त्वसाधकानुमानेऽपि योग्यानुपलब्ध्या कर्तुः साध्यस्यापहारादपहृतविषयकत्वरूपं बाधितत्वं हेतोरिति । इदं तु न शक्यते ; परात्मनामयोग्यत्वेन योग्यानुपलब्ध्यभावात् । न चायोग्यत्वमसिद्धम् ; वादिप्रतिवादिनोरावयोः, मया तवेव, त्वयाऽपि ममानुपलम्भस्य सम्मतत्वात् ॥ नन्वस्तु तावत् प्रकृतप्रतिबन्दिः परात्मावबाधकत्वम् । तथाऽपि तुल्यन्यायेन शृङ्गसाधकतया प्रयुक्ते पशुत्वादौ को दोषः ; अयोग्यशृङ्गसम्भावनया व्याप्तिरक्षतत्वादिति चेत्—न जानीमस्तावदिह समाधिम् । ईश्वरसाधने तद्बाधने चैव युक्तीर्जानीमः । ईश्वरविचारार्थमेव च ग्रन्थं निबध्नीमः, न शशशृङ्गविचारार्थम् । तस्याप्यवसरेऽवश्यापतिते पुनस्तत्त्वं चिन्तयिष्यामः—अस्तु पशुत्वं, शृङ्गित्वं माऽस्त्वित्यप्रयोजकशङ्कायामनुकूलतर्को हि दुर्लभः, येन कथञ्चिदयोग्यं वा शशशृङ्गमङ्गीकार्यं स्यादिति ।

[14] ननु माभूत् योग्यानुपलब्ध्यभावात् परात्मनां बाधः । एवं परमात्मातिरिक्तपरात्मसत्त्वेऽपि परमात्मा न सिद्ध्यति । यथा हि शशशृङ्गसत्तायामापादितायां, 'एवमस्तु यदि प्रमाणमस्ती'त्युच्यते, तथा परात्मनामनुपलब्ध्या निरासासम्भवेऽपि सद्भावविषये विचार्यमाणे, 'सन्तु यदि प्रमाणमस्ती'त्येव हि वक्तव्यम् । एवञ्च तत्साधकप्रमाणान्वेषणे चेष्टादिनैव परात्मानुमानस्य लोके दर्शनात् कायिकवाचिकव्यापाररूपप्रमाणानुमेयत्वमेव परात्मसु स्वीकार्यम् । तथा च योऽर्थो येन प्रमाणेन गम्यते तस्य प्रमाणस्याभावात्तस्यार्थस्याभावोऽनुमातुं शक्यते । रूपरूप्यादिसाक्षात्कारबलाद्धि अतीन्द्रियमपि चक्षुरादिकमिन्द्रियमस्तीत्यनुमीयते । यस्य रूपादिप्रतिपत्त्यभावः, तस्य पुंसश्चक्षुराद्यभावं स एव प्रतिपत्त्यभाव आवेदयति । अत एव हि पशुत्वादेरप्रमाणत्वात् प्रमाणान्तराभावाच्च शशशृङ्गाभावो भवताऽपि चिरव्यापयिषितः । अतः कायवाग्व्यापारैकप्रमाणकत्वात् परात्मनां, अङ्कुरादिकर्तृत्वेनाभिमते च तददर्शनादनुमीयते—अङ्कुरा-

एव तस्याभावे प्रमाणमङ्कुरादिषु—तन्न—तदेकप्रमाणकत्वासिद्धेः । अन्यथा सुषुप्तोऽपि न स्यात् ॥ श्वाससन्तानोऽपि तत्र प्रमाणमिति चेन्न—निरुद्धपवनोऽपि न स्यात् ॥ कायसंस्थानविशेषोऽपि तत्र प्रमाणमिति चेन्न—विषमूर्च्छितोऽपि न स्यात् ॥ शरीरोष्माऽपि तत्र प्रमाणमिति चेन्न—जलावसिक्तविषमू(सिक्तमू)र्च्छितोऽपि न स्यात् । तस्मात् यत्र यत् कार्यमुपलभ्यते, तत्र तदनुगुणश्चेतनस्तत्र तत्र सिद्ध्यति । न च कार्यमात्रस्य क्वचिद्व्यावृत्तिरिति । न च, त्वदभ्युपगतेनैव प्रमाणेन भवितव्यम्, नान्येनेति नियमोऽस्ति ॥

(15) न च प्रमेयस्य प्रमाणेन व्याप्तिः । सा हि कार्त्स्न्येन वा स्यात्, एकदेशेन वा स्यात् । न प्रथमः; प्रत्यक्षाद्यन्यतमा(म)सद्भावेऽपि तत्प्रमेयावस्थितेः ॥ न द्वितीयः;

दयः कर्तृरहिताः कर्तृसाधकप्रमाणरहितत्वात्, यो यत्साधकप्रमाणरहितः स तद्रहितः, यथाऽन्य इतीति चेत्—

तन्न—तन्मात्रप्रमाणकस्य हि तदभावादभावः स्यात् । कर्तुः कायवाग्व्यापारैकप्रमाणकत्वं चासिद्धम्; तदभावेऽपि सुषुप्तौ परात्मानुमानात् । तावन्मात्रप्रमाणकत्वे च सुषुप्तो न सिद्ध्येत् । अथ कायवाग्व्यापारवत् प्राणवायुव्यापारोऽपि प्रमाणम्, स सुषुप्तेऽस्ति; अङ्कुरादिकर्तरि च नास्तीति चेन्न—प्राणायामेन श्वासनिरोधे कायवाग्व्यापारयोश्चासतोः सोऽनुमीयते, स न सिद्ध्येदिति । अथैतदर्थमुक्तव्यतिरिक्तः श्वासबन्धकालिको विलक्षणः शरीरसन्निवेशोऽपि परात्मनि प्रमाणमिति चेत्—ईदृशसंस्थानेनापि रहितो विषवशापन्नमूर्च्छ आत्माऽनुमीयमानो न सिद्ध्येत् । अथ तत्र पंचरः शरीरोष्मा तदा लक्ष्यमाणः प्रमाणमिति चेत्—एवमपि विषमूर्च्छिते जलावसिक्ते सति ऊष्मणोऽप्यभावात् स न स्यात् । तस्मादेवं तत्र तत्रान्यान्यसमुचितहेतुत्वान्वेषणस्यावश्यकत्वात् कायवाग्व्यापारादिनियमानादरेण, यत्र यादृशकार्योपलम्भस्तत्र तादृशकार्यबलेन तद्धेतुश्चेतनोऽनुमीयते । तथा चैकपरात्मसाधकतया त्वदभ्युपगतस्यैवाऽन्यपरात्मसाधकत्वमिति निर्बन्धाभावात् कायव्यापारादिकतिपयव्यावृत्तावप्यन्येन तदनुमानसम्भवात् परमात्मसाधकप्रमाणं पञ्चमस्तबके वक्ष्यमाणमस्तीति प्रमाणाभावरूपहेतुरसिद्ध इति ।

[15] किं च प्रमाणाभावस्य कुत्रापि हेतुत्वं न सम्भवति । प्रमाणाभावाद्वस्त्वभावं ब्रुवता हि व्यतिरेकव्याप्तिप्रदर्शनाय प्रमाणस्य वस्तुव्यापकत्वं वाच्यम्—तथा च यत्र वस्तुत्वं तत्र प्रमाणगम्यत्वमिति । तत्र च प्रमाणगम्यत्वं किं कृत्स्नप्रमाणगम्यत्वं उत यत्किञ्चित्प्रमाणगम्यत्वम् । नाद्यः; स्वर्गापरप्रभृतेः प्रत्यक्षादिकतिपयप्रमाणाभावेऽपि वस्तुत्वात्तत्र कृत्स्नग्राह्यत्वाभावात् । नान्त्यः; यत्र वस्तुत्वं तत्र किञ्चित्प्रमाणगम्यत्वमिति व्याप्तिसत्त्वेऽपि तन्मूलकप्रयोगे, यत्र किञ्चित्प्रमाणग्राह्यत्वस्याप्यभावः तत्र वस्तु इत्येव नियमस्य वाच्यतया प्रमाणग्राह्य-

पुरुषनियमेन सर्वप्रमाणव्यावृत्तावपि प्रमेयावस्थितेः । अनियमेन असिद्धेः ; न हि सर्वस्य सर्वदा सर्वथाऽत्र प्रमाणं नास्तीति निश्चयः शक्य इति ॥

(16) कथं तर्हि चक्षुरादेरभावो निश्चयः ? व्यापकानुपलब्धेः । १ चरमसामग्रीनिवेशिनो हि कार्यमेव व्यापकम् ; तन्निवृत्तौ तथाभूतस्यापि निवृत्तिः । २ योग्यतामात्रस्य कदाचित् कार्यम्, ३ तन्निवृत्तौ तथाभूतस्यापि निवृत्तिः । अन्यथा तत्रापि ४ सन्देहः ॥

त्वसामान्याभावो हेतुरिति सिद्ध्यति । तत्र विकल्प्यते । किं पुरुषव्यवस्थां कृत्वा तत्पुरुषसम्बन्धिप्रमाणग्राह्यत्वसामान्याभावेन वस्तुत्वाभावानुमानम् , किं वा पुरुषनियमानादरेण प्रमाणग्राह्यतात्वावच्छिन्नप्रतियोगिताकाभावेन । नाद्यः ; केनचित्पुंसा सर्वथैवागृह्यमाणस्याप्यन्यपुरुषगोचरतया प्रमेयस्य सत्त्वाद्व्यभिचारात् । नान्त्यः ; कोऽपि कदाऽपि कथमपीमं न गृह्णातीति निश्चयस्याशक्यतया हेत्वसिद्धेः ।

[16] नन्वेवं प्रमाणाभावस्य क्वचिदपि हेतुत्वासम्भवेऽन्धादौ चक्षुराद्यभावः कथं निश्चयः । रूपादिप्रतिपत्तिरूपप्रमाणाभावेन हि सोऽनुमातव्य इति चेत्—उच्यते । सत्यं रूपादिप्रतिपत्तिः

१ बो. 'चरमसामग्रीत्वेन निविशमानस्ये'ति एतदपेक्षया चरमेत्यस्य निवेशिन इत्यत्र क्रियाविशेषणतया वस्तुविशेषणतया वाऽन्वय उचितः । २ अयं व्याख्याद्वयसम्मतः पाठः । क. ख. पु. योग्यमात्रस्य । ३ पा० न तन्निवृत्तौ ।

४ प्र. 'कार्यविशेषस्य कारणविशेषव्यापकत्वमाह चरमेति । कार्यं रूपज्ञानादि । योग्यतामात्रस्येति । व्यापकमित्यनुषज्यते । न च भक्षितविनष्टबीजे व्यभिचारः ; यत् सामान्यं यत्कारणतावच्छेदकं तदवश्यं तज्जनकवृत्तीत्यर्थात् । नियमेनाभिप्रायकत्वाद्वा । अन्यथेति । कदाचित् कार्यव्यतिरेके योग्यतायामपि सन्देहः । बो. 'चरमसामग्रीत्वेन निविशमानस्य कार्यं व्यापकम् । किञ्चित्तु कारणं योग्यतया निविशते । तस्य कदाचिद्भवत्कार्यं व्यापकम् । तस्य कादाचित्कस्यापि कार्यस्य निवृत्तौ तथाभूतस्य योग्यताविशिष्टस्यापि निवृत्तिः । अन्यथेति । यदि विधाद्वयमपि चक्षुरादौ नास्ति , तदा रूपादिज्ञानाभावान्न तत्राप्यभावनिश्चयः , किं तु सन्देह एव । यद्वा योग्यतामात्रस्य कदाचित् कार्यम्; न तु व्यापकम् । तेन कारणनिवृत्तौ कादाचित्कस्यापि कार्यस्य निवृत्तिः । अन्यथा कार्यनिवृत्तौ तत्रापि कारणेऽपि सन्देहः नाभावनिश्चयः ॥ केचित्तु न तन्निवृत्तौ तथाभूतस्यापि निवृत्तिरिति नञुपश्लेषेण पठन्ति । तत्रायमर्थः—चरमसामग्रीनिवेशिन इति विशेषणं कुतः ? योग्यस्यैवेत्युच्यतामित्यत्राह योग्यतामात्रस्येति । तस्य कार्यं न व्यापकम् । तस्मात् कार्यनिवृत्तौ योग्यतामात्रस्य (न?) निवृत्तिः । अन्यथेति । चक्षुरादेश्चरमसामग्रीनिवेशाभावे तत्रापि नाभावनिश्चयः , सन्देह एवेति ।

[17] प्रकृतेऽपि व्यापकानुपलब्ध्या तत्प्रतिषेधोऽस्तु–न, आश्रयासिद्धत्वात्। न हीश्वरस्तद्ज्ञानं वा क्वचित् सिद्धम्॥ आभासप्रतिपन्नमिति चेन्न–तस्याश्रयत्वानुपपत्तेः; प्रतिषेध्यत्वानुपपत्तेश्च।

प्रमाणम्। अथापि न प्रमाणत्वेन तद्ग्रहणेन तदभावेन तदनुमानम्। किं तु तस्या एव प्रतिपत्तेर्व्यापकत्वाकारस्यापि सत्त्वात् व्यापकानुपलब्ध्या व्याप्यस्य चक्षुरादेरभावानुमानमिति। ननु कारणस्य कथं कार्यं व्यापकम्। वैपरीत्यात्। दण्डसत्त्वेऽपि घटाभावादिति चेत्–ब्रूमः। कारणकलापरूपसामग्र्यां चरमं यन्निविशते कपालद्वयसंयोगादि, तस्य तावत् कार्यं व्यापकमेव; तदव्यवहितोत्तरक्षणे कार्यध्रौव्यात्। तथा च कार्याभावे तस्य सामग्रीनिवेशिनश्चरमकारणस्यापि निवृत्तिर्निश्चेया भवति। यत्तु कारणं फलाव्यवहितप्राक्क्षणावच्छिन्नस्वरूपफलोपधायकत्वनियमरहितं स्वरूपयोग्यमात्रम्, तन्निष्ठयोग्यतायाः कदाचित् कार्यं व्यापकम्—कदाचित् भाविकार्यकत्वं कार्यात्यन्तायोगव्यवच्छेदरूपं व्यापकमिति यावत्। ननु नित्यस्य स्वरूपयोग्यत्वे फलावश्यम्भावनियमस्य कथञ्चित्स्वीकारेऽपि अरण्यस्थदण्डाद्यनित्यविषये कदाचित्कार्यमपि दुर्वचमिति चेत्—तर्ह्येवमस्तु। योग्यतां प्रति कार्यं न सर्वदा व्यापकम्; किं तु कदाचित् कारणान्तरसमवधाने। तथा च स्वेतरयावत्कारणावच्छिन्नस्वरूपयोग्यता यत्र तत्र कार्यमिति। तथा च कार्यनिवृत्तौ तादृशविशिष्टयोग्यताया निवृत्तिः। एवं च प्रकृते चक्षुषश्चरमकारणत्वे रूपादिप्रतिपत्तिरूपव्यापकानुपलब्ध्या तदभावनिश्चयः सुकरः। तद्भिन्नकारणात्मत्वे च व्यापकानुपलब्ध्या कारणान्तरसमवधानविशिष्टस्वरूपयोग्यताशालिचक्षुरभावानुमाने विशेषणसमवधानकाले विशिष्टनिवृत्तेर्विशेष्यनिवृत्तौ पर्यवसानाच्चक्षुरभावनिश्चयः सिद्ध्यति। अन्यथा व्यापकानुपलब्ध्यादेरनिश्चये चक्षुरभावविषयेऽपि सन्देहः; प्रमाणाभावस्यासाधकत्वात्।

[17] ननु—तर्हीश्वराभावानुमानेऽपि प्रमाणाभावरूपहेतुर्मा भैत्सीत्। व्यापकवत्त्वेनानुपलभ्यमानत्वादेव ईश्वरो नास्तीत्यनुमीयते। उक्तं हि, 'व्यापकस्वार्थाद्यनुपलम्भेनाप्यनुमीयते नास्तीति' इति। न हि कर्तृत्वव्यापकं स्वार्थवत्त्वदेहित्वेन्द्रियवत्त्वादिकमीश्वर उपलभ्यते इति चेन्न—आश्रयासिद्धत्वात्। क्वानुमानमनाश्रयम्? तथा हि—अस्माभिः क्षित्यङ्कुरादिकं सकर्तृकं ज्ञानचिकीर्षाप्रयत्नजन्यं कार्यत्वादिति द्वेधा—साक्षादीश्वरसाधकं तद्गतज्ञानादिसाधकं च अनुमानं प्रयुयुक्ष्यते। तत्र यत् साध्यं तत् त्वया त्रेधा निषिद्ध्यते ईश्वरो नास्ति, जगद्धेतुत्वेनाभिमतं ज्ञानादि नास्ति, ईश्वरो जगद्धेतुभूतज्ञानादिशून्यः स्वार्थादिरूपव्यापकाभावादिति। सर्वत्राश्रयासिद्धिः। अस्मदनुमानासम्मतौ पक्षस्याप्रसिद्धत्वात्॥ अथास्मदुक्ताभासहेतुना प्रतिपन्नो भ्रान्तिविषयीकृत एवाश्रय इति चेन्न—तस्याप्रामाणिकस्याश्रयत्वानुपपत्तेः। न केवलं

व्यावर्त्याभाववत्तैव भाविकी हि विशेष्यता ।
अभावविरहात्मत्वं वस्तुनः प्रतियोगिता ॥ २ ॥

न चैतदाभासप्रतिपन्नस्यास्तीति कुतस्तस्य निषेधाधिकरणत्वं निषेध्यता चे (वे)ति ॥

अनुमाने तस्य पक्षत्वं न भवतीत्येतावत् ; किं तूपक्रान्तानुपलब्ध्यादिप्रमाणमध्ये केनापि प्रमाणेन तस्याभासप्रतिपन्नस्येश्वरस्य तद्ज्ञानादेश्च प्रतिषेद्धव्यत्वमप्यनुपपन्नम् । न चासतोऽपि ज्ञाने भानादनुमितिविशेष्यत्वसम्भवे केयमाश्रयत्वानुपपत्तिर्नाम । एवं प्रतिषेध्यत्वमप्याभासप्रतिपन्नस्य युक्तम् ; सदपेक्षयाऽसत एव प्रतिषेधौचित्यात् इति शङ्क्यम्—अयोगात् । उभयकोटिकसन्देहे वस्तुनः प्रकृतानुमित्या व्यावर्त्या या कोटिस्तदभावरूपकोट्यन्तराधिकरणतैव हि भाविकी भाव्यमाना भावेनाशयेन विषयीकृता विशेष्यता भवति । वास्तवेन कोट्यन्तराधिकरणत्वेन ग्रहणं विशेष्यतेति यावत् । यद्वा भाविकी पारमार्थिकी यथार्थज्ञानीया विशेष्यता व्यावर्त्याभाववत्तारूपा । विशेष्यस्य प्रकाराश्रयत्वाभावे सा विशेष्यता प्रमीया न स्यादिति निषेधानुमितिरप्रमा स्यादिति । अथ वा विशेष्यता विशेषणवत्त्वार्हता । तथा च भावानां पदार्थानां सम्बन्धिनी विशेष्यता हि व्यावर्तनीयैककोट्यभावरूपकोट्यन्तरात्मकविशेषणवत्तैवेति । यद्वा भाविकी भावपदार्थनिष्ठा । अभावनिष्ठा तु विशेष्यता अभावाधिकरणकाभावस्याधिकरणरूपत्वान्न व्यावर्त्याभाववत्तारूपा स्यादपीति । एवं प्रतिषेध्यता प्रतिषेधप्रतियोगिता हि प्रमाणसिद्धस्य वस्तुनो यत् स्वाभावाभावरूपत्वं सैव । यस्य ह्यभावः क्वचिन्नास्तीत्यविद्यमानत्वेन प्रतीयते , स एव प्रथमाभावप्रतियोगीति ।

[ननु कपिसंयोगाभावस्य केवलान्वयित्वात्तदभावायोगात्कथं कपिसंयोगस्तत्प्रतियोगी । अभावच्छेदेन कपिसंयोगाभावस्याभावो वृक्षेऽस्तीति कथञ्चित्कपिसंयोगस्य प्रतियोगित्वोपपादनेऽपि आकाशाभावं प्रत्याकाशो न प्रतियोगी स्यात्—आकाशाभावो नास्तीति प्रतीत्यभावादिति चेत्— उच्यते । आकाशे , अस्तीति प्रतीतिसिद्धसत्ताजातेरङ्गीकार्यतया आकाशोऽस्तीति प्रतीतेरिष्टतया कथं, 'स नास्ती'ति प्रतीतिः । संयोगेन समवायेन वा आकाशो नास्तीति प्रतीतिरप्ययुक्ता ; आकाशप्रतियोगिकसंयोगसमवाययोरप्रसिद्ध्या तयोर्व्यधिकरणसम्बन्धत्वात् ; व्यधिकरणस्य च, अप्रसक्तप्रतिषेधायोगेन सम्बन्धत्वानङ्गीकारात् । यद्याकाशानुयोगिकसंयोग एव सम्बन्ध इहेत्युच्यते—तर्हि तेन सम्बन्धेन गुणादावाकाशाभावः , घटादौ तु द्रव्ये तदभावस्यैवाभाव इति सिद्धमाकाशस्याभावाभाववत्त्वम् । आकाशो न वर्तत इति प्रतीतौ चाधेयत्वाभाव एव प्रतीयते , न त्वाकाशाभाव इत्यलम् ।]

न चैतत्कोट्यन्तराधिकरणत्वमभावविरहात्मत्वं चासतोऽस्ति ; शशशृङ्गे इदमस्ति , 'शशशृङ्गं न नास्ति' इति प्रतीत्यभावात् । अतः कुतस्तस्य प्रकृतनिषेधरूपसाध्यं प्रति तत्साधकहेतुं प्रति चाश्रयत्वम् , निषेधप्रतियोगित्वं चेति ॥

[18] कथं तर्हि शशशृङ्गस्य निषेधः? न कथञ्चित्। स ह्यभावप्रत्यय एव। न चायमपारमार्थिकप्रतियोगिकः परमार्थाभावो नाम, १ तथापा(न चापा)रमार्थिकविषयं प्रमाणं नामेति॥

अपि च—

दुष्टोपलम्भसामग्री शशशृङ्गादियोग्यता।
न तस्यां नोपलम्भोऽस्ति नास्ति सानुपलम्भने॥ ३॥

---

[18] ननु तर्ह्यसतः प्रतियोगित्वासम्भवे शशशृङ्गं नास्तीति निषेधः कथं क्रियत इति चेत्—न कथमपि शशशृङ्गं निषिद्ध्यते। प्रसक्तं हि प्रतिषेध्यम्। प्रसक्तिश्च यत्र क्वचित् प्रसिद्धस्य, न त्वलीकस्य। सोऽपि खलु शशशृङ्गनिषेधोऽभावप्रत्यय एव। अभावप्रत्यये च प्रतियोगिनः प्राक्तनं ज्ञानं कारणम्। न च शशशृङ्गं क्वचित् ज्ञातमस्ति। यद्यपारमार्थिकस्य प्रतियोगित्वं तर्हि तदभावोऽपि तादृश एव स्यात्। न ह्यपारमार्थिकप्रतियोगिकः पारमार्थिकोऽभावो नाम। विशेषणापारमार्थ्ये विशिष्टस्य पारमार्थ्यायोगात्। तथा चापारमार्थिकतादृशाभावविषयकं ज्ञानं न प्रमेति॥

न केवलं प्रमेयाभावाच्छशशृङ्गं नास्तीति निषेधासम्भवः, किन्तु प्रमाणाभावादपि॥ योग्यस्यानुपलब्धिर्योग्यानुपलब्धिरिति पक्षेऽपि निषेधप्रयोजकं प्रतियोगिनिष्ठं योग्यत्वमभावग्राहिपुरुषगतस्वोपलम्भसामग्रीकत्वरूपम्। स्वं प्रतियोगि। तत्र शशशृङ्गादिप्रतियोगिगता योग्यता तु दुष्टा दोषरूपसहकारिसहितैवोपलम्भसामग्री; न तु शुद्धा; शशशृङ्गादेराभासप्रतिपन्नत्वस्य त्वयैवोक्तत्वात्। तथा च दोषसहितोपलम्भसामग्र्यां सत्यामनुपलब्धिर्नास्ति; अनुपलम्भे च सति योग्यता नास्तीति।

एतदुक्तं भवति—केन प्रमाणेन केन पुंसा शशशृङ्गनिषेधः क्रियते। न तावत् प्रत्यक्षानुमानाभ्याम्; योग्यानुपलब्धिरूपहेत्वसिद्धेः। तथा हि—किं निर्दुष्टेन्द्रियेण पुंसा निषेधः क्रियते, उत दुष्टेन। नाद्यः; स्वभावतो वा, ब्राह्मणत्वादावित्र सहकारिसम्पत्त्या वा सर्वप्रकारेणानुपलब्धत्वात् योग्यतारूपविशेषणासिद्धेः। न हीन्द्रियदोषो भवति चेत्—दृश्येतेत्येतावन्मात्रमिह योग्यत्वम्। तथा सत्यन्धकारेऽपि घटस्य योग्यानुपलब्ध्यापत्तेः; आलोकसत्त्वे स दृश्येतेति। अतः प्रतियोगीतरप्रतियोगिग्राहककारणकलापसाहित्यमेव योग्यत्वम्। तच्च दुष्टोपलम्भसामग्रीरूपं निर्दुष्टे दुर्वचम्॥ नन्वाभासोपलब्धं तदिति ह्युक्तम्। अतो दुष्टेन्द्रियेण तन्निषेध

---

१ बो. 'ततोऽपि किमित्यत आह तथेति। न चेत्यनुपङ्क्तनीयम्।' तथेति स्थाने न चेत्येव क. ख. पाठः।

केन च शशशृङ्गं प्रतिषिध्यते, सर्वथानुपलब्धस्य योग्यत्वासिद्धेः। तदितरसामग्री-साकल्यं हि तत् ॥ ननूक्तमाभासोपलब्धं हि तत् ॥ अत एवाशक्यनिषेधमित्युक्तम्। अनुपलम्भकाले आभासोपलम्भसामग्र्याः अभावात्; तत्काले चानुपलम्भाभावादिति ॥ कस्तर्हि शशशृङ्गं नास्तीत्यस्यार्थः? शशेऽधिकरणे विषाणाभावोऽस्तीति ॥

[19] स्यादेतत्—यद्यपीश्वरो नावगतः; यद्यपि च नाभाससिद्धेन प्रमाणव्यवहारः शक्यसम्पादनः, तथाऽपि, आत्मानः सिद्धाः, तेषां सार्वज्ञ्यं निषिध्यते, क्षित्यादि-कर्तृत्वं चेति। तथा हि—मदितरे न सर्वज्ञाः चेतनत्वादहमिव। न च ते क्षित्यादि-कर्तारः पुरुषत्वादहमिव। एवं वस्तुत्वादेरपि—इति। तदेतदपि प्रागेव परिहृतम्। तथा हि—

[20] इष्टसिद्धिः प्रसिद्धेशे हेत्वसिद्धिरगोचरे।
नान्या सामान्यतः सिद्धिर्जातावपि तथैव सा ॥ ४ ॥

इत्यन्यः पक्षोऽस्त्विति चेत्—यत एव तस्योपलब्धिरस्ति, अत एवानुपलब्धिरूपविशेष्यासिद्धे-र्निषेधो दुष्कर इत्युक्तमेव; अनुपलम्भरूपविशेष्यसत्त्वे योग्यतारूपविशेषणाभावात् योग्यता-सत्त्वे चानुपलब्धिरूपविशेष्याभावाद्योग्यताविशिष्टानुपलब्धेरसिद्धेरिति कारिकोत्तरार्धेन दर्शितत्वात्। एवं च योग्यानुपलब्धिरूपहेत्वभावाच्छशशृङ्गाभावो न प्रत्यक्षानुमानगम्यः ॥ शब्दस्य तन्मूलक-त्वाच्च तयोरभावादेव सोऽपि न प्रमाणम्। तर्हि शशशृङ्गाभावार्थकत्वासम्भवात् शशशृङ्गं नास्तीत्याप्तवाक्यस्य कोऽर्थ इति चेत्—शशे शृङ्गाभावोऽस्तीत्यर्थः। अत्र शृङ्गमात्रं प्रतियोगि; शशश्चानुयोगी। [तर्हि शशशृङ्गमिति समासो न युज्यत इति चेत्—शशशृङ्गमित्यस्य शशा-वृत्तिशृङ्गमित्यर्थः। शशस्यावृत्तित्वसम्बन्धेन शृङ्गान्वय इत्येतत्तात्पर्यग्राहकमेव नास्तीति पदम्। यद्वा—शृङ्गपदं शृङ्गाभावे लाक्षणिकम्। शशवृत्तिः शृङ्गाभाव इत्यर्थः। नास्तिपदं लक्षणातात्पर्य-ग्राहकम्। अथ वा शशशृङ्गभानं प्रमितौ नास्तीति वाक्यार्थः। अपि वा शशपदं शश-वृत्तित्वभ्रमविषयार्थकं तादृशं शृङ्गं नास्तीत्यर्थः। शशस्यानुयोगित्वलाभायैव च शशेति प्रयोगः। एतन्निर्वाहप्रकाराश्च तत्सिद्धितन्त्रवार्तिकान्ते द्रष्टव्या इति।]

[19] नन्वप्रसिद्ध्या विशिष्येश्वरत्वेन रूपेण पक्षीकारायोगेऽपि सामान्यरूपेण पक्षीकारः स्यात् यथा मदितरे आत्मानः न सर्वज्ञाः न च क्षित्यादिकर्तारः पुरुषत्वाच्चेतनत्वादहमिवेत्येवम्। एवं वस्तुत्वादिकमपि हेतुः। तदा आत्मसामान्यं पक्षीकृत्य घटादिकमपि दृष्टान्तीकर्तुं शक्यम्। अत्र चात्मनां सिद्धत्वान्नाश्रयासिद्धिः। सामान्यरूपेण पक्षीकारादीश्वरेऽपि सार्वज्ञ्यादिनिषेधा-दपेक्षितसिद्धिश्चेति चेत्—एतदप्युक्तयुक्त्यैव निरस्तम्।

[20] तथा हि—आत्मत्वेन पक्षीकारः किं प्रमाणप्रसिद्धजीवमात्रस्य, किं वा प्रसिद्ध्यगोचरा-

प्रमाण(णेन) प्रतीतानां चेतनानां पक्षीकरणे सिद्धसाधनम् । ततोऽन्येषा[१]मसिद्धौ हेतोराश्रयासिद्धत्वम् ॥ आत्मत्वमात्रेण सोऽपि सिद्ध इति चेत्—कोऽस्यार्थः ? किमात्मत्वेनोपलक्षिता सैव वस्तुगत्या सर्वज्ञविश्वकर्तृव्यक्तिः, अथ तदन्या, आत्ममात्रं आत्मत्वमात्र[२]मेव वा पक्षः ; सर्वत्र पूर्वदोषानतिवृत्तेः (त्तिः?) अथायमाशयः—आत्मत्वं न सर्वज्ञसर्वकर्तृव्यक्तिसमवेतम् जातित्वात् गोत्ववत्—इति—तदसत्—निषेध्यासिद्धेर्निषेधस्याशक्यत्वात् । तथा चाप्रसिद्धविशेषणः पक्ष इत्याश्रयासिद्धिरिति स एव दोषः ॥ त्वदुपगतागमलोकप्रसिद्धस्यैवेश्वरस्यासर्वज्ञत्वमकर्तृत्वं च साध्यत इति चेन्न—

स्वदभिमतेश्वरव्यक्तेः । नाद्यः, साधयितुमिष्टस्यासार्वज्ञ्यादेस्तत्र प्रागेव हि सिद्धिरस्ति । अतः सिद्धसाधनात् पक्षत्वासिद्ध्याऽऽश्रयासिद्धिरेव । अन्त्येत्वाश्रयासिद्ध्या हेतोस्तत्र पूर्वमग्रहणमित्यनुमित्यसम्भवः । नन्वात्मत्वरूपेणेश्वरसिद्ध एवेति चेत्—यावद्धि ईश्वरव्यक्तिरसिद्धा, तावत् सामान्यधर्माक्रान्तत्वमपि तस्याः दुर्वचम् । एवं च सामान्यधर्मग्रहणेऽपि पक्षः कः ? किमीश्वरव्यक्तिमात्रम्, किं वा जीवमात्रं उतोभयम् । प्रथमे आश्रयासिद्धिः ; द्वितीये सिद्धसाधनम्, तृतीये च तत्तदंशे तत्तद्दोषसत्त्वाद्दोषद्वयमपि । यदि त्वात्मत्वमेव पक्षः, तर्ह्यसार्वज्ञ्यादिकं तत्र सुतरामिति सिद्धसाधनमेव । एवं साध्यं किञ्चिदन्यथयित्वा आत्मत्वं असर्वज्ञाक्षित्यादिकर्तृजीवसमवेतमिति साधनेऽपि तद्दोषतादवस्थ्यम् । अथ आत्मत्वं न सर्वज्ञसर्वकर्तृव्यक्तिसमवेतं जातित्वात् गोत्ववदिति तत्समवेतभिन्नत्वं यदि साध्यते—तर्हि प्रतियोग्यप्रसिद्ध्या भेदरूपसाध्याप्रसिद्धौ पक्षस्याप्रसिद्धविशेषणत्वात्तथैवाश्रयासिद्धिः । सन्दिग्धसाध्यधर्माधर्मी हि पक्षः । तत्र सन्देहाभावे, साध्याप्रसिद्धौ साध्यतावच्छेदकाप्रसिद्धौ, पक्षाप्रसिद्धौ, पक्षतावच्छेदकाप्रसिद्धौ, सर्वत्राश्रयासिद्धिरेव । तत्र प्रथमे सिद्धसाधनाद्वादिनोऽर्थान्तरेण निगृहीतत्वमपि । [ननु मदितरे न सर्वज्ञाः न क्षित्यादिकर्तारः इत्यत्र तावत् किञ्चिदनभिज्ञत्वं किञ्चित्कार्याकर्तृत्वं च साध्यमिति न साध्याप्रसिद्धिः । तावतैव सर्वज्ञसर्वकर्तृव्यक्त्यभावसिद्धिः । एवमन्तिमानुमानेऽपि, आत्मत्वं किञ्चिद्विषयकज्ञान-किञ्चिद्विषयककृतिशून्यत्वव्याप्यं जातित्वादिति निष्कर्षः । यत्र जातित्वं गोत्वघटत्वादौ तत्र किञ्चिद्विषयकज्ञानादिशून्यत्वव्याप्यत्वमस्ति ; यत्र गोत्वादि तत्र तच्छून्यत्वमिति । तथा चात्मत्वं किञ्चिदनभिज्ञमात्रवृत्ति सिद्ध्यतीतीश्वरनिषेधः फलित इति चेन्न—अप्रयोजकत्वात्

---

१ बहुवचनं तत्तत्प्रतीतातिरिक्तजीवसंग्रहाभिप्रायेण । आस्तिकाभिमतविष्णुशिवादिव्यक्तिसूचनाय वा । ईश्वरज्ञानचिकीर्षाद्युपलक्षणाय वा । २ आत्ममात्रमिति क[१]. पा० आत्मत्वमात्रमिति अन्यत्र पा० । आत्मत्वमात्रमिति पाठो व्याख्याद्वयेऽपि दृष्टः । एवमपि प्रत्येकपक्षीकारवत् समुदायपक्षीकारस्यापि दर्शयितव्यत्वात् पक्षचतुष्टयस्य पादचतुष्टयार्थस्यौचित्याच्च पाठद्वयसमुच्चयः कृतः ।

आगमादेः प्रमाणत्वे बाधनादनिषेधनम्।
आभासत्वे तु सैव स्यादाश्रयासिद्धिरुद्धता १* ॥ ५ ॥

निगदव्याख्यातमेतत् २ ॥

[21] चार्वाकस्त्वाह—किं ३योग्यताविशेष(षणा ?) ग्रहेण। यन्नोपलभ्यते, तन्नास्ति। विपरीतमस्ति। न चेश्वरादयस्तथा, ततो न सन्तीत्येतदेव ज्यायः॥ एवमनुमानादिविलोप इति चेत्—नेदमनिष्टम्॥ तथा च लोकव्यवहारोच्छेद इति चेन्न—सम्भावनामात्रेण तत्सिद्धेः। संवादेन च प्रामाण्याभिमानात्—इति—अत्रोच्यते—

[22] दृष्ट्यदृष्ट्योः क्व सन्देहो भावाभावविनिश्चयात्।
अदृष्टिबाधिते हेतौ प्रत्यक्षमपि दुर्लभम् ॥ ६ ॥

तथा चोक्तसर्वानुमानसाधारणीव्याप्यत्वासिद्धिरिह दुरुद्धरा। अन्यथा मदितरे मदज्ञानभिज्ञाः अहमिव; आत्मत्वं ज्ञानसामान्यतद्विशेषशून्यत्वव्याप्यं घटत्वादिवदित्याद्यपि साध्येतेति]

ननु त्वदभ्युपगतागमप्रसिद्धं प्रामाणिकत्वेन त्वदभिमतलोकप्रसिद्धं वेश्वरं विशिष्यैव पक्षीकृत्यासार्वज्ञादि साध्यत इति चेत्—त्वन्मते ईदृशागमलोकयोः प्रमाणत्वमाभासत्वं वा। आद्ये ततः सर्वज्ञत्वादेरपि सिद्ध्या निषेधासम्भवः। अन्त्ये, आभासप्रतिपन्नस्याश्रयत्वासम्भवस्योक्तत्वादुक्ताश्रयासिद्ध्यौद्धत्यमवार्यम्।

[21] एवमीश्वरानुपलब्ध्या ईश्वराभावप्रत्यक्षे, व्यापकानुपलब्ध्यादिना तदभावानुमानं च न सम्भवतीति मीमांसकः प्रत्यबोधि। अत्रेश्वराभावप्रत्यक्षवादी अनुपलब्धौ योग्यतारूपविशेषणमसहमानश्चार्वाको निराक्रियते। स खल्वेवमाह— किमिति योग्यतारूपविशेषणे आग्रहः ? अनुपलब्धिमात्रेणाभावसाक्षात्कारात्। न चेश्वरादय उपलभ्यन्ते ; तस्मान्न सन्तीति अभावस्य केवलानुपलब्धिगम्यत्वमतमेव ज्यायः। एवं तर्ह्यदृश्यमानस्याभावादनुमानादिप्रमाणविलोप इति चेत् इष्टापत्तिः। तर्हि तत्तत्प्रमाणमूलकः सर्वो लोकव्यवहार उच्छिद्येतेति चेन्न—व्यवहारस्य प्रमितिमूलकत्वाभावात्। सम्भावनयैव व्यवहारसिद्धेः। अनिश्चित एवाग्नौ धूमदर्शनेनाग्निसम्भावनया वाचिकः कायिकश्च व्यवहारः। सम्भावनात्मकज्ञाने प्रमात्वाभिमानस्तु प्रत्यक्ष इव सफलप्रवृत्तिदर्शनरूपसंवादमात्रेण—इति।

[22] अत्रोच्यते—वस्तुनो दृष्टौ सत्यां भावस्य सत्तायाः निश्चयात् तस्यादृष्टौ चाभावनिश्चयात्

१* उद्धता उद्धूतेति-बां.। आश्रयासिद्ध्यारुद्धत्वं निरुद्धत्वमिति वा। २ बां. 'निगदः पाठः। स एव व्याख्यानमस्येति।' ३ योग्यताविशेषणेति युक्तम्। विशेषेति पाठानुसारेण तु योग्यताविशेषः सामान्यतः प्रत्यक्षविषयत्वरूपयोग्यताविलक्षणः प्रतियोगिग्राहकसामग्रीवैशिष्ट्यरूपः। अयोग्यानङ्गीकारात् योग्यताया एव व्यर्थत्वे किमिति तद्विशेषे आग्रह इति भावः।

सम्भावना हि सन्देह एव । तस्माच्च व्यवहारस्तस्मिन् सति स्यात्। स एव तु कुतः? दर्शनदशायां भावनिश्चयात्; अदर्शनदशायामभावावधारणात्। तथा च गृहाद्बहिर्ग-(न्निर्ग)तश्चार्वाको वराको न निवर्तेत; प्रत्युत पुत्रदारधनाद्यभावावधारणात् सोरस्ताडं शोकविकलो १ विक्रोशेत्॥ स्मरणानुभवान्नैवमिति चेन्न—प्रतियोगिस्मरण एवाभाव-परिच्छेदात्॥ परावृत्तोऽपि कथं पुनरासादयिष्यति? सत्त्वादिति चेत्—अनुपलम्भ-

दृष्ट्यदृष्टिदेशाव्यतिरिक्तदशाभावात् कुत्र विषये सन्देहरूपा सम्भावना त्वया वर्णयितुं पार्यते। एवमदर्शनमात्रेणार्थमपलपतस्ते प्रमाभूतं प्रत्यक्षमपि न सेत्स्यति; तद्धेतोश्चक्षुरादेरतीन्द्रियत्वाददर्शनतो बाधितत्वात्।

तथा च यत् यदा नोपलभ्यते तत्तदा नास्तीति ब्रुवंश्चार्वाको गृहान्निर्गतो गृहस्थितपुत्रदारादिभिरनुपलब्धत्वादभवन् कथं निवर्तेत। कथञ्चिद्भवन्नपि पुत्रदारगृहादिकमनुपलभमानः नास्तीति निश्चिन्वन् न निवृत्तिप्रयत्नवान् स्यात्। प्रत्युत समयान्तर इव सोरस्ताडनं शोकविह्वलो विक्रोशेत। ननु साक्षादनुपलम्भेऽपि पुत्रादेः स्मरणसत्त्वान्नाभावनिश्चयः। स्मरण एव किं प्रमाणमिति चेत्—तदनुभवरूपं प्रत्यक्षमेव-- इति चेन्न-- प्रतियोगिस्मरणस्य तदनुकूलत्वात्। अभावज्ञानं प्रति प्रतियोगिस्मरणस्य हेतुत्वात्; अथ काममविक्रोशं निवर्तताम्; अथापि न गृहादि प्राप्स्यति; सर्वस्यानुपलम्भकाले नष्टत्वात्। अथ तस्य नष्टत्वबुद्धावपि वस्तुतः सत्त्वादासादयिष्यतीति चेत्—तर्ह्यनुपलम्भमात्रेणाभावावधारणं कथमुक्तम्। अथ नष्टा एव ते; प्रतिनिवृत्तेन दर्शनं तु तदात्व एवोत्पन्नानां तज्जातीयानामिति चेन्न-उत्पादकाभावादुत्पत्त्यसम्भवात्। उत्पादकाभावश्च तेषामनुपलभ्यमानत्वात्। अनुपलम्भेऽपि तत्सत्त्वस्वीकारे तु अनुपलब्धिमात्रमभावसाधकमित्येतदसम्भवरूप उक्त एव दोषः।

[ननु पुत्रदारादेस्तेनानुपलभ्यमानत्वेऽपि मिथ उपलभ्यमानत्वात्कथं तदभाव इति चेत्—तर्हि सर्वैरनुपलभ्यमानत्वेनैवाभावोऽवधारणीयः स्यात्। तथा चेश्वराभावोऽपि दुर्निश्चयः; यत् भूतयोनिं परिपश्यन्ति धीराः। केन साधनेन पश्यन्तीति चेत्—रूपमस्तीति कुत इति पृच्छतो जात्यन्धस्येवात्र समाधिः। अथोपलम्भसामग्र्यां सत्यामेकेनाप्यनुपलम्भेऽभावग्राहक एव। पुत्रा-

१ पा० शोकविकलो बहु विक्रोशन्। प्र. 'ननु .... अनुपलब्धिः प्रत्यक्षसहकारिणी। न च गेहाद्बहिर्गमनेऽधिकरणेन सहेन्द्रियसन्निकर्षोऽस्तीति न पुत्राद्यभावनिश्चयः स्यात्। सन्निकृष्टे देशे चाभावनिश्चयेऽपि ध्वंसानिश्चयान्न शोकः स्यात् .... अत्राहुः—अधिकरणज्ञानमात्रमभावधीहेतुः, न तु तदिन्द्रियसन्निकर्षोऽपि'। अत एव देवताद्यभावस्तदधिकरणासन्निकर्षेऽपि गृह्यत इति चार्वाकसिद्धान्तमाश्रित्योक्तम्'। इति।

कालेऽपि तर्हि सन्तीति न तावन्मात्रेणाभावावधारणम् ॥ तदैवोत्पन्ना इति चेन्न—अनुपलम्भेन हेतूनां बाधात् । अबाधे वा स एव दोषः ॥

[23] अत एव प्रत्यक्षमपि न स्यात् ; तद्धेतूनां चक्षुरादीनामनुपलम्भबाधितत्वात् । उपलभ्यन्त एव ; गोलकादि२ रूपत्वात्तेषामिति चेन्न—तदुपलब्धेः पूर्वं तेषामनुपलम्भात् । न च यौगपद्यनियमः ; कार्यकारणभावादिति ॥

देशे बहिरनुपलम्भकाले चेन्द्रियसन्निकर्षार्हत्वाभावान्नाभावावधारणमिति चेत्—तर्हि योग्यताविशिष्टानुपलब्धिः कारणमित्यसत्पथमागतोऽसि । ननु यत्र यन्नोपलभ्यते तत्र तदभावो निश्चीयते, न सर्वत्र । बहिः स्थितेन च तत्रैव पुत्राद्यभावनिश्चयः । पुत्रो नास्तीति सामान्यतोऽधिकरणाग्रहेणाभावप्रत्ययश्च न भवति ; अभावस्यानुयोगिसापेक्षत्वात् । भवतु वा कामम् ; बहिः पुत्राद्यभावविषयकतयोपपत्स्यते । गृहे पुत्रो नास्तीति गृहावच्छेदेनाभावप्रत्ययापादनं त्वशक्यम् ; गृहप्रत्यक्षहेतोरिन्द्रियसन्निकर्षस्याभावात्—इति—अत्रोच्यते—बहिःपुत्राभावनिश्चये सति शोकः कुतो न जायते ? पुत्रध्वंसाग्रहणादिति चेत्—कदा ध्वंसग्रहणम् ? गृहावच्छेदेनैव पुत्राभावनिश्चये इति चेत्—तर्हि बहिष्ठे पुत्रे गृहस्थश्चार्वाको विक्रोशेत् । देशान्तरे तत्सत्त्वसम्भावनया न शोक इति चेत्—अनुपलभ्यमानत्वाद्देशान्तरमेव नास्ति ; कुत्र सम्भावना ? अतो यदा यावदुपलभ्यते तदा तावदेव प्रामाणिकमिति पुत्रादेरिव गृहादेरप्यभावनिश्चयात् मरणादिकालिकपुत्राद्यभावनिश्चयस्यास्य चाविशेषादनिवार्यः शोकः ॥ पूर्वं पश्चाच्चोपलभ्यमानस्य मध्ये सत्त्वं स्वीक्रियत इति चेत्—तर्ह्यनुपलम्भमात्रेणाभावनिश्चयः प्रमा न स्यात् ।

[23] एवमनुपलम्भमात्रेणाभावनिश्चये प्रत्यक्षमेव न जायेत हेत्वभावात् । चक्षुरादीनां तत्कारणानामनुपलभ्यमानत्वेनासत्त्वात् । ननु गोलकादीनामिन्द्रियस्थानत्वेनाभिमतानामेवेन्द्रियत्वाभ्युपगमात् तेषां चोपलभ्यमानत्वान्न हेत्वभाव इति चेन्न—घटाद्युपलब्धेः पूर्वं गोलकादीनामनुपलम्भात् । कदाचिद्दर्पणादौ तदुपलम्भेऽपि नियमेन घटाद्येकैकोपलब्धिपूर्वक्षणे तेषां गोलकादीनामुपलम्भस्यासम्भवात् । तथा चानुपलम्भात्तदभावे सति कथं प्रत्यक्षोत्पत्तिः । न चैवमपि प्रत्यक्षसामान्यनिषेधः कथम्, गोलकाद्युपलम्भे प्रत्यक्षसत्त्वादिति वाच्यम्—गोलकाद्युपलम्भस्यैव सिद्धेः । अनुपलम्भकालेऽभाववादिनो गोलकाद्युपलब्धेः पूर्वं गोलकादीनामनुपलम्भसत्त्वात् तदा च तदभावे सति तदुपलम्भोत्पत्त्यसम्भवात् । न चोपलब्धेर्गोलकादेश्च युगपदुत्पत्तिर्युक्ता ; उपलब्धिं प्रति गोलकादेर्विषयविधया करणविधया च कारणत्वात् प्राक्क्षणे तदभावे प्रत्यक्षासम्भवात् । अत एव घटादिविषयताकहेतोर्बाधितत्वादपि प्रत्यक्षस्य नात्मलाभ इति । तदर्थं

---

२ अयं क. २ पाठः । पा० उपलभ्यन्त एव गोलकादय इति चेन्न ।

[24] एतेन—न परमाणवः सन्ति ; अनुपलब्धेः । न ते नित्या निरवयवा वा, पार्थिवत्वात् घटादिवत् । न पार्थिवपरमाणुरूपादयो नित्याः रूपादित्वात् दृश्यमानरूपादिवत् । न रूपत्वपार्थिवत्वादि नित्याकार्यातीन्द्रियसमवायि जातित्वात् शृङ्गत्ववत् । नेन्द्रियाणि सन्ति, योग्यानुपलब्धेः । अयोग्यानि च शशशृङ्गप्रतिबन्द्या निरसनीयानीति १ एवं स्वर्गापूर्वदेवतानिराकरणं नास्तिकानां निरसनीयम् । मीमांसकश्च तोषयितव्यो भीषयितव्यश्चेति ॥

प्राक्क्षणे तत्स्वीकारेऽनुपलम्भेऽपि वस्तुसत्त्वादनुपलम्भमात्रस्याभावसाधकत्वासिद्धेरिति ॥ वस्तुतो गोलकादेरन्धादावप्यक्षतत्वान्नेन्द्रियत्वमित्यन्यदेतत् ॥

[24] एतेनोक्तेन प्रकारेण परमाण्विन्द्रियादिनिरसनं, स्वर्गापूर्वदेवतानिराकरणं च नास्तिकानां निरसनीयम् । ते खल्वेवमाहुः—न वयं पूर्वं पश्चाच्चोपलभ्यमानस्य मध्ये सत्त्वं, अनुमानादिचापलपामः । प्रत्यक्षयोग्याः पदार्था अनुपलम्भकालेऽनुमानादिना कामं सिद्ध्यन्तु ; तत्र हेतुसाध्यसम्बन्धस्य व्याप्तिरूपस्य प्रत्यक्षतो ग्रहणसम्भवात् । अन्यत्तु परमाणुतद्गतरूपादिकमनुमानतः प्रतिषेधनीयम् । एवं गोलकाद्यतिरिक्तेन्द्रियाण्यपि किं प्रत्यक्षयोग्यानि स्वीक्रियन्ते, उतायोग्यानि । न तावत्तानि योग्यानि सन्ति ; अनुपलब्धेः । नाप्ययोग्यानि ; अयोग्यानामनुपलब्धिमात्रेण शशशृङ्गवन्निरासात् । अन्यथा शशशृङ्गमपि स्यादिति प्रतिबन्दिः । तथा च सामान्यतोऽभावप्रत्यक्षं प्रत्यनुपलब्धिरेव कारणम् । योग्यप्रतियोगिकाभावप्रत्यक्षरूपविशेषे तु योग्यतारूपा प्रतियोगिग्राहकसामग्र्यपि सहकारिकारणम् । एवमनुपलब्ध्या परमाण्वादिनिषेधवत् नास्तिकक्रृतं स्वर्गापूर्वदेवतानिराकरणं प्रत्येतव्यम्—इति । एषां निरसनमप्युक्तप्रकारेणैव वेदितव्यम् । सर्वं हीदं पूर्वोक्तेश्वर-तद्ज्ञान-आत्मत्वादिपक्षकानुमानतुल्यम् । अतश्च परमाण्वादिपक्षकानुमानेष्वाश्रयासिद्धिः स्पष्टा । रूपत्वपृथिवीत्वादिकं, अविनाशि अनुत्पन्नं अतीन्द्रियं च यत् तदसमवेतम्, जातित्वादित्यनुमाने च साध्यतावच्छेदकाप्रसिद्ध्याऽप्रसिद्धविशेषणः पक्षः । एवमनुपलम्भमात्रस्याभावग्राहकत्वे, , 'अदृष्टे बाधिते हेतौ प्रत्यक्षमपि दुर्लभ' मित्युक्त एव दोषः । अयोग्यवस्तुन एवाप्रसिद्धौ तदभावग्रहं प्रति केवलानुपलब्धिर्हेतुरिति कल्पना चानुपपन्ना ; वस्तुसिद्ध्यसिद्धिभ्यां व्याघातात् । शशशृङ्गनिषेधासम्भवादिकं च प्रागेवोक्तम् । अतः प्रत्यक्षसामान्ये योग्यतायाः सहकारित्वं निराबाधम् । एवं स्वर्गापूर्वदेवतानिराकरणमप्याश्रयासिद्ध्यादिना भाव्यम् । एवं मीमांसकोऽपि यथा तत्र स्वर्गापूर्वसमर्थकत्वात्तोषयितव्यः । तथा ईश्वरेण

१ इतीति । इतीदानीमित्यर्थः । एवमिति चार्थे ; निराकरणं चेत्यन्वयः । उभयमपि निरसनीयमिति ॥

[25] यद्येवमनुपलम्भेनादृश्यप्रतिषेधो नेष्यते, अनुपलभ्योपाधिप्रतिषेधोऽपि नैष्टव्यः । तथा च कथं तथाभूतार्थसिद्धिरपि ; अनुमानबीजप्रतिबन्धासिद्धेः । तदभावे शब्दादेरप्यभावः ; प्रामाण्यासिद्धेः । सेयमुभयतः पाशा रज्जुः १ ॥

[26] अत्र कश्चिदाह—माभूदुपाधिविधूननम् , चतुःपञ्चरूपसम्पत्तिमात्रेणैव प्रतिबन्धनिर्वाहात् । तस्याश्च सपक्षासपक्षदर्शनादर्शनमात्रप्रमाणकत्वात् । यत्र तु तद्भङ्गः, तत्र प्रमाणभङ्गोऽप्यावश्यकः । न ह्यस्ति सम्भवो दर्शनादर्शनयोरविप्लवे २ हेतुरूपविप्लव इति ॥

सह यथावस्थितदेवतादिप्रश्नादिनिराकर्तृत्वाद्दूषयितव्यश्च । न चेश्वरादेर्बाधकानुमानवत् साधकानुमानमपि न सम्भवति; पक्षसाध्यहेतुषु तत्प्रवेशे पक्षसाध्यसाधनाप्रसिद्धीनामनिवार्यत्वादिति मन्तव्यम्—साध्यकोटावेव तत्प्रवेशात् । तत्रापि सामान्यतोदृष्टानुमानस्वीकारात्तदप्रसिद्धिरित्यलम् ।

[25]अथ—अनुपलम्भेनादृश्यपदार्थप्रतिषेध इष्यते न वा । आद्ये ईश्वराद्यसिद्धिः । अन्त्येऽपीश्वरादिसाधकत्वेनोपन्यस्तेष्वनुमानेषु अदृश्योपाधिमादाय सोपाधिकत्वकल्पनात्तदसिद्धिरेव । न हि तादृश उपाधिरनुपलब्धत्वात्प्रतिषिद्ध्यत इति सुवचम् ; अनुपलम्भस्यादृश्यप्रतिषेधकतायास्त्वयाऽनङ्गीकारात् । तथा च कथं सोपाधिकैरनुमानैरतीन्द्रियार्थानां सिद्धिः ; अनुमित्युपजीव्यस्य व्याप्त्यपरपर्यायस्य प्रतिबन्धस्योपाधिवशादग्रहणात् । एवंरीत्या सर्वानुमानेष्वप्यदृश्योपाधिसम्भावनयाऽनुमानसामान्याभावे सति आवापोद्वापमूलकानुमानद्वारक-व्यवहाराधीनशक्तिग्रहविरहात् , आप्तोक्तत्वादिना प्रामाण्यानुमानासम्भवाच्च प्रमाणत्वेनाभिमतस्य शब्दादेरप्यभाव इति स्थितं चार्वाकसम्मतं प्रत्यक्षमात्रप्रामाण्यम् । तथा चानुपलम्भस्यादृश्यप्रतिषेधकत्वेऽप्रतिषेधकत्वे चोभयथापीश्वराद्यसिद्धिरिति द्वेधा विकल्प्य विहितेयं दूषणरज्जुः शिरोद्वयेऽपि ग्रन्थिमती अशिथिला परबन्धनक्षमा अस्मदभीष्टप्रापकेति—बलीयानाक्षेपः ।

[26] अस्मिन्नाक्षेपे सिद्धान्त्येकदेशी कश्चिदेवं समाधिमाह—अनुपलम्भमात्रेणादृश्यप्रतिषेधो न भवत्येव । अतो नादृश्योपाधिविधूननेऽस्माभिर्यतनीयम् । अकृतेऽपि तन्निषेधे स्वकारणवशादेव व्याप्ति-

---

१ यथा रज्जुरेका लम्बमाना एकत इवान्यतोऽप्याकृष्यमाणा स्वाग्रद्वयेनापि बद्धं पात्रादि लम्भयति तथेति । यथा वा रज्जुकारेण रज्जुशैथिल्यदुर्वेष्टनपरिहाराय तत्र तत्र शाखायां बद्धस्वाग्रद्वया न शैथिल्यं प्राप्नोति तथेति । यथा वाऽऽदावन्ते च कृतग्रन्थिः रज्जुरशिथिलेति । केचिदुभयतःस्पाशेति पदमाद्रियन्ते । स्पश बन्धन इति धातुनिष्पन्नः स्पाशो बन्ध इति । बो. । 'सेयं शिरोद्वये पाशवती रज्जु'रिति ।

२ अयं क २ पाठः । बो. 'हेतोः पञ्चानां रूपाणां विप्लव' इति । पा० हेतुरूपप्लवत इति ।

[27] अप्रयोजकोऽपि तर्हि हेतुः स्यादिति चेत्—भूयोदर्शनाविप्लवे कोऽयमप्रयोजको नाम? न तावत् साध्यं प्रत्यकार्यमकारणं वा; सामान्यतो दृष्टानुमानस्वीकारात्। नापि सामग्र्यां कारणैकदेशः; पूर्ववदभ्युपगमात्। नापि व्यभिचारी; तदनुपलम्भात्। व्यभिचारोपलम्भे वा स एव दोषः। न च शङ्कितव्यभिचारः; निर्बीजशङ्कायाः सर्वत्र सुलभत्वात्। नापि व्याप्यान्तरसहवृत्तिः; एकत्रापि साध्येऽनेकसाधनोपगमात्। नाप्यल्पविषयः; धूमादेस्तथाभावेऽपि (थाभूतस्यापि) हेतुत्वात्। ननु धूमो (मोऽपि) वह्निमात्रेऽप्रयोजक एव, तन्निवृत्तावपि तदनिवृत्तेः। आर्द्रेन्धनवन्तं

निर्वाहात्। पक्षसत्त्वसपक्षसत्त्वविपक्षासत्त्वाबाधितत्वासत्प्रतिपक्षितत्वाख्येषु रूपेषु चतुर्णां पञ्चानामपि वा सम्पत्तिग्रहादेव व्याप्तिसिद्धिर्भवति। तथा हि—केवलान्वयिनि विपक्षाप्रसिद्ध्या विपक्षासत्त्वादन्येषां, केवलव्यतिरेकिणि सपक्षसत्त्वासम्भवादन्येषां च चतुर्णां, अन्वयव्यतिरेकिणि च पञ्चानां सम्पत्तिः। एतत्सम्पत्तिग्रहश्च हेतोः सपक्षे दर्शनाद्विपक्षेऽदर्शनाच्च प्रमाणाद्भवति। सपक्षे यथायोगं हेतुदर्शनस्य विपक्षे हेत्वदर्शनस्य चाविप्लुते उक्तानां हेतुरूपाणां विप्लवस्यासम्भावनीयत्वात् हेतुरूपभङ्गे उक्तदर्शनादर्शनरूपप्रमाणभङ्गोऽप्यावश्यक इति सिद्धं तन्मात्रप्रमाणकत्वम्।

[27] नन्विदमयुक्तम्। रूपसम्पत्तिमात्रेण सद्धेतुत्वे अप्रयोजकत्वेन कथ्यमानोऽपि सद्धेतुः स्यादिति चेत्—श्रूयताम्। पञ्चधा तावद्धेत्वाभासा महर्षिणा विभक्ताः सन्ति। तद्भिन्नाश्च सद्धेतव इत्यनुक्तिसिद्धम्। तेषु च पञ्चस्वाभासेषु नापेक्षितरूपसम्पत्तिः। तथा चाप्रयोजक इति यदि तत्रैकतमं ब्रवीषि, तस्य न हेतुत्वप्रसक्तिः। अथानाभासमेव कञ्चित्; तन्न युक्तम्—भूयोदर्शनाविप्लुते सर्वरूपसम्पत्तौ सत्यां कोऽयमप्रयोजको नाम? निरुच्यतां तावदिदमप्रयोजकत्वम्; सर्वथा निरसनीयमेव लक्ष्यते। तथा हि—न तावत् कार्यत्वकारणत्वान्यतरशून्यत्वमप्रयोजकत्वम्; 'पूर्ववच्छेषवत् सामान्यतोदृष्टम्' इति सूत्रे कारणं कार्यं च हेतुं निर्दिश्य तदन्यस्य सामान्यतोदृष्टाख्यस्य सद्धेतोः स्वीकृतत्वात् तस्याप्रयोजकत्वापातेन विरोधात्॥ नापि प्रयोजकपदस्य सामग्र्यां प्रयोगदर्शनात् सामग्रीभिन्नत्वं तत्प्रविष्टकिञ्चित्कारणात्मत्वमप्रयोजकत्वम्। एकस्मादपि कारणात्कार्यानुमानस्य पूर्ववदिति सूत्रेऽभ्युपगमात् पूर्वं कारणं हेतुतयाऽस्यास्तीति हि परामर्शो वाऽनुमितिर्वा पूर्ववदित्युच्यते। दण्डचक्रादेरेकस्माद्घटरूपकार्यानुमानासम्भवेऽपि, अयं घटवान् कपालद्वयसंयोगादित्यनुमितिर्भवत्येव। अन्येषां तु कारणानां व्यभिचरितत्वादहेतुत्वम्। नापि व्यभिचारित्वमेवाप्रयोजकत्वम्—विपक्षसत्त्वेन निश्चिते अप्रयोजके व्यभिचारोपलम्भासम्भवात्। यदि तदुपलम्भस्तर्हि स व्यभिचार एव दोषः। नापि वस्तुतो व्यभिचाराभावेऽपि सन्दिह्यमानव्यभिचारकोऽप्रयोजक इति—निष्कारणसन्देहस्य सद्धेतुत्वेनाभिमते सर्वत्र सुलभत्वेनानुमा-

वह्निविशेषं प्रति तु प्रयोजकः ; तन्निवृत्तौ तस्यैव निवृत्तेरिति—एतदप्ययुक्तम्—सामान्यप्रयोजकतायां विशेषसाधकत्वायोगात् ; तदसिद्धौ तस्यासिद्धिनियमात् ; सिद्धौ वा सामान्यविशेषभावानुपपत्तेः । नापि क्लृप्तसामर्थ्येऽन्यस्मिन् कल्पनीयसामर्थ्याप्रयोजकः ; नाशे कार्यत्वसावयवत्वयोरपि हेतुभावादिति ॥

[28] तदेतदपेशलम्—कथं हि विशेषाभावात् कश्चिद्व्यभिचरति कश्चिच्च नेति शक्यमवगन्तुम् । ततो निर्णायकाभावे सति साहित्यदर्शनमेव शङ्काबीजमिति कासौ निर्बीजा ।

तस्यैव विलयप्रसङ्गात् । नापि प्रकृतसाध्यं प्रति व्याप्यभूतवस्त्वन्तरसामानाधिकरण्यमप्रयोजकत्वम् ; व्याप्यान्तरसद्भावेऽप्यस्यापि व्याप्यत्वसम्भवात् । एकस्मिन्नेवाग्नौ धूमभस्मादिबहुहेतुदर्शनात् । अन्यथा विनिगमकाभावात्कस्यापि व्याप्यत्वं न स्यादिति । नापि साध्यन्यूनदेशकत्वं तत् ; धूमादेरग्न्यादिन्यूनदेशवृत्तित्वेऽपि हेतुत्वात् । नन्वग्निसामान्यं प्रति धूमोऽप्रयोजक एव, धूमनिवृत्तावप्ययःपिण्डेऽग्न्यनुवृत्तेः । अतो धूमेनार्द्रेन्धनविशिष्टाग्निरेव साध्यः ; धूमनिवृत्तौ तादृशविशिष्टाग्निनिवृत्तेः । अत उक्ताल्पविषयकत्वमेव तदिति चेत्—एतदप्ययुक्तम्—विशेषं प्रति व्याप्ये सामान्यं प्रति व्याप्यत्वस्य कैमुतिकनयसिद्धत्वात् । सामान्यं प्रति प्रयोजकत्वासिद्धिर्यत्र, तत्र विशेषं प्रत्यपि प्रयोजकत्वासिद्धेर्नियतत्वात् । एकप्रयोजकस्याप्यन्यप्रयोजकत्वसिद्धौ तु तयोरेकान्ययोः सामान्यविशेषरूपत्वमेवानुपपन्नम् ॥ नाप्येकस्मिन् साध्यसाधकत्वस्यावश्यक्लृप्तत्वेऽन्यस्य हेतोर्निर्दुष्टस्यापि साध्यसाधनसामर्थ्यकल्पनं गौरवात् कल्पनीयसामर्थ्यकत्वमेवाप्रयोजकत्वम्—इदं नाशि कार्यत्वादिति गुणादौ नाशित्वप्रयोजकतायाः कार्यत्वं क्लृप्तत्वेऽपि द्रव्ये कार्यत्वेनेव सावयवत्वेनापि नाशित्वानुमानस्य सम्मतस्य भङ्गापत्तेः । तस्माद्रूपसम्पातिस्थलेऽप्रयोजकत्वेनाहेतुत्वस्यासम्मतेः दुर्वचत्वात्तत्रोपाधिविधूननस्यानावश्यकत्वाददृश्योपाधिसम्भावनायामपि नेश्वराद्यनुमानभङ्ग इति निरस्तो नास्तिकपक्ष इति ।

[28] तदेतदप्रयोजकस्यापि सद्धेतुत्ववचनमेकदेशिकृतमहृद्यम्—उक्तं शङ्कितव्यभिचारत्वमेवाप्रयोजकत्वमिति सुवचत्वात् । न चास्याश्शङ्कायाः निष्कारणत्वम् ; कारणसद्भावात् । कथं ह्यसति विशेषेऽवगन्तुं शक्यते—अयं हेतुर्व्यभिचरितः, अयं तु न तथेति । अतो व्यभिचरितत्वाव्यभिचरितत्वान्यतरनिर्णायकस्य विशेषस्यादर्शने सति, हेतौ साध्यसाहचर्यदर्शनं, ऊर्ध्वत्वदर्शनमिव स्थाणुत्वतदभावसंशयं, व्यभिचरितत्वाव्यभिचरितत्वसंशयं साधारणधर्मवत्ताज्ञानविधया जनयति ; साध्यसाहचर्यस्य व्यभिचरितहेतावव्यभिचरितहेतौ च दर्शनेन साधारणधर्मरूपत्वात् । एवं च सर्वत्र सद्धेतौ साध्यसाहचर्यरूपसाधारणधर्मग्रहणाद्व्यभिचारशङ्का भवन्ती, तथा व्यभिचारिणस्सोपाधिकत्वनियमात्सोपाधिकत्वशङ्काप्रसक्तिरपि चार्वाकोक्ता सर्वत्र भवन्ती चार्वाकमोदा-

एवं सति अतिप्रसक्तिरपि चार्वाकनन्दिनी १ नोपालम्भाय ॥

[29] स्वभावादेव कश्चित् किञ्चिद्व्यभिचरति, कश्चिच्च नेति स्वभाव एव विशेष इति चेत्—केन चिह्नेन पुनरसौ निर्णेय इति निपुणेन भावनीयम् ; भूयोदर्शनस्य शतशः प्रवृत्तस्यापि भङ्गदर्शनात् ॥ यत्र भङ्गो न दृश्यते २ तत्र तथेति चेत्-आपाततो न दृश्यते इति सर्वत्र कालक्रमेणापि न द्रक्ष्यत इति को नियन्तेति ॥

[30] तस्मादुपाधितद्विरहावेव व्यभिचाराव्यभिचारनिबन्धनम् । तदवधारणं चाशक्यमिति । ननु यः सर्वैः प्रमाणैः सर्वदाऽस्मदादिभिर्यद्वत्तया नोपलभ्यते, नासौ तद्वान् ; यथा बकः श्यामिकया । नोपलभ्यते च वह्नौ धूम उपाधिमत्तया--इति शक्यमिति

वह्नावपि नानुमानोच्छेदितयाऽस्मदुपालम्भाय ; न हि तत्त्वपरिशीलकस्समुचितमाक्षेपमस्वीकृत्योपालब्धुमर्हति ; न चोपालम्भभिया ऋजुबुद्धिर्विमर्शको युक्तियुक्तं हठेन प्रतिषेद्धुमर्हति। अतश्शङ्कायास्सर्वत्र भवन्त्या अपि सहेतुकत्वात्तन्निवर्तको विशेष एवान्वेषणीयः ॥

[29] अथ तर्हि स्वभाव एव निर्णायकोऽस्तु । अयं हेतुस्स्वभावत एव व्यभिचरति ; अन्यश्च स्वभावत एव न व्यभिचरतीति चेत् — कुत्र व्यभिचरितत्वनिर्णायकस्स्वभावः, कुत्र चान्य इति स्वभाव एवासौ केन गमकेन गम्यत इति भावनीयम् । अतस्स्वभावमात्रेण न समाधानम् ॥ तर्हि भूयोदर्शनं निर्णायकमस्त्विति चेन्न— यत्र पार्थिवत्वं तत्र लोहलेख्यत्वमिति मार्विकदारवादौ भूयोदर्शनस्य शतशः प्रवृत्तस्यापि वज्रमणौ भङ्गदर्शनात् ; पार्थिवस्यैव तस्य लोहलेख्यत्वाभावात् ॥ तर्हि यत्र भङ्गादर्शनं तदव्यभिचरितमिति चेत् — विशेषविवेचनाभावादिदानीमदर्शनेऽपि देशान्तरे वा कालान्तरे वाऽपि भङ्गो न द्रक्ष्यत इत्यस्य व्यवस्थापकः कः ॥

[30] अतो भङ्गानुपलम्भस्य दुर्वचतया भूयोदर्शनं न गमकमिति निर्णायकविशेषापेक्षायां, उपाधिसत्त्वे व्यभिचरितत्वं तदभावेऽव्यभिचरितत्वमित्येव वक्तव्यम् । उपाध्यभावावधारणं चाशक्यम्-व्यभिचारशङ्कयामुपाधिशङ्कायाः सहजत्वात् अनुपलभ्योपाधिप्रतिषेधः कथमित्याक्षिप्तत्वाच्च ॥

---

१ बो. 'सर्वत्रापि सा स्यादित्येकदेशिना चार्वाकं प्रत्यापादिताऽतिप्रसक्तिः ।' प्र. 'अवश्यं शङ्कया भाव्यम् नियामकमपश्यतामिति चार्वाकोक्तातिप्रसक्तिर्नोपालम्भाय ; शङ्काबीजस्य सहचारदर्शनस्य सत्त्वादित्यर्थः ।' चार्वाकनन्दिनी चार्वाकपुत्रिका । चार्वाकानन्दकरीति तु युक्तोऽर्थः । चार्वाकनन्दिन्यपीत्यन्वयः । अतिप्रसक्तिरेकदेशिना सिद्धान्तिनं प्रत्यापादिता या सैव । अथ वा अतिप्रसक्तिर्भवन्त्यपि नोपालम्भायेत्येवार्थः । चार्वाकनन्दिनीत्यनेन 'कथं नु चार्वाकनन्दकरी चार्वाकं प्रत्यापाद्येत' इति परिहसनम् ।

२ तत्र तथा क.ख. पाठः । बो. 'तत्र अदृष्टभङ्गं तथा अव्यभिचारस्वभावम् ।'

चेन्न—अस्याप्यनुमानतया तदपेक्षायामनवस्थानात्। १ सर्वादृष्टेश्च सन्देहात्; स्वादृष्टेर्व्यभिचारतः; सर्वदेत्यसिद्धेः॥

[31] तादात्म्यतदुत्पत्तिभ्यां नियम इत्यन्ये। तत्र तादात्म्यं विपक्षे बाधकात् भवति। तदुत्पत्तिश्च पौर्वापर्येण प्रत्यक्षानुपलम्भाभ्याम्। २ न ह्येवं सति शङ्कापिशाची अव-

---

नन्वनुमानेनोपाधिविरहः साध्यते—धूमो वह्निविषये उपाधिरहितः केनापि प्रमाणेन केनापि पुरुषेण तद्वत्तयोपलभ्यमानत्वाभावात् यदेवं, तदेवं यथा बकस्तथा श्यामरूपवत्तयाऽनुपलभ्यमानः श्यामरूपरहित इति चेन्न—अस्याप्यनुमानतया व्यभिचारशङ्कायामुपाध्यभावापेक्षायामनुमानान्तरप्रयोगः, पुनस्तत्रापि तथेत्यनवस्थाप्रपञ्चात्। उपाधिमत्तया सर्वपुरुषादृश्यमानत्वस्य सन्दिग्धतया हेतोः सन्दिग्धासिद्धत्वाच्च॥ स्वमात्रादृश्यमानत्वं हेतुरिति चेन्न—तस्य वस्तुपरत्वेऽपि कारणान्तरवशात् सम्भवेन व्यभिचारितत्वात्। ननु सर्वैरिति वा स्वमात्रेणेति वा न विवक्षितम्; सर्वदाऽदृश्यमानत्वमेव हेतुरिति चेन्न—सर्वदेत्यस्यासिद्धेः; कालान्तरे दृश्यत्वस्यापि सम्भवात्। अत उपाधिविरहावधारणमशक्यम्॥

[31] ननु तर्हि, 'कार्यकारणभावाद्वा स्वभावाद्वा नियामकात्। अविनाभावनियमोऽदर्शनान्न न दर्शना'दिति विपक्षेऽदर्शनात् सपक्षे दर्शनाच्चाविनाभावसिद्धिं निषिद्ध्य तादात्म्याद्वा तदुत्पत्तेर्वा तत्सिद्धिं ब्रुवतो बौद्धस्य पक्षमवलम्ब्य शङ्कापरिहारोऽस्तु। तयोर्मध्ये तादात्म्यसिद्धिश्च प्रथमस्तबकोक्तरीत्या शिंशपायाः वृक्षसामग्रीकार्यत्वरूपाद्विपक्षे बाधकाद्भवति। तदुत्पत्तिसिद्धिश्च पूर्वं वह्निप्रत्यक्षे अपरं धूमः प्रत्यक्ष्यते; पूर्वं वह्निर्नोपलभ्यते यत्र, तत्र धूमोऽपि नोपलभ्यत इत्येवं प्रत्यक्षानुपलम्भाभ्यां भवति। एवं प्रत्यक्षानुपलम्भाभ्यां कार्यकारणभावग्रहणवर्णने सति, 'वह्निरिति किम्? पिशाचो धूमस्य कारणं स्यात; तथा च वह्निव्यभिचारी धूमः स्यादि'ति शङ्कापिशाच्याः नावकाशः। यत्र पिशाचादौ कारणत्वमाशङ्क्यमानं' तत्रापि तस्य प्रत्यक्षानुपल-

---

१ इदं वाक्यमित्थमेवात्र आत्मतत्त्वविवेके च लक्ष्यते। आनुपूर्वी कारिकावल्लक्ष्यते। कुत्रत्येति मृग्यम्। तथा सति, 'सर्वादृष्टेश्च सन्देहात् स्वादृष्टेर्व्यभिचारतः। सर्वदा' इत्युक्तरीत्याऽस्य हेतुत्वासिद्धेरिति पङ्क्त्यर्थः॥

२ प्र. 'प्रत्यक्षानुपलम्भ अन्वयव्यतिरेकाविति। वे. 'प्रत्यक्षानुपलम्भपञ्चकेन तदुत्पत्तिनिश्चय इति बौद्धाः। तत्र पौर्वापर्येण वह्निधूमयोरुपलम्भौ प्रत्यक्षद्वयम्। वह्न्यनुपलम्भे धूमानुपलम्भः, अन्यस्मिन् पूर्वभावेनोपलब्धेऽपि धूमानुपलम्भ इत्यनुपलम्भत्रयमिति प्रत्यक्षानुपलम्भपञ्चकम्॥ अन्येषां तु वह्नेर्धूमस्य पौर्वापर्यस्य च त्रीणि प्रत्यक्षाणि; वह्नेर्धूमस्य च द्वावनुपलम्भौ' इति।

काशमासादयति ; आशङ्क्यमानकारणभावस्यापि पिशाचादेरेतल्लक्षणाविरोधेनैव तत्त्व-निर्वाहादिति—१ नैवमपि ; उभयगामिनोऽव्यभिचारनिबन्धनस्यैकस्याविवेचनात् ; प्रत्येकं चाव्यापकत्वात् । कुतश्च कार्यात्मानौ कारणमात्मानं च न व्यभिचारत इति ॥

[32] अत्रोच्यते—शङ्का चेदनुमाऽस्त्येव न चेच्छङ्का ततस्तराम् ।
व्याघातावधिराशङ्का तर्कः शङ्कावधिर्मतः ॥ ७ ॥

म्भरूपप्रमाणाविरोधेनैव निर्वाह्यत्वात् क्वचित् धूमस्थले च वह्न्यभावे वह्निकार्यत्वभङ्गापत्तेः । तथा च बौद्धमतावलम्बनेनानुमाननिर्वाह इति चेत्—इदमपि न युक्तम् ; तादात्म्यानुमानतदुत्पत्त्यनुमानोभयानुगतस्याव्यभिचारनिर्णायकस्यैकस्य बौद्धैरपरिशीलनात् । न चोभयोरप्युभयस्थलानुगतत्वं सुवचम्—एकैकस्मिन्नुभयोरव्यापनात् । न चैकैकत्वैकैकमिति युक्तम्-तथा सत्येकैकस्याप्युभयगामित्वाभावादव्यभिचारप्रयोजकत्वायोगात् । एवं तादात्म्यतदुत्पत्तिव्यतिरिक्तानुमानानामपि सूचयिष्यमाणतया सर्वात्मना द्वयस्याव्यापकत्वाच्च । न केवलमेतावत् ; धूमो वह्न्यव्यभिचारी वह्निकार्यत्वात्, शिंशपा वृक्षाव्यभिचारिता वृक्षतादात्म्यादित्यनुमानयोरपि पुनर्व्यभिचारशङ्कायां तैः समाधिर्न विवेचितः । अतः कार्यं कुतो न कारणव्यभिचारि ; तदात्माऽपि कुतस्तदात्माव्यभिचारीति । अतो व्यभिचारशङ्कापरिहारस्य दुष्करतया नास्तिकचार्वाकाक्षेपो निष्प्रकम्पं स्थित इति चेत्—

[33] अत्रोच्यते–व्यभिचारशङ्का सहेतुकेति शङ्कां स्थापयता किं सर्वत्र व्यभिचारशङ्केत्यनुमानमात्रोच्छेद इति स्थाप्यते, किं वाऽनुमानं स्वीकृत्य व्यभिचारशङ्कापरिहारप्रकारोऽज्ञानाज्जिज्ञास्यते । आद्यमशक्यम्–व्यभिचारशङ्का हि संप्रति विपक्षसत्त्वादर्शनादेव भवति । अन्यथा हेतोर्विपक्षे दर्शने व्यभिचारनिश्चय एव स्यात्' न शङ्का । तथा च कालान्तरदेशान्तररूपाधिकरणानुमानं विना तत्र 'व्यभिचरे' दिति शङ्काऽयोगादनुमानं सिद्धम् ॥ एवं व्यभिचाराव्यभिचाररूपकोटिद्वयविषयकत्वाच्छङ्कायाः, अव्यभिचारस्य क्वचित् सिद्धत्वात्तेनाव्यभिचारिणा कदाचिदनुमानं न निषेध्यम् । एवं शङ्कावादिना, अयं हेतुरसाधकः शङ्कितव्यभिचारत्वादित्यनुमानेनाहेतुत्वस्य स्थाप्यतयाऽप्यनुमानसिद्धिः ॥ एवमदृश्योपाधिशङ्काऽपि दृश्योपाधिदुर्वचत्वनिश्चयमूलकादृश्यत्वानुमानादेवेति, तथा अयं हेतु सम्भावितव्यभिचारः सम्भावितोपाधिकत्वादित्यनुमानार्थैवेति च सिद्धमनुमानम् ॥ एवं हेत्वभावादनुमानमप्रमाणमित्यप्रामाण्यमप्यनुमानेन स्थाप्यम् ॥ असद्वाक्यश्रवणाद्वादी निवर्तिष्यत इत्याशयेनैव शङ्कावाक्यप्रयोगात, वाक्यतदर्थज्ञानादेरनु-

---

१. न एवमप्युभयगामिन–इति वाक्यच्छेदः पुस्तकेषु । वे. 'नानेनापि प्रकारेणाभावनिश्चय इत्याह नैवमिति । कुत इत्यत आह उभयेति ।' प्र. 'दूषयति नैवमपीति ।'

[33] कालान्तरे कदाचिद्व्यभिचरिष्यतीति कालं भाविनमाकलय्य शङ्क्येत । तदाकलनं च नानुमानमवधीर्य कस्यचित् । मुहूर्तयामाहोरात्रपक्षमासर्त्वयनसंवत्सरादयो हि भाविनो भवन्मुहूर्ताद्यनुमेया एव, अनवगतेषु स्मरणस्याप्यनाशङ्कनीयत्वात् । अनाकलने वा कमाश्रित्य व्यभिचारः शङ्क्येत (स्शङ्केति) । तथा च सुतरामनुमानस्वीकारः । एवं च देशान्तरेऽपि वक्तव्यम् ॥

मानसापेक्षत्वाच्च तदनिषेध्यम् ॥ एवमुपाधिशङ्कयानुमानप्रतिषेधस्यापि अयमनिश्चितव्याप्तिकः सम्भावितोपाधिकत्वादित्यनुमानरूपतया तत्राप्युपाधिशङ्कायां तस्यानुमानस्य निरस्तत्वेऽस्मदुक्तप्राक्तनानुमानमनाकुलितमिति ॥ तत्सिद्धं शङ्का चेदनुमाऽस्त्येवेति ॥ अथ यदि शङ्का नास्ति — तर्हि शङ्काभावः सुतरामनुमानसाधकः ॥ अस्तु तर्ह्यनुमानं प्रमाणम् । शङ्कानिवृत्तिः कुत इति जिज्ञास्यत इति चेत् — अनुकूलतर्कः शङ्काया अवधिर्निवर्तकः । एवं तर्कः शङ्कावधिकः ; तर्कस्य शङ्का पूर्वावधिः । शङ्कायां सत्यां तर्कः प्रवर्तते ; न चेन्नेति ॥ उत्तरोत्तरतर्के व्यभिचारशङ्का च व्याघातदर्शनावधिका । स्वकृताशङ्कायाः स्वकीयक्रियया भवतो व्याघातस्य ग्रहणमेव तदवसानभूमिरिति । एवमयं तर्क इत्थंभूतस्तं व्युत्पादयतः सूत्रकृतो मत इति ॥

[33] तदुपपाद्यते- उपाधिमत्त्वेन व्यभिचरितत्वेन वा इदानीमनुपलब्धत्वादनुपाधिकमव्यभिचारि चेत्युक्तौ या आशङ्का क्रियते, 'पश्चात्कदाचित्तथोपलभ्येते' ति—सा कालान्तरस्य प्रथमतः प्रमाणेनाग्रहणे न भवति । अनुमानावधीरणे च न कश्चित्केनाचित् प्रमाणेन कालान्तरमाकलयितुमलम् । वर्तमानो मुहूर्तादिरूपः कालो मुहूर्तादिकालान्तरोत्तरकः कालत्वादतीतकालवदित्याद्यनुमानं हि तत्र प्रमाणम् । न चानुभावकप्रमाणाभावेऽपि स्मरणरूपं कालान्तरज्ञानं भवितुमर्हतीति शङ्क्यम्— अननुभूतस्य स्मरणायोगात् । [न च कालत्वेन रूपेण सामान्यलक्षणाप्रत्यासत्त्या कालान्तरग्रहणमस्तीति वाच्यम् — प्रामाणिकानामेव विशेषाणां सामान्यप्रत्यासत्त्या ग्रहणात् । कालान्तरसाधकप्रमाणाभावे च तदसिद्धौ एवंवर्णनासम्भवात् । न हि शृङ्गत्वेन शशशृङ्गमपि गृहीतमिति कश्चिद्वक्तुमर्हति । किं च विशिष्य कालान्तरं निर्दिश्य हि तदा व्यभिचारापादनं कार्यम् । ननु वह्न्यनुपलम्भेऽपि धूमोपलम्भोऽस्त्विति सामान्यत आपादनमिति चेत्—तत्रापि निर्विशेषं न सामान्यमिति न्यायेन कालविशेषग्राहितया आवश्यकत्वात् प्रकृतकाले च इदमग्न्यभाववत् धूमवच्चेत्युपलम्भाभावेन कालान्तरपर्यवसानमभ्युपेत्यम् । अतो विशेषरूपेण तदास्तित्वानाकलने कमाधारं पुरस्कृत्य व्यभिचारः शङ्क्येत । अतोऽनुमानप्रमाणं व्यभिचारपक्षेऽपि सिद्धम् । न च नानुमीयते ; किन्तु 'यदि कालान्तरादिकं स्यात्, यदि तत्र साध्यं विनोपलम्भः स्यादिति सम्भावनैवेति वाच्यम् — अज्ञातस्य कालान्तरादेः सम्भाव-

[34] स्वीकृतमनुमानम् । सुहृद्भावेन पृच्छामः-कथमाशङ्का निवर्तनीयेति चेत्—न—यावदाशङ्कं तर्कप्रवृत्तेः ॥

नाविषयत्वस्याप्ययोगात् कालसद्भावतदभावरूपकोटिद्वयस्य प्रागदृष्टतया स्वरसतस्तद्विषयकसंशयस्यासम्भवाच्च ; उपपत्तिपरिशीलनं विना सम्भावनाया अनुत्पत्तेश्च ।] अतः कालान्तराद्यनुमानमावश्यकमिति तदर्थं तदनुमानस्वीकारे सुतरामनुमानस्य स्वीकार्यता । तत्सिद्धं न चेच्छङ्कातत्स्तरामिति ॥

(34) ननु सत्यमनुमानं प्रमाणं स्वीकर्तव्यम् । परं तु शङ्कापरिहारः कथमिति न ज्ञायते उपायस्य दुर्लभत्वादिति चेन्न—यदा यदाऽऽशङ्का, तदा तदाऽनुकूलतर्कः प्रवर्तनीय इति । कोऽसौ तर्क इति चेत्-व्यापकस्यानिष्टस्य प्रसञ्जनं तर्कः । तथा च यदि पर्वतेऽग्न्यभाव आपाद्येत, तर्हि तद्व्यापको धूमाभावोऽनिष्टः प्रसञ्जयेत, 'यद्यत्राग्निर्न स्यात्, तर्हि धूमो न स्यादि'ति । यदि तु धूमे हेतौ सोपाधिकत्वं वह्निव्यभिचारित्वं वाऽऽपाद्येत, तर्हि, 'यद्येवं स्यात्, धूमो वह्निजन्यो न स्यात्' इति वह्निजन्यत्वाभावस्यानिष्टस्य प्रसञ्जनं क्रियत इति ॥

[नन्वत्र न तावत् प्रथमस्तर्को व्याप्तिग्रहणोपयोगी । तथा हि—तर्के आपाद्यापादकयोः व्याप्यव्यापकभावः विपर्यये पर्यवसानं चावश्यकम् । अत्र च धूमाभाव आपाद्यः, अग्न्यभाव आपादकः । आपाद्यं प्रत्यापादकं व्याप्यम् । धूमाभावापादनस्य च धूमसत्त्वे पर्यवसानम् । एवमापाद्यकोटिविपर्ययपर्यवसाने सति आपादककोटिविपर्ययपर्यवसानं भवति । तथा च तर्कबलाद्वह्निसत्त्वं पक्षे पर्यवसितं भवति । एवं चानुमितेरेवैवं सिद्धत्वादनुमित्युपयोगि वह्निधूमव्याप्तिग्रहोपायत्वमस्य कथम् ? नापि द्वितीयस्तर्को व्याप्तिग्रहसाधनम् । वह्निजन्यो न स्यादित्यापादनं हि किं धूमस्य वह्निजन्यत्वनिश्चये सति, उत तदभावे । आद्ये नियतपूर्ववर्तित्वरूपस्य कारणत्वस्य व्यापकताघटितत्वेन कार्यत्वस्य व्याप्यताघटिततया वह्निजन्यत्वस्य स्वपूर्वक्षणवृत्तिवह्निव्याप्यतारूपतया तादृशजन्यत्वनिश्चयवतो वह्निव्यभिचारित्वशङ्काया एवासम्भवेनापादनस्यानवसरग्रस्तत्वात । व्याप्तिग्रहो हि प्रागेव सिद्ध इति । अन्त्ये तदनिश्चये सति वह्निजन्यत्वाभावस्यानिष्टत्वाज्ञानादापादनमकिञ्चित्करम् । अतो व्यर्थस्तर्क इति चेत्—

उच्यते—द्विविधस्तर्कः विषयपरिशोधको व्याप्तिग्राहकश्चेति । पूर्वोक्ततर्कयोराद्यो विषयशोधकः ; पक्षे साक्षाद्वह्न्यभावापादनात् तत्परिहाराय विषयशोधनमात्रं तेन कृतम् । एतदनन्तरं, अस्तु वह्न्यभावः ; धूमाभावस्तु मास्तु, वह्न्यभाववद्वृत्तिरेवास्त्विति व्यभिचारित्वशङ्कायां द्वितीयतर्कोत्थानम् । तथा च पक्षे साध्याभावशङ्का प्रथमा ; तदनुरोधेन हेतौ साध्यव्यभिचारित्वशङ्का द्वितीया । तत्र च द्वितीये तर्के यत् विकल्प्य दूषणं कृतम्, तत्रेदं श्रूयताम्—

[35] तेन हि वर्तमानेनोपाधिकोटौ तदायत्तव्यभिचारकोटौ वाऽनिष्टमुपनयता इच्छा

जन्यत्वं व्याप्यत्वघटितमेवेति न निर्बन्धः ; किं तु तत् स्वरूपसम्बन्धविशेषो वा अखण्डोपाधिर्वा अन्यादृशं वा भवितुमर्हति । परं तु तत् जन्यत्वं प्राक् धूमे वह्निव्याप्यताज्ञानमूलकमेव ज्ञातमस्ति । अथापि संप्रति तद्विस्मरणादिना व्यभिचारशङ्कायां सत्यां निश्चितपूर्वस्य जन्यत्वस्याभावः स्यादित्यापादने कृते व्यभिचारित्वकोटेरपि विपर्यये पर्यवसाने व्याप्तिग्रहः सिद्धो भवति ॥ तथा जन्यत्वस्य व्याप्यत्वघटितत्वपक्षेऽप्येवं निर्वाहः—वह्निजन्यत्वनिश्चयविरहिणं प्रत्येवैवमापादनं क्रियते । इतश्च स, 'वह्निजन्यत्वाभावोऽपि मे इष्ट' इति वदेत् । तदा, यदि वह्निजन्यो न स्यात्, धूमार्थिनां वह्नौ प्रवृत्तिर्न स्यादिति वक्तव्यम् । तथा च वह्निजन्यत्वाभावस्यानिष्टत्वे वह्निजन्यत्वनिश्चये च सिद्धे तस्यैव निश्चयस्य व्याप्तिनिश्चयरूपतया व्यभिचारसंशयनिवृत्तिः । जन्यत्वाभावापादनरूपस्य च तर्कस्य जन्यत्वरूपविपर्ययपर्यवसानोपयोगित्वात्तर्को व्याप्तिग्राहक इत्युच्यते । जन्यत्वस्य व्याप्यत्वाघटितत्वपक्षे च जन्यत्वाभावापादनस्य जन्यत्वपर्यवसाने तद्बलाद्व्यभिचारित्वविपर्ययपर्यवसानं तदेव चाव्यभिचारित्वरूपव्याप्तिज्ञानमिति तर्कस्य व्याप्तिग्राहकता । वस्तुतः प्रतियोगिव्यधिकरणसाध्याभाववदवृत्तित्वरूपव्याप्तिरनुमित्युपयोगिनो ; कार्याव्यवहितप्राक्क्षणावच्छिन्नवह्न्यभाववदवृत्तित्वं च वह्निजन्यतेति न व्याप्तरपेक्षितास्या जन्यताघटकत्वम् ।

एतावतेदमुक्तं भवति—व्यभिचारित्वाव्यभिचारित्वसमानाधिकरणसाहचर्यरूपसाधारणधर्मवत्ताज्ञानाद्व्यभिचारसंशयो भवतीति प्रागुक्तम् । एवमुपाधिसंशयादपि व्यभिचारसंशयः । तत्र, वह्निजन्यो न स्यात्, धूमार्थिना वह्नौ प्रवृत्तिर्न स्यादित्यादिना तर्केणाव्यभिचारित्वव्याप्यवत्ताज्ञानरूपविशेषदर्शनं संशयप्रतिबन्धकं सम्पाद्यते । तथा च विरुद्धकोटिभानासम्भवात् व्याप्तिरूपाव्यभिचारित्वग्रहणमिति । न चायं वह्न्यव्यभिचारी वह्निजन्यत्वादित्यनुमानप्रयोगस्यैव सुकरतया, यद्येवं तर्ह्येवं स्यादिति तर्कवेषः कुत इति वाच्यम्—धूमो वह्निव्यभिचारी स्यादित्याशङ्कमानं प्रति, यदि व्यभिचारी स्यात् तर्हि वह्निजन्यो न स्यादित्याशङ्कानुवादपुरःसरं तदनुरूपसमाधानस्यैव स्वरसत्वात् । इदं च परं प्रति बोधने । स्वयं परिशीलनदशायां त्वनुमानवेषो युज्यते ; वह्निजन्यत्वरूपविशेषदर्शने सत्येव तज्जन्यो न स्यादित्यारोपसम्भवात् । परं तु यदि पुंसः संशयमात्रमस्ति ; तदाऽनुमानवेषोऽप्यलम् । यदि तु व्यभिचारित्वकोटेर्मालयाऽभिमतत्वमिष्टत्वमापतति, तदा संशयविघटनवदिच्छाविघटनस्यापि कार्यतया तर्कस्यादरः ।]

[35] तथा च शङ्कायां सत्यां विना निश्चयं प्रवर्तितुमनिच्छतः पुंसः धूमवानयं विपक्षोऽस्तु । वह्न्यभाववानस्त्विति वह्न्यभाववत्ताज्ञ नेच्छा जायते । सा च तादृशज्ञानोपायान्वेषणे पुरुषं

विच्छिद्यते । विच्छिन्नविपक्षेच्छश्च प्रमाता भूयोदर्शनोपलब्धसाहचर्यं लिङ्गमनाकुलोऽधितिष्ठति ; अधिष्ठिताच्च करणात् क्रियापरिनिष्पत्तिरिति किमनुपपन्नम् ॥

प्रवर्तयन्ती व्याप्तिज्ञानोत्पत्तिं प्रतिबध्नाति । शङ्का च सोपाधिकत्वविषयिणी व्यभिचारविषयिणी वाऽपि भवति । आद्ये तत्परिहाराय यद्ययं धूमः (सोपाधिकः स्यात्) स्वाव्यापक-वह्निव्यापक-किञ्चित्पदार्थकः स्यात्, वह्निजन्यो न स्यादिति, यद्वा यदि वह्निधूमाव्यापककिञ्चिद्व्याप्यः स्यात् धूमजनको न स्यादिति तर्कः । अन्त्ये, यदि धूमो वह्निव्यभिचारी स्यात्; वह्निजन्यो न स्यादिति तर्कः । तत्रोपाधिशङ्काऽपि व्यभिचारशङ्कायामेव पर्यवस्यति । अयं हेतुः साध्य-व्यभिचारी साध्यव्यापकोपाधिव्यभिचारित्वादिति व्यभिचारोन्नयनं ह्युपाधिना क्रियते । तथा चोक्त-स्तर्कः वह्निजन्यत्वाभावरूपापाद्यकोटिविषयकः सोपाधिकत्वरूपायां वा शङ्कितुरभिमतायामापा-दककोटौ अनिष्टमुपनयति ; धूमे वह्निजन्यत्वाभावस्य तज्ज्ञानस्य च शङ्कितुरनिष्टत्वात्, सोपा-धिकत्वसव्यभिचारत्वयोश्चापादकत्वात्, सोपाधिकत्वादिज्ञानमनिष्टसाधनमिति बुद्धिं जनयतीति यावत् । अनिष्टं च प्रामाणिकत्यागोऽप्रामाणिकार्थस्वीकारो वा यथायथम् । तर्काकार एव च स्याद्घटितोऽनिष्टत्वादिव्यञ्जकः । एवं व्यभिचारज्ञानेऽनिष्टसाधनत्वज्ञाने सति तत्र द्वेषात् धूमे व्यभिचरितत्वेच्छायाः पक्षे विपक्षत्वेच्छायाश्च विच्छेदात् प्रमाता विपक्षत्वज्ञानोपायव्यग्रतारूप-वैयाकुल्यरहितो भूयोदर्शनतः सहचरितत्वेन स्मृतं हेतुं व्याप्तिविशिष्टत्वेन परामृशति । अन्यथा तु व्यभिचारकोटिविच्छायामप्रतिक्षिप्तायां तदुपष्टब्धा अव्यभिचारित्वशङ्का न व्याप्ति-निश्चयोत्पत्तये अवकाशं दद्यात् । इयमेव व्यभिचारशङ्का आक्षेपकपुरुषनिष्ठा आक्षिप्तपुरुषे स्वयमसतीति, इच्छाधीनेति च आहार्यशङ्केत्युच्यते । ईदृशशङ्कासहायितेच्छाविच्छेदे चोक्तरीत्या सति परामर्शे परामर्शविषयाल्लिङ्गात् करणादनुमितिक्रियानिष्पत्तिः । अतस्तर्कः शङ्कावधिरिति ।

[अत्र मणिकारादयः, 'व्यभिचारज्ञानाभावविशिष्टसहचारज्ञानं व्याप्तिग्रहोपायः । व्यभि-चारशङ्काविघटनं च तर्केण क्रियते । ततो व्याप्तिग्रह' इत्याहुः । प्रकृतयथाश्रुतग्रन्थानुसारेण तु विपक्षेच्छाविरहविशिष्टसाहचर्यज्ञानं व्याप्तिग्रहोपाय इति ज्ञायते । यदुच्यते, 'विच्छिन्न-विपक्षेच्छश्च प्रमाता भूयोदर्शनोपलब्धसाहचर्यं लिङ्गमनाकुलोऽधितिष्ठतीति । तथा च विपक्षजिज्ञासैव व्याप्तिग्रहप्रतिबन्धिका ; न व्यभिचारसंशयः ; संशयस्य निश्चयप्रतिबन्धकत्व-कल्पनाऽयोगात् । व्यभिचारनिश्चयकाले तु तस्य तदभाववत्तानिश्चयविधया प्रतिबन्धकत्वादेव न व्याप्तिग्रहः । एवं व्यभिचारसंशयोऽपि न तर्कविनाश्यः ; विरोधिविषयकत्वाभावेन तस्य तत्प्रतिबन्धकत्वायोगात् ; मणिमन्त्रादिन्यायानुसरणं च गौरवात् । व्यभिचारसंशयनिवृत्तिस्तु व्याप्तिग्रहादेव । एतदुक्तं भवति—साध्यार्थिनः पुंसो विपक्षेच्छा न भवतीति नास्ति ; तथा

[36] ननु तर्कोऽप्यविनाभावमपेक्ष्य प्रवर्तते । ततोऽनवस्थया भवितव्यम्—न—शङ्काया व्याघातावधित्वात् । तदेव ह्याशङ्क्यते, यस्मिन्नाशङ्क्यमाने स्वक्रियाव्याघा-

---

सति ; धूमोऽस्तु, वह्निर्मास्त्विति शङ्काभावात्तर्कस्यैवानपेक्षणात् । अतो वृथाप्रवृत्तिपरिहारपरस्य विवेचकस्य, यद्ययं विपक्षः स्यात् तर्हि तथा विजानीयामितीच्छा भवत्येव । अस्याश्चेच्छायाः विपक्षसत्त्वसंशयरूपशङ्का हेतुः । तत्र विपक्षसत्त्वशङ्कायां विषयपरिशोधकतर्के प्रवृत्ते ततो व्यभिचारशङ्कायां व्याप्तिग्राहकतर्कप्रवृत्तिरिति प्रागेवोक्तम् । तत्र द्वितीयतर्केण व्यभिचरितत्वापादननिवृत्तौ प्रथमतर्केण विपक्षेच्छा विच्छिद्यते । ततो द्वितीयतर्कविपर्ययपर्यवसानभूतेऽव्यभिचरितत्वनिश्चयात्मके व्याप्तिग्रहे सति प्रथमतर्कविपर्ययपर्यवसानात्मा साध्यनिश्चयोऽनुमितिरूपो निष्पद्यते । अयं साध्यनिश्चय एव विषयपरिशुद्धिः । एतत्करत्वादेव स तर्को विषय-[1]परिशोधक इत्युच्यते । द्वितीयस्य व्याप्तिग्रहपर्यवसायित्वाद्धि व्याप्तिग्राहकत्वम् । एवं द्वितीयस्य व्याप्तिग्रहात् प्रागपेक्षितत्वात् प्रथमस्य व्याप्तिग्रहात् पश्चाद्विपर्ययपर्यवसानवहत्वाच्च यथाक्रमं पूर्वोत्तराङ्गत्वम् । तथा च व्यभिचारेच्छाविपक्षेच्छयोस्तर्काभ्यां निवृत्तिः ; अनिष्टापादने सति इच्छाविच्छेदस्यानुभविकत्वात् । सुरापानादीच्छा हि तत्रानिष्टापादने निवर्तत इति । तस्मादिच्छारूपशङ्कैव तर्कनिवर्त्या । संशयरूपव्यभिचारशङ्काविपक्षसत्त्वशङ्कयोस्तु परामर्शादित एव निवृत्तिरिति । इदमपि समनन्तरमेव वक्ष्यति, 'नतः शङ्कैव स्वरूपतः फलतश्च निवर्तनीया । तत्र फलमस्याः विपक्षस्यापि जिज्ञासा तर्कादाहत्य निवर्तते । ततोऽनुमानप्रवृत्तौ शङ्कास्वरूपमपैति । व्याप्तिग्रहात् पूर्वमनिवर्तमानाऽपि व्यभिचारशङ्का न व्याप्तिग्रहप्रतिबन्धिका ; इच्छाया एव प्रतिबन्धकत्वस्वीकारात् । तस्याश्च वारितत्वात् । अतो यथाश्रुतमेव साधीय इति युक्तमुत्पश्यामः ।]

[36] ननु यदि वह्निः स्यात् तर्हि धूमोऽपि न स्यादित्यादिस्तर्कोऽपि वह्न्यभावधूमाभावादेर्व्याप्यव्यापकभावसापेक्ष इति वह्न्यभावोऽस्तु, धूमाभावो मास्त्विति तत्र व्यभिचारशङ्कायामुत्थापितायां तद्ग्राहकतर्कान्तरग्रहणे तत्राप्येवमित्यनवस्था दुर्वारेति चेन्न—शङ्कायाः व्याघातावधिकत्वात् । यद्विषयकशङ्काया हि स्वव्यापारविघातः, स्वोक्तिव्याघातः, स्वाभिमतिव्याघातो वा न भवति,

---

१ मकरन्दे तु, "अत एवायं न्यायविषयपरिशोधक इति गीयते । न्यायस्य परामर्शस्य विषयो लिङ्गं तस्य परिशुद्धिः परामर्शप्रतिबन्धकसाध्याभावजिज्ञासातदुपायानुसरणपरत्वयोरपगमः । ....न चैवं तर्कस्य न्यायोत्तराङ्गत्वप्रतिपादनविरोधः ; परामर्शव्यापारस्तर्क इति मतेन तदुत्थानात् । तदाह तत्रैव (प्रमेयतत्त्वबोधे) वर्धमानः, 'तर्को न्यायस्य पूर्वाङ्गम्, न्यायविषयपरिशोधकत्वात्, व्याप्तिग्राहकत्वाच्च' इत्याहुः" इत्युक्तम् ।

तादृशो दोषा नावतरन्तीति लोकमर्यादा । न हि हेतुफलभावो न भविष्यतीति शङ्कितुमपि शक्यते । तथा सति शङ्कैव न स्यात्, सर्वं मिथ्या भविष्यतीत्यादिवत् ॥

तदेवाशङ्क्यत इति लोकव्यवस्था । न खलु स्वकीयमनोवाक्कायव्यापारविरुद्धां शङ्कां कश्चिदनुगतिरुद्भावयितुमलम् । तथा च प्रकृते, यदि वह्न्यभावेऽपि धूमः स्यात्, धूमार्थिनो वह्निघटितसामग्र्यामेव प्रवृत्तिर्न स्यादिति प्रवृत्तिविघात आपद्येत । न चेदमिष्टम्; प्रवृत्तेरेव क्रियमाणत्वात् ॥ न च क्रियाव्याघातश्शङ्कानिष्ठ आधारतया स्वोपजीव्यां शङ्कां कथं रुणद्धीति कथं व्याघातावधिकत्वम्; यावताऽऽधेयो व्याघातो वर्तमान आधारस्य शङ्कायाः स्थापक एव लक्ष्यत इति खण्डनकारमनुरुद्ध्य शङ्क्यम्— क्रियाया व्याघातावधिकत्वमित्यनेन व्याघातरूपानुपपत्तिमत्क्रियावधिकत्वमित्यस्य विवक्षितत्वात् । तथा च क्रिया दृश्यमाना वह्न्यभावेऽपि धूमस्थितेरिष्टत्वशङ्कां तर्कान्तरनिरपेक्षमेव रुणद्धि । एवमत्र धूमस्याग्निमनपेक्ष्य स्थितिरप्यस्तु धूमार्थिनोऽग्नौ प्रवृत्तिरप्यस्त्विति न सुवचम्—यदि तन्निरपेक्षत्वस्तत्वार्थिनः पुंसस्तन्निरपेक्षत्वज्ञाने सत्यपि तद्विषयकप्रवृत्तिः स्यात्, तन्निरपेक्षत्वज्ञानकालिकः प्रवृत्त्यभाव आनुभविको न स्यात् । न च प्रवृत्तितदभावावेकत्र सम्भवतः; विरोधात् । एवं धूमो यदि वह्निव्यभिचारी स्यात् वह्निजन्यो न स्यादित्यपि विषयपरिशोधकतर्कगतव्याप्यव्यापकभावभङ्गपरिहारार्थस्तर्कः । न चात्रापि तद्भङ्गशङ्का; जन्यत्वस्य व्याप्यत्वात्मकतया व्यभिचारित्वजन्यत्वोक्त्योर्मिथो व्याहतत्वात् । तस्माद्व्याघातावधिराशङ्केति नानवस्था । तथा चापाद्यापादकयोर्व्याप्यव्यापकभावरूपमङ्गं तर्के सुस्थमिति । ननु वह्निजन्यो न स्यादित्यत्रेष्टापत्तिरिति चेत्—इष्टापत्तिरियं किं धूमे वह्निजन्यत्वानङ्गीकारात्, किं वा जन्यजनकभावस्यैव लोकेऽस्वीकारात् । आद्ये दूषणमुक्तम्—प्रवृत्तिर्न स्यादिति । एवं वह्न्यघटितसामग्र्यजन्यो धूमो यदि वह्निजन्योऽपि न स्यात्—तर्ह्यजन्य एव स्यादित्यपि दूषणम् । अन्त्यमपि न युक्तम्; न हि हेतुहेतुमद्भाव एव मा भूदिति शक्यशङ्कम्—तथा हि सति शङ्कैव न स्यात् । व्यभिचारशङ्का हि इच्छाद्वारा व्याप्तिज्ञानप्रतिबन्धाय । हेतुफलभावाभावे च सा व्यर्था । एवं जन्यजनकभाव एव नास्तीति शङ्काऽपि तत्सद्भाववादिपक्षप्रतिक्षेपाय । यदि जन्यजनकभाव एव न स्यात्, शङ्कया किं जनिष्यते । अतो यथा सर्वं मिथ्या भविष्यतीति वाक्यं सर्वान्तर्गतस्य स्वस्य मिथ्यात्वे सत्यत्वे च सर्वमिथ्यात्वबोधनाक्षमम्—आद्यपक्षे स्वयमसत्त्वेनासमर्थत्वात्; अन्त्ये च किञ्चित्सत्यत्वेन सर्वमिथ्यात्वायोगात् तथेदमिति । यथा वा सर्वं मिथ्येति वाक्यवत् सर्वं भविष्यतीति वाक्यमपि न सम्भावितम्—स्वस्य भूतत्वेन सर्वभविष्यत्त्वायोगात्; तथेदमपीति । तथा चापादितविषये इष्टापत्त्ययोगात् आपाद्यस्यानिष्टत्वरूपमङ्गं विपर्यये पर्यवसानरूपमङ्गं च तर्के सुस्थमिति । आपाद्यस्य विपर्यये

[37] अथाप्यतीन्द्रियोपाधिनिषेधे किं प्रमाणमि(ध:किंप्रमाणक इ)त्युच्यतामिति चेत्— न वै कश्चिदतीन्द्रियोपाधिः प्रमाणसिद्धोऽस्ति, यस्याभावे प्रमाणमन्वेषणीयम्। केवलं साहचर्ये निबन्धनान्तरमात्रं शङ्क्यते। ततः शङ्कैव फलतः स्वरूपतश्च निवर्तनीया। तत्र फलमस्याः विपक्षस्यापि जिज्ञासा तर्कादाहत्य निवर्तते; ततोऽनुमानप्रवृत्तौ शङ्कास्वरूपमपीति सर्वं सुस्थम्॥

पर्यवसाने सति व्याप्यव्यापकभावबलादापादकस्यापि विपर्यये पर्यवसानं सिद्धम्। इदमेव च तर्कस्य विपर्यये तत्कोटिपर्यवसायित्वम्—यत् स्वविषयीभूतस्यापाद्यस्य विपर्ययात् आपादक-विपर्ययरूपकोटिपर्यवसानकरत्वमिति १। तर्कस्याङ्गपञ्चकं—प्रतितर्काप्रतिहतत्वं, आपाद्यापादक-योर्व्याप्यव्यापकभावः, आपाद्यस्य परानिष्टत्वं, पराननुकूलत्वं, विपर्यये पर्यवसानं चेति यत् प्रसिद्धं, तत्र साक्षादनुक्तमप्यत्रोक्तप्रायं वेदितव्यमित्यलम्।

[37] ननु धूमेनाग्न्यनुमानेऽतीन्द्रियोपाधिशङ्कायां तन्निषेधो न प्रत्यक्षेण, तस्यातीन्द्रियत्वात्। अतोऽनुमानेन स निरस्यः। ततस्तस्मिन्नप्यनुमाने उपाधिशङ्कायां तन्निषेधोऽनुमानान्तरेणेत्यन-वस्थेयमपरिहार्येति चेन्न; प्रमाणसिद्धस्य ह्यन्यत्राभावः प्रमाणेनाविष्यते। उक्तं हि 'नशशशृङ्गा-दिकं निषिद्ध्यते' इति। अतोऽप्रसक्तत्वादप्रतिषेधः। ततो भवताऽतीन्द्रियोपाधिरिहास्तीति विशिष्य दुर्वचम्। किं तु क्वचिद्धेतौ उपाधिप्रयुक्तव्याप्त्युपजीवित्वस्य दर्शनात् प्रकृतहेतावपि साध्यसाहचर्ये कश्चिदुपाधिः प्रयोजकः स्यादिति सामान्यत एव शङ्कनीयम्। तथा च कस्य चित् प्रकृतसाधनाव्यापकत्वशङ्का, ततः प्रकृतसाधने साध्यव्यभिचारित्वशङ्का चैवावतिष्ठते; न तु विशिष्यातीन्द्रियोपाधिशङ्का काचिदिति॥ नन्वियमपि शङ्का न तर्कनिवर्त्या; तर्कस्यैत-द्विरोधिविषयकत्वाभावादिति चेत्—मामूत्तर्कतः साक्षान्निवृत्तिः; अथापि तत्फलं हेतौ व्यभिचा-रित्वनिश्चयेच्छा पक्षे विपक्षत्वज्ञानेच्छा च तर्कतः साक्षान्निवर्तते। एवं विपक्षेच्छानिवृत्त्या च परामर्शप्रवृत्तौ तस्य विरोधिविषयकत्वाच्छङ्का स्वरूपतोऽपि निवर्त्स्यते। न पुनः शङ्कानि-वृत्तिरनुमानात्प्रागपेक्षितेति॥ तथा च योग्यानुपलब्धिरेवाभावग्राहिका, न केवला। न च तावताऽतीन्द्रियोपाधिशङ्कयाऽनुमानोच्छेदः शब्दप्रमाणाद्युच्छेदश्च। न वा तद्धियाऽप्रयोजकहेतुत्व-नङ्गीकारः। न वा तदङ्गीकारे व्यभिचारित्वाक्षेपस्य सर्वत्र सुलभस्य परिहारासम्भवः; तर्कस्यैव सर्वाक्षेपकुक्षिम्भरित्वादिति सुस्थमेतत्॥

---

१. 'विपर्यये तत्कोटिपर्यवसायिनश्च तर्कस्य तदभावकोटिकशङ्कानिवर्तकत्व'मिति दीधिति-(पु. ६८०) वाक्यानुसरणेन सर्वत्रात्र तत्र तत्कोटीति लेखनम्।

[38] न चैतदनागमम्, न्यायाङ्गतया तर्कं व्युत्पादयतः सूत्रकारस्याभिमतत्वात्। अन्यथा तद्व्युत्पादनवैयर्थ्यात्॥

[39] तदयं संक्षेपः—यत्रानुकूलतर्को नास्ति सोऽप्रयोजकः। स च द्विविधः शङ्कितोपाधिर्निश्चितोपाधिश्च; यत्रेदमुच्यते—

'यावच्चाव्यतिरेकित्वं शतांशेनापि शङ्क्यते।
विपक्षस्य कुतस्तावत् हेतोर्गमनिकाबलम्॥'

[40] तत्रोपाधिस्तु—साधनाव्यापकत्वे सति साध्यव्यापकः। तद्धर्मभूता हि व्याप्ति-

---

[38] न चैतत् तर्कसत्त्व एवानुमानस्य निर्दुष्टत्वमसंप्रदायमस्मत्कपोलकल्पितम्। महर्षिणैव हि पदार्थमध्ये तर्कं परिगणय्य, 'अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः' इति लक्षयित्वा, 'प्रमाणतर्कसाधनोपालम्भ' इति प्रमाणसहकारितामाचक्षाणेन तर्कः शङ्काविधिर्मत इति। व्याप्तिग्राहकतया तदुपयोगाभावे तद्व्युत्पादनमेव हि व्यर्थमिति। न चायं तर्क एव व्याप्तिज्ञानमनुमितिर्वा; 'कारणोपपत्तित' इति, 'तत्त्वज्ञानार्थ'मिति च तयोः पृथक्करणादिति॥

[39] एतावता प्रबन्धेनेदमुक्तं भवति—अनुकूलतर्कवान् हेतुः प्रयोजकः। अनुकूलतर्करहितत्वमप्रयोजकत्वम्। स च द्विविधः शङ्कितोपाधिको निश्चितोपाधिकश्च। अत्र यावच्चेत्यादि वृद्धवचनमपि प्रमाणम्। यावत् विपक्षस्य साध्याभाववतः हेत्वव्यतिरेकित्वं हेतुमत्त्वमत्यल्पमपि शङ्क्यते, व्यभिचरित इत्याक्षेपः क्रियत इति यावत्, तावत् हेतोः साध्यगमकत्वे बलं व्याप्तिग्रहो नास्तीति तदर्थः। अत्र शतांशेनापीत्यनेन ईषत्सन्देहाधीनाक्षेपोऽप्यलम्; उपाधिनिश्चये तु सुतरामिति ज्ञाप्यते।

[40] ननु साध्यसाधने क्लृप्तसामर्थ्यकत्वं ह्युपाधित्वम्। एवं च कल्पनीयसामर्थ्यकं सोपाधिकमित्यापतति। तथा च कार्यत्वमादाय सावयवत्वं सोपाधिकं नाशित्वानुमापकं न स्यादिति चेत्-उपाधिलक्षणं साध्यव्यापकत्वे सति साधनाव्यापकत्वम्, आभ्यां दलाभ्यां कार्यत्वं प्रति सावयवत्वस्य सावयवत्वं प्रति कार्यत्वस्य चोपाधित्वं वार्यते। नाशित्वव्याप्यकार्यत्वव्याप्यतया सावयवत्वं सुतरां नाशित्वव्याप्यमिति न तत्रोपाधित्वप्रसक्तिः। अत्रोपाधिशब्दप्रवृत्तिः कथमिति चेत्—उच्यते—स्वसमीपस्थे स्वधर्मं य आधत्ते स उपाधिः। यथा जपाकुसुमं स्वगतां रक्ततां स्फटिके। एवमुपाधित्वेनाभिमतः स्वगतां साध्यव्याप्तिं हेताववभासयति; एतन्निष्ठैव व्याप्तिर्हेतौ चकास्तीति स उपाधिरिति। इदं च भट्टपादैः, 'अन्य परप्रयुक्ताना'मिति कारिकया दर्शितं नैयायिकानुमतम्। सद्धेतवस्तावत् स्वभावत एव व्याप्तिमन्तः। अन्ये तु स्वतो व्याप्तिरहिता उपाधिप्रयुक्तां उपाधिसन्निधानसिद्धां साध्यव्याप्तिमुपजीवन्ति। तादृशहेतुरूप-

जपाकुसुमरक्ततेव स्फटिके, साधनाभिमते चकास्तीत्युपाधिरसावुच्यत इति । तदिदमाहुः—

'अन्ये परप्रयुक्तानां व्याप्तीनामुपजीवकाः ।
तैर्दृष्टैरपि नैवेष्टा व्यापकांशावधारणा ॥' (मी. श्लो. वा. १४. १-५.) इति ।

धर्मदर्शनेन व्यापकस्य साध्यस्य धर्मस्यावधारणं नैवेष्टमिति । [नन्वेवं चेदुपाधिशब्दार्थः, साध्यव्याप्यत्वमुपाधिलक्षणेऽवश्यं वाच्यमिति कथं तत्त्यागेन यत्किञ्चिल्लक्षणकथनमिति चेत्—उच्यते । सत्यं, साध्यव्याप्य एव मुख्य उपाधिः । अथापि यत्र यत्र साध्यविशिष्टं साधनमस्ति, तत्र तत्र साधने उपाधिनिष्ठव्याप्तेरारोपवर्णनायोपाधौ साध्यविशिष्टसाधनव्यापकत्वमपि संमन्तव्यम् । इदं च विशिष्टव्यापकत्वं विशेष्यभूतसाधनव्यापकत्वरूपं न भवति ; तथा सति साधनव्यापकस्योपाधेरेव साध्यव्याप्यत्वे सुतरां साधनस्य साध्यव्याप्यत्वमिति समीहितसिद्धिर्न स्यात् । अतो विशिष्टव्यापकत्वं साध्यव्यापकत्वरूपं साधनाव्यापकत्वरूपं च वाच्यम् । एवं च यथा साध्यव्याप्य उपाधिः स्वगतां व्याप्तिं साधने आरोपयन् साध्यव्यापकत्वाव्याप्यत्वाद्धेतौ साध्यव्याप्यत्वाभावं गमयति, तथा साध्याव्याप्योऽपि कश्चित् साध्यव्यापकत्वाव्याप्यत्वरूपहेतुबलेन साध्याव्याप्यतां हेतौ गमयितुमर्हतीति यादृशाकारमादाय साध्यव्याप्यस्योपाधेर्हेतुदूषकत्वं, तादृशाकारमादायान्यस्यापि तदिति सादृश्यात्सोऽप्युपाधिशब्दस्य गौणोऽर्थः । मुख्योपाधित्वं तु साध्यसमव्याप्तत्वे सति साधनाव्यापकत्वम् । अतः साध्यव्याप्यत्वस्योपाधिशब्दमुख्यव्यवहारनियामकत्वेऽपि दूषकतानियामकत्वाभावात् तदुपेक्ष्य गौणमुख्यसाधारणमुपाधिलक्षण साधनाव्यापकत्वे सति साध्यव्यापकत्वरूपं स्वीकृतमिति । ननूपाधिलक्षणे साध्यव्याप्यत्वानिवेशे सर्वत्र पक्षेतरत्वमुपाधिः स्यात् ; महानसादौ साध्यव्यापकत्वात् पर्वते धूमनिश्चयेन साधनाव्यापकत्वाच्चेति चेत्—उच्यते—पक्षे साध्यस्य सन्दिग्धतया पक्षेतरत्वे साध्यव्यापकत्वसन्देह एव ; न तु निश्चयः । ततो व्यभिचारशङ्कैव भविष्यति । सा च विपक्षजिज्ञासां जनयिष्यति । सा त्वनुकूलतर्केण शमयिष्यत इति न तेनोपाधिभूतेनोपद्रवलेशः ; अवश्यमेव कारणान्तरप्रयुक्तव्यभिचारशङ्कापरिहारायानुकूलतर्कस्यापेक्षितत्वात् । एवं साध्यमस्तु पक्षेतरत्वं मास्त्विति व्यापकत्वाक्षेपसम्भवान्नैव तस्य साध्यव्यापकत्वनिश्चयः ॥ एवं यद्वस्तु प्रकृतसाध्यमिव प्रकृतहेतुना साधयितुं शक्यम्, तदपि नोपाधिः । यथा पर्वतो वह्निमान् धूमादित्यत्र वह्निसामग्रीमत्त्वादि ॥ तत्र तर्केणोपाधिसाधनयोर्व्याप्यव्यापकभावसिद्ध्या साधनाव्यापकत्वभङ्गादिति ॥]

[नन्वप्रयोजकविषये मीमांसकभट्टपादसम्मतिप्रदर्शनं किमर्थमिति चेत्—उच्यते—मीमांसक-

[41] तदनेन विपक्षदण्डभूतेन तर्केण सनाथे भूयोदर्शने, कार्यं वा कारणं वा ततोऽन्यद्वा, समवायि वा संयोगि वाऽन्यथा वा भावो वाऽभावो वा, सविशेषणं वा निर्विशेषणं वा लिङ्गमिति निश्शङ्कमवधारणीयम्; अन्यथा तदाभास इति रहस्यम्॥

मूर्धन्या एवमाहुः—यत्र यत्र धूमस्तत्राग्निरिति यावद्धूमाधिकरणमग्निग्रहणरूपव्याप्तिज्ञानं न कारणम्; तद्ग्राहकप्रमाणाभावात्, अनपेक्षितत्वाच्च; पक्षातिरिक्ते धूमवत्त्वेन दृष्टस्थलमात्रेऽग्निदर्शनं व्यभिचारादर्शनं च मिलितमनुमितिं जनयतीत्यनदलमिति न धूमसामान्यस्याग्निसामान्यव्याप्तिज्ञानमपेक्षितमिति। तदेतत् न्यायरत्नमालाद्युक्तं प्रतिविधातुमेतत्कारिकाप्रदर्शनम्। इदमत्र सूचितं भवति- अप्रयोजकोऽसद्धेतुरिति तावदितोऽवगम्यते। भवद्भिश्च मिलितनयत्वादेरप्रयोजकत्वमुक्तम्। अतो व्यभिचारशङ्कायामनुमितिर्न भवतीति स्वीकृतमासीत्। न हि यथावद्व्यभिचारदर्शनं मिलितनयत्वेऽस्ति एवं च सद्धेतावप्युपाधिशङ्कया व्यभिचारशङ्कया वाऽप्रयोजकत्वे आपादिते तत्परिहारपरिशीलनेनैवानुमितिनिर्वाहः कार्यः। न चेदृशी अग्न्यभावशङ्का तत्तत्स्थलादागतपुरुषमुखात् सर्वत्र निवर्तयितुं शक्या। तथा सति चाप्तोपदेश एव तत्र मानं, नानुमानमिति। तथा च तदर्थमनुकूलतर्के प्रवृत्ते तस्य विपर्यये पर्यवसायित्वस्वाभाव्यात् व्यभिचरितत्वेच्छाविच्छेदिनो व्यभिचाराभावनिश्चायकत्वमवश्यमङ्गीकार्यम्। अतो व्यभिचाराभावरूपा सर्वधूमे व्याप्तिर्गृहीतैवेति कथं प्रमाणाभावः? इत्थं व्यभिचारशङ्कानिवर्तनाय व्याप्तिज्ञानस्यापेक्षितत्वात् कथमनपेक्षितत्वमपि? अतः पूर्वोक्तरीत्या सर्वत्र व्यभिचारशङ्कासम्भवात् सर्वसाधारण्येन व्याप्तिज्ञानमेवानुमितिहेतुः। नन्वेवं व्याप्तिज्ञानस्य सकलधूमवत्यग्निज्ञानरूपतया पर्वतेऽप्यग्रेर्ज्ञातत्वादनुमितेर्गृहीतग्राहित्वमेव स्यादिति चेन्न—सामान्यतः सर्वत्राग्निग्रहेऽपि पर्वतत्वेन पर्वते तस्यानुमित्यैव ग्राह्यत्वात्। तदिदमगृहीतग्राहित्वं प्राभाकरखण्डनबद्धपरिकरैर्भवद्भिरेव शास्त्रदीपिकादौ सम्यगुपपादितमिति। तत्सिद्धमविनाभावानिश्चयादप्रयोजको न हेतुरिति।]

[41] एवं सोपाधिकस्याप्रयोजकत्वात्तत्र तर्कापेक्षायाश्चोपपादितत्वात्—अनेन विपक्षत्वजिज्ञासाविच्छेदकेन तर्केण सहितं भूयोदर्शनपदविवक्षितमविवक्षिते यत्संख्याकं सहचारदर्शनमस्ति चेत् साध्यं प्रति गौतमोक्तरीत्या कार्यं वा कारणं वाऽनुभयं वा, कणादोक्तदिशा सम्बन्धविषयेऽपि समवायि वा संयोगि वाऽन्यसम्बन्धकं वा, स्वरूपविषयेऽपि भावो वाऽभावो वा, हेतुतावच्छेदकधर्मविषयेऽपि विशेषणान्तरविशिष्टमविशिष्टं वा यत् यादृशं तर्कोपस्कृतं तत् तादृशं सल्लिङ्गमिति शक्यमवधारयितुम्; न तत्र व्यभिचारशङ्कावकाशः; तर्कसनाथभूयोदर्शनाभावे तु सर्वः लिङ्गाभास इत्याकरनिगूढोऽयमर्थः; यमिममविद्वांसः-अप्रयोजकमपि सद्धेतुं केचिदाशेरते, तादात्म्यतदुत्पत्तिस्थलमात्रे हेतुस्थितिं च सौगता इति॥

[42] तादात्म्यतदुत्पत्त्योरप्येतदेव बीजम्। यदि हि का(यदि का)र्यात्मानौ कारणमात्मानं चातिपतेताम्, तदा तयोस्तत्त्वं व्याहन्येत। अत एव सामग्रीनिवेशिनश्चरमकारणादपि कार्यमनुमिमते१ सौगता अपि। तस्माद्विपक्षबाधकमेव प्रतिबन्धलक्षणम्।

[43] तथा हि—शाकाद्याहारपरिणतिर्विराहिणि मित्रातनये, न किञ्चिदनिष्टमिति नासौ तस्य व्यापिका; व्यापिका तु श्यामिकायाः, कारणत्वावधारणात्। कारणं च तत् तस्य; तदतिपत्य भवति चेति व्याहतम्। एवमन्यत्राप्यूहनीयमिति॥

[42] तादात्म्यस्थले तदुत्पत्तिस्थले चाविनाभावं प्रत्यप्येतदेव तर्कपनाथत्वं मूलम्। कुतश्च कार्यात्मानौ धूमशिंशपे, कारणमात्मानं च अग्निवृक्षौ न व्यभिचरत इति प्रश्ने हि, तथा सति तयोरात्मत्वं कार्यत्वं च न स्यादित्युत्तरयितव्यम्। एवं सति तर्केऽन्यत्राप्यविनाभावसम्भवादेव तादात्म्यकार्यमात्रहेतुवादिनोऽपि ते कारणकूटान्तर्गताच्चन्तुद्वयसंयोगादिरूपादन्तिमकारणाद्धेतोः कार्यघटाद्यनुमितिं क्वचिदाहुः। कारणान्तरस्य कार्यं विना भावेऽपि चरमकारणस्याविनाभाव एव; अन्यथा चरमकारणत्वमेव व्याहन्येतेति हि तदाशयः। अतोऽप्रतिक्षेप्यत्वात् 'विपक्षबाधकमानवेदनीयः स्वभावनियम' इति सौगतस्पृष्टस्तर्क एव सर्वस्थलेऽपि नियमगमक इति।

[43] अथाप्रयोजक उदाह्रियते—मातामहगृहे प्रसूनं मित्रातनयमाकर्ण्य जनकबन्धवश्चिन्तयन्ति, स श्यामः मित्रातनयत्वादिति। यद्यपि तत्र श्यामत्वाभाववति मित्रातनयत्वमन्यत्र न दृष्टम्, अथापि शाकाद्याहारपरिणतिरुपाधित्वेनोपन्यस्यते। न च प्रकृतहेतुनोपाधिरप्यनुमीयते—स शाकाद्याहारपरिणतो मित्रातनयत्वादिति; तथा च नोपाधिः साधनाव्यापकत्वमिति वाच्यम्। शाकादिपरिणामस्य शाकादिसामग्रीसम्पाताधीनत्वात् मित्रातनयत्वाधीनत्वाभावात्। मित्रातनये तद्विरहिणि सति हि न किञ्चिदनिष्टं शङ्क्योद्भावनम्। अतस्तर्काभावाच्छाकाद्याहारपरिणतिर्न मित्रातनयत्वव्यापिका। यद्यपि साधनाव्यापकत्वसन्देहः स्यात्—तथाऽपि सन्दिग्धोपाधित्वमक्षतम्। श्यामत्वं प्रति तु सा परिणतिर्व्यापिकैव; घट काकादौ श्यामत्वदर्शनेऽपि जातिविशेषाव्यापक-गर्भश्यामत्वं प्रति वैद्यकप्रामाण्येन शाकादिपरिणामस्य कारणत्वावधारणात्, कारणस्य कार्यव्यापकत्वात्, तत् शाकपाकजत्वं तस्य श्यामत्वस्य कारणम्, तत् शाकपाकजत्वमतिक्रम्य श्यामत्वगुणो भवति चेन्युक्तिर्हि व्याहता भवति, कारणाभावे कार्याभावस्यावश्यकत्वात्। अतः सोपाधिकत्वान्न सिषाधयिषितस्य साध्यस्य सिद्धिप्रसङ्गः। उपाधिर्हि द्विविधः, शुद्धसाध्यव्यापकः, यत्किञ्चित्पक्षवृत्तिधर्मविशिष्टप्रकृतसाध्यव्यापकश्चेति। तत्र च प्रकृते श्यामरूपनियामकजातिविशेषाभावविशिष्टगर्भश्यामत्वरूपविशिष्टसाध्यव्यापकोऽयमुपाधिरिति॥ एवं निश्चितो-

१ प्र. 'अत एव बधिरादेर्मुरजाभिघातादिना शब्दानुमानमित्याह अत एवेति।'

[44] क पुनरप्रयोजकोऽन्तर्भवति ? न कचिदित्येके । यथा हि सिद्धसाधनम्—न बाधितविषयम्, विषयापहाराभावात्; नापि निर्णये सति पक्षत्वातिपातादपक्षधर्मः, कालातीतविलोपप्रसङ्गात्; न चानैकान्तिकादिः, व्यभिचाराद्यभावात्—तथाऽयमपि । सूत्रं तूपलक्षणपरमिति—तदसत्—विभागस्य न्यूनाधिकसंख्याव्यवच्छेदफलत्वात् ॥

पाधिकाप्रयोजकस्थलेऽप्युपाधिसत्त्वमूहनीयम्—यथाऽयोगोलकं धूमवत् वह्नेरित्यत्रार्द्रेन्धनसंयोगः, अग्नीषोमीयाहिंसा अधर्मः हिंसात्वादित्यत्र निषिद्धत्वं चोपाधिः । सुरापानादौ ह्यधर्मत्वं निषिद्धत्वनिबन्धनम्; तच्चाधर्मत्वव्यापकम्; पक्षीभूतहिंसाविशेषे तु विहिते न निषिद्धत्वमिति साधनाव्यापकं च । [ननु सर्वत्रानुमाने पक्षे साध्यस्य सन्दिग्धतया उपाधेश्च पक्षावृत्तित्वेन साध्यव्यापकत्वमुपाधौ सन्दिग्धमेवेति कथं निश्चितोपाधिकाप्रयोजकसद्भाव इति चेत्—सत्यम् । अथापि साधनाव्यापकत्वांशसन्देहनिश्चयाभ्यामेवोपाधौ सन्दिग्धनिश्चितभेदः । तथा चोभयविधोपाधिनाऽपि हेतौ व्यभिचारशङ्कैव क्रियते इति शङ्कितव्यभिचारकत्वरूपमप्रयोजकत्वमुभयानुगतम् । अत एव प्राक् द्विविधाप्रयोजकविषयेऽपि 'यावच्चाव्यतिरेकित्व'मिति कारिकायाः प्रमाणतया ग्रहणं, उपर्यप्रयोजकसामान्यस्य सन्दिग्धानैकान्तिकत्वविमर्शश्च स्वरसतो घटते । अथ वा, यद्युपाधिर्न स्यात् तर्हि साध्यं न स्यादिति समुचिततर्कबलेन साध्योपाध्योर्व्याप्यव्यापकभावनिश्चयात् साध्यव्यापकत्वसन्देहो नैव भवतीति निश्चितोपाधिकत्वं सुवचम् ।] एवञ्चोपाधिलक्षणान्तर्गतविषये, हेतुविषये तर्कान्तर्गतविषये वा यत्र व्याप्यव्यापकभावे शङ्कावतारः, तत्र सर्वत्रानुकूलतर्के सत्येव व्याप्तिनिश्चयः, तदभावे त्वप्रयोजकत्वमेवेत्यप्यूहनीयम् ।

[44] नन्वेवमप्रयोजकस्य सद्धेतुत्वाभावे, 'सव्यभिचारविरुद्धसाध्यसमप्रकरणसमकालातीता हेत्वाभासाः' (न्या. १. २.) इति सूत्रोक्तेषु स क्वान्तर्भवतीति चेत्—अत्र केचित्—न क्वचिदन्तर्भवति । सिद्धसाधकहेतुवदयं पञ्चातिरिक्त इति । सिद्धसाधनहेतुर्हि न बाधितसाध्यकः, विषयस्य साध्यस्य पक्षादपहृतत्वाभावात् । अतो न कालातीतेऽन्तर्भवति; साध्याभाववत्तानिश्चयबलेन संशयकालमतीतस्यैव हेतोः कालातीतत्वात् । नाप्यपक्षधर्माख्योऽसिद्धपर्यायः साध्यसमः; हेतोः पक्षे सत्त्वात् । न च साध्यस्य निर्णीततया पक्षताया अभावात् पक्षताविशिष्टधर्मिवृत्तित्वरूपपक्षधर्मत्वाभावादसिद्धत्वमेवेति वाच्यम्—असिद्धिघटकपक्षे पक्षतारूपविशेषणप्रवेशाभावात् । अन्यथा बाधितस्थलेऽपि साध्यसन्देहरूपपक्षताया अभावेनासिद्धत्ववर्णनसम्भवेन कालातीतविलोपप्रसङ्गात् । एवं व्यभिचारविरोधाद्यभावात् सिद्धसाधनं नानैकान्तिकविरुद्धादिहेत्वाभासोऽपि । अतो यथा सोऽतिरिक्तस्तथाऽयमप्रयोजकोऽपि । विभागसूत्रं तु प्रकृतद्वयो-

[45] क तर्हि द्वयोरन्तर्निवेशः? असिद्ध एव। तथा हि—व्याप्तस्य हि पक्षधर्मताप्रतीतिः सिद्धिः। तदभावोऽसिद्धिः। इयं च व्याप्तिपक्षधर्मता[1]स्वरूपाणामन्यतमा-

---

पलक्षकम्; 'वरं वृत्तातिक्रमो न वस्त्वतिक्रम' इति न्यायादिति तेषां हृदयम् — तदसत्–विभागस्य यावद्दोषान्तरकथनरूपतया प्रतीतातिरिक्तसंख्याव्यवच्छेदफलकत्वात्। अतो द्वयोरप्युक्तान्तर्भाव एव।

[45] अन्तर्भावश्चासिद्ध एव। असिद्धो हि नाम सिद्ध्यभाववान्। सिद्धिः प्रतीतिः साध्यव्याप्यहेतुमान् पक्ष इति व्याप्तिविशिष्टपक्षधर्मत्वप्रतीतिरिति यावत्। एतदभावरूपासिद्धिश्च व्याप्यप्रतीतिः पक्षाप्रतीतिर्हेतुस्वरूपाप्रतीतिरिति त्रिधा भवति। आसाञ्चान्यथासिद्धिराश्रयासिद्धिस्स्वरूपासिद्धिरिति यथाक्रमं नामानि। सर्वो हि दोषो हेतोरेव। तत्र हेतोस्स्वात्मग्रहणाद्दोषस्स्वरूपासिद्धिः। अन्या चासिद्धिर्हेत्वनुबन्धिविषया। अन्यथासिद्धिस्साध्यं विनापि पक्षे हेतुसिद्धिः, हेतोस्साध्यव्याप्यत्वासिद्धिः। आश्रयासिद्धिरपि द्विधा, धर्मिस्वरूपाप्रतीतिः पक्षत्वाप्रतीतिश्चेति; तथा चाप्रयोजकत्वमन्यथासिद्धिः। सिद्धसाधनञ्च पक्षत्वाप्रतीतिरूपाश्रयासिद्धिः; न तु बाधोऽपि सा; साध्यव्याप्यहेतुमान् पक्ष इत्याकारिकायां व्याप्तगतपक्षधर्मत्वप्रतीतिरूपसिद्धौ व्याप्त्यंशे बाधेन सति पक्षत्वांशस्यैव साक्षाद्विघटनात्। न त्वेषप्रकारो बाधे; वह्निरनुष्णः कृतकत्वादित्यादौ बाधेन व्याप्तेरेव प्रथमं विघटनात्। अनुमितिं प्रति पक्षतापरामर्शयोः कारणत्वात् व्याप्तिज्ञानं, पक्षता, परामर्शोऽनुमितिरिति क्रमो वाच्यः। तत्र बाधेन प्रथमं व्याप्तिज्ञानमेव विघट्यते; सिषाधयिषा तु तदनन्तरा पक्षतेति। एवं बाधसिद्ध्योर्मध्ये बाधस्य पक्षत्वासिद्धिमात्रानिर्वाहकत्वात् सिद्धेश्च तादृशत्वात्, सिद्धसाधनबाधैक्ये च पक्षत्वासिद्धिरिति विभागस्यान्यथाऽनिर्वाहात्, ह्रदो वह्निमान् धूमादित्यादौ बाधे व्याप्तिविघटकत्वाभावेऽपि पक्षधर्मताज्ञानाविघटकतया पक्षतामात्रविघटकत्वाभावात् सिद्धसाधनमेव पक्षत्वासिद्धिः। न च व्याप्तिविघटनं नाम किं व्याप्त्यसिद्धिराहो व्यभिचारप्रतीतिः। आद्ये बाधस्यान्यथासिद्धावन्तर्भावः; अन्त्ये अनैकान्ते; ह्रदो वह्निमान् धूमादित्यत्र च स्वरूपासिद्धिरस्यैव दोष इति कुतो बाधितस्य पञ्चमत्वमिति वाच्यम्—यत्र बाधज्ञानानन्तरं व्याप्तिविघटनं तत्र बाधस्योपजीव्यत्वात्, यत्र स्वरूपासिद्ध्यज्ञानं, यत्र वा परामर्शानन्तरं बाधप्रत्यक्षम्, तत्र बाधज्ञानस्यैव कार्यकरत्वात् साक्षादनुमितिप्रतिबन्धकत्वाच्च बाधस्य पृथग्दोषत्वात्॥

---

१. सर्वत्र पक्षधर्मतेति पाठ एव लक्ष्यते। अत्र धर्मतेत्यधिकं भाति। तार्किकरक्षायामपि पक्षधर्मतेत्येवास्ति। तत्रासिद्धिश्चतुर्धा विभक्ता; व्याप्तिपक्षधर्मतास्वरूपाणामभावाः तज्ज्ञानाभावश्चेति विशेषः॥

प्रतीत्या भवन्ती यथासंख्यमन्यथासिद्धिराश्रयासिद्धिः स्वरूपासिद्धिरित्याख्यायते । मध्यमाऽव्याश्रयस्वरूपाप्रतीत्या तद्विशेषणपक्षत्वाप्रतीत्या वेति द्वयी । तत्र, चरमा सिद्धसाधनमिति व्यपदिश्यते ; व्याप्तिस्थितौ पक्षत्वस्याहत्य विघटनात् । न त्वेवं बाधे ; व्याप्तेरेव प्रथमं विघटनादिति विशेषः ॥

[नव्यास्तु पक्षतायास्स्वरूपसत्याः कारणत्वात् परामर्शविषयत्वाभावात् सिद्धसाधनस्थले परामर्शविषयव्याप्त्यादिविघटनस्यानुमितिविषयसाध्यवत्त्वविघटनस्य वाऽभावेन हेतोर्न हेत्वाभासत्वम् । पक्षतारूपहेत्वभावादनुमितिः परं न भवति । अतस्सिद्धसाधनहेतुप्रयोगे वादिनो न हेत्वाभासत्वोद्भावनम्, किन्तु निग्रहमात्रमित्याहुः ॥ अत्रेदमुत्पश्यामः—प्रत्यक्षितविषयेऽपि सन्निकर्षे सति धारावाहिप्रत्यक्षस्य, प्रतीतार्थकशब्दश्रवणेऽपि पुनर्बोधस्य च सम्मतत्वात् तद्वदेव सिद्धविषये परामर्शसत्त्वेऽनुमित्युत्पत्तौ न किञ्चिद्बाधकम् । अतस्सिद्धेर्नानुमितिं प्रत्यपि प्रतिबन्धकत्वम् । एवं पक्षताप्यनुमितौ न कारणम् ; असत्यपि साध्यसंशये, असत्यामपि सिषाधयिषायां, सत्यामपि सिद्धावनुमितेरङ्गीकारसम्भवात् । समानविषये प्रत्यक्षादिसामग्र्याः प्रबलत्वात्क्वचित्प्रत्यक्षादिसामग्रीरूपप्रतिबन्धकवशादनुमितिः कामं मा जायताम् । "न हि करिणि दृष्टे चीत्कारेण तमनुमिमतेऽनुमातारः" इति वाचस्पतिमिश्रवचनं च प्रत्यक्षसामग्रीसद्भावकालाभिप्रायं अनुमितिसामग्रीसम्पादनप्रयासाभावपरं च ; न तु सिद्धेः प्रतिबन्धकत्वपरम् । अतः प्रत्यक्षे जाते पुनः प्रत्यक्षोत्पादकसामग्र्यभावे च स्वयं सम्पन्नपरामर्शबलादनुमितिरुत्पत्स्यत एव । एतावता सिद्धसाधनं न दोष इति नोच्यते । सर्वत्र न्यायप्रयोगस्य परार्थत्वात् वादिनोर्मध्ये एकनिर्ज्ञातविषये परेण तज्ज्ञापनार्थन्यायप्रयोगस्यानवकाशादनपेक्षितार्थकथनेन दोषस्य जागरूकत्वात् । तत्र निग्रहस्थानमात्रं नवीनमतावलम्बने स्यात् ; अनुमितिपरामर्शविषयांशविपरीताकारसत्त्व एव हेतोर्दुष्टत्वाङ्गीकारात् । प्राचीनरीत्या तु हेत्वाभासत्वम्; पक्षत्वासिद्धत्वैः परिगणनात् । पक्षता च सिषाधयिषा साध्यवत्त्वजिज्ञासा । तस्याः परार्थानुमितावङ्गत्वात्तदभावेऽनपेक्षितहेतुप्रयोगाद्धेत्वाभासतेति सिद्धसाधनोद्भावकस्याशयः । सिद्ध्या चेदृशसाध्यवत्त्वजिज्ञासाभङ्गः क्रियते; इच्छायास्सर्वत्र विषयपूर्त्यैव नाशात् साध्यज्ञाने सति साध्यजिज्ञासाया असम्भवात् । अत एव सिद्धविषये जिज्ञासाविच्छेदादनुमित्यौपायिकपरामर्शसामग्रीसम्पादनप्रवृत्त्यभावमात्रेण सिद्धेरनुमितिप्रतिबन्धकत्ववाचोयुक्तिः । न तु स्वतस्सामग्रीसम्पाताधीनशाब्दादिपरामर्शस्थलेऽपि तावताऽनुमित्यनुत्पत्तिः । न च सिद्धस्थले परामर्शसत्त्वेऽपि पूर्वसिद्धविषयस्मरणमात्रम् , नानुमितिरिति वाच्यम् ; मानाभावात् ; सिद्ध्यनुमित्योः प्रतिबध्यप्रतिबन्धकभावकल्पनायामेव गौरवात् ; अनुमित्सादिनानासिषाधयिषायास्तत्रोत्तेजकत्वकल्पनाच्च गौरवात् । 'बुभुत्सापीन्द्रियान्तरादा-

[46] यत्त्वप्रयोजकः सन्दिग्धानैकान्तिक इत्यनैकान्तिकेऽन्तर्भाव्यते-तदसत्—व्याप्त्यसिद्ध्या हि निमित्तेन व्यभिचारः शङ्कनीयोऽन्यथा वा। प्रथमे असिद्धिरेव दूषणम्;

कृष्य बुभुत्सितार्थग्राहिणीन्द्रिये मनो निवेशयन्ती ... ... उपयुज्यते; न तु स्वरूपतः।' इति प्रागुक्तरीत्या सिषाधयिषाया अनुमितिसामग्रीनिष्पादकत्वेन साक्षादनुमितिहेतुत्वाभावात्। ज्ञानस्य वस्तुतन्त्रतया च कारणायत्तत्वेन क्रियावत् पुरुषतन्त्रत्वाभावेनेच्छाभावमात्रेण तदनुत्पादवर्णनस्यायुक्तत्वात्। अतः सिद्धिर्नानुमितिप्रतिबन्धिका; किं त्विच्छाविघटिका। बाधज्ञानस्य च नेदृशेच्छाविघटकत्वम्; तद्विपरीतज्ञानस्य तज्ज्ञानप्रतिबन्धकत्वेऽपि तज्ज्ञानेच्छाविघटकत्वाभावात्। अतो बाधेन पक्षत्वस्याहत्य विघटनाभावाद्बाधः पृथग्घेत्वाभासः। क्वचिद्बाधज्ञानपरेण साध्यप्रतिज्ञायां कृतायां साध्यवत्त्वजिज्ञासा जायमाना परकीयहेतुप्रयोगानन्तरं हेतोर्व्याप्यत्वनिश्चये सति शाम्यति। तावता न बाधेनाऽऽहत्य पक्षता विघट्यते, व्याप्तिज्ञानमेव विघट्यते साध्यज्ञानं वेति। एवं पक्षताया अनुमितिविशेष एवोपयोगान् तत्रैव पक्षत्वासिद्धिर्दूषणम्। बाधदोषस्तु स्वार्थपरार्थसर्वानुमितिसाधारणः। अतः कालातीतोऽतिरिक्त इति] तत्सिद्धं नाप्रयोजकः सिद्धसाधनवदतिरिक्तः; किं तु सिद्धसाधनवदेवासिद्धान्तर्गत इति।

[46] यत्तु अप्रयोजकस्थले व्यभिचारशङ्कासत्त्वात्सन्दिग्धानैकान्तिकत्वादनैकान्तिक एव सोऽन्तर्भाव्यत इति–तदसत्—किमनुकूलतर्कस्य व्याप्तिग्राहकस्याभावेन व्याप्त्यनिश्चयाद्व्यभिचारशङ्का, किं वा प्रागुक्तरीत्या साध्यसाहचर्यरूपसाधारणधर्मवत्ताज्ञानमात्रात्। नान्त्यः, तस्याः शङ्कायाः सर्वहेतुसाधारणत्वेन दुष्टतानापादकत्वात्। अन्यथा सद्धेतोरपि दुष्टत्वापत्तेः। न चैतद्युक्तम्; पश्चाद्विचारबलाद्धेतौ व्याप्तिमत्त्वेन निर्णीते शङ्काया अनवकाशाद्दोषस्यानित्यत्वापत्तेः। अतो दुष्टादुष्टविभागौचित्याय हेत्वाभासस्य नित्यदोषत्वाय च विपक्षबाधकाभावाधीनव्याप्यत्वासिद्धिमूलिकैव शङ्का दूषकत्वेन वाच्या। तथा च सर्वत्र साधारणधर्मवत्ताज्ञानाधीनत्वेऽपि व्यभिचारशङ्कायास्सा व्याप्त्यसिद्धिविशिष्टैवान्ततो दूषिका भवतीत्युपजीव्यत्वादसिद्धिरेव दूषणमिति। ततश्चानैकान्तिकस्य न द्वेधा विभागः, सन्दिग्धानैकान्तिकत्वस्य सद्धेतुसाधारण्यादिति निश्चितसाध्याभाववद्वृत्तिरनैकान्तिकः, व्याप्यत्वासिद्धश्चाप्रयोजक इति।

[ननु व्याप्यत्वासिद्धेर्व्याप्त्यग्रहरूपत्वे स ग्रहः किं ज्ञानसामान्यरूप उत प्रमारूपः; नाद्यः; दुष्टहेतावपि व्याप्तिभ्रमसम्भवेनाग्रहायोगात्। नान्त्यः; प्रकृतहेतुविशेष्यकप्रकृतसाध्यव्याप्तिप्रमितेर्दुष्टहेतावप्रसिद्धतया तदभावरूपव्याप्त्यग्रहस्य दुर्वचत्वात्। किं च व्याप्तिप्रमित्यभावस्य व्याप्त्यभावनिबन्धनतया व्याप्त्यभाव एव लाघवाद्व्याप्यत्वासिद्धिः। एवं पक्षाभावहेत्वभावौ पक्षासिद्धिस्वरूपासिद्धी। पक्षत्वासिद्धिस्तु पक्षतायाः स्वरूपसत्या एवापेक्षितत्वात्सुतरां

उपजीव्यत्वात्; नानैकान्तिकम्; उपजीवकत्वात्। १ अन्यथा शङ्कास्वदूषणमेव; निर्णीते तदनवकाशादिति॥

पक्षत्वाभाव एव। स च व्याप्त्यभावो व्यभिचार एव; अव्यभिचारस्य व्याप्तित्वादिति कथं व्याप्यत्वासिद्धसव्यभिचारयोर्भेदः। अपि च सोपाधिकस्यैव व्याप्यत्वासिद्धत्वात् उपाधेश्च व्यभिचारोन्नायकतयैव दूषकत्वादुपाधिना व्यभिचारज्ञानमेव जन्यते, न तु व्यभिचारविलक्षणस्य कस्यापि व्याप्त्यभावस्य ज्ञानमिति सोपाधिकस्य व्यभिचाराविशिष्ट इति चेत्—उच्यते—वस्तुतो व्याप्त्यभावो यत्र, तत्रैव वास्तवहेत्वाभासत्वम्। अथापि शाकपाकजत्वाद्युपाधिस्थले साधनाव्यापकत्वसन्देहात् व्याप्तेरिव व्यभिचारस्याप्यनिश्चितत्वाद्व्यभिचारोद्भावनायोगात् व्याप्त्यनिश्चयोद्भावनमेव कार्यम्। एवं च व्याप्त्यनिश्चयरूपव्याप्यत्वासिद्धेः पार्थक्ये स्थिते सर्वत्रोपाधिमूलदोषोद्भावनस्थले ऐकरूप्याय व्याप्त्यसिद्ध्युद्भावनमेवेष्यते; उपाधिनिश्चयाधीनव्यभिचारनिश्चयस्थलेऽपि व्याप्त्यनिश्चयस्य सत्त्वात्। यत्र तूपाधिना व्यभिचारोन्नयनं विना, इदं साध्याभाववदिति विशिष्य निश्चयपूर्वकमेव व्यभिचारग्रहणम्—यथा पर्वतो धूमवान् वह्नेरित्यादौ; तत्रायोगोलकान्तर्भावेण विशिष्य तन्निश्चयात्—तत्र सव्यभिचारत्वोद्भावनमिति। न च सव्यभिचार इत्यस्यानिश्चितव्याप्तिक इत्यर्थवर्णनेन व्याप्यत्वासिद्धिसामान्यं तत्रान्तर्भावयितुं शक्यमिति शक्यम्—एवं तर्हि विरुद्धसत्प्रतिपक्षयोरपि व्याप्त्यनिश्चयसद्भावेन सव्यभिचारान्तर्भावापत्तेः। सव्यभिचारविरुद्धसत्प्रतिपक्षमध्ये कतमस्यानिश्चितव्याप्तिकार्थत्वमिति विनिगमकाभावाच्च। तथा च यथा विरोधप्रतिपक्षनिश्चये सत्येव विरुद्धसत्प्रतिपक्षत्वे, तथा विशिष्य व्यभिचारनिश्चये सत्येव सव्यभिचारत्वमिति विविच्य व्याप्त्यनिश्चयस्यासिद्ध्यन्तर्भावस्वीकार एव युक्तः॥ एवं पक्षे हेत्वभावपक्षतावच्छेदकाभावयोरेव वास्तवदोषत्वेऽपि क्वचित्पक्षे तत्सन्देहेऽप्यनुमित्यभावादनिश्चयोद्भावनस्यावश्यकत्वात् पक्षानिश्चयहेत्वनिश्चयरूपे एव पक्षासिद्धिहेत्वसिद्धी। परं तु पक्षे हेत्वभावपक्षतावच्छेदकाभावयोर्व्यभिचारादेरिवासिद्धिपार्थक्येन सूत्रे परिगणनाभावात् तयोरप्यसिद्धावेवान्तर्भाव इष्टः॥ अत्रेदमपि भाति—असिद्धिपदेनानिश्चयमात्रग्रहणमेव युक्तम्। अत एव साध्याविशिष्टत्वात्साध्यसमत्वकथनं सूत्रे सङ्गच्छते। पक्षे हेत्वभावादेश्च साध्याभावादेरिव कालातीत एवान्तर्भावः। अत एव भाष्ये कालातीतोदाहरणम्, नित्यः शब्दः संयोगव्यङ्ग्यत्वादिति कृतं सङ्गच्छते। शब्दाभिव्यक्तिकाले भेरीदण्डसंयोगाद्यभावात् संयोगव्यङ्ग्यत्वस्य पक्षविशिष्टहेत्वभाव एव हि तत्रोच्यते। तथा च व्यभिचारस्येव हेत्वभावादेरप्यसिद्धिपार्थक्यमेवोक्तम्।

---

१. वां. अन्यथा व्याप्तिनिर्णये तु व्यभिचारशङ्कात्मकं दूषणमेव नोदेतीति। निर्णीते विषये शङ्काया निरवकाशत्वादिति॥

टिप्पणीपरिशिष्टम् ।

१८. ७. कार्यानुपलब्धीति । कार्यं चानुपलब्धिश्च कार्यानुपलब्धी । कार्यस्यानुपलब्धिः कार्यानुपलब्धिः । ते च सा च कार्यानुपलब्धयः । तद्रूपाणां लिङ्गानां मध्ये इत्यर्थः ।

२३. ६. नास्तिकैरपि तथाकरणप्रसङ्गात् सम्भोगवत् लोकव्यवहारासिद्धत्वादिति वाक्यसमाप्तिः । अथ शङ्केत अफलमपीत्यादियोजनान्तरम् ।

२९. ५. न हीति । (६९. पु) उपाधिविशिष्टाभावे उपाधिमात्रं प्रतियोगि, आत्मनो व्यापित्वात् अभावायोगात् । दण्डाभावविशिष्टपुरुषाभावे तु पुरुषोऽपि प्रतियोगी, सदण्डपुरुषभिन्नानामदण्डपुरुषाणां दण्डिमति देशेऽसत्त्वात् ।

४६. ६, निःसाधना इति । 'मीमांसानिपुणं नपुंसक'मिति रीत्या उपालम्भोऽपि स्यात् ।

५०. ३. तदीयस्वभावेति । तदिति विषयबन्धनमुच्यते, तदुपयोगिस्वभावा; 'विषयैश्चितं प्रकृतिर्बध्नातीति । पूर्वं तु तदीयस्य चैतन्यीयस्य स्वभावो यस्यास्तादृशीति व्याख्यान्तरानुरोधेन व्याख्यातम् ।

,, ४. आहत्येत्यस्य साक्षादित्यर्थं इह ग्रन्थे सर्वत्र, अन्यत्रेव प्राच्यग्रन्थेषु । तदीयः चित्सम्बन्धी ।

५१. १. उपधानायोगात्- ग्रहणस्यायुक्तत्वात् तत्प्रसङ्गादित्यर्थः; ग्रहणायोगप्रसङ्गादिति वा । व्याघ्राद्यभिमानदशायामपि नरत्वेन ग्रहणप्रसङ्गादिति भावः । कदाचिद्व्याघ्राद्यभिमानसत्त्वात् सर्वदा नरत्वेनाभिमानाभावप्रसङ्गादिति वा ।

५३. ३. अन्यथेति—अनिर्मोक्षप्रसङ्गपरिहाराय हि बुद्ध्यादिस्वीकारः, स्वीकारेऽपि तदीयतादवस्थ्यमिति ।

५४. ४. न त्विति । यावद्धर्मकं कार्यं तावद्धर्मकं कारणमिति पाठः स्यात् । अन्यथा तु तावद्धर्मकं तावन्मात्रधर्मकमित्यर्थः । विस्तरोक्तरीतिर्वा ।

७०. ५. कोष्ठगत्या—अन्तर्विवेचनेन ।

७२. ३. विरतेति । सप्तमीबहुव्रीहौ ईश्वरस्य प्रपञ्चक्षोभाश्लेषसिद्धिः ; पञ्चमीबहुव्रीहौ जीवस्य तत्क्षोभाश्लेष ईश्वराधीन इति सिद्ध्यति ।

७५. ७. शाब्दी प्रमा भावकारणसापेक्षा प्रमात्वादनुमानादिवदित्यभिसन्धायाह अनुमानादाविति । अत्राप्रयोजकं शङ्कते अन्यत्रेति । अप्रामाण्यमनुमिनोति गुणाभाव इति । अत्राप्रयोजकशङ्का अप्रामाण्यं प्रतीति । परिहरति प्रामाण्यं प्रत्यपीति ।

९८. ४. क्वचित्–भूतलं प्रत्यक्षेण गृहीत्वाऽभावानुमानस्थले अभावप्रत्यक्षस्थले च ।

१०३. १. स्पर्शादीति । एतद्वाक्यार्थः । १५३ पुटे (11) फक्किकायां विशदमवसेयः ।

१०४. ३. सामग्रीनिविष्टा–सामग्र्यन्तर्भूता सामग्रीन्यूनदेशवृत्तिस्तद्व्याप्येति यावत् ।

१११. ७. साध्यधर्मिणं साध्यं धर्मविशिष्टो धर्मीति भाष्यात् साध्यपदं विधेयविशिष्टपरम् । दृष्टान्तधर्मिव्यावृत्तये साध्येति । धर्मभूतसाध्यव्यावृत्तये धर्मीति ।

शुभमस्तु ।

[47] उपमानं तु बाधकमनाशङ्कनीयमेव, विषयानतिरेकादिति केचित् तथाहि – न तावदस्य विषयः सादृश्यव्यपदेश्यं पदार्थान्तरमेव संभावनीयम् ;

परस्परविरोधे हि न प्रकारान्तरस्थितिः ।
नैकताऽपि विरुद्धानामुक्तिमात्रविरोधतः ॥ ८ ॥

न हि भावाभावाभ्यामन्यः प्रकारस्संभावनीयः, परस्परविधिनिषेधरूपत्वात् । न भाव इति हि निषेधमात्रेणैवाभावविधिः । ततस्तं विहाय कथं स्ववचनेनैव पुनस्सहृदयो निषेधेत् ; नाभाव इति । एवं नाभाव इति हि निषेध एव भावविधिः । ततस्तं विहाय स्ववाचैवानुन्मत्तः कथं पुनर्निषेधेत्, न भाव इति ।

ईदृशी कल्पना कामं गृह्यतां त्यज्यतामपि ।
यावता ग्रन्थनिर्वाहस्तावदत्रोपयुज्यते ॥]

सर्वथाऽनुकूलतर्काभावे हेतोरकिञ्चित्करत्वेऽपि तत्सत्त्वे आशङ्कालेशस्याप्यभावादनुमानप्रामाण्यं सुष्ठु प्रतिष्ठितम् । एवमप्याश्रयासिद्ध्यादिदोषदुष्टतया न तदीश्वरविषये बाधकं भवितुमलमिति सिद्धम् ।

कुसुमाञ्जलिविस्तरे – तृतीयस्तबके

ईश्वरस्योपमानाबाध्यत्वनिरूपणम् ।

[47] उपमानस्य त्वीश्वरबाधकत्वप्रसक्तिरेव नास्ति; यदा यत् तद्ग्राह्यं, तदैव तस्य प्रमाणान्तरग्राह्यत्वसंभवेन तस्य प्रमाणान्तरत्वाभावादिति एकदेशिनः । तथाहि — उपमानं प्रमाणान्तरं वदन् मीमांसकः किं तद्विषयं सादृश्यमपि क्लृप्तप्रमेयविलक्षणं मन्यते, किंवा तस्य सप्तपदार्थ्यन्तर्गतत्वेपि प्रमाणान्तरं विनापि परिच्छेद्यत्वादुपमानप्रमाणान्तरत्वमात्रम् इति विकल्प्यते । तत्र न तावत् प्रथमः कल्पः, द्वयोर्गृह्यमाणयोर्मिथोविरोधे सति तृतीयः प्रकारो हि न स्थातुमर्हति । वस्तूनां तत्त्व तद्भिन्नत्वात्यरूपद्वयेन विभागे विधीयमाने तृतीयो विभाजको धर्मो न संभवतीति यावत् । भावाभावयोर्मध्ये एकस्वीकारस्यापरनिषेधात्मकतया एकनिषेधस्यापरविधिरूपतया च तदुभयातिरिक्तप्रकारो हि दुर्वचः । नच द्वैधमपि ।स्त्विति शंक्यम्–तत्त्व तद्भिन्नत्वाभ्यां विरुद्धयोः असंभवदेकत्वयोरेकता हि दुर्वचा; विरुद्धैकधर्मयुक्तात्वेव व्याहतिदर्शनात् । भावत्वतद्भिन्नत्वरूपयोः अस्तिनास्तीतिविधि प्रतिषेधयोरेकत्रासंभवात् । तस्मात् भावो भावभिन्नश्चेति द्विविध एव पदार्थः । तत् कथं सादृश्यस्य तदुभयविलक्ष-

अत एवंभूतानामेकताऽप्यशक्यप्रतिपत्तिः, प्रतिषेधविध्योरेकत्रा (त्वा) सम्भवात्। तस्माद्भावाभावावेव तत्त्वम् ॥

[48] भावत्वेऽपि गुणवन्निर्गुणं वेति द्वयमेव (वेत्येतदपि) पूर्ववत्। पूर्वं द्रव्यमेव। उत्तरश्चाश्रितमनाश्रितं वेति द्वयमेव पूर्ववत्। तत्रोत्तरं समवाय एव, अनवस्थाभयात्। आश्रितं तु सामान्यवन्निःसामान्यश्चेति पूर्ववद्द्वयमेव। तत्र प्रथममपि स्पन्दोऽस्पन्द इति द्वयमेव। एतच्च यथासङ्ख्यं कर्म गुण इति व्यपदिश्यते। निस्सामान्यं निर्गुणमाश्रितं तु एकाश्रितमनेकाश्रितं वेति प्रागिव द्वयमेव। एतदपि यथासंख्यं विशेषस्सामान्यश्चेत्यभिधीयते। तत्[1] एतत्सादृश्यमेतास्वेकां विधामासादयत् नातिरिच्यते। अनासादयन्न पदार्थीभूय स्थातुमुत्सहते। एतेन शक्तिसङ्ख्यादयो व्याख्याताः। ततोऽभावेन सह सप्तैव पदार्था इति नियमः। अतो नोपमानविषयोऽर्थान्तरमिति ॥

[49] स्यादेतत् — भवतु सामान्यमेव सादृश्यं, तदेव तस्य विषयस्स्यात्।

गता। न च — सादृश्यं भाव एव, अस्तीति प्रतीयमानत्वात्; अथापि षट्पदार्थ्यतिरिक्तमिति वाच्यम् — पशुरयमित्यज्ञत्वसादृश्येनापि प्रयोगात्तस्याभावरूपत्वस्याप्यावश्यकत्वात् ॥

[48] अस्तु वा भावत्वम्, अथापि भाववत्स्वपि पूर्ववत्प्रकारान्तरासंभवात् गुणवन्निर्गुणश्चेति द्विविधम्। निर्गुणमपि द्विविधमाश्रितमनाश्रितश्चेति। तत्रानाश्रितस्समवायः; तस्य किञ्चिदाश्रितत्वस्वीकारे आधाराधेयभावस्य संबन्धान्तराधीनतया समवायान्तरस्वीकारापत्तिः, तस्याप्याश्रितत्वस्वीकारे तथेत्यनवस्थाप्रसंगात्। तस्मादेवंरीत्या तत्तद्भिन्नत्वाभ्यां विभागे प्रकारान्तरासंभवात् क्वापि सादृश्यमन्तर्भवेत्। नचास्त्वन्तर्भावः एकाश्रितविभागे, एकाश्रितं द्विविधं विशेषस्सादृश्यश्चेति वाच्यम् — इमौ द्वौ तत्सदृशाविति अनेकाश्रितसादृश्यस्यापि दर्शनात्; क्लृप्तपदार्थतयैव निर्वाहेऽतिरिक्तत्वे प्रमाणाभावाच्च। तर्हि सादृश्यं कः पदार्थ इति चेत् — सामान्यम्। तच्च न जातिः; किन्तु समानयोर्भावस्सामान्यम्, एकसंबन्धिधर्मवत्त्वमपरस्य। स च धर्मो द्रव्यं गुणोऽन्यद्वा यथायथं भवितुमर्हतीति ॥ एवं शक्तिसंख्यादीनां सर्वपदार्थवृत्तितया द्रव्यगुणादिसर्वविलक्षणत्वमिति पक्षा अपि निरस्ता भवन्ति, तृतीयप्रकारायोगात्। अतः कणादेन प्रथमं निर्दिष्टाष्षट्[2] नवमाध्याये दर्शितोऽभावश्चेति सप्तैव पदार्थाः। तस्मात्सादृश्यं सर्वातिरिक्तमिति प्राभाकराभिमतः प्रथमः कल्पो न घटते ॥

[49] स्यादेतत्। प्रमेयस्यानतिरिक्तत्वेपि मानान्तरनिरपेक्षं परिच्छेद्यत्वादुपमानमतिरिक्तमिति द्वितीयः कल्पोऽस्तु। तच्च सादृश्यज्ञानमिन्द्रियसन्निकृष्टविशेष्यकमसन्निकृष्टविशेष्यकश्चेति द्विविधम्, यथा गोसदृशोऽयं गवय इति, एतत्सदृशस्स गौरिति च। तत्र प्रथममपि ज्ञानं

१. तत् तस्मात्। २. प्र०. 'षट्पदार्थानतिरेकेणेत्यर्थः' इति।

तत्स (गोस) दृशोऽयमिति हि प्रत्ययो नेन्द्रियजन्यः, तदापातमात्रेणानुत्पत्तेरिति चेत् — न — पूर्वपिण्डानुसन्धानरूपसहकारिवैधुर्येणानुत्पत्तेः (ण प्रागजननात् सोऽयमिति प्रत्यभिज्ञानवदिति ॥

[50] नन्वेतत्सदृशस्स इति नेन्द्रियजन्यम्, तेन तस्यासंबन्धात्। नचेदं स्मरणम्, तत्पिण्डानुभवेऽपि विशिष्टस्याननुभवात्। नचैतदपि, अयं स इति विपरीतप्रत्यभिज्ञानवदुपपादनीयम्; तत्तेदन्तोपस्थापनक्रमाविपर्ययेऽपि विशेष्यस्येन्द्रियेण सन्निकर्षाविरोधात्; तस्य सन्निहितवर्तमानगोचरत्वात्। प्रकृते तु तदभावात्। तस्मात् तत्पिण्डस्मरणसहायमेतत्पिण्डवर्तिसादृश्यज्ञानमेव तथाविधं ज्ञानमुत्पादयदुपमानं प्रमाणमिति ॥

[51] एतदपि नास्ति — साधर्म्यमिव वैधर्म्यं मानमेवं प्रसज्यते।
अर्थापत्तिरसौ व्यक्तमिति चेत् प्रकृतं न किम् ॥ ९ ॥

यदा हि एतद्विसदृशोऽसौ इति प्रत्येति, तत्रापि तुल्यमेतत्। न हि तत् प्रत्य-

---

क्षस्मृतिविलक्षणमेव। नहि तत् इन्द्रियसन्निकर्षजन्यप्रत्यक्षरूपम् — चाक्षुषरश्मिनिपातमात्रेणानुत्पद्यमानत्वात् — इति चेन्न — तस्य प्रत्यक्षत्वसंभवात्। सन्निकर्षमात्रेणानुत्पत्तिस्तु सोऽयं देवदत्त इति प्रत्यभिज्ञाप्रत्यक्षस्येव गोपिण्डरूपपूर्वगृहीतांशस्मरणात्मकसहकारिविरहादुपपद्यते।

[50] तर्हि द्वितीयं ज्ञानमुपमितिरस्तु। इदमेव च मीमांसकाभिमतम्। ग्रामीणस्य गवयं पश्यतः, गोसदृशोऽयमिति प्रथमं ज्ञानमुपमितिकरणम्; ततो जातं एतत्सदृशो गौरिति ज्ञानमुपमितिरिति। इयञ्चोपमितिर्नेन्द्रियजन्या; इन्द्रियेण गोरसंबन्धात्। प्रत्यक्षस्य सन्निकृष्टमुख्यविशेष्यकत्वात्। नचेदं पूर्वानुभूतस्मरणमात्रम्, गोपिण्डमात्रस्य प्रागनुभूतत्वेऽपि गवयसादृश्यविशिष्टस्याननुभूतत्वात्। नच यथा गोसदृशोयमिति ज्ञानं सोऽयमितीदमर्थविशेष्यकप्रत्यभिज्ञातुल्यम्, तथा एतत्सदृशस्स इत्येतदपि अयं स इति तदर्थविशेष्यकप्रत्यभिज्ञातुल्यमिति प्रत्यक्षरूपमेवेति वाच्यम् — वैषम्यात्। प्रत्यभिज्ञायां तद्देशकालवर्तित्वरूपायास्तत्तायाः एतद्देशकालवर्तित्वरूपाया इदन्तायाश्चैकनिष्ठत्वादिदमर्थतदर्थयोरभिन्नत्वात्सन्निकृष्टविशेष्यकत्वनियमाभङ्गेन प्रत्यक्षत्वसंभवात्; प्रत्यक्षस्य सन्निकृष्टवर्तमानविशेष्यकत्वात्, प्रकृते च गोरसन्निकृष्टत्वात्, वर्तमानत्वस्य च संदिग्धत्वात्। अतः प्रत्यक्षेणानिर्वाहात् गोसदृशोऽयमिति गवयवर्तिसादृश्यप्रत्यक्षं गोपिण्डस्मरणसहकृतं एतत्सदृशस्स इति विलक्षणामुपमितिं जनयतीत्युपमानमतिरिक्तं प्रमाणमेवेति ॥

[51] एतदपि नास्ति; एवं साधर्म्यस्य प्रमाणान्तरत्वे वैधर्म्याख्यस्य सप्तमप्रमाणस्य तुल्यन्यायेनापत्तेः। तद्विसदृशोऽयमिति ज्ञानानन्तरभाविनः एतद्विसदृशस्स इति ज्ञानस्य पूर्ववत्प्रत्यक्षत्वस्मरणत्वयोरसंभवात्। नापि तत् प्रकृतमुपमानम्। तस्य सादृश्यग्राहकत्वेन वैधर्म्याग्राहि-

क्षम्, असन्निकृष्टविषयत्वात्। न स्मरणम्, विशिष्टस्याननुभवात्। नोपमानम् असादृश्यविषयत्वात्। ननु–एतद्धर्माभावविशिष्टत्वमेव तस्य वैधर्म्यं, तच्चाभावगम्यमेवेष्यते। न च प्रकृतेऽपि तथाऽस्तु, सादृश्यस्य भावरूपत्वादिति चेत् — न — इतो व्यावृत्तधर्मविशिष्टतया अपि वैधर्म्यरूपत्वात्; तस्य च भावरूपत्वात्॥ स्यादेतत् — तद्धर्मा इह न सन्तीत्यवगते, अर्थादापद्यते— इहाविद्यमानास्तत्र सन्तीति। न हि तद्विधर्मत्वमेतस्योपपद्यते, यद्येतद्विधर्माऽसौ न भवति इति चेत्— एवं तर्हि प्रकृतमप्यर्थापत्तिरेव। न हि तत्सादृश्यविशिष्टत्वमेतस्य प्रत्यक्षसिद्धमपि तस्यैतत्सादृश्यविशिष्टत्वं विनोपपद्यते॥

[52] एतेन दृष्टासन्निकृष्टप्रत्यभिज्ञानं व्याख्यातम्। तत्रापि तद्धर्मशालित्वं तस्य स्मरणाभिव्यक्तमनुपपद्यमानं तदिदन्तास्पदस्यैकतां व्यवस्थापयति॥ तस्मान्नोपमानमधिकमिति॥

णोऽस्य तदन्तर्भावायोगात्। ननु तद्वैधर्म्यमेतद्वृत्तिधर्माभावः; सचाभावत्वादनुपलब्धिरूपाभावाख्यप्रमाणगम्यः। प्रकृतं तु सादृश्यं भावरूपत्वान्न तथेति चेन्न – एतद्वैधर्म्यस्य एतदवृत्तिधर्मवत्त्वरूपतया निर्वचनसंभवात्तस्य च सादृश्यवत् भावरूपतयाऽनुपलब्ध्याऽनिर्वाहात्॥ यदीह तद्विधर्माऽयमिति प्रत्यक्षे सति एतद्वैधर्म्यस्य तत्राभावे तद्वैधर्म्यस्यात्रानुपपन्नतया एतद्विधर्मा स इति प्रमितिरसौ अर्थापत्तिरेवेति मन्यते – तर्हि प्रकृतमेतत्सदृशस्स इति ज्ञानमपि कुतोऽर्थापत्तिर्न भवेत्; तस्यैतत्सादृश्याभावे तत्सादृश्यस्यात्र प्रत्यक्षितस्यानुपपन्नत्वात्॥

[52] एतेन वैधर्म्यप्रमाणान्तरापादनेन प्रत्यभिज्ञानविशेषोपि व्याख्यातः। इत्थमर्थापत्तिगम्यस्थलेपि प्रमाणान्तरस्वीकारे हि प्रत्यभिज्ञाविशेषेपि प्रमाणान्तरस्वीकारस्स्यात्। यद्यपि सोऽयमिति, अयं स इति च प्रत्यभिज्ञा प्रत्यक्षरूपैव निरूढा; अथापि यत्र पूर्वदृष्टस्य पुनर्दर्शनकाले पूर्वानुभूतस्मरणादर्वागेव स इन्द्रियासन्निकृष्ट आसीत्, तत्र तदनन्तरमेवानुभूतचरस्मरणबलात् सएवायं संप्रति दृष्ट इति प्रत्यभिज्ञा जायते; तस्य प्रत्यक्षत्वायोगात् अगृहीतैक्यविषयकतया स्मरणत्वस्याप्यसंभवात् साधर्म्यवैधर्म्याविषयकतया प्रकृतप्रमाणतोऽप्यनिर्वाहात् प्रमाणान्तरापत्तिः। अतस्तत्र पूर्वदेशकालसंबन्धरूपधर्मशालित्वं तस्मिन् दृष्टे स्मर्यमाणं तदिदमर्थयोरैक्याभावे नोपपद्यत इत्यर्थापत्तिरूपमेव सोऽयमिति ज्ञानमिति वक्तव्यम्। तस्मात्तथैवार्थापत्त्या प्रकृतेपि निर्वाहान्नोपमानमतिरिक्तमिति। एवं तावत् गुरुभट्टमतनिरसनेन **विषयानतिरेकादुपमानं तु बाधकमनाशङ्कनीयमेवेति** केचिदाहुः –

---

१. प्र. 'ननु प्रत्यभिज्ञायमानस्य मध्यकालावस्थानं नाध्यक्षलिङ्गादिगम्यमिति तदुपमानपरिच्छेद्यं स्यादित्यत आह **एतेनेति**' इति। परन्वत्र सादृश्याभानात्कथमुपमानत्वशंका? बोधन्यां नावतारितमिदं वाक्यम्। बो. 'एतेनेति। यः पूर्वं मथुरायां दृष्टस्स एव पश्चादुज्जयिन्यां दृष्ट इति प्रत्यभिज्ञानं, अयं स इति विपरीतप्रत्यभिज्ञानं वे' ति।

[53] एवं प्राप्तेऽभिधीयते—संबन्धस्य परिच्छेदः (दं?) संज्ञायास्संज्ञिना सह ।
प्रत्यक्षादेरसाध्यत्वादुपमानफलं विदुः ॥ १८॥

यथा गौस्तथा गवय इति श्रुतातिदेशवाक्यस्य, गोसदृशं पिण्डमनुभवतः, स्मरतश्च वाक्यार्थं अयमसौ गवयशब्दवाच्य इति भवति मतिः । सेयं न तावत् वाक्यमात्रफलम् , अनुपलब्धपिण्डस्यापि प्रसङ्गात् । नापि प्रत्यक्षफलम् , अश्रुतवाक्यस्यापि प्रसङ्गात् । नापि समाहारफलम् , वाक्यप्रत्यक्षयोर्भिन्नकालत्वात् । वाक्यतदर्थयोः स्मृतिद्वारोपनीतावपि गवयपिण्डसंबद्धेनापीन्द्रियेण तद्गतसादृश्यानुपलम्भे समयपरिच्छेदासिद्धेः । फलसमाहारे तु तदन्तर्भावे अनुमानादेरपि प्रत्यक्षत्वप्रसङ्गः ॥ तत् किं तत्फलस्य तत्प्रमाणबहिर्भाव एव ? अन्तर्भावे वा कियती सीमा ? – तत्तदसाधारणेन्द्रियादिसाहित्यम् ॥ अस्ति तर्हि सादृश्यादिज्ञानकाले

---

[53] एवं प्राप्तेऽभिधीयते – न ब्रूमस्सादृश्यज्ञानमुपमितिरिति । किंतु वाचकस्य वाच्येनार्थेन सह यस्संबन्धस्समयनामा तस्य निर्णयः प्रत्यक्षादिमानान्तराजन्यत्वादुपमानरूपातिरिक्तप्रमाणफलमिति विदुः प्रमाणविदः । गोसदृशो गवय इत्यतिदेशवाक्यं श्रुतवतस्तादृशं तमरण्ये पश्यतोऽतिदेशवाक्यार्थमनुभूतं स्मरतः पुंसः अयमसौ गवयदवाच्य इति मतिर्भवतीतीदं दुरपलपम् । अयमिति गवयसामान्यमुच्यते । असाविति अतिदेशवाक्यश्रुतत्वप्रदर्शनम् । यद्वा अयमिति प्रत्यक्षव्यक्तिः; असाविति गवयत्वाक्रान्तसर्वक्रोडीकारः । तत्र वाच्यवाचकभावज्ञानरूपोपमितिकरणस्य सादृश्यज्ञानरूपत्वादुपमानत्वम् । तज्जन्यत्वाच्च शक्तिज्ञानस्योपमितित्वेन व्यवहारः । नन्वत्रातिदेशवाक्यस्येन्द्रियसन्निकर्षस्य चापेक्षितत्वात्कथं प्रमाणान्तरेणानिर्वाह इति चेत् – उच्यते – न तावदियं शक्तिप्रमितिर्वाक्यमात्रजन्या, तथासति गवयमनुपलब्धवतोपि तत्प्रसंगात् । नापि वाक्येन्द्रियसन्निकर्षसमुच्चयजन्या, पूर्वोत्पन्नविनष्टस्य वाक्यस्यारण्यभाविसन्निकर्षेण मेलनायोगात् । यद्यपि वाक्यस्य स्वरूपतः कार्यकरत्वाभावेन ज्ञानद्वारैव कारणत्वं वाच्यमिति सन्निकर्षेण सह वाक्यस्मृतेस्तदर्थस्मृतेश्च समाहारस्सुवचः, अथापि न तावन्मात्रजन्योऽयं समयपरिच्छेदः, गवयदर्शनेपि तद्गतगोसादृश्यानुपलम्भेऽनुत्पद्यमानत्वात् । अथ चेत् वाक्यसन्निकर्षफलयोर्वाक्यार्थस्मृतिसादृश्योपलम्भयोस्समाहारजन्यस्स इत्युच्यते, तावता कथं तस्य शाब्दबोधे प्रत्यक्षे वाऽन्तर्भावः ? प्रत्यक्षज्ञानजन्यस्यापि प्रत्यक्षेऽन्तर्भावे ह्यनुमानादेरपि हेतुप्रत्यक्षशब्दप्रत्यक्षाद्यधीनत्वात्प्रत्यक्षत्वप्रसंगः ॥ तर्हि किं तज्जन्यस्य तत्प्रमितिविभागाद्बहिर्भाव एव ? तथासति निर्विकल्पप्रत्यक्षजन्यत्वात्सविकल्पस्य प्रत्यक्षत्वं न भवेत् । एतद्दोषपरिहाराय तत्फलस्यापि तत्रान्तर्भावेऽनुमित्यादेरपि प्रत्यक्षत्वापत्तिरस्त्येव । तत् कीदृशसीमकल्पनं शक्यम् , येन क्वचित्तत्रान्तर्भावः, अन्यत्र बहिर्भावश्च सुवचस्स्यादिति चेत् —

---

१. 'अस्य प्रथमान्तत्वात् प्र.' फलं विदुरित्यनयोर्मध्ये इतिरध्याहार्य इति संप्रदायविदः' इति ।

विस्फारितस्य चक्षुषो व्यापारः — न - उपलब्धगोसादृश्यविशिष्टगवयपिण्डस्य वाक्यतदर्थस्मृतिमतः कालान्तरेऽप्यनुसन्धानबलात् समयपरिच्छेदोपपत्तेः ॥

[54] ननु च वाक्यादेवानेन समयः परिच्छिन्नः, गोसदृशस्य गवयशब्दस्संज्ञेति । केवलमिदानीं प्रत्यभिजानाति अयमसाविति । प्रयोगाद्वाऽनुमितः, यो यत्रासति वृत्त्यन्तरे वृद्धैः प्रयुज्यते, स तस्य वाचकः, यथा गोशब्द एव गोः; प्रयुज्यते चायं गोसदृशे इति किमुपमानेनेति — न —

साहश्यस्यानिमित्तत्वान्निमित्तस्याप्रतीतितः ।
समयो दुर्ग्रहः पूर्वं शब्देनानुमयाऽपि वा ॥ ११ ॥

न हि गवयशब्दस्य सादृश्यं प्रवृत्तिनिमित्तम्, अप्रतीतगूनामव्यवहारप्रसङ्गात् । नचोभयमपि निमित्तम्, स्वयंप्रतीतसमयसंक्रान्तयेऽतिदेशवाक्यप्रयोगानुपपत्तेः । गवयत्वे ह्ययं व्युत्पन्नो वृद्धव्यवहारात्, न सादृश्ये ॥ कथमेतन्निर्धारणीयमिति चेत् — वस्तुगतिस्तावदियं, तदापाततस्सन्देहेऽपि न फलसिद्धिः; ग-

---

इन्द्रियसन्निकर्षादितत्तत्प्रमित्यसाधारणकारणसाहित्यमेव सीमा, यावत्सन्निकर्षोऽस्ति, तावत्तत्रान्तर्भवति । अस्ति हि सविकल्पात्प्रागपि तत्र सन्निकर्षः । ननु तर्ह्ययं गवयपदवाच्य इत्यपि प्रत्यक्षमेव, सादृश्योपलम्भायोन्मीलितचक्षुस्सन्निकर्षसत्त्वादिति चेन्न— गवयपदवाच्यत्वज्ञानकाले सर्वदा सन्निकर्षोपपादनासंभवात् । अयं गवयपदवाच्य इतिवत् पश्चादुत्पन्नातिदेशवाक्यार्थस्मृतिसाहाय्येन असौ गवयपदवाच्य इत्यपि समयपरिच्छेदसंभवात् । अतस्सन्निकर्षं विनापि भवतो न सन्निकर्षनियतप्रत्यक्षरूपत्वम् ॥

[54] अत्र काणादाः — नोपमानमतिरिक्तम्, अयं गवयपदवाच्य इति ज्ञानस्यानुभूतप्रत्यभिज्ञारूपत्वात् । कथं गवयपदवाच्यत्वानुभव इति चेत् — प्रागेव, वाक्यादनुमानाद्वा । गोसदृशो गवय इत्यतिदेशवाक्यस्य हि गोसदृशो गवयपदवाच्य इत्यर्थः । अनुमानञ्च — अयं गवयशब्दो गोसदृशवाची असति लक्षणादिवृत्त्यन्तरे प्राज्ञैर्गोसदृशे प्रयुज्यमानत्वादिति; गवि गोशब्दवदिति सामान्यमुखी व्याप्तिरिति ॥ तन्न युक्तम्-गोसादृश्यस्य प्रवृत्तिनिमित्तत्वाभावात् गवयत्वरूपप्रवृत्तिनिमित्तस्य प्रागदृष्टत्वाच्छब्देनानुमानेन वा समयस्य दुर्ग्रहत्वात् । गोसादृश्यस्य प्रवृत्तिनिमित्तत्वे तु गामप्रतीतवतां गवयमात्रं जानतां गवयव्यवहारो न स्यात् । तदर्थं गवयत्वस्यापि प्रवृत्तिनिमित्तत्वेऽनेकशक्तिकल्पनादोषस्स्पष्टः । अन्यदपि श्रूयताम् । वृद्धव्यवहाराद्गवयत्वे व्युत्पन्नेन पुंसा स्वप्रतीतशक्तिग्राहणायातिदेशवाक्यं प्रयुज्यते । तन्नोपपद्येत ॥ अतिदेशवाक्यप्रयोक्ता गवयत्वे व्युत्पन्न इति कुतोऽवधारितमिति चेत् — वस्तुस्थितिस्तावदियम्; अप्रतीतगुनाऽपि तेन प्रागगवयव्यवहारस्य वर्तितत्वात् । तत्र ते विस्रम्भाभावात्संदेहेपि गोसादृश्यप्रवृत्तिनिमित्तकत्वनिश्चयरूपफलासिद्धिरेव । अन्ततो यथा का पृथिवीत्यत्र गन्धवती

न्धवत्त्वमिव पृथिवीत्वस्य, गोसादृश्यं गवयशब्दप्रवृत्तिनिमित्तस्योपलक्षणम्, इदमेव वा निमित्तमित्यनिर्धारणात् ॥

[55] स्यादेतत् – पूर्वं निमित्तानुपलब्धेर्न फलसिद्धिः; इदानीन्तु तस्मिन्नुपलब्धे तदेव वाक्यं स्मृतिसमारूढं फलिष्यति, अध्ययनसमयगृहीत इव वेदराशिरङ्गोपाङ्गपर्यवदातस्य कालान्तरे। न च वाच्यं, वाक्येन स्वार्थस्य प्रागेव बोधितत्वात् प्रागेव पर्यवसितमिति – गोसादृश्यस्योपलक्षणनिमित्तत्वयोरन्यतरत्र तात्पर्ये सन्देहात्। इदानीन्तु गवयत्वेऽवगते तर्कपुरस्कारात्सादृश्यस्योपलक्षणतायां व्यवस्थितायां, गङ्गायां घोष इतिवदन्वयप्रतिपत्तिरिति चेत् — न —

श्रुतान्वयादनाकाङ्क्षं न वाक्यं ह्यन्यदिच्छति ।
पदार्थान्वयवैधुर्यात्तदाक्षिप्तेन सङ्गतिः ॥ १२ ॥

गोसदृशो गवयशब्दवाच्य इति सामानाधिकरण्यमात्रेणान्वयोपपत्तौ विशेषसन्देहेऽपि वाक्यस्य पर्यवसितत्वेन मानान्तरोपनीतानपेक्षणात्, रक्तारक्तसन्देहेऽपि घटो भवतीति वाक्यवत्। अन्यथा वाक्यभेददोषात्। न च गङ्गायां घोष इतिवत् पदार्था एवान्वयायोग्याः, येन प्रमाणान्तरोपनीतेनाऽन्वयस्स्यात्। अथ

पृथिवीति प्रयोगे सत्यपि प्रवृत्तिनिमित्तस्य पृथिवीत्वस्य गन्धवत्त्वं ज्ञापकम्, न तु स्वयं प्रवृत्तिनिमित्तम्, तथात्र गोसदृशो गवय इति प्रयोगेपीति वा, किंवा सादृश्यमेव निमित्तमित्यन्यतरपक्षानिर्धारणस्यावर्जनीयत्वात्। अतो गोसादृश्यप्रवृत्तिनिमित्तकत्वानिश्चयात् गवयत्वप्रवृत्तिनिमित्तस्य च दुर्ग्रहत्वान्नान्यथोपपत्तिरिति ॥

[55] नन्वधीतो वेदोऽङ्गोपाङ्गसंपन्नज्ञानस्य पश्चात्स्मर्यमाणो यथा अर्थनिर्णयजनकः, यथा च गङ्गायां घोष इति वाक्यं पूर्वं तीरतात्पर्यानवधारणादजनितबोधं पश्चादन्वयबोधकम्, तथाऽतिदेशवाक्यं पूर्वं गवयत्वस्यानुपलब्धत्वाद्गोसादृश्यस्यचोक्तरीत्या निमित्तत्वसंदेहेन वक्तृतात्पर्यानिर्णयाच्चाजनितबोधं पश्चाद्गवयत्वोपलंभे सति लाघवादितर्कबलात्सादृश्यस्योपलक्षकत्वव्यवस्थायां जातायां गवयशब्दवाच्यत्वबोधजनकं भवतीति समयपरिच्छेदश्शब्दप्रमाणक एवास्त्विति चेन्न -- वैषम्यात्। वाक्यं हि श्रुतानामर्थानामितरनिरपेक्षमेवान्वितत्वे तदनन्तरसंभवदनेकसंदेहनिवारणोपायं स्वयं बोधजननाय नापेक्षते, यथा घटो भवतीति वाक्यं रक्तरूपार्थनिरपेक्षमेव पदार्थान्वयनिष्पत्त्या रक्तारक्तसंदेहनिवारकलाभपर्यन्तं न विलम्बते। अन्यथा काळभेदपुरुषभेदभवद्विविधविशयवारकरूपपरिमाणाद्यर्थान्वयभेदादनेकार्थबोधकतया घटो भवतीति वाक्यस्यैकस्यापि नानावाक्यत्वापत्तेः। पदार्थान्वयस्यैवासंभवस्थले तु किञ्चित्पदवाच्यार्थाक्षिप्तेन लक्ष्यार्थेन सहान्वयो वाक्याधीन एव। तथाच गङ्गापदार्थप्रवाहस्य घोषानन्वितत्वात् तीरतात्पर्या-

१. वाक्येन पर्यवसितमिति भावेप्रयोगः । २. बोधन्यनुसारे अथेत्यस्ति ।

प्रतीतवाक्यार्थबलायातोऽप्यर्थो यदि वाक्यस्यैव, दिवाभोजननिषेधवाक्यस्यापि रात्रिभोजनमर्थस्स्यात् । तस्माद्यथा गवयशब्दः कस्यचिद्वाचकः शिष्टप्रयोगादिति सामान्यतो निश्चितेऽपि, विशेषे मानान्तरापेक्षा, तथा गोसदृशस्य गवयशब्दो वाचक इति वाक्यान्निश्चितेपि सामान्ये, विशेषवाचकत्वेऽस्य मानान्तरमनुसरणीयमिति॥

[56] अस्त्वनुमानम् । तथाहि – गवयशब्दो गवयस्य वाचकः असति वृत्त्यन्तरेऽभियुक्तैस्तत्र प्रयुज्यमानत्वत्, गवि गोशब्दवदिति चेत् - न - असिद्धेः । न ह्यसति वृत्त्यन्तरे तद्विषयतया प्रयोगस्सङ्गतिमविज्ञाय ज्ञातुं शक्यते ॥ सामानाधिकरण्यादिति चेन्न–पिण्डमात्रे सिद्धसाधनात्, निमित्ते चासिद्धेः; सादृश्यस्यानिमित्तत्वादित्युक्तम् ॥

[57] ननु व्याप्तिपरमिदं वाक्यं स्यात्, यो गोसदृशः स गवयपदार्थ इति ।

वधारणानन्तरमेव बोधः । अत्र तु गोसादृश्यस्योपलक्षणत्वप्रवृत्तिनिमित्तत्वसंदेहेप्यन्ततो गोसादृश्याश्रये गवयपदवाच्यत्वस्यैवातिदेशवाक्यबोधनीयत्वात्तस्य वेदाध्ययनकाल इव पुंसोऽव्युत्पन्नत्वाभावात् प्रागेव संभव इति । यदि वाक्यार्थप्रत्ययानन्तराभ्यूहितार्थेष्वपि वाक्यस्य बोधजनकता, तर्हि दिवा न भुङ्क्ते इति वाक्यात् रात्रौ भुङ्क्ते इति बोधापत्तिः । तस्माच्छिष्टप्रयोगादेव साधुत्वावधारणाद्गवयशब्दस्य किञ्चिद्वाचकत्वसिद्धावपि यथा विशेषनिश्चयायातिदेशवाक्यापेक्षा, तथाऽतिदेशवाक्याद्गोसदृशवाचकत्वनिश्चयेपि गवयत्वप्रवृत्तिनिमित्तकत्वरूपविशेषनिश्चयायोपमानप्रमाणापेक्षेति ॥

[56] एवं गवयस्य गवयपदवाच्यत्वज्ञानं शाब्दबोधरूपं न भवतीत्युक्तम् । तथा गवयशब्दे गोसदृशवाचकत्वानुमानमपि न भवति सादृश्यस्यानिमित्तत्वादित्युक्तमेव । अथापि गवयशब्दो गवयवाचक इत्येव पूर्वोक्तहेतुनाऽनुमीयत इति चेत् – तत्रासति वृत्त्यन्तरे वृद्धैस्तत्र प्रयुज्यमानत्वादिति हेतुरेवासिद्धः, शक्तिग्रहाभावे शक्यसंबन्धरूपवृत्त्यन्तरस्याप्यगृहीततया 'असति वृत्त्यन्तर' इति ग्रहणायोगात्, गवयस्यागृहीतत्वाद्गवये प्रयुज्यमानत्वांशस्य दुर्ग्रहत्वाच्च ॥ गोसदृशो गवय इति समानाधिकरणनिर्देशात्संगतिर्ज्ञातेति चेन्न–तत्र गवयपदस्य गवयपदवाच्यत्वार्थकत्वाद्गोसदृशपदबलात्पिण्डमात्रे शक्तिग्रहो भवतीति तावत एव 'गवये प्रयुज्यमानत्वा' दित्यनेन विवक्षितत्वे गवयवाचकत्वरूपसाध्यपदेनापि तावदेव विवक्षणीयमिति सिद्धसाधनम्, तस्यार्थस्यानुमानं विनाऽतिदेशवाक्यादेवावगतत्वात् । गवयत्वावच्छिन्ने संगतिस्तु न सामानाधिकरण्येन सिध्यति । गवयत्वावच्छिन्ने प्रयुज्यमानत्वस्य हेतुत्वे च हेतुरप्यसिद्धः । सामाधिकरण्यबलात्सादृश्यावच्छिन्नवाचित्वं तु न संभवति । तथा तत्र प्रयुज्यमानत्वं हेतुरपि न भवति सादृश्यस्यानिमित्तत्वादित्युक्तम् ॥

[57] नन्वन्यदनुमानमुच्यते । अयमसौ गवयपदवाच्य इत्युपमितित्वेनोच्यमानाऽनुमिति-

तथाच वाक्यादवगतप्रतिबन्धोऽनुमिनुयात्—अयमसौ गवयो गोसदृशत्वादतिदेशवाक्यावगतपिण्डवदिति – न · विपर्ययात् । न हि गोसदृशं बुद्धावारोप्यानेन पृष्टः, स किंशब्दवाच्य इति । किन्तु सामान्यतो गवयपदार्थमवगम्य स कीदृगिति । तथाच यद्योगप्राथम्याभ्यां तस्यैव व्याप्यत्वम् । ततः किं तेन, प्रकृतानुपयोगात् ॥

[58] अथ[1] किंलक्षणकोऽसाविति प्रश्नार्थः । तदा व्यतिरेकिपरं[2] स्यात्, लक्षणस्य तथाभावात् । तथाच गोसदृशो गवय इत्यस्यार्थः – यो गवय इति न व्यवह्रियते नाऽसौ गोसदृश इति । एवञ्च प्रयोक्तव्यम् – अयमसौ गवय इति व्यवहर्तव्यः गोसदृशत्वात्, यस्तु न तथा, नासौ गोसदृशः यथा हस्ती । न च

रेव । तत्र ततः प्राक्सन्निकर्षदृष्टं गोसादृश्यं हेतुः । गोसादृश्ये गवयपदवाच्यत्वनिरूपितव्याप्तिग्रहार्थमेव च प्रागतिदेशवाक्यं प्रयुक्तम् । गोसदृशो गवयपदार्थ इति वाक्यं हि गोसदृशोद्देशेन गवयपदवाच्यत्वं विदधत् उद्देश्यतावच्छेदकव्यापकत्वं विधेयेऽवगमयति, धूमवानग्निमानिति वाक्यवदिति चेत् — न - विपर्ययात् । ज्ञातं ह्युद्देश्यम्; अज्ञातं विधेयम् । को गवयपदार्थ इति प्रश्नसमाधानं हि गोसदृशो गवयपदार्थ इति । तथाच यो गवयपदार्थस्स गोसदृश इति यच्छब्दयोगबलात् प्रथमावगतत्वाद्गवयपदार्थत्वं व्याप्यम्; गोसादृश्यञ्च व्यापकमेवेति न तेन प्रकृतानुमानापेक्षितलाभः । यदाहुः – 'यद्वृत्तयोगः प्राथम्यमित्याद्युद्देश्यलक्षणम् । तद्वृत्तमेवकारश्च स्यादुपादेयलक्षणम्' (मी० श्लो० वा०) इति । (ननु का पृथिवीति प्रश्ने या गन्धवतीत्युत्तरं दीयते । वदन्ति च या गन्धवती तां पृथिवीं विद्धीति । तस्माद्यद्योगाद्गन्धवतीमुद्दिश्यैव पृथिवीत्वं विधीयते, तथा प्रकृतेपीति चेन्न – तत्र सत्यपि यद्योगे गन्धवत्त्वस्य विधेयत्वात् । का पृथिवीति किंशब्दस्य जिज्ञासितपरत्वात् गन्धवतीपदस्य च जिज्ञासितार्थसमर्पकत्वाज्जिज्ञासितस्यैव विधातुमुचितत्वात् । तथाच तां पृथिवीं विद्धीत्यस्य पृथिवीं तत्त्वेन विद्धीत्यर्थः । एवञ्च यच्छब्दः पृथिव्यन्वितत्वेन गन्धवत्त्वज्ञानाभावेपि तथाविधज्ञानात्प्राक् तस्यापि ज्ञेयत्वादुपपन्नः ॥)

[58] अथातिदेशवाक्यस्यायं गवयपदवाच्यो गोसदृशत्वादित्यनुमानोपयोगित्वमस्ति; को गवयपदार्थ इति प्रश्नस्य किंलक्षणकोऽसावित्यर्थकतया गोसादृश्यलक्षण इत्यतिदेशवाक्येन बोधनात् गन्धवती पृथिवीत्यादौ च लक्षणप्रश्नोत्तरत्वस्य, लक्षणस्य हेतुतायाश्च दृष्टत्वादिति चेत् – तदा वाक्यमिदं लक्षणवचनमुखेन व्यतिरेकिहेतुपरमेव स्यात्, नान्वयिपरम्, लक्षणानामितरव्यावृत्तिसाधकत्वे व्यवहर्तव्यतासाधकत्वे वा व्यतिरेकिताया एव भावात् । एवञ्च हस्त्यादिर्व्यतिरेकदृष्टान्तो वाच्यः । तच्च न भवति, तत्र गवयपदवाच्यत्वसामान्याभावस्यासि-

---

१. शंकते अथेति । परिहारमारभते तदेति । परिहरति नचेति । २. अयं क. २ पाठः । प्र. व्यतिरेकिरूपलक्षणपरत्वं स्यात्' इति । पा० व्यतिरेकपरं ।

हस्त्यादीनां विपक्षत्वे प्रमाणमस्ति, सर्वाप्रयोगस्य दुरवधार (ण) त्वात् ; कतिपयाव्यवहारस्य चानैकान्तिकत्वात् ॥

[59] ननु लिङ्गमात्रे प्रश्नो भविष्यति, कीदृक् किं लिङ्गमिति - न - न ह्यनेन लिङ्गमविज्ञाय गवयशब्दस्य वाचकत्वं कस्यचिद्वाच्यत्वं वाऽवगतम्, येन तदर्थं प्रश्नस्स्यात्॥ प्रवृत्तिनिमित्तविशेषलिङ्गे प्रश्नः, येन निमित्तेन गवयशब्दः प्रवर्तते तस्य किं लिङ्गमिति चेन्न – न हि तदवश्यमनुमेयमेवेत्यनेन निश्चितम्, यत इदं स्यात् ॥ ज्ञानोपायमात्रप्रश्ने तद्विशेषेणोत्तरमिति चेन्न— अविशेषादिन्द्रियसन्निकर्षमप्युत्तरयेन् ; पर्यायान्तरं वा । यथा– गवयमहं कथं जानीयामिति प्रश्ने, वनं

द्भत्वात् । नहि कोपि हस्त्यादौ गवयपदं न प्रयुङ्क्त इति सुनिश्चयम् ; पदस्यानेकार्थकत्वसंभवाच्च । कतिपयैरप्रयुज्यमानत्वमात्रेण गवयपदवाच्यत्वविशेषाभावश्च गवय एव वर्तमानत्वात् गोसादृश्याभावव्यभिचारी । नच तर्हि सर्वत्र लक्षणेन व्यवहारसाधनमशक्यमिति शंक्यम् – इयं पृथिवीत्वनिमित्तकतया पृथिवीपदवाच्या गन्धवत्त्वादिति हि सर्वत्रानुमानप्रकारः । नच प्रकृते तथा गवयत्वनिमित्तकतया गवयपदवाच्यत्वं सुसाधम् ; अतिदेशवाक्येन सामान्यतो गवयपदार्थस्यैव गोसादृश्यलक्षणकथनात् ; गवयत्वस्य प्रागगृहीतत्वेन तन्निमित्तकवाच्यतावन्तं मनसिकृत्य लक्षणप्रश्नासंभवाच्च ॥

[59] ननु लक्षणप्रश्नो मा भूत् ; किंतु गवयपदार्थः कः, कीदृक् , किंलिङ्गक इति गवयपदवाच्यतायां किं लिङ्गमिति लिङ्गसामान्यं पृच्छ्यते । तत्र च गोसादृश्यं लिङ्गमित्यतिदेशवाक्येनोत्तरम् । अतोऽन्वयव्याप्तिरपि सुवचेति चेन्न – लिङ्गविशेषप्रश्नो हि लिङ्गमविज्ञातवतो भवति । एवं लिङ्गमविज्ञाय स्थितेनानेन लिङ्गज्ञेयं गवयपदवाच्यत्वमेव नावगतम् । तस्यावगतत्वे हि तत्र किं लिङ्गमिति प्रश्नो घटते । तथाच गवयपदवाच्यत्वाज्ञानात्तत्र लिङ्गप्रश्नो न भवतीति । एवं लिङ्गप्रश्नार्थमवश्यं गवयपदवाच्यत्वज्ञानेन पूर्वजातेन भाव्यम् । नच लिङ्गज्ञानं विना तदवगतमस्ति; गवयशब्दः किञ्चिद्वाचकः शिष्टैः प्रयुज्यमानत्वादिति लिङ्गेनैव तस्य ज्ञातत्वात् ; किञ्चिद्वाचकत्वज्ञाने सति तुल्यवित्तिवेद्यतया कस्यचिद्गवयशब्दवाच्यत्वस्यापि ज्ञातत्वात् । तथाच लिङ्गे ज्ञाते लिङ्गप्रश्नो न भवतीति । ननु गवयशब्दस्सप्रवृत्तिनिमित्तकस्साधुशब्दत्वादिति सामान्यतः प्रवृत्तिनिमित्तमनुमाय, निर्विशेषं न सामान्यमिति न्यायेन विशेषरूपतामपि बुद्ध्वा तस्य विशेषस्यानुमापकं लिङ्गं किमिति प्रवृत्तिनिमित्तविशेषलिङ्गप्रश्नस्स्यादिति चेन्न — प्रवृत्तिनिमित्तविशेषमविदुषस्तत्र किं प्रमाणमित्येव हि प्रश्नो भवेत् ; न तु तत्र किं लिङ्गमिति विशेषरूपेण; इदमनुमेयमेव, न तु मानान्तरवेद्यमिति निर्धारणाभावात् ॥ अथ सामान्यतः प्रमाणप्रश्न एव । वाक्यप्रयोक्ता तु लिङ्गरूपप्रमाणविशेषग्रहणेनोत्तरयतीति चेन्न– सामान्यप्रश्ने प्रत्यक्षशब्दबोधसामग्रीमादायाप्युत्तरसंभवात् । वनं गतो द्रक्ष्यसीति प्रत्यक्षहेतु-

मतो द्रक्ष्यसीति; यथा वा - कः पिक इत्यत्र, कोकिल इति। तस्मान्निमित्तभेदप्रश्न एवायं, गवयो गवयपदवाच्यः कीदृक् केन निमित्तेनेति युक्तमुत्पश्यामः ॥ तस्य च निमित्तविशेषस्य साक्षादुपदर्शयितुमशक्यत्वात् पृष्टस्तदुपलक्षणं किञ्चिदाचष्टे । तच्चोपमानसामग्रीसमुत्थापनमेव । तस्य च प्रमाणस्य सतस्तर्कस्सहायतामापद्यते - 'सादृश्यस्यैव निमित्ततायां कल्पनागौरवम्, निमित्तान्तरकल्पने च क्लृप्तकल्प्यविरोध' इति तदेव निमित्तमवगच्छतीति ॥

[60] लक्षणन्त्वस्य अनवगतसङ्गतिसंज्ञासमभिव्याहृतवाक्यार्थस्य संज्ञिन्यनुसन्धानमुपमानम्। वाक्यार्थश्च क्वचित् साधर्म्यं क्वचिद्वैधर्म्यम् । अतो नाव्यापकम् ॥

कथनम्। इदं गवयपदप्रवृत्तिनिमित्तमिति कथं ज्ञायते इति प्रश्ने, कः पिक इति प्रश्ने कोकिलः पिक इतिवत्, बोधहेतुपर्यायशब्दप्रयोगो वेति । किञ्च लिङ्गप्रश्नो न भवति, अन्वयव्यतिरे दृष्टान्ताभावात् । एवं प्रवृत्तिनिमित्तस्यैवाज्ञातत्वे तत् किमिति प्रश्नः प्रथमः । तं विहाय तद्ग्राहकं प्रमाणं लिंगं वा किमिति प्रश्नस्तु पाश्चात्यः । अतो गवयशब्दप्रवृत्तिनिमित्तं किमित्येव प्रश्नार्थ इति युक्तमुत्पश्यामः । एवञ्च वक्ता गवयत्वं प्रवृत्तिनिमित्तं साक्षादर्शयितुमपारयन् तदुपलक्षणं गोसादृश्यं निर्दिशति। श्रोता च, गोसादृश्यस्य निमित्तत्वे गौरवं, निमित्तान्तरकल्पने चाप्रतीतगुपुरुषविषये क्लृप्तेन निमित्तेन कल्प्यस्य विरोध इति तर्कबलेन निमित्तान्वेषणपरो गवये गोसादृश्यदर्शने सति उपलक्षणबलात्तत्रदृष्टगवयत्वप्रवृत्तिनिमित्तकत्वं गवयशब्दस्योपमानान्निश्चिनोतीति ॥ (ननु शब्दस्य प्रवृत्तिनिमित्तं किञ्चिदस्तीति तावत्प्रागेव बुद्धम् । ततः प्रत्यक्षेण गवयत्वे दृष्टे सति इदं सामान्यं गवयशब्दप्रवृत्तिनिमित्तं गोसादृश्यसमनियतत्वात्, गवयशब्द एतत्प्रवृत्तिनिमित्तकः गोसादृश्याप्रवृत्तिनिमित्तकत्वे सति तत्समनियतप्रवृत्तिनिमित्तकत्वात्, गवयत्वेतराप्रवृत्तिनिमित्तकत्वे सति सप्रवृत्तिनिमित्तकत्वाद्वा इत्यनुमानत एव प्रवृत्तिनिमित्तज्ञानमस्तु ; कृतमन्येनेति चेत् – न - दृष्टान्तासिद्धेः । प्रथमानुमानञ्च गवयत्वप्रकारकज्ञानविषयत्वादौ व्यभिचरितम्, अप्रयोजकञ्च । द्वितीयमपि समनियतधर्मान्तरप्रवृत्तिनिमित्तत्ववारणाक्षमम् । तृतीयमपि नानार्थकशब्दस्यातिदेशवाक्याधीनशक्तिग्रहस्थले दुर्वचम्, तदितराप्रवृत्तिनिमित्तकत्वाभावात् । न च तदितरधर्मानवच्छिन्नशक्तिकत्वे सति सप्रवृत्तिनिमित्तकत्वादिति हेतुः, नानार्थस्थलेचैकशक्तिरितरधर्मानवच्छिन्नैवेति न दोष इति वाच्यम् – ईदृशहेतुनद्वयाप्त्यादिपरिशीलनमन्तरेणापि निमित्तनिर्णयादित्यलम् ॥)

[60] नन्वेवं साधर्म्यस्थल इव वैधर्म्यस्थलेपि शक्तिग्रहसंभवात्तदर्थं मानान्तरस्वीकारापत्तिरिति चेन्न – उभयानुगतोपमानलक्षणनिर्वचनात् । तच्चाज्ञातशक्तिक (गवयादि) पदसमभिव्याहृत तदर्थजिज्ञासाशमनार्थवाक्यान्तर्गतपदार्थस्य (साधर्म्यस्य वैधर्म्यस्य वा) वाच्येऽर्थे पुनरनुसन्धानमुपमितिकरणमुपमानमिति। गोवत् द्विशफो न भवत्यश्व इत्यादौ च वैधर्म्यानु

तस्मान्नियतविषयत्वादेव न तेन बाधः, न त्वनतिरेकादिति स्थितिः ॥

[61] शब्दोऽपि न बाधकमनुमानानतिरेकादिति वैशेषिकादयः । तथा हि — यद्यपि एते पदार्था मिथः संसर्गवन्तः वाक्यत्वादिति व्यधिकरणम् ; पदार्थत्वादिति चानैकान्तिकम् ; पदैस्स्मारितत्वादित्यपि तथा । यद्यपि चैतानि पदानि स्मारितार्थसंसर्गवन्ति तत्स्मारकत्वादित्यादौ साध्याभावः । न ह्यत्र मत्वर्थः संयोगः समवायस्तादात्म्यं विशेषणविशेष्यभावो वा सम्भवति । ज्ञाप्यज्ञापकभावस्तु स्वातन्त्र्येण अनुमानान्तर्भाववादिभिर्नेष्यते । न च लिङ्गतया ज्ञापकत्वं यत् लिङ्गस्य

संधानमुपमानपदगृहीतम् ; उपलक्षणद्वारा मितिजनकत्वात्, उक्तसामान्यलक्षणाक्रान्तत्वाच्च । [एवं साधर्म्यवैधर्म्ये विना, दीर्घग्रीवः प्रलम्बौष्ठः पशुः करभ इति धर्ममात्रकथनेपि शक्तिग्रहादुपमानलक्षणमिष्टमिति केवलधर्मोपि तृतीयत्वेन गणनीय इति तार्किकरक्षादौ । तत्रापि दीर्घत्वप्रलम्बत्वादिरूपेतरवैधर्म्यपरिशीलनात् द्वैविध्यमेव पर्याप्तं प्रतीयते ।] तथाचोपमानप्रमाणमस्त्येव । एवमपि तस्येश्वराभावासाधकत्वं साधर्म्यवैधर्म्यमात्रविषयकत्वात् ; न तु प्रत्यक्षाद्यनतिरिक्तत्वादिति स्थितिः ॥

[61] एवं प्रमाणत्रयं नेश्वरबाधकमिति सिद्धम् । शब्दोपि न बाधकः, तस्यानुमानानतिरिक्तत्वात्, तदबाधकत्वस्य चोक्तत्वादिति वैशेषिकादयः॥ ननु कथमनुमानान्तर्भावः? पदानां प्रत्येकं शक्तिग्रहादर्थस्मारकत्वमस्तीति वैशेषिकादिसंमतम् । एवं स्मारितानां पदार्थानां यो मिथस्संसर्गः स वाक्यार्थः । तद्विषयकज्ञानजनकत्वं वाक्यस्य किं अनुमानविधया उत प्रकारान्तरेणेति विचारः । तत्र संसर्गस्यैव ज्ञाप्यत्वात्संसर्गवत्त्वं साध्यमिति निर्विवादम् । पक्षो हेतुश्च क इति विचार्यम् । तत्र पदार्थपक्षकं वाऽनुमानं पदपक्षकं वा । आद्ये संसर्गस्य साध्यस्य पक्षगतत्वात्प्रतिज्ञा समञ्जसैव । हेतुस्तु कः? वाक्यत्वञ्चेत्—तत् साध्यव्यधिकरणम् । पदार्थत्वं पदस्मारितत्वं वा न हेतुः, गौरश्व इति स्मारिते व्यभिचारात् । एवं पदपक्षकानुमानमपि न । तत्र वाक्यत्वादिति हेतुर्यद्यपि न व्यधिकरणः, अथापि किमिदं वाक्यत्वम्? संसर्गबोधकत्वमिति चेत्—तदसिद्धम्, संसर्गस्य संप्रत्यनुमेयत्वात् । पदसमुदायत्वमिति चेत्—पदत्वं नाम अर्थशक्तत्वमर्थस्मारकत्वमेवेति,एतानि पदानि स्मारितार्थसंसर्गवन्ति तत्स्मारकत्वादिति प्रयोगो निष्पद्यते । तत्र संसर्गवत्त्वरूपसाध्यं पदेषु बाधितम् । स हि संयोगस्समवायस्तादात्म्यं विशेष्यविशेषणभावो वा यथायथं पदार्थ एवास्ति मिथः, न तु पदे । अथ संसर्गवत्त्वं नाम संसर्गज्ञापकत्वम् ; तच्च पदानामिति चेत् — किं तदनुमानविधया प्रकारान्तरेण वा । पदसमुदायस्य वाक्यस्यानुमानान्तर्भाववादिभिः, प्रकारान्तरेणेति दुर्वचम् । अतस्संसर्गज्ञापकत्वं नाम संसर्गानुमापकहेतुत्वमेव । इदञ्च प्रथमतो हेतुना संसर्गेऽनुमिते तादृशानुमित्युत्पत्त्यन-

१. प्र. 'लिङ्गतया ज्ञापकत्वं यत् शब्दस्य तदेव तस्य लिङ्गस्यतत्स्मारकत्वादित्यस्याविषयः कर्मेतिन'

विषयस्तदेव तस्य, परस्पराश्रयप्रसङ्गात् । तदुपलम्भे हि व्याप्तिसिद्धिस्तत्सिद्धौ च तदनुमानमिति । तथापि—अकाङ्क्षादिमद्भिः पदैः स्मारितत्वात् गामभ्याजेति पदार्थवदिति स्यात्। न च विशेषासिद्धिर्दोषः, संसर्गस्य संसृज्यमानविशेषादेव विशिष्टत्वात्। यद्वा एतानि पदानि स्मारितार्थसंसर्गज्ञानपूर्वकाणि आकाङ्क्षादिमत्त्वे सति तत्स्मारकत्वात् गामभ्याजेति पदवत्। न चैवमर्थासिद्धिः, ज्ञानावच्छेदकतयैव तत्सिद्धेः। तस्य च संसृज्यमानोपहितस्यैवावच्छेदकत्वान्न विशेषाप्रतिलम्भ इति ॥

[62] अत्रोच्यते— अनेकान्तः परिच्छेदे सम्भवे च न निश्चयः ।
आकाङ्क्षा सत्तया हेतुर्योग्यासत्तिरबन्धना ॥ १३ ॥

न्तरं हेतोरिदमनुमापकत्वमस्तीत्येवं ज्ञायते, न तु संसर्गानुमानावसर एव। तथाच 'लिङ्गावधया ज्ञापकत्वं **लिङ्गस्य** लिङ्गनिष्ठं यत्, तदेव **तस्य** मतुपो **विषयः** वाच्यम्, तदेव **तस्य** लिङ्गस्य **विषयः** साध्यम्, लिङ्गतया ज्ञापकत्वं यदिदं प्रकृतलिङ्गस्य विषयः (साध्यम्) तदेव तस्य मतुपोर्थः, न तु संयोगादिकं किमपि इतीदं न भवति, अन्योन्याश्रयात्। संसर्गानुमित्युपलम्भे किल हेतोस्संसर्गानुमापकत्वेन सह व्याप्तिग्रहः, एतद्व्याप्तिग्रहे सिद्धे किल संसर्गानुमितिः। तथाच पदपक्षकत्वे हेतुर्यथाकथञ्चिदस्तु; संसर्गवत्त्वं सिसाधयिषितं न सिध्यति। अतः कथमनुमानान्तर्भाव इति चेत्— यद्यपि पदार्थपक्षकत्वे स दोषः, यद्यपि च पदपक्षकत्वेपि, तथापि तदुभयपक्षकत्वमेव संभवति, हेतुसाध्ययोरन्यथापरिष्कारात्। एते पदार्था मिथस्संसर्गवन्तः आकांक्षायोग्यतासान्निधिमत्पदस्मारितत्वात् गामानयेतिपदार्थवदिति पदार्थपक्षकमनुमानम्। नचैवं संसर्गसामान्यसिद्धावपि विवक्षितविशेषो न सिध्यतीति वाच्यम् — संबन्धिविशेषायत्तो हि संबन्धे विशेषः। संबन्धिनश्च विशिष्यैव पदैरुक्ता इति तदीयस्संबन्ध इति साधने संबन्धिविशेषादेव संबन्धस्यापि संबन्ध्यन्तरव्यावृत्तत्वान्न दोष इति। एवमेतानि पदानि स्मारितार्थसंसर्ग ज्ञानपूर्वकाणि आकांक्षादिमत्पदत्वात् गामानयेतिपदवदिति पदपक्षकोऽपि प्रयोगः। साध्यघटकश्च, अर्थं बुध्वा शब्दरचनेति न्यायसिद्धं रचनाहेतुभूतं वक्तृगतं ज्ञानम्। तथाच ज्ञानजन्यत्वं साध्यम्, न तु प्रागुक्तं ज्ञानजनकत्वम्। नचैवं ज्ञानसाधने संसर्गरूपवाक्यार्थासाधनादिष्टासिद्धिः, संसर्गविषयकत्वविशिष्टज्ञानसाधने संसर्गस्यापि विधेयकोटिप्रविष्टतया साध्यत्वात्। तत्रापि संसर्गस्य विशेषरूपत्वलाभः स्मारितार्थसंसर्गेत्यर्थघटनेनैव साधनात्संबन्धिविशेषबलादुक्तरीत्या भवत्येव। अतश्शब्दोऽनुमानमिति ॥

[62] अत्रोच्यते—पदार्थपक्षकः प्रयोगस्तावन्न युक्तः, **अनेकान्तः परिच्छेदे संभवे च न निश्चयइति**। परिच्छेदोऽवधारणम्, संभवश्च योग्यता। तथाच संसर्गवत्त्वसाधने व्यभिचारः; तदर्हत्वसाधने च विवक्षितवाक्यार्थनिश्चयो नास्तीति। किञ्चाकांक्षा स्वरूपसती कारणम्, लिंगं तु ज्ञायमानतयेति सत्तया कारणस्य ज्ञायमानतया कारणलिंगकोटौ प्रवेशो न युक्तः। तदर्थं

एते पदार्था मिथस्संसर्गवन्त इति संसृष्टा एवेति नियमो वा साध्यः संभावितसंसर्गा इति वा ॥

[63] न प्रथमः, अनाप्तोक्तपदकदम्बस्मारितैरनेकान्तात् ॥ आप्तोक्त्या विशेषणीयमिति चेन्न – वाक्यार्थप्रतीतेः प्राक् तदसिद्धेः । न ह्यविप्रलम्भकत्वमात्रमिहाप्तशब्देन विवक्षितम्, तदुक्तेरपि पदार्थसंसर्गव्यभिचारात् । अपितु तदनुभवप्रामाण्यमपि । न चैतच्छक्यमसर्वज्ञे[1] सर्वदा सर्वविषये सत्यज्ञानवानयमिति निश्चेतुम्, भ्रान्तेः पुरुषधर्मत्वात् ॥ यत्र[2] क्वचिदाप्तत्वमनाप्तस्याप्यस्तीति न तेनोपयोगः ॥ ततोऽस्मिन्नर्थेऽयमभ्रान्त इति केनचिदुपायेन ग्राह्यम् । नचैतत् संसर्गविशेषमप्रतीत्य शक्यम्; बुद्धेरर्थभेदमन्तरेण निरूपयितुमशक्यत्वात् ॥ पदार्थमात्रे चाभ्रान्तत्वसिद्धौ न किञ्चित्; अनाप्तसाधारण्यात् ॥ एतेषां संसर्गेऽयमभ्रान्त इति शक्यमिति चेन्न-एतेषां संसर्गे इत्यस्या एव बुद्धेरसिद्धेः । अननुभूतचरे स्मरणायोगात्, तदनुभवस्य लिङ्गाधीनतया तस्य च विशेषणासिद्धत्वेनानुपपत्तेरिति ॥

[64] नापि द्वितीयः, योग्यतामात्रसिद्धावपि संसर्गानिश्चयात्, वाक्यस्य च

तदनिवेशेन केवला योग्यनिष्ठाऽऽसत्तिर्हेतौ प्रवेश्यमाना व्याप्तिनिर्वहणरहितैव, व्यभिचारादिति ॥

[63] तथाहि – परिच्छेदपक्षे नद्यास्तीरे फलानि संतीत्यनाप्तोक्तपदार्थेषु व्यभिचारः ॥ आप्तोक्ताकांक्षादिमत्पदस्मारितत्वादिति हेतुकोटौ पदे आप्तोक्तत्वं विशेषणमिष्यत इति चेत् – किमिदमाप्तत्वम्? अविप्रलम्भकत्वं वा प्रमात्मकानुभववत्त्वं वा । आद्येऽविप्रलंभकेनापि भ्रान्तेनोक्ते व्यभिचारः । अन्त्यमपि किं सार्वकालिकसर्वविषयकप्रमावत्त्वं उत किञ्चिद्विषयकप्रमावत्त्वं यद्वा पदार्थसंसर्गात्मकप्रकृतवाक्यार्थविषयकप्रमावत्त्वं पदार्थमात्रविषयकप्रमावत्त्वं वा । तत्रादिमं भ्रान्तेः पुरुषस्वभावत्वादसर्वज्ञस्यासंभवि । द्वितीयमनाप्तस्याप्यस्तीति व्यर्थं विशेषणम् । तृतीयमेव स्वव्यभिचरितम् । तथापि तद्दुर्वचम्, वाक्यार्थप्रतीतेः प्राक् अयमेतद्विषयकप्रमावानिति निश्चयासिद्धेस्तज्ज्ञानासंभवात् । 'अर्थेनैव विशेषो हि निराकारतया धिया' मिति नयेन प्रकृतज्ञानं प्रकृतवाक्यार्थमादाय निरूप्यम् । वाक्यार्थश्च साध्यत्वाभिमतस्संसर्गविशेष एव । तद्ज्ञानञ्चानुमितिरूपत्वात् इतः पश्चाद्भवेदिति । चतुर्थमपि न युक्तं अनाप्तोक्ते व्यभिचारादेव । नन्वेतस्मिन् संसर्गेऽयं प्रमावानिति विशिष्याग्रहेपि पदार्थानां शक्त्युपस्थापितानां विशिष्य ज्ञातत्वात् एतेषां संसर्गेऽयं प्रमावानिति सुग्रहमिति चेत्–दुर्ग्रहमेव ; संसर्गस्य संबन्धिविशेषाधीन एव विशेष इति एतेषां मिथस्संसर्गस्यैव साध्यत्वात् तस्य चाननुभूतत्वात्तत्स्मरणपूर्वकं तत्र प्रमात्वनिश्चयायोगात् । तथाचेदृशाप्तत्वविशेषणासिध्या विशिष्टलिंगासिध्याऽनुमित्यनुपपत्तिरिति ॥

[64] अतस्संसर्गवत्त्वसाध्यत्वपक्षं विहाय संसर्गयोग्यत्वरूपद्वितीयपक्षो गृह्यते चेत् –

---

१. असर्वज्ञेनेति सर्वत्र पाठः । २. क. ख. पा. तत्र । बो. 'इत्यत्राह यत्रक्वचिदिति' वक्ष्यति च यत्क्वचिदाप्तत्वस्यानैकान्तिकत्वा दिति ।

तदेकफलत्वात् । योग्यतामात्रस्य प्रागेव सिद्धेः । अन्यथा तदसिद्धावासन्नसाकाङ्क्षपदस्मारितत्वादित्येव हेतुस्स्यात् ! तथाचाग्निना सिञ्चेदित्यादिना स्मारितैरनेकान्तः ; तथाविधानां सर्वथा संसर्गायोग्यत्वादिति ॥

[65] एवं द्वितीयेऽपि प्रयोगे हेतुराकाङ्क्षादिमत्त्वे सतीति । तत्र केयमाकाङ्क्षा नाम ? न तावद्विशेषणविशेष्यभावः, तस्य संसर्ग (गविशेष) स्वभावतया साध्यत्वात् । नापि तद्योग्यता, योग्यतयैव गतार्थत्वात् । नाप्यविनाभावः, नीलं सरोजमित्यादौ तदभावेपि वाक्यार्थप्रत्ययात् ॥ तत्रापि विशेषाक्षिप्तसामान्ययोरविनाभावोऽस्तीति (वोप्याकांक्षेति) चेन्न — अहो विमलं जलं नद्याः, कच्छे महिषश्चरतीत्यादौ वाक्यभेदानुपपत्तिप्रसङ्गात् ॥ नापि प्रतिपत्तुर्जिज्ञासा, पटो भवतीत्यादौ शुक्लादिजिज्ञासायां (सया) रक्तः पटो भवतीत्यस्यैकदेशवत् सर्वदा वाक्यापर्यवसानप्रसङ्गात् ॥ 'गुणक्रियाद्यशेषविशेषजिज्ञासायामपि पदस्मारितवि-

---

तावता योग्यत्वानुमितावपि वाक्यफलत्वेनाभिमतसंसर्गनिश्चयासिद्धिः; सिद्धसाधनञ्च, हेतुकोटावाकांक्षादिवद्योग्यताया निवेशितत्वाद्योग्यताज्ञानं हि पूर्वमेव सिद्धम् । अन्यथा तत्र तदनिवेशे आकांक्षासत्तिमत्पदस्मारितत्वमात्रं हेतुरिति अग्निना सिञ्चतीति पदस्मारिते व्यभिचार इति । तस्मात्पदार्थपक्षकानुमानं न युक्तम् ॥

[65] अथोत्तरार्धविवरणम् । प्रथमे इव द्वितीये पदपक्षकेपि प्रयोगे हेतुराकांक्षादिमत्त्वेन विशेष्यते । तत्र केयमाकांक्षा नाम ? विशेषणविशेष्यभाव इति चेत् — स हि केनचित्संबन्धेन विशेष्यस्य विशेषणविशिष्टत्वम् ; यथा गामित्यत्राधेयतासंबन्धेन कर्मत्वस्य गोविशिष्टत्वम् । स च संसर्ग एवेति वाक्यार्थरूपत्वात्साध्यमिति न हेतुघटको भवेत् ॥ विशेषणविशेष्यभावयोग्यतेति चेत् — योग्यतारूपविशेषणान्तरानतिरेकात्पौनरुक्त्यम् ॥ पदार्थयोरविनाभाव आकांक्षेति चेत् — स न कारणम्, नीलं सरोजमित्यत्र व्यभिचारात् ; नीलरूपं विनापि हि पुण्डरीकं सरोजम्, असरोजमप्यतसी नीलेति । ननु तत्र विशिष्य नीलसरोजयोर्विनाभूतत्वेपि तत्तद्वृत्तिसामान्यधर्मरूपगुणत्वद्रव्यत्वाश्रययोर्गुणद्रव्ययोरविनाभावोऽस्त्येव । अतो यथाकथञ्चिदविनाभाव एव कारणमिति न व्यभिचार इति चेन्न — तथासति 'अहो विमलं जलं नद्याः' इत्येतद्वाक्यानन्तरं 'कच्छे महिषश्चरती' ति वाक्यप्रयोगे तत्र वाक्यभेदो न स्यात् । साकांक्षञ्चेदेकं वाक्यमिति हि वाक्यविदः । नदीकच्छयोश्चाविनाभावरूपाकांक्षाऽस्तीति ॥ अथ श्रोतृसमवेता जिज्ञासैवाकांक्षेति चेत् — सत्यमिदं कथञ्चित्सुवचम् । तत्रापि तु निष्कर्षाय किञ्चिदुच्यते — रक्तः पटो भवतीत्यत्र पटे रूपजिज्ञासासद्भावाद्रक्तपदं विना तद्वाक्यैकदेश इव केवलं पटो भवतीत्यत्रापि वाक्यमनवसितमेव स्यात्, जिज्ञासाया अविशिष्टत्वात् । तथाच सर्वमपि वाक्यमवाक्यमेव, उपर्युपरि जिज्ञासासंभवादपर्यवसानात् ॥ ननु न सर्वा जि-

शेषजिज्ञासा आकाङ्क्षा। पट इत्युक्ते किंरूपः, कुत्र, किं करोतीत्यादिरूपजिज्ञासा। तत्र, भवतीत्युक्ते, किं करोतीत्येषैव पदस्मारितविषया, न तु किंरूप इत्यादिरपि। यदा तु रक्त इत्युच्यते, तदा किंरूप इत्येषाऽपि स्मारितविषया स्यात् इति न किञ्चिदनुपपन्न' मिति चेत्– एवं तर्हि चक्षुषी निमील्य परिभावयतु भवान्, किमस्यां जातायामन्वयप्रत्ययः अथ ज्ञातायामिति ॥ तत्र प्रथमे नानया व्यभिचारव्यावर्तनाय (वारणाय) हेतुर्विशेषणीयः, मनस्संयोगादिवत् सत्तामात्रेणोपयोगात्। आसत्तियोग्यतामात्रेण विशिष्टस्तु निश्चितोऽपि न गमकः; अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामित्यादौ व्यभिचारात् ॥

[66] द्वितीयस्तु स्यादपि, यद्यनुमानान्तरवत्तत्सद्भावेऽपि तज्ज्ञानवैधुर्यादन्वयप्रत्ययो न जायते। नत्वेतदस्ति, आसत्तियोग्यतामात्रप्रतिसन्धानादेव साकाङ्क्षस्य सर्वत्र वाक्यार्थप्रत्ययात्। निवृत्ताकाङ्क्षस्य च तदभावात् ॥ कथमेष निश्चयः, साकाङ्क्ष एव प्रत्येति, न तु ज्ञाताकाङ्क्ष इति चेत् — तावन्मात्रेणोपपन्नावनुपलभ्यमानज्ञानकल्पनाऽनुपपत्तेः। अन्यत्र तथा दर्शनाच्च। यथा (दा) हि दूराद्दृष्टसामान्यो जिज्ञासते कोऽयमिति, प्रत्यासीदंश्च, स्थाणुरयमिति प्रत्येति, तदाऽस्य ज्ञातुमहमिच्छा-

---

ज्ञासा आकांक्षा; किन्तु यत्र यावन्ति पदानि प्रयुक्तानि, तत्र तावत्स्मारितार्थजिज्ञासैवाकांक्षेति केवलं पटो भवतीत्यपि वाक्यमेवेति चेत् – अस्त्वेवम्। परन्त्विहेदं विचार्यम् — किमस्यामाकांक्षायां जातायामेव वाक्यार्थप्रत्ययः, अथ ज्ञातायामिति। तत्र जननमात्रेणेति प्रथमपक्षे आत्ममनस्संयोगादिवत्सत्त्यैवोपयोगाद्धेतुकोटावाकांक्षाविशेषणमनुचितम्। अत आसत्तियोग्यतामात्रनिवेशेन हेतूक्तौ, अयमेति पुत्रो राज्ञ इति वाक्यानन्तरमेव, पुरुषोऽपसार्यता मिति वाक्यप्रयोगे राजपदार्थपुरुषपदार्थयोरासत्तियोग्यतासद्भावात्तत्र संसर्गज्ञानपूर्वकत्वरूपसाध्यस्य, वस्तुतः पुरुषस्य राजासंबन्धित्वे संसर्गवत्त्वरूपसाध्यस्य चाभावाद्व्यभिचारः ॥

[66] तर्हि ज्ञायमानतयोपयोग इति द्वितीयपक्षोऽस्तु। अतो हेतौ तन्निवेशाद्व्यभिचारोऽपि परिहृत इति चेत् — आसत्तियोग्यताव्याप्तिपक्षधर्मतादिवत्स्वरूपसत्तया प्रत्ययाजनकत्वे हि ज्ञायमानत्वपक्षस्स्यात्। नत्वेवम्। आसत्त्यादिज्ञानवतः पुंसः स्वयं साकांक्षत्वमस्ति चेत्, तावतैव बोधसद्भावात्; निवृत्ताकांक्षस्यासंभवाच्च; आकांक्षाज्ञानस्य कारणत्वे हि तस्यामसत्यामपि तज्ज्ञाने सति बोधापत्तिरिति ॥ नन्वाकांक्षा ज्ञायमाना कारणमित्युक्तावपि न निवृत्ताकांक्षत्वे बोधापत्तिः, आकांक्षासद्भावस्याप्यपेक्षितत्वात्। ततो जननमात्रेण वाक्यार्थप्रत्ययं लभत इति कथं निश्चय इति चेत् — आकांक्षात्वेन कारणत्वापेक्षया ज्ञायमानाकांक्षात्वेन कारणत्वकल्पने गौरवात्, ज्ञानानुत्पत्तिसमयेऽपि ज्ञानमुत्पद्यत एवेति कल्पने गौरवाच्च तथा निश्चयः। एवं प्रत्यक्षस्थले जिज्ञासायास्सत्तया कारणत्वादपीहाप्येवम्। दूरादूर्ध्वत्वसामान्यदृष्टौ

मीत्यनुव्यवसायाभावेऽपि स्थाणुरयमित्यर्थ(न्वय)प्रत्ययो भवति-तथेहाप्यविशेषात् विशेषोपस्थानकाले संसर्गावगतिरेव जायते, नतु जिज्ञासावगतिरिति।। नच विशेषोपस्थानात्प्रागेव जिज्ञासावगतिः प्रकृतोपयोगिनी, तावन्मात्रस्यानाकाङ्क्षा(ङ्क्ष)त्वात् ।।

[67] न चैवम्भूतोऽप्ययमैकान्तिको हेतुः । यदा ह्ययमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामिति वक्तोच्चारयति, श्रोता च व्यासङ्गादिना निमित्तेन अयमेति पुत्र इत्यश्रुत्वैव; राज्ञः पुरुषोऽपसार्यतामिति शृणोति, तदाऽस्त्याकाङ्क्षादिमत्त्वे सति पदकदम्बकत्वम् ? न च स्मारितार्थसंसर्गज्ञानपूर्वकत्वमिति ।।

[68] स्यादेतत्—यावत्समभिव्याहृतत्वेन विशेषिते हेतौ नायं दोषः, तथाविधस्य व्यभिचारोदाहरणासंस्पर्शात् । कुतस्त्यस्तर्हि कतिपयपदश्राविणः संसर्गप्रत्ययः? अलिङ्ग एव लिङ्गत्वाध्यारोपात्। एतावानेवायं समभिव्याहार इति तत्र श्रोतुरभिमानः – न – तत्संदेहेऽपि श्रुतानुरूपसंसर्गावगमात् । भवति हि तत्र प्रत्ययः, न जाने किमपरमनेनोक्तम्, एतावदेव श्रुतं, यद्राज्ञः पुरुषोऽपसार्यतामिति।। भ्रान्तिरसाविति चेत्-न तावदसौ दुष्टेन्द्रियजा, परोक्षाकारत्वात्। न लिङ्गाभा-

---

हि ततो विशेषजिज्ञासा, ततः प्रत्यासत्तौ विशेषसन्निकर्षः, ततः स्थाणुरयमिति विशेषप्रत्यक्षमित्येव क्रमः । तत्र जिज्ञासाविषयकज्ञानान्तरं न जायते । तद्वदिहापि जिज्ञासायां पदार्थविशेषस्मरणे सति जिज्ञासावगत्यभावेपि आसत्तियोग्यताप्रतिसंधानमात्रेण संसर्गावगतिर्भवत्येव, न तु जिज्ञासावगत्यर्थं विलम्बोऽस्तीति । न च जिज्ञासायामुत्पन्नायां जिज्ञासावगतिः, ततः पदार्थविशेषस्मरणं, ततः प्रत्यय इति क्रम इति वाच्यम्—केवलजिज्ञासाया आकांक्षात्वाभावात् पदार्थविशेषस्मरणविशिष्टजिज्ञासाया एव तत्त्वस्य प्रागुक्तत्वात्तादृशविशिष्टजिज्ञासाज्ञानमेवाकांक्षाज्ञानं वाच्यम् । तच्च विशेषस्मृति – संसर्गग्रहयोर्मध्ये नानुभविकमिति ॥

[67] ननु जिज्ञासायास्सत्तया कारणत्वसंभवेपि ज्ञायमानत्वेन कारणत्वमिष्यते व्यभिचारपरिहारार्थम् । अतिरिक्तशब्दप्रमाणकल्पनापेक्षया चात्र लाघवमस्त्येवेति चेत् –अस्तु कामम्। एवमाकांक्षाविशेषितोपि हेतुर्नाव्यभिचारी, अयमेति पुत्रो राज्ञः पुरुषोपसार्यतामिति कृत्स्नप्रयोगेप्यन्यत्रावधानादिना अयमेति पुत्र इत्येतावदश्रुत्वा राज्ञ इत्यादि यदा श्रूयते, तदा श्रुतेषु हेतुसत्त्वात्संसर्गज्ञानपूर्वकत्वरूपसाध्याभावाच्च व्यभिचारात् ॥

[68] स्यादेतत् – सहोच्चारितयावत्पदरूपत्वे सत्याकाङ्क्षादिमत्त्वादिति हेतुः । अतो हेत्वभावान्न व्यभिचारः । तत्र श्रोतुरानुभविकस्संसर्गप्रत्ययस्तु कतिपयपदेष्वेव यावत्त्वभ्रमेण हेतुभ्रमात्सूपपाद इति चेन्न — यावत्त्वभ्रमाभावेपि एतावदेव व्याहृतमधिकं वेति संदेहेऽपि श्रुतस्य भागस्यायमर्थ इति संसर्गज्ञानोदयस्यानुभवसिद्धत्वात् यावत्त्वनिश्चयस्य कारणत्वासंभवेन हेतुकोटौ तन्निवेशायोगात् । हेतुज्ञानं हि निश्चयरूपमेवानुमितिकारणमिति ॥ ननु भ्रान्तिरसौ

सजा, लिङ्गाभिमानाभावेऽपि जायमानत्वात्॥ एतावत्प (द्दक्प) दकदम्बप्रतिसन्धानमेव तां जनयतीति चेत्। यद्येवम्, तदेवादुष्टं सद्भ्रान्तिं जनयत् केन वारणीयम् व्याप्तिप्रतिसन्धानं विनाऽपि तस्य संसर्गप्रत्यायने सामर्थ्यावधारणात् चक्षुरादिवत्॥

[69] नास्त्येव तत्र संसर्गप्रत्ययः; असंसर्गाग्रहमात्रेण तु तथा व्यवहार इति चेत्–तर्हि यावत्समभिव्याहारेणापि विशेषणेनाप्रतीकारः, तथाभूतस्यानाप्तवाक्यस्य संसर्गज्ञानपूर्वकत्वाभावात् ॥ असंसर्गाग्रहपूर्वकत्वमात्रे साध्ये न व्यभिचार इति चेत् – एवन्तर्हि संसर्गो न सिद्ध्येत्॥ आप्तवाक्येषु सेत्स्यतीति चेन्न—सर्वविषयाऽऽप्तत्वस्यासिद्धेः, यत्र क्वचिदाप्तत्वस्यानैकान्तिकत्वात् , प्रकृतविषये चाप्तत्वासिद्धौ संसर्गविशेषस्य प्रागेव सिद्ध्यभ्युपगमादित्युक्तम् ॥

राज्ञ इत्यादिमात्रात्संसर्गप्रतीतिः । अतः प्रमां प्रत्येव यावत्त्वघटितहेतुनिश्चयस्य कारणत्व स्वीकारान्न यावत्त्वनिवेशासंभव इति चेत् — उच्यते । न खल्वसौ भ्रान्तिरपि विना कारणं भवितुमर्हति । तत्र प्रत्यक्षानुमानरूपप्रमितिकरणद्वयमात्रवादिना भ्रान्तिरियमिन्द्रियदोषाधीनेति' दुर्वचम् , अस्या अप्रत्यक्षरूपत्वात् । नापि हेत्वाभासे हेतुभ्रमाधीनेति । कतिपयपदेषु यावत्त्वभ्रम एव हि हेतुभ्रमो वा यः । स न संभवति यावत्त्वसंदेहादित्युक्तत्वात् । अथ कतिपयत्वरूपदोषदुष्टपदकदम्बप्रतिसंधानमेव भ्रान्तिजनकमिति चेत्— यद्येवमुच्यते, तर्हि यत् दुष्टं सत् व्याप्तिज्ञानपरामर्शादिनिरपेक्षं भ्रान्तिं जनयति, तदेवादुष्टं सत् तथैव प्रमितिं जनयतीति स्वीकृतप्रायम् । पदकदम्बं दोषासमवधानसहकारेण व्याप्त्यादिनिरपेक्षं प्रमितिजनकं दोषसहकारेण तथाभ्रमजनकत्वाच्चक्षुरादिवदिति ॥

[69] ननु वैशेषिकमते एवं दोषसंभवेपि पौरुषेयशब्दस्यानुमानान्तर्भाववादिनः प्राभाकरस्य नायं दोषः, तेनान्यथाख्यातेरनङ्गीकारात् असंसर्गाग्रहस्यैव भ्रान्तिपदार्थत्वात् । अतो यावत्त्वविशेषित एव हेतुः । स ज्ञातश्चेत् , संसर्गप्रमा जायत एव । कतिपयपदश्राविणस्तु न संसर्गप्रमा, कारणाभावात्; न भ्रमः, अन्यथाख्यात्यभावात् ; किन्तु पदार्थानां पृथगुपस्थितानां मिथोऽसंसर्गाग्रहमात्रमिति चेत् – तथापि तन्मतसाधारण्येनापि हेतुर्व्यभिचारित एव; अनाप्तवाक्ये संसर्गज्ञानपूर्वकत्वाभावात् । अथासंसर्गाग्रहपूर्वकत्वमेव तन्मते साध्यम् , न संसर्गज्ञानपूर्वकत्वम् । (यदि तु प्रतारकस्यासंसर्गग्रह एवास्तीति असंसर्गाग्रहपूर्वकत्वरूपसाध्याभावाद्व्यभिचारस्तदवस्थ इति मन्यते – तर्हि असंसर्गाग्रहविशिष्टपदार्थस्मृतिजनकत्वं साध्यं विवक्षितमस्तु) इति चेत् – तर्ह्यनुमानस्य संसर्गानुमितिहेतुत्वाभावात्संसर्गज्ञाने शब्दोऽतिरिक्तप्रमाणमेव स्यात् । ननु हेतुकोटावाप्तोक्तत्वरूपविशेषणस्यापि प्रवेशात् संसर्गज्ञानपूर्वकत्वस्यैव साध्यत्वादाप्तवाक्येषु संसर्गग्रहोऽनुमानात्सिध्यतीति चेन्न – आप्तत्वं प्रमात्मकानुभवशालित्वम् । तत् सर्वविषयकं यत्किञ्चिद्विषयकं प्रकृतविषयकं वेति विकल्पस्य दोषस्य प्रथमप्रयोगावसर एवोक्तत्वात् ॥

[70] न च सर्वत्र जिज्ञासा निबन्धनम्, अजिज्ञासोरपि वाक्यार्थप्रत्ययात्। आकाङ्क्षापदार्थस्तर्हि कः? जिज्ञासां प्रति योग्यता। सा च स्मारिततदाक्षिप्तयोर (वि) विनाभावे सति श्रोतरि तदुत्पाद्यसंसर्गावगमप्रागभावः। न चैषोऽपि ज्ञानमपेक्षते,

---

[70] एतावत् जिज्ञासैवाकाङ्क्षेत्युपगम्य, तस्याः ज्ञायमानत्वेन कारणत्वाभावात् तथा कारणत्वस्वीकारेऽपि प्रकारान्तरेण दोषाच्चानुमानं दूषितम्। अथ वस्तुत आकांक्षाया अन्यादृशत्वात् सत्तया हेतुत्वात् हेतौ तत्प्रवेशस्याशक्यत्वाद्दोषो दुरुद्धर इति ब्रूमः। नहि जिज्ञासा कारणं भवितुमर्हति, अजिज्ञासोरपि वाक्यार्थप्रत्ययोत्पत्त्या व्यभिचारात्। अतो जिज्ञासायोग्यता आकांक्षेति वक्तव्यम्। योग्यता च न तावत् स्मारिततदाक्षिप्तयोरविनाभावः—नद्याः, कच्छे—इत्यत्र वाक्यभेदो न स्यादित्युक्तत्वात्; अपितु स्मारिततदाक्षिप्तयोरविनाभावे सति तदुत्पाद्यसंसर्गावगमप्रागभावः। तदर्थश्च स्मारितस्य तदाक्षिप्तस्य वाऽविनाभावस्थले तेनाविनावेन, तदभावे प्रकारान्तरेण य उत्पाद्यः, यद्वा अविनाभावे जिज्ञासोपयोगितया वस्तुतो वर्तमाने यः तेन पूर्वं तदाक्षिप्तेति तच्छब्दगृहीतेन स्मारितार्थेनोत्पाद्यस्संसर्गावगमस्तत्प्रागभाव आकांक्षेति। तथाहि – पदस्मारितमादायैव गन्धवती पृथिवीत्यादौ साक्षादेवाविनाभावोऽक्षतः। नीलं सरोजमित्यादौ तदभावेऽपि नीलरूपस्य गुणत्वेन द्रव्यमन्तराऽसंभवात्, सरोजस्य च नानावर्णस्य सर्वात्मना वर्णं विनाऽसंभवात्, एवं गामानयेत्यादौ गोकर्मकत्वस्य क्रियामन्तरा, आनयनाक्रियायाः मूर्तद्रव्यादिकारकमन्तरा चासंभवाद्यथायथमाक्षिप्तमादायाविनाभाव ऊह्यः। एवमविनाभाववशादेव तत्र तत्र जिज्ञासापि भवति। सा च स्मारकपदसद्भावे तदर्थान्वयेन शाम्यति। तदभावे चाकिञ्चित्करत्वादनुत्पन्नेवावतिष्ठते॥ एतदुक्तं भवति – नाविनाभाव आकांक्षाशरीरे प्रविष्टः। किन्त्वविनाभावो न योग्यतेति सूचनार्थं अविनाभावे सतीत्युक्तम्। तथाच गामानयेत्यादौ गोपदस्य धात्वन्वयात्प्राक्साकांक्षत्वस्य, जाते अन्वये निराकांक्षत्वस्य च लोकानुभवसिद्धत्वादुत्पाद्यसंसर्गावगमप्रागभाव एवाकांक्षा। तत्पदस्य साकांक्षत्वं नाम तत्पदस्मारितोत्पाद्यः पदान्तरस्मारितेन सह यस्संसर्गावगमस्तत्प्रागभावः। जलं नद्याः, पुत्रो राज्ञ इत्यादौ षष्ठ्यन्तपदस्य यत्पदार्थेन सह संसर्गावगम उत्पाद्यः, तत्पदार्थेन जलेन पुत्रेण च सह तस्योत्पादितत्वात् प्रागभावाभावान्निराकांक्षत्वमेव। नच कच्छेन पुरुषेण च सहोत्पाद्यस्यावगमस्य प्रागभावोऽस्तीति शंक्यम् - तस्यानुत्पाद्यत्वात्। अयमेवावगम उत्पाद्य इति च सति संभवेऽविनाभावेन, अन्यत्र वक्तृतात्पर्येण, प्रथमश्रुतत्वेन वा केनापि प्रकारेणावसेयम्। तथाच तदुत्पाद्यसंसर्गावगमप्रागभाव एव तस्याकांक्षेति सिद्धम्॥ इयञ्च सत्तया कारणम्। ज्ञाततया कारणत्वञ्च दुर्वचम, संसर्गावगमप्रागभाव इत्यस्याभावस्यावगमरूपप्रतियोगिज्ञानेन ज्ञेयत्वात् प्रति-

---

१. दलकृत्यदर्शिन्यपि व्याख्याद्वये विशेष्यदलसत्त्वे सत्यन्ताभावे दोषो नोक्तः। मकरन्दे सत्यन्तं स्वरूपनिर्वचनमित्युक्तम्।

प्रतियोगीनिरूपणाधीननिरूपणत्वात्तदभावस्य, तस्य च विषयनिरूप्यत्वादिति ॥

[71] प्राभाकरास्तु लोकवेदसाधारणव्युत्पत्तिबलेनान्विताभिधानं प्रसाध्य वेदस्यापौरुषेयतया वक्तृज्ञानानुमानानवकाशात् संसर्गे शब्दस्यैव स्वातन्त्र्येण प्रामाण्यमास्थिषत; लोके त्वनुमानत एव वक्तृज्ञानोपसर्जनतया संसर्गस्य सिद्धेरन्विताभिधानबलायातेपि प्रतिपादकत्वेऽनुवादकतामात्रं वाक्यस्येति निर्णीतवन्तः ॥ तदतिस्थवीयः — निर्णीतशक्तेर्वाक्याद्धि प्रागेवार्थस्य निर्णये ।

व्याप्तिस्मृतिविलम्बेन लिङ्गस्यैवानुवादिता ॥ १४ ॥

यावती हि वेदे सामग्री, तावत्येव लोकेपि भवन्ती कथमिव नार्थं गमयेत् ।

योगिनश्चावगमस्य संसर्गरूपविषयग्रहणेनैव ग्राह्यत्वात् शब्दस्यानुमानान्तर्भावपक्षेऽनुमितेः प्राक् संसर्गस्याग्रहीतत्वेन तदवगमप्रागभावस्य दुर्ग्रहतया हेतोरेव दुर्ग्रहत्वापत्तेः । हेतुग्रहणे च तद्घटकस्य संसर्गस्यापि प्रागेव सिद्धिस्वीकारप्रसंगादनुमानवैयर्थ्यात् । तत् सिद्धं आकांक्षा सत्तया हेतुर्योग्यासत्तिरवन्धनेति । अतो द्विविधानुमानप्रयोगस्यापि दूषितत्वाच्छब्दो नानुमानमिति॥

[71] एवं सर्वस्य शब्दस्यानुमानान्तर्भाववादिनां वैशेषिकाणां मतं निरस्तम् । अथ वेदस्य पृथक्प्रमाणत्वं लौकिकशब्दस्यानुमानताञ्चाऽऽतिष्ठमानानां प्राभाकराणामर्धजरतीयपक्ष उपन्यस्य निरस्यते । त एवं निर्णीतवन्तः — लोके व्यवहाराच्छक्तिग्रह इति पदानां कार्यान्विते शक्तिः । य एव लौकिकाशब्दास्त एव वैदिका इति न्यायेन वेदस्याप्यान्विताभिधायकत्वमतस्सिद्धम् । तत्र लोके एतानि पदानि स्मारितार्थसंसर्गज्ञानपूर्वकाणि आकांक्षादिमत्पदकदम्बत्वादित्यनुमानत एव वक्तृज्ञानरूपसाध्यविशेषणतया संसर्गस्याप्यनुमितत्वात् सत्यप्यन्विताभिधानशक्तिबलाद्बोधे सोऽनुमितिगृहीतार्थग्रहरूप एवेति लौकिकशब्दोऽनुवादभूत ; नत्वेवं वेदे, तस्यापौरुषेयत्वेन वक्तुरभावेन तज्ज्ञानानुमानप्रसक्त्यभावात्संसर्गानुमित्यसंभवादन्विताभिधानशक्त्यधीनबोधस्यैव प्राथम्यादिति । (इदमपि तैर्लौकिकवाक्यस्यानुमानत्वस्वीकारे निमित्तम् । पदानामपूर्वाख्यकार्यतदन्वितान्यतराभिधायकत्वात् लौकिकवाक्यस्य च सर्वलाक्षणिकत्वाल्लाक्षणिकं पदं नानुभावकमिति सिद्धान्ताच्च शब्दविधया प्रामाण्यम् । वेदश्च कार्यपर एवेति !) तन्मतं वैशेषिकादपि स्थूलतरम् ; व्यवहारादान्विताभिधानशक्तिर्वाक्यस्य निर्णीतेति आकांक्षायोग्यतासात्तिमत्पदकदम्बज्ञानरूपसामग्री यथा वेदे तथा लोकेपि बोधं जनयेदेव, क्लृप्तसामग्रीसत्त्वेऽपेक्षणीयान्तराभावेन विलम्बायोगात् । अतो वाक्यजन्यबोध एव प्रथमः । अनुमितिरूपसंसर्गज्ञानं तु पाश्चात्यम् । अनुमितिहेतुर्विशिष्टलिङ्गज्ञानं हि नाम बोधसामग्रीत्वेनोक्तमाकांक्षादिविशिष्टपद-

---

१. प्रतियोगिनिरूपणाधीननिरूपणत्वात् तदभावनिरूपणस्य च विषयानिरूप्यत्वादिति सर्वत्र पाठः । तदा तदभावनिरूपणस्येत्यस्य तदभावनिरूपकस्य प्रतियोगिन इत्यर्थकतया गतिः । निरूपणत्वादिति पूर्वान्वयि ।

नह्यपेक्षणीयान्तरमस्ति । लिङ्गे तु परिपूर्णेऽप्यवगते व्याप्तिस्मृतिरपेक्षणीयाऽस्तीति, विलम्बेन किं निर्णयम्; अन्वय (अर्थ) स्य प्रागेव प्रतीतेः ॥

[72] लोके वक्तुराप्तत्वनिश्चयोऽपेक्षणीय इति चेन्न – तद्रहितस्यापि स्वार्थप्रत्यायने शब्दस्य शक्तेरवधारणात् । अन्यथा वेदेऽप्यर्थप्रत्ययो न स्यात्, तदभावात् । न च लोके अन्यान्येव पदानि; येन शक्तिवैचित्र्यं स्यात् ॥ अनाप्तोक्तौ व्यभिचारदर्शनात् तुल्याऽपि सामग्री संदेहेन शिथिलायते इति चेन्न—चक्षुरादौ व्यभिचारदर्शनेन (रसत्त्वेन) शङ्कायामपि सत्यां ज्ञानसामग्रीतस्तदुत्पत्तिदर्शनात्॥ ज्ञायमानस्यायं विधिः, यत् संदेहे सति न निश्चायकं, यथा लिङ्गं; चक्षुरादि तु सत्त्तयेति-चेन्न—वाक्यस्य निश्चितत्वात् ; आप्तोक्तत्वस्य चार्थप्रत्ययं प्रत्यनङ्गत्वात् ॥ लो-

कदम्बज्ञानमेव । तथाचेदृशलिङ्गज्ञानानन्तरं साध्यहेत्वोर्व्याप्तिज्ञानादिकमनुमितौ अधिकमपेक्ष्यत इति । अतो वेदवल्लोकेपि पदार्थान्वयस्य प्रागेव प्रतीतत्वाद्विलम्बेनानुमानेन निर्णयं किमस्ति, सिद्धेऽनुमित्ययोगात् । तत्सत्त्वेपि लिंगमनुवादरूपं ज्ञातग्राहित्वात्, न शब्द इति ।

[72] अथ लोके शब्दजन्यबोधे अयमाप्त इति निश्चयोपि कारणमिति चेन्न — व्युत्पत्तिकाले पदानामीदृशनिश्चयाभावेपि बोधजनकत्वावधारणात्तदयोगात् । अशक्यश्चैतत्कारणत्वकल्पनं वेदे, लोकेपि । तथाहि – आप्तत्वनिश्चयस्य बोधसामान्येऽपेक्षितत्वे वेदादपि बोधो न स्यात् । तत्र वक्तुरभावेन तस्य दुर्घटत्वात् । नच लौकिकपदघटितसामग्रीमात्रमाप्तत्वनिश्चयसापेक्षमिति वाच्यम् – वेदलोकपदभेदे हीदं शक्तिवैलक्षण्यं स्यात् । स एव न, लोकवेदाधिकरण(१-३-१०)विरोधात् । ननु नद्यास्तीरे फलानि सन्तीत्यनाप्तवाक्यजन्यबोधे विसंवादात्पौरुषेयवाक्ये प्रमाण्यव्यभिचारदर्शनात् वेदवदिह सामग्री वर्तमानापि संदेहात्कार्याक्षमा भवतीति चेन्न -सामग्र्यां सत्यामन्यादृशसंदेहस्य कार्यविरोधित्वायोगात् । चाक्षुषज्ञानस्य क्वाचिद्भ्रमत्वदर्शनेन चक्षुषः प्रामाण्यसंदेहे सत्यपि हि विष्फारितं चक्षुः वस्तु दर्शयत्येव ॥ ननु सति संदेहे निश्चायकं न भवतीति यत्,अयं निर्बन्धो ज्ञायमानकरणस्य;लिंगं हि सति संदेहे न निश्चायकम। चक्षुस्तु न ज्ञायमानतया करणमिति चेन्न – यो हि संदेहस्सामग्र्यनुप्रविष्टं कारणं किमपि विघटयति, तस्मिन्सति कार्याभाव इति युक्तम्, इह च संदेहः कुत्र ? किमाकांक्षादिविशेषणविशिष्टवाक्यविषये, किंवा वाक्यजन्यबोधप्रमाण्यविषये, आहो वाक्यप्रयोक्त्राप्तत्वविषये, नाद्यः, तत्र सर्वस्याप्यंशस्य वेद इवासंदिग्धत्वात् । न द्वितीयः, तत्संदेहस्य वाक्यार्थज्ञानरूपधर्मिग्रहणाधीनत्वात्तदर्थे तदुत्पत्तेरावश्यकत्वेनानुत्पत्तिवर्णनायोगात् । न तृतीयः, आप्तत्वनिश्चयस्य वेदे व्यभिचारादकारणत्वस्य कथ्यमानत्वादनुपयुक्तविषयसंदेहस्याकिञ्चित्करत्वात् । न केवलं वेदलोकयोरैकशब्द्याद्वेदे व्यभिचारादाप्तत्वनिश्चयस्याकारणत्वम् । किंतु लोके व्यभिचा-

१. संदेहेऽसति निश्चायकमिति वा स्यात् । दृश्यमानपाठस्तु संदेहे सति निश्चायकमिति ।

केऽपि चाप्तत्वानिश्चयेऽपि वाक्यार्थप्रतीतेः। भवति हि वेदानुकारेण पठ्यमानेषु अपौरुषेयत्वाभिमानिनो गौडमीमांसकस्यार्थनिश्चयः। न चासौ (चायं) भ्रान्तिः, पौरुषेयत्वनिश्चयदशायामपि तथानिश्चया (थात्वा) दिति॥

[73] स्यादेतत् — नाप्तोक्तत्वमर्थप्रतीतेरङ्गमिति ब्रूमः; किन्त्वनाप्तोक्तत्वशङ्का निरासः (सम्)। स च क्वचिदपौरुषेयत्वनिश्चयात्, क्वचिदाप्तोक्तत्वावधारणादिति चेत् — तन्न किमपौरुषेयत्वस्याप्रतीतौ, संदेहे वा वेदवाक्याद्विदितपदार्थसंगतेरर्थप्रत्यय एव न भवेत्, भवन्नपि वा न श्रद्धेयः? प्रथमे सत्यादय एव प्रमाणम्। नचासंसर्गाग्रहे तदानीं संसर्गव्यवहारः, बाधकस्यात्यन्तमभावात्। तथापि तत्कल्पनायामन्वयोच्छेदप्रसङ्गात्। द्वितीये त्वश्रद्धा प्रत्यक्षवत् निमित्तान्तराभि-

---

रादपि। भवति हि वेदानुकारेणोदात्तादिस्वरसमावेशेन पठ्यमाने मन्वादिवाक्येऽपौरुषेयत्वाभिमानिनो **गौडस्यान**धीतवेदस्य मीमांसकस्यार्थनिश्चयः। नन्वाप्तत्वनिश्चयो वाक्यार्थप्रमां प्रति कारणम्; अयं तु निश्चयो भ्रान्तिरिति चेन्न — मन्वादिवाक्येत्युक्तत्वात्। मनुप्रणीतत्वनिश्चयात्पश्चाज्जायमानस्यार्थनिश्चयस्यचास्य च समानविषयकतया भ्रान्तित्वायोगात्।

[73] तर्ह्याप्तत्वनिश्चयः कारणं मा भूत्। अनाप्तोक्तत्वज्ञानविरहः कारणमस्तु। मन्वादिवाक्येऽपौरुषेयत्वाभिमानिनोऽपि तत्सत्त्वान्न व्यभिचार इति चेत् — किमर्थमिदं कल्पनम्? अशक्यञ्च, तथाहि — किमस्य लोकवेदसाधारण्येन कारणत्वमङ्गीकृत्य, परकोलाहलेन मीमांसानध्ययनेन च येन वेदापौरुषेयत्वमबुद्धं संदिग्धं वा, तस्यापौरुषेयत्वनिश्चयशून्यस्य व्युत्पत्तिमतो वेदश्रवणेऽर्थप्रत्यय एव न जायत इत्युच्यते; किंवा लोकवाक्यमात्रे तस्य कारणत्वं स्वीकृत्य, वेदे जायत एव प्रत्ययः, किंतु जातोऽपि निश्चितप्रामाण्यो नेति? आद्ये सत्यमेव कार्यम्, शपथान्तरं वा प्रयोक्तव्यम्, साधकयुक्त्यभावादनुभवविरुद्धत्वाच्च। न च संसर्गग्रहाभावेऽप्यसंसर्गाग्रहमात्रे सति पीतश्शंख इत्यादिसंसर्ग व्यवहारस्यास्मदिष्टत्वादिहाप्येवम्, नत्वर्थप्रत्यय इति वाच्यम् — तत्र वस्तुतश्शङ्खस्य पीतरूपसंसर्गबाधकसद्भावात्तथा त्वदिष्टत्वेऽप्यत्र वेदवाक्यार्थस्य वस्तुतस्संसृष्टत्वेन तदयोगात्। स्थितस्यासंसर्गस्याग्रहो ह्यसंसर्गाग्रहः। बाधकाभावेऽप्यसंसर्गाग्रहाङ्गीकारे शब्दस्थले सर्वत्र संसर्गग्रहोच्छेदप्रसंगात्। जात इति द्वितीयपक्षे त्वपौरुषेयत्वनिश्चयस्याकारणत्वमेव वेदजन्यबोधे सिद्धमिति तत्राप्रामाण्यज्ञानात्मकाश्रद्धानिवृत्तिः कथमिति चिन्त्यताम्। ज्ञायमानतयाऽकारणे चक्षुरादौ सति शङ्कायामपि सत्यां प्रत्यक्षं भवत्येव किल। तत्र यथा पश्चादेव सफलप्रवृत्तिजनकत्वादिज्ञानात्तन्निवृत्तिः, तथा वेदजन्यबोधेपीति चेत् — लोकेप्याप्तोक्तत्वावधारणाद्यधीनतच्छङ्कानिरासासंभवेपि बोधः पश्चादश्रद्धा-

---

१. बो. 'गौडो मीमांसकः पञ्चिकाकारः। गौडो हि वेदाध्ययनाभावाद्वेदत्वं न जानातीति गौडमीमांसकस्येत्युक्तम्' इति। शब्दमणिमूलगदाधरीयेप्येवम्।

वत्स्यतीति वेदे यदि, लोकेऽपि तथा स्यादविशेषात् ॥

[74] अन्यथा वेदस्याप्यनुवादकताप्रसङ्गः (ङ्गात्) । तदुच्यते (थाहि) ।

व्यस्तपुंदूषणाशङ्कैः स्मारितत्वात् पदैरमी ।
अन्विता इति निर्णीते वेदस्यापि न तत् कुतः ॥ १५ ॥

यदा ह्यपौरुषेयत्वनिश्चयात् प्राक् वेदो न किञ्चिदभिधत्ते इति पक्षः, तदा आप्तोक्तत्वनिश्चयोत्तरकालं लोकवत्, वेदेऽप्यपौरुषेयत्वनिश्चयात् पश्चादनुमानावतारः[1]। इयांस्तु विशेषः—यदत्र पदार्थानेव पक्षीकृत्य निरस्तपुंदोषाशङ्कैराकाङ्क्षादिमद्भिः पदैः स्मारितत्वादाप्तोक्तपदकदम्बकस्मारितपदार्थवत् संसर्ग एवाहत्य साध्यः, बुद्धिव्यवहितस्त्वितरत्रेति । फलतो न कश्चिद्विशेष इति । तथा चान्विताभिधानेऽपि जघन्यत्वाद्वेदस्यानुवादकत्वप्रसङ्गः । न चैवंसति तत्र प्रमाणमस्ति । विशिष्टप्रतिपत्त्यन्यथानुपपत्तिश्च स्यात्, प्रमाणान्तरशब्दाविशेषयोः कल्पन्यायस्यात्राप्यविशिष्टत्वादिति ॥

[74] अन्यथा एतदापत्तिपरिहाराय वेदेऽप्यपौरुषेयत्वनिश्चयापेक्षापक्षमेव परिगृह्यानाप्तोक्तत्वशङ्कानिरासरूपकारणसापेक्षत्वाल्लौकिकशब्दस्यानुवादकत्वस्वीकारे वेदेऽपि तत्कारणसापेक्षत्वस्याविशिष्टत्वात्तस्याप्यनुवादकताप्रसंगः, तत्राप्यनुमानेन संसर्गनिश्चयसंभवात् । नन्वेतानि पदानि स्मारितार्थसंसर्गज्ञानपूर्वकाणि आप्तोक्ताकांक्षादिमत्पदकदम्बत्वादिति लोके शक्यमनुमातुम्; न तु वेदे, अपौरुषेये ज्ञानपूर्वकत्वाप्तोक्तत्वयोरयोगादिति चेत्— उच्यते—अनाप्तोक्तत्वशङ्कानिरासस्यैव लोकेऽपि कारणत्वात् हेतुकोटौ आप्तोक्तत्वं न निवेश्यम्, निरस्तानाप्तोक्तत्वशङ्कत्वमेव पदविशेषणमिति तत्र साम्यमेव । इयांस्तु विशेषः — लोके पदपक्षीकारेण पदत्वहेतुना ज्ञानपूर्वकत्वं साध्यते; वेदे तु तदसंभवात्पदार्थपक्षीकारेण तादृशपदस्मारितत्वहेतुना संसर्ग एव साध्यते । तत्र च ज्ञानद्वारा संसर्गसाधनापेक्षया साक्षात्संसर्गसाधनं ज्याय एव । ज्ञानपूर्वकत्वसाध्यत्वपक्षेऽपि संसर्गसाधन एव तात्पर्यम् । पदपक्षकत्वे साक्षात्साधनासंभवाद्गौरवमाश्रितम् । अतः फलतस्साम्यमेव । भवता चाप्तोक्तत्वनिश्चयादनन्तरमनुमानप्रवृत्तिस्वीकारः, पूर्वं वा? पूर्वञ्चेत्, हेतुकोटावाकांक्षादिमत्त्वमात्रनिवेशादनाप्तवाक्ये हेतुसत्त्वाद्व्यभिचारः । अतः प्रथमपक्षस्वीकारे आप्तोक्तवाक्येष्वर्थसंसर्गस्यावश्यकत्वेन व्यभिचाराभावाल्लोकेऽपि साक्षात्संसर्गसाधनसौकर्याय पदार्थपक्षकानुमानस्वीकारो युक्ततरः । तथाचेमे पदार्था मिथोऽन्विताः विशेषेणास्तपुरुषदोषाऽऽशङ्कपदस्मारितत्वादित्यनुमानेन लोके संसर्गनिश्चये वेदेऽप्येवं संभवात्. लोके प्रकारान्तराश्रयणेऽपि वेद एवमनुमानसंभवाच्चार्थेऽनुमाननिर्णीते सति वेदस्याप्यनुवादकत्वं कुतो नेति । इदञ्चानुवादकत्वापादनमन्विताभिधानशक्तिरस्तीत्यभ्युपगम्य । एवमनुमानेन निर्वाहे सति च तत्र प्रमाणमेव नास्ति; विशिष्टार्थप्रतीत्यन्यथानुपपत्त्यैव शब्दस्यान्विते शक्तिकल्पनात्

१. नेदं वेदेन्वेति । लोके आप्तोक्तत्व निश्चयोत्तरकालमित्यर्थः ।

पत्त्या हि शब्दस्य तत्र शक्तिः परिकल्पनीया । सा चानुमानेनैवोपपन्नेति वृथा प्रयासः। तस्माल्लोके शब्दस्यानुवादकतेति विपरीतकल्पनेयमायुष्मताम् ॥

[75] किं चेदमन्विताभिधानं नाम? न तावदन्वितप्रतिपादनमात्रम्, अविवादात्। नापि स्वार्थाभिधायास्तत्र तात्पर्यम्, अविवादादेव। नापि सङ्गतिबलेन तत्प्रतिपादनम्, वाक्यार्थस्यापूर्वत्वात्। नापि स्वार्थसङ्गतिबलेन, तस्य स्वार्थ एवोपक्षयात्। नापि सैव सङ्गतिरुभयप्रतिपादिका, प्रतीतिक्रमानुपपत्तेः। यौगपद्याभ्युपगमे तु योग्यत्वादिप्रतिसन्धानशून्यस्यापि पदार्थप्रत्ययवत् वाक्यार्थप्रत्ययप्रसङ्गात्। नापि सैव सङ्गतिः स्वार्थे निरपेक्षा, वाक्यार्थे तु पदार्थप्रतिपादनावान्तरव्यापारेति युक्तम्— तस्याः स्वयमकरणत्वात्। सङ्गतानि पदानि हि करणं, न तु सङ्गतिः॥ तथापि तत्प्रतिपादनानुगुणसङ्गतिशालीनि पदानीति चेत् — न तावद्वाक्यार्थप्रतिपादनानुगुणता सङ्गतेस्तदाश्रयत्वेन; सामान्यमात्रगोचरत्वात्, तद्व-

---

तस्याश्चानुमानत एव सिद्धत्वात्। तस्मात्सर्वत्र शब्दोऽनुमानं स्यात्। अथाकाङ्क्षादिमत्पदकदम्बज्ञानमात्रेण व्याप्तिप्रतिसन्धानादेः प्रागेवान्वयप्रतीतिरिति वेदेऽन्विताभिधानमिष्यते, तदा लोकेऽप्येवमेव। तस्माच्छब्दस्यानुवादकतेति कल्पना विपरीतकल्पनैव, लिङ्गस्यैवानुवादित्वात्। अथार्थनिर्णयस्य जातत्वात्सिद्धेऽनुमितेर्नावकाश इति मन्यते, तर्हि शब्दस्थलेऽनुमानकथाया एव नावसरः। एवं व्यवहाराच्छब्दस्यान्विते शक्त्यवधारणाल्लोक एवान्वितशक्तेर्निश्चितत्वात्तत्रैव लोके शब्दस्यानुवादकत्वमिति वो विपरीतकल्पनैव। तस्माच्छब्दसामान्यं पृथक्प्रमाणमिति॥

[75] इदमप्यत्र चिन्त्यते — परपक्षविलक्षणं भवदभिमतं पदानामन्विताभिधायकत्वं नाम किंरूपमिति। न तावत्संसृष्टार्थविषयकशाब्दबोधजनकत्वम्, अन्वितार्थतात्पर्येण पदार्थोपस्थापकत्वं वा, परपक्षाविशेषात्। नाप्यन्वितार्थविषयकसंगतिमत्त्वं तत् — संगति र्हि शक्तिः। तथाच तत्रतत्र वाक्यस्य श्रूयमाणस्य विभिन्नप्रकृतिप्रत्ययात्मकत्वेन पूर्वमज्ञातत्वात्तच्छक्तेः पूर्वमगृहीतत्वेन संप्रति प्रतिसन्धानायोगाद्बोध एव न स्यादिति। नापि पदार्थसंगतिबलेन वाक्यार्थप्रतिपादनं तत्, विकल्पासहत्वात्। सङ्गतिरियं पदार्थमात्रविषयिणी वा वाक्यार्थविषयिण्यपि वा। नाद्यः, तथासति तस्यास्स्वविषयमात्रव्यापृतत्वेनान्वयप्रतिपादनायोगात्। नान्त्यः, पदार्थप्रतीतिकाल एव कारणसत्त्वाद्वाक्यार्थप्रतीत्यापत्तेः। नचेष्टापत्तिः, योग्यताज्ञानादिकारणाभावेपि पदार्थोपस्थितिवत् वाक्यार्थप्रतीत्यापत्तेः। नाप्येकैव संगतिरन्यनिरपेक्षं पदार्थप्रतीतिं जनयति; वाक्यार्थप्रतीतौ च पदार्थप्रतिपादनरूपव्यापारद्वारिका भवतीति युक्तम् — करणस्यैव लोके व्यापारापेक्षत्वात्। पदानामेव त्वन्मतेपि करणत्वात्; संगतेश्चाकारणत्वात्। अथ वाक्यार्थप्रतिपादनानुगुणसंगतिशालित्वात्पदानां करणत्वमिमि चेत् — किमिदं संगतिनिष्ठमनुगुणत्वम्? किं वाक्यार्थप्रतिपत्तिकरत्वाश्रयत्वम्? किंवा वाक्यार्थप्रतिपत्तिजनकव्यापारवत्त्वम्?

न्मात्रगोचरत्वाद्वा। नापि तदनुगुणव्यापारवत्त्वेन, अकरणत्वादित्युक्तम्। तदनुगुणकरणव्यापारोत्थापकत्वात्तदनुगुणत्वे न नो विवादः ॥ अन्वित एव शक्तिरिति-चेत्–उक्तमत्र वाक्यार्थस्यापूर्वत्वात् प्रतीतिक्रमानुपपत्तेश्चेति ॥

[76] स्मृतक्रियान्विते कारके स्मृतकारकान्वितायाश्च क्रियायां सङ्गतिः। अतो नोक्तदोषावकाशः। नापि पर्यायतापत्तिः, प्राधान्येन नियमात्। नापि पौनरुक्त्यं, विशेषान्वये तात्पर्यात्। नापीतरेतराश्रयत्वम्, स्वार्थस्मृतावनपेक्षणात्। नापि

नाद्यः, संगतेस्त्वन्मते जातिमात्रविषयकत्वात्, मन्मते जातिविशिष्टव्यक्तिमात्रविषयकत्वाद्वा-क्यार्थविषयकत्वाभावात्तत्प्रतिपादकत्वानुपपत्तेः। नान्त्यः, संगतेरकरणत्वाद्व्यापारवत्त्वायोगात्। अथ वाक्यार्थप्रतिपत्तिजनकपदार्थोपस्थितिरूपपदव्यापारोपयोगित्वमेव संगतेस्तदनुगुणत्वमिति चेत्—अस्मदिष्टमेवेदमन्विताभिधानम्। ननु नास्मन्मते जातिमात्रविषयकत्वं शक्तेः, किन्त्वन्वयविशिष्टविषयकत्वमिति चेत्–दूषितमेवेदं वाक्यार्थापूर्वत्व-प्रतीतिक्रमानुपपत्तिरूपहेतुभ्यामिति॥

[76] नन्वन्वित एव संगतिः। तत्र न तावत् वाक्यार्थापूर्वत्वरूपदोषः, गामानयेत्यत्र गोपदस्यानयनान्विते शक्तिरित्युक्तौ हि गां बधानेत्यत्र शक्तिग्रहो न स्यात्। नत्वेवम्। पदान्तरस्मारितक्रियान्विते शक्तिरित्येवोच्यते। पदान्तरस्मारितक्रियात्वेन सर्वक्रियासंग्रहोऽस्त्येव। एवं धातोरपि पदान्तरस्मृतकारकान्वितक्रियायां शक्तिः। एतेन — सर्वस्य पदस्य कार्यान्विते शक्तत्वे कार्यवाचिपदस्य कथं कार्यान्विते शक्तिः, तस्य केवले कार्ये शक्तिश्चेत्, अन्विते शक्तिरिति नियमभङ्गः — इति निरस्तम्, सामान्यतः पदान्तरस्मारितार्थान्विते पदस्य शक्तिरिति सिद्धान्तात्, सर्वस्यापीतरान्विते शक्तेरक्षतेः। नापि प्रतीतिक्रमानुपपत्तिरूपदोषः, स्मृतान्विते शक्तेरुक्ततया स्मृतेः प्रागपेक्षितत्वात्। तथाच शक्तिर्द्विविधा स्मारिका, अनुभाविका चेति। प्रथमया विशकलितपदार्थस्मृतिः; द्वितीया अन्वितविषयिणी। नच गामानयेत्यत्र गोपदेन क्रियान्वितकारकशक्तेन क्रिया कारकञ्चोच्यते, धातुनापि तदुभयमिति द्वयोः पर्यायता स्यादिति वाच्यम् – विशेषणविशेष्यभावात्मकगुणप्रधानभावव्यत्यासादर्थविशेषे व्यवस्थितत्वात्। समानविशेष्यकत्वे हि पर्यायत्वम्। न च पर्वतोऽग्निमान्, पर्वतेऽग्निरिति वाक्यद्वयेनैवैकेनोक्तस्यैवार्थस्यान्येन कथनात्पदयोः पुनरुक्ततेति वाच्यम् – गोपदस्य सामान्यतः स्मृतक्रियामात्रान्वितगोपिण्डार्थकत्वादानयनरूपक्रियाविशेषस्य धात्वभावेऽलाभेनापौनरुक्त्यात्। न च कारकपदं क्रियापदेन क्रियायां बोधितायां तद्विशिष्टं कारकं बोधयति, क्रियापदञ्च कारकपदेन कारके बोधिते इत्यन्योन्याश्रितत्वमिति वाच्यम्—कारकपदगतानुभावकशक्तेः क्रियापदगतस्मारकशक्त्यपेक्षत्वेऽपि तदधीनक्रियास्मृतौ सत्यां स्वकार्यक्षमतया क्रियापदगतानुभावकशक्त्यपेक्षत्वाभावात्। एवं क्रियापदेऽपि भाव्यम्। तथाच स्मारकशक्त्या निरपेक्षया पृथक्पृथगर्थोपस्थितिः। अनुभावकशक्त्या पदान्तरस्मारकशक्त्यपेक्षयाऽन्वितबोध इति नान्योन्याश्रयः। नचै-

वाक्यभेदापत्तिः, परस्परपदार्थस्मृतिसान्निधौ तदितरानपेक्षणात्—इति चेत—न- अन्विते संगतिग्रह इति कोऽर्थः? यदि यत्र सङ्गतिस्तद्वस्तुगत्या पदार्थान्वितं, न किञ्चित् प्रकृतोपयोगि। न हि यत्र चक्षुषः सामर्थ्यमवगतं तद्वस्तुगत्या स्पर्शवदिति, तद्वत्ताऽपि तस्य विषयः। अथाऽन्विततयैव तत्र व्युत्पत्तिरित्यर्थः—तदसत्, प्रमाणाभावात् ॥

[77] अन्विताथंप्रतिपत्त्यन्यथानुपपत्तिरिति चेन्न। अनन्विताभिधानेनाप्युपपत्तेः॥ आकाङ्क्षानुपपत्तिरस्तु। न हि सामान्यतोऽन्वितानवगमेऽन्वयविशेषे जिज्ञासा स्यात्—न—दृष्टे फलविशेषे रसविशेषजिज्ञासावदक्षेपतोऽप्युपपत्तेः॥

[78] शब्दमहिमानमन्तरेण यतः कुतश्चिदपि स्मृतेषु पदार्थेषु अन्वयप्रतीतिः

कैकस्यापि पदस्यैकवाक्यरूपतया वाक्यभेदापत्तिरिति वाच्यम्— किं एकैकमपि पदं यत्किञ्चित्क्रियान्तरकारकान्तरान्वितमपि बोधयतु; तथाच गामानयेत्यत्र गां बधान, अश्वमानयेति स्यादिति वाक्यभेद आपाद्यते? किंवा एकेनापि पदेन वाक्यकृत्यस्य विशिष्टबोधस्य कृतत्वात्प्रतिपदं वाक्यभेदस्स्यादिति? नाद्यः, आनयनपदार्थस्मृतिसन्निधौ सन्निहितत्यागेन बन्धनपदार्थानपेक्षणात्। नान्त्यः, गोपदस्यानयपदार्थस्मृतिसत्त्व एव क्रियान्तरापेक्षाऽभावात्, अन्यदा चावश्यं क्रियापदान्तरापेक्षणात्साकांक्षस्थले वाक्यभेदायोगात्। तदुक्तम्—अर्थैकत्वादेकं वाक्यं साकांक्षञ्चेद्विभागे स्यात्' (2—1—46) इति। (नच गोपदार्थे गोर्विशेष्यत्वाद्धात्वर्थे च क्रियायास्तथात्वात्कथमर्थैक्यमिति शङ्क्यम्। एकपदेनान्विताभिधानशक्त्या बोधितविशेष्यविशेषणसंबन्धरूपार्थानामन्यपदबोधितानाञ्च तेषामेकत्वेनार्थैकत्वस्याभिमतत्वात्) तस्मादन्विते संगतौ न काचिदनुपपत्तिरिति चेत्— न - विकल्पासहत्वात्। अन्विते संगतिग्रह इत्यस्य किं अन्वयांशे न शक्तिग्रहः, किन्तु वस्तुगत्या यदन्वयवत् तत्रार्थे शक्तिग्रह इत्यर्थः, यथा चक्षुषा स्पर्शवद्ग्रह इत्युक्तौ चाक्षुषग्रहस्य न स्पर्शविषयकत्वं, तद्वत्— उतान्वयेपि पदार्थ इव शक्तिग्रह इत्यर्थः? नाद्यः, अविवादात्। नान्त्यः प्रमाणाभावात् ॥

[77] नन्वस्ति प्रमाणम्; यथा पदार्थप्रतीत्यन्यथानुपपत्तिः पदार्थे शक्तौ प्रमाणम्, तथाऽन्वयप्रतीत्यन्यथानुपपत्तिरन्वयांशेपि शक्ताविति चेन्न — पदार्थमात्राभिधानेपि हि आकांक्षावशादेवार्थानां मिथस्संबन्ध इति। ननु जिज्ञासानुपपत्तिरूपार्थापत्तिः प्रमाणम्। आनयेत्यस्य सामान्यतः कर्मकारकान्विते शक्त्यभावे हि सामान्यतोपि कर्मणोऽज्ञातत्वात्किमिति कर्मविशेषजिज्ञासा न स्यात्। अज्ञाते सामान्ये विशेषजिज्ञासाऽयोगादिति चेन्न — सामान्यज्ञानस्यावश्यकत्वेपि पदादेव तद्ज्ञानमित्यत्र मानाभावात्। यथा चक्षुषा रसग्रहणाशक्तेन फलविशेषमात्रग्रहेपि, ततः, फलञ्चेत्, रसवदित्यनुमानतस्सामान्यावगतिर्विशेषजिज्ञासा च—तथेहापि पदशक्त्या क्रियामात्रोपस्थितौ तस्याः कारकाविनाभूततया कारकसामान्यानुमितिर्विशेषजिज्ञासाचेति॥

[78] नन्वेवं वस्तुनो वस्त्वन्तरसंबन्धित्वस्वाभाव्यादेव मिथोऽन्वयप्रतीतिरिति तत्र पदेन

स्यात् । न चैवम् । ततः शब्दशक्तिरवश्यं कल्पनीयेति चेत्–कुतस्तर्हि कविकाव्यानि विलसन्ति । न हि संसर्गविशेषमप्रतीत्य वाक्यरचना नाम । न च स्वोत्प्रेक्षायां प्रत्यक्षमनुमानं शब्दस्तदाभासा वा संभवन्ति, अन्यत्र चिन्तावशेन पदार्थस्मरणेभ्यः । असंसर्गाग्रहोऽसाविति चेत्; मम तावत् संसर्गग्रह एवासौ । तथापि सैव पदावली क्वचिदन्वये पर्यवस्यति, क्वचिदनन्वयाग्रहे इति कुतो विशेषात्?

[79] आप्तानाप्तवक्तृकतयेति चेत्; किं तथाविधेन वक्त्रा तत्र कश्चिद्विशेष

कर्तव्यं किमपि नास्तीत्युक्तं भवति । एवञ्च पदं विना स्मारकान्तरवशेन पदार्थोपस्थितावपि मिथोऽन्वयप्रतीतिस्स्यात् । नहि यूनो देवदत्तस्य, बालस्य यज्ञदत्तस्य च परं स्मरणे सति देवदत्तपुत्रोऽयं यज्ञदत्त इति कश्चिदनुभवो जायते । अतः पदपदान्तरप्रकृतिप्रत्ययाद्युपस्थापितानामेवार्थानामन्वयप्रतीतिरिति तस्याः पदार्थस्वाभाव्यायत्तत्वं विसृज्य पदशक्त्यधीनत्वमूरीकार्यमिति चेत् – नायं नियमः, पदशक्त्यैव संसर्गग्रह इति । तथासति कवयः क्रान्तदर्शिनस्तेषां काव्यानि च कुतो विलसेयुः । तत्र हि काव्यवाक्यैर्ये संसर्गविशेषाः प्रत्याय्यन्ते, ते कविभिः प्राक् ज्ञाता एवेति स्वीकार्यम्, संसर्गज्ञानपूर्वकत्वाद्वाक्यप्रयोगस्य सर्वत्र । तत्र च तेषां प्रत्यक्षाद्यगोचरवर्णनप्रकाराणां, चिन्तावशेन पदार्थस्मरणेभ्यो विना न प्रमाणान्तरं ग्राहकं भवितुमर्हति । अतो विशकलिततया पदार्थेषूपस्थितेषु प्रतिभाबलात्तत्र चमत्कारानुगुणस्संसर्गग्रहस्तेषामिति प्रकारान्तरेण पदार्थोपस्थितेरपि संसर्गग्रहे हेतुत्वाच्च पदशक्तिमात्राधीनत्वं तस्येति ॥ ननु काव्यरचनं द्विविधं वस्तुतस्संसृष्टपदार्थविषयकं आरोपितसंसर्गकपदार्थविषयकञ्चेति । तत्राऽऽद्यं परोक्तानुवादरूपं वा प्रत्यक्षानुमानगोचरार्थविषयकं वा प्रागनुभूतविशिष्टपदार्थस्मरणमूलमिति न तत्र काचिदनुपपत्तिः । यत्खलु वस्तुतस्संसृष्टमस्मिन् जन्मन्यननुभूतञ्च, तदपि प्राक्तनसंस्कारबलात्स्मर्यत इति नान्वितग्रहासंभवः । अत एव विलक्षणप्राक्तनसंस्कारोद्बोधभागधेयशालिनामेव कवित्वम् । यत्पुनरसंसृष्टानामेव संघटनं कविलोकप्रसिद्धम्, तत्सर्वमसंसर्गाग्रहमूलमेव कार्यान्तरलक्षेण क्रियत इति ब्रूमः, अस्मन्मतेऽन्यथाख्यात्यभावादिति चेत् – त्वन्मते तथात्वेऽप्यस्मन्मतेऽन्यथाख्यातिस्वीकारात्संसर्गग्रह एवासाविति पदशक्तिं विनापि संसर्गग्रहभावान्नान्विते शक्तिरवश्यं सिध्येत् । तथापि मते काव्ये किञ्चिदन्वयबोधकं, किञ्चिन्नेति विवेके गमकः को विशेषोऽस्ति? पदानां हि सामान्यतोऽन्वित एव शक्तिरवधृता त्वन्मते । न चैकत्र स्थितगोपदमन्यत्र स्थिताद्गोपदादन्यत् । वैदिकस्यापि पदस्य लौकिकादभेदे सुतरां लौकिके परस्परमभेद इति ।

[79] नन्वाप्तवक्तृकं पदमेवान्वितग्रहसमर्थम्, नत्वनाप्तवक्तृकमिति विशेष इति चेत् – प्रत्यक्षतस्तावदाप्तोक्तस्यान्यस्य च गोपदस्य न किमपि वैलक्षण्यं लक्ष्यते । न वा तत्र पदभेदोऽपि । एवमपि तत्र विशेष उच्यमानः कीदृशः? किमाप्तेन तदा तत्र काचन शक्तिराधीयते,

आहितः ? आहो वक्तैवावच्छेदकतया विशेषः ? । प्रथमे अभिहितान्वयवादिनामिव तवापि शक्तिकल्पनागौरवम् । द्वितीये तु वक्तुरिव पदानामप्यवच्छेदकतयैव विशेषकत्वमस्तु ॥ एवं तर्हि पदानामप्यन्वयप्रतीतावस्त्युपयोगः । कस्सन्देहः । परं पदार्थाभिधानेन ; न त्वन्यथा । यथा तवैव, आप्तस्य संसर्गपरतया पदसमभिव्याहारमात्रेण; न त्वन्यथा । अन्यथा गुरुमतविदामेव श्लोक आप्तपदप्रक्षेपेण पठनीयः —

प्राथम्यादभिधातृत्वात् तात्पर्योपगमादपि ।
आप्तानामेव सा शक्तिर्वरमभ्युपगम्यताम् ॥ इति ॥

किंवा आप्तोक्तत्वविशिष्टपदमन्वितग्राहकमित्युक्तया पदविशेषणतया आप्तसत्त्वमेव विशेष इति पृच्छामः । प्रथमे अभिहितान्वयवादिभाट्टमते त्वदुक्तं शक्तिकल्पनागौरवं त्वन्मतेऽप्यस्ति । तथाहि – पदैःपदार्था एवाभिधीयन्ते, नान्वयः ; अभिहितानामेव पदार्थानामन्वयबोधकत्वमिति वदतां मते, पदार्थस्य पदबोध्यतादशायामेव संसर्गबोधकत्वं नत्वन्यदेति विवेचयता त्वया, शक्तित्रयकल्पनापात्तिरुद्भाव्यते – पदानां पदार्थबोधनशक्तिः, पदार्थानां संसर्गबोधनशक्तिः, पदबोध्यतादशायामेव तद्भावात्पदार्थगतायास्संसर्गबोधनशक्तेरनुकूलापि पदे काचिच्छक्तिरिति शक्तित्रयमिति । तत्र शक्तिद्वयं तावत्तवापीष्टम् , पदानां स्मारकशक्तिरान्विताभिधानशक्तिश्चेति । एवञ्च संप्रति पदानामाप्तोक्तत्वदशायामेवान्वितबोधनशक्तिरिति वदता त्वया, तैःपदे स्वीकृततृतीयशक्तिस्थाने, आप्ते पदगतान्वितशक्त्याधानशक्तिस्स्वीकृतेति दोषस्तुल्य इति । तदर्थमाप्ते शक्तिमस्वीकृत्य द्वितीयपक्षग्रहे तु त्वन्मते यथा पदस्यैकस्यैवाप्तोक्तत्वरूपविशेषणविशिष्टतयाऽन्विताभिधायकत्वं, तथा तन्मतेप्येकस्यैव पदार्थस्य पदोपस्थापितत्वरूपविशेषणविशिष्टतया संसर्गबोधकत्वमिति स्वीकारसंभवात्तन्मतेपि न तृतीया शक्तिरिति । नन्वेवं तर्हि पदविशिष्टार्थेष्वेव संसर्गग्रहशक्त्यंगीकारे पदानामप्यन्विताभिधाने उपयोगसिद्ध इति चेत् – अस्त्येव; तत्र कस्संदेहः । परन्तूपस्थाप्योपस्थापकभावसंबन्धेनैव पदवैशिष्ट्यस्यार्थे कथनात्पदस्यार्थोपस्थापकत्वं, अर्थस्यान्वयाभिधायकत्वमित्येतावदेवाभिमतम् , न पुनः पदेऽन्यत्किमपि साक्षादभिधायकत्वशक्तिरूपं वा तदाधायकत्वशक्तिरूपं वा । एवमेव खलूच्चार्योच्चारकभावसंबन्धेनाप्तविशिष्टपदानामन्विताभिधानशक्तिं ब्रुवता त्वया आप्तरूपविशेषणे उच्चारकत्वातिरिक्तं नेष्यते । अन्यथा आप्तेपि शक्तेस्स्वीकारे भाट्टमते, 'पदार्थे काञ्चन शक्तिं स्वीकृत्य तदनुकूलशक्तेः पदे स्वीकारापेक्षया पदानामेव साक्षादन्विताभिधानशक्तिस्स्वीक्रियताम , तत्र पदार्थापेक्षया पदानां ज्ञायमानतायां प्राथम्यं, पदार्थान् प्रति अभिधातृत्वस्य क्लृप्तत्वं, अन्वितप्रतीतिच्छयोच्चारितत्वरूपं तात्पर्यञ्च साधक' मिति निरूपणार्थं पदानामितिपदघटितो यः श्लोकस्त्वन्मते स्थितः, स एव पदानामिति स्थाने आप्तानामितिपदप्रक्षेपेण त्वन्मतदूषणाय पठनीयः । पदेन्विताभिधानं स्वीकृत्याऽऽप्ते तदनुकूलशक्तिकल्पनापेक्षया आप्तएवान्विताभिधानशक्तिस्वीकारौचित्यात् । पदं प्रत्यापि कारणत्वेनाप्तस्य

[80] तस्मात् प्रकारान्तरेण संसर्गप्रत्ययो भवतु मा वा, पदार्थानामाकाङ्क्षादिमत्त्वे सति अभिहितानामवश्यमन्वय इति कुतोऽतिप्रसङ्गः?

[81] न चैवं सति पदार्था एव करणम्, तेषामनागतादिरूपतया कारकत्वानुपपत्तौ तद्विशेषस्य करणत्वस्यायोगात्। तत्संसर्गे प्रमाणान्तरासंकीर्णोदाहरणा-

---

ततोऽपि प्राथम्यं, अभिधानानुकूलशक्तिमत्त्वादन्वयप्रतिपादनेच्छाशालित्वाच्चाञ्जसैवाभिधातृत्वं तात्पर्यञ्चेति गमकत्रयमप्यस्तीति। अतःपदानि द्वारीकृत्याप्तानां शक्तिरुक्ता स्यादिति॥

[80] ननु किमनेन बहुना। नास्माभिराप्ते शक्तिरिष्यते। अपित्वाप्तावच्छिन्नत्वमेव पदे विशेषः। तथाचाप्तोक्तस्थल एव संसर्गग्रहः, अन्यत्रासंसर्गाग्रह इति प्रकृतोऽसंसर्गाग्रहस्समर्थित एवेति चेत्- श्रूयताम्—पदातिरिक्तप्रकारेण संसर्गप्रत्ययो भवति, नवेत्यन्यदेतत्। तत्र श्वेतवर्णस्यानभिव्यक्ताकारस्य वस्तुनः प्रत्यक्षे, हेषाशब्देनाश्वानुमितौ, खुरविक्षेपशब्देन च धावनक्रियानुमितौ पृथक्पृथग्गृहीतानामेषां मिथस्संसर्गावगाहिनी धीरुदेतीति वदन्ति। यदाहुः —'पश्यतश्श्वेतमारूपं हेषाशब्दञ्च शृण्वतः। खुरविक्षेपशब्दञ्च श्वेतोऽश्वो धावतीति धीः॥' (मी. श्लो. वा.) इति। तस्मात्संसर्गप्रत्ययः प्रकारान्तरेण भवेत्। यदि तत्र बाधकाभावादिरूपानुमानेनैव लाघवात् श्वेतस्य धावतश्चाश्वैक्यानुमितिरिति तस्याः धियोऽनुमानाधीनत्वान्न पदार्थभानमात्राधीनतेति पदप्रयोगस्थल एव पदार्थस्मृतिमात्रेण संसर्गधीरित्युच्यते — तर्हि प्रकारान्तरेण संसर्गप्रत्ययो मा भूत्। नेदं मुख्यप्रकृतम्। किंतु पदानामन्विताभिधायकत्वेऽन्यथानुपपत्तिप्रमाणमस्ति नवेत्येतदेव। तत्र यथा आप्तानां पदोच्चारणमात्रोपक्षीणानामन्विताभिधानशक्तिमत्त्वं नास्ति, तथा पदानामपि पदार्थोपस्थापनोपक्षीणानां नान्विताभिधानशक्तिः; किन्तु तृतीयशक्तिकल्पनादोषस्याप्यभावात्पदोपस्थापितत्वविशिष्टार्थानामाकांक्षायोग्यतादिबलादन्वयबोध इति ब्रूमः। ततश्च शब्दमहिमानमन्तरेण यतः कुतश्चित्स्मृतेष्वन्वयप्रतीतिस्स्यादित्यतिप्रसंगाभावान्न शब्दस्यान्विताभिधायकत्वेऽर्थापत्तिरस्ति। (तथाच कुतः कार्यान्विते शक्तिः; कुतस्तरां लौकिकशब्दस्य लाक्षणिकत्वम्; कुतस्तमामननुभावकत्वमनुमानरूपता च तस्येति।)

[81] नचैवमभिहितान्वयपक्षवर्णनाद्भाट्टमतमेव किं भवदादृतमिति शङ्क्यम् — तन्मतादप्यस्मन्मते विशेषात्। तेह्यभिहिताः पदार्था एव बोधे करणमित्याहुः। तत्तु न; पूर्वकालसंबन्धिनमिवोत्तरकालभाविनमुत्पद्यमानञ्च पदार्थमधिकृत्यापि व्यवहारात्, तत्र बोधाच्च। न हि तस्य पूर्वकालासंबन्धिनः कारकत्वं ज्ञानक्रियानिर्वर्तकत्वं भवितुमर्हति; कुत एव कारकत्वविशेषः करणत्वमिति। यदि तावत् पदमन्तरा पदार्थमात्रेण क्वचिदन्वयबोधो जायेत, स्यादपि पदार्थकरणकत्वपक्षः। नत्वेवम्। काव्यस्थले वस्तुतस्संसृष्टपदार्थसंबन्धग्रहस्यान्यथासाधितत्वात्। असंसृष्टपदार्थस्थले च क्वचिद्दोषवशात्संसर्गभ्रमेण, क्वचिद्बाधनिश्चये सति संस-

भावाच्च। पदानां तु पूर्वभावनियमेन पदार्थस्मरणावान्तरव्यापारवत्तया तदुपपत्तेः; व्यापारस्याव्यवधायकत्वादिति कृतं प्रसक्तानुप्रसक्त्या ॥

[82] अस्तु तर्हि शब्द एव बाधकं सर्वज्ञे कर्तरि। तथाहि—

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः।
अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते ॥ (गी.) इत्यादि पठन्ति।

अस्यायमर्थः—न पारमार्थिकं चेतनस्य कर्तृत्वमस्ति। आभिमानिकं तु तत्। न च सर्वज्ञस्याभिमानः। न चासर्वज्ञस्य जगत्कर्तृत्वमस्ति — उच्यते—

न प्रमाणमनाप्तोक्तिर्नादृष्टे क्वचिदाप्तता ॥
अदृश्यदृष्टौ सर्वज्ञो न च नित्यागमः क्षमः ॥ १६ ॥

यदि हि सर्वज्ञकर्त्रभावाऽऽवेदकः शब्दो नाप्तोक्तः, न तर्हि प्रमाणम्। अथाप्तोऽस्य वक्ता, कथं न तदर्थदर्शी ॥ अतीन्द्रियार्थदर्शीति चेत्—कथमसर्वज्ञः, कथं वा न कर्ता, आगमस्यैव प्रणयनात्। न च नित्यागमसम्भवः, विच्छेदादित्यावेदितम् ॥

[83] अपिच — न चासौ क्वचिदेकान्तः सत्त्वस्यापि प्रवेदनात्।
निरञ्जनावबोधार्थो न च सन्नपि तत्परः ॥ १७ ॥

नह्यसत्त्वपक्ष एवागमो नियतः, ईश्वरसद्भावस्यैव भूयस्सु प्रदेशेषु प्रतिपादनात्। तथाचाग्रे दर्शयिष्यामः। तथाच सति क्वचिदसत्त्वप्रतिपादनमनेकान्तं न

र्गारोपेण च निर्वाहात्। श्वेताश्वधावनधियश्चान्यथोपपादितत्वात्। अतः पदार्था न करणम्। पदानां तु करणत्वं सुवचम्, अव्यवहितपूर्ववर्तित्वाभावेपि पदार्थस्मरणद्वारा पूर्ववर्तित्वात्; व्यापारेण व्यवधानस्य चादोषत्वात्। मौनिश्लोकादौ च सूक्ष्मशरीरान्तरुत्पन्नशब्दोऽस्त्येवेत्यलं प्रसक्तशब्दानुमानान्तर्भावदूषणानुप्रसक्तान्विताभिधानादिविचारेण ॥

[82] नन्वेवं शब्दस्यानुमानातिरिक्तत्वेऽनुमानस्याबाधकत्वेपि शब्दो बाधकस्स्यात्। अस्ति च गीतादिशब्दः, यत्र, 'आत्मनः कर्तृत्वं नास्ति; केवलं कर्तृत्वाभिमानः। स च मोहाधीन' इत्युच्यते। ईश्वरश्च भवन्मते कर्ता सर्वज्ञश्च। न च कर्तृत्वस्यात्मनि साक्षात्संभवः। न वा कर्तृत्वाभिमानस्य सर्वज्ञे, अमूढत्वात्। सर्वज्ञत्वासंमतौ च न जगत्कर्तृत्वसंभव इति—उच्यते—इदं हि भगवद्वचनमप्रमाणं, तस्य त्वन्मतेऽनाप्तत्वात्। आप्तश्चेत्तदर्थदर्शी न वा ॥ अदृष्टेत्वर्थे कथमाप्तता। दृष्टे तु अर्थस्येन्द्रियादृश्यस्य दृष्टिस्तस्येष्टेति तस्यां सत्यामयमतीन्द्रियार्थदर्शी कथमसर्वज्ञः। एवं सर्वज्ञेन तस्य वाक्यस्योच्चारणात्स कथमकर्ता। न च नित्येनागमेनेश्वरबाध इति शंक्यम्—न च नित्यागमः क्षमो वक्तुमिति द्वितीयस्तबक एव वेदितत्वात् ॥

[83] अपिच स्वीक्रियतामनेनेश्वरासत्त्वमावेद्यत इति। नचासौ बाधन एव नियतोऽस्ति। द्यावाभूमी जनयन्नित्येवं सत्त्वस्यापि भूयस्सु प्रदेशेषु प्रकर्षेण बोधनात्। तदिदं पञ्चमे

बाधकम् । सत्त्वप्रतिपादनमपि तर्हि न साधनमिति चेत् — आपाततस्तावदेवमेतत् । यदा तु निःशेषविशेषगुणशून्यात्मस्वरूपप्रतिपादनार्थत्वमकर्तृकत्वागमानामवधारयिष्यते, तदा न तन्निषेधे तात्पर्यममीषामिति सत्त्वप्रतिपादकानामेवागमानां प्रामाण्यं भविष्यतीति । न च तेषामप्यन्यत्र तात्पर्यमिति वक्ष्यामः ॥

[84] अस्त्वर्थापत्तिस्तर्हि बाधिका । तथाहि — यद्यभविष्यत्, नोपादेक्ष्यत् । न ह्यसावनुपदिश्य प्रवर्तयितुं न जानाति । अत उपदेश एवान्यथानुपपद्यमानस्तथाविधस्याभावमौदासीन्यं वाऽऽवेदयति — न — अन्यथैवोपपत्तेः ।

हेत्वभावे फलाभावात् प्रमाणेऽसति न प्रमा ॥
तदभावात् प्रवृत्तिर्नो कर्मवादेऽप्ययं विधिः ॥ १८ ॥

बुद्धिपूर्वा हि प्रवृत्तिर्न बुद्धिमनुत्पाद्य शक्यसम्पादना । न च प्रकृते बुद्धिरप्युपदेशमन्तरेण शक्यसिद्धिः, तस्यैव तत्कारणत्वात् ॥ भूतावेशन्यायेन प्रवर्तयेदिति चेत् – प्रवर्तयेदेव, यदि तथा फलसिद्धिः स्यात् । न त्वेवम् ॥ कुत एतदवसितम्? उपदेशान्यथानुपपत्त्यैव । यस्यापि मते अदृष्टवशादेव भूतानां प्रवृत्तिः, तस्यापि तुल्यमेतत् । यद्यस्ति प्रवृत्तिनिमित्तमदृष्टं, किमुपदेशेन, तत एव प्रवृत्ति-

---

दर्शयिष्यते । कतरत्तर्हि प्रमाणमिति चेत्–उभयमपि प्रमाणम् । असत्त्वप्रतिपादकत्वेन प्रतीयमानस्सन्नपि पूर्व आगमस्तत्परो न भवति; जीवात्मनां कर्माधीनविशेषगुणवतां स्वभावतस्तादृशगुणलेपाभावबोधनार्थत्वात् । अतोऽन्यतात्पर्यादबाधकस्स शब्दः । सत्त्वप्रतिपादकशब्दस्यैवाऽऽन्यपर्यं दुर्वचमिति ॥

[84] अथ पञ्चममर्थापत्तिप्रमाणं बाधकम्, वेदसंप्रदायान्यथानुपपत्त्यैव त्वदभिमतसर्वकर्त्रीश्वराभावकल्पनात् । यदीश्वरस्स्यात्, तस्य सर्वोपायवेदित्वादुपदेशं विनैव पुंसः कार्येषु प्रेरयितुं स प्रभवतीति किमुपदेशेन? अत ईश्वरो नास्तीति, स्थितोऽपि पुंसां प्रवृत्तिविषये उदासीन इति वा वक्तव्यम् । तत्र चोदासीनत्वे सर्वकर्तृत्वभङ्गात्तथाविधेश्वरस्वीकाराद्वरं तदभाव इति चेत् — न - उपदेशस्यान्यथोपपन्नत्वात् । कारणाभावे कार्याभावस्य निर्विवादत्वाद्वेदरूपप्रमाणाभावे यागादिपदार्थप्रमाऽभावात्प्रवृत्तिर्न स्यादिति कारणसमवधानसंपत्तये उपदेश उपपद्यते । ननु बुद्धिमनुत्पाद्यैव भूतपिशाचादिवत् अन्तः आविश्य पुंसश्चेष्टयत्विति चेत् — तथासति भूतावेशस्थल इव पुंसः फलभोक्तृत्वं न स्यात्, ज्ञानचिकीर्षापूर्वकप्रयत्नाभावात् । भूतावेशस्थले हि भूतान्येव फलमुपभुञ्जते । ननु ज्ञानचिकीर्षाप्रयत्नाभावे फलं नेत्येतदेव कुतोऽवगतमिति चेत्—किं युक्त्यन्तरान्वेषणेन । यस्मादुपदिश्यैव प्रवर्तयति, तस्मादेवावगम्यत इति । उपदेशोऽपि हीदृश एव लक्ष्यते, स्वर्गकामो ज्योतिष्टोमेन यजेतेति । आस्तामस्मत्पक्षः । कर्मवादेऽप्येवमाक्षेपस्समाधानञ्च तुल्यम् । ईश्वरो माभूत्; पुरुषकर्माधीना सर्वजगत्सृष्टिरिति किल

सिद्धेः । न चेत्, तथापि किमुपदेशेन, तदभावे तस्मिन् सत्यप्यप्रवृत्तेः ॥ नित्यः स्वतन्त्र उपदेशो न पर्यनुयोज्य इति चेत् – यूयं पर्यनुयोज्याः, ये तम (मन) वधानतो धारयन्ति विचारयन्ति चेति ॥

[85] न चार्थापत्तिरनुमानतो भिद्यते, लोके तदसंकीर्णोदाहरणाभावात् प्रकारान्तराभावाच्च । तथाहि–अनियम्यस्य नायुक्तिर्नानियन्तोपपादकः ॥

न मानयोर्विरोधोऽस्ति प्रसिद्धे वाऽप्यसौ समः ॥ १९ ॥

जीवंश्चैत्रो गृहे नास्तीति अनुपपद्यमानमसति बहिःसद्भावे, तमाप (भावे) दयतीत्युदाहरन्ति । तत्र चिन्त्यते–किमनुपपन्नं जीवतो गृहाभावस्येति । न ह्यनि-

वो मीमांसकानां दर्शनम् । तत्राप्युपदेशो व्यर्थः । अस्तिचेददृष्टम्, तत एव पुरुषश्चेष्टिष्यते; न चेत् – उपदेशे कृतेऽपि नेति ॥ उपदेशो हि वेदः प्रत्यक्षसिद्धस्स्वतन्त्रो नित्यः । स कथं पर्यनुयोज्य इति चेत्–को ह्यचेतनं पर्यनुयुञ्जीत । यूयं किल पर्यनुयोज्याः, किमर्थमवधानतो धारयथ विचारयथ चेति । नूनमनवधानत एव धारयथ विचारयथ च, यतस् ~ समुद्घोषित एवेश्वरं वो विप्रतिपत्तिः ॥ (नच दृष्टस्य पूर्वकर्मजन्यत्वात् पूर्वं कर्मसु प्रवृत्तिर्वाच्येति पूर्वपूर्वप्रवृत्तौ बीजाङ्कुरन्यायस्य वाच्यत्वात् इदं धारणविचारणात्मकमपि कर्म अदृष्टार्थमनुष्ठयित इति वाच्यम् – अनधीयाना व्रात्या भवन्तीति कथञ्चिदध्ययनस्य ग्रहणात्मकस्य नित्यत्वेपि अवधानतो धारणस्य तत्रापि विचारणस्यादृष्टार्थत्वायोगात्; सेतिकर्तव्यताकाध्ययनस्यार्थज्ञानार्थताया भवदुक्तत्वात् । अतश्चार्थज्ञानचिकीर्षे विनाऽदृष्टवशादेव प्रवृत्तौ धारणविचारणादि व्यर्थमेव ।) तस्मात्कर्मवादेप्ययं विधिरिति ॥

[85] किञ्चार्थापत्तिरनुमानतो न भिद्यत इति तत एव गतार्थत्वात्पृथगस्या अबाधकत्वनिरूपणमप्यनपेक्षितम् । कुतो न भिद्यत इति चेत्–अनुमानासंकीर्णोदाहरणाभावात् । नन्वसंकीर्णोदाहरणाभावेऽनधिगतार्थगन्तृत्वरूपं प्रामाण्यं मा भूत् । पर्वतोऽग्निमानित्यत्राप्येकप्रमाणप्रवृत्तिदशायामन्यप्रमाणप्रवृत्तिदर्शनादर्थापत्तावप्येवं यथार्थत्वलक्षणं प्रामाण्यमस्त्विति चेन्न – प्रकारान्तरासंभवात् अनुमानप्रकारप्रवृत्तेरर्थापत्तिदशायामावश्यकत्वात् । तथाहि – अर्थापत्तिस्थले अनुपपन्नमुपपादकञ्चेति वस्तुद्वयमपेक्षितम् । तत्र यत् **अनियम्यं** अव्याप्यं तस्या**युक्तिः** अनुपपत्तिर्नास्ति, यश्चा**नियन्ता** अव्यापकः, स उपपादकोपि न भवति । अथ चेत् प्रकारान्तरेणार्थापत्तिर्वर्ण्यते, द्वयोर्विरोधपरिहारोऽर्थापत्तिरिति – तदपि न – नहि द्वयोर्मानत्वे सति विरोधसंभवः । यद्येवं बाधकाभावेपि क्वचिदुदाहरणेऽर्थापत्तिः प्रमाणमितीष्यते, प्रसिद्धवह्निधूमरूपानुमान्तरस्थलेप्यर्थापत्तिसंभवस्तुल्य इति ॥

तदुपपाद्यते – जीवंश्चैत्रो गृहे नास्तीत्येतत् चैत्रस्य बहिरसद्भावेऽनुपपन्नं सत् तस्य बहिस्सद्भावं कल्पयतीत्यर्थापत्त्युदाहरणमाहुः । तत्रानियम्यस्य नायुक्तिः । जीवन्निष्ठगृहाभाव-

यद्यन्यस्यानियामकं विना किञ्चिदनुपपन्नम्, अतिप्रसङ्गात् । ननु स्वरूपमेव । तत् न तावद्बहिःसत्त्वेन कर्तव्यं,तदकार्यत्वात् तस्य।। स्थितिरेवास्य तेन विना न स्यादित्यस्य स्वभाव इति चेत् – एवं तर्हि तन्नियतस्वभाव एवासौ; व्याप्तेरेव व्यतिरेकमुखनिरूप्यायास्तथाव्यपदेशात् ।।

[86] कथं वा (च) बहिःसत्त्वमस्योपपादकम्? न हि अनियामको भवन्नप्यनियम्यमुपपादयति, अतिप्रसङ्गादेव।। स्वभावोऽस्य,यदनेन बहिःसत्त्वेन गेहासत्त्वं क्रोडीकृत्य स्थातव्यमिति चेत्—सेयं व्याप्तिरेवान्वयमुखनिरूप्या तथा व्यपदिश्यते इति ।।

[87] न वयमविनाभावमर्थापत्तावपजानीमहे, किन्तु तज्ज्ञानम् । न चासौ सत्तामात्रेण तदनुमानत्वमापादयतीति चेत्—न—अनुपपत्तिप्रतिसन्धानस्यावश्याभ्युपगन्तव्यत्वात् । अन्यथात्वतिप्रसङ्गात् । अर्थापत्त्याभासानवकाशाच्च । यदा ह्यन्यथैवो(थाप्यु) पपन्नमन्यथाऽनुपपन्नमिति मन्यते, तदाऽस्य विपर्ययः, न त्वन्यथेति ।।

[88] तथापि कथमत्र व्याप्तिर्गृह्येतेति चेत्– यदाऽहमिह तदा नान्यत्र, यदा-

---

संबन्धि किं तावदनुपपन्नं बहिस्सत्त्वाभावे? नह्यव्याप्यमव्यापकं विनाऽनुपपन्नमिति कश्चिद्ब्रूयात् । व्याप्यमेव हि व्यापकं विनानुपपन्नं भवति । अन्यथा गर्दभं विना धूमोऽनुपपन्न इत्यपि स्यात् । ननु गृहाभावसंबन्धि अन्यत् किञ्चिदनुपपन्नमिति नोच्यते, किंतु गृहाभावस्वरूपमेवानुपपन्नमिति चेत् — तत्स्वरूपं कुतोऽनुपपन्नम्? न तावत् बहिस्सत्त्वकार्यं तत्, अभावस्याकार्यत्वात्; बहिस्सत्त्वाभावेपि सत्त्वाच्च । नन्वभावस्य नित्यत्वेपि तस्य स्थितिः संबन्धो बहिस्सत्त्वं विना न स्यादिति दर्शनबलसिद्धस्स्वभाव इति चेत् — तदा बहिस्सत्त्वव्याप्यस्वरूपस्वभावकोऽसौ गृहाभाव इत्युक्तं भवति; विना न भवतीत्यनेन व्यतिरेकव्याप्तेस्तदभाववदवृत्तित्वरूपव्याप्तेश्च निर्देशात् ॥

[86] एवं नानियन्तोपपादकः बहिस्सत्त्वस्य व्यापकत्वे गृहाभावस्य तद्व्याप्यत्वात्तदुपपादकत्वं नास्ति । ननु बहिस्सत्त्वं तादृशगृहाभावमन्तर्भाव्यास्तीति अस्य स्वभाव इति चेत्–तर्हि गृहाभावव्यापकत्वमेव,यत्र गृहाभावो जीवतः, तत्र बहिस्सत्त्वमित्येवंरूपमुक्तमित्यन्वयव्याप्तिरेवेहेति।।

[87] नन्वर्थापत्तिस्थले नाविनाभावस्थितिं निषेधामः, किंतु तज्ज्ञानमात्रम् । अनुमानेत्वविनाभावज्ञानमावश्यकमिति चेत् — अर्थापत्तावनुपपत्तिप्रतिसंधानमावश्यकं न वा । नाद्यः, यत्र वस्तुगत्याऽनुपपत्तिरस्ति, प्रतिसंधानं तु नासीत्, तत्राप्यर्थप्रमितिप्रसंगात्; अर्थापत्त्याभासासिद्धिप्रसंगाच्च । अनुपपत्त्यभावस्थलेप्यनुपपत्तिभ्रमेण किञ्चित्कल्पने हि तदाभासः । अनुपपत्तेस्स्वरूपसत्याः कारणत्वे चाभासस्थले तत्स्वरूपसत्त्वाभावात्कथं विपर्ययापरपर्यायभ्रमात्मककल्पनस्य कार्यस्य प्रसंग इति ॥

[88] नन्वस्त्वनुपपत्तिप्रतिसंधानं, व्याप्तिज्ञानावश्यकत्वञ्च । तथापि कथं व्याप्तिर्गृह्यते

न्यत्र तदा नेहेति सर्वप्रत्यक्षासिद्धमेतत् ; का तत्रापि कथन्ता? । सर्वदेशाप्रत्यक्षत्वे तत्राभावो दुरवधारण इत्यपि नास्ति, तेषामेव संसर्गस्यात्मनि प्रतिषेधात्।। अयोग्यानां प्रतिषेधे का वार्तेति चेत्–तदवयवानां तत्संसर्गप्रतिषेधादेवानुमानात् ; अन्येषां न काचित्। न ह्यकारणीभूतेन परमाणुना नेदं संसृष्टमिति निश्चेतुं शक्यमिति।।

[89] न चा (नाप्य) विनाभावनिश्चयेनापि गमयन्नपक्षधर्मोऽर्थापत्तिरिति युक्तम्–पक्षधर्मताया अनिमित्तत्वप्रसङ्गात् ; अविशेषात् । व्यधिकरणेनाविनाभावनिश्चयायोगाच्च; यत् यत्र यदेति प्रकारानुपपत्तेः ।।

[90] प्रमाणयोर्विरोधे अर्थापत्तिरविरोधोपपादिका, न त्वेवमनुमानमित्यपि

दृष्टान्तालाभादिति चेत् – एकैकस्यापि पुंसस्स्वात्मविषये एकत्र देशे सत्त्वेऽन्यत्रासत्त्वस्य , अन्यत्रासत्त्वेऽत्र सत्त्वस्य च प्रत्यक्षसिद्धत्वात्तद्दृष्टान्तेन व्याप्तिस्सुग्रहैव । किं तत्रापि सर्वप्रत्यक्षासिद्धेऽर्थे कथमितिशङ्काऽस्ति ? नन्वस्त्येव; तत्र केषाञ्चिद्देशानामप्रत्यक्षत्वात् सर्वे तद्देशा मदभाववन्त इति हि दुर्ग्रहमिति चेत्–न– देशेन्द्रियसन्निकर्षाभावाद्देशविशेष्यकप्रत्यक्षासंभवेऽपि अहं सर्वदेशसंबन्धाभाववानिति स्वात्मविशेष्यकप्रत्यक्षसंभवात् । नन्वभावप्रत्यक्षे प्रतियोगियोग्यतायास्तन्त्रत्वात्कथमयोग्यानां सर्वान्तर्गतानां देशानां संबन्धाभावो गृह्यत इति चेत् – अयोग्यास्ते किं योग्यावयव्यवयवभूताः उतानारब्धावयविककेवलाणुभूताः ? तत्रावयवभूतानामयोग्यानां संबन्धाभावः प्रत्यक्षासिद्धादवयविसंसर्गप्रतिषेधरूपाद्धेतोरनुमितो भविष्यति । अन्येषां तु संसर्गप्रतिषेधो न क्रियते, नचापेक्ष्यत इति ॥

[89] नच — सत्यं व्याप्तिस्सुग्रहा; अनुपपत्तिप्रतिसंधानञ्च व्याप्तिप्रतिसंधानमेव । अथाप्यर्थापत्तिस्थले साधकस्य पक्षधर्मत्वाभावादननुमानत्वम् । चैत्रो बहिरस्ति गृहस्य चैत्राभाववत्त्वादिति किलोच्यते – इति युक्तम् — व्याप्तिग्रहस्य पक्षधर्मतानिरपेक्षं क्वचिदर्थसाधकत्वे विशेषाभावादनुमानेपि पक्षधर्मताया अनपेक्षितत्वापातात् । वस्तुत उभयोस्सामानाधिकरण्यग्रहं विनाऽविनाभावनिश्चय एव न संभवति । व्याप्तिग्रहणप्रकारो हि त्रेधा भवति । यत् हेतुमत् तत् साध्यवत् , यत्र हेतुस्तत्र साध्यम् , यदा हेतुस्तदा साध्यमिति। इदं यत् , यत्र, यदा इति प्रकारत्रयमपि न स्यात्सामानाधिकरण्याग्रहणे । तथाच पक्षवृत्तित्वग्रहोपि सुलभः, चैत्रो बहिरस्ति गृहावृत्तित्वादिति ॥

[90] ननु जीवत्त्वविशिष्टगृहाभावेन बहिस्सत्त्वकल्पना अर्थापत्तिरित्युक्तौ तेन तदनुमानस्यैव भावान्न मानान्तरप्रसक्तिः । नत्वेवमुच्यते, असंभवात् । जीवत्त्वं सप्राणतया सत्त्वम् । तच्च देशाभावेऽसंभवाद्यत्रक्वाचित्सत्त्वरूपम् । तत्र क्वाचिदित्यनेन गृहग्रहणे गृहाभावेन सह क्वाचित्सत्त्वस्यास्य विरोध इति क्वाचित्सत्त्वं बहिस्सत्त्वरूपमेवैष्टव्यम् । तथाच गृहाभावेन सह किञ्चि-

---

१. बो ' यत् साधनं यत्र देशे यदा यस्मिन् काले तत्र तदा वा तत्साध्य ' मिति ।

नास्ति। विरोधे हि रज्जुसर्पादिवदेकस्य बाध एव स्यात्, न तूभयोः प्रामाण्यम्। प्रामाण्ये वा न विरोधः, स्थूलमिदमेकमितिवत् सहसंभवात्; चैत्रोऽयमयं तु मैत्र इतिवद्वा विषयभेदात्॥ प्रकृते क्वाप्यस्तीति सामान्यतो गेहस्यापि प्रवेशादेकविषयताऽप्यस्तीति चेत् — यद्येवं, क्वचिदस्ति क्वचिन्नास्तीतिवन्न विरोधः॥ अत्रापि विरोध एवेति चेत् — एकं तर्हि भज्येत॥

[91] न भज्येत, अर्थापत्त्या उभयोरप्युपपादनादिति चेत् — किमनुपपद्यमानम्? विरोध एवान्यथानुपपद्यमानो विभिन्नविषयतया व्यवस्थापयतीति चेत् — अथाभिन्नविषयतयैव किं न व्यवस्थापयेत्॥ व्यवस्थापनमविरोधापादनम्। एक-

देशसत्त्वरूपजीवत्त्वज्ञानमेव बहिस्सत्त्वज्ञानमिति तस्य तज्जन्यत्वाभावान्नानुमानस्यार्थापत्तेर्वा प्रसक्तिरत्रेति। तर्ह्यत्र का अर्थापत्तिरिति चेत् — श्रूयताम्। क्वचिदित्यस्य सामान्यनिर्देशरूपतया गृहपरत्वे संभवद्विरोधज्ञानमेवार्थापत्तिप्रमाणम्। तस्य बहिरर्थकत्वस्वीकारेण, क्वचिदस्ति, गृहे नास्तीति मानद्वयस्याविरोधग्रहणमर्थापत्तिप्रमितिः। नह्येवं मानयोर्विरोधेऽविरोधोपपादनमनुमानेऽस्तीतीदमतिरिक्तं प्रमाणमिति चेत् — एतदपि नास्ति; तथाहि — मानयोर्विरोध इत्युक्तेरेव व्याहतत्वात्। यद्युभयोर्विरोधः, तर्हि रज्जुज्ञानसर्पज्ञानयोर्मध्य इव एकस्यान्येन बाधस्स्यादिति नोभयोर्मानत्वम्। यदि वा द्वयोर्मानत्वम्, तर्हि इदं स्थूलं, इदमेकमिति मानयोरेकस्मिन्नेव वस्तुनि स्थूलत्वैकत्वरूपाविरुद्धधर्मग्राहित्वेन, अयं चैत्रः, एष तु मैत्र इति मानयोरिव विभिन्नधर्मिग्राहित्वेन वा मानत्वमुपपाद्यमिति विरोध एव नास्ति। तथाच क्वचित्पदेन गृहग्रहणपक्षे एकस्यामानत्वमेव। तस्य बहिरर्थकत्वे चाविरोध एवेति मानयोर्विरोध इत्युक्तिरसंगतेति। ननु प्रकृते क्वाप्यस्तीति निर्देशे किञ्चित्पदस्य देशसामान्यवाचितया बहिरर्थकत्वाप्रतिषेधात् मानत्वं, गृहार्थकत्वाप्रतिषेधादेकविषयकत्वनिबन्धनो विरोधश्चास्तीति चेत् — यद्येवं किञ्चित्पदस्य सामान्यनिर्देशरूपत्वमिष्यते, तर्हि क्वचिदस्ति, क्वचिन्नास्तीति वाक्ययोरिव विभिन्नदेशविषयकतया, क्वचिदस्ति, गृहे नास्तीत्यनयोरपि विरोधो नास्त्येवेति कथं विरोधप्रदर्शनम्। नन्वत्रापि दृष्टान्ते सामान्यनिर्देशाद्विरोध उक्तरीत्याऽस्त्येवेति कथं तत्राविरोधसिद्धवत्कार इति चेत् — एवमवश्यं विरोधसत्त्वे, अत्र फलानि सन्ति, अत्र फलानि न सन्तीत्यनयोः, इयं रज्जुः अयं सर्प इत्यनयोश्च मध्ये एकमिवात्राप्येकं भज्येतैवेति कथं द्वयोर्मानत्वम्॥

[91] ननु न भज्येतैकमपि। अप्रतिसमाधेयविरोधस्थले ह्येकस्य भज्यमानत्वममानत्वञ्च। अत्र तु विरोधः प्रतिसमाधेयः। अतोऽर्थापत्त्या मानयोरुभयोरप्युपपादनादभङ्ग इति चेत् — अनुपपत्तौ सत्यामुपपादनापेक्षा। अत्र किमनुपपन्नम्। मानद्वयस्वरूपे तावन्नानुपपत्तिः। ननूभयगतो विरोध एव ज्ञायमानोऽनुपपन्नोऽर्थापत्तिरूपोऽविरोधं कल्पयति। अविरोधकल्पनं नाम विभिन्नविषयकतया द्वयोर्व्यवस्थापनमिति चेत् — अत्र को नाम विरोधः, तस्य का

विषयतयैव चानयोर्विरोधः । स कथं तयैव शमयितव्यः । न हि यो यद्विषमूर्च्छितः, स तेनैवोत्थाप्यते इति चेत्—एकविषयतया अनयोर्विरोध इत्येतदेव कुतः॥ विभिन्नदेशस्वभावतयैव सर्वत्रोपलम्भादिति चेत् – नन्वियं व्याप्तिरेव । तथाच घट्टकुट्यां[1] प्रभातमिति ॥

नामानुपपत्तिः, कथञ्च तेनाविरोधकल्पनमित्येतद्विवेचनायात्र किञ्चित्पृच्छयते—विरोधो मानद्वयं विभिन्नविषयकतया व्यवस्थापयतीति कुतः, लोके स्थूलमिदं, इदमेकमिति मानद्वयस्यैकविषयकत्वस्यापि दर्शनेनाभिन्नविषयकतयैव व्यवस्थापनां विरोधप्रमाणं न कुतः कुर्यादिति । ननु विरोधस्य गृहरूपैकविषयकत्वनिबन्धनत्वादविरोधापादनरूपं व्यवस्थापनं विभिन्नविषयकत्वकल्पनयैव कार्यमिति चेत्—विरोधस्यास्यैकविषयकत्वाधीनत्वमेव कुत इत्युच्यताम् ॥ उच्यते । भावाभावयोस्सर्वत्र विभिन्नदेशनिरूपितत्वस्वभावोपलम्भात् क्वचिदस्तीत्युक्तस्य सत्त्वस्य, गृहे नास्तीत्युक्तासत्त्वनिरूपकदेशनिरूपितत्वे विरोधो भवेदेवेति चेत्– तर्ह्येतावतेदमुक्तं भवति—अत्र क्वचिदस्तीत्यस्य वस्तुतो बहिर्विषयकतया वस्तुतो विरोध एव नास्ति; किन्तु तदनवधारणदशायां विरोधस्फूर्तिमात्रम् ! मानयोर्विरोध इत्यत्र च एकमानस्यापरमानबाध्यार्थविषयकत्वरूपविरोधज्ञानं विवक्षितम् । इदञ्चोभयोरप्येकस्थानविषयकत्वे भवति । यद्यत् मूर्तस्य सत्त्वं तत्तत् असत्त्वदेशभिन्नदेशनिरूपितमिति, सत्त्वविषयकप्रमात्मकज्ञानमसत्त्वविषयकप्रमात्मकज्ञानविषयदेशभिन्नदेशविषयकमिति च व्याप्तेर्निश्चितत्वात् सत्त्वविषयकप्रमात्वस्य च सत्त्वविषयकाबाध्यार्थविषयकत्वरूपतया अबाध्यार्थविषयकत्वव्यापकत्वस्य च भिन्नदेशविषयकत्वे गृहीतत्वात् भिन्नदेशविषयकत्वाभावे अभिन्नदेशविषयकत्वे बाध्यार्थविषयकत्वमावश्यकमिति । एवञ्च प्रकृते क्वचिदस्तीत्यस्य गृहविषयकत्वमपि स्वीकृत्य मानत्वमपीष्यते चेत् — बाध्यार्थविषयकत्वज्ञानं जातमनुपपन्नमेव भवति । अतस्तत् अन्यथानुपपद्यमानं विभिन्नदेशविषयकत्वं स्थापयित्वा मानत्वमबाध्यार्थविषयकत्वं संपादयति । इत्थञ्च यदि वह्निर्न स्यात्, तर्हि धूमोऽपि न स्यादितिवत् यदि अभिन्नदेशविषयकत्वं स्यात्, अविरोधो न स्यात्, विरोध एव स्यादिति तर्कात्मकं विरोधज्ञानं विरोधस्यानिष्टतया अविरोधं स्थापयितुं भिन्नदेशविषयकत्वं गमयति । अतश्चाविरोधो रक्षितो भवतीत्युक्तप्रायमिति व्याप्तिरेव गृह्यमाणा कार्यकरीति । तथाच यथा प्रभातसमय एव प्रस्थाय क्षिप्रं सुप्रापं देशं घट्टकुटीशुल्कदानपरिजिहीर्षया दवीयसापि मार्गान्तरेण प्रपित्सोर्भ्रान्तस्य शाकटिकस्य घट्टकुटग्राम एव प्रभातम्, परिगृहीतस्यापि मार्गस्य क्रमेण तद्घट्टकुटीसमागामित्वात्, मार्गान्तरेऽपि घट्टकुटयन्तरसद्भावाद्वा—तथैव तेऽनुमानप्रवृत्तिपरिजिहीर्षया प्रथमरीतिपरित्यागेन विरोधाविरोधरूपाविलक्षणवर्त्मगामिन इति । तस्सिद्धं न **मानयोर्विरोधोऽस्तीति॥**

1. बो. 'रात्रावेव शुल्कशालातिक्रमितव्येति गच्छतस्तस्यामेव प्रभाता शर्वरी' ति ।

[92] धूमोपि वा अनुपपद्यमानतयैव वह्निं गमयेत् । न हि तेन विना असावुपपद्यते । विरोधोपि- धूमाद्वह्निना भवितव्यम् , अनुपलब्धेश्च न भवितव्यमिति । तथाचानुपलब्धेरर्वाग्भागव्यवस्थापनं, धूमस्य च व्यवधानेनानुपलभ्यवह्निविषयत्वास्थितिरर्थापत्तिरिति कुतोऽनुमानम् ॥ वह्निमानयमित्यनुमानं व्याप्तेः; अन्यथा अनुमानाभावे विरोधासिद्धेः । अर्वाग्भागानुपलब्धिविरोधेन परभागेऽस्य वह्निरित्यर्थापत्तिरेवेति चेत् – न – व्याप्तिग्राहकेण प्रमाणेन विरोधस्योक्तत्वात् । नाप्युत्तरा अर्थापत्तिः । अन्यथा पाण्डरत्वस्यापालालत्वविरोधेन पालालत्वस्थितिरित्यर्थापत्तिरेव स्यात्॥ तद्विशिष्टस्य तेनैव व्याप्तेर्नैवमिति चेत्-यद्येवं, अर्वाग्भागानुपलभ्यमानवह्नित्वेन (मत्त्वेन) विशिष्टस्य धूमस्य तेनैव व्याप्तेः कथमेवं भविष्यतीति तुल्यम् ॥

[93] केवलव्यतिरेक्यनुमानं पराभिमतमर्थापत्तिः; अन्वयाभावादिति चेत् –

---

[92] **प्रसिद्धे वाऽप्यसौ समः**, वह्निधूमस्थलेपि सामान्यतोऽनुपपत्तेर्विरोधरूपार्थापत्तेश्च सुवचत्वात् । वह्निं विना धूमस्यानुपपन्नत्वादनुपपत्तिसत्त्वं स्पष्टम् । विरोधोप्यस्ति, धूमसत्त्वाद्वह्निना भाव्यमित्यस्य, वह्नेरनुपलभ्यमानत्वात्तेन न भाव्यमित्यस्य चैवं विरोधे सति अनुपलब्धेर्न भाव्यमित्यस्येन्द्रियासन्निकृष्टपर्वतीयार्वाग्देशविषयकत्वेन, धूमाद्भाव्यमित्यस्य चासन्निकृष्टदेशे वह्निविषयकत्वेनाविरोधसंपादनादिति । अतोऽनुमानप्रमाणं न स्वीकार्यमिति । नन्वत्रानुमानमर्थापत्तिरित्युभयमप्यंशभेदेनास्तीति ब्रूमः । तथाहि — धूमाद्वह्निना भाव्यमित्यनेन हि धूमाद्वह्न्यनुमितिरेवोक्तेत्यनुमानमप्रवृत्तम् । एवमनुमानस्य प्रवृत्तत्वादेव अनुपलब्धेर्न भवितव्यमित्यस्य तेन विरोधस्सिध्यति । एवमनुमानासिद्धौ पश्चाद्विरोधेन यत् , न भवितव्यमित्यस्यार्वाग्भागविषयकत्वव्यवस्थापनं, तत्रार्थापत्तिरेवेति चेत् — न – नह्यनुमितेरनुपलब्धेश्चात्र विरोधो विवक्षितः, किन्तु यत्र धूमस्तत्राग्निरिति व्याप्तिविषयकज्ञानस्यानुपलब्धेश्च विरोधः । अतो विरोधसिद्धयेऽनुमितेरनपेक्षितत्वान्नानुमानं सिध्यति । यात्वनुपलब्धिविरोधेन धूमवति वह्नेः परभागे व्यवस्था, सापि नार्थापत्तिः, अनुमानेनैव निर्वाहात् । अयं पलालजन्यः पाण्डरधूमत्वादित्यनुमानस्थलेपि पाण्डरधूमेऽपालालत्वविरोधः पालालत्वं व्यवस्थापयतीत्यर्थापत्तिरुच्यताम् । ननु पाण्डरत्वविशिष्टधूमत्वस्य पालालत्वेन व्याप्तिसत्त्वान्नात्रार्थापत्तिरिति चेत् —अर्वाग्भागेऽनुपलभ्यमानवह्निकत्वविशिष्टधूमस्यापि परभागवृत्तिवह्निना व्याप्तिसत्त्वात्कथं तत्र परं अर्थापत्तिः । अतोऽर्थापत्तिस्वीकारे प्रसिद्धस्थलेपि तदापत्तिरिति । नच युक्त्यन्तरेणार्थापत्तेरनुमानस्य च पार्थक्ये सिद्धे क्वचित्प्रसिद्धस्थलेष्युभयोस्समावेशो न दोषायेति वाच्यम्–अर्थापत्तिस्थले सर्वत्र व्याप्तिज्ञानावश्यकतायाः प्रागुक्तत्वेनार्थापत्तिपार्थक्यस्यैवासिद्धेः ॥

[93] ननु नैयायिकैः केवलव्यतिरेकीति कथ्यमानमन्वयव्याप्तिरहितमस्माभिरर्थापत्तिरि-

एवमेतावता विशेषेणानुमानेऽर्थापत्तिव्यवहारं न वारयामः ॥ तत्रानुमानव्यवहारः कुत इति चेत्—अविनाभूतलिङ्गसमुत्पन्न (मुत्थ) त्वात् । साध्यधर्मेण विना ह्यभवनमन्वयिन इव व्यतिरेकिणोऽप्यविशिष्टम्, तन्निश्चयश्चाऽन्वयव्यतिरेकाभ्यामन्यतरेण वेति । तस्मादर्थापत्तिरित्यनुमानस्य पर्यायोऽयं, तद्विशेषवचनं वा पूर्ववदादिवदिति युक्तम् ॥

[94] अनुपलब्धिस्तु न बाधिकेति चिन्तितम् । न च प्रत्यक्षादेरतिरिच्यते । तदुच्यते— प्रतिपत्तेरपारोक्ष्यादिन्द्रियस्यानुपक्षयात् ।
अज्ञातकरणत्वाच्च भावावेशाच्च चेतसः ॥ २० ॥

[95] या हि साक्षात्कारिणी प्रतीतिः, सा इन्द्रियकरणिका, यथा रूपादिप्रतीतिः; तथेह भूतले घटो नास्तीत्यपि॥ साक्षात्कारित्वमस्या असिद्धमिति चेन्न—

त्युच्यते इति चेत् — तर्हि केवलव्यतिरेक्यनुमानस्यार्थापत्तिरिति नामकल्पनमात्रम् । तावता न प्रमाणान्तरमिति । ननु केवलव्यतिरेकिण्यनुमानव्यवहारो न युज्यते; यत्र व्याप्तस्य पक्षधर्मत्वज्ञानं तत्रानुमानं भवति; केवलव्यतिरेकिणि च हेत्वभावव्याप्तिस्साध्याभावस्या, हेतोश्च पक्षधर्मत्वमिति वैलक्षण्यादिति चेत् — उच्यते — अविनाभावो हि व्याप्तिः । साध्यं विना हेतुर्न भवतीति तदर्थः । इयञ्च व्याप्तिरन्वयिनि व्यतिरेकिणि चाविशिष्टा । इयान् विशेषः — केवलान्वयिन्यन्वयमात्रादिव केवलव्यतिरेकिणि व्यतिरेकमात्राद्व्याप्तिनिश्चयः; अन्यत्रान्वयेन व्यतिरेकेण चेति । अन्यथाऽन्वयव्यतिरेकिण्यपि व्यतिरेकांशमादायार्थापत्तिस्स्यात् । तत्र व्यतिरेकस्यान्वयव्याप्तिग्राहकत्वेनोपयोगे प्रकृतेप्येवमस्तु । तस्मात्पूर्वोक्तरीत्याऽनुमानं सर्वमपि वाऽर्थापत्तिर्भवति, अन्तिमोक्तविधयाऽनुमानविशेषस्यैव वार्थापत्तिरिति नामान्तरम्, पूर्ववच्छेषवत्सामान्यतोदृष्टमिति सूत्रोक्तविभागवदिति । अतोऽर्थापत्तिरनुमानमेवेति सिद्धम् ॥

[94] एवं पञ्चानामबाधकत्वमुपपादितम् । अनुपलब्धेस्त्वबाधकत्वं प्रत्यक्षाबाधकत्वचिन्तावसर एवोक्तम्, ईश्वरविषये योग्यानुपलब्ध्यसंभवस्योक्तत्वात्; अनुपलब्धिमानान्तरवादिभिर्योग्यानुपलब्धेरेव तथात्वस्वीकारात्। परन्तु तत् पृथक्प्रमाणं न वेति प्रासङ्गिकविचार एव ।शिष्यते। तत्रोच्यते —नानुपलब्धिः प्रत्यक्षानुमानोभयातिरिक्तेति। तत्रानुपलब्धिविशेषस्य प्रत्यक्षान्तर्भावः श्रूयताम्—इयमभावप्रतिपत्तिरिन्द्रियकरणिका अपरोक्षरूपत्वात्, कार्यान्तरानुपक्षीणेन्द्रियसापेक्षत्वात्, अज्ञायमानकरणकत्वात्, मनसो भावरूपं करणान्तरमाविश्यैव बाह्यानुभवजनकत्वदर्शनबलसिद्धात् मनस्सहकारिभावभूतकरणसापेक्षत्वरूपहेतोश्च रूपादिप्रतीतिवदिति ॥

[95] नन्वत्र प्रथमहेतुरसिद्धः, विषये लौकिकविषयत्वरूपसाक्षात्त्वापादकत्वं हि साक्षात्कारित्वमपरोक्षत्वञ्च । तत् रूपादिप्रतिपत्तेरेव, नानुपलब्धिजन्याया इति चेन्न — अज्ञातकरणकत्वेनापरोक्षत्वसाधनसंभवात् । अनुपलब्धिर्हि ज्ञायमाना कदाचित्कारणम्, कदाचिच्चाज्ञाय-

एकजातीयत्वे ज्ञाताज्ञातकरणत्वानुपपत्तेः । न हि तस्मिन्नेव कार्ये तदेव करणमेकदा ज्ञातं अज्ञातञ्चैकदोपयुज्यते, लिङ्गेन्द्रिययोरपि व्यत्ययप्रसङ्गात्, ज्ञानस्याकारणत्वप्रसङ्गाच्च । न हि तदतिपत्यापि भवतस्तत्कारणत्वं, व्याघातात् । तस्मात् ज्ञातानुपलब्धिजन्यस्य साक्षात्कारित्वात् तद्विपरीतकारणकमिदं तद्विपरीतजातीयमिति न्याय्यम् ॥ ननु क्व नाम ज्ञातानुपलब्धिरसाक्षात्कारिणीमभावप्रतीतिं जनयति? तद्यथा — निपुणतरमनुसृतो मया मन्दिरे चैत्रः; न चोपलब्ध इति श्रुत्वा श्रोताऽनुमिनोति, नूनं नासीदेवेति । एतेन प्राङ्नास्तिताऽपि व्याख्याता ॥ ननु तथाप्यवान्तरजातिभेदोऽस्तु; अज्ञातानुपलब्धिजन्ये साक्षात्कारस्तु कुत इति चेत् —

माना । तत्र ज्ञातानुपलब्धेः परोक्षज्ञानजनकत्वादज्ञातानुपलब्धेः परोक्षविसजातीयज्ञानजनकत्वम्, एकजातीयकार्यं प्रति ज्ञातत्वाज्ञातत्वोभयरूपेण कारणत्वानुपपत्तेः । अन्यथा लिङ्गस्यापि कदाचिदज्ञायमानतया, इन्द्रियस्यापि जातु ज्ञायमानतया च करणत्वप्रसंगात् ! ज्ञातत्वनिरपेक्षमपि कदाचित्तज्जातीयकार्यसंभवे ज्ञानस्य कारणत्वासंभवाच्च । नहि ज्ञानमतिपत्य भवतो ज्ञानकारणकत्वम् । तदतिपाततद्व्याप्यत्वयोर्विरुद्धत्वात् । नन्वनुपलब्धिर्ज्ञायमाना सती क्व परोक्षज्ञानं जनयतीति चेत् — तदुदाहियते — मन्दिराच्चैत्रमानेतुमाज्ञप्तः प्रेष्यः स्वामिने कथयति — निपुणतरमनुसृतो मया मन्दिरे चैत्रः; एवमपि नोपलब्ध इति । एवं शब्दान्मन्दिरे चैत्रस्य योग्यानुपलब्धिं श्रुत्वा स्वामी अनुमिनोति, प्रेष्यप्रवेशसमये चैत्रो मन्दिरे नासीदिति । अत्र परकीयानुपलब्धिश्शब्दतो ज्ञायमाना अनुमितिजनिका । एतेन प्राक्कालिकाभावग्रहणमपि व्याख्यातम् । तथाहि — चैत्रो मन्दिरे प्रातरासीत्किमिति मध्याह्ने जिज्ञासायां कश्चिदेवं मन्यते— निपुणतरं प्रातश्चैत्रान्वेषणाय निरीक्षितनिखिलदेशेनापि मया यस्माच्चैत्रो नोपलब्धः, तस्मात्तदा तत्र नासीदिति । अत्र स्वयमेव स्वकीयानुपलब्धिं कालान्तरे ज्ञात्वाऽनुमिनोति । यद्वा **निपुणतरमनुसृत** इति चैत्रसंयोगध्वंसरूपं नास्तित्वमुक्तम् । एतेन चैत्रसंयोगप्रागभावरूपं नास्तित्वमप्येवमनुपलब्ध्यनुमेयतया व्याख्यातमिति । तथाच ज्ञातानुपलब्धेः परोक्षज्ञानजनकत्वं सिद्धम् । इयञ्चानुपलब्धिरनुमानेऽन्तर्भवति । अतो भूतले घटाभावप्रतीतिजनिकाया अज्ञातानुपलब्धेर्न परोक्षजनकत्वं युक्तम् ॥ नन्वस्तु कार्यद्वये वैजात्यम् । तत्र परोक्षत्वापरोक्षत्वरूपम्; किन्तु परोक्ष एवानुमितित्वशाब्दत्वादिवत् अवान्तरवैजात्यरूपम् । तथाच ज्ञातानुपलब्धिजन्या अनुमितिरूपा, अन्या तु षष्ठप्रमाणजन्या षष्ठी प्रतीतिः । अतस्तस्याः विषयसाक्षात्त्वापादनात्मकसाक्षात्कारवत्त्वं न भवतीति चेत् — कारणवैलक्षण्यात्कार्यवैलक्षण्यमावश्यकमित्युक्तम् । प्रत्यक्षे इन्द्रियस्य स्वरूपतः करणत्वात् अनुमितिशाब्दबोधादौ ज्ञायमानस्यैव करणत्वात्परोक्षानुभवत्वावच्छिन्नं प्रति ज्ञायमानत्वावच्छिन्नं करणं, साक्षात्कारिज्ञानत्वावच्छिन्नं प्रति चाज्ञायमानं करणमिति सामान्यकार्यकारणभावस्य

कारणविरोधात् कार्यविरोधेन भवितव्यमित्युक्तमेव ॥

[96] अनन्यत्रोपक्षीणेन्द्रियव्यापारानन्तरभावित्वाच्च॥ अधिकरणग्रहणे तदुपक्षीणमिति चेन्न—अन्धस्यापि त्वगिन्द्रियोपनीते घटादौ रूपविशेषाभावप्रतीतिप्रसङ्गात्। अस्ति हि तस्याधिकरणग्रहणम्। अस्ति च प्रतियोगिस्मरणम्। अस्ति च श्यामे रक्तत्वस्य योग्यस्याभावोऽनुपलब्धिश्च ॥ अधिकरणग्राहकेन्द्रियग्राह्याभाववादिनोऽपि समानमेतदिति चेन्न — प्रतियोगिग्राहकेन्द्रियग्राह्योऽभाव इत्यभ्युपगमात् ॥ ममापि प्रतियोगिग्राहकेन्द्रियगृहीतेऽधिकरणे अनुपलब्धिः प्रमाणमित्यभ्युपगम इति चेन्न—वायौ त्वगिन्द्रियोपनीते रूपाभावप्रतीत्यनुदयप्रसङ्गात् ॥ तथापि तत्तत्र सन्निकृष्टमिति चेत्—हन्तैवमनन्यत्रचरितार्थमिन्द्रियमत्रश्यमपेक्षणीयं रूपाभावानुभवेन॥

[97] स्यादेतत् – तथापि वस्त्वन्तरग्रह एव तस्योपयोग इति चेन्न — तस्य

सिद्धत्वात्। अतस्साक्षात्कारित्वसिद्धौ तेनेन्द्रियकरणकत्वानुमानमिति ॥

[96] एवमन्यत्रानुपक्षीणेन्द्रियसन्निकर्षानन्तरभावित्वरूपद्वितीयहेतुनापीन्द्रियकरणकत्वमनुमीयते। एतेनाभावप्रमितौ इन्द्रियजन्यत्वस्यैवास्वीकारादधिकरणग्रहणार्थमेवेन्द्रियस्योपयुक्तत्वात्कथमिन्द्रियकरणकत्वानुमानम्। इन्द्रियानुपलब्धिरूपकारणद्वयस्वीकारे किल क्लृप्तत्वादिन्द्रियस्य करणत्वप्रसक्तिरिति शङ्कापि परिहृता भविष्यतीति। नन्वन्यत्रानुपक्षीणत्वमसिद्धम्, भूतलादिरूपाधिकरणग्रहणमात्रे तस्योपयोगादिति चेन्न — अन्धस्यापि घटे श्यामे रक्तरूपाभावप्रतीतिप्रसंगात्, अधिकरणग्रहण प्रतियोगिस्मरण योग्यप्रतियोगिकाभाव प्रतियोग्यनुपलब्धीनां सत्त्वात्। तस्याधिकरणग्रहणं कथमिति चेत्—घटस्य द्वीन्द्रियग्राह्यतया त्वगिन्द्रियेण भविष्यति। रक्तरूपञ्च महद्वृत्तित्वादुद्भूतत्वाच्च योग्यमेवेति। नन्वधिकरणग्राहकेणेन्द्रियेणाभावोपि गृह्यते, नाधिकरणमात्रमिति वदतस्तवापि मते इयमापत्तिरस्ति, अन्धस्य त्वगिन्द्रियेण तत्र रूपाभावप्रतीतिस्स्यादिति। अतस्तुल्यो दोष इति चेन्न— अभावस्य प्रतियोगिग्राहकेन्द्रियग्राह्यत्वमेव, नत्वधिकरणग्राहकेन्द्रियग्राह्यत्वमिति द्वितीयस्तबक एवोक्तत्वात्। ननु मयाप्यनुपलब्धिं प्रति प्रतियोगिग्राहकेन्द्रियजन्याधिकरणग्रहणमेव सहकारीत्युपगम्यते। प्रकृते च घटो न चक्षुषा गृहीत इति चेन्न — तर्हि वायौ रूपाभावप्रत्यक्षासिद्धिप्रसंगात्; तस्य त्वाचप्रत्यक्षवेद्यत्वमतेपि चक्षुरविषयत्वात्, रूपस्य च त्वगवेद्यत्वात्। नन्वधिकरणग्रहणं न सहकारि; किन्तु प्रतियोगिग्राहकेन्द्रियसन्निकर्ष एव। स च वायावस्तीति चेत्— तर्हि वायोरचाक्षुषतया तत्सन्निकर्षस्य तत्रोपक्षीणत्वाभावेन रूपाभाव एव तादृशचक्षुस्सन्निकर्षमपेक्षत इत्युक्तं भवतीति नान्यत्रानुपक्षीणत्वरूपदलस्यासिद्धिरिति ॥

[97] स्यादेतत्— सन्निकर्षस्य रूपाभावग्रहकाले नियमेनापेक्षितस्याधिकरणग्रहोपक्षीणत्वायोगेपि संभावितयत्किञ्चिद्वस्तुग्रहण एवोपयोगोऽस्त्विति चेन्न—वस्त्वन्तरग्रहस्य रूपाभाव-

तं प्रत्यकारणत्वात् । कारणत्वे वा महान्धकारे करपरामर्शेन स्पर्शवद्द्रव्याभावं न प्रतीयात् । प्रतीयाच्च पुरोविस्फारिताक्षः पृष्ठलग्नस्याश्यामत्वम् ॥ आर्जवावस्थानमप्यधिकरणस्योपयुज्यते इति चेत्—तर्हि नयनसन्निकर्षोऽप्युपयोक्ष्यते । तदेकसहकारिप्रभासन्निकर्षापेक्षणात् ; वातायनविवरविसारिकरपरामृष्टेऽप्यधिकरणे तदुपलम्भप्रसङ्गाच्च ॥

[98] तथापि योग्यतापादनोपक्षीणश्चक्षुः । तदितरसामग्रीसाकल्ये ह्यनुपल-

---

ग्रहं प्रत्यकारणत्वात् । स्वं प्रति वा स्वकारणं प्रति वाऽनुपयुज्यमानस्य सन्निकर्षस्य स्वेन नियमेनापेक्ष्यमाणत्वासंभवात् । अभावप्रत्यक्षेऽनियतयत्किञ्चिद्वस्तुग्रहस्यापि कारणत्वस्वीकारे महान्धकारे करपरामर्शेन स्तम्भादेः स्पर्शवद्द्रव्यस्याभावं न गृह्णीयात् । तत्र त्वक्सन्निकर्षेण कस्याप्यग्रहणेन कारणाभावात् । नचेयं चाक्षुषप्रतीतिः ; अन्धकारे भावात् करपरामर्शापेक्षत्वाच्च । ननु यत्रायं पुरुषस्तिष्ठति, तस्यैव देशस्य त्वचा ग्रहणान्न यत्किञ्चिद्वस्तुग्रहरूपकारणाभाव इति चेत् — एवं तर्हि पुरतो विस्फारितनेत्रः पश्चाद्देशे स्थितस्य वस्तुनो रूपविशेषाभावं गृह्णातु, चक्षुषा पुरतो यत्किञ्चिद्वस्तुदर्शनात् । ननु रूपाभावाधिकरणस्यार्जवावस्थानमप्यभावप्रत्यक्षे कारणमिति चेत् — आर्जवं ह्यभिमुख्यमेव । तथाच चक्षुस्सन्निकर्षोऽधिकरणेऽपेक्षित इत्युक्तं भवति । सचाधिकरणग्रहे नोपयुज्यते, वायावचाक्षुषेपि रूपाभावग्रहादित्यन्ततोऽभावग्रह एवोपयोक्ष्यत इति । नन्वधिकरणाभिमुखत्वमेव कारणमभावग्रहे, न तु नयनसन्निकर्षः । परन्त्वार्जवमात्रस्य कारणत्वे अन्धकारे आर्जवे रूपाभावप्रतीतिरापद्यत इत्यालोकसन्निकर्षोऽप्यधिकरणग्रहेऽपेक्षितः । नयनसन्निकर्षस्तु केवलं यत्किञ्चिद्वस्तुग्रहोपक्षीणो नाभावग्रहे उपयुज्यत इति चेत् — अवश्यं नयनसन्निकर्षोऽप्यभावग्रहे साक्षादुपयोक्ष्यते, आलोकसन्निकर्षस्य तं नयनसन्निकर्षमेकं प्रत्येव सहकारित्वात्तत्कारणकत्वे एतत्कारणकत्वध्रौव्यात् । अतोऽभावप्रत्ययश्चक्षुस्सन्निकर्षजन्यः तदेकसहकारिजन्यत्वादिति । ननु तदेकसहकारित्वमासिद्धम्, क्लृप्तकारणताकानुपलब्धिसहकारित्वस्याप्यनुभवबलेनालोकसन्निकर्षेऽङ्गीकारादिति चेत् — एतावता हि रूपाभावप्रत्यक्षे चक्षुषा किञ्चिद्वस्तुग्रहणं, अधिकरणस्य कथमपि ग्रहणं, आर्जवावस्थानं, आलोकसन्निकर्षश्च कारणानीत्युक्तं भवति । एवं चक्षुस्सन्निकर्षस्य तत्रानुपयोगे, वातायनविवरेण करं प्रसार्य यदा कुड्यान्तरितं वातायनपरभागस्थं किमपि त्वचा गृहीतं, तदा तत्र पूर्वोक्तसर्वकारणसमवधानबलात्तद्गतरूपविशेषाभावप्रत्ययप्रसंगः । अतस्तत्र चक्षुःप्रसरप्रतिबन्धादेव तदभावो वक्तव्य इति सन्निकर्षस्य कारणत्वमवर्जनीयम् ॥

[98] नन्वेवमधिकरणग्रहे वस्त्वन्तरग्रहे चोपयुक्तत्वासंभवेपि योग्यताविशिष्टानुपलब्धिरू-

---

१. अयं क. २. पाठः व्याख्याख्यानुरोधी ॥ क. ख. ग० अन्यथा वातायनेत्येवम् ।

२. यदितरेति सर्वत्र पाठः । तदा पूर्ववाक्ये योग्यतेत्यत्र तन्निष्ठयोग्यतेति तच्छब्दकल्पनया वा विधान्तरेण वा क्लिष्टो निर्वाहः ।

भ्यमानस्याभावो निश्चीयते। तच्च चक्षुष्यधिकरणसन्निकृष्टे सति स्यादिति चेत्—ननु परिपूर्णानि कारणान्येव साकल्यम्। तथाच किं कुत्रोपक्षीणम्॥ अथान्योन्यमेलनं[१] मिथःप्रत्यासत्त्यादिशब्दवाच्यं तदुपक्षयविषयः, न तर्हि क्वचिच्चक्षुः कारणं स्यादिति। न हि रूपाद्युपलब्धिमप्यसन्निकृष्टमेतदुपजनयति॥

[११] अथाधिकरणसमवेतकिञ्चिदुपलम्भोऽपि तद्विषयाभावग्रहेऽनुपलब्धेरपेक्षणीयः। ततस्तत्रेदं चरितार्थम्। वाय्वादिषु तु रूपाद्यभावप्रतीतिरानुमानिकी। तथा[२]नुपलब्ध्या ह्यनुमीयते, अयं नीरूपो वायुरिति – न – असिद्धेः। न ह्युपलम्भाभावो भवतामभावोपलम्भः। उपलम्भस्यातीन्द्रियत्वाभ्युपगमात्॥ प्राकट्या-

पकारणघटकयोग्यतानिर्वर्तनोपक्षीणत्वाच्चक्षुषः अनन्यत्रोपक्षीणत्वांशासिद्धिः। अनुपलभ्यमानघटादिप्रतियोगिकाभावो हि प्रतियोगीतर प्रतियोगिग्राहकसामग्रीसाकल्ये सत्येव गृह्यते। तच्च साकल्यं योग्यताख्यं चक्षुरधिकरणसन्निकर्षाभावे एककारणलोपान्न स्यादिति चेत्—कारणसाकल्यं हि तत्समुदायः कारणापेक्षया न पदार्थान्तरम्। तथाच तेषां कारणानामनुपलब्धेश्च सत्त्वे कार्यं भवतीत्युक्तं भवतीति योग्यताशब्दवाच्येषु तेषु कारणेषु मध्ये चक्षुषो न स्वस्मिन्, नापि कारणान्तरे उपक्षीणता। अथ सामग्रीसाकल्यं नाम नापेक्षितसर्वकारणमात्रम्; किन्तु कारणमध्ये यस्य येन यादृशमेलने सति कार्यं जायते तादृशो मिथःप्रत्यासत्त्यादिशब्दवाच्यस्समुचितः पारस्परिकस्संबन्ध एव साकल्यम्। तच्च चक्षुरुपक्षयस्थानमिति चेत्— तर्हि चक्षुः स्वजन्ये सन्निकर्षे उपक्षीणमित्युक्तं भवति। एवं स्वव्यापारेणापि चक्षुषोऽन्यथासिध्यङ्गीकारे भावविषयेपि चक्षुः कारणं न स्यात्। न हि भावप्रत्यक्षमपि चक्षुस्स्वयं विषयासन्निकृष्टं सदुत्पादयति। (एवं घटादौ दण्डादेरपि कारणत्वं न स्यात्। एवं साकल्यं समुदायः, स चातिरिक्त इति पक्षेपि सर्वत्र क्लृप्तानां कारणानामकारणत्वं स्यादिति ध्येयम्।)

[११] ननु तदधिकरणवृत्तिकिञ्चिद्वस्तुग्रहस्तद्देशकाभावप्रत्यक्षे जननीयेऽनुपलब्धेस्सहकारीति पूर्वोक्तपक्ष एवास्तु। न च तर्हि वायौ रूपाभावप्रतीत्यनुपपत्तिः प्रागुक्तेति वाच्यम् — तस्याः प्रतीतेः प्रत्यक्षरूपत्वास्वीकारात्, अनुमितिरूपत्वसंभवात्, वायुर्नीरूपः रूपवत्त्वेनानुपलभ्यमानत्वादित्यनुमानादिति चेत् – न – उपलब्ध्यभावरूपहेतोरज्ञातत्वादसिद्धेः। तथाहि – न तावदनुपलब्धिरूप उपलब्ध्यभावः भवन्मते अभावाख्यानुपलब्धिप्रमाणाधीनोपलम्भकः, ज्ञानस्यातीन्द्रियत्वाभ्युपगमात् अयोग्यप्रतियोगिकाभावस्यानुपलब्धिप्रमाणाविषयत्वात्। नापि ज्ञानस्य ज्ञाततानुमेयत्वादुपलम्भाभावो ज्ञातताख्यप्राकट्याभावानुमेयः, वायौ रूपा-

१ मेलनं नाम तत्त्वान्तरं क्षयविषय इत्याह' इति बोधन्यनुसारेणैवं शोधितम्। तदुपक्षयक्षय इति वा स्यात्। क्षयस्स्थानम्। परंत्विदं क्लिष्टम्। दृश्यमानपाठः अन्योन्यमेलकं....तदुपक्षय इति।
२. अयं क--२.पाठः। तथेति रूपवत्तयेत्यर्थः। क.ख.पा० तथाहि—अनुपलब्ध्याहीत्येवम्।

भावेनानुमेय इति चेन्न — वायौ रूपवत्ताप्राकट्याभावस्याप्यसिद्धेः । रूपाभावेन समानत्वात् ॥ व्यवहाराभावेनानुमेय इति चेन्न – कायवाग्व्यापाराभावेऽप्युपेक्षाज्ञानभावाभ्युपगमात् ; मूकस्वप्नोपपत्तेश्च । न च व्यवहाराभावमात्रेणानुमातुमपि शक्यते, अनैकान्तिकत्वादसिद्धेश्च । तद्विषयस्तु व्यवहारस्तद्विषयज्ञानजन्यो वा, तद्विषयज्ञानजनको वा, तदाश्रयधर्मजनको वा । तदभावश्च तज्ज्ञानतदाश्रयधर्माभावान्तर्भूत एवेत्यशक्यनिश्चय एव । आत्माश्रयेतरेतराश्रयचक्रकप्रवृत्तिप्रसङ्गात्॥

[100] न चाज्ञातस्योपलम्भाद्यभावस्य लिङ्गता । न च प्राकट्याभावः सत्तामात्रेणोपलम्भाभावमावेदयतीति युक्तम् — लिङ्गाभावस्य तथात्वेऽतिप्रसङ्गात् । अविनाभावबलेन तु नियमे तत्प्रतिसन्धानापत्तेः । न ह्यविनाभावः सत्तामात्रेण

भावस्येव रूपवत्ताप्राकट्याभावस्यापि ग्राहकप्रमाणाभावेनासिद्धत्वात् । नाप्युपलम्भाभावो व्यवहाराभावादनुमेयः; व्यवहारो हि द्विविधः कायिको वाचिकश्च । उपेक्षात्मकज्ञानातिरिक्तस्थल एव च तादृशव्यवहार इति तदभावेऽप्युपेक्षात्मकज्ञानसद्भावाद्धेतोर्व्यभिचरितत्वात् । अनेन हेतुना उपेक्षातिरिक्तज्ञानाभावोऽपि दुरनुमान ; मूकस्य स्वप्नो हि उपेक्षातिरिक्तोऽपि व्यवहारं न जनयति, मूकतया वाचिकस्य, स्वप्नावस्थायां कायिकस्य च व्यवहारस्यायोगात् । अतो व्यभिचार इति । नाप्यमूकजागरानुपेक्षात्मकज्ञानाभावानुमानं संभवति, व्यवहाराभावरूपहेतोः किञ्चिद्व्यवहाराभावरूपत्वे अन्यज्ञानेऽप्यन्यव्यवहाराभावादनैकान्तिकत्वात्, सर्वव्यवहाराभावरूपत्वे चासिद्धेः । एवं तद्विषयकतत्पुरुषीयव्यवहाराभावात्तद्विषयकतत्पुरुषीयानुपेक्षात्मकज्ञानाभावानुमानमपि न संभवति, आत्माश्रयादिदोषात् । व्यवहारो हि नाम कायिको ज्ञानजन्यव्यापाररूपः, वाचिको ज्ञानजनकव्यापारात्मकः । एवं वाचिको व्यवहार एव वक्तृज्ञानजन्यव्यापारात्मा श्रोतृज्ञानजनकव्यापारात्मा च । प्राकट्यवादिपक्षे ज्ञानद्वारा तादृशविषयाश्रयकज्ञाततात्मकधर्मजनकव्यापाररूपोऽपि । तत्र हेतुभूतव्यवहाराभावः व्यवहारस्वरूपघटकयोर्ज्ञानज्ञाततयोरभावेनैव निरूप्य इति दुर्निश्चय एव । ज्ञानाभावज्ञातताभावव्यवहाराभावानां मध्ये कस्यचित्स्वेनैव साध्यत्वस्वीकारे आत्माश्रयः, द्वयोर्मिथस्साध्यत्वस्वीकारेऽन्योन्याश्रयः, त्रयाणां मिथश्चेत्, चक्रकमिति ॥

[100] नचोपलम्भाभावप्राकट्याभावव्यवहाराभावानामज्ञायमानतयैव करणत्वान्नायं दोष इति वाच्यम् – सत्तामात्रेण लिङ्गत्वानुपपत्तेः । अत एव भवन्मात्रसंमतप्राकट्याभावविषयेऽपि भवतेदं न वक्तुं युक्तम् । नचोपलम्भस्य विषयं प्रति, प्राकट्यव्यवहारयोश्च ज्ञानं प्रति लिङ्गत्वात् लिङ्गप्रतियोगिकाभावस्य लिङ्गत्वे सत्तयापि कारणत्वमिति वाच्यम् — तर्हि सत्तया रासभादिसाधकत्वस्यापि प्रसंगात् । ननु लिङ्गाभावो लिंग्यभावस्यैव साधक इति चेत् – तदेव कुतः? तेनैवाविनाभावात्सा व्यवस्थेति चेत् — तर्हि तज्ज्ञानमप्यावश्यकमिति न सत्तामात्रेण कारण-

ज्ञानहेतुं नियमयति, धूमादावपि तथाभावप्रसङ्गादिति ॥

[101]ज्ञानप्रत्यक्षत्वेन त्वादिशा भविष्यतीति चेन्न–शब्दध्वंसादिनोक्तोत्तरत्वात् ॥

[102] अपिच प्रतियोगिग्राहकेन्द्रियेणाधिकरणधर्मप्रतीतिरनुपलब्धेरङ्गमिति, तद्रहितायास्तस्याः कार्यव्यभिचाराद्व्यवस्थाप्येत, व्याप्तिबलाद्वा । न तावदुक्तरूपानुपलब्धिस्तां विना अभावप्रत्ययमजनयन्ती दृश्यते । नापि व्याप्तेः, तथा सति वायौ रूपाभावप्रत्ययस्तामाक्षिपेत्, एवम्भूतत्वात् । अनाक्षेपे वा, न तत्कारणको भवेत्, न वा भवेत् ॥ ततो न भवत्येव, लिङ्गात्तदुत्पत्तिरिति चेत् – ननु

त्वम् ! अविनाभावस्य ज्ञायमानतयैवानुमितिजनकत्वात् । अन्यथा धूमस्य वह्न्यविनाभावः, धूमाभावस्यार्द्रेन्धनवह्न्यविनाभावश्चाप्रतिसंधीयमानावेव कारणीभवेतामिति ॥

[101] ननु किमनेनानुपलब्धेरनुमेयत्वव्यसनेन । त्वन्मत इव ज्ञानस्य प्रत्यक्षत्वाङ्गीकारादनुपलब्धेर्योग्यानुपलब्धिगम्यत्वसंभवात्तया वायौ नीरूपत्वानुमानं सुस्थमिति चेन्न — अस्मन्मतप्रवेशे अतीन्द्रियाकाशादिगतस्य शब्दध्वंसप्रागभावादेर्द्वितीये स्तबके प्रत्यक्षत्वस्थापनात्तन्नयेन वायौ रूपाभावप्रत्यक्षत्वस्यैव सुवचत्वेनानुमानपरिश्रमस्याभावापातात् । नच भवन्मतरीत्या ज्ञानप्रत्यक्षत्वाङ्गीकारेऽपि वाय्वाकाशादौ रूपाभावशब्दध्वंसादेर्न प्रत्यक्षम्, अधिकरणसमवेतकिञ्चिद्ग्रहरूपकारणाभावादिति वाच्यम् – शब्दध्वंसानुमानिकत्वासंभवस्य तत्रैवोक्तत्वात्; अधिकरणसमवेतकिञ्चिद्ग्रहस्य कारणत्वे प्रमाणाभावाच्च ॥

[102] अपिचाभावप्रतीतावनुपलब्धेरधिकरणधर्मप्रतीतिस्सहभूतेति यदिदं व्यवस्थापनं, तत् किं अनुपलब्धिजन्याभावप्रत्यये तस्याः कारणत्वात्, उत यत्राभावप्रत्ययस्तत्र सेति व्याप्तिमात्रादिति विकल्प्यते । यद्येवं विकल्प्यते, अधिकरणधर्मप्रतीतिस्सहकारिकारणमिति किं तदभावे तदभाव इति व्यतिरेकमुखेन निश्चीयते, उत धर्मप्रतीतावभावप्रत्ययव्यापकत्वबलादिति । नाद्यः, धर्मप्रतीत्यभावेऽभावप्रत्ययाजननमिति व्यतिरेकस्य क्वाप्यदर्शनात् । नान्त्यः, तर्हि वायौ रूपाभावप्रत्ययसत्त्वेन धर्मप्रतीतेरपि धूमात्पर्वतेऽग्नेरिवाक्षेपप्रसंगात्, अभावप्रत्ययस्य

१- प्र. "कार्यकारणभावस्य 'व्याप्तिविशेषत्वेन गोवृषन्यायात्तां विना या व्याप्तिस्तद्बलादित्यर्थः । .... अनाक्षेपे वेति । अधिकरणवृत्तिधर्मप्रतीत्यनाक्षेपे वा नाभावधीस्तद्धेतुका तद्व्याप्या वा । तथात्वे वा हेतुं विना व्यापकं विना वा न भवेदित्यर्थः । ततः अधिकरणधर्मप्रतीतितः । सैव अनुपलब्धिरेव " इति । बो०. 'तत्प्रतीतिरप्यङ्गमिति व्यवस्थाप्यते व्यतिरेकाभावेऽप्यन्वयव्याप्तिबलाद्वेति । .... यदि नाक्षिपेत्, तर्ह्यभावप्रत्ययो वस्त्वन्तरप्रतीतिहेतुको न स्यात्, स्वयं वा न भवेत् .... ततः प्रमाणान्तरभूताया अनुपलब्धेः' इति । विस्तरे एतद्वैलक्षण्येन काञ्चिद्रीतिं प्रदर्श्य पश्चात् एवमित्यादिना इयमपि योजना दर्शिता । क.२. पुस्तके न वा भवेत् इत्यंशो नास्ति । बोधन्यां नापि व्याप्तेरित्यत्र नापि तद्व्याप्तेरित्यस्ति।

लिङ्गमपि सैव; न तत्त्वान्तरम् ॥ यथा योनिसंबन्धोऽलिङ्गदशायामिन्द्रियसन्निकर्षमपेक्षते, लिङ्गदशायां तु तदनपेक्ष एव ब्राह्मण्यज्ञाने, तथैतत् स्यादिति चेन्न—कार्यजातिभेदात्तदुपपत्तेः; प्रकृते च तदनभ्युपगमात् ॥ पारोक्ष्यापारोक्ष्ये विहायान्यथाऽप्यसौ भविष्यतीति चेन्न – अनुपलम्भात् ।संभाव्यते तावदिति चेत्– संभाव्यताम् , न त्वेतावताऽपि तमाश्रित्य करणनियमनिश्चयः ॥

तद्व्याप्यत्वात् । यदि नाक्षेपः, तर्हि अनुपलब्धिकारणकाभावप्रत्ययरूपं व्याप्यमेव नास्तीति वक्तव्यम् । स च व्याप्याभावो यदि विशेषणाभावात् , तदा अभावप्रत्ययेऽनुपलब्धिकारणकत्वं न स्यात् ; यदि विशेष्याभावात्, तर्ह्यभावप्रत्यय एव न स्यात् । नन्वभावप्रत्ययस्तत्र सन्नप्यनुपलब्धिरूपकारणान्न भवत्येव, किंतु लिङ्गादिति चेत् – लिङ्गमप्यनुपलब्धिरेव हि; न तु पदार्थान्तरम् , वायुर्नीरूपः तथानुपलब्धेरित्यनुमानात् । अतः कथमनुपलब्धिकारणकत्वाभावः । एवं – यदि नाक्षेपः, तर्हि धर्मप्रतीतिव्याप्यत्वाभावाद्धर्मप्रतीतिकारणकत्वं न स्यात् । तद्व्याप्यत्वतत्कार्यत्वस्वीकारे तु तदभावात्त्वयमभावप्रत्ययो न भवेत् । नन्वत्र वायौ रूपाभावप्रत्ययः ततो धर्मप्रतीतितो न भवत्येव; किंतु लिङ्गादिति चेत् – लिङ्गमपि हि सा धर्मप्रतीत्यङ्गिका अनुपलब्धिरेव । अतो न धर्मप्रतीत्यभावे लिङ्गादपि ततोऽभावप्रत्यय इति । ननु ब्राह्मणमातापितृजन्यत्वरूपो योनिसंबन्धः ब्राह्मण्यज्ञानं द्वेधा जनयति, लिङ्गविधयाऽन्यथा च । तत्र लिङ्गदशायामिन्द्रियसन्निकर्षनिरपेक्ष एव तज्जनकः, स ब्राह्मणः ब्राह्मणमातापितृकत्वादिति, अलिङ्गदशायाञ्च तत्सापेक्ष इति यथा, तथाऽनुपलब्धिरपि लिङ्गदशायामभावप्रत्ययेऽधिकरणधर्मप्रतीतिनिरपेक्षा, अन्यदा षष्ठप्रमाणतादशायां तत्सापेक्षा । अतोऽनुपलब्धिजन्ये विजातीयप्रत्यय एव धर्मप्रतीत्यपेक्षेति न दोष इति चेत्–ब्राह्मण्यज्ञानं सन्निकर्षजन्यं प्रत्यक्षं, अन्यत्तु परोक्षमिति कार्यजातिभेदात्तदुपपन्नम् । प्रकृतेऽभावप्रत्ययस्य प्रत्यक्षत्वभयेनेन्द्रियसन्निकर्षस्यान्यत्रोपक्षीणत्ववर्णने प्रयस्यतस्ते तादृश जातिभेदाभावात्कथमेकजातीये सापेक्षत्वं निरपेक्षत्वञ्चेति । ननु परोक्षत्वापरोक्षत्वजातिभेदाभावेऽप्यन्यो जातिभेदोऽस्त्विति चेन्न — परोक्षत्वेन तुल्ये द्वयेऽप्यभावप्रत्यये वैजात्यान्तरानुपलम्भात् । अदृश्यमानमपि संभाव्यत इति चेत्—कामं संभाव्यताम् । एवमपि न सांदिग्धजातिभेदमादाय, विलक्षणाभावप्रत्यये धर्मप्रतीतिसापेक्षत्वं नेति नियमनिश्चयः, नापि तेन सन्निकर्षस्य तत्रोपक्षीणत्वं निश्चित्यानुपलब्धिरेवाभावप्रत्यये करणमिति निश्चय इति । वस्तुतो न संभावनापि संभवति; भूतले घटाभावप्रत्यय इव वायौ रूपाभावप्रत्ययेऽप्यनुपलब्धेस्स्वरूपसत्तयैव कारणत्वानुभवात् । अनुपलम्भेन रूपाभावस्येव अनुपलम्भेन जातिभेदाभावस्य स्थापनसंभवाच्च । अतः, अनुपलब्धिरूपप्रमाणसमर्थनाय अन्तरा धर्मप्रतीतिकल्पने गौरवाच्चान्यत्रोपक्षीणेन्द्रियसन्निकर्षानन्तरभावित्वरूपद्वितीयहेतु र्निर्दुष्ट इति ॥

[103] अज्ञातकरणत्वाच्च । यदज्ञायमानकरणजं ज्ञानं तत्साक्षादिन्द्रियजं, यथा रूपप्रत्यक्षम् । तथाचेह भूतले घटो नास्तीति ज्ञानमिति । यथा वा स्मरणमज्ञायमानकरणजं साक्षान्मनोजन्म ॥ कुतस्तर्हि न साक्षात्कार्यनुभवरूपम् ? संस्कारातिरिक्तसन्निकर्षाभावादिति वक्ष्यामः ॥

[104] तथापि भावविषये इयं व्यवस्था, अभावज्ञानं त्वज्ञातकरणत्वेऽपि न साक्षादिन्द्रियजं भविष्यतीति चेन्न — उत्सर्गस्य बाधकाभावेन सङ्कोचानुपपत्तेः । अन्यथा सर्वव्याप्तीनां भावमात्रविषयत्वप्रसङ्गः, अविशेषात् ॥ तथापि विपक्षे किं बाधकमिति चेत् - नन्विदमेव तावत् । अन्यदप्युच्यमानमाकर्णय । तद्यथा — अकारणककार्यप्रसङ्गः, रूपाद्युपलब्धीनामपि वाऽनिन्द्रियकरणत्वप्रसङ्गः । न ह्यनुमित्यादिभिरुपलभ्यमानकरणिकाभिश्चक्षुरादिव्यवस्थापनम्, अपित्वनुपलभ्यमान-

---

[103] एवं तृतीयहेतोरपि, अयमभावप्रत्ययस्साक्षादिन्द्रियजः ज्ञायमानावृत्तिकरणतानिरूपकत्वे सति ज्ञानत्वादिति । लिङ्गज्ञानं करणमिति पक्षे तु ज्ञायमानावृत्तित्वस्थाने ज्ञानावृत्तित्वं निवेश्यम् । साक्षादिन्द्रियजत्वं अन्यत्रानुपक्षीणेन्द्रियजन्यत्वं विषयेन्द्रियसन्निकर्षजन्यत्वमिति यावत् । अत्र स्मरणमपि दृष्टान्तः, तस्यापि संस्काररूपविषयेन्द्रियसन्निकर्षद्वारा मनःकरणकत्वात् । तावद्विषयकसंस्कारबलेन हि तावद्विषयकस्मृतिं मनो जनयति । ननु कुतस्तर्हि स्मृतिरज्ञातकरणकत्वेपि न प्रत्यक्षरूपा, अज्ञातकरणकत्वेन साक्षात्कारित्वस्य प्राक्साधनादिति चेत् — संस्कारातिरिक्तसन्निकर्षे सत्येव प्रत्यक्षरूपता । तदभावाच्च तस्यास्तथात्वमिति चतुर्थे वक्ष्यामः । प्रागपि अनुपलब्धिजन्यज्ञानस्यानुभवरूपतायास्संप्रतिपन्नत्वादज्ञायमानकरणजत्वमनुभवत्वविशिष्टमेव साक्षात्कारितासाधकं विवक्षितमिति न कश्चिद्दोषः ॥

[104] नन्विन्द्रियजन्यत्वे न शुद्धमज्ञातकरणकज्ञानत्वं प्रयोजकम् ; किंतु भावविषयकत्वविशिष्टाज्ञातकरणकज्ञानत्वमेव । अतः प्रकृतानुमाने तदेवोपाधिरिति चेन्न — सामान्यस्येन्द्रियजन्यत्वे बाधकाभावेन भावविषयकत्वेन संकोचस्यानुपपन्नतया अनुकूलतर्काभावेन साध्योपाधिव्याप्तिभङ्गेन तस्यानुपाधित्वात् । प्रमाणाभावेपि संकोचस्वीकारेऽनुमानसामान्यस्य भावविषय एव हेतुत्वमिति ज्ञातानुपलब्ध्यादिनाऽभावानुमानमपि न स्यात् । ननु विपक्षबाधकानुकूलतर्काभावादुपाधेरनुपाधित्वेपि त्वदभिमतहेतौ किं विपक्षे बाधकमिति चेत् — अज्ञातकरणके सर्वत्रेन्द्रियकरणत्वदर्शनात् असत्यपि बाधके उत्सर्गभङ्गेऽन्यत्रापि तद्भङ्गस्स्यादितीदमेव विपक्षे बाधकम् । एवमन्यदपि — अज्ञातकरणकज्ञानत्वावच्छिन्नं प्रति इन्द्रियं कारणमिति कार्यकारणभावस्य क्लृप्तत्वात्तत्राप्रयोजकशङ्कायामकारणककार्योत्पत्तिप्रसंगः, रूपाद्युपलब्धेरिन्द्रियाकरणकत्वप्रसंगश्च बाधक इति ॥ स कार्यकारणभाव एव कथं सिद्ध इति चेत् — अनुमितिशाब्दबोधादौ लिङ्गशब्दादिरूपकरणोपलम्भाद्रूपरसाद्युपलब्धिषु च तदनुपलम्भात् क्रियात्वेन

करणिकाभी रूपाद्युपलब्धिभिरेव । यद्यपि साक्षात्कारिताऽपि तत्रैव पर्यवस्यति, तथापि प्रथमतोऽनुपलभ्यमानकरणत्वमेव प्रयोजकं चक्षुरादिकल्पने । न ह्युपलभ्यमाने करणान्तरे साक्षात्कारिणीष्वपि तासु चक्षुरादि अनुपलभ्यमानं कश्चिद् कल्पयिष्यत् । अत एवासाक्षात्कारित्वेऽपि स्मृतेर्मन एव करणमुपागमन् धीराः । संस्कारस्त्वर्थविशेषप्रत्यासत्तावुपयुज्यते, इन्द्रियाणां प्राप्यकारित्वव्यवस्थापनात् ॥

[105] भावावेशाच्च चेतसः । सर्वत्र हि बाह्यार्थानुभवे जनयितव्ये भावभूत-प्रमाणाविष्टमेव चेत उपयुज्यते, नातोऽन्यथेति व्याप्तिः, तथैव शक्तेरवधारणात् । न ह्यनुपलब्धिमात्रसहायं तत् अभावेऽप्यनुभवमाधातुमुत्सहते, शब्दलिङ्गादेरपेक्षादर्शनात् । न च यत्र यदपेक्षं यस्य जनकत्वमुपलब्धं, तदेव तस्यैव तदनपेक्षं

सकरणकत्वस्यावश्यकत्वाच्च रूपाद्युपलब्धयोऽनुपलभ्यमानकरणकत्वादिन्द्रियसामान्यमनुमापयन्ति । अतोऽन्यूनानतिप्रसक्तानुपलभ्यमानकरणकत्वरूपसामान्यधर्मावच्छिन्नज्ञानस्येन्द्रियसामान्यस्य च कार्यकारणभावः । यद्यपि साक्षात्कारित्वस्येन्द्रियजमात्रगतत्वात् तदवच्छिन्नं प्रति कारणमिन्द्रियमिति कार्यकारणभाववर्णनसंभवात्तदेवेन्द्रियसामान्यसाधकं शंक्येत, अतश्चाभावप्रत्यये साक्षात्कारित्वानिश्चयादिन्द्रियजन्यत्वासिद्धिरिति — अथापि नैवम् , साक्षात्कारित्वेपि रूपाद्युपलब्धिषु करणान्तरोपलम्भे सत्यतीन्द्रियप्रमाणान्तरासिद्धेन्द्रियकल्पनाऽयोगादनुपलभ्यमानकरणत्वमवश्यमेव प्रयोजकम् । एवं साक्षात्कारित्वस्याप्रयोजकत्वादनुपलभ्यमानकरणकत्वस्य च प्रयोजकत्वादेवासाक्षात्कारिण्या अपि स्मृतेरिन्द्रियकरणकत्वस्यावश्यकतया इन्द्रियापेक्षायां मनइन्द्रियं करणं निरूपका उपजग्मुः, न च संस्कार एव तत्र करणमिति शंक्यम्— तस्य व्यापारवत्कारणत्वरूपकरणत्वायोगात् । इन्द्रियाणां प्राप्यकारितया मनसस्स्मृतिजनने सन्निकर्षापेक्षायामर्थप्रत्यासत्तिमात्ररूपत्वात्तस्य । (पूर्वानुभवोऽपि तादृशप्रत्यासत्त्युपक्षीणो नेन्द्रियकरणकत्वं वारयिष्यतीति ।) तत्सिद्धं तृतीयोपि हेतुरिन्द्रियकरणकत्वसाधक इति ॥

[105] (ननु यथा संस्काररूपप्रत्यासत्तिद्वारा मनः स्मृतिकरणम् , तथा प्रतियोग्यनुपलब्धिं अनुपलभ्यमानप्रतियोगिकत्वरूपां प्रत्यासत्तीकृत्य मन एवाभावधीकरणं भवत्विति चेन्न – अनुपलभ्यमानप्रतियोगिकत्वघटक उपलम्भो हि यदिन्द्रियकरणकः, तस्यैवेन्द्रियस्य सा प्रत्यासत्तिर्भवितुमर्हति, न मनस इति । किञ्च) भावावेशाच्च चेतसो बाह्येन्द्रियकरणकत्वं युक्तम् । मनो हीन्द्रियशब्दलिङ्गादिभावप्रमाणसापेक्षमेव बाह्यार्थानुभवं जनयति । नचाभावानुभवविषयेऽनुपलब्धिमात्रसहायं तदिति वाच्यम् – अभावानुमितिशाब्दबोधादौ व्याप्तिज्ञानशब्दज्ञानादेरपेक्षितत्वात् । तथाचार्द्रेन्धनसंबन्धसापेक्षं धूमजनकस्य वह्नेस्तदभावे तदजनकत्ववत् भावभूतप्रमाणसंबन्धसापेक्षं बाह्यार्थानुभवजनकस्य मनसस्तदभावे तदजनकत्वमेव । अन्यथा कार्यकारणभाव एवापरिगृहीतस्स्यात् । भावभूतेत्यनुपलब्धिव्यतिरिक्तपरम् । तथा-

जनकमिति न्यायसहम् । आर्द्रेन्धनसंबन्धमन्तरेणापि दहनाद् धूमसम्भावनापत्तेः। तथाच गतं कार्यकारणभावपरिग्रहव्यसनेन ॥

[106] अपिच – प्रतियोगिनि सामर्थ्यात् व्यापाराव्यवधानतः ।
अक्षाश्रयत्वाद्दोषाणामिन्द्रियाणि विकल्पनात् ॥ २१ ॥

यद्धि प्रमाणं यद्भावावगाहि, तत् तदभावावगाहि, यथा लिङ्गं शब्दो वा; घटाद्यवगाहि चेन्द्रियमिति । अन्यथा हि शब्दादिकमपि नाभावमावेदयेत्, भाव एव सामर्थ्यावधारणात् । न चैवमेव न्याय्यम् । देवदत्तो गेहे नास्तीति शब्दात्, मया तत्र जिज्ञासमानेनापि न दृष्टो मैत्र इत्यवगतानुपलब्ध्याऽनुमानादप्यवगतेः ॥

[107] ग्राहयतु वाऽऽश्रयमिन्द्रियं, तथापि न तेनेदं व्यवधीयते, व्यापारत्वात्। अन्यथा सर्वसविकल्पकानां प्रत्यक्षत्वाय दत्तो जलाञ्जलिः स्यात् ॥ नन्वेवंसति धूमोपलम्भोऽप्यस्य व्यापारस्स्यात् । तथाच गतमनुमानेनापीति चेन्न – यया क्रियया विना यस्य यत्कारणत्वं न निर्वहति, तं प्रति तस्या एव व्यापारत्वात् ।

चायमभावप्रत्ययः अनुपलब्धिव्यतिरिक्तक्लृप्तप्रमाणसापेक्षमनोजन्यः बाह्यार्थानुभवत्वात्, अभावविषयकानुभवत्वात्, घटाद्यनुभववत्, अभावानुमित्यादिवच्चेति प्रयोगः । (नचाभावानुमित्यादिस्थले योग्यानुपलब्धिरूपकारणाभावाद्व्याप्तिज्ञानाद्यपेक्षा; प्रकृते तु तत्सत्त्वात्सैवालमिति वाच्यम् – योग्यानुपलब्धिघटकयोग्यतायामिन्द्रियसन्निकर्षो घटको नवा । न चेत्, अनुमित्यादिस्थलेपि योग्यानुपलब्धिरस्ति । आद्ये तु सिद्धमस्याभावप्रत्ययस्येन्द्रियसन्निकर्षजन्यत्वमिति तदेव करणं क्लृप्तत्वादिति ।)

[106] अपरेऽपि चत्वारो हेतव इन्द्रियाणामभावप्रमितिकरणत्वे । प्रतियोगिग्राहकत्वात्, अधिकरणग्रहस्य मध्येऽपेक्षितत्वेपि तस्य व्यापारतया व्यवधायकत्वाभावात्, अभावभ्रमहेतुदोषस्येन्द्रियाश्रितत्वेन, दुष्टस्य यस्य भ्रमकरणत्वम् तस्य निर्दुष्टस्य प्रमाकरणत्वात्, अस्याभावप्रत्ययस्याभावविशिष्टबुद्धित्वाच्चेन्द्रियाण्यभावप्रमितिकरणमिति । इन्द्रियाण्यभावग्राहकाणि प्रतियोगिग्राहकत्वात् शब्दलिङ्गादिवदित्याद्यप्रयोगः। चैत्रो गेहे नास्तीति शब्दादभावः प्रतीयते, अस्तीति शब्दादिव भावः। जिज्ञासमानेनापि न दृष्टो मैत्र इत्यनुपलब्धिश्रवणे ज्ञातानुपलब्ध्याऽनुमीयते च। नचाप्रयोजकत्वम् । भावग्राहिणोऽभावग्राहित्वाभावे शब्दादिकमप्यभावं नावेदयेदिति ॥

[107] वाय्वादौ रूपाभावादिप्रतीतिबलादिन्द्रियाणामधिकरणग्रहोपयोगो नास्तीति प्रागुक्तम् । क्वचिदधिकरणग्रहजनकत्वेपि तस्य ग्रहस्य व्यापारतयेन्द्रियस्याभावप्रमाणत्वमक्षतम् । ग्रहस्य व्यापारत्वानङ्गीकारे च निर्विकल्पकग्रहव्यवहिततयाऽभावसविकल्पक इव सर्वसविकल्पविषयेपीन्द्रियं करणं न स्यात् ॥ तर्हि धूमग्रहं द्वारीकृत्य वह्निज्ञानेपि करणमिन्द्रियं स्यादित्यनुमानप्रमाणोच्छेद इति चेन्न—येन कार्येण विना हि यस्य करणत्वं न निर्वर्तते, स व्यापारस्तस्य ।

न च धूमाद्युपलब्धिमन्तरेण चक्षुषो वह्निज्ञानकारणत्वं न निर्वहति संयोगवदिति ॥

[108] अस्ति च भावाभावविपर्ययः । सोऽयं यस्य दोषमनुविधत्ते, तदेवात्र करणमिति न्याय्यम् । न चानुपलब्धिः स्वभावतो दुष्टा; नाप्यधिकरणग्रहणं प्रतियोगिस्मरणं वा स्वभावतो दुष्टम्; अनुत्पत्तिदशायामनुत्पत्तेः, उत्पत्तिदशायाश्च स्वार्थप्रकाशनस्वभावताया अपरावृत्तेः ॥ असंसृष्टयोरधिकरणप्रतियोगिनोः संसृष्टतया प्रतिभानं दुष्टम्; संसृष्टयोश्चासंसृष्टतयेति चेत् — नन्वयमेव विपर्ययः । तथाचाऽऽत्माश्रयो दोषः।तस्माद्दुष्टेन्द्रियस्य तद्विपर्ययसामर्थ्ये अदुष्टस्य तत्समीचीनज्ञानसामर्थ्यमपि । तथाच प्रयोगः — इन्द्रियमभावप्रमाकरणं तद्विपर्ययकरणत्वात्, यत् यद्विपर्ययकरणं तत् तत्प्रमाकरणं, यथा रूपप्रमाकरणं चक्षुरिति ॥

[109] विकल्पनात्खल्वपि । अघटं भूतलमिति हि विशिष्टधीरवश्यमिन्द्रियकरणिका स्वीकर्तव्या; प्रमाणान्तरं वा सप्तममास्थेयम् । यथा हि विशेष्यमात्रोपक्षीणमिन्द्रियमकरणमत्र, तथा विशेषणमात्रोपक्षीणाऽनुपलब्धिरपि न करणं स्यात् ॥ स्वस्वविषयमात्रप्रवृत्तयोः प्रमाणयोः समाहारः कारणमिति चेन्न — विषयभेदे फलवैजात्ये च तदनुपपत्तेः । न हि मृत्सु तन्तुषु च व्याप्रियमाणयोः कुलालकुविन्दयोः समाहारस्स्यात । नापि घटपटादिकारिणां चक्रवेमादीनां समाहारः क-

---

इन्द्रियं तु, धूमज्ञानं विनापि सन्निकर्षे सति वह्निज्ञानं जनयतीति इन्द्रियसंयोगवत् न धूमोपलम्भो व्यापारः। धूमज्ञानमपि, विनैवेन्द्रियं,संस्कारादिजमपि वह्न्यनुमितिं जनयतीति न तत् करणमिति॥

[108] अस्ति च भावेऽभावभ्रमः, शङ्खे श्वैत्यं नास्तीति । स चेन्द्रियगतादेव दोषात् । अन्येषां त्वनुपलब्धि अधिकरणग्रहण प्रतियोगिस्मरणानामभावग्रहेऽपेक्षितानामत्र न दुष्टत्वम्; तेषामसत्त्वे, असत्त्वादेव तद्दुष्टताया दुर्वचत्वात्, सत्त्वे चाधिकरणप्रकाशादिकार्यकरतया दुष्टत्वायोगात्। ननु प्रतियोग्यधिकरणयोरसंबद्धयोस्संबद्धतया, संबद्धयोश्चासंबद्धतया भानं दुष्टमिति तत्र दोषस्सुवच इति चेत् — न ह्येतावता केवलाधिकरणग्रहादौ दोष उक्तो भवति; किन्तु दोषाधीनभ्रमे । संबद्धतया भानं हि प्रतियोगिमत्त्वभ्रमः; असंबद्धतया भानञ्चाभावभ्रम इति । तथाचास्माद्भ्रमाद्दुष्टाद्भ्रम इत्युक्तावात्माश्रयः । तस्मादिन्द्रिय एव दोषः । तथाच तत् अभावप्रमाकरणं तद्भ्रमकरणत्वात्, यत् भ्रमकरणं तत् प्रमाकरणं यथेन्द्रियलिङ्गशब्दादीनि ॥

[109] इन्द्रियस्याधिकरणग्रहणांश इवानुपलब्धेरभावग्रहणांश एवोपक्षीणत्वात् अघटं भूतलमिति विशिष्टधीः किमधीना? न हि सप्तमं किञ्चिदिह प्रमाणम् । ननु तयोरेव द्वयोर्मानयोस्समुच्चयादिदं भवतीति चेन्न — मानद्वयस्यापि विभिन्नविषयकतया समाहारासंभवात् । यथा कुलालस्याधिष्ठानविषयो मृत, कुविन्दस्य तन्तुरिति न तत्र तयोस्समाहारः । एवं विभिन्नफलकत्वादपि न समाहारः; यथा घटपटरूपकार्यभेदे चक्रवेमादीनां न नेति । ननु तत्र वि-

चिदुपयुज्यते ॥ तत्र कर्बुरकार्याभावान्न तथा; प्रकृते तु विशिष्टप्रत्ययस्य परोक्षापरोक्षरूपस्य दर्शनात्तथेति चेन्न – विरुद्धजातिसमावेशाभावात्। भावे वा करम्बितं (कर्बुर) एव कार्ये द्वयोरपि शक्तिरभ्युपगन्तव्या; दर्शनबलात्। न हि नियतविषयेण सामर्थ्येन कर्बुरकार्यसिद्धिः; अन्यत्रापि तथा प्रसङ्गात् ॥ ननूभयोरप्युभयत्र सामर्थ्ये कोऽर्थो मिथःसन्निधानेनेति चेन्न — तत्सहितस्यैव तस्य तत्र सामर्थ्यादिति। एतेन सुरभि चन्दनमित्यादयो व्याख्याताः। तथाचाभावविषयेऽपीन्द्रियसामर्थ्यस्य दुरपह्नवत्वादलमसद्ग्रहेणेति ॥

[110] स्यादेतत् — नागृहीते विशेषणे विशिष्टबुद्धिरुदेति, तत्कार्यत्वात्। न च विशिष्टसामर्थ्ये केवलविशेषणेऽपि सामर्थ्यम्, केवलसौरभेऽपि चक्षुषो वृत्तिप्रसङ्गात्। अतोऽभावविशेषणग्रहणाय मानान्तरसम्भवः ॥ अपि च कथमनालोचि-

---

भिन्नसमाहारप्रयुक्तविचित्रकार्यादर्शनान्न समाहारः। इह त्वधिकरणांशेऽपरोक्षस्याभावांशे परोक्षस्य च अघटं भूतलमिति विशिष्टप्रत्ययस्य दर्शनात्समाहारोऽस्त्विति चेन्न – परोक्षत्वापरोक्षत्वयोर्विरुद्धयोरेकत्रासमावेशात्। ननु सुरभि चन्दनं, सोऽयं चैत्र इत्यादौ दर्शनबलाद्विरुद्धयोरपि विषयभेदेन समावेशस्स्वीक्रियत इति चेत् – एवं हि स्वीकारेऽस्य विचित्रस्य कार्यस्यैकत्वादीदृशमिदं प्रति अनुपलब्धिरिन्द्रियञ्च मिलितं कारणमिति कथमिन्द्रियमकरणम्? न हि तत्तदंशे तत्तदिति नियतविषयकत्वस्वीकारे विशिष्टप्रत्ययरूपविचित्रकार्यसिद्धिः; तथासति कुलालकुविन्दयोरपि नियतविषययोस्समावेशेन चित्रकार्यप्रसंगात्। नियतविषयसमाहारे हि संस्कारद्वयसमुच्चयात्स्मृतिरिव समूहालम्बनं ज्ञानं स्यात्, न विशिष्टम्। अन्यथा तत्रापि विशिष्टस्मृतिप्रसंगात्। नन्वेकैकस्यापि कृत्स्नसामर्थ्ये मिथो मेलनं व्यर्थमिति चेन्न– दण्डचक्रादिवत् साहित्ये सत्येव सामर्थ्यात्। सुरभि चन्दनमित्यादावपि मिलितस्यैव हेतुत्वमिति सिद्धमभावप्रमिताविन्द्रियस्य करणत्वम् ॥

[110] स्यादेतत्– विशेषणधियः प्राक्त्वाद्विकल्पत्वादसद्धियः। अप्राप्त्यावश्यकत्वाभ्यामभावो मानमिष्यताम् ॥ अघटं भूतलमिति विशिष्टबुद्धिरिन्द्रियकरणिकेति सत्यम्। सा तु विशिष्टबुद्धित्वाद्विशेषणज्ञानपूर्विकेति पूर्वभावि अभावज्ञानमनुपलब्धिजन्यम्। न च विशिष्टग्रहणसमर्थत्वादिन्द्रियं विशेषणग्रहमपि जनयतीति वाच्यम्–सुरभि चन्दनमिति विशिष्टबुद्धिजनकस्य चक्षुषस्सौरभमात्रग्राहकत्वप्रसङ्गात्। अत एव तत्र घ्राणचक्षुषोस्समाहारेण सामर्थ्ये स्वीकृते सौरभादेरपि चाक्षुषत्वप्रसंगात्, विशेषणधियः प्रागावश्यकत्वाच्च घ्राणेन सौरभज्ञाने जनिते ज्ञानलक्षणप्रत्यासत्तिसहकृतेन चक्षुषा चन्दनांशमात्रे साक्षात्कारात्मकं सौरभांशेऽलौकिकञ्च ज्ञानं जायत इति स्थितिरिति प्रकृतेप्यनुपलब्धिजन्याभावग्रहसहकारेण विशिष्टधीजनकमिन्द्रियमिति सिद्धमनुपलब्धिः प्रमाणम् ॥ अपि च निर्विकल्पागृहीतविषये सविकल्पस्येन्द्रियेणाजननात् अनुमा-

तोऽर्थ इन्द्रियेण विकल्प्येत ? न च मानान्तरस्याप्येषा रीतिः, अनुमानादिभिरनालोचितस्याप्यर्थस्य विकल्पनात् ॥ अप्राप्तेश्च । न ह्यभावेनेन्द्रियस्य संयोगादिः संभवति । न च विशेषणत्वम्, संबन्धान्तरपूर्वकत्वात्तस्य ॥ अवश्याभ्युपगन्तव्यत्वाच्चानुपलब्धेः । न हि तदुपलब्धौ तस्याभावोपलम्भ इति चेत् —

[111] उच्यते—अवच्छेदग्रहध्रौव्यादध्रौव्ये सिद्धसाधनात् ।
प्राप्त्यन्तरेऽनवस्थानान्न चेदन्योऽपि दुर्घटः ॥ २२ ॥

नादितो निर्विकल्पाभावेपि सविकल्पदर्शनाच्च निर्विकल्पं विना भवतो घटप्रतियोगिकत्वविशिष्टाभावसाविकल्पस्येन्द्रियजन्यत्वायोगादन्यदेव प्रमाणम् ॥ एवमिन्द्रियस्य प्राप्यकारितया, क्लृप्तानां संयोगादीनां पञ्चानामपि सन्निकर्षाणामभावेऽभावान्नेन्द्रियं मानम् । नच विशेषणत्वं सन्निकर्षः, सन्निकर्षान्तरवशादभावज्ञाने जाते हि तस्य विशेषणत्वसंभवः ॥ एवं शङ्के पीताभावे सत्यपि पीतोपलब्ध्यभावाग्रहेणानुपलब्धिकारणतया आवश्यकत्वाच्च सा प्रमाणमिति चेत् —

[111] उच्यते- न तावत् अघटं भूतलमिति प्रत्यक्षात्प्राग्घटाभावप्रत्यक्षापेक्षा, **अवच्छेदग्रहध्रौव्यात्**; प्रतियोग्यनुयोग्युपरागेणैवाभावग्रहादनुयोगिभूतलावच्छिन्नत्वस्य व्यावर्तकभूतलसंबन्धस्याभावबुद्धिग्राह्यत्वनियमात् । अधिकरणं विनाप्यभावग्रहसंमतौ चाभावविशिष्टवस्तुधीर्विशेषणज्ञानपूर्विकेत्यनुमाने इन्द्रियकरणकमेवाभावज्ञानमादाय सिद्धसाधनात् । न हि तत् विशेषणज्ञानं नेन्द्रियजन्यमित्यत्र प्रमाणमस्ति । यदि तु भूतले न घट इत्यभावविशेष्यकज्ञानं पूर्वम् , पश्चाद्विशेषणज्ञानबलात् अघटं भूतलमित्यभावविशिष्टज्ञानमित्युच्यते. तदापि पूर्वज्ञानमप्यैन्द्रियकमेवेति ॥ यत्तु अभावनिर्विकल्पायोगादिन्द्रियाजन्यत्वं तस्येत्युक्तम्—तदपि न – **अवच्छेदग्रहध्रौव्यात्** अभावे प्रतियोग्यवाच्छिन्नत्वग्रहनियमात् प्रतियोगिनं विना पृथग्भानायोग्याभावविषये निर्विकल्पानपेक्षणात् । **अध्रौव्ये** अभावग्रहस्य प्रतियोगिविषयकत्वानियमे इन्द्रियादभावनिर्विकल्पस्यापि स्वीकारात् , यदि सविकल्पविषयस्तर्हि निर्विकल्पवेद्यस्स्यादित्यापादनस्येष्टापादनरूपत्वात् ॥ स्वरूपातिरिक्तसंबन्धस्वीकारेऽनवस्थाप्रसंगात्स्वरूपमेव संबन्ध इति नाप्राप्तिदोषोऽपि॥ **नचेदन्योपि दुर्घटः**—अनुपलब्ध्यावश्यकत्वमात्रेणेन्द्रियकरणकत्वं न चेत्, इन्द्रियावश्यकतयाऽनुपलब्धिकरणभावोपि दुर्घटः । एवं भावविषयेपीन्द्रियकरणभावो दुर्घटः, अभावानुपलब्धेः करणत्वसंभवादिति । एवं 'नियमेन विशिष्टतया भासमानाभावविषयेपि निर्विकल्पकमावश्यकम् , स्वरूपातिरिक्तसंबन्धं विना चाभावग्रहो न भवती' ति स्वीकृत्यास्मदुक्तांगीकारो न चेत् , भवत्पक्षोपि दुर्घट इति ॥

---

१. प्र. 'विशिष्टज्ञानमात्रस्य न विशेषणज्ञानजन्यत्वानियमः, अवच्छेदग्रहानियतज्ञानविषयत्वस्योपाधित्वादित्याह अवच्छेदेति' इति । बौ. 'अवच्छिद्यतेऽनेनेत्यवच्छेदः प्रतियोगी' ति॥

[112] स ह्यर्थविशेषणीभविष्यन् केवलोऽपि विस्फुरेत्, यस्यावच्छेदकज्ञानं न व्यञ्जकम्। स च (वा) विकल्पयितव्य आलोच्यते, यो विशेषणज्ञाननिरपेक्षेणेन्द्रियेण विज्ञाप्यते। यस्तु तत्पुरःसर एव प्रकाशते, तत्र तस्य विकल्पसामग्रीसमवधानवत एव सामर्थ्यान्नायं विधिः॥

[112] तदिदं विव्रियते — घटादिर्हि भूतलादि विना केवल एव प्राग्गृह्येत, पश्चाच्च भूतले विशेषणतया भासेत, **अवच्छेदकस्य** अधिकरणविधया व्यावर्तकस्य भूतलादेर्ज्ञानं हि न घटादेर्व्यञ्जकम्, पृथग्ग्रहणार्हत्वात्। अभावस्त्वनुयोगिरूपावच्छेदकं विना न भानार्ह इति। नापि द्वितीयहेतुः, योह्यर्थो विशिष्टरूपतां विना ग्राह्यः, **सएवालोच्यते** निर्विकल्पेन गृह्यते; ततस्सविकल्पविषयीभवति। अभावस्तु प्रतियोगिनं विना भानानर्ह इति नात्र निर्विकल्पापेक्षा। अतोऽनुयोगिप्रतियोगिपुरस्सरं प्रकाशतेऽभाव इति प्रथममेव अघटं भूतलमिति विशिष्टज्ञानमिति। एवं **यस्यावच्छेदकज्ञानं न व्यञ्जकं** — विशेषणज्ञानं यद्विषयकज्ञानजनकं न भवति; **यत्** स्वरूपतो भासमानमिति **यावत्**; स धर्मः **शुद्धः** प्राक्स्फुरेत्। धर्म्यपि यो विशेषणज्ञानं विना **ग्राह्यः**, स एव निर्विकल्पविषयीभवेत्। निरूपकसापेक्षो धर्मो धर्मी वा पृथग्भानानर्हत्वात्प्रथममेव सविकल्पविषय इत्युक्तं भवति। सन्ति हि पुत्रत्वाऽऽधेयत्वादयो धर्माः पित्राधारादिसापेक्षास्तन्निरपेक्षं प्रत्यक्षाविषयाः। एवं ज्ञानसंयोगसमवायादयो धर्मिणोऽपि विषयसंबन्ध्यादिनिरूप्यास्तद्विशिष्टतयैव गृह्यमाणाः। तथाच प्रकृतेऽभावत्वमनुयोगित्वरूपं प्रतियोगिनिरूपितमेव भासत इति वा, अभावो धर्म्येव प्रतियोग्यवच्छिन्नो भासत इति वा स्वीकार्यमिति प्रथममेव सविकल्पमिति॥

---

१. प्र. 'अवच्छेदस्य प्रतियोग्यादेर्विशेषणस्य जन्यज्ञानं विना यत्र विशिष्टज्ञानसामग्री प्रथमतो न भवति, स एवार्थःपूर्वं निर्विकल्पकविषय इति विषयमुखीव्याप्तिरित्यर्थः। सच्चेति। जन्यविशेषणज्ञानासहकृतेन्द्रियजन्यज्ञानगोचरत्वं निर्विकल्पप्रयोजकमिति प्रमाणमुखी व्याप्तिरित्यर्थ' इति। बो. 'येषां दण्डकुण्डलादीनामर्थानामर्थान्तरज्ञाननिरपेक्षैस्स्वविषयैरेव ज्ञानैरितरेतरव्यवच्छेदास्सिध्यति, त एव विशेषणीभवन्तः केवला अपि स्फुरेयुः। येषां तु ज्ञानसमवायाभावादीनां स्वस्वगोचरं ज्ञानं व्यञ्जकमात्रं, न तु व्यवच्छेदकम्, न हि ते प्रतियोगिज्ञाननिरपेक्षैरेव स्वविषयज्ञानैः स्वेतरव्यवच्छिन्नाः प्रतीयन्ते। .... द्वितीयस्यापि चोद्यस्य तमेवोत्तरतया व्याचष्टे **स वा विकल्पयितव्य** इति। तैरेव विकल्पेवैर्भवद्भिः पूर्वमालोचनविषयैर्भवितव्यम्, ये प्रतियोगिज्ञाननिरपेक्षैरेवेन्द्रियैर्ज्ञाप्यन्ते, यथा घटादयः' इति। अनेन **अवच्छेदकं ज्ञानं** इति, **स वा विकल्पयितव्य** इति च पाठो ज्ञायते। मूले प्रथमवाक्ये निर्विकल्पग्रहणे स्वरसं पदं नास्ति। अत्र विस्तरकृतार्थवर्णनरीतिर्युक्ता स्यात्।

[113] स्वभावप्राप्तौ सत्यामप्यधिका प्राप्तिः प्रतिपत्तिबलेन रूपादावभ्युपगता। इह त्वनवस्थादुस्थतया न तदभ्युपगमः;नतु स्वभावप्रत्यासत्तिरेतावतैव विफलायते॥

[114] न चेदेवं, प्रमाणान्तरेऽपि सर्वमेतद्दुर्घटं स्यात्। तथाहि- सर्वमेव मानं साक्षात्परम्परया वा निर्विकल्पकविश्रान्तम् । न ह्यनुमानादिकमप्यनालोचनपूर्वकम्। ततोऽनालोचितोऽभावः कथमनुपलब्ध्यापि विकल्प्येत । न च तया तदालोचनमेव जन्यते, प्रतियोग्यनवच्छिन्नस्य तस्य निरूपयितुमशक्यत्वात् । शक्यत्वे वा किमपराद्धमिन्द्रियेण ॥ तथा सम्बन्धान्तरगर्भत्वनियमेन विशेषणत्वस्य, मानान्तरेऽपि कः प्रतीकारः; तदभावस्य तदानीमपि समानत्वात् ॥ परस्य तादात्म्यमस्तीति चेत्- ननु यद्यसावस्ति, अस्त्येव; न चेत्, नैव। न ह्यभ्युपगमेनार्थाः क्रियन्ते, अनभ्युपगमेन वा निवर्तन्ते इति ॥

[115] अवश्याभ्युपगन्तव्यत्वे कारणत्वं सिद्ध्येत्, न तु मानान्तरत्वम् । अन्यथा भावोपलम्भेऽप्यभावानुपलब्धिरेव प्रमाणं स्यात्; नेन्द्रियम्। अभावोपल-

---

[113] नाप्यप्राप्तिरूपो दोषः, इन्द्रियस्याधिकरणेन सन्निकृष्टत्वात् ,अधिकरणेनाभावस्य च स्वरूपसंबन्धाख्यप्रत्यासत्तिसत्त्वात् । न च स्वरूपं न प्रत्यासत्तिः, रूपघटादिष्वदर्शनादिति वाच्यम् – तत्र स्वरूपप्रत्यासत्तौ सत्यामप्यनुभवबलात्समवायसंयोगादेस्स्वीकारात् । संबन्धस्सर्वस्संबन्धिभिन्न इति नियमे तु अभावसंबन्धस्य कल्प्यस्यापि संबन्धान्तरमित्यनवस्थाप्रसंगात्स्वरूपमेवेह प्रत्यासत्तिः ॥

[114] अन्यथा त्वन्मतेपि सर्वं दुर्घटम् । प्रमाणसामान्यं हि निर्विकल्पसापेक्षम्, महानसदृष्टवह्निजातीयस्यैव पर्वतेऽनुमानात् । तत्र प्रत्यक्षं साक्षात्तदपेक्षम्, अनुमानादि तु प्रत्यक्षोपजीवित्वात्परंपरया तथा । अतोऽनुपलब्ध्याप्यभावसविकल्पजननं न भवति, निर्विकल्पागृहीतत्वात् । एवं संबन्धविषयेपि ; स्वरूपसंबन्धानुपगमे विशेषणताख्यसंबन्धस्य संबन्धान्तराधीनत्वाद्विशेषणत्वाभावस्य संबन्धान्तराभावस्य च त्वन्मतेपि तुल्यत्वात् । ननु प्राभाकरस्य मतेऽभावाधिकरणयोस्तादात्म्यं संबन्धोऽस्तीति चेत् – यद्यभावस्याधिकरणतादात्म्यं सयुक्तिकं स्थापितम्, तर्हि तस्य सर्वस्वीकर्तव्यत्वादस्माकमपि सोऽस्त्येव । किञ्च वयमङ्गीकुर्मो न वा। वस्तुगत्या संबन्धोऽस्ति चेत्, अस्त्येवेति । नचास्मन्मते ऐन्द्रियकत्वं न भवतीति त्वन्मतेऽनुपलब्धिप्रमाणासिद्धिः ॥

[115] नाप्यवश्याभ्युपगन्तव्यस्वरूपश्चतुर्थो हेतुः, अनुपलब्धिवदिन्द्रियस्याप्यावश्यकतया तयोर्मध्ये क्लृप्तत्वेनेन्द्रियस्यैव करणत्वात्। अनुपलब्धेरपेक्षितत्वमात्रेण प्रमाणत्वे अभावोपलम्भे भावानुपलब्धेरिव भावोपलम्भेप्यभावानुपलब्धेः प्रतिबन्धकाभावविधया आवश्यकत्वा-

म्भे भावानुपलम्भवत् भावोपलम्भे अभावानुपलम्भस्यापि वज्रलेपायमानत्वादिति॥

[116] प्रत्यक्षादिभिरेभिरेवं अधरो दूरे विरोधोदयः
प्रायो यन्मुखवीक्षणैकविधुरैरात्माऽपि नासाद्यते ॥
तं सर्वानुविधेयमेकमसमस्वच्छन्दलीलोत्सवं
देवानामपि देवमुद्भवदतिश्रद्धाः प्रपद्यामहे ॥ २३ ॥

इति न्यायकुसुमाञ्जलौ तृतीयः स्तबकः ॥ ३ ॥

त्सर्वत्र सैव करणं स्यात्, नेन्द्रियम्। अतोऽनुपलब्धिर्न मानान्तरमिति सिद्धम्। तस्सिद्धं न किञ्चित्प्रमाणमीश्वरबाधकमिति ॥

[116] बाधकत्वाभिमतेन प्रत्यक्षादिना हि प्रथमत ईश्वरं विषयीकृत्य तस्य बाधः कर्तव्यः। सर्वं च तादृशमीश्वरग्रहणासमर्थम्। अतस्तन्मुखवीक्षणैकविधुरैः तद्विषयीकरण एवासमर्थैर्बाधकत्वाभिमतैः प्रत्यक्षादिभिर्निर्विषयत्वात्स्वरूपमेव न लभ्यते। ततश्चाधरः ईश्वरविषयीकरणानन्तरभावी विरोधोदयो दूरे। अयञ्चात्मालाभः प्रायिकः, प्रकृतेः क्रियमाणानीत्यादेश्शब्दस्य लब्धात्मत्वात्। तस्यापि त्वन्यार्थकतया तन्मुखवीक्षणविधुरत्वाद्विरोधोदयो दूर एव। एवं सर्वाबाध्यं सर्वविधेयकमद्वितीयं अनन्यसाधारणजगत्सृष्ट्यादिस्वच्छन्दलीलं सर्वदेवाधिष्ठातृभूतं देवं प्रकृष्टया श्रद्धया प्रपद्यामह इति ॥

इत्थं वृषशैलपतेर्वीक्षातो वीरराघवः ख्यातः ।
पण्डितरत्नोपाध्यो व्याख्यदिमं मध्यमं स्तबकम् ॥

इति कुसुमाञ्जलिविस्तरे तृतीयस्तबकः ॥

श्रीमते हयवदनपरब्रह्मणे नमः ॥



---

१. बो. 'सर्वेषां प्रमाणानां कार्यत्वेनेश्वरायत्तात्मलाभत्वात् तत्परतन्त्रत्वादुक्तं यन्मुखवीक्षणेति। प्रत्यक्षस्योत्पत्तौ तदपेक्षायामपि प्रामाण्ये तदनपेक्षत्वादुक्तं प्राय इति। ईश्वरस्याधरैरर्वाक्प्रवर्तमानैस्तमपि विषयीकर्तुमशक्नुवद्भिरिति यावत्' इति। अनेन अधरै रिति पाठो गम्यते। प्र. 'यस्येश्वरस्य मुखवीक्षणैकविधुरैर्धर्मिग्राहकमानबाधितैः प्रत्यक्षादिभिर्विरोधोदयः अधरः; अत एव दूरे। .... देवानामपि देवं स्तुत्य' मिति ॥

श्रीः

श्रीमते श्रीनिवासपरब्रह्मणे नमः

न्यायकुसुमाञ्जलौ

चतुर्थस्स्तबकः.

ननु सदपीश्वरज्ञानं न प्रमाणम्, तल्लक्षणायोगात्; अनधिगतार्थगन्तुस्तथाभावात्। अन्यथा स्मृतेरपि प्रामाण्यप्रसङ्गात्। नच नित्यस्य सर्वविषयस्यचानधिगतार्थता, व्याघातात् – अत्रोच्यते —

अव्याप्तेरधिकव्याप्तेरलक्षणमपूर्वदृक्।
यथार्थानुभवो मानमनपेक्षतयेष्यते ॥ १ ॥

श्रीः

श्रीमते हयवदनपरब्रह्मणे नमः

कुसुमाञ्जलिविस्तरे चतुर्थस्स्तबकः.

यस्य सर्वं सदा साक्षाद्यथार्थानुभवे स्थितम्।
नारायणाद्रिगश्श्रीमान् दद्यान्नारायणः प्रमाम् ॥

ननु विश्ववृत्तिवलसिद्धसाफल्यकल्पितादृष्टद्वारकसाधनतावदर्थावबोधिनो वेदराशेर्वक्तृज्ञानजन्यत्वानुमानतः, बाधकस्य कस्याप्यभावेन, वक्तुस्तज्ज्ञानस्य च सिद्धावपि तद्ज्ञानं प्रमैव न भवति, नतराञ्चेश्वरस्य प्रमाणत्वम्। नहि प्रमालक्षणमीश्वरज्ञाने समन्वेति; अगृहीतार्थग्राहकज्ञानस्यैव प्रमाभूतत्वात्। **अन्यथा** अर्थग्राहकत्वमेव प्रमात्वमित्युक्तौ स्मृतेरपि प्रमात्वापत्तेः। तस्मादगृहीतार्थविषयकज्ञानत्वमेव प्रमात्वम्। नचेश्वरज्ञानस्य तत्; अगृहीतार्थविषयकत्वस्य स्वप्राक्कालिकत्वसमानाधिकरणज्ञानाविषयीभूतार्थविषयकत्वरूपतया ईश्वरज्ञानस्य स्वपदेन ग्रहणे तस्य नित्यत्वेन स्वप्राक्कालघटितलक्षणस्य दुर्वचत्वात्। कथञ्चित्स्वात्मकज्ञानस्यैव स्वाधिकरणकिञ्चित्कालपूर्वकालिकतया स्वप्राक्कालिकत्वसंपादनेपि तस्य सर्वविषयकत्वेन ज्ञानाविषयाप्रसिध्या सुतरां लक्षणायोगाच्च इति चेत् — उच्यते ॥

अपूर्वदृक् अज्ञातपूर्वार्थदर्शनं अज्ञातार्थग्राहित्वं न प्रमालक्षणम्, धारावाहिज्ञाने गृहीतविस्मृतार्थपुनर्ज्ञानेचाव्याप्तेः, शुक्तिरजतादिभ्रमेऽतिव्याप्तेश्च। अतोऽनुभवान्तरनिरपेक्षत्वाविशेषात् यथार्थानुभवस्सर्वः प्रमाणमिति यथार्थानुभवत्वं प्रमालक्षणमितीष्यते। स्मृतिस्तु पूर्वानुभवसापेक्षा न प्रमेति ॥

[2] नह्यधिगतेऽर्थे अधिगतिरेव नोत्पद्यते, कारणानामप्रतिबन्धात्। नचोत्पद्यमानापि प्रमातुरनपेक्षितेति न प्रमा, प्रामाण्यस्यातदधीनत्वात्। नापि पूर्वाविशिष्टतामात्रेणाप्रामाण्यम्; उत्तराविशिष्टतया पूर्वस्याप्यप्रामाण्यप्रसङ्गात्। तदनपेक्षत्वेन तु तस्य प्रामाण्ये तदुत्तरस्यापि तथैव स्यात्, अविशेषात्॥ छिन्ने कुठारादीनामिव, परिच्छिन्ने नयनादीनां साधकतमत्वमेव नास्तीत्यपि नास्ति, फलोत्पादानुत्पादाभ्यां विशेषात्॥

[3] तत् फलं प्रमैव न भवति गृहीतमात्रगोचरत्वात् स्मृतिवदिति चेन्न – यथा-

---

[2] तथाहि – प्रमात्मकानुभवे अननुभूतार्थविषयकत्वं ब्रुवता त्वया किमनुभूतार्थविषये अनुभूतिरेव न जायत इत्युच्यते, किंवा जातापि न प्रमेति। नाद्यः; सिद्धिरूपप्रतिबन्धकसत्त्वेनानुमितिरूपानुभूत्यसंभवेपि अन्यादृशानुभूतेस्स्वकारणबलेन संभवात्। नान्त्यः; मानाभावात्। नच पूर्वानुभूत्यैव व्यवहारनिर्वाहात् उत्तरानुभूतिर्नप्रमा, प्रमात्रनपेक्षितत्वादिति वाच्यम् – प्रमात्वस्य प्रमात्रपेक्षाधीनत्वाभावेनानपेक्षत्वस्य प्रमात्वाभावं प्रति हेतुत्वासंभवात्। अन्यथा यदृच्छाजातस्यापूर्वार्थग्राहिण उपेक्षात्मकज्ञानस्याप्रामाण्यापातात्। नच – पूर्वज्ञानाविशिष्टत्वमेव तत्र हेतुः। तदविशिष्टत्वञ्च न तद्विषयविषयकत्वमात्रम्; परामर्शविषयसाध्यविषयकानुमितेः प्रमात्वानापत्तेः। नापि तदन्यूनविषयकत्वम्; तथासति न्यूनविषयकस्य घटपटोभयदर्शनानन्तरभाविघटमात्रदर्शनस्य प्रमात्ववारकाभावेन तत्र तदिष्टत्वसिद्धौ तत्रावर्तमानत्वेनागृहीतार्थग्राहित्वस्य प्रमालक्षणस्यासंभवप्रसङ्गात्। अतस्तदनधिकविषयकत्वं तदविशिष्टत्वं – इति वाच्यम् – हेतोरप्रयोजकत्वात्। अन्यथा पूर्वज्ञानमप्रमा उत्तराविशिष्टत्वादित्यपि सुवचत्वात्। एवं सत्युत्तरविशिष्टज्ञानकारणस्य विशेषणज्ञानस्याप्रमात्वापत्तिरिति चेत् – अस्तु तदपि। यदि पूर्वज्ञानस्योत्तराविशिष्टत्वेप्युत्तरानपेक्षतया उत्तरं प्रत्यकार्यतया प्रमात्वम्, तर्ह्युत्तरस्यापि पूर्वानपेक्षत्वाविशेषात् प्रामाण्यमेव स्यात्॥ ननु सिद्धे स्वोत्पाद्यफले नेत्रादिकं न स्वयं फलसाधनं करणत्वात् कुठारवत्। नहि कुठारश्छिन्ने काष्ठे पुनश्छिदां जनयेत्। तद्वत् नेत्रादिकमपि परिच्छिन्ने गृहीतेऽर्थे पुनर्ग्रहकरणं न भवति। तथाचेन्द्रियं यत्र ज्ञाने करणं सैव प्रमेति चेन्न – वैधर्म्यात्। तत्रहि छिदारूपं फलं नैव पुनरुत्पद्यते; इहतूत्तरं ज्ञानमुत्पद्यत एवेति फलं प्रति साधकतमत्वाभावस्य बाध एवेति। अतः करणत्वनिषेधायोगात् फलं जायमानमपि प्रमा न भवतीत्यत्र हेतुरन्यो वाच्यः। सच न कश्चिदिति॥

[3] ननु तदपि चक्षुरादेः फलमेव। अथापि तत्र प्रमात्वाभावः स्मृतिदृष्टान्तेन गृहीतमात्रविषयकत्वहेतुना साध्यत इति चेन्न — उभयसंमतप्रमात्वस्यैकरूपत्वाभावेन विकल्पासहत्वात्। साध्यः प्रमात्वाभावोऽत्र किंरूपः? यथार्थानुभवत्वाभावरूपश्चेत् – बाधः, तस्य

र्थानुभवत्वनिषेधे साध्ये बाधितत्वात् । अनधिगतार्थत्वनिषेधे सिद्धसाधनात्, साध्यसमत्वाच्च । व्यवहारनिषेधे तन्निमित्तविरहोपाधिकत्वात्, बाधितत्वाच्च । नचानधिगतार्थत्वमेव तन्निमित्तम्, विपर्ययेपि प्रमाव्यवहारप्रसङ्गात् । नापि यथार्थत्वविशिष्टमेतदेव; धारावहनबुध्यव्याप्तेः ॥

[4] नच तत्तत्कालकलाविशिष्टतया तत्राप्यनधिगतार्थ (र्थगन्तृ) त्वमुपपादनीयम्; क्षणोपाधीनामनाकलनात् । नचाज्ञातेष्वपि विशेषणेषु तज्जनितविशिष्टताप्रकाशत इति कल्पनीयम्; स्वरूपेण तज्जननेऽनागतादिविशिष्टतानुभवविरोधात्; तज्ज्ञानेन तु तज्जनने सूर्यगत्यादीनामज्ञाने तद्विशिष्टतानुत्पादात्॥ नचैतस्यां प्रमा-

---

यथार्थत्वादनुभवत्वाच्च । अगृहीतार्थग्राहित्वाभावे तु साध्ये विवक्षिते सिद्धसाधनम् । तत्र गृहीतग्राहित्वस्य संप्रतिपन्नत्वात् । यदि साध्यं संदिग्धम्, तर्हि साध्याविशिष्टत्वात् हेतोस्साध्यसमत्वमिति संदिग्धासिद्धिः ॥ प्रमाशब्दव्यवहार्यत्वाभावे तु साध्ये विवक्षिते हेतोस्सोपाधिकत्वम्; प्रमाशब्दप्रवृत्तिनिमित्ताभावस्योपाधित्वात् । एवं बाधोऽपि; परीक्षकैरुत्तरज्ञानेपि प्रमाव्यवहारः क्रियत इति वक्ष्यमाणत्वात् । नच – नायमुपाधिः, अगृहीतार्थग्राहित्वस्यैव प्रमाशब्दप्रवृत्तिनिमित्तत्वात्तदभावस्य पक्षेप्यक्षतत्वात्; हेतूसाध्योरेकत्वाच्चेति – वाच्यम् – तस्य प्रवृत्तिनिमित्तत्वे भ्रमज्ञानेपि तत्सत्त्वेन प्रमाव्यवहारप्रसङ्गात् । नापि यथार्थत्वे सत्यगृहीतार्थकत्वं निमित्तम् - इन्द्रियसन्निकर्षाविच्छेदे सति, अयं घटः, अयं घट इत्यनुस्यूतं भवत्वेकधर्मिकधारावाहिज्ञानेषु भवन्मतेपि प्रमाव्यवहारस्येष्टतया तत्र निमित्तस्याव्यापनात् ॥

[4] नच धारावहनस्थले अयं घट इति पूर्वज्ञानेऽयमिति यः कालांशो गृहीतः, तदन्यस्तदनन्तरः कालांश एव द्वितीयज्ञाने विषयीभवतीत्यगृहीतार्थग्राहित्वमक्षतमिति वाच्यम् – सूर्यपरिस्पन्दादिरूपाणां क्षणोपाधीनां प्रत्यक्षग्राह्यत्वाभावात्कालग्रहणायोगात्; विशेषगुणयोग्यतां पुरस्कृत्यैवेन्द्रियाणां द्रव्यग्राहकतया कालस्य ग्राह्यत्वायोगाच्च । नच – तेषां प्रत्यक्षाविषयत्वेऽपि तैर्घटे वैशिष्ट्यविशेषा उत्पादितास्सन्ति । तत्रैकैकं वैशिष्ट्यमेकैकत्र भासते इत्यगृहीतार्थविषयकत्वोपपत्तिरिति – कल्पनीयम् — तेषां वैशिष्ट्योत्पादकत्वं हि किं स्वरूपसत्तया, उत ज्ञानद्वारा । नाद्यः; अतीतानागतकालविशिष्टतया घटग्रहणकाले विशेषणभूतयोः कालयोरभावेन वैशिष्ट्योत्पत्त्ययोगात्तत्रापि वैशिष्ट्यभानस्यानुभवसिद्धस्य दुरुपपादत्वापत्तेः । नान्त्यः; तेषां ज्ञानाभावस्य प्रागुक्ततया वैशिष्ट्योत्पत्त्यसंभवात् । ननु स्वरूपसता अतीतादिकालांशेन तत्तत्सत्तासमये उत्पाद्यमानं वैशिष्ट्यमेव संप्रत्यनुभूयत इति चेत् – नेदृश्यां विशेषणोत्पाद्यायां विलक्षणायां

---

१. अनधिगतार्थत्वे इति सर्वत्रपाठः । प्रमात्वस्य तद्रूपतया तन्निषेधस्यैव साध्यत्वात्तत्रैव पूर्वं पश्चाच्च दोषस्य कथ्यमानत्वादेवं शोधितम् ।

णमस्ति। नन्वनुपकार्यानुपकारकयोर्विशेषणविशेष्यभावे कथमतिप्रसङ्गो वारणीयः? व्यवच्छित्तिप्रत्यायनेन ; व्यवच्छित्तौ स्वभावेन । अन्यथा तत्रा (वा) प्यनवस्थानादिति ॥

[5] ज्ञाततैवोपाधिरिति चेन्न – निराकरिष्यमाणत्वात्। तत्सद्भावेपि वा स्मृतेरपि तथैव प्रामाण्यप्रसङ्गात् । जनकागोचरत्वेप्युत्तरोत्तरस्मृतौ पूर्वपूर्वस्मरणजनितज्ञाततावभासनात् ॥

[6] अस्तु वा प्रत्यक्षे यथातथा। गृहीतविस्मृतार्थश्रुतौ का वार्ता ? अत्रमैवासा-

---

विशिष्टतायामेव किञ्चित्प्रमाणमस्ति। ननु विशेषणत्वं विशेषकरत्वम , विशेष्यत्वञ्च विशेषभाक्त्वम् । अतो यदि विशेषणाधीनं वैशिष्ट्यं नेष्यते, तर्ह्यनुपकारकत्वेपि विशेषणत्वं, अनुपकार्यत्वेपि च विशेष्यत्वमिति सिध्यति। तथाचावर्तमानघटोपि वर्तमानकालेन विशेष्यतामिति चेत् – व्यवच्छित्तिप्रत्यायनेनायमतिप्रसंगो वारणीयः; व्यावृत्तिप्रत्ययकरत्वेन विशेषकरत्वस्य सिद्धत्वात् । वर्तमानघटस्यचावर्तमानघटे व्यावृत्तिप्रत्यायकत्वं नास्तीति न विशेषणत्वम् । नन्वेतदधीनवैशिष्ट्याख्यवस्त्वभावे एतस्यान्यत्रापि व्यावृत्तिप्रत्यायकत्वं कुतो नास्तीति चेत् – एवं व्यावृत्तौ प्राप्तोऽतिप्रसंगोपि स्वभावेन वारणीयः । वैशिष्ट्याख्यवस्त्वन्तराभावेपि कालस्यानुभवानुसारेणात्रैव स्वरूपसंबन्धेन संबद्धत्वाङ्गीकारान्नान्यत्र व्यावृत्तिकरत्वमिति । अन्यथा स्वजन्यवैशिष्ट्याख्योपकाराभावे स्वस्य न विशेषणत्वमिति वैशिष्ट्यस्वीकारे तस्य वैशिष्ट्यस्यापि 'वर्तमानकालवैशिष्ट्यवदिद' मिति वस्तुविशेषणतया भानात् तद्विशेषणत्वनिर्वाहाय तदधीनं वैशिष्ट्यान्तरं वस्तुनि कल्प्यम्, एवं तदधीनं वैशिष्ट्यान्तरमित्यनवस्था स्यादिति । तस्मात् वैशिष्ट्याभावात् कालतदुपाधीनाञ्चाग्राह्यत्वान्न धारावाहिबुद्धीनामनधिगतार्थकत्वम् ॥

[5] ननु – पूर्वपूर्वज्ञानेन ज्ञातताख्यो धर्मो घटे उत्पाद्यते । तद्विशिष्टतया घट उत्तरज्ञाने भासत इति ज्ञाततारूपविशेषणसत्त्वाद्धारावाहिधियामनधिगतार्थत्वमिति चेन्न – ज्ञाततायाः अत्रैव स्तवके निराकरिष्यमाणत्वात्। तत्स्वीकारेपि तद्भिन्नं विषयमादायैवानधिगतार्थत्वमुपपादनीयम् ; अन्यथा स्मृतेरप्यनुभवोत्तरभावितया धारावाहिबुद्धेरिव प्रामाण्यापत्तेः । यद्यपि स्मृतेस्तज्जनकीभूतानुभवविषयकत्वं निरसिष्यते ; एवं तज्जनितज्ञाततापि न विषयः, तस्या अनुभवाव्यवहितोत्तरक्षण एव जातत्वेन स्मृतिकालेऽतीतत्वात्, अथापि स्मृतिसंततिस्थले पूर्वपूर्वस्मृतिजनितज्ञाततविषयकत्वेनोत्तरस्मृतिः प्रमा स्यादिति ॥

[6] ननु स्मृतिप्रमाण्यापादनमशक्यम् ; स्मृतेरनुभूतार्थमात्रविषयकत्वात् ; ज्ञातताविषयकसंस्काराभावेन स्मृतौ तदनुल्लेखात् । प्रत्यक्षेतु अयमित्यनुभवानुसारात् सन्निकर्षस्वीकारेण किञ्चिद्विशेषणभानसिद्धिः । तत्र यदि ज्ञातता नेष्यते, तर्हि कालांश एव विशेषणम् । नच तस्या-

विति चेत् – गतमिदानीं वेदप्रामाण्यप्रत्याशया । नह्यनादौ संसारे, 'स्वर्गकामो यजेते' ति वाक्यार्थः केनचिन्नावगतः; संदेहेऽपि प्रामाण्यसंदेहात् । नच तत्रापि कालकलाविशेषाः परिस्फुरन्ति । नचैकजन्मावच्छेदंपरिभाषयेदं लक्षणम्, तत्राप्यनुभूतविस्मृतवेदार्थं प्रत्यप्रामाण्यप्रसङ्गात् ॥

ग्राह्यत्वम्; ग्राह्यत्वानुभवानुसारेणाग्रह्यमूर्तगत्यादिविलक्षणस्य तस्याभ्युपगमात्; कालस्य च सर्वेन्द्रियग्राह्यत्वस्वीकारात् प्रतिनियतद्रव्यग्रहण एव विशेषगुणयोग्यताया अपेक्षितत्वात् । अन्यथा उत्तरज्ञानस्य पूर्वज्ञानाधिकविषयकत्वाभावे आसन्निकर्षोपरमं प्रथमजातज्ञानस्यैव स्थैर्यस्वीकारसंभवेन तन्नाशकस्य योग्यविभुविशेषगुणस्यानुत्पन्नतया तस्य द्विक्षणमात्रस्थायित्वे मानाभावेन धारावाहिसंतत्यसिध्या एकज्ञानत्वमेवेति प्रमाण्यं सूपपादम् । अतो ज्ञानधारावादिना तत्राधिकविषयकत्वमेष्टव्यमेवेति चेत् — अस्तु प्रत्यक्षे यथातथा । यत्र पूर्वं केनचित्प्रमाणेन गृहीतस्य पश्चाद्विस्मृतस्यार्थस्य शब्दाधीनो बोधो भवति, तत्र बोधे प्रमाण्यं कुशलि नवा । न चेत् तर्हि वेदप्रामाण्यमेव न संभवति; 'यजेतस्वर्गकाम' इत्यादिवेदवाक्यार्थानां संसारानादितया यदाकदाचिदेकैकेनाप्यात्मना पूर्वगृहीतत्वावश्यम्भावेन कदापि तद्विषयकबोधस्यागृहीतार्थविषयकत्वासिद्धेः । ननु संसारस्यानादित्वेपि त्रैवर्णिकजन्म प्राक्स्थितमिति निश्चयाभावादर्थस्य पूर्वगृहीतत्वे संदेह एवेति चेत् — एवमपि वेदे प्रामाण्यसंदेहो निस्संदेह इति न प्रामाण्यावधारणम् । नहि प्रत्यक्ष इव शाब्दबोधे शब्दार्थमात्रग्राहिणि पूर्वागृहीतकालविशेषभानसंभवः । नच - प्रकृतजन्मावच्छेदेनागृहीतार्थग्राहित्वं प्रमात्वम्, स्वसमानाधिकरणस्वप्राक्कालिकस्वावच्छेदकजन्मावच्छिन्नज्ञानाविषयविषयकत्वमिति यावत्; तथाच जन्मान्तरे गृहीतत्वेपि न दोष इति - वाच्यम्—अस्य स्वाभीष्टरक्षणाय केवलं परिभाषामात्रत्वात् । नानाजन्मानङ्गीकारिनास्तिकादिसाधारण्येनैव लोकानुभवसिद्धप्रामाण्यस्य निर्वचनीयत्वाच्च । अस्तु कामं; तथाप्येकस्मिन्नेव जन्मनि वेदार्थस्य गृहीतविस्मृतस्य पुनश्श्रवणमिष्टप्रवृत्तिकरमप्रमा स्यात् ।

[ननु किं विस्मृतवेदार्थज्ञानस्याप्रमात्वमापाद्यते उत वेदस्याप्रामाण्यम् । नाद्यः; तत्राप्रमात्वस्येष्टत्वात् । नच तावता तस्य प्रवृत्त्यजनकत्वम्; ज्ञानगतयाथार्थ्यस्यैव सफलप्रवृत्तिप्रयोजकत्वात् अनधिगतार्थकत्वस्य तत्रानुपयोगात् । अत एव स्मृतेरपि प्रवर्तकत्वम् । नान्त्यः, इदानीमधिगतज्ञापकत्वेपि प्रथमतोऽज्ञातज्ञापकत्वेनैव प्रामाण्यसिद्धेः । नहि यागस्वर्गादिरर्थो- वेदादन्येनावगतोऽस्ति । अतो न दोष इति चेन्न — अनादौ संसारे वेदस्य सर्वदैव ज्ञातार्थज्ञापकत्वेनाप्रामाण्यानिवारणात् । 'विस्मृत एवार्थ इदानीं ज्ञात' इति ज्ञानाभावदशायां तत्र विस्मृतार्थज्ञाने प्रमाव्यवहारस्य तन्मूलकस्य वेदप्रामाण्यव्यवहारस्य च भवद्भिरेव क्रियमाणस्य भ्रान्तिकृतत्वे प्रमाणाभावाच्च । निश्चयसामान्यस्य भ्रमप्रमान्यतरात्मकत्वानुभवेन तृतीयप्रकारकल्पना-

[7] कथं तर्हि स्मृतेर्व्यवच्छेदः ? अननुभवत्वेनैव । यथार्थो ह्यनुभवः प्रमेति प्रामाणिकाः पश्य (ठ) न्ति; 'तत्त्वज्ञाना' दिति सूत्रणात्; 'अव्यभिचारि ज्ञान' मिति च । ननु स्मृतिः प्रमैव किं न स्यात् यथार्थज्ञानत्वात् प्रत्यक्षाद्यनुभूतिवदिति चेन्न, सिद्धे व्यवहारे निमित्तानुसरणात्। नच स्वेच्छाकल्पितेन निमित्तेन लोकव्यवहारनियमनम्; अव्यवस्थया लोकव्यवहारविप्लवप्रसङ्गात् । नच स्मृतिहेतौ प्रमाणाभियुक्तानां (प्रमाणव्यवहाराभियुक्तानां) महर्षीणां प्रमाणव्यवहारोऽस्ति; पृथगनुपदेशात् ॥ उक्तेष्वनन्तर्भावादनुपदेश इति चेन्न — प्रत्यक्षस्यासाक्षात्कारिफलत्वानुपपत्तेः । लिङ्गशब्दादेश्च सत्तामात्रेण प्रतीत्यसाधनत्वादिति ॥

ऽयोगेन ज्ञातज्ञानेऽपि प्रमात्वस्योचितत्वाच्च ।] तस्मान्नानधिगतार्थग्राहित्वं प्रामाण्यघटकम् ॥

[7] ननु तर्हि गृहीतग्राहिणोऽपि प्रमात्वस्वीकारे किमिति स्मृतेस्तद्व्यवच्छेदः क्रियते इति चेत् — अनुभवस्यैव प्रमात्वादननुभवत्वात्तस्यास्तद्व्यवच्छेदः । नहि गृहीतग्राहिणः प्रमात्वमात्रेण सर्वं ज्ञानं प्रमेति युक्तम् । प्रमाणनिरूपणप्रवृत्ता हि महर्षयो गौतमादयो यथार्थत्वे सत्यनुभवत्वं प्रमात्वमित्येव पश्यन्ति । अत एव हि प्रथमसूत्रे 'तत्त्वज्ञाना' दिति, प्रत्यक्षलक्षणसूत्रे 'अव्यभिचारि' इति च महर्षिः प्रायुङ्क्त । अत्र हि दुःखजन्माद्यापादकमिथ्याज्ञानापायविधायितया निःश्रेयसोपायतया प्रमाभूतं ज्ञानं तत्त्वज्ञानपदेन व्यवहरन् याथार्थ्यं प्रमालक्षणस्थं मन्यते । तस्य भावस्तत्त्वम्; तस्य ज्ञानं विशेष्यवृत्तिप्रकारविषयकज्ञानमिति यावत् । इदमेव च याथार्थ्यमिति । एवं चतुर्धा विभक्तप्रमाणान्तर्गतप्रत्यक्षलक्षणे च अव्यभिचारिपदप्रयोगेण अतस्मिंस्तदिति प्रत्ययं तद्विशेष्यकतदवृत्तिधर्मप्रकारकज्ञानं व्यवच्छिन्दन् याथार्थ्यं प्रमात्वघटकं मन्यत इति । नन्वेतावता स्मृतिव्यावर्तकानुभवत्वनिवेशो न सिध्यति । तथाच गृहीतार्थग्राहिणोऽनुभवस्य प्रमात्वे स्मृतिरपि प्रमेत्येव सूत्रकृदाशयोऽस्तु । प्रयोगश्च भवति–स्मृतिः प्रमा यथार्थज्ञानत्वात् अनुभववदिति चेन्न — व्यवहाराद्धि शक्तिग्रहः । पूर्वव्यवहारानुसारेणैव हि प्रवृत्तिनिमित्तं निश्चेतव्यम् । न पुनरस्मदिष्टं किञ्चित् निमित्तत्वेन परिकल्प्य लोकव्यवहारं शासितुं पारयामः । तथासति महिषादावपि गवादिपदप्रयोगप्रसङ्गात् । प्रमाणेदम्परशास्त्रप्रणेतृतया प्रमाणविज्ञानशालिनश्च प्रत्यक्षाद्यनुभवहेतुमिन्द्रियादिकमिव स्मृतिहेतुं प्रमाणविभागे पृथगनिर्दिशन्तः स्मृतेरप्रमात्वमेव मन्यन्ते । ननूक्तेषु प्रत्यक्षानुमानोपमानशब्देष्वन्तर्भावात्पृथगनुपदेशस्स्यादिति चेन्न — स्मृतेरसाक्षात्कारितया सक्षात्कारिज्ञानकरणस्य प्रत्यक्षस्य तत्फलकत्वासंभवात्, अनुमानोपमानशब्दानाञ्च ज्ञायमानतयैव करणत्वात् स्मृतिहेतोरनुभवस्य

---

१. 'ज्ञानपदमनुभवपर' मिति प्रकाशे । अनुभवत्वनिवेशस्य सूत्रतो लाभायायं क्लेशः । अत्र विस्तरमार्गोऽन्यः; यथार्थत्वदले प्रमाणसूचनमिह, अनुभवत्वे पुनरुपरिष्टादिति ।

[8] एवंव्यवस्थिते तर्क्यतेऽपि यत् – इयमनुभवैकविषया सती तन्मुखनिरीक्षणेन तद्यथार्थत्वायथार्थत्वे अनुविधीयमाना तत्प्रामाण्यमव्य (न) वस्थाप्य न यथार्थतया व्यवहर्तुं शक्यत इति व्यवहारेपि पूर्वानुभव एव प्रमितिः, अनपेक्षत्वात्; नतु स्मृतिः, नित्यं तदपेक्षणात्। असमीचीने ह्यनुभवे स्मृतिरपि तथैव ॥
नन्वेवमनुमानमप्यप्रमाणमापद्येत, मूलप्रत्यक्षानुविधानात् । न — विषयभेदात् ॥
आगमस्तर्हि न प्रमाणम्, तद्विषयमानान्तरानुविधानात् । न — प्रमातृभेदात् ॥

च सत्तामात्रेण तत्करणत्वात् स्मृतिहेतोरिन्द्रियादिष्वन्तर्भावासंभवात् । अतस्स्मृतिहेतोः पञ्चमप्रमाणत्वेनागणनात् स्मृतेः प्रमात्वं महर्षीणामनिष्टमिति प्रमालक्षणेऽनुभवत्वनिवेशसिद्धिः ॥

[8] एवमभियुक्तव्यवहारव्यवस्थया स्मृतिरप्रमेति व्यवस्थितम् । अथतत्रोपष्टम्भकस्तर्क उच्यते । नपुनरयमेव तर्कोऽप्रमात्वसाधकः अप्रयोजकशङ्काकलङ्कात् । प्रमाव्यवहारव्यवस्थायां सत्यां तु प्रत्यक्षागमबाधादप्रयोजकशङ्का नावतरति । तर्कप्रकारश्च – स्मृतिरियमनुभवविषयमात्रविषयिका अनुभवजन्यत्वेनानुभवमुखनिरीक्षित्वादनुभवयाथार्थ्यायाथार्थ्ये अनुसृत्य याथार्थ्यायाथार्थ्यवत्तया संस्कारेणोत्पाद्यमाना अनुभवप्रामाण्यावधारणाभावे स्वयं यथार्थतया न व्यवहर्तुं शक्यत इति हेतोः, सत्यपि स्मृतौ यथार्थत्वव्यवहारे पूर्वानुभव एव निरपेक्षत्वात्प्रमा भवति, नतु स्मृतिः प्रमा, नियमेनानुभवसापेक्षत्वात् । नच तज्जन्यत्वेपि याथार्थ्यविषये न तदपेक्षेति वाच्यम् – तथासत्यनुभवाप्रामाण्येपि कदाचित् स्मृतिप्रामाण्यप्रसङ्गात् । अयथार्थे सतिह्यनुभवे स्मृतिरप्ययथार्थैव भवतीति । ननु साध्यानुमितिर्लिङ्गपरामर्शरूपप्रत्यक्षयाथार्थ्यप्रयोज्ययाथार्थ्यकत्वादप्रमा स्यात् । अतश्चानुमानमप्रमाणमापद्यत इति चेन्न – अनुमितौ परामर्शैकविषयकत्वाभावात् ॥ ननु शब्दजन्यबोधस्य वक्तृयथार्थज्ञानैकविषयकत्व – तद्याथार्थ्यानुविधायित्वयोस्सत्त्वादप्रमात्वापत्तिरिति शब्दो न प्रमाणं भवेदिति चेन्न – वक्तुश्श्रोतुश्च भिन्नतया वक्तृज्ञानेन श्रोतृजन्यबोधस्याप्रमात्वायोगात्। समानाधिकरणानुभवयाथार्थ्यानुविधायित्वस्यैवाप्रमात्वप्रयोजकतया विवक्षितत्वात्॥ समानाधिकरणधारावाहिबुद्धिषु च नाप्रमात्वापत्तिः; उत्तरस्याः पूर्वपश्चाद्भावित्वेपि तदनुविधायित्वाभावात् । अप्रतिबद्धस्वकारणसमवधाने सति प्रथमवदुत्तरासामप्युत्पत्त्या उत्तरासु पूर्वजन्यत्वाभावात् । तत्पश्चाद्भावित्वंतु तदुत्पत्तेः प्राक् उत्तरबुद्धिकारणस्याभावात्, पश्चादेव भावात् । अतो धारावाहिज्ञानेषु पौर्वापर्यं काकागमनतालपतनयोरिव न कार्यकारणभावात्मकमिति ॥

[एतदुक्तं भवति—यद्यपि विशिष्टज्ञाने विशेषणज्ञानयाथार्थ्यं विना याथार्थ्यं न भवति; अथापि न तस्य विशेषणज्ञानैकविषयकत्वम्, अधिकविषयकत्वात् । यद्यपि च समानविषयप्रत्यक्षानुमि-

---

१. प्र. 'इतीत्यस्यानन्तरं न स्मृतिः प्रमेति शेषः' इति । उत्तरणैकवाक्यतात्र युक्ता ।

धारावाहिकबुद्धयस्तर्हि न प्रमाणम् आद्यप्रमाणानुविधानात् । न, कारणविशुद्धिमात्रापेक्षया प्रथमवदुत्तरासामपि पूर्वमुखनिरीक्षणाभावात्! कारणबलायातं काकतालीयं पौर्वापर्यमिति ॥

[9] यदि हि (यदि तर्हि) स्मृति र्न प्रमितिः, पूर्वानुभवे किं प्रमाणम्? स्मृत्यन्यथानुपपत्तिरिति चेन्न — तया कारणमात्रसिद्धेः । नतु तेनानुभवेनैव भवित-

---

त्या।दिव्यक्तिषु पूर्वैकविषयकत्वमुत्तरस्याम् , अथापि पूर्वानुभवयाथार्थ्यानुविधायियाथार्थ्यवत्त्वं नास्ति।कुत इति चेत्-तत्र पूर्वोत्तरयोर्जन्यजनकभावाभावेन तन्मुखनिरीक्षित्वाभावात् । ननु किमिदं तद्याथार्थ्यानुविधायियाथार्थ्यवत्त्वम्? नतावत् तद्याथार्थ्यव्याप्ययाथार्थ्यवत्त्वम् , तस्य समानविषयकप्रत्यक्षादिव्यक्तिष्वपि तुल्यतया तासामप्यप्रमात्वापत्तेः । नापि तद्याथार्थ्यप्रयोज्ययाथार्थ्यवत्त्वम् ; वक्तृगतयथार्थज्ञानाधीनवाक्यवशाद्वक्तुरेव जातु जाते बोधे तदेकविषयकत्व तद्याथार्थ्यप्रयोज्ययाथार्थ्यवत्त्वयोस्सत्त्वेन तस्यानुभवरूपस्याप्रमात्वापत्तेरिति चेन्न — अनुभवैकविषयत्वादेरसाक्षादप्रमात्वसाधकत्वेनाविवक्षितत्वात् ; तत्प्रामाण्यमव्यवस्थाप्य न यथार्थतया व्यवहर्तुं शक्यत इत्येतदुपपादनोपक्षीणत्वात्तस्य । तथाचानुभवयाथार्थ्यावधारणं विना अनवधार्ययाथार्थ्यकत्वमेवाप्रमात्वसाधकम् । यदायदा स्मृतिं स्मृतित्वेनोल्लिख्य तत्र याथार्थ्यमवधारयितुं यतते, तदातदा स्मृतिजनकमनुभवमप्यनुसंधत्त एव । अन्यथाऽत्र स्मृतित्वग्रहणासंभवात् । स्मृतियाथार्थ्यविषये च परेण पृष्टः एवमाह — सम्यगेवाहं तमर्थं तदानीमज्ञासिषमिति । अतश्चानुभवयाथार्थ्यानवधारणेन स्मृतियाथार्थ्यावधारणं नैव भवति । नैवं शाब्दबोधादौ वक्तृज्ञानयाथार्थ्यावधारणनियमः । अत एवापौरुषेयवेदवादिनां वैदिकवाक्यार्थबोधे याथार्थ्यावधारणमन्यथैवं भवति । कथञ्चित्प्रकारान्तरेण स्मृतिप्रामाण्यग्रहणेपि तज्जनकानुभवप्रामाण्यमपि तदा गृह्यत एव । आनुभविकश्चेदं स्मृतियाथार्थ्यस्यानुभवयाथार्थ्यापेक्षावधारणकत्वम् । आहुश्च मीमांसकाः,'पूर्वविज्ञानविषयं विज्ञानं स्मृतिरिष्यते । पूर्वज्ञानाद्विना तस्याः प्रामाण्यं नावगम्यते ॥ ' इति । तथाच यदि स्मृतिः प्रमा स्यात् , अनुभवयाथार्थ्यावधारणव्याप्यावधारणविषयत्वयाथार्थ्या न स्यादिति तर्क इति ॥]

[9] ननु स्मृतेरनुभवविषयैकविषयकत्वमसिद्धम् अनुभवे स्वस्याविषयत्वात् ; स्मृतौ च विषयस्येवानुभवस्यापि भानात्, घटमहमन्वभवमिति । नच नायं स्मृत्याकारः, किंतु 'स घट ' इति । तत्र च नानुभवभानमिति वाच्यम् – तत्रापि स इत्यस्य अनुभूत इत्येवार्थात् । अतोऽधिकानुभवविषयकत्वात्स्मृतिरपि प्रमैव। तस्यास्तदविषयकत्वे च पूर्वमनुभवास्थित इत्यत्र न किञ्चित्प्रमाणम् । तदसिद्धौ च स्मृत्यनुभवयोः कार्यकारणभावस्सर्वसंमतो न सिध्यतीति । ननु स्मृतिस्सकारणिका कार्यत्वादित्यनुमानेनार्थापत्त्यावाऽनुभवसिद्धिरिति चेन्न – एवं

न्यमिति नियामकमस्ति।। अननुभूतेपि तर्हि स्मरणं स्यादिति चेत्—किं न स्यात्; नह्यत्र प्रमाणमस्ति ।। पूर्वानुभवाकारो (भवो) ल्लेखस्स्मृतेर्दृश्यते; सोऽन्यथा न स्यादिति चेत्— तन् किं बौद्धवत् विषयाकारान्यथानुपपत्त्या विषयसिद्धिस्त्वयापीष्यते ? तथाभूतं ज्ञानमेव वा तत्सिद्धिः ? आद्ये तद्वदेवानैकान्तिकत्वम् । नहि यदाकारं ज्ञानं, तत्पूर्वकत्वं तस्येति नियमः; अनागतज्ञाने विभ्रमे च व्यभिचारात् । द्वितीये च (तु) स्मृतिप्रामाण्यमवर्जनीयम् ।। मा भूत् पूर्वानुभवसिद्धिः; किं नश्छिन्नमिति चेत् – न तर्हि स्मृत्यभवयोः कार्यकारणभावसिद्धिरिति ।

न, तदप्रामाण्येऽपि पूर्वापरावस्थावदात्मप्रत्यभिज्ञानप्रामाण्यादेव तदुपपत्तेः ।

कारणमात्रसिद्धावपि तत्कारणमनुभव एवेति व्यवस्थापकाभावात् । नन्वनुभवस्याकारणत्वेऽननुभूतमपि स्मर्यतामिति चेत्–स्मृतेः पूर्वानुभवविषयकत्वनिर्बन्धे सति अननुभूतस्मरणं न भवतीति कथञ्चित्सुवचम् – तस्य तदविषयकत्वेचाननुभूते स्मरणं नास्तीत्यत्र न किञ्चित्प्रमाणमिति । अथ माभूत् स्मृत्यन्यथानुपपत्तिर्मानम् ; स्मृतेरनुभवाकारोल्लेखित्वान्यथानुपपत्त्याऽनुभवसिद्धिरिति चेत्– अत्रानुभवविषयवस्तुविषयकत्वमात्रस्यानुभवसाधकत्वाभावात् कोऽयमनुभवाकारोल्लेख इति विवेक्तव्यम् । तत्र नीलाकारं मे ज्ञानं, पीताकारं मे ज्ञानमित्येवं ज्ञाने नीलपीताद्याकारसद्भावस्य गृह्यमाणत्वात् बाह्यविषयाभावेचाऽऽकारसमर्पकविरहात् ज्ञानस्य साकारता न स्यादिति ज्ञानगताकारान्यथानुपपत्त्या तज्जनको बाह्योर्थो वस्तुतोऽप्रत्यक्ष एवानुमीयते; अतो ज्ञानगतविषयाकारग्रहणेन विषयानुमितिरूपा विषयसिद्धिरिति बौद्धस्सौत्रान्तिक आह । अन्ये तु अवश्यस्वीकर्तव्याद् बाह्यादर्थादतिरिक्ताकारकल्पने प्रमाणाभावात् ज्ञानस्य नीलाद्याकारत्वं नाम नीलादिविषयकत्वमेव; ' अर्थेनैव विशेषो हि निराकारतया धिया ' मिति । अतो नीलाद्याकारज्ञानमेव नीलादिसिद्धिः, नतु यत्किञ्चिदाकारग्रहणजन्यानुमितिरिति प्राहुः । एवञ्चानुभवाकारोल्लेखवादिना त्वया किं बौद्धवदतिरिक्ताकारस्वीकारेण ततोऽनुभवानुमितिरिष्यते, उतानुभवोल्लेखिस्मृतिरेवानुभवविषयकसिद्धिरिति ? आद्ये बौद्धवदेव तव पक्षेपि स्मृतिरनुभवपूर्विका अनुभवाकारत्वादित्यनुमाने व्यभिचारः ; यद् ज्ञानं यद्विषयाकारकं तत् तत्पूर्वकमिति व्याप्त्यभावात् ; भाव्यर्थविषयकज्ञानस्य शुक्तिरजतादिभ्रमस्य च विषयपूर्वकत्वाभावात् । अतो द्वितीयपक्षाश्रयणे स्मृतेरेव साक्षादनुभवविषयकत्वसंमत्या प्रमात्वमवर्जनीयम् । एवमनुभवविषयकत्वास्वीकारेचानुभवसाधकप्रमाणाभावादनुभवस्मृत्योः कार्यकारणभावो न सिध्येदिति चेत् –

न; विषयस्मृतेर्विषयानुभवविषयकत्वे मानाभावेन स्मृतेरप्रमात्वस्यैवेष्टत्वात् । स घट इत्यादौ स इति च नानुभूतत्वभानम् ; किन्तु पूर्वानुभवे यद्देशकालसंबन्धो विषयः तन्मात्रभानम् । एवमप्यनुभवसिद्धिः स्मृत्यनुभवयोः कार्यकारणभावसिद्धिश्च प्रत्यभिज्ञाबलाद्भवतः । पूर्वजातघटानुभवे पूर्वमेवानुव्यवसायेन गृहीते सति तदनुभवविषयकसंस्कारो जायते । अथ

योऽहमन्वभवममुमर्थं, सोऽहं स्मरामीति मानसप्रत्यक्षमस्तीति ॥

[10] न च गृहीतग्राहित्वमीश्वरज्ञानस्य; तदीयज्ञानान्तरागोचरत्वाद् विश्वस्य । न च तदेव ज्ञानं कालभेदेनाप्रमाणम्; अनपेक्षत्वस्यापरावृत्तेः । तथापि

घटस्मरणे सति तस्मिन्स्मरणेऽनुव्यवसायेन ग्राह्ये सति पूर्वजातानुभवविषयकसंस्कारसाचिव्यात् योऽहं घटमन्वभवं सोऽहं स्मरामीति पूर्वकालिकानुभवशालित्वसंप्रतितनस्मरणशालित्वरूपावस्थाद्वयविशिष्टात्मप्रत्यभिज्ञा भवति । ततश्च अनुभवसिद्धौ स्मरणानुव्यवसायस्थले सर्वत्रैवंभावात्, घटमहमननुभूय स्मरामीति कदाप्यभावात्, कार्यकारणभावसिद्धिरिति ॥

तस्मात् स्मृतेरप्रमात्वमेवेति तद्वारणार्थं प्रमालक्षणे अनुभवत्वमपि निवेश्यमिति यथार्थानुभवत्वं प्रमापदप्रवृत्तिनिमित्तमिति सर्वथा पूर्वोक्ते उत्तरज्ञानं न प्रमापदव्यवहार्यं गृहीतमात्रग्राहित्वादित्यनुमाने प्रमापदप्रवृत्तिनिमित्तविरहस्योपाधित्वमक्षतमिति ॥

[10] एवं तावद्धेतुरसोपाधिक इत्युक्तम् । अथेश्वरज्ञाने तद्धेत्वसिद्धिरुच्यते । नहि गृहीतार्थग्राहित्वमीश्वरज्ञानस्य । तद्धि स्वप्राक्कालिकस्वसमानाधिकरणज्ञानविषयविषयकत्वम् । ईश्वरे चैकस्यैव ज्ञानस्य स्वीकारेण तत्प्राक्कालिकतत्समानाधिकरणज्ञानान्तराभावात् तद्विषयस्य विश्वस्य तादृशज्ञानान्तरविषयत्वस्य दुर्वचत्वात् । ननु गृहीतग्राहित्वमित्यस्य स्वाधिकरणकालपूर्वकालवृत्तिस्वसमानाधिकरणज्ञानविषयविषयकत्वमित्यर्थः । तथा चेश्वरज्ञानस्य नित्यस्य स्वाधिकरणवर्तमानकालपूर्वकालेऽपि सत्त्वेन तादृशं स्वसमानाधिकरणज्ञानं तदेवेति तद्विषयविषयकत्वमक्षतम् । नहि ज्ञाने स्वप्राक्कालिकत्वं निवेशितमस्ति, येन नित्यत्वात्तस्य प्राक्कालाप्रसिद्धिश्शङ्क्येत; किन्तु स्वाधिकरणकालप्राक्कालेत्यादिरूपेण निवेशः । नवा घटकज्ञाने स्वभिन्नत्वं निवेशितमस्ति, येन तदीयज्ञानान्तराप्रसिद्धिरुद्भाव्येत ॥ एवं गृहीतग्राहित्वन्नाम विषयीकृतविषयकत्वम् । तच्चेश्वरज्ञानेऽप्यक्षतम्; पूर्वकाले स्वविषयीकृतस्यैव उत्तरकालेऽपि विषयीकरणात् । नच ईश्वरज्ञानस्यैवमप्रामाण्येपि प्रामाण्यमपि संभवति, आदिमक्षणेऽगृहीतार्थग्राहित्वादिति वाच्यम्—अनादौ संसारे आदिमक्षणस्य कस्यचिदभावात् सर्वदैव ईश्वरज्ञानस्य पूर्वकालगृहीतग्राहितया प्रामाण्यप्रसक्त्यभावात् । नचैवं प्रमात्वेनाभिमतज्ञानस्यापि अनेकक्षणस्थायितया पूर्वक्षणगृहीतार्थग्राहितया उत्तरक्षणेऽप्रामाण्यापत्तिरिति वाच्यम् – इष्टत्वात् । प्रथमक्षणमादायैव प्रमात्वव्यवहारात् इति चेत्—उच्यते । नच तदेव ज्ञानं कालभेदेनाप्रमा भवितुमर्हति; पूर्वक्षण इवोत्तरक्षणेपि ज्ञानान्तरानपेक्षताया अक्षतत्वात् । नहि गृहीतग्राहित्वं भवदभिमतरूपम्; किन्तु स्वसमानाधिकरणस्वविषयविषयकज्ञानसापेक्षत्वम् । नचेदं पूर्वक्षणइवोत्तरक्षणे व्यस्तीति नाप्रामाण्यप्रसक्तिः । ईश्वरज्ञाने चेदृशज्ञानसापेक्षता नास्तीति न गृहीतग्राहित्वम् । एवमनपेक्षत्वे सत्यपि स्वाभिमतनिर्वचनानुसारेण कालभेदेनाप्रामाण्यस्वीकारे धारावाहिज्ञाने गृहीत-

वाऽप्रामाण्ये अतिप्रसङ्गादिति ॥

[11] **स्यादेतत् – अनुपकारकं विषयस्य तदीयमेतदीयं वा न भवितुमर्हति, अविशेषात् । नच तस्येत्यनियतं तत्र प्रमाणम्. अतिप्रसङ्गात् । न च तदभि-**

विस्मृतार्थश्रुतौ चाप्रमात्वमेव स्यादिति गतमिदानीं वेदप्रामाण्यप्रत्याशया । अतो नेश्वरज्ञानस्य गृहीतग्राहिता ॥ एवं गृहीतग्राहित्वरूपहेत्वभाववर्णनव्याजेन परकथितमगृहीतार्थग्राहित्व-रूपलक्षणमपीश्वरज्ञाने सुस्थमिति ज्ञापितं भवति । नह्यगृहीतो योऽर्थस्तद्ग्राहित्वं तदर्थे इत्यत्र गमकमस्ति । गृहीतार्थग्राहित्वाभाववद्ज्ञानत्वस्यैव तदर्थत्वसंभवात् । नच गृहीतग्राहित्वमीश्वर-ज्ञानस्येति तत्प्रामाण्यं सर्वथा संभवतीति । नच गृहीतग्राहित्वाभाववद् ज्ञानं प्रमेतिस्वीकारे विशिष्टज्ञानस्य विशेषणज्ञानगृहीतार्थग्राहित्वात्प्रमात्वं न स्यादिति वाच्यम् – प्रमात्वाप्रमात्वयोरं-शभेदेनाङ्गीकारात् । यदंशे यस्य गृहीतग्राहित्वाभावः तदंशे सा प्रमेति ॥

[11] **स्यादेतत्** – गृहीतग्राहित्वं नाम ज्ञातताश्रयवस्तुग्राहित्वम् । ईश्वरज्ञानेनचानादिना ज्ञाततायाः वस्तुनि प्रागेवोत्पादितत्वादिदमक्षतम् । धारावाहिज्ञानेषु च कालकलाविशेषस्फुरणात्त-दंशे गृहीतग्राहिता नास्तीति प्रामाण्यसिद्धिः । गृहीतविस्मृतार्थश्रुतिस्थले च प्रागुत्पन्नज्ञातताया नष्टत्वात् प्रामाण्यं संभवत्येव । स्मरणं च न प्रमाणम् , अनुभव तज्जन्यसंस्कारकाले सर्वदा प्रागुत्पन्न ज्ञाततास्थितिस्वीकारात् । अत ईश्वरज्ञानमप्रमैव॥ ज्ञाततैव न सिद्धेति चेत्–उच्यते। इदं ज्ञानं घटीयं, इदं पटीयमिति घटीयत्वादिकं ज्ञानस्य घटादिविषयगतकिञ्चिदुपकारजनक-त्वाभावे न भवितुमर्हति । पटादाविव घटादावप्यनुपकारकत्वाविशेषात् । अतो ज्ञानं विषयो-पकारकं विषयीयमिति व्यवहारादित्यनुमानेनोपकाराख्यज्ञाततासिद्धिः । ननु ज्ञानघटयोर्मिथ-स्संबन्धाविशेषे ज्ञाने किञ्चिदाकारजनकत्वं बौद्धोक्तं नेष्यते; घटे ज्ञातताजनकत्वं पुनर्ज्ञानस्येष्यत इति कुत इति चेन्न - घटस्य ज्ञानमितिवत् ज्ञानस्य घट इति व्यवहाराभावात् । नहि **तस्येति** षष्ठ्या तदीयत्वनिर्देशरूपं **तत्र** उपकारकत्वे उच्यमानं प्रमाणं **अनियतं** व्यभिचारि; किन्तु सद्धेतुरेव; अन्यथोपकाराभवेऽपि तदीयत्वे सर्वस्य सर्वीयत्वप्रसंगात् । एवं तावद्विषये उपकारः सिद्धः । सच ज्ञाततारूपः ज्ञातो घट इत्यनुभवसिद्धः ॥ तस्य विषयज्ञानजन्यत्वं वि-धान्तरेणापि सिद्ध्यति । घटगतोपकारः घटज्ञानजन्यः घटसमवेतकार्यत्वादिति । नच तद-भिज्ञानाभावे तद्गतोपकारस्योत्पत्तिः; घटोपकारस्य घटोपादानकत्वात् ; उपादानज्ञानं विना च

---

१. **निराकरिष्यमाणत्वात्** इति ज्ञातता निराकरणस्य पश्चात्करिष्यमाणतां प्रयुक्त्वा-ग्रन्थकृता अत्र तत्करणं समुचितसङ्गतिपूर्वकमित्यालोच्य **विस्तरे** यथायोगमवतारितम् । प्रका-शादौ न केवलं सङ्गत्यप्रदर्शनम् , किन्तु पूर्वपक्षमध्ये उपमर्दकसिद्धान्तयुक्त्युपक्षेपेण वाक्या-र्थोऽपि विरूपितः ॥ तदभिज्ञमन्तरेणेत्यत्र तदभिज्ञानमन्तरेणेति मकरन्दे पाठो लक्ष्यते.

ज्ञान (भिन्न) मन्तरेण तदुपकारस्योत्पत्तिः, तथाऽनभ्युपगमात् । अभ्युपगमे वा, कार्यत्वस्यानैकान्तिकत्वात् ? अत्रोच्यते –

[12] **स्वभावनियमाभावादुपकारोऽपि दुर्घटः ॥**
सुघटत्वेऽपि सत्यर्थेऽसति का गतिरन्यथा ॥ २ ॥

विशेषाभावात्तत्रैव फलं नान्यत्रेत्यस्यापि नियमस्यानुपपत्तेः । स्वभावनियमेन चोपपत्तौ तथैव विषयव्यवस्थोपपत्तेः । अवश्यञ्चैतदनुम (भ्युपग) न्तव्यम्, अतीतादिविषयत्वा (या) नुरोधात् । न हि तत्र ज्ञानेन किञ्चित् क्रियते इति शक्यमवगन्तुम् ; असत्त्वात् । न च तद्धर्मसामान्याधारं किञ्चित् क्रियते इति युक्तम् ; तेन तस्यैव विषयत्वप्राप्तेः ॥ तादात्म्याद्विशेषस्यापि सैव ज्ञाततेति चेत्, तत् किं चक्षुषा घटे ज्ञायमाने रसोऽपि ज्ञायते, तादात्म्यात् ? घटाकारेण ज्ञायतएवासौ

कार्योत्पत्तेरनभ्युपगमात् । यदि तु मन्यते–' यत् कार्यं कृतिसाध्यं सत् यत्समवेतम् , तत् तद्ज्ञानजन्यमित्येव नियमः । अतएव घटस्य कृतिसाध्यस्य कपालसाक्षात्कारजन्यत्वं, घटगतरूपगन्धादेश्च कृतिसाध्यत्वाभावाद्घटात्मकोपादानसाक्षात्कारनिरपेक्षत्वम् । एवञ्च ज्ञाततायाः कृत्यसाध्यतया उपादानाभिज्ञानापेक्षा नास्ति ' इति–तर्हि तथाभ्युपगमे क्षित्यादिकमुपादानज्ञानसापेक्षं कार्यत्वादितीश्वरानुमाने तादृशकार्यमादायानैकान्तिकत्वापत्तिः । अतस्सर्वमपि कार्यमुपादानज्ञानजन्यमेव । तच्च ज्ञातताजनकं ज्ञानं अयं घट इत्याकारकं तत्तत्पुरुषगतम्, घटो मया ज्ञात इत्याद्यनुभवात् ॥ एवं मया ज्ञात इति मज्जन्यज्ञातताश्रय इति प्रतीत्या तदभिन्नमन्तरेण तदुपकारानुत्पत्तिपरिशीलनादपि पुरुषगतज्ञानरूपगुणजन्यत्वमवसीयत इति चेत् —

[12] उच्यते – यदि तद्गतोपकारजनकत्वं विना तदीयत्वन्नास्ति, उपकारजननात्प्राक् तदीयत्वरूपविशेषाभावात् ज्ञानं तत्रैवोपकारं जनयतीति कथम् ? नहि ज्ञानघटयोः विषयविषयिभावाख्यस्वरूपसंबन्धात्मकस्वभावव्यवस्था भवतापि स्वीक्रियते । अतस्तदभावात् अत्रोपकार इतीदं दुरुपपादम् । तदर्थं स्वभावनियमस्वीकारे च तदेव तदीयत्वमिति व्यर्थमुपकारकल्पनम् । किञ्च सति वर्तमानेऽर्थे आधारत्वस्य सुवचतया उपकारस्योपपन्नत्वेपि असति अवर्तमानेऽतीतेऽनागतेचार्थे ज्ञानविषययोः विषयविषयिभावरूपस्वरूपसंबन्धाख्यस्वभावं विना काऽन्या गतिरस्ति; तत्र विषयस्यासत्त्वात् ज्ञानेनोपकारोत्पादनायोगात् । नच घटस्यातीतानागतत्वेऽपि घटत्वरूपसामान्यस्य सत्त्वात्तत्र ज्ञाततोत्पाद्यत इति वाच्यम् – तथासति ज्ञानस्य सामान्यीयत्वमेव स्यात् , न घटीयत्वमिति ॥ ननु मीमांसकमते धर्मधर्मिणोर्भेदाभेदाङ्गीकाराज्जातितादात्म्यं व्यक्तावप्यस्तीति जातेर्ज्ञातताश्रयत्वे व्यक्तेरपि तथात्वोपपत्तिरिति चेत् – तर्हि रसघटयोरपि भिन्नाभिन्नत्वाद्घटीयचाक्षुषज्ञानस्यापि रसीयत्वापत्तिः; घटरसयोस्तादात्म्याद्घटीयत्वे

१ रसः) इति चेत् – अथ रसाकारेण किं न ज्ञायते? तेन रूपेण ज्ञातताऽनाधारत्वादिति चेत् – न तर्हि वर्तमानसामान्यज्ञानेऽप्यतीतानागतादिज्ञानम्; तेनाकारेण प्राकट्यानाधारत्वादिति ॥

[13] ननु क्रियया कर्मणि किञ्चित् कर्त्तव्यमितिव्याप्तेरस्त्वनुमानम् (२)। न;–

(अनैकान्त्या) अनेकान्तादसिद्धेर्वा न च लिङ्गमिह क्रिया ॥
तद्वैशिष्ट्यप्रकाशत्वान्नाध्यक्षानुभवोऽधिके (३) ॥ ३ ॥

धात्वर्थमात्राभिप्रायेण प्रयोगे संयोगादिभिरनेकान्तात्' न हि शरसंयोगेन गगने किञ्चित् क्रियते; अन्त्यशब्दाभिव्यक्त्या वा (शब्दे?)॥ स्पन्दाभिप्रायेण, असिद्धेः॥ व्यापाराभिप्रायेण, शब्दलिङ्गेन्द्रियव्यापारैर्व्यभिचारात् । न हि तैः प्रमेये किञ्चि-

---

रसीयत्वमप्यस्त्येवेति चेत्–रसत्वेन रसीयत्वमपि कुतो न भवति? रसस्य रसत्वेन रूपेण चाक्षुषज्ञानजन्यज्ञातताऽनाधारत्वात्तथेति चेत्तर्हि अतीतानागतज्ञानस्य सामान्यरूपेणैव ज्ञातताजनकतया अतीतादेः व्यक्तिगतविशेषरूपेण ज्ञातताऽनाधारत्वात् ज्ञानस्य विशेषरूपेण तदीयता न स्यात् । अतो विनैव ज्ञाततां विधान्तरेणैव तदीयत्वमुपपादनीयमिति ॥

[13] ननु (२) यत्र क्रियात्वं तत्र कर्मकारकगतकिञ्चिज्जनकत्वम्–यथा पाकक्रियाया ओदननिष्ठविक्लित्तिजनकत्वमिति व्याप्तिसत्त्वाद्घटं जानामीत्यादिज्ञानक्रिया कर्मणि किञ्चिज्जनिका क्रियात्वात् इत्यनुमानं ज्ञाततासाधकमस्त्विति चेन्न – हेतोरसिद्ध्यनेकान्तान्यतरदुष्टत्वात् । तथाहि—सामान्यतो धात्वर्थः क्रियेत्यनुमानप्रयोगे संयोगादेरपि संपूर्वकयुज्यर्थत्वात्तत्र व्यभिचारः, शरस्संयुनक्ति गगनमिति कर्मभूते गगने संयोगस्य किञ्चिज्जनकत्वाभावात् । शब्दनित्यत्ववादिनस्ते शब्दसन्तानस्थानापन्ने शब्दाभिव्यक्तिसन्ताने प्रथमाद्यभिव्यक्तीनां द्वितीयाद्यभिव्यक्तिजनकत्वेऽपि अन्त्याभिव्यक्तिक्रियायाः किञ्चिज्जनकत्वाभावाच्च । न च गगनस्याभिव्यक्तावकर्मत्वात्तत्र किञ्चिज्जनकत्वाभावेपि न दोष इति वाच्यम् — एवमपि शब्दोऽभिव्यज्यत इति कर्मकर्तरिप्रयोगे कर्मणि शब्देऽभिव्यक्तिक्रियायाः प्रथमादे द्वितीयाद्यभिव्यक्तिकरत्वेऽपि अन्त्यायाः किञ्चित्करत्वाभावाद्व्यभिचारात् । अभिव्यक्तिश्चेयं न पक्षभूतं ज्ञानम् अस्याश्शब्दनिष्ठत्वात्; ज्ञानस्यचातद्देशत्वात् । अतः कथं पक्षमादाय व्यभिचारप्रदर्शनमिति न शङ्क्यम् ॥ स्पन्दः क्रियेत्यभिप्रायेणानुमानप्रयोगे च ज्ञाने गुणे स्पन्दत्वाभावात्स्वरूपासिद्धिः । तज्जन्यत्वविशिष्ट-

---

१. प्र. 'नचान्त्यशब्दाभिव्यक्तया तत्र ज्ञाततैवोत्पाद्यत इति वाच्यम् – तस्याव्यवहितोत्तरक्षण एव नाशात् । समवायिकारणस्य च कार्यसमकालतानियमात् । शब्दनित्यत्वस्य च निषेधादिति भावः' इति । अत्र शब्दे ज्ञाततोत्पत्त्याशङ्कायाः शब्दरूपाश्रयनाशेन तदुत्पत्त्यसंभवस्य च कथनान्मूले शब्दे इति पदं स्यादिति मन्यते ॥

त् क्रियते; अपि तु प्रमातर्येव ॥ फलाभिप्रायेणापि तथा। अन्ततस्तेनैवानेकान्तात्, अनवस्थानाच्च ॥ आशुविनाशिधर्माभिप्रायेण, द्वित्वादिभिरनियमात् ॥ आशुकारकाभिप्रायेण, कर्मण्यसिद्धेः । कर्मण्याशुकारकं ज्ञानमित्येव हि साध्यम् । कर्तर्याशुकारकत्वस्य कर्मोपकारत्वेनाव्याप्तेः; शब्दादिव्यापारैरेवानेकान्तात् ॥

[14] (३) स्यादेतत् — अनुभवसिद्धमेव प्राकट्यम् । तथा हि ज्ञातोऽयमर्थ इति सामान्यतः, साक्षात्कृतोऽयमर्थ इति विशेषतो विषयविशेषणमेव किञ्चित् परिस्फुरतीति चेत् । तदसत् । यथा हि — 'अर्थेनैव विशेषो हि निराकारतया धियाम्' । तथा — क्रिययैव विशेषो हि व्यवहारेषु कर्मणाम् ॥ ४ ॥

किं न पश्यसि, घटक्रिया पटक्रियेतिवत् कृतो घटः, करिष्यते घट इत्यादि ? तथैव गृहाण, घटज्ञानं पटज्ञानमितिवत् ज्ञातो घटो ज्ञास्यते ज्ञायते इति । कथमसं-

---

तज्जन्यजनकरूपव्यापाराभिप्रायेण प्रयोगे शब्दादिप्रमाकरणसम्बन्धिव्यापारेषु प्रमातरि प्रमाजनकत्वेऽपि कर्मणि प्रमेये किञ्चिदजनकेषु व्यभिचारः । फलं क्रियेत्यभिप्रायेण प्रयोगे पचतीत्यादौ विक्लित्यादिफले साध्याभावाद्व्यभिचारः । फलस्यापि कर्मणि किञ्चिज्जनकत्वाभ्युपगमे तज्जन्यफलस्यापि तादृत्येवमनवस्था । आशुविनाशिधर्मः क्रियेत्यभिप्रायेण प्रयोगे अपेक्षाबुद्धिजन्येषु तन्नाशनाश्येषु द्वित्वादिषु व्यभिचारः । 'संयोगविभागयोरनपेक्षं कारणं कर्मे'ति सूत्रणात्क्रियायामाशुकिञ्चिज्जनकत्वसद्भावात् आशूत्पादकं क्रियेत्यभिप्रायेण प्रयोगे कर्मण्याशुकारकत्वं वा हेतुः, कर्त्रादौ क्वाप्याशुकारकत्वं वा । आद्ये कर्मण्याशुकारकत्वमसिद्धम्, तस्यैव साध्यत्वात् । अन्यत्राशुकारकत्वस्य च कर्मण्याशुकारकत्वरूपसाध्येन व्याप्तिर्नास्ति, शब्दादिप्रमाणव्यापारेषु कर्तर्याशुकारकेषु साध्याभावाद्व्यभिचारात् । अतोऽसिध्यनेकान्तान्यतरस्यावर्जनीयत्वान्नेदमनुमानं साधकम् ॥

[14] स्यादेतत्— (३) ज्ञातोऽयमर्थः, साक्षात्कृतोऽयमर्थः, अनुमितोऽयमर्थ इति सामान्यविशेषरूपेणार्थनिष्ठतया ज्ञातता प्रत्यक्षरूपानुभवसिद्धैवेति किमत्रानुमानगवेषणेनेति चेत्—अत्रोत्तरमुत्तरार्धेनोक्तम । अर्थेनैव विशेषो हि निराकारतया धियामित्यावयोरभिमतत्वात् धियामर्थजन्याकारशालित्वस्य सौत्रान्तिकोक्तस्य विभ्रमादावाकारसमर्पणासंभवेनानङ्गीकारात् घटज्ञानं पटज्ञानमित्यादौ धियां घटादिरूपोऽर्थ एव स्वभावतो विशेषणभूतः; नतु घटादिजन्यो ज्ञाननिष्ठो धर्मः कश्चिदिति यथा — तथा क्रियामादाय कर्मकारकव्यवहारेषु क्रियैव स्वभावतः कर्मविशेषिका; नतु क्रियाजन्यः कर्मनिष्ठो धर्मोऽपेक्षित इति । अतो ज्ञानवैशिष्ट्यमात्रविषयकत्वात् ज्ञातो घट इत्याद्यनुभवो नातिरिक्तज्ञातताख्यधर्मविषयक इति । प्रसिद्धश्चेदं क्रियाया एव विशेषकत्वमपि; घटक्रिया, पटक्रियेति क्रियाविशेष्यकव्यवहारे कर्मणामिव, कृतो घटः,

वृद्धयोर्धर्मधर्मिभाव इति चेत्-ध्वस्तो घट इति यथा। एतदपि कथमिति चेत् – नूनं ध्वंसेनापि घटे किञ्चित् क्रियतेऽइति वक्तुमध्यवसितोऽसि।। तन्निरूपणाधीननिरूपणो ध्वंसः स्वभावादेव तदीय इति किमत्र संबन्धान्तरेणेति चेत् – प्रकृतेऽप्येवमेव ॥

[15] (४) एतेन फलानाधारत्वादर्थः कथं कर्मेति निरस्तम् । विनाश्यवत्

करिष्यमाणो घट इत्यादौ कर्मविशेष्यकव्यवहारे कर्मणि यत्नात्मककृतेस्साक्षाद्विशेषणत्वात् । एवमेव घटज्ञानं पटज्ञानमित्यादौ ज्ञानेऽर्थस्येव, ज्ञातो घटः, ज्ञास्यते घट इत्यादावपि स्वभावतः क्रियाया विशेषणत्वमिति गृह्यताम् । अन्यथा ज्ञास्यमानत्वादेरप्यापातात् । नन्वात्मनिष्ठस्य ज्ञानस्यार्थावृत्तित्वात् ज्ञातो घट इत्यर्थधर्मत्वोल्लेखः कथमिति चेत् – ध्वंसस्य स्वप्रतियोगिसमवायिदेशवृत्तितया प्रतियोग्यवृत्तित्वेपि ध्वस्तो घट इति प्रतियोगिधर्मत्वोल्लेख इवोपपद्यते ॥ दृष्टान्तस्थलेपि कथमिति चेत् – तर्हि ज्ञानेन घटे ज्ञाततेव ध्वंसेनापि तत्र किञ्चिदुत्पाद्यते; अतएव ध्वस्त इति व्यवहार इति वक्तुमिच्छसीति भाति । नैवं शक्यम् – घटस्य नष्टत्वेन तत्र किञ्चिदाधानप्रसक्त्यभावात्॥ ननु ध्वंसघटयोर्धर्मधर्मिभावोपयोगिसंबन्धो नापेक्षितः, घटरूपप्रतियोगिज्ञानाधीनज्ञानकत्वाद्ध्वंसस्य, विनैव संबन्धान्तरं, प्रतियोग्यनुयोगिभावात्मकस्वरूपसंबन्धेनैव घटीयत्वमिति चेत् – प्रकृतेपि विषयनिरूप्यत्वाद् ज्ञानस्य विषयविषयिभावात्मस्वरूपसंबन्धेनैव विषयीयत्वमिति मन्यताम् । तथाच निरूप्यनिरूपकभावबलात् ध्वंसो यथाविवक्षं प्रतियोगिविशेष्यतया विशेषणतया च भासते; ज्ञानमपि ततएव विषयं प्रति विशेष्यतया विशेषणतया चेतीयदेवानुभविकमिति ॥

[15] एवं ध्वंसदृष्टान्तवर्णनेन कृतिदृष्टान्तवर्णनेन च – कर्मत्वस्य क्रियाजन्यफलाधारत्वरूपतया ज्ञानजन्यकिञ्चित्फलानाधारत्वे कथमर्थो ज्ञानकर्मेति, अर्थो ज्ञानजन्यफलाधारः ज्ञानकर्मेत्युच्यमानत्वादित्यनुमानेन (४) ज्ञाततास्थापनमपि — निरस्तम् – घटं विनाशयतीत्यादौ विनाशस्य घटनिष्ठत्वाभावेन घटे णिजन्तार्थविनाशनफलीभूतविनाशाधारत्वाभावेन व्यभिचारात् । अतः क्रियाजन्यफलाधारत्वं न कर्मत्वम्, किन्तु करणव्यापारविषयत्वम् । घटादेश्च विनाशसाधकमुद्गरादिव्यापारविषयतया कर्मत्वम् । प्रकृतेपि ज्ञानकरणमनश्शब्दादिव्यापारविषयतयाऽर्थस्य ज्ञानकर्मत्वमिति । यदिपुनः करणव्यापारविषयत्वस्य सर्वत्र दुरुपपादत्वात् घटं नाशयतीत्यादौ घटस्य नाशरूपफलानाधारत्वेपि नाशाद्यफलनिरूपकत्वं स्वाभाविकमस्तीति तावतैव कर्मत्वमित्युच्यते – तर्हि प्रकृतेपि ज्ञानस्य विषयनिरूप्यतया ज्ञाननिरूपकत्वाद्विषयस्य कर्मत्वमुपपद्यते । एतदुक्तंभवति — यद्यपि नाशयतीत्यादौ क्रियाजन्यफलसत्त्वाद् घटस्य कर्मत्वं युक्तम् । घटं जानातीत्यादौ च ज्ञानजन्यफलाभावात्तदयुक्तम् । यदितु साक्षात् क्रियानिरूपकत्वेपि कर्मत्वमिष्यते – तर्हि घटं नश्यतीति प्रयोगापत्तिः, घटस्य नाशनिरूपकत्वादि-

करणव्यापारविषयत्वेन तदुपपत्तेः । स्वाभाविकफलनिरूपकत्वञ्च तुल्यम् ॥

[16] (५) ननु ज्ञानमतीन्द्रियत्वादसाधारणकार्यानुमेयं तदभावे कथमनुमीयेत, अप्रतीतञ्च कथं व्यवहारपथमवतरेदिति ज्ञानव्यवहारान्यथाऽनुपपत्त्या ज्ञातताकल्पनम् । तदप्यसत — परस्पराश्रयप्रसङ्गात् । ज्ञाततया हि ज्ञानमनुमीयेत, ज्ञाते च तद्व्यवहारान्यथानुपपत्तिस्तां ज्ञापयेत् ॥

[17] कुतश्च ज्ञानमतीन्द्रियम् ? (१) इन्द्रियेणाऽनुपलभ्यमानत्वादिति चेत् । न । अनुमानोपन्यासे (नपक्षे) साध्याविशिष्टत्वात् । अनुपलब्धिमात्रोपन्यासे तु

त्याशङ्का भवति— तथापि तदाधारत्वं विना तन्निरूपकत्वमात्रमपि कर्मत्वोपपादकं भवतीत्येतावदेवेहोच्यते । तत्र च निरूप्यं फलं वा भवतु, क्रिया वा । सर्वथा कर्मत्वं भवत्येव । अत एव घटं करोतीत्यादौ यत्नक्रियां प्रति घटस्य कर्मत्वम् । कृतेर्यत्नत्वं च पञ्चमे वक्ष्यते । तावता घटं नश्यतीति प्रयोगापादनमयुक्तम् ; तथाऽभियुक्तव्यवहाराभावात् । अतएव करोतियतत्योः पर्यायत्वेपि घटं करोतीतिवत् घटं यतत इति, अर्थं वाञ्छतीतिवत् अर्थं स्पृहयतीति, चैत्रं ग्रामं गमयतीतिवत् चैत्रमोदनं पाचयतीत्येवं न प्रयोगः । अतो निरूपकत्व - क्रियाजन्यफलाधारत्वादिकमेव तत्रतत्र संभवत् यथायथं तत्तद्धातुयोगानुगुणं कर्मतापदव्यपदेश्यं भवति, न भवति चेति स्वीकार्यमिति न कर्मताबलात्फलसिद्धिरिति ॥

[16] ननु व्यवहारे व्यवहर्तव्यज्ञानस्य कारणत्वादप्रतीते वस्तुनि व्यवहारायोगाद् ज्ञानव्यवहारान्यथानुपपत्त्या ज्ञानप्रतीतिरेष्टव्या । सा च न प्रत्यक्षरूपा; ज्ञानस्यातीन्द्रियत्वात् । अतो ज्ञानं कार्यानुमेयं प्रकारान्तरेणाज्ञेयत्वे सति व्यवह्रियमाणत्वादित्यनुमानेन (५) ज्ञानकार्यज्ञाततासिद्धिः ! अन्यथा कार्याभावे कथं तदनुमीयेतेति चेत्—न - प्रथमतो ज्ञातताज्ञानं, ततो ज्ञानानुमानं, ततो ज्ञानव्यवहारः, ततस्तद्व्यवहारग्रहणमिति भवदीयक्रमः । तत्र व्यवहारोपलम्भात् ज्ञातानुमानं संप्रत्युच्यते । तथाच ज्ञाततया ज्ञातया हि ज्ञानज्ञानम्, ज्ञाते च ज्ञाने व्यवहारान्यथानुपपत्तिद्वारा ज्ञातताज्ञानमित्यन्योन्याश्रयात् । तस्माद् ज्ञाततायां न किञ्चित्प्रमाणमिति ॥

[17] कथं तर्ह्यतीन्द्रियज्ञानानुमानमिति चेत् — एवं तावत् ज्ञातता निष्प्रमाणेत्युक्तम् । अथ तदपि निरस्यते, कुतो नु ज्ञानमतीन्द्रियमिति । (१) इन्द्रियेणानुपलभ्यमानत्वादिति चेत् -- किमयमनुपलभ्यमानत्वोपन्यासः अतीन्द्रियत्वसाधने हेतुस्तदित्याशयेन, किंवाऽतीन्द्रियत्वमिन्द्रियजन्योपलम्भाभावरूपत्वादनुपलब्धिप्रमाणगम्यमिति ज्ञापनार्थम् ? नाद्यः, हेतोस्साध्यानतिरेकात् । द्वितीये तु योग्यानुपलब्धेरेवाभावगमकत्वाद्योग्यत्वेनाविशेषिता न गमयेत् ।

---

१. प्र. ‘अर्थो ज्ञानस्य कर्मैव न भवति; अतीतादेरप्यर्थत्वात् : कारकविशेषस्य च कर्मत्वात् । अतीतानागतं जानामीति द्वितीयाप्रयोगस्साधुरिति तु तत्त्वम्’ इति ॥

योग्यताऽविशेषिताऽसौ कथमैन्द्रियिकोपलम्भाभावं गमयेत् । तद्विशेषणे तु कथमतीन्द्रियं ज्ञानमिति ॥

[18] (२) तथाविधज्ञातताऽनाश्रयत्वादिति चेन्न — आश्रयासिद्धेः । व्यवहारान्यथानुपपत्त्यैव सिद्ध आश्रय इति चेन्न – ज्ञानहेतुनैव तदुपपत्तेः ॥ तस्यात्ममनस्संयोगादिरूपस्य सत्त्वेऽपि सुषुप्तिदशायामर्थव्यवहाराभावान्नैवमिति चेन्न — तावन्मात्रस्य व्यवहाराहेतुत्वात् । अन्यथा ज्ञानस्वीकारेऽपि तुल्यत्वात् ॥ स्मरणान्यथाऽनुपपत्त्येति चेन्न – तस्याप्यसिद्धेः ॥ अस्ति तावद्व्यवहारनिमित्तं किञ्चिदिति चेत् – किमतः ? । न ह्येतावता ज्ञानं तदिति सिद्ध्यति, तस्यैवासिद्धेः ॥ तथापि नियतस्य कर्तुः प्रवृत्तेः कर्तृधर्मेणैव केनचित् प्रवृत्तिहेतुना भवितव्यमिति चेत् — अस्त्विच्छा प्रत्यक्षसिद्धा; न तु ज्ञानम् । सैव कथं नियताधिकरणे (णा)

इन्द्रियजन्योपलंभाभावरूपातीन्द्रियत्वे योग्यानुपलब्धिरस्तीति कृत्वाऽनुपलब्धेर्योग्यतया विशेषणे तु प्रतियोगिनो योग्यतायां सत्यामेवाभावे योग्यानुपलब्धिसंभवादुपलंभस्य ज्ञानस्य प्रत्यक्षयोग्यत्वं स्वीकृतं भवतीति कथं ज्ञानमतीन्द्रियमिति ॥

[18] ननु ज्ञानमतीन्द्रियं (२) साक्षात्कृततारूपज्ञातताऽनाश्रयत्वादिति चेन्न । ज्ञानरूपस्य पक्षस्यैवासिद्धेः ॥ सर्वव्यवहारहेतुत्वाद् ज्ञानस्य ज्ञानाभावे व्यवहार एव न स्यादिति तद्बलात् ज्ञानस्य पक्षस्य सिद्धिरिति चेन्न — प्रत्यक्षप्रमाणसिद्धत्वे हि ज्ञानस्य तदवश्यं स्वीकर्तव्यम् । अप्रत्यक्षत्वे तु ज्ञानकल्पनैव व्यर्था; कल्पनीयज्ञानहेतुत्वेन सम्मतादात्ममनस्संयोगादित एव साक्षाद्व्यवहारसिद्ध्युपपत्तेः; 'तद्धेतोरेवास्य तद्धेतुत्वे मध्ये किं तेने' ति न्यायात् । ननु आत्ममनस्संयोगादिसत्त्वेऽपि सुषुप्तौ व्यवहाराभावान्न तत् व्यवहारकारणमिति चेन्न – केवलात्ममनस्संयोगादेर्व्यवहारहेतुत्वानङ्गीकारात् । यदि तु तावतएव ज्ञानकारणत्वं, तर्हि ज्ञानस्वीकारपक्षेपि तद्बलात् ज्ञानस्य ततो व्यवहारस्य च सुषुप्तावप्यापत्तेः । अतो या सामग्री ज्ञानहेतुः सा साक्षादेव व्यवहारहेतुरिति लाघवावलम्बनसम्भवाद् ज्ञानमसिद्धमिति ॥ ननु पूर्वज्ञानाभावे स्मरणं कथमिति चेन्न– स्मरणस्यापि ज्ञानविशेषरूपत्वादसिद्धत्वात् । ननु स्मरणस्थलीयव्यवहारे निमित्तेन केनचिद्भाव्यमिति चेत् — सत्यम्, तावता तन्निमित्तं ज्ञानमिति न सिद्ध्यति । अन्यत्र ज्ञानस्य व्यवहारनिमित्तत्वे सिद्धे किल तन्नयेनात्रापि ज्ञानं तदिति सिद्ध्येत् ! ज्ञानं तु सर्वात्मनैवासिद्धम् । अनुभवहेतुत्वेन क्लृप्तसामग्र्यधीनात् संस्काररूपातिशयबलात् स्मरणहेतुत्वेन क्लृप्तसामग्रीनिविष्टात् साक्षादेव स्मरणकार्यव्यवहारोपपत्त्या अनुभवस्मरणयोरेवाकल्पनीयत्वादिति ॥ ननूक्तप्रकारासंभवेऽपि प्रवृत्तिः कर्तृगतधर्मविशेषसापेक्षा कर्तृतन्मनस्संयोगमात्रेणाजायमानत्वात्; अन्यथाऽधिकानपेक्षत्वे सर्वे प्रवर्तेरन्निति कर्तृनैयत्यं न स्यादित्यनुमानेन

उत्पद्यतामिति चेन्न — ज्ञानाभ्युपगमेऽपि तुल्यत्वात्॥ स्वहेतोः कुतश्चिदिति चेत्— तत एवेच्छाऽस्तु, किं ज्ञानकल्पनयेति ॥ स्यादेतत् — प्रकाशमाने खल्वर्थे तदुपादित्सादिरुपजायते; न तु सुषुप्त्यवस्थायामप्रकाशमानेऽप्यर्थे इत्यनुभवसिद्धम्। तत इच्छयाः कारणं विलक्षणमेव किञ्चित् परिकल्पनीयं, यस्मिन् सति सुस्वापलक्षणमौदासीन्यमर्थविषयमात्मनो निवर्त्तते इति चेत् - हन्तैवं सुस्वापनिवृत्तिमनुभवसिद्धां प्रतिजानानेन ज्ञानमेवापरोक्षमिष्यते । अचेतयन्नेव हि सुषुप्त इत्युच्यते; अचैतन्यनिवृत्तिरेव हि चैतन्यं ज्ञानमिति। तथाच कालात्ययापदिष्टो हेतुः॥

[19] एतेन (३) क्षणिकत्वादिति निरस्तम् । अपिच किमिदं क्षणिकत्वं नाम? यद्याशुतरविनाशित्वं, तदाऽनैकान्तिकम् । अथैकक्षणावस्थायित्वं, तदसिद्धं प्रमाणाभावात् ॥ ननु स्थायि विज्ञानं यादृशमर्थक्षणं गृह्णदुत्पद्यते, द्वितीयेऽपि क्षणे

किञ्चित्सिद्धौ तदेव ज्ञानमिति चेत् — इच्छानन्तरमेव यत्न इत्यनुभवादिच्छया सिद्धसाधनान्न ज्ञानसिद्धिरिति । ननु सेच्छापि न सर्वस्य सर्वत्र भवतीति व्यवस्थिते आत्मनि व्यवस्थितविषयिणी उत्पद्यमाना स्वाश्रयात्मगतधर्मविशेषजन्यत्वेनानुमीयत इति ज्ञानसिद्धिरिति चेन्न -- ज्ञानस्वीकारेऽपि तद् ज्ञानं सर्वस्य सर्वत्र न भवतीति व्यवस्थिते आत्मनि व्यवस्थितविषयतया जायत इति ज्ञानहेत्वात्मगततादृशधर्मान्तरकल्पनादनवस्थानात् । तत्र चेत् सविषयकधर्मान्तराकल्पनेन केनापि हेतुना व्यवस्थया ज्ञानोत्पत्तिनिर्वाहः, तर्हि तत एव हेतोस्साक्षादिच्छा जायताम् ; किं मध्ये ज्ञानकल्पनया ? ॥ स्यादेतत् — अनुभवसिद्धमेवेदं यत् अर्थप्रकाशे सति तद्धानोपादानेच्छाप्रयत्नादिः, सुषुप्त्यवस्थायां प्रकाशाभावाच्च तदभाव इति । अतः अर्थविषयकौदासीन्यात्मकसुस्वापनिवृत्तिदर्शनादुपादित्सादिकारणं किञ्चिदस्तीति चेत् — एवंसति अचैतन्यात्मकसुस्वापाभावस्य चैतन्यात्मकस्यार्थप्रकाशरूपस्यानुभवसिद्धत्वकथनाद् ज्ञानमपरोक्षमेवेष्यते । एवं ज्ञानस्य प्रत्यक्षसिद्धस्यापलापासंभवादेवात्ममनस्संयोगादिजन्यत्वस्येच्छास्मरणव्यवहारादिजनकत्वस्य च तत्र स्वीकार इति । तथाचैवं सिद्धे ज्ञानरूपाश्रयेऽतीन्द्रियत्वरूपसाध्यस्य बाधात्, ज्ञानमतीन्द्रियं तथाविधज्ञातताश्रयत्वादित्यनुमानं बाधितमिति ॥

[19] एवं बाधितत्वादेव ज्ञानमतीन्द्रियं (३) क्षणिकत्वादित्यनुमानं निरस्तम् । अपिच सिद्धिव्यभिचारान्यतरदुष्टोऽयं हेतुः, क्षणिकत्वस्याशुतरविनाशित्वरूपत्वे इच्छाप्रयत्नसुखदुःखद्वित्वादिषु साध्याभावेन व्यभिचारात् ; एकक्षणमात्रवृत्तित्वात्मकत्वे तु ज्ञाने तदसिद्धिः, प्रमाणाभावात् ; उत्पन्नस्य ज्ञानस्य तदनन्तरोत्पन्नेनान्येनैव विनाशस्य कल्प्यतयाऽन्ततो द्विक्षणावस्थायित्वस्यावश्यकत्वात् ॥ ननु प्रत्यक्षज्ञानस्य वर्तमानविषयकत्वात् क्षणिकत्वं सिद्ध्यत्येव। अतएव शबरस्वामिभिः (१ - १ - ५) 'क्षणिका हि सा न बुद्ध्यन्तरकालमवस्था-

किं तादृशमेव गृह्णाति, अन्यादृशं वा, न वा कमपीति । न प्रथमः, तस्य क्षणस्यातीतत्वात्; प्रत्यक्षज्ञानस्य च वर्तमानाभत्वात्¹ न चाऽतीतमेव वर्तमानतयोल्लिखति, भ्रान्तत्वप्रसङ्गात् । न द्वितीयः, विरम्यव्यापारायोगात् । प्रथमतोऽपि तथाऽभ्युपगमेऽनागतावेक्षणप्रसङ्गात् । न तृतीयः, ज्ञानत्वहानेरिति प्रहारत्रैतीयाः ॥ तदसत् । ज्ञानं गृह्णातीत्यस्यैवाऽर्थस्याऽनभ्युपगमात् । अपि तु तदेव ग्रह-

स्यत ' इति भाषितम् । अत्र बाह्यार्थपलापिबौद्धमतखण्डनावसरे क्षणिका हि सेति भाषमाणाः बुद्धिक्षणिकत्वं बौद्धमीमांसकोभयसंमतमिति दर्शयन्ति । बौद्धमते च क्षणिकत्वमित्थम्—अर्थानां क्षणिकत्वात् अयं घट इति प्रत्यक्षे घटस्य वर्तमानतया भानात् ज्ञानस्य स्थायित्वे तत् प्रत्यक्षमुत्पत्तिकाले यं वर्तमानमर्थात्मकं क्षणं गृह्णदुत्पन्नं द्वितीयक्षणेपि तद्ग्राहकं वा तदन्यग्राहकं वा अग्राहकमेव वा? नादिमः; द्वितीयक्षणे प्रथमक्षणगृहीतस्य नष्टतयाऽतीतत्वात् । वर्तमानस्य ह्याभा प्रत्यक्षज्ञाने भवति; नातीतस्य प्रकाशः । अतीतस्यैव वर्तमानतया ग्रहणमित्यपि न; प्रथमक्षणे प्रमात्मकस्योत्तरक्षणे भ्रमत्वापत्तेः । नाप्यन्यग्राहकत्वपक्षः, प्रथमक्षणे तदन्यदगृहीत्वा द्वितीयक्षणे तद् गृह्णातीत्यस्यायुक्तत्वात् । तस्य तद्ग्रहणसामर्थ्ये सति हि पूर्वमपि तद्ग्रह आवश्यकः । प्रथमक्षणेपि तद्ग्राहकत्वे तु भाविक्षणग्राहितया वर्तमानविषयकत्वस्वभावभङ्गः । न तृतीयः; अत्यन्तमग्राहकत्वे निर्विषयत्वापत्त्या ज्ञानत्वमेव न स्यादिति । अस्मिन् बौद्धपक्षे वस्तुक्षणिकत्वमनभ्युपगच्छता मीमांसकेनास्वीकार्यांशसत्त्वेपि ज्ञानक्षणिकत्वमनयैव रीत्या सूपपादम् । अयं घट इति प्रत्यक्षस्य वर्तमानक्षणावच्छिन्नतया वस्तुग्राहित्वात् विशेषणतया भातस्य वर्तमानक्षणस्य ज्ञानद्वितीयक्षणेऽतीततया वर्तमानग्राहिणा प्रत्यक्षेण तद्ग्रहणायोगात्, वर्तमानतया तत्क्षणग्रहणस्वीकारे च भ्रमत्वापत्तेः, क्षणांशाग्रहणस्य च प्रथमक्षणे तद्ग्रहणस्य स्थितत्वेन दुर्वचत्वात् ज्ञानमेकक्षणमात्रस्थायि यत्क्षणेऽस्ति तत्क्षणावच्छिन्नं घटादि गृह्णातीति वक्तव्यमिति । अतएव ज्ञानस्य द्वितीयक्षणे स्थित्यभावात् अवर्तमानस्य च प्रत्यक्षेण ग्रहणायोगात् ' ज्ञाते त्वर्थे ज्ञानमनुमानादवगच्छति ' इति भाषितमिति चेत् – तदसत् – प्रथमतस्तावदन्यथाग्रहनिरासाय किञ्चिद्वक्तव्यम् । ज्ञानमर्थं गृह्णातीत्यस्य ज्ञानमर्थविषयकज्ञानाश्रय इति वा ज्ञानमर्थनिष्ठज्ञाततानुकूलव्यापारवदिति वा नार्थः, किन्तु गृह्णाति आलम्बते विषयीकरोतीत्येवार्थः । तत्र च ज्ञानं स्थिरं द्वितीयक्षणेपि पूर्वक्षणगृहीतं सर्वं विषयीकुर्वदेवास्तीति तत्त्वम् । नचैवंसति अवर्तमानस्य वर्तमानतया ग्रहणाद्भ्रमत्वापत्तिरिति वा-

१. अयं क. २. पाठः । पा. वर्तमानाभतया. २. प्र. ' यादृशं वर्तमानक्षणावच्छिन्नम्, अन्यादृशं द्वितीयक्षणावच्छिन्नम् ' इति व्याख्यानात् अर्थक्षणमित्यत्र कर्मधारय इति ज्ञायते । तथाचार्थक्षणिकत्ववादिबौद्धमतोपन्यासो मूल इति प्रतीयते । अधिकं टिप्पणीपरिशिष्टे द्रष्टव्यम् ।

णमित्यभ्युपगमः । तथाच ज्ञानं प्रथमे यमर्थमालम्ब्य जातं, द्वितीयेऽपि क्षणे तदालम्बनमेव तन्नवेति प्रश्नार्थः । तत्र तदालम्बनमेव तदिति परमार्थः । नचैवं भ्रान्तत्वम्, विपरीतानवगाहनात् । तथापि ज्ञेयनिवृत्तौ कथं ज्ञानानुवृत्तिः? तदनुवृत्तौ वा कथं ज्ञेयनिवृत्तिरिति चेत् – किमस्मिन्ननुपपन्नम्? नहि ज्ञानमर्थश्चेत्येकं तत्त्वमेकायुष्कं वेति ॥

[20] सत्यपि वा क्षणिकत्वे कथमप्रत्यक्षम्? इत्थं यथोच्यते – न स्वप्रकाशं, वस्तुत्वादितरवस्तुवत्। न च ज्ञानान्तरग्राह्यं, ज्ञानयौगपद्यनिषेधेन समानकालस्य तस्याभावात्। ग्राहककाले ग्राह्यस्यातीतत्वेन वर्तमानाभत्वानुपपत्तेः । ग्राह्यकाले च ग्राहकस्यानागतत्वात्– इति चेत् – नन्वेवं ज्ञातताऽपि न प्रत्यक्षा स्यात्,

---

च्यम् । प्रथमतो घटस्य यत्क्षणव्यक्त्यवच्छिन्नत्वं गृहीतं पश्चादपि तद्व्यक्त्यवच्छिन्नत्वेन तथैव ग्रहणाद्घटे च तत्क्षणावच्छिन्नत्वस्याबाधेन विपरीतानवगाहनात्। अवर्तमानग्राहित्वं प्रत्यक्षस्यानुपपन्नमिति चेत्–नहि प्रत्यक्षं यत्क्षणे तद् ग्रहीतुं प्रवृत्तं तदा तदवर्तमानम् । पश्चात्तन्नाशेपि पूर्वमेव गृहीतत्वेनादोषात् । अतश्च ज्ञेयक्षणनिवृत्तावपि ज्ञानानुवृत्तौ न काचिदनुपपत्तिः । नच ज्ञानार्थयोरभेदः, येनैकनिवृत्तावन्यन्न स्यात् । यथाच ज्ञानोत्पत्तेः प्रागपि कश्चित्कालमर्थः कश्चित्स्थितः, तथाऽर्थनाशात्पश्चादपि क्षणमेकं ज्ञानमस्तीति । तस्मात्क्षणिकत्वहेतुरसिद्धः ॥

[20] किञ्च ज्ञानस्य क्षणिकत्वेनाप्रत्यक्षत्वे तुल्ययुक्त्या ज्ञाततया अपि क्षणिकत्वमप्रत्यक्षत्वं च स्यादिति तत्परिहाराय किञ्चित्प्रकारावलम्बने ज्ञानक्षणिकत्वमपि न सिद्ध्यतीति हेत्वसिद्धिर्दृढैव । तथाहि – ज्ञानस्य क्षणिकत्वेऽप्रत्यक्षत्वमेवमुपपाद्यम् – 'ज्ञानं न स्वप्रकाशं वस्तुत्वात् घटादिवस्त्वन्तरवदिति ज्ञानस्य स्वाधीनप्रकाशासिद्धौ प्रत्यक्षविषयत्वं प्रत्यक्षज्ञानव्यक्त्यन्तरकृतग्रहणेनैव वक्तव्यम् । तच्च क्षणिकत्वान्न भवति । एकस्यैव ज्ञानस्य समूहालम्बनविधया घटपटादिसर्वग्राहकत्वसम्भवेन युगपद्ज्ञानद्वयोत्पत्तेरसिद्धतया ज्ञानस्य स्वोत्पत्तिकालोत्पन्नप्रत्यक्षग्राह्यत्वस्य दुर्वचत्वात् । स्वोत्तरकालोत्पन्नप्रत्यक्षकाले च स्वस्यातीतत्वात् स्वकाले तस्यानागततया च तेन स्वग्रहणायोगात् । अन्यथा प्रत्यक्षस्य वर्तमानविषयकत्वानुपपत्तेः' इति । एवमेव ज्ञाततायाः क्षणिकत्वादप्रत्यक्षत्वम् । सा हि वस्तुत्वादस्वप्रकाशेति ज्ञानग्राह्या वाच्या। तत्र न स्वजनकज्ञानेन स्वयं प्रत्यक्षया; ज्ञाततया भावितया तत्कालेऽभावात् । नच तदेव ज्ञानं ज्ञाततोत्पत्तौ सत्यां ज्ञाततां गृह्णातीति युक्तम् ; पूर्वं तदग्राहिणः पश्चात्तद्ग्राहित्वायोगात्। नापि ज्ञाततोत्पत्तिसमयोत्पन्नज्ञानग्राह्या; प्रत्यक्षे इन्द्रियसन्निकर्षस्य कारणतया पूर्वभावित्वावश्यकत्वात् । तद्ज्ञानजनकस्य चेन्द्रियसन्निकर्षस्य तत्पूर्वं स्थितस्य तत्कालोत्पन्नज्ञाततयाऽलब्धत्वात् । ज्ञाततोत्तरकालोत्पन्नज्ञानेन च सा न ग्राह्या । तदा तस्या अतीतत्वादिति कथं

क्षणिकत्वात् ॥ कथम्? । इत्थम् — न स्वप्रकाशा । वस्तुत्वात्, न जनकग्राह्या, अनागतत्वात् । विरम्यव्यापारायोगाच्च । न समसमयज्ञानग्राह्या, ज्ञानजनकेन्द्रियसम्बन्धाननुभवात् । न च तदुत्तरज्ञानग्राह्या, तदानीमतीतत्वात् – इति ॥ क्षणिकत्वमेव तस्याः कुत इति चेत् – त्वदुक्तयुक्तेरेव । तथाहि — यं क्षणमाश्रित्य जाता ततः परमपि तमेवाश्रयते अन्यं वा, न वा कमपीति । तत्र न प्रथमः, तस्य तदानीमसत्त्वात् । न द्वितीयः, अप्रतिसंक्रमात् । एकक्षणावगाहिनि च ज्ञाने तदन्यक्षणाश्रयज्ञातताफलत्वेन भ्रान्तत्वप्रसङ्गात्, रजतावगाहिनि पुरोवर्तिशुक्तिज्ञातताफल इव । न चान्यमपि क्षणं ज्ञानमवगाहते, तदानीं तस्यासत्त्वात् । न तृतीयः, निःस्वभावताप्रसङ्गात् । न ह्यसौ तदानीं तदीयाऽन्यदीया वेति ॥

[21] अतीतेनापि तेनैव क्षणेनोपलक्षिताऽनुवर्त्तते इति चेत् – एवं तर्हि वर्त-

---

तस्याः क्षणिकत्वमिति चेत् – त्वदुक्तनीत्यैव । तथाहि — अयं घट इति वर्तमानक्षणावच्छिन्नघटग्रहणे वर्तमानक्षणविषयकमिदं ज्ञानं ज्ञाततयाऽनुमेयमिति वक्तव्यम् । तत्र ज्ञातताप्रत्यक्षमपि क्षणिकत्वादुर्लभमित्युच्यते । सा हि ज्ञातता, स्थायित्वस्वीकारे, द्वितीयक्षणे पूर्वं यत्क्षणनिष्ठत्वेन जाता तत्क्षणनिष्ठा वा तदन्यक्षणनिष्ठा वा अवृत्तिरेव वा । नाद्यः, तस्य क्षणस्यातीतत्वात् । न द्वितीयः, तस्या अमूर्तायाः गमनशक्तिविकलत्वात् । यत्क्षणावगाहि यद् ज्ञानं तस्य ज्ञानस्य तत्क्षणान्यक्षणाश्रयकज्ञातताफलकत्वसिद्ध्या इदं रजतमिति रजतज्ञानस्य पुरोवृत्तिशुक्तिनिष्ठज्ञातताफलकस्येव भ्रमत्वप्रसङ्गात् । नहि तत्र रजतज्ञानं रजते ज्ञाततामुत्पादयति; जगद्वर्तिरजते कुत्रापि इदं ज्ञातमिति तदाऽननुभवात्; शुक्तावेव इदं ज्ञातमित्यनुभवात् । यद्यपि गुरुमतविलक्षणे ज्ञानातीन्द्रियत्ववादिप्रकृतभट्टमतेऽन्यथाख्यातिसत्त्वादिदमर्थोऽपि रजतज्ञाने विषयः; अथापि न सामान्यत इदमर्थज्ञानेन इदं ज्ञातमित्यनुभवः; किन्तु रजतग्रहणेन । तथाचैकग्रहणप्रयुक्ता यत्रान्यज्ञातता तत्र भ्रमत्वमिति प्रकृतेऽप्येवं स्यादिति । वस्तुतो ज्ञानाविषये ज्ञाततोत्पत्तिरयुक्ता, सर्वत्र प्रसङ्गात् । नच पूर्वक्षणविषयकज्ञानमुत्तरक्षणविषयकमपि, क्षणस्य तस्य तदाऽनागतत्वात् ॥ नच तृतीयोऽवृत्तिपक्षः; धर्मस्वभावकत्वभङ्गप्रसङ्गात् ॥

[21] ननु न सर्वात्मना तस्या अवृत्तित्वम्, पूर्वक्षणे स्थितत्वात् । तन्नाशानन्तरं तु तदुपलक्षिताऽनुवर्तते, आश्रयनाशानन्तरं क्षणमेकं रूपरसादिवदिति चेत् – तर्हि प्रकाशापरपर्यायायाः तस्यास्तदा वर्तमानार्थकत्वं न स्यात् । अन्यथा पूर्वं वर्तमानार्थत्वमात्रेण वर्तमानार्थ-

---

१. प्र. 'ज्ञातताजननोत्तरकाले तदिन्द्रियसंबन्धस्य प्राप्त्या तत्समकालं तदभावादित्यर्थः । अनुभवेति भूप्राप्तावित्येतस्य रूपम्' । २. यद्यपीदं रजतमिति ज्ञाने नः पुरोवर्त्यपि विषयः, अथापि तन्मतेऽन्यथाख्यात्यभावात् इदंज्ञानभिन्ने रजतज्ञाने शुक्तिर्न विषय इति म० ।

मानार्थता प्रकाशस्य न स्यात् । अन्यथा ज्ञानस्यापि तथानुवृत्तेः को दोषः? नहि वर्तमानार्थप्रकाशसम्बन्धमन्तरेण ज्ञानस्यान्या वर्तमानावभासता नाम । अर्थनिरपेक्षप्रकाशनानुवृत्तिमात्रेण तथात्वे भूतभाविविषयस्यापि ज्ञानस्य तथाभावप्रसङ्गात् ।

[22] अथ मा भूदयं दोष इति स्थूल एव वर्तमानः प्रकाशेनाश्रीयते इत्यभ्युपगमः, तदा तज्ज्ञानस्यापि स एव विषय इति तस्यापि न क्षणिकत्वमिति ॥४

कत्वस्वीकारे ज्ञानस्यापि वर्तमानक्षणग्राहिणः तत्क्षणनाशानन्तरं तत्क्षणोपलक्षिततयाऽनुवृत्त्युक्तौ को दोषः; वर्तमानार्थकत्वनिर्वाहे सति वर्तमानाभत्वानिर्वाहासंभवात् । नहि विषयनिष्ठज्ञातताजनकत्वातिरिक्तं विषयसंबन्धं ज्ञानेऽनुपयतस्तव मते ज्ञानस्य वर्तमानार्थकज्ञातताहेतुत्वातिरिक्तं वर्तमानाभत्वं नाम किञ्चिदस्ति । एवञ्चार्थरूपाश्रयाभावेऽपि प्राकट्यानुवृत्तिं स्वीकृत्य तावन्मात्रेण वर्तमानार्थकत्वाभ्युपगमे, यस्य ज्ञानस्य वर्तमानाभत्वमनिष्टं, तस्य भूतभाविविषयकस्याप्युक्तरीत्या वर्तमानाभत्वप्रसंगः । अतो ज्ञाततया वर्तमानार्थकत्वरक्षणाय यं क्षणमाश्रित्य जाता तत्क्षणनाशकाले सापि नश्यतीत्येव स्वीकार्यमिति सिद्धं तस्या अपि क्षणिकत्वम् । अतस्तस्या अपि क्षणिकत्वादप्रत्यक्षत्वापत्तिरिति ।

[22] अथ नैष दोषः स्थूलस्यैव वर्तमानस्य प्राकट्याश्रयत्वस्वीकारात् । तथाहि – नहि बौद्धवत् सर्वक्षणिकत्वं कस्यचिदभिमतम् । अतो घटादौ जाता ज्ञातता आश्रयसहितैवानुवर्तत इति न तत्र वर्तमानार्थत्वक्षतिः, नापि क्षणिकत्वम् । यस्तु 'अयं घट' इति प्रत्यक्षे घटविशेषणतया भासमानो वर्तमानकालः, तस्य क्षणरूपतया तन्निष्ठज्ञाततायाः एव क्षणिकत्वादप्रत्यक्षत्वमबौद्धमते आपाद्यम् । ततस्तत्र क्षणो न विशेषणम्; किन्तु अनेकक्षणानुवृत्तस्थूलकाल एव वर्तमानो विशेषणमित्यभ्युपगम्यते इति चेत्—तर्हि ज्ञानविषय एव ज्ञाततोत्पत्त्या ज्ञाततया स्वाश्रयगोचरज्ञानस्यैवानुमेयतया च ज्ञानमपि स्थूलकालविषयकमेवेति वर्तमानाभत्वाभङ्गान्न तस्यापि क्षणिकत्वम् । अत एव क्षणोपाधीनामनाकलनात् धारावाहिज्ञानेषु स्थूलकालविषयकतया पूर्वाविशिष्टत्वमुत्तरस्य प्रागुक्तम् । एवञ्च क्षणज्ञानं न प्रत्यक्षरूपं, किन्त्वन्यादृशमित्येव स्वीकार्यम् । यत्क्षणविषयकं प्रत्यक्षं तत्क्षणस्य ज्ञाततोत्पत्तिकाल एव नाशेन साक्षात्कृतताख्यज्ञाततया वर्तमानार्थकत्वावश्यकत्वेन तदुत्पत्तेरेवासंभवादपि प्रत्यक्षस्य क्षणविषयकत्वं त्वन्मते न संभवति । वयं तु अर्थज्ञानयोरेकायुष्कत्वाभावात् क्षणप्रत्यक्षमपि क्षणोपाध्याकलनसंभवे स्वीकुर्मः । सर्वथा ज्ञानस्यापि ज्ञातताया इव न क्षणिकत्वमिति सिद्धं ज्ञानातीन्द्रियत्वसाधकस्यास्य कालात्ययापदिष्टत्वादिवत् स्वरूपासिद्धत्वमपीति ॥

१. प्रकाशस्येति पदं ज्ञानार्थकमिति आपाततः प्रकाशव्याख्यादर्शने प्रतीयते । तत्र अनौचित्यमालोच्य प्रकाशपदस्य ज्ञाततापरत्वे एव फक्किका संगच्छत इति म० ।

[23] ननु (४) ज्ञानमैन्द्रियकं चेत्, विषयसञ्चारो न स्यात्, संजातसम्बन्धत्वात्। न च जिज्ञासानियमान्नियमः, तस्याः संशयपूर्वकत्वात्, तस्य च धर्मिज्ञानपूर्वकत्वात्, धर्मिणश्च सन्निधिमात्रेण ज्ञाने जिज्ञासापेक्षणे वा उभयथाप्यनवस्थानादिति – तन्न – ज्ञाततापक्षेऽपि तुल्यत्वात्। तस्या अपि हि ज्ञेयत्वे तत्परम्पराज्ञानापातात्; जिज्ञासानियमस्य च तद्वदनुपपत्तेः। नचेन्द्रियसम्बन्धविच्छेदाद्विराम इति युक्तम्– आत्मप्राकट्याव्यापनात्॥ स्वभावत एव काचिदसाव-

---

[23] ननु (४) बाह्यविषयसञ्चारित्वात् ज्ञानमतीन्द्रियमिति साधयामः। यद्यैन्द्रियकं स्यात्, घटादिज्ञानस्य मनस्संयुक्तसमवाय एव सन्निकर्षो वाच्य इति तस्य सर्वदैव सत्त्वात् घटज्ञानप्रत्यक्षं समनन्तरं तत्प्रत्यक्षप्रत्यक्षं ततस्तत्प्रत्यक्षमिति मानसप्रत्यक्षपरंपरैव स्यादिति न बाह्यविषयान्तरग्रहणप्रसक्तिः। यदि सत्यपि सन्निकर्षे तदभिभवेन बाह्यप्रत्यक्षमेव जायेत, तर्हि प्राथमिकं ज्ञानप्रत्यक्षमपि तत एव न स्यादिति। नच यदा यज्जिज्ञासा तदा तत्प्रत्यक्षमिति कदाचिद्बाह्यस्य कदाचिद् ज्ञानस्य च ग्रहोपपत्तिरिति वाच्यम् – जिज्ञासायास्संशयजन्यत्वात् संशयस्य च धर्मिज्ञानजन्यत्वात् घटज्ञानकाले पटरूपधर्मिज्ञानस्यैवाभावेन संशयजिज्ञासाद्यप्रसक्त्या पटज्ञानायोगात्। यदि धर्मिज्ञानमस्ति, तर्हि तत् जिज्ञासानपेक्षमिन्द्रियसन्निकर्षमात्रबलाज्जातं वा जिज्ञासापेक्षं वा? आद्ये तथैव मनइन्द्रियसन्निकर्षबलेन ज्ञानधाराग्रहणप्रसक्त्याऽनवस्थेति न बाह्यज्ञानान्तरोत्पत्तिः। अन्त्ये तस्य ज्ञानस्य जिज्ञासापेक्षत्वे जिज्ञासायास्संशयमुखेन धर्मिज्ञानापेक्षा, तस्यापि धर्मिज्ञानस्य तथैव जिज्ञासापेक्षेत्यनवस्था स्यादिति धर्मिज्ञानोत्पत्तिरेव न भवेदिति चेन्न – ज्ञाततापक्षेऽपि विषयसञ्चारित्वासंभवस्य तुल्यत्वात्। घटज्ञानेन घटे उत्पन्ना या ज्ञातता तत्प्रत्यक्षस्य तदनन्तरं स्वीकारे ज्ञातताज्ञानेन ज्ञाततायामुत्पादिता या ज्ञातता तत्प्रत्यक्षं, ततः पुनरपि तथेति ज्ञाततापरम्पराज्ञानधारैव स्यादिति। नच ज्ञातताविषये जिज्ञासायां सत्यां तद्ग्रहणं; न चेत्, वस्त्वन्तरग्रहणमिति वाच्यम् – पूर्वं ज्ञाततादिरूपधर्मिज्ञानाभावेन तज्जिज्ञासाया अयोगात्। तस्य धर्मिज्ञानस्य जिज्ञासानपेक्षत्वे ज्ञातताज्ञानपरम्परैव स्यात्; तत्सापेक्षत्वे च धर्मिज्ञानासंभव इति पूर्ववद्दोषात्। नच मनस्संयुक्तसमवायरूपाऽऽन्तरसन्निकर्षस्य सदा सत्त्वात्पूर्वं दोषः प्रसक्तः। स इह न भवति। घटेन्द्रियसन्निकर्षे विच्छिन्ने ज्ञाततया सन्निकर्षविरहेण ज्ञातताज्ञानधारानापत्त्या सन्निकृष्टवस्त्वन्तरग्रहणसंभवादिति वाच्यम् – बाह्यनिष्ठज्ञाततायामेवं परिहारेऽपि अहं सुखीति ज्ञानजनितात्मनिष्ठज्ञाततायां मनस्संयुक्तसमवायरूपसन्निकर्षसत्त्वात्तदविच्छेदात्तत्र ज्ञातताधाराज्ञानप्रसंगात् उक्तसमाधानस्यात्मप्राकट्यरूपविषयासंस्पर्शित्वात्। ननु ज्ञातताररूपधर्मिज्ञानस्य पूर्वमभावेन जिज्ञासाप्रसक्त्यभावादजिज्ञासितैव ज्ञातता ज्ञायते। नच तावता सर्वज्ञातताज्ञानप्रसङ्गः; अनुभवानुरोधेन

जिज्ञासिताऽपि ज्ञायते, न तु सर्वेति चेत् – तुल्यम् ॥ प्रागुत्पन्नज्ञाततास्मरणजनितजिज्ञासः समुन्मीलितनयनः सञ्जातज्ञानसमुत्पादितप्राकट्यं जिज्ञासुरेव प्रतिपद्यते इत्यतो नानवस्थेति चेत् — तुल्यमेतत् ॥

[24] ननु (५) ज्ञानं न सविकल्पकग्राह्यं, तस्य निर्विकल्पकपूर्वकत्वात्; निर्विकल्पकगृहीतस्य तावत्कालानवस्थानात्; तस्य तेनैव विनाशात् । नापि केवलनिर्विकल्पकवेद्यम्, तस्य सविकल्पकोन्नेयत्वेन तदभावे प्रमाणाभावात् । न च समवायाभाववन्निर्विकल्पकनिरपेक्षसविकल्पकगोचरत्वं ज्ञानस्येति साम्प्रतम् – तयोर्विशेषणांशस्य प्राग्ग्रहणादनुमानादिवत्तदुपपत्तेः; प्रकृते तु ज्ञानत्वादेरनुप-

---

स्वभाव एव शरणमिति समाधानादिति चेत् — एवमेव ज्ञानमप्यजिज्ञासितमेव किञ्चिद्गृह्यते, किञ्चिन्न गृह्यत इति स्वभावत एव निर्वाहस्तुल्यः । तथाच यदा न गृह्यते तदा बाह्यविषयसञ्चार इति । ननु 'विना कारणं स्वभावतो व्यवस्था न प्रामाणिकी । अतो जिज्ञासायां सत्यामेव ज्ञातताज्ञानं; न चेत्, बाह्यसञ्चार इत्येवोच्यते । धर्मिज्ञानाभावे कथं जिज्ञासेति चेत् – घटगतप्रकृतज्ञातताव्यक्तेः पूर्वमदृष्टत्वेऽपि एतज्जातीयप्रागुत्पन्नज्ञाततायाः सामान्यतो ग्रहणात्तत्स्मरणेन जिज्ञासायां सामान्यतो जनितायां नयनसन्निकर्षबलात्संप्रतिजातेन ज्ञानेन समुत्पादितां ज्ञाततां जिज्ञासुत्वाद्गृह्णाति । यदा तु नैवं जिज्ञासा, तदा विषयान्तरानुधावनम्' इति चेत्– एतदपि तुल्यम् । प्रकृतज्ञानरूपधर्मिणः प्रागदृष्टत्वेऽपि सजातीयज्ञानस्मरणरूपधर्मिज्ञानजनितजिज्ञासाभावाभावाभ्यां ज्ञानप्रत्यक्ष तदभावविषयसञ्चारनिर्वाहात् । तथाचानैन्द्रियकत्वरूपसाध्ये ग्रहणसामग्र्यभावस्योपाधित्वात् विषयसञ्चारित्वरूपहेतुरप्रयोजको व्याप्यत्वासिद्ध इति ॥

[24] नन्वस्तु अनुमानान्तरम् (५) ज्ञानमतीन्द्रियं सविकल्पाविषयत्वे सति निर्विकल्पाविषयत्वादिति । नच हेत्वसिद्धिः, तस्यापि साधनात् । ज्ञानं न सविकल्पविषयः त्रिक्षणानवस्थायित्वात् । ज्ञानोत्पत्तिकालः तन्निर्विकल्पककाल इति कालद्वयानन्तर हि सविकल्पोत्पत्तिः । सविकल्पोत्पत्तिकाले च विषय आवश्यकः, प्रत्यक्षस्य वर्तमानग्राहित्वात् । ज्ञानं त्रिक्षणावस्थायि, तस्य स्वोत्तरगुणनाश्यतया तन्निर्विकल्पेनैव नाशात् । सविकल्पस्य निर्विकल्पपूर्वकतया निर्विकल्पस्यावश्यकत्वात् । नापि निर्विकल्पविषयः, सविकल्पाविषयत्वात् । अतीन्द्रियं हि निर्विकल्पकं सर्वत्र सविकल्पकबलेनोन्नीयते । नच समवायाभावयो निर्विकल्पनिरपेक्षसविकल्पग्राह्यत्वस्य तृतीयस्तबकान्ते निरूपितत्वात् तद्वदेव ज्ञानस्यापि तदुत्पत्तिद्वितीयक्षण एव निर्विकल्पं विनैव सविकल्पग्राह्यत्वमस्तीति साम्प्रतम् – समवायाभावयोः प्रतियोगिविशिष्टतयैव ग्रहणात् अभावत्वादेश्च वटप्रतियोगिकत्वाद्यपेक्षयाऽतिरिक्तजात्यादिरूपत्वाभावात् प्रतियोगिरूपविशेषणस्य च पूर्वं गृहीतत्वात् विशेषणज्ञानसद्भावात् निर्विकल्पं विनैव

लब्धेरगृहीतविशेषणायाश्च बुद्धेर्विशेष्यानुपसंक्रमात्कथमेवं स्यात् ? न; उत्पन्नमात्रस्यैव बाह्यविषयज्ञानस्यालोचनात् । ततस्तत्पुरस्सरं प्रथमत एव तज्जातीयस्य ज्ञानान्तरस्य विकल्पनात् । इन्द्रियसन्निकर्षस्य तदैव विशेषणग्रहणलक्षणसहकारिसंपत्तेः । व्यक्त्यन्तरसमवेतमपि हि सामान्यं गृहीतं तदेवेत्युपयुज्यते । अन्यथाऽनुमानादिविकल्पानामनुत्पादप्रसङ्गः; तद्गतस्य विशेषणस्याग्रहणादन्यगतस्य चानुपयोगात्किं लिङ्गग्रहणसहकारि स्यादिति । एतेन शब्दादिप्रत्यक्षं व्याख्यातमिति ॥

[25] स्यादेतत् (६) विषयनिरूप्यं हि ज्ञानमिष्यते । न चातीन्द्रियस्य परमाण्वादे-

---

विशिष्टज्ञानरूपतत्सविकल्पोत्पत्तिर्युक्ता, यथा बाह्यरूपविशेषणस्य परामर्शकाल एव गृहीतत्वात् पर्वतो वह्निमानिति विशिष्टानुमित्याद्युत्पत्तिः । प्रकृते तु पूर्वं विषयरूपस्य ज्ञानविशेषणस्य गृहीतत्वेऽपि ज्ञानत्वप्रत्यक्षत्वानुमितित्वादेः प्रागनुपलब्धत्वात् विशिष्टबुद्धेश्च विशेषणमगृहीत्वा विशेष्यग्राहित्वाभावात् तथाविशेषणग्रहणस्य च पूर्वं विशेषणज्ञानाभावेऽनुपपन्नत्वात्कथमत्र निर्विकल्पनिरपेक्षसविकल्पगोचरत्वं स्यादिति चेन्न — प्रथमतो घटज्ञानं ततस्तान्निर्विकल्पकं ज्ञानत्वविषयकं ततः पुनर्घटज्ञानं ततो निर्विकल्पं विनैव सविकल्पमिति वर्णनेनादोषात् । द्वितीयज्ञानोत्पत्तिकाल एव ज्ञानत्वनिर्विकल्पकरूपसहकारिसम्पन्नतया इन्द्रियसन्निकर्षस्य सविकल्पजनने सामर्थ्यात् । यद्यपि ज्ञानत्वं पूर्वघटज्ञानव्यक्तौ गृहीतं, नतु सविकल्पविषयद्वितीयव्यक्तौ; अथापि न दोषः, ज्ञानत्वस्यैकत्वात् । प्रकृतव्यक्तिनिष्ठविशेषणज्ञाने सत्येव सविकल्पमिति नियमस्वीकारेऽनुमित्यादिसविकल्पानि नोत्पद्येरन्; पर्वतीयवह्निगतत्वेन वह्नित्वस्य प्रागगृहीततया महानसीयवह्न्यादिगतवह्नित्वग्रहस्यानुपयुक्ततायास्त्वदभिमततया च लिङ्गपरामर्शस्य विशेषणज्ञानरूपसहकारिसम्पत्त्यभावात् । नन्वनुमिनोमीत्यनुव्यवसायनिर्वाहः कथम्, अनुमित्यनन्तरमनुमित्यनुदयात्; सिद्धेरनुमितिप्रतिबन्धकत्वात; निर्विकल्पेन चानुमितिनाशादिति चेत् — घटाद्यनुमितिगतानुमितित्वनिर्विकल्पेन वह्न्याद्यनुमितिसविकल्पोत्पत्तिः; एवं सिषाधयिषादिनानुमित्यन्तरस्थलेप्यनुव्यवसायो भवितुमर्हतीति । यद्वा विषयरूपविशेषणस्य प्रागगृहीततया समवायाभावयोरिव ज्ञानस्यापि प्रथमत एव सविकल्पम् । परन्तु तस्य ज्ञानत्वानुमितित्वाद्यंशे निर्विकल्परूपत्वं तदा स्वीकार्यमिति ॥ एवं व्यक्तिभेदेन निर्विकल्पसविकल्पोपपादनेन द्विक्षणावस्थायिनश्शब्दस्येच्छाप्रयत्नादेश्च प्रत्यक्षममि निरूपितं भवति । एवञ्च त्रिक्षणानवस्थायित्वरूपहेतोश्शब्दादौ व्यभिचारोपि द्रष्टव्यः । तथाच प्रकृतातीन्द्रियत्वसाधकहेतुरप्यसिद्ध इति ।

[25] स्यादेतत् — (६) विमतं ज्ञानमतीन्द्रियं ज्ञानत्वादतीन्द्रियार्थविषयकज्ञानवदित्यनुमाने-

---

१. प्र. ' अनुमित्यनुव्यवसायरूपसविकल्पकंत्ववर्तमानेपि पूर्ववर्तित्वमात्रेण प्रत्यक्षविषयत्वं स्वीकृत्य निर्वाह्यम् एवं घटज्ञानद्वयस्य सर्वत्रोत्पत्तौ मानाभावात् ग्रन्थोऽत्र संनिकर्षतत्परतयानेयः' इत्यादि ।

मनसा वेदनमस्ति। न चागृहीतस्य विशेषणत्वम्। न च नित्यपरोक्षस्यापरोक्षविशिष्टबुद्धिविषयत्वं, व्याघातादिति — न, बाह्येन्द्रियग्राह्यस्याग्राह्यस्य वा पूर्वज्ञानोपनीतस्यैव मनसा वेदनात्। अन्यथाऽतीन्द्रियस्मरणस्याप्यनुत्पत्तिप्रसङ्गात्। इयांस्तु विशेषः — तस्मिन् सति तद्बलादेव; असति तु तज्जनितवासनाबलात्। न चैवं सति स्मरणमेतत्; अगृहीतज्ञानगोचरत्वात्। न च विषयांशे तत्तथा स्यादिति युक्तम् — अवच्छेदकतया प्रागवस्थावदवभासनात्। न च प्रत्यभिज्ञानमपि ग्रहणस्मरणाकारम्; विरोधात्। अथ ग्रहणस्मरणयोः कियती सामग्री? अधिकोऽर्थसन्निकर्षो ग्रहणस्य, संस्कारमात्रं सन्निकर्षः स्मरणस्य॥ अथ ग्रहण-

---

नातीन्द्रियत्वमस्तु। नच दृष्टान्ते साध्यवैकल्यं, विषयरूपविशेषणविशिष्टतयैव ज्ञानस्य मानसप्रत्यक्षवेद्यतया वक्तव्यत्वात् अतीन्द्रियपरमाण्वादौ मनसस्साक्षाद्बहिरिन्द्रियद्वारा च सन्निकर्षविरहेण प्रत्यक्षस्यासंभवेन नित्यं परोक्षस्य तस्यापरोक्षे ज्ञानसविकल्पके विषयत्वासंभवात्। वस्तुनि नित्यपरोक्षत्वापरोक्षत्वयोर्विरुद्धत्वादिति चेन्न — वस्तुनो बहिरिन्द्रियसन्निकर्षस्य बाह्यप्रत्यक्षं प्रत्येव हेतुतया मानसप्रत्यक्षे बाह्यपदार्थभाने तस्य प्रयोजकत्वाभावात् सुरभि चन्दनमिति चाक्षुषे सौरभस्येव बाह्येन्द्रियग्राह्यस्यापि मानसप्रत्यक्षरूपानुव्यवसाये ज्ञानविशेषणतया भानं ज्ञानलक्षणारूपप्रत्यासत्तिबलादित्येव वाच्यम्। अयं घट इति ज्ञानस्य प्राग्जातत्वात् ज्ञानगृहीतत्वाद्घटस्य ज्ञानलक्षणप्रत्यासत्तिभावात्। तथाचातीन्द्रियस्यापि परमाण्वादेरनुमित्यादिना ग्रहणानन्तरं तयैव प्रत्यासत्त्या मनसाऽनुव्यवसायेन विषयीकरणमित्यदोषात्। ज्ञानप्रत्यासत्त्यनङ्गीकारेचातीन्द्रियार्थस्मरणमपि न स्यात्। अनुभवगृहीतत्वाद्धि तत्स्मरणम्। ननु संस्कारगृहीतत्वात्स्मरणमिति चेन्न — जातस्यानुभवस्य नष्टत्वात्तत्रसंस्काररूपवासनाकल्पना। इह तु प्राक्क्षणएवानुभवसत्त्वाद्धिनैव वासनां पुनर्मनसा तद्ग्रहणोपपत्तिरिति। तर्हि गृहीतग्राहित्वात्पुनर्मानसं वेदनं स्मरणरूपमेव स्यादिति च न वाच्यम् — गृहीतं परमाण्वादि प्रति विशेष्यतया प्रागगृहीतस्य ज्ञानस्यापि ग्रहणात्स्मरणत्वायोगात्। नच विषयांशे तत्स्मरणत्वं स्यादिति युक्तम् — सोयमित्यत्र तद्देशकालवैशिष्ट्यरूपप्राक्तनावस्थाया इव विषयस्य विशेषणतया भानात्प्रत्यभिज्ञाया इव विशेषणांशेपि स्मरणरूपत्वासंभवात्॥ प्रत्यभिज्ञाया एव तदंशे तथात्वं कुतो नेति चेत् — स्मृतिभिन्नं ज्ञानंह्यनुभवः। अतः स्मृतित्वानुभवत्वयोर्विरोधात्तथा न भवतीति॥ अथ संस्कारजन्यत्वाविशेषे प्रत्यभिज्ञानं ग्रहणरूपम्; स घट इत्यादि तु स्मरणरूपमिति कीदृशसामग्रीवैलक्षण्यादिति चेत्— ग्रहणस्थले संस्कारातिरिक्तोऽप्यर्थेन सन्निकर्षोऽस्ति; यथा सोयं घट इत्यत्र घटे चक्षुरिन्द्रियसंयोगः, तत्तादौ च संयुक्तसम्बन्धित्वमिति; स्मरणस्थले स नास्तीति वैलक्षण्यम्। अतस्संस्कारमात्रजन्यमेव ज्ञानं स्मरणम्॥ अथागृहीतज्ञानगोचर-

त्वेऽपि कुत एतदपरोक्षाकारम् ? कारणान्तरनिरपेक्षेण संस्काराधिकसन्निकर्षवतेन्द्रियेण जनितत्वात् ॥ अथ कस्सन्निकर्षः ? ज्ञानेन संयुक्तसमवायः, तदर्थेन संयुक्तसमवेतविशेषणत्वमिति ॥ मनसो निरपेक्षस्य बहिर्व्यापारेऽन्धबधिराद्यभावप्रसङ्ग इति चेत् – ज्ञानावच्छेदकं भवि नायं दोषः । न च ज्ञानापेक्षया बहिरित्यस्ति । नापि तद्विषयापेक्षया निरपेक्षत्वं, तस्यैव ज्ञानस्यापेक्षणात् ॥

[26] अथापि ज्ञानं प्रत्यक्षमित्यत्र किं प्रमाणम् ? प्रत्यक्षमेव । यदसूत्रयत् – 'ज्ञानविकल्पानां भावाभावसंवेदनादध्यात्मम्' (न्याय० ५-१-३१) इति ॥

तया ज्ञानज्ञानस्य स्मरणत्वाभावादनुभवरूपत्वेऽपि कुतः प्रत्यक्षरूपत्वम्, अस्मदिष्टानुमितिरूपत्वेऽप्यनुभवाविरोधादिति चेत् – लिङ्गज्ञानादिनिरपेक्षेण संस्कारातिरिक्तसन्निकर्षवता मनइन्द्रियेण जनितत्वादेतत् प्रत्यक्षमिति ॥ कोऽत्र सन्निकर्ष इति चेत् – विषयविशिष्टज्ञानं हि प्रत्यक्षीक्रियते, तत्र ज्ञानांशे मनस्संयुक्तसमवायस्सन्निकर्षः, तद्विशेषणीभूतार्थेन च संयुक्तसमवेतविशेषणत्वम् ॥ ननु मनसो बहिरिन्द्रियमुखेन बाह्यार्थज्ञानजनकत्वं, नतु स्वतः । एवञ्च मनोजन्यज्ञानएव बाह्यविषयकत्वाङ्गीकारे बहिरिन्द्रियनिरपेक्षतया मनसो बहिर्व्यापार इष्टो भवति । तथाचान्धबधिराद्यभावप्रसङ्गः; बहिरिन्द्रियवैकल्येऽपि मनसैव रूपादिसंवेदनसंभवादिति चेत् — स्वातन्त्र्येण बाह्यवस्तुनो मनसा ग्रहणेह्येष दोषः । चक्षुषा चन्दनविशेषणतया सौरभस्येव मनसा ज्ञानविशेषणतया बाह्यग्रहणे तु नैष दोष इति । किञ्च मनसा ज्ञानमर्थश्चेत्युभयं गृह्यते । तत्र ज्ञानांशे मनसो निरपेक्षत्वेऽपि न तदर्थं बाहिर्व्यापारः; ज्ञानस्य संयुक्तात्मसमवायेन सन्निकृष्टत्वात् । बाह्यार्थांशे तु बहिर्व्यापारसत्त्वेपि न निरपेक्षत्वम्; बहिरिन्द्रियजन्यार्थज्ञानमुपजीव्यैवानुव्यवसायजननात् । अतो निरपेक्षस्य बहिर्व्यापारे इति पूर्वपक्षएवायुक्त इति । अतोऽतीन्द्रियार्थविषयकज्ञानस्याप्यैन्द्रियकत्वसंभवाद् दृष्टान्तस्साध्यविकल इति न ज्ञानत्वहेतुनाप्यतीन्द्रियत्वसाधनसंभवः ॥

[26] अथैवमतीन्द्रियत्वसाधकहेतूनां दुष्टत्वोपन्यासेनैन्द्रियकत्वे बाधकं नास्तीति सिद्धान्तितत्र साधकं प्रमाणं किमिति चेत् – प्रत्यक्षमेव प्रमाणं । तथाच न्यायसूत्रम् ५-१-३१. अस्यार्थः – ज्ञानप्रभेदानां प्रत्यक्षानुमित्यादीनां आत्मनि भावस्याभावस्य च संवेदनात् अस्ति मे एतत्प्रत्यक्षं, नास्ति मे तत्प्रत्यक्षमित्येवं प्रत्यक्षसत्त्वादनुपलब्धिः प्रत्यक्षवेचेति ॥

तथाच ज्ञानस्यैन्द्रियकत्वेनातीन्द्रियत्वाभावात्तदनुमानायापि ज्ञाततारूपकार्यकल्पनाऽयोगात्प्रमाणान्तराभावाच्च ज्ञाततायाः एवासिद्धौ गृहीतग्राहित्वस्य ज्ञातताविशिष्टग्राहित्वरूपत्वा-

१. प्र. 'वस्तुतस्तत्तास्मृतिजन्यमेव प्रत्यभिज्ञानम् । संस्कारद्वारापूर्वानुभवस्य करणत्वे ज्ञानकरणतया परोक्षत्वापत्तिः । तत्तास्मृतिस्तु निर्व्यापारत्वान्नकरण 'मिति ।

[27] ननु नेश्वरज्ञानं प्रमा, नित्यत्वेनाफलत्वात् । नापि प्रमाणम्, अकारकत्वात् । अत एव च न तदाश्रयः प्रमातेति — उच्यते —

मितिः सम्यक् परिच्छित्तिस्तद्वत्ता च प्रमातृता ।
तदयोगव्यवच्छेदः प्रामाण्यं गौतमे मते ॥ ५ ॥

समीचीनो ह्यनुभवः प्रमेति व्यवस्थितम् । तथाच अनित्यत्वेन विशेषणमनर्थकम्, नित्यानुभवसिद्धौ तद्व्यवच्छेदस्यानिष्टत्वात्; असिद्धौ च व्यवच्छेद्याभावात्! नचेदमनुमानम्, आश्रयासिद्धिबाधयोरन्यतराक्रान्तत्वात् । न तत् प्रमाकरणमिति त्विष्यत एव, प्रमया सम्बन्धाभावात् । तदाश्रयस्य तु प्रमातृत्वमेतदेव यत् तत्समवायः । कारकत्वे सतीति तु विशेषणं पूर्ववन्निरर्थकमनुसन्धेयम् । यद्येवम्, 'आप्तप्रामाण्याद्' (न्याय०. २-२-३७) इति सूत्रविरोधः । तेन हीश्वरस्य प्रामाण्यं प्रतिपाद्यते, न तु प्रमातृत्वमिति चेत् — न — निमित्तसमावेशेन व्यवहारसमावेशाविरोधात् । प्रमासमवायो हि प्रमातृव्यवहारनिमित्तं; प्रमया त्वयो-

---

संभवात्पूर्वोक्तरूपमेव गृहीतग्राहित्वमिति तस्येश्वरज्ञानेऽभावात्तस्य प्रामाण्यं निराक्षेपम्; निष्कृष्टं यथार्थानुभवत्वरूपप्रमाणत्वञ्च तत्र निर्विवादमिति ॥

[27] नन्वन्यथेश्वरज्ञानप्रामाण्यं निषेधामः । किमिदं प्रामाण्यं प्रमात्वं प्रमाकरणत्वं वा? नाद्यः, प्रमायाः धात्वर्थतया क्रियारूपायाः कारकनिष्पाद्यतया जन्यत्वात्; ईश्वरज्ञानस्य च नित्यत्वस्वीकारेण फलानात्मकत्वात् । नान्त्यः, अकरणत्वात् । एवञ्चेश्वरस्य प्रमातृत्वमप्यसिद्धमिति चेत् — उच्यते— मितिर्नाम यथार्थानुभव एव; प्रमातृत्वञ्च तदाश्रयत्वमेवेति यथाक्रममीश्वरज्ञाने ईश्वरे च तदक्षतम् । सूत्रे गौतमाभिमतमीश्वरगतं प्रामाण्यञ्च प्रमाऽयोगव्यवच्छेदरूपम् । अत्र प्रमालक्षणेऽनित्यत्वे सति यथार्थानुभवत्वमिति अनित्यत्वविशेषणदानं नित्यानुभवसिद्ध्यसिद्धिभ्यामनुपपन्नम्; सिद्धौ तत्प्रमात्वस्यापीष्टतया तद्व्यवच्छेदस्यानिष्टतयाऽनित्यत्वविशेषणायोगात्; नित्यज्ञानासिद्धौ च व्यावर्त्याभावेन तद्विशेषणवैयर्थ्यात् । किञ्चेश्वरज्ञानं न प्रमा फलानात्मकत्वादितीदं साध्यानुमापकं न भवति, आश्रयासिद्धत्वात्; कथमपि तत्सिद्ध्यङ्गीकारे प्रमात्वस्यापि ततएव सिद्धतया बाधात् । यत्तु तस्य प्रमाकरणत्वरूपप्रामाण्यं न भवतीति—तदिष्टम् । प्रमातृत्वमपि न कर्तृकारकत्वे सति प्रमासमवायानुयोगित्वरूपम्; ईश्वरसिद्धौ तत्प्रमातृत्वस्यापि सिद्धतया तद्व्यवच्छेदायोगात्; असिद्धौ च विशेषणदानवैयर्थ्यात् । अतः प्रमातृत्वं प्रमासमवायानुयोगित्वमात्रम् । एवं चेत्, कथं 'मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात्' इत्यादावस्येश्वरस्य प्रमातृत्वं विहाय प्रमाणत्वं न्यायदर्शने प्रतिपाद्यत इति चेत्—प्रमातृत्वस्यैव प्रमाणपदप्रवृत्तिनिमित्तस्य प्रमाऽयोगव्यवच्छेदस्य नित्यप्रमाशालिनि त-

गव्यवच्छेदेन सम्बन्धः प्रमाणव्यवहारनिमित्तम् । तदुभयञ्चेश्वरे । अत्रापि कार्ययेति विशेषणं पूर्ववदनर्थकमूहनीयम् ॥

[28] स्यादेतत्–प्रमीयतेऽनेनेति प्रमाणं, प्रमिणोतीति प्रमाता इति कारकशब्दत्वमनयोः । तथाच कथमकारकमर्थ इति चेत्— न– एतस्य व्युत्पत्तिमात्रनिमित्तत्वात् । प्रवृत्तिनिमित्तं तु यथोपदर्शितमेव; व्यवस्थापनात् । अन्यथा अस्मदादिषु न प्रमातृव्यवहारः स्यात्; सर्वत्र स्वातन्त्र्याभावात् । करणव्यवहारस्त्वन्यत्र यद्यप्यन्यनिमित्तकोऽपि, तथापीहोक्तनिमित्तविवक्षयैवेति ॥ एवन्तर्हि पञ्चमप्रमाणाभ्युपगमेऽपसिद्धान्तः । न हि तत् प्रत्यक्षमनुमानमागमो वा, अनिन्द्रियलिङ्गशब्दकरणत्वात् – न – साक्षात्कारिप्रमावत्तया प्रत्यक्षान्तर्भावात्; इन्द्रियार्थसन्निक-

---

स्मिन् समावेशात्प्रमातृव्यवहारेण सह प्रमाणव्यवहारसमावेशे न कश्चिद्विरोध इति॥ कार्यया प्रमयाऽयोगव्यवच्छेद एव प्रमाणत्वमिति चेत्— कार्ययेति विशेषणं सिद्ध्यसिद्धिभ्या मयुक्तमिति ।

[28] नन्वीश्वरस्य प्रमाणत्वं प्रमातृत्वञ्च न भवति; प्रमाणशब्दस्य प्रमीयते अनेनेति करणकारके, प्रमातृशब्दस्य च प्रमिणोतीति कर्तृकारके व्युत्पन्नत्वात् । ईश्वरप्रमाया नित्यत्वेन ईश्वरस्य तत्र कथमपि कारकत्वाभावादिति चेन्न -- गोशब्दस्य गच्छतीति गमनरूपनिमित्तमादाय व्युत्पत्तावपि अगच्छत्यपि प्रयोगात्सास्नादिमत्त्वमेव यथा प्रवृत्तिनिमित्तं, तथा प्रमातृशब्दस्यापि प्रमासमवायानुयोगित्वमेव प्रवृत्तिनिमित्तम्; अन्यथा ज्ञानादिकतिपयक्रियायाः प्रायोऽपुरुषतन्त्रत्वेन प्रमायां जीवस्यापि, स्वतन्त्रः कर्तेत्यनुशासितप्रयत्नाश्रयत्वरूपस्वातन्त्र्याभावेन कर्तृकारकत्वाभावात्प्रमातृत्वव्यवहारायोगात् ॥ अस्तु प्रमातृत्वम्; प्रमाणत्वं तु कथमिति चेत्–यद्यपि चक्षुरादौ प्रमाकरणत्वरूपं प्रवृत्तिनिमित्तमनुयायि अबाधितमिति व्युत्पत्तिनिमित्तातिरिक्तं प्रवृत्तिनिमित्तं नापेक्षितम्; अथापि ईश्वरे अयोगव्यवच्छेदरूपप्रामाण्यविवक्षया तथा प्रयोगः । नन्वेवं तर्हि प्रमाणं पञ्चविधं, तत्र चत्वारि करणरूपाणि, पञ्चमं प्रमाऽयोगव्यवच्छिन्नमिति पञ्चधा प्रमाणविभागः कर्तव्यस्स्यादिति तथाऽनुक्तत्वादनुक्तप्रामाण्यस्यापि कस्यचित्स्वीकारेऽपसिद्धान्तः । नच तदीश्वररूपं प्रमाणं क्लृप्तान्तर्भूतम्; इन्द्रियलिङ्गशब्दरूपकरणभिन्नत्वात् । उपमानभिन्नत्वं तु स्पष्टमिति चेत् – न - ईश्वरज्ञानस्यापि साक्षात्कारित्ववत्तया प्रत्यक्षत्वसिद्धौ प्रत्यक्षप्रमाणत्वस्य प्रत्यक्षाऽयोगव्यवच्छेदरूपस्येश्वरे इन्द्रियार्थसन्निकर्षे च संभवेनेश्वरस्य प्रत्यक्षप्रमाणेऽन्तर्भावात् । फलायोगव्यवच्छिन्नं कारणं करणमिति ह्याहुः । अत इन्द्रियार्थसन्निकर्षे प्रत्यक्षायोगव्यवच्छेदो निराबाधः । इदमेव च **प्रमावत्त्वं** प्रमानित्ययोगरूपं स्वाव्यवहितोत्तरकालनियतवर्तिप्रमाकत्वम् । तथाच यदसत्वेऽव्यवहितोत्तरकाले प्रमा न स्यात्, तत् प्रमाणम् । अतो नाकाशादेः प्रमाणत्वापत्तिः। इदमेव फलायोगेति फलप्-

र्षोत्पन्नत्वस्य च लौकिकमात्रविषयत्वात् ॥

[29] स्यादेतत् – तथापीश्वरज्ञानं न प्रमा, विपर्ययत्वात्। यदा खल्वेतदस्मदादिविभ्रमानालम्बते, तदैतस्य विषयमस्पृशतो न ज्ञानानवगाहनसम्भव इति तदर्थोऽप्यालम्बनमभ्युपेयम्। तथाच तदपि विपर्ययः, विपरीतार्थालम्बनत्वात्। तदनवगाहने वा अस्मदादेर्विभ्रमान् अविदुषस्तदुपशमायोपदेशानामसर्वज्ञपूर्वकत्वमिति– न–विभ्रमस्याप्रामाण्येऽपि तद्विषयस्य तत्त्वमुल्लिखतोऽभ्रान्तत्वात्। अन्यथा भ्रान्तिसमुच्छेदप्रसङ्गः; प्रमाणाभावात् ॥ तथाप्यारोपितार्थावच्छिन्नज्ञानालम्बनत्वेन कथं न भ्रान्तत्वमिति चेत् — न — यद् यत्र नास्ति तत्र तस्यावगतिरिति भ्रान्त्यर्थत्वात्। एतदालम्बनस्य चैवमुल्लिखतः सर्वत्र यथार्थत्वात्। नहि न तद्रजतं, नाऽपि तन्नासत्, नाऽपि तन्नावगतमिति ॥

देन सूच्यते। अत ईश्वरः प्रत्यक्षप्रमाणम। न्यायसूत्रे 'इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञान' मिति उत्पन्नत्वघटितप्रत्यक्षलक्षणकरणं तु जीवज्ञानमात्राभिप्रायेण ॥

[29] नन्वेवमपीश्वरज्ञानमप्रमैव, भ्रमत्वात्। भ्रमत्वञ्चास्मदीयभ्रमविषयकत्वात्। ज्ञानस्य च विषयावच्छिन्नस्यैव ज्ञेयतया ईश्वरज्ञानस्य भ्रमग्राहित्वे भ्रमविषयग्राहित्वस्याप्यावश्यकत्वात्। भ्रमाग्राहित्वे तु असर्वज्ञत्वादस्मद्भ्रमनिवृत्त्यर्थानामुपदेशानामसर्वज्ञपूर्वकत्वेनाश्रद्धेयत्वमिति चेन्न— भ्रमस्याप्रमात्वेऽपि भ्रमविषयज्ञानस्य भ्रमत्वाभावात्; तस्य तत्त्वोल्लेखित्वात्। अन्यथा भ्रमपदार्थ एव न सिद्ध्येत्। तत्त्वज्ञानेन हि वस्तुसिद्धिः। भ्रमज्ञानं च न ते तत्त्वज्ञानमिति। नन्वथापि भ्रमग्रहणे सति अविद्यमानविषयस्यापि भ्रम इव ग्रहणात् कथं न भ्रमत्वमिति चेन्न– यः प्रकारो यत्र विशेष्ये नास्ति तत्र विशेष्ये तस्य प्रकारस्य ज्ञानं हि भ्रान्तिः, यथा शुक्तौ रजतत्वस्य; एतद्भ्रमविषयकस्य च ज्ञानस्य, भ्रमो यथाऽस्ति एवमेव तत्त्वमुल्लिखतः सर्वांशेऽपि यथार्थत्वात्। शुक्तौ रजतंभ्रमवानयं जीवः इति हि ईश्वरः प्रत्येति। तत्र शुक्तेः रजतत्वाभावेपि भ्रमे शुक्त्यंशे विशेषणतया भासमानं नहि न रजतम्। नच भ्रमेऽवच्छेदकतया तन्नास्ति। नच तत् तत्रावच्छेदकत्वेनागृहीतमिति। तथाच शुक्तिविशेष्यकरजतत्वप्रकारकभ्रमज्ञानवानयमितीश्वरज्ञानेन भ्रमे शुक्तिविशेष्यकत्वं रजतत्वप्रकारकत्वं च वर्तमानमेव गृह्यत इति तद्यथार्थमेव। अतो यथार्थानुभवत्वरूपप्रमात्वमपि तत्र नास्तीति नाशङ्कनीयम्। तत्सिद्धमीश्वरज्ञानस्य प्रमाणत्वम्, ईश्वरस्य प्रमातृत्वं प्रमाणत्वञ्चेति ॥

[30] साक्षात्कारिणि नित्ययोगिनि परद्वारानपेक्षस्थितौ
भूतार्थानुभवे निविष्टनिखिलप्रस्तारिवस्तुक्रमः ॥
लेशादृष्टिनिमित्तदुष्टिविगमप्रभ्रष्टशङ्कातुषः
शङ्कोन्मेषकलङ्किभिः किमपरैस्तन्मे प्रमाणं शिवः ॥ ६ ॥

इति न्यायकुसुमाञ्जलौ चतुर्थस्तबकः ॥ ४ ॥
॥ श्रीः ॥

---

[30] यस्य खलु साक्षात्कारिताख्यविषयिताशालिनि इन्द्रियादिनिरपेक्षस्थितिके विनाशविधुरतया नित्यं सम्बद्धे यथाभूतार्थानुभवे सर्वाण्यपि अनन्तविचित्ररूपाणि क्रामिकाणि वस्तूनि यथावदसङ्करेण विषयभूतानि, स भगवान् सर्वज्ञतया यत्किंचदंशाज्ञानप्रयुक्तान्यथोपदेष्टृत्वादिदोषाविरहेण स्वोपदेशेऽप्रामाण्यशङ्कामल्पामपि प्रभ्रंशयन्नस्माकं प्रमाणमस्ति। तन्नास्तिक्येनान्यथा वा वृथाशङ्कावर्धनेन स्वयमाविलैः पापिभिश्च परैः किमिति ॥

इति सप्तशैलधामश्रीधामदयाधनस्तुरीयमिमम् ।
व्याकृत देशिकदर्शनधुरन्धरो वीरराघवस्स्तबकम् ॥

इति कुसुमाञ्जलिविस्तरे चतुर्थस्स्तबकः ॥
॥ श्रीमते हयवदनपरब्रह्मणे नमः ॥

॥ शुभमस्तु ॥

---

१. प्र०. 'यद्वा भूतार्थोऽनुभवो यस्य, तादृशि साक्षात्कारवति शिवे'। २. पाठोऽयं तार्किकरक्षाव्याख्याने मल्लिनाथीये दृष्टः। प्र. नानापदार्थानामिति व्याख्यातम्। प्रस्तारो हि विस्तारो नानात्वं वैचित्र्यम्। प्रस्तावि इति क. ख. पा०.। ३. दुष्टमिति क्वचित् पाठः, तत्र भावे क्तः इति प्र०.

श्रीः

श्रीमते श्रीनिवासपरब्रह्मणे नमः

न्यायकुसुमाञ्जलौ

पञ्चमस्स्तबकः.

नन्वीश्वरे प्रमाणोपपत्तौ सत्यां सर्वमेतदेवं स्यात्। तदेव तु न पश्याम इति चेत् – नह्येष स्थाणोरपराधः यदेनमन्धो न पश्यति । तथाहि –

कार्याऽऽयोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः ।
वाक्यात् संख्याविशेषाच्च साध्यो विश्वविद्व्ययः ॥ १ ॥

[2] क्षित्यादि कर्तृपूर्वकं कार्यत्वादिति –
न बाधोऽस्योपजीव्यत्वात् प्रतिबन्धो न दुर्बलैः ।

श्रीः

कुसुमाञ्जलिविस्तरे – पञ्चमः स्तबकः.

यं भूतभौतिकमयेऽत्र परैरसाध्यादेकैकतोऽद्भुतगुणादपि तर्कयन्ति ।
सोऽयं श्रुतश्श्रुतिषु विष्णुरशेषदृश्यश्श्रीशैलधाम्नि रमया मयि सन्निधत्ताम् ॥

नन्वदृष्टद्वारा यागादेः फलसाधनत्वं, तद्बोधकस्य वेदस्याप्ताधीनं प्रामाण्यं, तादृशाप्तसद्भावे बाधकाभावः, तदाप्तत्वोपयोगितन्निष्ठज्ञानप्रामाण्यश्चैतावता न्यरूपि । सर्वमिदं सतीश्वरसाधकप्रमाणे यथोक्तं स्यात्। न खलु बाधकाभावमात्रेण वस्तुसिद्धिः । साधकं तु न पश्यामः, क्षित्यादिसकर्तृकत्व– वेदपौरुषेयत्वादिसाधकहेतोस्सर्वस्याऽऽभासत्वादिति चेत् – 'नह्येष स्थाणोरपराधः,यदेनमन्धो न पश्यति' । नह्यन्धो न पश्यतीत्यर्थस्सन्नसन् भवति। अदृष्टस्थाणुः पुनरन्ध आटोपेन गच्छन् स्थाणुना प्रतिहन्यते। कोऽयं स्थाणुः? ईश्वरः, वृक्षाधोंशश्च, यथा यूपव्रश्चनस्थाणुः । अतः पामरैरप्रमितोऽपि परीक्षकैः कार्यत्वायोजनधृतिसंहारादिभिर्हेतुभिरनाभासैरसौ सर्वज्ञोऽकर्मवश्योऽनुमीयते। साध्यइत्यत्रान्वयेपि हेतुत्वे पञ्चम्यः कारिकायाम्॥

[2] तत्र क्षित्यादि कर्तृपूर्वकं कार्यत्वादिति प्रथमः प्रयोगः। नास्य हेतोराभासता; तथाहि — ईश्वररूपप्रतियोग्यसिद्धौ बाधायोगस्य तृतीयस्तबकएवोक्तत्वात्प्रतियोगिसिद्धये प्रकृतकार्यत्वहेतोरुपजीव्यत्वात् सिद्धस्य च बाधायोगान्नास्य हेतोर्बाधितत्वम् ; प्रत्युत बाधसाधकस्यैवोपजीवकस्य बाधितत्वं भवेत् । एवमेव प्रतिहेतूनां दुर्बलत्वान्न तैः प्रतिबद्धत्वरूपं सत्प्रति

सिद्ध्यसिद्ध्योर्विरोधो नो नासिद्धिरनिबन्धना ॥ २ ॥

[3] तथाहि – अत्र ये शरीरप्रसङ्गमुद्घाटयन्ति, कस्तेषामाशयः? किमीश्वरं पक्षयित्वा कर्तृत्वाच्छरीरित्वं; ततः (अथ) शरीरव्यावृत्तेरकर्तृत्वम्; अथ क्षित्यादिकमेव पक्षयित्वा कार्यत्वाच्छरीरिकर्तृकत्वम्; यद्वा शरीराजन्यत्वादकार्यत्वम्; तत एव वाऽकर्तृकत्वं; परव्याप्तिस्तम्भनार्थं विपरीतव्याप्त्युपदर्शनमात्रं वेति? तत्र प्रथमद्वितीययोराश्रयासिद्धिबाधापसिद्धान्तप्रतिज्ञाविरोधाः। तृतीये तु व्याप्तौ सत्यां नेदमनिष्टम्; असत्यान्तु न प्रसङ्गः। चतुर्थे बाधानैकान्तौ। पञ्चमे त्वसमर्थविशेषणत्वम्। षष्ठेऽपि नागृह्यमाणविशेषया व्याप्त्या बाधः। नचागृह्यमाणविशेषया व्याप्त्या गृह्यमाणविशेषायाः सत्प्रतिपक्षत्वम्। अस्ति च कार्यत्वव्याप्तिक्षितत्वमस्य। एवं शरिरिकर्तृकत्वादेरपि प्रमाणतः प्रकृतसाध्यवत् पक्षे सिद्धौ सहप्रतिपन्नत्वादेव न विरोधः; असिद्धौ च न विरोधप्रसक्तिः। तथा प्रकृतहेतुसाध्यविशेषस्य सर्वज्ञकर्तृकत्वादेः क्षित्यादौ सिद्धत्वे, हेतौ तादृशसाध्यसामानाधिकरण्यस्यैव सत्त्वान्न विरुद्धत्वम्; तस्यासिद्धत्वे च प्रतियोग्यप्रसिध्या साध्यासामानाधिकरण्यरूपदोषस्य दुर्वचतया न विरुद्धत्वम्। क्षित्यादेः पक्षस्य प्रसिद्धतया तस्य सावयवत्वादिना कार्यत्वस्य व्यक्ततया चाश्रयासिद्धिस्वरूपासिद्धी यथा न भवतः, तथा व्याप्यत्वासिद्धिरपि न भवति, उपाधिरूपस्य तन्निबन्धनस्याभावात्। अतो नासिद्धत्वम्। एवं व्यभिचारस्थले बाधासिध्यन्यतरस्यावश्यकत्वात्तयोश्च विघटितत्वाद्व्यभिचारनिरूपकाधिकरणस्यासिद्धत्वान्निरुपाधिकत्वाच्च न व्यभिचारित्वमपीति निर्दुष्टोऽयं हेतुरिति ॥

[3] तदिदं विविच्यते – क्षित्यादेः कर्तर्यङ्गीकृते ये शरीरकल्पनामाहुः, तेषां कस्योपन्यासे तात्पर्यम? किमीश्वरश्शरीरी कर्तृत्वादित्यनुमानस्योपन्यासे, किंवा शरीरित्वापादनस्य विपर्यये पर्यवसानावश्यकतया ईश्वरोऽकर्ता अशरीरत्वादित्यनुमानस्य, अथवाऽस्मद्रीत्या क्षित्यादि प्रसिद्धमेव पक्षीकृत्य – क्षित्यादि शरारिकर्तृकं कार्यत्वादित्यस्य, यद्वा क्षित्यादिकमकार्यं शरीराजन्यत्वादित्यस्य, अपिवा क्षित्यादिकमकर्तृकं शरीराजन्यत्वादित्यस्य, अहोस्विदनुमानोपन्यासं परित्यज्यास्मदुक्तानुमानापेक्षितव्याप्तिस्तंभनाय विपरीतव्याप्तिमात्रप्रदर्शने तात्पर्यम्? तत्र प्रथमे द्वितीये च पक्षे ईश्वरस्य पक्षत्वादाश्रयासिद्धिः; तस्य सिद्धत्वे तु धर्मिग्राहकमानेनाशरीरत्वेन कर्तृत्वेन च सिद्धतया बाधः; कथमपीश्वरस्वीकारापत्तेर्निरीश्वरवादिनोऽपसिद्धान्तः; ईश्वरपदस्यैवाशरीरकर्तृवाचकतया पक्षसाध्यवाचकपदयो व्याहतार्थकतया प्रतिज्ञाविरोधश्च। तृतीये यदि हेतोश्शरीरिकर्तृकत्वरूपविशेषेण सह व्याप्तिरस्ति, तर्हि तदपि सिध्यतु। प्रकृतहेतोस्त-

१. अयं क. २ पाठः। पा०. बाधानैकान्तिकौ। २. न चागृह्यमाणविशेषव्याप्त्या इति क. ख. पा०.। क. २ पा०. न च गृह्यमाणविशेषाया इत्येतावदेव।

स्तेः पक्षधर्मतापरिग्रहो विशेषः । कर्ताशरीरी, विपरीतो न कर्तेति चानयोस्तद्विरहः ॥

[4] ननु यद् बुद्धिमद्धेतुकं तच्छरीरहेतुकमिति नियमे यच्छरीरहेतुकं न भवति तद् बुद्धिमद्धेतुकमपि न भवतीति विपर्ययनियमोपि स्यात् ! तथाच पक्षधर्मतापि लभ्यतइति चेन्न—गगनादेस्सपक्षभागस्यापि संभवात्केवलव्यतिरेकित्वानुपपत्तेः । अन्वये तु विशेषणासामर्थ्यात् । हेतुव्यावृत्तिमात्रमेव हि तत्र कर्तृव्यावृत्तिव्याप्तं; न तु शरीररूपहेतुव्यावृत्तिरित्युक्तम् । व्याप्तश्च पक्षधर्म उपयुज्यते, न त्वन्योऽतिप्रसङ्गात् ॥

त्साधकत्वेपि प्रकृतसाध्यस्य पकर्तृकत्वस्य तद्विरुद्धत्वे किल प्रकृतसाध्यविरोधिता प्रकृतहेतौ-स्यात् । शरीरिकर्तृकत्वस्य क्षित्यादावनुपलम्भनिरस्ततया व्याप्त्यभावे तु तदनुमानासंभवान्न विरोधप्रसङ्गोपि । चतुर्थे अकार्यत्वस्य प्रत्यक्षबाधः, अतएव हेतोरनैकान्तिकत्वमिति । पञ्चमे हेतुघटकं शरीरेति विशेषणं व्यर्थमिति व्याप्यत्वासिद्धिः; विशेषणपरित्यागे च स्वरूपासिद्धिः । षष्ठेपि विपरीतव्याप्तिप्रदर्शनं ।किं विपरीतानुमित्युत्पादरूपबाधाय, किंवा प्रकृतव्याप्तिकार्यनिरोधनेनसत्प्रतिपक्षत्वमात्राय ? उभयमपि न संभवति, अस्मदनुमानव्याप्तेर्गृह्यमाणविशेषत्वात्, अन्यस्याश्चातथात्वात् । को विशेष इति चेत्, व्याप्तेस्सहकारी विशेषः पक्षधर्मत्वमेव । तदिहास्ति । विपरीतव्याप्तिप्रदर्शनस्यापि तु हेतुसाध्यनिर्देशेनैव कार्यतया तत्र पूर्वोक्तपञ्चके प्रथमद्वितीयपक्षयोरादरणे, यः कर्ता स शरीरी, यो न शरीरी स न कर्तेति व्याप्तिमतोरपि कर्तृत्वाशरीरिचेतनत्वरूपहेत्वोः प्रकृतक्षित्यादिरूपपक्षधर्मत्वं नास्तीति ॥

[4] नन्वगृह्यमाणविशेषत्वेनाऽऽद्ययोः पक्षयोरसंभवेप्यन्य एवास्तु । तत्र तृतीयचतुर्थयोरपि विरुद्धत्वबाधितत्वादिनाऽनुपपन्नत्वेपि पञ्चमः पक्षस्स्यात् — क्षित्यङ्कुरादिकमकर्तृकं, न बुद्धिमद्धेतुकं शरीरहेतुकत्वाभावादिति । तत्रच पूर्ववत् पक्षधर्मत्वविरहो नास्ति । यद्यप्यसमर्थविशेषणत्वं प्रागुक्तम्, अथापि तेन दोषेणान्वयव्याप्त्यसंभवेऽपि यद् बुद्धिमद्धेतुकं तच्छरीरहेतुकमिति व्यतिरेकव्याप्तिस्संभवत्येव । एवञ्च व्यापकाभावाद्व्याप्याभाव इति न्यायेन तत्तद्विपर्ययनियमास्सिध्यति । नचात्र बुद्धिमदिति विशेषणं व्यर्थम्, यत्सहेतुकं तच्छरीरहेतुकमित्येव सुवचत्वादिति वाच्यम् — तथासति व्यापकाभावाद्व्याप्याभाव इति क्षित्यादौ शरीरहेतुकत्वाभावेन सहेतुकत्वरूपजन्यत्वस्यैवाभावापत्तेः । अतोऽत्र विपर्ययनियमायोगाद्व्यतिरेकव्याप्तौ यद् बुद्धिमद्धेतुकमिति विशिष्टरूपमेव व्याप्यमवसीयते । अतो गृह्यमाणविशेषत्वादयं प्रकृतहेतुदूषक इति चेत्— न — असत्सपक्षस्यैव हेतोः केवलव्यतिरेकितया, प्रकृते च गगनादेस्सपक्षस्य सत्त्वेनान्वयिव्यतिरेकिताया एव वाच्यत्वात्तत्रच सहेतुकत्वभावामात्रेऽन्वयव्याप्तिसंभवेन शरीरहेतुकत्वाभावरूपहेतौ विशेषणवैयर्थ्याद्व्याप्यत्वासिद्धेः।यथाच पूर्वं व्याप्तस्यापक्षधर्मतयाऽनुपयोगित्वं, तथाऽत्र पक्षधर्मस्याव्याप्ततया तथात्वमिति ॥ एवं शरीरहेतुकत्वाभावबुद्धिमद्धेतु-

एतेन तद्व्यापकरहितत्वादिति सामान्योपसंहारस्यासिद्धत्वमुक्तं वेदितव्यम् । नहि यद्व्यावृत्तिर्यदभावेऽन्वयव्यतिरेकाभ्यामुपसंहर्तुमशक्या, तत्तस्य व्यापकं नामेति ॥

[5] विशेषविरोधस्तु विशेषासिद्धौ सहोपलम्भेन तदसिद्धौ मिथोधर्मिपरिहारा-

---

कत्वाभावयोर्व्याप्यव्यापकभावनिरसनेन क्षित्यङ्कुरादिकं बुद्धिमद्धेतुकत्वाभाववत् बुद्धिमद्धेतुकत्वव्यापकरहितत्वादित्यनुमानमपि निरस्तं वेदितव्यम् , हेतोरसिद्धत्वात् । पूर्वं हि शरीरहेतुकत्वं विशिष्य तत्त्वेन हेतौ प्रविष्टम् । अत्रतु तदेव, यद् बुद्धिमद्धेतुकं तच्छरीरहेतुकमिति पूर्वोक्तविधया व्यापकमिति व्यापकत्वरूपसामान्यधर्ममुखेन हेतुकोटौ निविष्टम । तत्रच शरीरहेतुकत्वस्य बुद्धिमद्धेतुकत्वव्यापकत्वमसिद्धमिति विशिष्टसाधनाप्रसिद्धिः। शरीरहेतुकत्वव्यावृत्तिर्हि बुद्धिमद्धेतुकत्वाभावविषये दृष्टान्तदृष्टान्वयव्यतिरेकव्याप्तिमत्तया पक्षे उपसंहर्तुं न शक्यते;विशेषणासामर्थ्येन केवलं सहेतुकत्वाभावस्यैव व्याप्यत्वात् । अतश्शरीरहेतुकत्वं न तस्य व्यापकमिति ॥

[5] ननु माभूत्सत्प्रतिपक्षः । विरोधएवावतिष्ठते । तत्र सकर्तृकत्वरूपसामान्यांशे विरोधाभावेपि, यः क्षित्यादिकर्तरि विशेषोऽभिमतोऽशरीरत्वं सर्वज्ञत्वञ्चेति, तमादाय विरोधस्सुवच इति चेत — विशेषविरोधस्तु सर्वथा नाशङ्कामप्यधिरोहति । तथाहि – कोऽसौ विशेषविरोधः ? घटपटादिकार्याणां शरीर्यसर्वज्ञकर्तृकत्वदर्शनात्कार्यत्वरूपहेतुबलात्कर्तुरसर्वज्ञत्वं शरीरित्वञ्च विशेषस्सिद्धः; क्षित्यादेस्सर्वस्य पक्षत्वात्सर्वज्ञत्वं पक्षान्तर्गताङ्कुरपाषाणान्तस्स्थभेकादिपर्यालोचनयाऽशरीरत्वञ्च पक्षधर्मताबलसिद्धो विशेषः; तयोर्विरोध इति चेत् — यद्युभयोर्विशेषयोः प्रमाणसिद्धत्वं, तर्ह्यवश्यस्वीकार्यतया साहित्यसिद्धेरविरोधः । यद्येकतरासिद्धिः, तर्ह्युभाभ्यां कर्तव्यस्यान्योन्यधर्मित्यागस्याभावेन कयोः कथं विरोधः? नचानेन वैश्यसाक्ष्यवचनेन किमुक्तं भवतीति शङ्क्यम् — अङ्कुरादेस्सर्वस्य पक्षत्वात् तत्र कार्यत्वहेतोरनभिज्ञकर्तृसाधने सामर्थ्यविरहेण पक्षधर्मताबलसिद्धविरुद्धमित्यत्रैव तात्पर्यात् । तथाच नैवं विशेषविरोध इति । तर्हि पक्षधर्मताबलसिद्धसर्वज्ञाशरीरिकर्तृकत्वरूपसाध्यविरुद्धत्वं कार्यत्वहेतोरस्तु, घटपटादावीदृशं साध्यं विनैव हेतुसत्त्वादित्ययमेव विशेषविरोध इति चेत् – यद्येष सर्वज्ञकर्तृकत्वरूपविशेषस्सिद्धः, तर्हिहेतो स्तत्सामानाधिकरण्यमेवेति क्व विरोधः ? यदि न सिद्धः, तर्हि तस्याप्रसिद्धतया तमादाय हेतौ साध्यासामानाधिकरण्यस्य वा साध्ये हेत्वसामानाधिकरण्यस्य वा दुर्वचतया मिथोधर्मिपरिहाराभावेन कथं विरोधोद्भावनमिति । ततश्च सिध्यासिध्योर्विरोधो नेति सिद्धम् । वस्तुतो विशेषविरोधं हेत्वाभासत्वेनैव न स्वीकुर्म इति नायमाशङ्कामप्यधिरोहति । अन्यथा — ‘ सर्वानुमानोच्छेदप्रसङ्गः । नहि तथाविधो हेतुरिह जगति कश्चिदवाप्यते;यस्साध्यसिद्धयेऽभिधीयमानो धर्मस्य वा धर्मिणो वा विशेषं न कञ्चन बाधते । तथाह्यनित्यश्शब्दः कृतकत्वादिति सकलतार्किकगृहप्रसिद्ध एव हेतुरनित्यतां साधयन्नपि, यद्यत् कृतकं तत्तद-

नुपलम्भेन निरस्तो नाशङ्कामप्यधिरोहतीति ॥

[6] स्यादेतत् – अस्ति तावत् कार्यस्यावान्तरविशेषः यतश्शरीरिकर्तृकत्व- मनुमीयते । तथाच तत्प्रयुक्तामेव व्याप्तिमुपजीवेत्कार्यत्वसामान्यमिति स्यात् – न स्यात्—नहि विशेषोस्तीति सामान्यमप्रयोजकम् ? तथासति सौरभकटुत्वनीलिमा- दिविशेषे[1] सति न धूमसामान्यमग्निङ्गमयेत् । किं[2]नाम साधकसामान्ये साध्यसामा- न्यमाश्रित्य प्रवर्तमाने तद्विशेषस्साध्यविशेषव्याप्तिमाश्रयेत्; नतु विशेषे सति सामान्यमकिञ्चित्करम्, तस्यापि विशेषान्तरापेक्षया[3]ऽकिञ्चित्करत्वप्रसङ्गात् ॥

[7] सौरभादिविशेषं विहायापि धूमे वह्निर्दृष्टः, न तु विशेषं विहाय कार्ये कर्तेति

श्रावणं दृष्टम्; योयः कृतकः स स व्योमविशेषगुणो न भवतीति धर्मिणो विशेषं बाधत एवे त्यहेतुस्स्यात्; नचैवं युक्तमिति न विशेषविरुद्धो नाम हेत्वाभासोऽभ्युपगन्तव्यः; किन्तु सा- ध्यस्वरूपविपर्ययसाधन एव ' (न्यायमञ्जर्यां विरुद्धहेत्वाभासप्रकरणे पु०. ६००) इति ॥

[6] ननु शरीरप्रसङ्गमुद्घाटयतामाशय एवंरूपस्स्यात् – यत् शरीरिकर्तृकत्वप्रयोजकं, तदेव सकर्तृकत्वप्रयोजकम् । नच कार्यत्वहेतोरुपाधिरिति । तथाहि – क्षित्यङ्कुराद्यपेक्षया रथगोपुरादौ कृत्रिमे वस्तुनि संस्थानविशेषादिरूपं किमपि वैलक्षण्यं लक्ष्यते । तद्दर्शनादेव च वस्तुमात्रदर्शिनापि, ' अहो हस्तलाघवमस्य कार्यस्य निर्मातु ' रिति क्वचिच्छरीरिकर्तृकत्वमनु- मीयते । नखल्वेवं क्षित्यादौ तदनुमानानुभवः । अतो यच्छरीरिकर्तृकत्वसाधकं वैलक्षण्यं तदेव सकर्तृकत्वव्याप्यम् । तद्गतव्याप्त्युपजीवनेन तु कार्यत्वहेतुः प्रयुज्यत इति हेतुरयं तादृशवै- लक्षण्योपाधिकत्वाद्व्याप्यत्वासिद्धस्स्यात् – इति चेत् – नस्यात्, **नासिद्धिरनिबन्धने**ति ॥ तद्धि वैलक्षण्यं कार्यविशेषगतत्वात्कार्यत्वव्याप्यम् । कार्यत्वं सामान्यम् । तथाच शरीरिकर्तृ- कत्वरूपविशेषे स विशेषः प्रयोजकोऽस्तीति सकर्तृकत्वरूपसामान्ये कार्यत्वसामान्यं न हि प्र- योजकं न भवति; तदप्रयोजकत्वे सुरभिधूमादिविशेषस्यागरुजन्यत्वादि विशेषप्रयोजकतया धूम- सामान्यस्याग्निसामान्यगमकत्वासिद्धिप्रसंगात्; किन्तु सामान्यभूतो हेतुस्सामान्यभूतं साध्यमा श्रित्य प्रयोजको भवति, विशेषहेतुश्च साध्यविशेषव्याप्तिमत्तया विशेषगमक इति । विशेषस्य कि- ञ्चित्करतया सामान्यस्याकिञ्चित्करत्वे च रथगोपुरादिगततादृशवैलक्षण्यस्यापि तद्व्याप्यमवान्तर- विशेषं प्रति सामान्यरूपतया साधकता न स्यादित्येवङ्क्रमेण शोधने व्यक्त्यपेक्षयैव नियम- इति लोकसिद्धकार्यकारणभावभङ्गप्रसङ्गः ॥

[7] ननु सुरभिधूमादिविशेषं विना केवलधूमसद्भावेपि वह्निदर्शनवत् तादृशवैलक्षण्यं वि- ना कार्यत्वमात्रं यत्र तत्रापि यदि कर्तृदर्शनं स्यात्, तदा तस्य वैलक्षण्यस्य सकर्तृकत्वप्रयोज-

---

१. **विशेषेण.** पा०. २. किन्त्वित्यर्थः । ३. विशेषान्तरापेक्षायां. पा०.

चेन्न–कार्यविशेषः कारणविशेषे व्यवतिष्ठते; न तु कार्यकारणसामान्ययोः प्रतिबन्धमन्यथाकुर्यादिति । किं न दृष्टं कार्यं कारणमात्रे अङ्कुरो बीजे तद्विशेषो धान्ये तद्विशेषश्शालौ तद्विशेषः कलमे इत्यादि बहुलं लोके? क्व वा दृष्टमणुद्रव्यारभ्यं द्रव्यं, नित्यरूपाद्यारब्धं रूपादि? तथापि सामान्यव्याप्तेरविरोधात्सिद्ध्यत्येव । अवश्यञ्चैतदेवमङ्गीकर्तव्यम्; अन्यथा कार्यत्वस्याकस्मिकत्वप्रसङ्गात् ॥

[8] स्यादेतत् – अन्वयव्यतिरेकि तावदिदं कार्यत्वमिति परमार्थः । तत्राकाशादेर्विपक्षात् किं कर्तृव्यावृत्तेः कार्यत्वव्यावृत्तिः आहोस्वित्कारणमात्रव्यावृत्तेरिति सन्दिह्यते – तदसत् – कर्तुरपि कारणत्वात् । कारणेषु चान्यतमव्यतिरेकस्यापि कार्यानुत्पत्तिं प्रति प्रयोजकत्वात्; अन्यथा कारणत्वव्याघातात्, करणादिविशेषव्यतिरेकसन्देहप्रसङ्गाच्च; कथं हि निश्चीयते किमाकाशात् कारणव्यावृत्त्यव

कता न स्यात् । नत्वेवं कर्तृदर्शनमिति चेत् — तस्य वैलक्षण्यस्य शरीरिकर्तृकत्वरूपविशेषप्रयोजकत्वं भवतैवोक्तमिति सामान्यप्रयोजकत्वायोगात् कार्यत्वस्य कारणसामान्येन स्थितां व्याप्तिं न तदन्यथाकुर्यात् । अतस्तस्य वैलक्षण्यस्य सकर्तृकत्वव्यापकत्वाभावान्नोपाधित्वम् । दृश्यते हि सामान्यतो द्रव्यरूपे कारणे सति कार्यं भवति; बीजरूपविशेषे सति अङ्कुररूपविशेष इत्येवं विशेषस्य विशेषेण सामान्यस्य च सामान्येन व्याप्तिः । यच्चशरीरिकर्तृजन्यं कार्यं न दृष्टमित्युच्यते, तर्ह्यणुद्रव्यारभ्यं कार्यद्रव्यं क्व दृष्टम्? नित्यरूपाद्यसमवायिकारणकञ्च रूपादि क्व दृष्टम्? तथाच विशेषस्यैव सकर्तृकत्वप्रयोजकत्वमङ्गीकारेण कार्यत्वहेतौ व्याप्त्यनङ्गीकारे महदारभ्यत्वप्रयोजकस्यैव द्रव्यारभ्यत्वप्रयोजकत्वं, अनित्यरूपाद्यारभ्यत्वप्रयोजकस्यैव रूपाद्यारभ्यत्वप्रयोजकत्वमिति त्रसरेण्वादेर्द्रव्याद्यारभ्यत्वहेतोरपि व्याप्यत्वासिद्धिस्स्यात् । नच त्रसरेण्वधिकपरमाणवसिद्धिः; साधयिष्यमाणत्वात् । अतस्सामान्यव्याप्त्या सर्वत्र सामान्यं सिध्यत्येव । अन्यथा कार्यत्वं किञ्चिदप्रयोज्यं स्यादिति कर्त्राद्यभावेपि कार्यत्वाश्रयस्स्यादित्यापत्तिर्न सुखेन वार्येति ॥

[8] स्यादेतत् – कार्यत्वहेतुस्सन्दिग्धव्यतिरेकित्वादहेतुः । इदंह्यन्वयव्यतिरेकि[illegible]स्तुस्थितिः । तत्रच यस्य कर्ता नास्ति तत्र कार्यत्वं नास्ति, यथाऽऽकाशादाविति वक्तव्यम् । तत्र यस्य कारणं नास्तीति सामान्यतः कारणाभाव एव व्याप्यो भवितुमर्हतीति किमिति कर्त्रभावो व्याप्यो वक्तव्यः । अतो व्यतिरेकव्याप्तिसन्देहः – इति चेत् — तदसत् – कर्तुरपि कारणत्वात्तदभावस्यापि व्याप्यत्वात् । यत्किञ्चित्कारणाभावस्यापि हि कार्याभावे प्रयोजकत्वमिष्टम् । अन्यथा स्वेतरयावत्सत्त्वेऽपि यदभावात्कार्याभावस्त त् कारणमित्युन्नीयमानं कारणत्वमेव व्याहतं भवति । अपिच विशेषाभावस्य व्याप्यत्वमेष्टव्यम्; अन्यथा सामान्यतः कारणाभावात्कार्याभाव इत्युक्तावपि करणोपादानासमवायिनिमित्तरूपेषु कारणेषु कस्याभावादिति सन्देहा-

कार्यत्वव्यावृत्तिः उत करणव्यावृत्त्या; एवं किमुपादानव्यावृत्त्या किमसमवायिव्यावृत्त्या, किं निमित्तव्यावृत्त्येति? कार्यत्वात् करणमुपादानमसमवायि निमित्तं वा बुद्ध्यादिषु न सिद्ध्येत्॥ कर्तुः कारणत्वे सिद्धे सर्वमेतदुचितम्; तदेव त्वसिद्धमिति चेत् – किं पटादौ कुविन्दादिरकारणमेव कर्ता? प्रस्तुते वोदासीन एव साधयितुमुपक्रान्तः? तस्मात् यत्किञ्चिदेतदपीति ॥

[9] ननु कर्ता कारणानामधिष्ठाता साक्षाद्वा शरीरवत्, साध्यपरंपरया वा दण्डादिवत्? तत्र न पूर्वः, परमाण्वादीनां शरीरत्वप्रसङ्गात्। न द्वितीयः, द्वाराभावात्। न हि कस्यचित्साक्षादधिष्ठेयस्याभावे परंपरयाऽधिष्ठानं सम्भवति। तदयं प्रमाणार्थः – परमाण्वादयः न साक्षाच्चेतनाधिष्ठेयाः शरीरेतरत्वात्, यत्पुनः साक्षादधिष्ठेयं, न तदेवं, यथास्मच्छरीरमिति; नापि परम्परयाऽधिष्ठेयाः, स्वव्यापारे शरीरानपेक्षत्वात् स्वचेष्टायामस्मच्छरीरवत्, व्यतिरेकेण वा दण्डादि उदाहरणम्। एवञ्च (एवं) क्षित्यादि न चेतनाधिष्ठितहेतुकं शरीरेतरहेतुकत्वादित्यतिपीडया सत्प्रतिपक्षत्वम्॥ अपिच पटादौ कुविन्दादेः किं कारकाधिष्ठानार्थमपेक्षा, तेषामचेतनानां स्वतोऽप्रवृत्तेः? आहो कारकत्वेन? न पूर्वः,

---

परिहारात्। एवंच विशेषाभावस्यापि व्याप्यत्वात् 'आकाशादौ कारणसामान्याभावादेव कार्यत्वव्यावृत्तिः, नतु विशेषाभावा' दिति दुर्वचम्। एवं सन्दिग्धव्यतिरेकित्वाभावादेव बुध्दीच्छादिकं सकरणकं कार्यत्वादित्याद्यनुमानैः करणमिन्द्रियं, उपादानमात्मा, असमवायिकारणं संयोगः, निमित्तं मनश्चानुमीयते। अन्यथा कर्तुरिव तेषामपि विशेषरूपत्वान्नानुमानसंभवः॥ ननु कर्तुः कारणत्वसिद्धौ हि करणादिवद्विशेषरूपत्वमिति चेन्न – कुविन्दादेः पटादौ कारणत्वेनैव कर्तृत्वात्। प्रकृतेच क्षित्यादौ कर्तुरुदासीनत्वेन कारणत्वविवक्षां विना नानुमानम्, किन्तु कारणतया। सकर्तृकमित्यस्य हि कर्तृजन्यमित्येवार्थ इति॥

[9] ननु पुनस्सत्प्रतिपक्षत्वमेव कार्यत्वहेतोर्ब्रूमः। तथाहि – परमाण्वादयो न चेतनाधिष्ठिताः, साक्षात्तदनधिष्ठितत्वे सति परम्परयापि तदनधिष्ठितत्वात्। नच हेत्वसिद्धिः; ते न साक्षाच्चेतनाधिष्ठिताः शरीरेतरत्वात्, अत्रास्मच्छरीरं व्यतिरेकदृष्टान्तः; एवं परम्परयाऽनधिष्ठिताः शरीरव्यापारापेक्षव्यापारशून्यत्वात्– अत्राप्यस्मच्छरीरं चेष्टमानमन्वयदृष्टान्तः, दण्डादिश्च व्यतिरेकदृष्टान्तः। एवं हेत्वंशयोस्सिद्धिः। एवमपि क्षित्यादेरेव पूर्वं पक्षत्वात् तन्निष्ठः प्रतिहेतुः क इति चेत्– क्षित्यादिकं चेतनानधिष्ठितकारणकं शरीरेतरकारणकत्वादित्येष इति; घटादिर्व्यतिरेकदृष्टान्तः॥ अपिच कार्यत्वस्य सद्धेतुत्वेप्यभिमतसर्वज्ञेश्वरसिद्धिर्न भवति। तथाहि – तन्त्वादीनामचेतनतया चेतनाधिष्ठानमन्तरा पटादिजननव्यापारो न भवतीति तदर्थं कुविन्दादिरपेक्ष्यते, उत-

तेषां परमेश्वरेणैवाधिष्ठानात् । न ह्यस्य ज्ञानमिच्छा प्रयत्नो वा वेमादीन् व्याप्नोतीति सम्भवति । न चाधिष्ठितानामधिष्ठात्रन्तरापेक्षा तदर्थमेव, तथासत्यनवस्थानादेवाविशेषात् । न द्वितीयः, अधिष्ठातृत्वस्यानङ्गत्वप्रसङ्गे दृष्टान्तस्य साध्यविकलत्वापत्तेः । न च हेतुत्वेनैव तस्यापेक्षाऽस्तिवति वाच्यम् – एवंतर्हि यत् कार्यं तत्सहेतुकमिति व्याप्तिः, न तु सकर्तृकमिति । तथाच तथै (तथै) व प्रयोगे सिद्धसाधनात् ।। किञ्चानित्यप्रयत्नपूर्वकत्वप्रयुक्तां व्याप्तिमुपजीवन् कार्यत्वं न बुद्धिमत्पूर्वकत्वेन स्वभावप्रतिबद्धम् । न ह्यनित्यप्रयत्नोऽपि बुद्ध्या शरीरवन् कारणत्वेनापेक्ष्यते, येन तन्निवृत्तावप्यकार्या (र्य) बुद्धिर्न निवर्तत इति ।।

[10] तदेतत् प्रागेव निरस्तप्रायं नोत्तरान्तरमपेक्षते । तथाहि – साक्षादधिष्ठातरि साध्ये परमाण्वादीनां शरीरत्वप्रसङ्ग इति किमिदं शरीरत्वं, यत् प्रसज्यते?

हेतुत्वमात्रेण ? नाद्यः, त्वन्मते सर्वस्येश्वराधिष्ठितत्वेन ततएव व्यापारसम्भवात् । एकाधिष्ठितेष्वधिष्ठात्रन्तरापेक्षास्वीकारे तु एकपटोत्पत्तावप्युपर्युपरि कुविन्दापेक्षयाऽनवस्था स्यात् । अतो जीवाधिष्ठानवैयर्थ्याय तत्रेश्वराधिष्ठानस्यास्वीकार्यतया न सर्वज्ञसर्वाधिष्ठात्रभिमतेश्वरसिद्धिः । तदर्थमीश्वरस्यैव सर्वाधिष्ठातृत्वात्कुविन्दादेर्हेतुत्वमात्रेणापेक्षेति द्वितीयपक्षाश्रयणे क्षित्यादिकं चेतनाधिष्ठितहेतुकमित्यत्र साध्यविकलो दृष्टान्तः, कुविन्दादिचेतनाधिष्ठितत्वस्याभावात् ; अन्याधिष्ठितत्वस्यचासंप्रतिपन्नत्वात् । नच हेतुत्वेनैवापेक्षेति हेतुमत्त्वमेव साध्यम् , नाधिष्ठितत्वघटितमिति वाच्यम् – एवन्तर्हि सकर्तृकमित्यस्य सहेतुकमित्येवंरूपतया क्षित्यादेः परमाण्वादिहेतुकत्वस्यानपायात्सिद्धसाधनात् । नच चेतनहेतुकत्वमेव सहेतुकत्वमिति वाच्यम् – एवमपि जीवभोगसाधनतयोत्पद्यमानस्य क्षित्यादेर्यागाद्यनुष्ठातृभोक्तृचेतनहेतुकत्वेनैव सिद्धसाधनात् । सर्वथा नेश्वरसिद्धिरिति ।। किंच इदं कार्यत्वं न बुद्धिमत्पूर्वकत्वरूपसाध्यनिरूपितस्वाभाविकव्याप्तिमत् ; किन्तु अनित्यप्रयत्नपूर्वकत्वरूपोपाधिनिष्ठैव व्याप्तिरत्रावभासते । नच शरीरपूर्वकत्वं यथा नोपाधिस्तद्वदिदमपीति वाच्यम् – शरीरं हि बुद्धिं प्रति कारणमिति शरीरपूर्वकत्वनिवृत्तौ कार्यबुद्धिरेव निवर्ततेति कार्यबुद्धिं प्रत्येव शरीरस्य व्यापकतया सामान्यतो बुद्धिमत्पूर्वकत्वव्यापकत्वस्य शरीरपूर्वकत्वेऽभावान्न तदुपाधिरिति युक्तम् । नह्यनित्यप्रयत्नोपि शरीरमिव बुद्धेः कारणम् , येनानित्यप्रयत्ननिवृत्तौ कार्यबुद्धिमात्रनिवृत्तिस्स्यात् । अतोऽविशेषात्सामान्यतो बुद्धिनिवृत्तिर्भवितुमर्हतीति बुद्धिमत्पूर्वकत्वव्यापकमेवानित्यप्रयत्नपूर्वकत्वमिति तस्योपाधित्वमेवेति चेत्-

[10] सर्वमिदं सत्प्रतिपक्षाद्युद्भावनं दुर्बलत्वादिना निरस्तप्रायम् । तथाहि – परमाण्वादेस्साक्षाच्चेतनाधिष्ठितत्वे तच्छरीरत्वापत्तिरिति यत् शरीरत्वमापाद्यते, तत्स्वरूपं किन्नाम ? 'चेष्टेन्द्रियार्थाश्रयश्शरीर' मिति सूत्रम् । तत्र साक्षात्प्रयत्नवदधिष्ठेयत्वरूपं चेष्टाश्रयत्वमेव शरीरत्व-

यदि साक्षात्प्रयत्नवदधिष्ठेयत्वम्, तदिष्यत एव । न च ततोऽन्यत् प्रसञ्जकमपि ॥ अथेन्द्रियाश्रयत्वम्? तन्न, तदवच्छिन्नज्ञानजननद्वारेणेन्द्रियाणामुपयोगात् । अनवच्छिन्ने प्रयत्ने नायं विधिः, नित्यत्वात् ॥ अत एव नार्थाश्रयत्वम् । न हि नित्यज्ञानं भोगरूपमभोगरूपं वा, यत्नमपेक्षते; तस्य कारणविशेषत्वात् । न च नित्यसर्वज्ञस्य भोगसम्भावनाऽपि, विशेषादर्शनाभावे मिथ्याज्ञानानवकाशे दोषानुत्पत्तौ धर्माधर्मयोरसत्त्वात् ॥ तस्मात्, साक्षात्प्रयत्नानधिष्ठेयत्वात् स्वव्यापारे तदनपेक्षत्वाच्चेति द्वयं साध्याविशिष्टम् । अनिन्द्रियाश्रयत्वादभोगायतनत्वात् स्वव्या-

---

मापाद्यमानमिति चेत् – इष्टापत्तिः । किंचिद्दशशरीरत्वापादकमपि साक्षाच्चेतनाधिष्ठितत्वरूपप्रकृतसाध्यमेवेति कथमापादकस्यैवास्यापाद्यत्वमनिष्टत्वञ्च । अथ द्वितीयमिन्द्रियाश्रयत्वमेव शरीरत्वमापाद्यमिति चेन्न – इन्द्रियं हि स्वाश्रयावच्छेदेन ज्ञानमुत्पाद्य तदवच्छेदेन प्रयत्नं जनयतीत्यवच्छिन्नप्रयत्नविषये इन्द्रियापेक्षायामपि नित्यत्वादसंकोचेन सर्वविषयकस्य प्रकृतप्रयत्नस्यावच्छिन्नत्वाभावात् सामान्यतः प्रयत्नाधिष्ठितत्वं प्रति इन्द्रियाश्रयत्वस्य व्यापकत्वाभावान्नापाद्यत्वम् । अतएव नियमाभावात् आपाद्यं नार्थाश्रयत्वरूपमपि । अर्थः प्रयोजनं पुरुषक्रियाफलभूतसुखदुःखसाक्षात्कारात्मको भोगः, तदाश्रयत्वं तदवच्छेदकत्वम् । तत्रचेश्वरीयं ज्ञानं, तस्य नित्यसुखाभिव्यक्त्यंगीकारे भोगरूपं, न चेत् – अभोगरूपमित्यन्यदेतत् । सर्वथा तस्य नित्यत्वान्न यत्नापेक्षत्वम् । यत्नस्य हि भोगं प्रति कारणविशेषत्वात्कार्यभूतभोगापेक्ष्यत्वमेव भवति । ईश्वरज्ञानस्य तु नित्यत्वात्सर्वं प्रति तस्य कारणविशेषत्वाच्च यत्नकार्यत्वाभावान्न यत्नेन परमाण्वादौ भोगावच्छेदकत्वापादनं संभवति । भोगरूपकार्यगुणान्तरसंभावना तु नित्यसर्वज्ञतयाऽज्ञानगंधरहितेऽस्मिन्न भवि । स हि भोगो धर्माधर्माभ्यां जन्यते; तौ च रागद्वेषमोहात्मकै र्दोषैः; ते च भ्रमेण; स च वस्तुगतविशेषधर्माग्रहणेन । नच नित्यसर्वज्ञे किञ्चिदग्रह इति ॥

एवञ्च शरीरत्वस्य त्रिधा निर्वचनात्साक्षाच्चेतनानधिष्ठितत्वरूपं परम्परया चेतनानधिष्ठितत्वरूपञ्च यत् साध्यम् तदुभयसाधकहेतुद्वयमपि निरुक्तशरीरत्वघटिततया प्रत्येकं त्रिधा भि[illegible] । तत्र प्रथमनिर्वचनादरणे परमाण्वादयस्साक्षाच्चेतनानधिष्ठिताः साक्षात्प्रयत्नानधिष्ठितत्वात्, एवं ते (साक्षाच्चेतनाधिष्ठितवस्तुगतव्यापारापेक्षव्यापारवत्त्वरूप) परम्पराधिष्ठानरहिताः साक्षात्प्रयत्नाधिष्ठितवस्तुव्यापारापेक्षव्यापाररहितत्वादिति प्रयोगद्वयरीतिः । अत्र हेतुद्वयमपि साध्याविशिष्टत्वात् साध्यसमहेत्वाभासः । द्वितीयतृतीयनिर्वचनादरणे – ते न साक्षाच्चेतनाधिष्ठिताः इन्द्रियाश्रयेतरत्वात्, भोगायतनेतरत्वात्; एवं न परम्परया चेतनाधिष्ठिताः तदपेक्षव्यापारशून्यत्वादिति प्रयोगत्रयम् । अत्र तृतीयस्य सामान्यतस्तदिति निर्देशात् एकत्वे-

---

१. प्र. 'यदवच्छिन्नात्मन्यर्था भोगं जनयन्ति, तस्यार्थाश्रयत्वं.' इति ।

पारे तदनपेक्षत्वाच्चेति त्रयमप्यन्यथासिद्धम्। अभोगायतनत्वादनिन्द्रियाश्रयोऽपि, भोक्तृकर्मानुपग्रहादभोगायतनमपि, स्पर्शवद्वेगवद्द्रव्यान्तरानुद्यत्वात्तदनपेक्षमपि स्यात्; अचेतनत्वाच्चेतनाधिष्ठितमपि स्यादिति को विरोधः? तथाच साक्षात्प्रयत्नाधिष्ठितेतरजन्यत्वादिति साध्यसमः। इन्द्रियाश्रयेतरजन्यत्वात् भोगायतनेतरजन्यत्वादिति द्वयमप्यन्यथासिद्धम्। कार्यज्ञानाद्यनपेक्षत्वाच्छरीरेतरजन्यमपि स्यात्; अचेतनहेतुकत्वाच्चेतनाधिष्ठितहेतुकमपीति को विरोधः? अप्रसिद्धविशेषणश्च पक्षः। नहि चेतनानधिष्ठितहेतुकत्वं क्वचित् प्रमाणसिद्धम्। न च चेतनाधिष्ठितहेतुकत्वनिषेधः साध्यः, हेतोरसाधारण्यप्रसङ्गात्। गगनादेरपि सपक्षाद्व्यावृत्तेः॥

न गणनेऽपि वस्तुतस्तत्र तच्छब्दार्थशोधने इन्द्रियाश्रयगतव्यापारापेक्षव्यापारशून्यत्वात् भोगायतनगतव्यापारापेक्षव्यापारशून्यत्वादिति प्रयोगद्वयमेव। एवं हेतुचतुष्टयमप्यन्यथासिद्धत्वात् व्याप्यत्वासिद्धम। परमाण्वादिकमीश्वरे भोगहेतुत्वाभावादनिन्द्रियाश्रयोपि स्यात्, अचेतनत्वात्साक्षात्प्रयत्नाधिष्ठितत्वरूपसाध्यवच्च स्यात्। एवमीश्वरेण स्वकर्मणोपगृहीतत्वाभावादभोगायतनमपि, अथाप्यचेतनत्वात्साक्षाच्चेतनाधिष्ठितमपि स्यात्। एवं द्वितीयसाध्यस्थलेपि शरीरापेक्षव्यापारविधुरमपि परमाण्वादिकं स्पर्शवद्वेगवद्वाय्वादि— शरीरव्यतिरिक्तद्रव्यनोदितत्वाच्छरीरात्मकद्वारानपेक्षमेव स्यात्, एवमप्यचेतनत्वादुक्तरीत्या परंपरया चेतनाधिष्ठितमपि स्यात्। अतश्चाचेतनाः परमाण्वादयः स्वयमेव क्रियावन्तस्सृष्टौ भवन्ति, कदाचिद्वायुनोदनादिवशादित्युभयथापीश्वराधिष्ठितत्वमिष्यते। एवं क्षित्यादिपक्षकानुमानेपि प्रथमनिर्वचनानुसारेण साक्षात्प्रयत्नाधिष्ठितेतरजन्यत्वरूपहेतुश्चेतनानधिष्ठितहेतुकत्वरू॰साध्यसमः। इन्द्रियाश्रयेतरजन्यत्वाद्भोगायतनेतरजन्यत्वादिति हेतुद्वयमन्यथासिद्धम्। नित्यज्ञानेच्छाकृतिसाध्यत्वेन कार्यभूतज्ञानाद्यनपेक्षतयेन्द्रियाश्रयाद्यन्यजन्यत्वेप्यचेतनहेतुकतया चेतनाधिष्ठितजन्यं भवितुमर्हतीति॥ एवमस्मिन् क्षित्यादिपक्षकानुमाने साध्यरूपपक्षविशेषणाप्रसिद्धिरपि। चेतनाधिष्ठितहेतुकत्वाभावस्य साध्यत्वे विपक्षाद्घटादेरिव सपक्षाद्गगनादितोऽपि शरीरेतरजन्यत्वरूपहेतोर्व्यावृत्तत्वेनासाधारणहेत्वाभासत्वापत्त्या चेतनानधिष्ठितहेतुकत्वस्य साधनीयत्वात्तस्य च घटादौ कुत्रापि प्रसि[illegible]दिति। (नच शरीरेतरजन्यत्वं शरीरेतरमात्रजन्यत्वम्। तच्च शरीरजन्यत्वाभावरूपमेव हेतुरिति नासाधारण्यमिति वाच्यम्—शरीररूपविशेषणवैयर्थ्यात्, साध्यसमत्वाद्युक्तदोषानिस्ताराच्च)

---

१. द्रव्यानुद्यत्वादिति सर्वत्र पाठः। तस्य परमाण्वादौ बाधादौचित्यादिविमर्शेन चैवं शोधितम्। एवं प्रकाशेपि द्रव्यान्तरप्रेर्यमाणत्वादिति शोधनीयम्। यथाश्रुतादरणे तादृशद्रव्यसामान्यानुद्यत्वाच्छरीरमपि नापेक्षत इति रीत्यार्थः यदुचितं तद् ग्राह्यम्। परंपराधिष्ठानस्योपपाद्यतयानुद्यत्वमेव वाच्यम्। २. इन्द्रियाश्रयभोगायतनेत्यर्थः। ३. चेतनाधिष्ठितमपीति सर्वत्र पाठः।

[11] यत्पुनरुक्तं कुविन्दादेः पटादौ कथमपेक्षेति, तत्र कारकतयेति कस्सन्देहः? किन्तु कारकत्वमेव तस्य ज्ञानाचिकीर्षाप्रयत्नवतः, न स्वरूपतः । तदेवचाधिष्ठातृत्वम् । यत्त्वधिष्ठिते किमधिष्ठानेनेति – तत्किं कुविन्द उद्धार्यते, ईश्वरो वा, अनवस्था वाऽऽपाद्यते? न प्रथमः, अन्वयव्यतिरेकसिद्धत्वात् । न द्वितीयः, परमाणवदृष्टाधिष्ठातृत्वसिद्धौ ज्ञानादीनां सर्वविषयत्वे त्वमाद्यधिष्ठानस्यापि न्यायप्राप्तत्वात्! न तु तदधिष्ठानार्थमेवेश्वरसिद्धिः । न तृतीयः, तस्मिन् प्रमाणाभावात् ॥ तथाप्येकाधिष्ठितमपरः किमर्थमधितिष्ठतीति प्रश्ने किमुत्तरमिति चेत् – हेतुप्रश्नोऽयं, प्रयोजनप्रश्नो वा? नाद्यः, ईश्वराधिष्ठानस्य नित्यत्वात् । कुविन्दाद्यधिष्ठानस्य स्वहेत्वधीनत्वात् । न द्वितीयः, कार्यनिष्पादनेन भोगसिद्धेः स्पष्टत्वात् । एकाधिष्ठानेनैव कार्यं स्यादिति चेत् – स्यादेव । तथापिन सम्भेदेऽन्यतरवैयर्थ्यम् । परिमाणं प्रति सङ्ख्यापरिमाणप्रचयवत् प्रत्येकं सामर्थ्योपलब्धौ सम्भूयकारित्वोपपत्तेः । अस्ति तत्र वैजात्यमिति चेत् – इहापि किञ्चि-

---

[11] यत्तु अभिमतेश्वरासिद्धिरिति दूषणम्, तत्रोच्यते । अत्र कुविन्दादेः कारकत्वेन वाऽधिष्ठातृत्वेन वाऽपेक्षेति विकल्प एव न युक्तः, कर्तुः कार्योपादानगोचरज्ञानचिकीर्षाप्रयत्नवत्स्वरूपस्वातन्त्र्यं विना स्वरूपेण कारकत्वाभावात्; तस्य स्वातन्त्र्यस्यैव चाधिष्ठातृत्वरूपत्वात् ॥ यत्तु एकेनाधिष्ठितेऽन्याधिष्ठानं किमर्थमिति – तत्रोच्यते! अत्र कुविन्दसत्त्वे पटसत्त्वं, अन्यथा नेत्यन्वयव्यतिरेकसिद्धत्वात्कुविन्दस्य न स निषेध्यः । ईश्वरश्च नैतदर्थं सिद्धः, किंतु क्षित्यादिहेतुपरमाण्वाद्यधिष्ठातृत्वायानुमितो नित्यासंकुचितज्ञानेच्छाकृतिमत्त्वात्कुविन्दाधिष्ठितेऽप्यवर्जनीयाधिष्ठातृभावस्सिद्ध इति न सोपि शक्यानिषेधः । यत्तु एकाधिष्ठितेऽप्यधिष्ठात्रन्तरस्वीकारेऽनवस्थेति–तदपि न–एकमात्रसाध्यतया निश्चिते कार्ये एकस्मिन् सत्येव विशिष्य तदर्थमेव कर्त्रन्तरस्वीकारे ह्यनवस्थेति । अथाप्यधिष्ठानद्वयं किमर्थमिति चेत्–किमर्थमित्यस्य कोऽर्थः? किं क्रियाविशेषणतया कस्य फलभूतमिदमधिष्ठानमिति, यद्वा कस्मै फलायेति? तत्रेश्वराधिष्ठानं नित्यतया कारणानपेक्षम् । कुविन्दाधिष्ठानं तु फलेच्छादिकारणायत्तमिति आद्यस्योत्तरम् । अन्त्येपि कर्तृक्षेत्रादिभोगसिद्धिः फलमित्युत्तरम् । ननु क्षित्यादिकमिवैकमात्राधिष्ठानेन पटादिकार्यं स्यादिति चेत् — सत्यम् । अथापि जीवस्यापि मेलने न कस्यचिदन्यथासिद्धिः । यथा द्व्यणुकगतायास्त्रित्वसंख्यायास्त्र्यणुके, कपालद्वयगतमहत्त्वस्य घटे च महत्त्वं प्रति जनकत्वे क्लृप्ते, शिथिलसंयोगशालिबहुतूलपिण्डारब्धेऽवयविन्यन्वयव्यतिरेकासिद्धकारणताकेन प्रचयसंयोगेन सह संभूय तयोर्महत्त्वजनकत्वं, तद्वदत्रावश्यकेन जीवेन सहेश्वरस्येति । यदि तत्राप्रचितावयवारब्धगतपरिमाणापेक्षया वैजात्यमस्ति, पटादावपि क्षित्याद्यपेक्षया वैजात्यं शरीरिकर्तृककार्य-

द्भविष्यतीति । न चाकुर्वतः कुलालादेः कायसंक्षोभादिसाध्यो भोगस्सिद्ध्येदिति तदर्थमस्य कर्तृत्वमीश्वरोऽनुमन्यते, तदर्थमात्रत्वादैश्वर्यस्येति ॥

[12] यत्त्वनित्यप्रयत्नेत्यादि – भवेदप्येवं, यद्यनित्यप्रयत्ननिवृत्तावेव बुद्धिरपि निवर्तेत; न त्वेतदस्ति; उदासीनस्य प्रयत्नाभावेऽपि बुद्धिसद्भावात् ॥ हेतुभूता बुद्धिर्निवर्तते इति चेन्न – उदासीनबुद्धेरपि संस्कारं प्रति हेतुत्वात् ॥ कारकविषया बुद्धिर्निवर्तते इति चेन्न – उदासीनस्यापि कारकबोद्धृत्वात् । न हि घटादिकमकुर्वन्तश्चक्रादिकं नेक्षामहे ॥ हेतुभूता कारकबुद्धिर्निवर्तते इति चेन्न – (²चक्रादिबुद्धेरपि संस्कारं प्रति हेतुत्वात् । कारकफलहेतुभूता कारकबुद्धिर्निवर्तेत इति चेन्न–) अयतमानस्यापि दुःखहेतुभूताया अपि तद्धेतुकण्टकस्पर्शबुद्धेर्भावात्³ । चिकीर्षाहेतुभूतोऽनुभवो निवर्तेत इति चेन्न – केनचिन्निमित्तेनाऽकुर्वतोऽपि चिकीर्षातद्धेतुबुद्धिसम्भवात् । अनपेक्षकृतिहेतुचिकीर्षाकारणं बुद्धिर्निवर्तते इति चेत् – न तर्हि बुद्धिमात्रम् । तथाचानित्यप्रयत्नहेतुकत्वप्रयुक्तं विशिष्टप्रयत्नचिकी-

---

स्थले प्रागभवदुक्तमस्तु । किञ्च किमिति कुलालं विना कार्यासम्भव इति न शंक्यम् – ईश्वरस्यैश्वर्यं हि नान्यकर्तृत्वनिवारकं, तस्यान्यस्मिन् कर्तृत्वमुखेन भोक्तृत्वसम्पादकत्वात् । नहि कुलालादेरकर्तृत्वे कायसंक्षोभघटविक्रयादिजन्यभोगप्रतिनियमप्रसक्तिरस्तीति । अतस्सामान्यविशेषकारणयोरनन्यथासिद्धत्वादभिमतसर्वाधिष्ठातृपुरुषसिद्धिरविकला ॥

[12] एवमनित्यप्रयत्नोपाधित्वं तदा भवेत्, यद्यनित्यप्रयत्ननिवृत्त्या बुद्धिनिवृत्तिस्स्यात् । बुद्धिं प्रति हि नानित्यप्रयत्नो व्यापकः; **उदासीनस्य** कर्तुमनिच्छतो यत्नाभावेऽपि बुद्धिसत्त्वात् । नापि हेतुत्वविशिष्टबुद्धिं प्रति स व्यापकः, तस्या एवोदासीनगतबुद्धेस्संस्कारहेतुत्वाद्धेतुत्वविशिष्टसत्त्वात् । कारकविषयकत्वविशिष्टबुद्धिं प्रतीत्युक्तावप्येवम्, घटादिविषयकयत्नाभावेऽपि तत्कारकचक्रादिगोचरबुद्धिसत्त्वात् । एवं हेतुत्वविशिष्टां कारकबुद्धिं प्रतीत्युक्तावपि तस्या एव चक्रादिबुद्धेस्संस्कारहेतुत्वात्कारकविषयकत्वाच्च तादवस्थ्यम् । कारकजन्यफलहेतुभूतां कारकविषयबुद्धिमित्युक्तौ कण्टकस्पर्शरूपकारकजन्यदुःखहेतुभूता कण्टकस्पर्शबुद्धिरन्... विनाप्यस्तीति व्यापकत्वभंगः । चिकीर्षाहेतुं बुद्धिमित्युक्तौ परनिर्बन्धेनाप्रयतमानेपि तादृशबुद्धिरस्तीति । अव्यवहितोत्तरक्षणे कृतिजननी या चिकीर्षा तद्धेतुं बुद्धिं प्रतीत्युच्यत इति चेत्– तर्हि विशिष्टेदृशबुद्धिरेव व्याप्येति सामान्यतो बुद्धेर्व्याप्यत्वाभावादनित्यप्रयत्नपूर्वकत्वनिवृत्तौ न

---

१. प्र. **उदासीनस्येति** कारणान्यव्यापारयत इत्यर्थः । **उदासीनबुद्धेरिति** कर्मधारयः। **दुःखहेत्विति** दुःखहेतुश्चासौ कण्टकस्पर्शश्चेति विग्रहः तस्य बुद्धेरित्यर्थ इति । २. कुण्डलितो ग्रन्थ औचित्यादूहितः । वास्तवः पाठस्तु तं बिना । ३. **बुद्धेरभावादिति** सर्वत्र पाठः ।

र्याहेतुबुद्धिमत्पूर्वकत्वमिति तन्निवृत्तौ तदेव निवर्तताम्, न तु बुद्धिमत्पूर्वकत्वमात्रम्। तत्र तस्याप्रयोजकत्वादिति बुद्धिमत्पूर्वकत्व (मिति) साध्यपक्षे परीहारः। सकर्तृकमिति प्रयत्नप्रधानपक्षे शङ्कैव नास्ति; तस्यैव तत्रानुपाधित्वात् ॥

[13] एतेन – शरीरसम्बन्धे बुद्धिगतकार्यत्ववद् बुद्धिसम्बन्धे प्रयत्नगतकार्यत्वमुपाधिरिति – निरस्तम्। यो हि बुद्ध्या शरीरवच्छरीरनिवृत्त्या बुद्धिनिवृत्तिवद्वा प्रयत्नेन बुद्धिं बुद्धिनिवृत्त्या प्रयत्ननिवृत्तिं (वा?) साधयेत्, स एवं कदाचिदुपालभ्यः। वयं त्वत्रगतहेतुभावं कलितशक्तिसकल[1]कारकप्रयोक्तारं कार्यादेवानुमिमाना नैवमास्कन्दनीयाः। तत्र[2] तस्यानुपाधित्वात् ॥

सामान्यतोबुद्धिमत्पूर्वकत्वं निवर्तेतेति न बुद्धिमत्पूर्वकत्वमात्रसाध्यकहेतोस्तदुपाधिकत्वम्। बुद्धिमत्पूर्वकत्वं विहाय सकर्तृकमिति कृतेस्साध्यत्वे तु नास्योपाधित्वप्रसक्तिरपि, तस्यैव तत्रानुपाधित्वात्। नचानित्यत्वविशिष्टप्रयत्न उपाधिः, शुद्धस्तु साध्य इति भेद इति वाच्यम्। विशेषस्य सामान्यं प्रति व्यापकताया अप्रामाणिकत्वात् ॥

[13] एवं तस्यैव तत्रोपाधित्वं न सम्भवतीति वर्णनेन बुध्यनुमाने कार्यप्रयत्न उपाधिरिति दृष्टान्तोक्तिपूर्वकं कथनमपि निरस्तम्। इत्थं हि तत्कथनम्—यथा क्षित्यादिकं शरीरपूर्वकं बुद्धिपूर्वकत्वात्, ईश्वरो वा शरीरवान् बुद्धिमत्त्वादित्यनुमाने प्रतिपक्षिकृते कार्यबुद्धिपूर्वकत्वं कार्यबुद्धिमत्त्वं वोपाधिरिति सिद्धान्तिनोच्यते, तथा प्रयत्नेन बुध्यनुमानेपि कार्यप्रयत्नमादाय सोपाधिकत्वं हेतोस्सुवचमिति। अयंच नास्माकमुपालम्भः। योहि बुद्धिसत्त्वे शरीरसत्त्वं, तदभावे तदभाव इतिवत् यत्नसत्त्वे बुद्धिसत्त्वं तदभावे तदभाव इति वदन् यत्नेन बुद्धिमनुमिनुयात्, स एवं कदाचिदुपालभ्यः। वयंत्वधिष्ठात्रपरपर्यायं सकलकारकशक्तिपरिकलनात्मकज्ञानविशिष्टं तादृशशक्तिमत्कारकप्रयोक्तारमन्वयव्यतिरेकाभ्यां ज्ञानादिविशिष्टतयैव हेतुत्वेनावगतं साक्षात् कार्यत्वहेतुनैवानुमिमीमहे। एवञ्च कारकव्यापारगोचरज्ञानविशिष्टप्रयत्नपूर्वकत्वानुमानेऽस्मिन्न कार्ययत्नपूर्वकत्वमुपाधिः, तस्यैव तत्रानुपाधित्वात्। नन्वत्रानुमाने व्यतिरेकव्याप्तौ ज्ञानविशिष्टप्रयत्नाभावात्कार्यत्वाभाव इति वक्तव्यम्। तत्र प्रत्येकं ज्ञानाभावस्य प्रयत्नाभावस्य चैव व्याप्यत्वसंभवे विशिष्टाभावस्य तत्कथनमयुक्तम्। अतो न विशिष्टस्य साध्यत्वमिति चेन्न — प्रत्येकमनेकाभावस्य विनिगमनाविरहेण व्याप्तिप्रयोजकत्वकल्पनापेक्षया लाघवादेकस्य विशिष्टाभावस्य तत्कल्पनौचित्यात्। प्रत्येकमभावस्य व्याप्यत्वस्वीकारेण बुद्धिमत्पूर्वकत्वस्य पृथक् कार्यत्वं प्रति साध्यत्वपक्षेपि अनित्यप्रयत्ननिवृत्त्या सामान्यतो बुद्धिनिवृत्त्यसंभवस्य प्रागुपपादितत्वेन तत्र तस्यानुपाधित्वान्नोपालंभस्यावकाशः ॥

१. कलितसकलशक्तिकारकेति पाठः। २. प्र. तत्रेति ज्ञानाद्येकैकजन्यत्वे इत्यर्थः। तस्य प्रयत्नगतकार्यत्वस्येत्यर्थः।

[14] नच प्रयत्न आत्मलाभार्थमेव मतिमपेक्षते, विषयलाभार्थमप्यपेक्षणात् । ततः प्रयत्नाद्बुद्धिः तन्निवृत्तेश्च प्रयत्ननिवृत्तिः सिद्ध्यत्येति विस्तृतमन्यत्र । कार्यबुद्धिनिवृत्त्या तु कार्य एव प्रयत्नो निवर्तते, न नित्यः । नित्ये च प्रयत्ने नित्यैव बुद्धिः प्रवर्तते, नानित्या । न हि तया तस्य विषयलाभसंभवः । शरीरादेः प्राक् तदसम्भवे

---

[14] किंच बुद्ध्या शरीरानुमानतुल्यन्न भवति प्रयत्नेन बुध्यनुमानम् । बुध्या हि तज्जनकत्वेन शरीरानुमानम् । प्रयत्नेन बुध्यनुमानमपि तथैवेति न नियमः; प्रयत्नेनात्मलाभापरपर्यायोत्पत्तिं प्रतीव विषयलाभं प्रत्यपि बुद्धेरपेक्षणात् । बुद्धिविषयविषयकत्वं हि प्रयत्नस्य लोकसिद्धम् । ततः प्रयत्नसत्त्वे बुद्धिसत्त्वम्, तदभावे निर्विषयत्वात्प्रयत्न एव नेति सिद्धं व्याप्यत्वम् । नच प्रयत्नस्य स्वतएव विषयप्रवणत्वमिति वाच्यम्—तथा सति तस्य ज्ञानत्वप्रसंगात् 'स्वरूपतो विषयप्रवणत्वेनैव ज्ञानस्येतरवैलक्षण्या' दित्यात्मतत्त्वविवेके उक्तत्वात् । ननु प्रयत्नेन विशिष्य कार्यबुद्धिरेव क्षित्यादावनुमीयतामिति चेन्न — कार्यबुध्यभावस्य प्रयत्नाभावव्याप्यत्वायोगात् । कार्यबुध्या यस्य विषयलाभः तन्निवृत्त्या तस्यैव हि निवृत्तिस्स्यात् । नच नित्यप्रयत्नस्य कार्यबुध्या विषयलाभसंभवः, बुद्धिकारणशरीराद्युत्पत्तेः प्राग्बुद्ध्यनुत्पत्त्या प्रयत्नस्य विषयलाभासंभवात्तादृशप्रयत्नाभावेन क्षित्यादेरिव देहस्याप्यनुत्पत्तिस्स्यादिति बुद्धेस्सर्वदैवानुत्पत्तिप्रसंगात् । अतो नित्यप्रयत्नस्य नित्यैव विषयलाभ इति सामान्यतोबुद्धिः प्रयत्नेनानुमातुं शक्यते । अतः कदाचि जनकतया बुध्यनुमाने उपालभ्यत्वेपि विषयलाभार्थं तदनुमाने नोपालभ्यत्वमिति । (ननु यत्नं प्रति जनकतया वाऽनुमीयतां, विषयलाभार्थं वा, सर्वथा उदासीनस्यापि बुद्धिसद्भावादनित्यप्रयत्ने बुद्धिव्यापकत्वासंभवस्य प्रागुक्ततया बुद्धिसाधनेऽनित्यप्रयत्नः कदापि नोपाधिः । एवं बुध्या शरीरसाधने कार्यबुद्धिरपि नोपाधिः, सुषुप्त्यादौ बुद्धिं विनापि शरीरस्थित्या बुद्धेस्साध्यव्यापकत्वाभावात् । अतश्शरीरजन्यत्वानुमानं निर्दुष्टम् । यदि तु शरीरं प्रति बुद्धेर्व्यापकत्वाभावेपि शरीरजन्यत्वं यत्र तत्र कार्यबुद्धिजन्यत्वमि[illegible]तोपाधेर्व्यापकत्वमभग्नमित्युच्यते, तदा क्षित्यादौ बुद्धिजन्यत्वानुमानेऽनित्यप्रयत्नजन्यत्वमप्युपाधिर्भवितुमर्हति, बुद्धिसत्त्वेपि प्रयत्नासत्त्वसंभवेपि बुद्धिजन्यत्वसत्त्वे तादृशप्रयत्नजन्यत्वस्य सार्वत्रिकत्वात् । यदि बुद्धिजन्यमपीच्छायत्नादिकं यत्नाजन्यमित्युच्यते, तदा शरीरजन्यं बुध्यादिकमपि बुध्यजन्यमस्ति । शरीरजन्यद्रव्यं बुद्धिजन्यमेवेति चेत् बुद्धिजन्यद्रव्यमप्यनित्ययत्नजन्यमेवेति कार्यत्वमपि सोपाधिकमेवेति चेत् — उच्यते ।) शरीराजन्यत्वस्यानित्यप्रयत्नाजन्यत्वम् । शरीररूपविशेषणस्येवानित्यत्वविशेषणस्याप्यसमर्थतया साध्यानिवृत्तेर्विशिष्टोपाधिनिवृत्तिप्रयुक्तत्वाभावात् । तर्हि शरीरजन्यत्वानुमानेपि तुल्ययुक्त्या कार्यबुद्धिजन्यत्वं नोपाधिस्स्य

देहानुत्पत्तौ सर्वदाऽनुत्पत्तेः॥ शरीराजन्यत्ववचानित्यप्रयत्नाजन्यत्वमिति संक्षेपः॥

[15] तर्काभासतयाऽन्येषां तर्काशुद्धिरदूषणम् ।
अनुकूलस्तु तर्कोऽत्र कार्यलोपो विभूषणम् ॥ ३ ॥

कारकव्यापारविगमे हि कार्यानुत्पत्तिप्रसङ्गः, चेतनाचेतनव्यापारयोर्हेतुफलभावावधारणात्, कारणान्तराभावइव कर्त्रभावे कार्यानुत्पत्तिप्रसङ्गः, कर्तुरपिकारणत्वात्॥

[16] यस्त्वाह— प्रत्यक्षानुपलम्भाभ्यां तदुत्पत्तिनिश्चयो दृश्ययोरेव, न त्वदृश्ययोः। प्रत्यक्षस्यानुपलम्भस्य च तावन्मात्रविधिनिषेधसमर्थत्वात् धूमाग्निवत्, कम्पमारुतवच्च। नहि धूमः कार्योऽनलस्येति उदर्यस्यापि, न हि शाखाकम्पो मातरि-

---

दिति चेत्— मा भूत्, क्षित्यादौ शरीरजन्यत्वस्य बाधितत्वेनैव हेतोर्दुष्टत्वादिति ॥

[15] एवंच यदि क्षित्यादौ सकर्तृकत्वं न स्यात्तर्हि कार्यत्वं न स्यादिति तर्कस्य या प्रतितर्कप्रतिघातरूपा तर्काशुद्धिः, यदि सकर्तृकं स्यात् शरीरजन्यं स्यात्, यदि बुद्धिमत्पूर्वकं स्यात् अनित्यप्रयत्नजन्यं स्यात्, यदि नित्यकृतिजन्यं स्यात् बुद्धीच्छाजन्यं न स्यादिति प्रतितर्कप्रयोगेणोद्भाव्यते, सा न दूषणम्, एषां बाधितत्वव्याप्यत्वसिध्द्यादिनाऽऽभासत्वात्। (ननु न शरीराजन्यत्वेन कर्त्रजन्यत्वानुमाने शरीरांशवैयर्थ्यम्, अखण्डाभावघटकत्वात्। जन्यत्वसामान्यप्रतियोगिकाभावाद्धि शरीरजन्यत्वाभावोऽन्योऽखण्ड इति चेन्न — एवमपि जन्यत्वाभावगतव्याप्तेरेव शरीरजन्यत्वाभावे आरोप इति सुवचतया सोपाधिकत्वात्।) अतोऽत्र कार्यत्वानुमाने, कर्त्रभावे कार्यं न स्यादित्यनुकूलतर्करूपं भूषणं समस्ति; कारकव्यापाराभावे कार्याभावस्य संप्रतिपन्नत्वात्, अचेतनरूपकारकव्यापारस्य चेतनरूपकारकव्यापारस्यचाविशेषेण कार्येण सह कार्यकारणभावावधारणात्कर्तुरपि कारणत्वसिद्धावचेतनरूपकारणान्तराभाव इव कर्त्रभावेपि कार्यानुत्पत्तिस्स्यादेवेति ॥

[16] बौद्धस्त्वाह—प्रत्यक्षेणानुपलब्ध्या च भवन् कार्यकारणभावनिश्चयो दृश्यकार्यकारणविषय एव भवितुमर्हति। प्रत्यक्षं हि तत्सत्त्वे तत्सत्त्वमिति दृश्यमात्र एव सत्त्वविधाने समर्थम्, अनुपलब्धिरपि तदभावे तदभाव इति दृश्यप्रतियोगिकाभावमात्रे। अतो धूमाग्न्योरिव कम्पमारुतयोरिव च दृश्ययोरेव तन्निश्चयः। अन्यथा दृश्यादृश्यसाधारण्येन कारणत्वे उदर्याग्नेरपि धूमकारणत्वापत्तिः, अनुद्भूतस्पर्शवतः, वेगशून्यतया स्तिमिताख्यस्य वायोरपि शाखादिकंपकारणत्वा-

---

१.अयं.क.२. पाठः। प्र. 'शरीरोत्पत्तिरेव न स्यादिति कदापि सा बुद्धिर्न जायेते' ति। **देहानुपपत्तौ सर्वानुपपत्ते**रिति क. ख. पा.। २. प्र. कारकान्तरव्यापारं प्रति चेतनव्यापारस्य हेतुत्वात्कर्त्रभावे सोपि न स्यादित्यर्थः। कारणान्तरव्यापारसत्त्वेपि कर्त्रभावे कार्यं न स्यादित्याह **कारणे**ति ।

पवन इति स्तिमितस्यापि स्यात् । किन्तु भौमस्पृश्ययोरेव । तथेहापि शरीरवत एव कारणत्वमत्रगन्तुमुचितं, नान्यस्येति – तदसत् – प्रत्यक्षानुपलम्भौ हि दृश्यविषयावुपायस्तदुत्पत्तिनिश्चये; न तु दृश्यतैव तत्रोपेया; किन्नाम दृश्याश्रितं सामान्यद्वयम् । तदालीढस्य हि तदुत्पत्तिनिश्चये दृश्यमदृश्यं वा सर्वमेव तज्जातीयं तदुत्पत्तिमत्तया निश्चितं भवति, यथा स्पर्शरूपरसगन्धानामुत्तरोत्तरनिमित्ततायां तव; अस्माकञ्चातीन्द्रियसमवायादिसिद्धौ । नचेदेवम्, उदाहृतयोरेव दहनपवनयोः,आलोकरूपवतोस्तदुत्पत्तिनिश्चये, कथमनालोकनिरस्तरूपयोः सिद्धिः? यत् उदर्यस्तिमितसाधारणी सिद्धिस्स्यादिति–तद्भवेदप्येवं, यदि शरीरादिकं विना कार्यमिव, भौमं

प्रतिश्च । अतो भौमाग्निमात्रे स्पृश्यवायुमात्रे धूमकंपदर्शनात्कार्यकारणभावे दृश्यत्वं प्रयोजकम् । इयान् विशेषः – अग्निस्साक्षादेव दृश्यो धूमजनकः मारुतस्त्वतीन्द्रियत्वपक्षेपि स्पर्शरूपविशेषणद्वारा दृश्यस्सन् कंपजनकः । एवं प्रकृतेपि शरीररूपदृश्याकारविशिष्टचेतनस्यैव घटादिस्थले कारणत्वदर्शनात्क्षित्यादावपि शरीरिण एव कारणत्वं युक्तमिति – तदसत् – सत्यं दृश्यविषयकं प्रत्यक्षमनुपलम्भञ्चादायैव कार्यकारणभावावधारणम् ; तथापि कार्यतायां कारणतायाञ्च दृश्यत्वमवच्छेदकतया नोपेयम्, किंतु दृश्यकार्यनिष्ठं दृश्यकारणनिष्ठञ्च सामान्यमेव तत्तदवच्छेदकम् । तदवच्छिन्नस्य कारणत्वग्रहे च दृश्यमिवादृश्यमपि तदवच्छिन्नं कारणं भवत्येव; यथा स्पर्शरूपरसगन्धा एव भूतानि, न धर्मिस्वरूपमन्यत्; ते च क्षणिका इति वदतस्ते मते स्पर्शादिसन्तानेष्वदृश्यपरमाण्वात्मकस्पर्शादीनां दृश्यपुञ्जात्मकस्पर्शादिकं प्रति कारणतायां स्पर्शत्वादिसामान्यमेवावच्छेदकम् — यथाचास्मन्मते विशिष्टप्रत्यक्षस्य विशेष्यविशेषणसंबन्धाधीनत्वात् अयं घट इत्यादिविशिष्टबुद्धिनिर्वाहकतयाऽतीन्द्रियसमवायस्य, एवं स्पर्शशब्दाद्याश्रयतया वाय्वाकाशादेश्चातीन्द्रियस्य सिद्धौ दृश्यादृश्यसाधारणसम्बन्धत्वद्रव्यत्वादिकं प्रयोजकम् – तथा योग्यशरीरानवच्छिन्ननिष्ठमपि चेतनत्वमवच्छेदकमिति । अन्यथा दृश्यतायास्तन्त्रत्वे आलोकवत एवाग्ने धूमं प्रति, रूपवत एवच कण्ठादेश्शाखाकंपं प्रति हेतुत्वनिश्चयादनालोकनीरूपयोर्भौमस्पृश्यत्वेनोदाहृतयोर्भर्जनकपालदहनपवनयोः कथं धूमकंपदर्शनमात्रेण सिद्धिस्स्यात् । यत्पुनरुक्तं अशरीरचेतनस्यापि कार्ये कर्तृत्वस्वीकारेऽदृश्यादुदर्याग्नितः स्तिमितवायुतश्च धूमकंपो-

---

२. उदाहृतयोः उक्तयोः । आलोकरूपवतोस्तदुत्पत्तिनिश्चये कथमनालोकनिरस्तरूपयोरुदाहृतयोर्दहनपवनयोस्सिद्धिरिति योजना । म. 'धूमोत्पत्तिनिश्चय इति पाठे धूमपदेनैव पाक उपलक्षित' इति । प्र. 'पाकंप्रत्यालोकात्मकस्यैव वह्नेः कंपं प्रति रूपवतएव दण्डादेः कारणत्वनिश्चयादनालोकजाठर्यदहनस्य निरस्तरूपस्य पवनस्य च कथं सिद्धिस्स्यादित्याह नचेदेवमिति' इति । आलोकरूपवतोरिति सप्तमी । सतोरिति शेषः । १. किन्त्वित्यर्थः ।

स्पर्शवद्वेगवदङ्गञ्च विना अग्निमात्रात् पवनमात्राद्वा धूमकम्पौ स्याताम् । न त्वेवम् । नचैवं चेतनव्यभिचारोऽपि शक्याभिधान इत्यलं बालप्रलापानां समाधानैः ॥

[17] तदुत्पत्तेरसिद्धावपि तत्तदुपाधिविधूननेन स्वाभाविकत्वस्थितौ — यदि कर्तारमतिपत्य कार्यं स्यात् , स्वभावमेवातिपतेदिति कार्यविलोपप्रसङ्ग इति । एतच्च सर्वमात्मतत्त्वविवेके निपुणतरमुपपादितमिति नेह प्रतन्यते । एवञ्च सिद्धे प्रतिबन्धे न प्रतिबन्द्यादेः क्षुद्रोपद्रवस्यावकाशः । प्रतिबन्धसिद्धाविष्टापादनात् , तदसि-

---

द्धस्त्यापत्तिरिति–तत्तदा स्यात् , यदि शरीराभावेप्यङ्कुरादिकार्यवत् भौमाग्न्यभावेपि धूमः, स्पर्शवद्वेगवद्द्रव्याभावेपि कंपश्चोपलभ्येत । अतो यावदुपलम्भं कार्यानतिप्रसक्तं भौमत्वादि कारणतावच्छेदकमिष्यते । अत्रतु कायानुपलम्भेपि कार्योपलंभात् कार्यसामान्यकारणतावच्छेदकं चेतनत्वमेव । नच शरीरवत् चेतनोऽप्युपलब्ध्यर्हः, येन तस्मिन्नप्यसत्येवात्र कार्यमिति शक्यं वक्तुमिति ॥

[17] एवं तावत् कार्यसामान्यस्य कर्तुश्च कार्यकारणभावरूपतदुत्पत्तिमादाय कार्यत्वहेतावनुकूलतर्कः स्थित उक्तः । एतदस्वीकारेपि हेतोरस्य कथमपि सोपाधित्वस्य दुर्वचत्वाद्धेतौ प्रकृतसाध्यसंबन्धः स्वाभाविकएव सिद्ध इत्येवमप्यनुकूलतर्कस्सुवचः । तथाहि – हेतोरुपाधिर्हि संभाव्यमानस्तद्विरोधी वा स्यात् , व्यापको वा, सहवृत्तिर्वा, न्यूनवृत्तिर्वा । नाद्यः, विरोधिन उपाधित्वे अकार्यस्यैव सकर्तृकत्वापत्तेः । अतएव न द्वितीयः, कार्यस्येवाकार्यस्यापि सकर्तृकत्वापत्तेः । न तृतीयः, सहवृत्तित्वाविशेषे ‘स एव साध्यप्रयोजकः नतु कार्यत्वहेतु’रित्यत्र विनिगमकाभावात् । नापि चतुर्थः, तथासति स उपाधिः शरीरिकर्तृकत्वन्यूनवृत्तिर्वा, अधिकवृत्तिर्वा, सहवृत्तिर्वा । नाद्यः, तथासति शरीरकार्यस्यापि कस्यचित्सकर्तृकत्वाभावप्रसंगात् । न्यूनवृत्तेरेव कस्यचित्सकर्तृकत्वप्रयोजकत्वात् । न द्वितीयः, शरीरं विनापि क्वचित्कार्ये सकर्तृकत्वस्य भवदनिष्टस्यापत्तेः । न तृतीयः, शरीरस्योपाधित्वासंभवेन तत्सहवृत्तेरपि तत्तुल्यतयाऽनुपाधि[illegible]त् । कथं शरीरं नोपाधिरिति चेत् — सकर्तृकत्वे शरीरस्य प्रयोजकत्वं – किं कर्तृकार्यस्य सर्वस्य शरीरजन्यत्वात्स्यात् , किंवा कर्तुरायतनतया, यद्वा कार्योपकरणप्रापकतया? नाद्यः, क्षित्यादौ शरीराजन्यत्वस्य प्रत्यक्षसिद्धत्वात् , नित्यकृतेश्शरीरकार्यत्वाभावेन तदपेक्षाऽभावाच्च । न द्वितीयः, ईश्वरस्य भोक्तृत्वाभावेन भोगायतनानपेक्षणात् । न तृतीयः, साक्षादेव परमाण्वादेः कर्त्रधिष्ठितत्वेन शरीरस्यानावश्यकत्वादिति ॥ अतः कथमप्युपाध्यसंभवादनुकूलतर्कसिद्धिरिति विवेचितमात्मतत्त्वविवेके । एवंच प्रकृते व्याप्तौ सिद्धायां न प्रतिबन्द्यादेः क्षुद्रोपद्रवस्यावकाशः । स खल्वेवम् अशरीरिकर्तृसिद्धौ पशुत्वादिहेतुना शशादौ शृंगसिध्यापत्तिः, तत्र दृश्यानित्यशृंगायोगेपि नित्यादृश्यशृंगसंभवादिति प्रतिबन्दिः । एवमीश्वरस्य स्वार्थं सृष्टावनीश्वरत्वप्रसंगः; परार्थं चेत् , अदुःखमयसर्गप्रसंगः । अन्यथा निष्करुणत्वापत्तिरिति ।

द्धौ तत एव तत्सिद्धेः अप्रसङ्गादिति।। ननु तस्य सर्वदा सर्वत्राविशेषे कार्यस्य सर्वदोत्पत्तिप्रसङ्ग इति निरपेक्षेश्वरपक्षे दोषः, सापेक्षे उपेक्षणीय एवास्त्विति बालस्य प्रदीपकलिकाक्रीडयैव नगरदाहः -- तन्न — स्थेमभाजो जगत एवाकारणत्वप्रसङ्गात् । ओमिति ब्रुवतस्सौगतस्य दत्तमुत्तरं प्राक् ।।

[18] 'आर्षं धर्मोपदेशञ्च वेदशास्त्राविरोधिना ।
यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः ।। (मनु. १२. १०६)

तमिममर्थमागमस्संवदति, विसंवदति तु परेषां विचारम् –
'विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात् ।
सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन् देव एकः' ।।

तत्रोत्तरं – पशुत्वस्य शृंगेन व्याप्तिरस्ति चेत् , शशस्यापि शृंगसद्भावे इष्टापत्तिरेव । वस्तुतो व्याप्तिरेव न. संस्थानविशेषव्यङ्ग्यायाश्शृंगत्वजाते र्नित्यादृश्यवृत्तित्वायोगात् । एवं कारुणिककर्तृकपरार्थसृष्टेरदुःखमयसर्गव्याप्यत्वमपि न; पुत्रशिष्यरुग्णविषये जनकाध्यापकचिकित्सककार्येषु व्यभिचारात् । अतो व्याप्त्यसिद्धौ तादृशसाध्यसिद्धिप्रसंगो नास्तीति ।। नन्वीश्वरोऽदृष्टादिनिरपेक्षः कारणं; सापेक्षो वा । आद्ये अविशिष्टत्वात्सर्वत्र सर्वदा सर्वकार्योत्पत्तिप्रसंगः । अन्त्ये अदृष्टादिनैव कार्यसिद्धेर्व्यर्थं तत्साधनमिति । अतो बालप्रलाप इति दूषयता बालक्रीडैवेयं नगरं धक्ष्यतीति मन्यतां, अल्पाक्षेपेणैवाशेषेश्वरसाधननिषेधादिति चेन्न – एकैकस्यापि कार्यस्य नानासहकारिकलापकार्यतया दण्डादेर्निरपेक्षकारणत्वे सर्वदा घटोत्पत्त्यापत्तिः, सापेक्षत्वे तस्य कारणत्वं व्यर्थमित्येवं सर्वकारणविषयेपि विकल्पसंभवेन स्थिरत्वशालिनि प्रपञ्चे सर्वस्यापि कारणत्वाभावप्रसंगात् । स्थिरं हि वस्तु सहकारिनिरपेक्षं सत् कार्यं कर्तुं न प्रभवति । अस्तु तर्हि कुर्वद्रूपक्षणिकैककारणत्वादिसौगतपक्ष इति चेत्– तत्रोत्तरं प्रथमस्तबके दत्तं, **ननु क्षणोपि तदनपेक्षस्तथा भवितुमर्हतीति, न वैजात्यं विना तस्यादिति** च । तत्सिद्धं क्षित्यादिकं सकर्तृकं कार्यत्वादिति हेतो र्न कयापि विधया दुष्टत्वमिति ।।

[18] किंच साङ्ख्यमीमांसकादिभिर्निरीश्वरवादिभिर्वैदिकम्मन्यैरिदं श्रोतव्यम् – वेदाविरोधितर्करूपयैव मीमांसया यो वेदवैदिकग्रन्थान्विचारयति, स एव वेदार्थं यथावद्वेद, नत्वमीमांसकः अन्यथामीमांसकश्चेति मनुराह आर्षमित्यादिना । ततश्च सेश्वरत्वानुमानमागमसंवादसद्भावात्प्रबलम् ; तद्दूषणेन निरीश्वरत्वकल्पनञ्च विरोधाद्दुर्बलम् । श्रूयते हि विश्वतश्चक्षुरित्यादिना विश्वद्रष्टा विश्वार्थोपदेष्टा विश्वतस्सहकारिसंपन्नो विश्वव्यापी एकोऽतएवानादिर्देवः परमाणुभिः प्रपञ्चमूर्ध्वसप्तलोकाधस्सप्तलोकमयं सञ्जनयन् प्राणिनो धर्माधर्माभ्यां संयोजयतीति ।

---

१. प्र 'दत्तमिति । कार्यस्याहेतुकत्वे कादाचित्कत्वानुपपत्तिरित्यादिनेत्यर्थः' इति ।

अत्र प्रथमेन सर्वज्ञत्वं, चक्षुषा दृष्टेरुपलक्षणात् । द्वितीयेन सर्ववक्तृत्वं, मुखेन वागुपलक्षणात् । तृतीयेन सर्वसहकारित्वं, बाहुना सहकारित्वो (मत्त्वो?) पलक्षणात् । चतुर्थेन व्यापकत्वं, पदा व्याप्तेरुपलक्षणात् । पञ्चमेन धर्माधर्मलक्षणप्रधानकारणत्वं; तौ हि लोकयात्रावहनाद् बाहू । षष्ठेन परमाणुरूपप्रधानाधिष्ठेयत्वं ; ते हि गतिशीलत्वात्पतत्रव्यपदेशाः, पतन्तीति । संधमति सञ्जनयन्निति च व्यवहितोपसर्गसम्बन्धः; तेन संयोजयति समुत्पादयन्नित्यर्थः । द्यावा इत्यूर्ध्वसप्तलोकोपलक्षणं भूमीत्यधस्तात् , एक इत्यनादितेति । स्मृतिरपि – ‘ अहं सर्वस्य प्रभवो मत्तस्सर्वं प्रवर्तते ’ (गीता १०, ८) इत्यादिः । एतेन ब्रह्मादिप्रतिपादका आगमा बोद्धव्याः ॥

[19] आयोजनात् खल्वपि –

स्वातन्त्र्ये जडताहानिर्नादृष्टं दृष्टघातकम् ॥
हेत्वभावे फलाभावो विशेषस्तु विशेषवान् ॥ ४ ॥

परमाण्वादयो हि चेतनाऽऽयोजिताः प्रवर्तन्ते अचेतनत्वात् वास्यादिवत् । अन्यथा

अत्र समित्युपसर्गद्वयं धमति जनयन्निति क्रियाद्वयव्यवहितमपि व्यवहिताश्चेत्यनुशासनानुरोधेन तत्रैव संबध्यते । चक्षुरादिपदानां ज्ञानादौ लाक्षणिकत्वान्न ततश्शरीरित्वप्रसंगः; अन्यथा चक्षुःस्थले मुखाद्यभावेन विश्वत इति विरोधात् ; अचक्षुश्श्रोत्रमित्यादिश्रुत्यन्तराच्च, स्वतस्सर्वज्ञस्य चक्षुरादिवैयर्थ्याच्च । यथा श्रुतिस्तथा स्मृतिरपि सर्ववस्तूत्पत्तिप्रवृत्तिहेतुमेकं दर्शयति । अतश्च सार्वज्ञ्यादिसंपन्नैकेश्वरकर्तृकत्वमस्माभिर्लाघवपुरस्सरानुमानसाध्यमानं श्रुतिस्मृत्यनुकूलमिति तद्विरुद्ध – पृथिव्यादिनित्यत्व – निरीश्वरत्व – नानेश्वरत्वादिपक्षाः वैदिकगोष्ठीबहिःष्ठा एवेति । एवं एष एक एव स्वपरतन्त्रचतुर्मुखादिमुखेन सर्वविधाः प्रजास्सृजतीति सृष्टिपराणामागमानामस्मदनुकूलत्वं परप्रतिकूलत्वञ्च बोद्धव्यम् ॥

[49] उक्तं कार्यत्वाद्विश्वविदव्ययस्साध्य इति । एवमायोजनादपि द्वितीयहेतोस्साध्यः । आयोजनं प्रेरणम् । तदन्यथानुपपत्त्या तदाश्रयस्सिध्यति । प्रेरणञ्च – परमाण्वादयश्चेतनायोजिताः प्रवर्तन्तेऽचेतनत्वाद्वास्यादिवदित्यनुमानसिद्धम् । चेतनायोजिताः चेतनप्रेरिताः प्रयत्नवदात्मसंयुक्ता इति यावत् । प्रयत्नवदात्मसंयोगजन्यव्यापारवत्त्वं प्रयत्नवदात्मसंयोगानधीनव्यापारशून्यत्वपर्यवसितं साध्यम् । तथापर्यवसानविधानाच्च न व्योमादौ क्रियाशून्ये व्यभिचारः । यदि प्रवृत्तिमत्त्वे सत्यचेतनत्वादिति हेतुरिष्यते, तर्हि पर्यवसानं माभूत् । नचाप्रयोजकत्वम् ; यदि प्रेरणानधीनव्यापारवत्त्वरूपस्वातन्त्र्यं स्यात् अचेतनत्वं न स्यात् ; अचेतन-

---

१. व्योमादौव्यभिचारात्कर्मपक्षकानुमानंप्रकाशोक्तम्। एवञ्चात्र एतेनाशरीरत्वादिनेत्यत्रचक्लेश,

कारणं विना कार्यानुत्पत्तिप्रसङ्गः; अचेतनक्रियायाश्चेतनाधिष्ठानकार्यत्वावधारणात्।

[20] क्रियाविशेषविश्रान्तोऽयमर्थः, न तु तन्मात्रगोचरः । चेष्टा हि चेतनाधिष्ठानमपेक्षत इति चेत् – अथ केयं चेष्टा नाम? यदि प्रयत्नवदात्मसंयोगासमवायिकारणिका क्रिया, प्रयत्नमात्रकारणिकेति वा विवक्षितम् – तन्न – तस्यैव तत्रानुपाधित्वात् ॥ अथ हिताहितप्राप्तिपरिहारफलत्वं तत्त्वम् – तन्न – विषभक्षणोद्बन्धनाद्यव्यापनात् । इष्टानिष्टप्राप्तिपरिहारफलत्वमिति चेत् – कर्तारं प्रति, अन्यं वा ? उभयथापि परमाण्वादिक्रियासाधारण्यादविशेषः । भ्रान्तसमीहाया

गतव्यापारत्वावच्छिन्नं प्रति चेतनाधिष्ठानं प्रयत्नवच्चेतनसंबन्धः कारणमिति स्थितत्वात् । अन्यथा प्रयत्नाभावेपि शरीरे गमनादिक्रियापत्तेः । नन्वचेतनव्यापारश्चेतनाधिष्ठानं विना अदृष्टादेव स्यादिति चेत् – **नादृष्टं दृष्टघातकम्** । अन्यथाऽदृष्टेनैव निर्वाहात्सर्वत्रापि दृष्टकारणं विहन्येत । तस्माच्चेतनव्यापाररूपहेत्वभावेऽचेतनव्यापारात्मकफलस्याप्यभावः ।

[20] ननु चेष्टारूपक्रियाविशेषमात्रगतश्चेतनप्रेरणाधीनत्वरूपोऽर्थः, नतु क्रियासामान्यगतः, चेष्टाया एव लोके तदपेक्षत्वदर्शनादिति चेत् – **विशेषस्तु विशेषवान्** ? कार्यविशेषः कारणविशेषवान् भवति । तावता सामान्यकार्यस्य सामान्यकारणवत्त्वं न भज्यत इति ।

तथाहि – चेष्टाया एव चेतनप्रेरणाधीनत्वं वदतः को भावः ? किं पूर्वोक्तानुमाने चेष्टावत्त्वमुपाधिरित्यभिमतम्, उत परमाण्वादिक्रिया चेतनप्रयत्नाधीना अचेतनक्रियात्वादित्यनुमाने चेष्टात्वमुपाधिरिति । नच पूर्वानुमाने पर्यवसितसाध्यस्य व्योमादावपि सत्त्वात्तत्र चेष्टाभावात्साध्यव्यापकत्वभङ्ग इति वाच्यम् — व्यापारवत्त्वरूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वविवक्षया सामञ्जस्यात् ; तादृशसाध्यस्य व्योमादावभावात् । सर्वथा चेष्टात्वं किमिति विचार्यम् । तद्धि प्रयत्नवदात्मसंयोगासमवायिकारणत्वं प्रयत्नरूपनिमित्तकारणजन्यत्वं वा । उभयथापि नोपाधित्वसंभवः । द्वितीयानुमाने चेतनप्रेरणाधीनत्वरूपसाध्यस्यापि निरुक्तचेष्टात्वरूपतया [illegible] ध्योरेकत्वात् । प्रथमानुमानेपि व्यापारवत्त्वरूपपक्षधर्मावच्छिन्नचेतनप्रेरणानधीनव्यापाराभावरूपविशिष्टसाध्यस्य प्रेरणाधीनव्यापारवत्त्व एव पर्यवसानात्तस्य चेष्टावत्त्वरूपोपाध्यभिन्नत्वात् । तथाच तत्र साधनाव्यापकत्वं दुरुपपादम् ॥ अन्यादृशञ्च चेष्टात्वं दुर्वचम् । तथाहि – न तावत् पश्चात्पुरुषार्थपर्यवसायित्वात् यत् हितशब्दवाच्यं तत्प्राप्त्यहितपरिहारान्यतरफलकत्वं चेष्टात्वम् । आत्महत्यर्थविषभक्षणादिचेष्टायामव्याप्तेः। नच तत्रापि मरणरूपेष्टफलकत्वेन समन्वयसंभवादिष्टप्राप्त्यनिष्टपरिहारान्यतरफलकत्वं चेष्टात्वमिति वाच्यम् — तर्हि परमाणुक्रियायामप्युक्तचेष्टात्वसद्भावेन प्रकृतानुपयोगात् । इष्टत्वानिष्टत्वे हि कर्तारं प्रति वा अन्यं प्रति वा वक्तव्ये । सर्वथा जगदुत्पत्त्युपयोगिपरमाणुक्रियाया जीवेश्वरोभयेष्टफलकत्वाच्चेष्टात्वमक्षतमित्युक्त-

अतथाभूताया अपि चेतनव्यापारापेक्षणाच्च। शरीरसमवायिक्रियात्वं तदिति चेन्न — मृतशरीरक्रियाया अपि चेतनपूर्वकत्वप्रसक्तेः । जीवत इति चेन्न — नेत्रस्पन्दादेश्चेतनाधिष्ठानाभ्युपगमप्रसङ्गात् । स्पर्शवद्द्रव्यान्तराप्रयोगे सतीति चेन्न — ज्वलनपवनादौ तथाभावाभ्युपगमापत्तेः । शरीरस्य स्पर्शवद्द्रव्यान्तराप्रयुक्तस्येति चेन्न — चेष्टयैव शरीरस्य लक्ष्यमाणत्वात् ॥

[21] सामान्यविशेषश्चेष्टात्वं, यत उन्नीयते प्रयत्नपूर्विकेयं क्रियेति चेन्न — क्रियामात्रेणैव तदुन्नयनात् । भोक्तृबुद्धिमत्पूर्वकत्वं यत इति चेत् — तर्हि तद्विश्रान्तत्वमेव तस्य । नचैतावतैव क्रियामात्रंप्रत्यचेतनमात्रस्य चेतनाधिष्ठानेन व्याप्तिरपसार्यते । विशेषस्य विशेषं प्रति प्रयोजकतया सामान्यव्याप्तिंप्रत्यविरो-

---

रीत्या साध्योपाध्यैक्यमेवेति । वस्तुतो भेषजभ्रमेण रोगोत्कोपकवस्तुभक्षणे भ्रान्तचेष्टायामव्याप्तेश्च । नापि शरीरसमवेतक्रियात्वं तत् ; वात्याप्रवाहादिकृतमृतशरीरक्रियायामतिव्याप्तेः । नचेष्टापत्तिः; चेष्टारूपविशेषे चेतनप्रयत्नापेक्षत्ववादिनस्ते तत्रापि चेतनमापेक्षत्वापत्तेः । ननु जीवतो यच्छरीरं तत्समवेतक्रियात्वं तदिति चेन्न — नेत्रस्पन्दानिमिषिनादौ जीवच्छरीराक्रियायामतिव्याप्तेः । इष्टापत्तौ चेतनप्रयत्नाभ्युपगमप्रसंगः । ननु स्पर्शवद्द्रव्यान्तराप्रयुक्तत्वे सतीति विशेषणं दीयते । एवञ्च स्पन्दादेर्वाय्वादिनोदनप्रयुक्ततया प्रकृतदलेनैव वारणाच्छरीरसमवेतत्वमपि न देयमिति क्रियात्वमेव विशेष्यदलमिति चेत् — अग्निवाय्वादूर्ध्वज्वलनतिर्यक्पवनादिक्रियायां चेष्टात्वचेतनपूर्वकत्वयोरस्वीकारप्रसंगः । अथ तदर्थं शरीरसमवेतत्वमपि क्रियाविशेषणमस्त्विति चेन्न — **चेष्टेन्द्रियार्थाश्रयश्शरीर**मिति चेष्टामादायैव शरीरलक्षणकथनात् चेष्टालक्षणस्य शरीरघटितत्वेऽन्योन्याश्रयभिया चेष्टाघटितशरीरलक्षणस्याकथनीयत्वप्रसंगात् । वस्तुतो वातूलस्य स्वप्रयत्नेन पुरुषान्तरसाहाय्येन च हस्तपादप्रसरणक्रियाया-मव्याप्तिरिति स्पर्शवद्द्रव्यान्तरमात्राप्रयुक्तत्वमेव निवेश्यम् । मात्रपदार्थश्च तदितरप्रयुक्तत्वं प्रयत्न [49] ... प्रयत्नजन्यक्रियात्वमेव चेष्टात्वं युक्तम् ; अन्यवैयर्थ्यात् । तथाच निरुक्तरूपं सर्वमपि चेष्टात्वं परमाणुक्रियासाधारणमेवेति न प्रकृतोपयोग इति ॥

[21] ननु तर्हि चेष्टात्वं जातिविशेषः चेष्टत इति प्रतीतिसिद्धः । तेनैव क्रियायां प्रयत्नपूर्वकत्वमनुमीयते, नतु क्रियात्वेनेति साध्यव्याप्तिश्चेष्टात्वरूपोपाधावेवेति चेन्न — क्रियात्वस्यैव यत्नपूर्वकत्वव्याप्यत्वे बाधकाभावात् । अनिश्चितयत्नपूर्वकताकानां क्रियाणां सर्वासामपि पक्षत्वात् । ननु चेष्टात्वमपि क्रियाविशेषवृत्ति किञ्चित्कार्यतावच्छेदकं किञ्चिदंशानुमापकञ्च स्वीकार्यम् । तथाच भोक्ता यो बुद्धिमान् तत्पूर्वकत्वं तत्रानुमीयते, इयं क्रिया स्वसमवेतभोगेच्छाधीनप्रयत्नजन्या चेष्टात्वादिति चेत् — तर्हि विशेषेण विशेषानुमानेऽपि सामान्यस्य सामान्येन

धकत्वात्। अन्यथा सर्वसामान्यव्याप्तेरुच्छेदादित्युक्तम् । एतेनाशरीरत्वादिना सत्प्रतिपक्षत्वमपास्तम् ॥

[22] अत्राप्यागमसंवादः —

'यदा स देवो जागर्ति तदेदं चेष्टते जगत्।
यदा स्वपिति शान्तात्मा तदा सर्वं निमीलति' ॥

'अज्ञो जन्तुरनीशोऽयमात्मनस्सुखदुःखयोः।
ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा' ॥

'मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम्। (गी०. ९-१०)
तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च' ॥ (गी. ९-१९) इत्यादि ॥

अत्र जागरस्वापौ सहकारिलाभालाभौ। ईश्वरप्रेरणायामज्ञत्वमप्रयतमानत्वञ्च हेतू दर्शितौ परमाण्वादिसाधारणौ । स्वर्गश्वभ्रे च इष्टानिष्टोपलक्षणे। एव देव सर्वाधिष्ठानमुत्तरत्र विभाव्यते, मयेत्यादिना। न केवलं प्रेरणायामहमधिष्ठाता, अपितु प्रतिरोधेऽपि। यो हि यत्र प्रभवति, स तस्य प्रेरणावत् धारणेऽपि समर्थः, यथाऽर्वाचीनश्शरीरप्राणप्रेरणधारणयोरिति दर्शितं, तपामीत्यादिना ॥

[23] धृतेः खल्वपि। क्षित्यादि ब्रह्माण्डपर्यन्तं हि जगत् साक्षात् परम्प-

---

व्याप्तेरभग्नत्वात्प्रकृतहेतुर्निर्दुष्ट इति॥ एवं चेष्टारूपशरीरक्रियाभोक्तृयत्नयोः क्रियासामान्ययत्नसामान्ययोश्च कार्यकारणभावस्थितिप्रदर्शनेन परमाण्वादिपक्षकोक्तानुमाने शरीरभिन्नत्वरूपप्रतिपक्षहेतुमादाय चेतनप्रेरणानधीनप्रवृत्तिमत्त्वरूपस्य साध्याभावस्य साधनमपि निरस्तम् — अशरीरत्वेन भोक्तृप्रयत्नाधीनक्रियावारणेपि सामान्यतः प्रयत्नाधीनक्रियावारणासंभवादिति ॥

[22] इदमायोजनानुमानमपि पूर्वानुमानवदागमसंवादि। यदा स देव इति श्लोके चेष्टत इत्यनेन सर्वक्रियाया अपि प्रयत्नाधीनक्रियात्वरूपचेष्टात्वमस्तीति ज्ञापितम् । जागर्ति स्वपितीति च न ज्ञानतदभावपरौ; स्वतस्सर्वज्ञत्वविरोधात्। अतो लब्धसहकारि[illegible]वपरौ। द्वितीयश्लोके जन्तुरीश्वरप्रेरितः अज्ञत्वात् निरपेक्षप्रयत्नरहितत्वाच्चेत्यनुमानं सूचितम्। तत्राचेतनमेव दृष्टान्त इति सिद्धवरं तत्क्रियाया ईश्वराधीनत्वम्। अनन्तरार्धे कण्ठोक्तं प्रकृतिशब्दितस्य परमाणोरीश्वराधिष्ठितत्वम्। अध्यक्षत्वं ह्यधिष्ठातृत्वम् । अन्यस्मिन्नर्धे निगृह्णामीत्यनेन कदाचिदचेतने क्रियाऽभावोपीश्वराधीन इति दर्श्यते ॥

[23] एवं धृतेरपि तृतीयहेतोस्साध्यः। धृतिः पतनाभावः । विमतं जगत् विधारकप्रयत्नाधिष्ठितं गुरुत्वे सति पतनरहितत्वादिति । अत्र जीवप्रयत्नाधिष्ठितस्य वस्तुनो दृष्टान्तस्य, तथा पतद्वस्तुनः अद्रव्यस्य च वारणाय विमतमिति। अन्यथा तत्र हेतोरसिद्धिस्स्यात्॥

रया वा विधारकप्रयत्नाधिष्ठितं गुरुत्वे सत्यपतनधर्मकत्वात् वियति विहङ्गमशरीरवत् तत्संयुक्तद्रव्यवच्च । एतेनेन्द्राग्नियमादिलोकपालप्रतिपादका अप्यागमा व्याख्याताः । सर्वावेशनिबन्धनश्च सर्वतादात्म्यव्यवहारः, आत्मैवेदं सर्वमिति; यथैक एव मायावी, 'अश्वो वराहो व्याघ्रो वानरः किन्नरो भिक्षुस्तापसो विप्र' इत्यादिः॥ अदृष्टादेव तदुपपत्तेरन्यथासिद्धमिदमिति चेत् –(न?) तद्भावेपि प्रयत्नान्वयव्यतिरेकानुविधानेन तस्यापि स्थितिं प्रति कारणत्वात्। कारणैकदेशस्य च कारणान्तरं प्रत्यनुपाधित्वात्। उपाधित्वे वा सर्वेषामकारणत्वप्रसङ्गात्॥ शरीरस्थितिरेवं, न त्व-

जगदिति सूर्यचन्द्रक्षित्यादिसर्वग्रहणम् । विधारकप्रयत्नाधिष्ठितत्वं पतनाभावप्रयोजकप्रयत्नावच्छेदकत्वं प्रयत्नप्रयोज्यपतनाभाववत्त्वमिति यावत् । प्रयत्नस्यापतनप्रयोजकत्वं क्षित्यादौ साक्षात्, जलादौ च परम्परयेति यथायथम् । न तावता साक्षात्परम्परयावेत्यस्य साध्यकोटौ प्रवेशः । साक्षादित्यत्र वियति विहङ्गमजीवाधिष्ठितं तच्छरीरं, परम्परयेत्यत्र तच्चञ्चुपदलग्नपदार्थश्च दृष्टान्तः । नन्वत्र सिद्धसाधनम्, प्राच्यादिदिक्पालैर्लोकपालत्वेन प्रसिद्धैरिन्द्रादिभिर्जीवैरेव तत्तल्लोकधारणस्यागमसिद्धत्वादिति चेत्– एतदनुमानसिद्धमीश्वरमादायैव तेऽप्यागमा व्याख्यातव्याः । नहि निर्मितस्थापितानां लोकानां पालकत्वेन निर्दिष्टा इन्द्रादिप्रवाहाः धारका भवितुमर्हन्ति । ननु – तर्हि कथमिन्द्रादिधृतत्वव्यपदेशः । नचेन्द्रादिशब्दैरीश्वर एवोच्यत इति युक्तम् – तेषां जीवविशेषवाचित्वस्य निर्विवादत्वात् । नच जीवेश्वरयोरभेदः, अपसिद्धान्तात् । तथासतीन्द्राग्नियमादिभिस्सौभरिणा कायव्यूहमधितिष्ठतेव सर्वशरीरकार्यप्रतिसंधानापत्तेश्च – इति चेत् – ईश्वरस्य तत्रतत्रावेशात्तत्तादात्म्येन व्यवहारोपपत्तेः । एवमावेशाभिप्रायेणैव हि 'आत्मैवेदं सर्वम्' 'सर्वंखल्विदं ब्रह्म' इत्येवं श्रुतयो व्याख्येयाः; अन्यथेश्वरस्य जगद्भिन्नत्वेन तत्तादात्म्यस्य दुर्घटत्वात् । न चेदृशव्यपदेशोऽपूर्वः, एकस्मिन्नेव मायाविनि अश्वो वराहः–[illegible]ति तत्तदावेशबलेन तथातथाव्यपदेशस्य सुप्रसिद्धत्वात् । तथाचेन्द्रादिभिर्धृतत्वप्रति-[49] [illegible]मागमानां तत्तदाविष्टेश्वरधृतत्व एव तात्पर्यमिति न सिद्धसाधनम् ॥

नन्वप्रयोजको हेतुः, यत्नाभावेऽप्यदृष्टेनैवापतनोपपत्तेरिति चेन्न – लोके पतनप्रयत्नयोःप्रतिबध्यप्रतिबन्धकभावस्यान्वयव्यतिरेकाभ्यां क्लृप्तत्वेनादृष्टसत्त्वेऽप्यस्य त्यागायोगात् । अदृष्टस्य दृष्टनिवारकत्वाभावस्य प्रागेवोक्तत्वात् । अतो धृतिजनकत्वं यत्नेऽपि तुल्यम् । अतः अदृष्टगतमपतनव्यापकत्वमेव यत्ने आरोप्य तदनुमानप्रयोगः, नतु वस्तुतो यत्ने हेतुव्यापकत्वमित्याशङ्क्यादृष्टस्योपाधिकार्यव्यभिचारशङ्कावहत्वेनोपाधित्ववाचोयुक्तिर्न कार्या; यत्नस्यापि तत्तुल्यं कारणभावेन हेतुव्यापकत्वाक्षतेः । एककारणसाधनस्थलेऽपरकारणस्योपाधित्वे च धूमेनाग्निसाधनेप्यार्द्रेन्धनादिरुपाधिस्स्यादिति विनिगमनाविरहेण सर्वस्यापि व्यापकत्वभङ्गात्कार-

न्यस्थितिरिति चेन्न – प्राणेन्द्रिययोः स्थितेरव्यापनात्। प्राङ्न्यायेनापास्तत्वाच्च।

[24] अत्राप्यागमः, 'एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठतः'। (बृ. उ. ५-८-८) इति। प्रशासनं दण्डभूतः प्रयत्नः। 'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः। यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः।' (गी. १५-१७) इति स्मृतिः। अत्रोत्तमत्वमसंसारित्वं सर्वज्ञत्वादि च। परमत्वं सर्वोपास्यता। लोकत्रयमिति सर्वोपलक्षणम्। आवेशो ज्ञानचिकीर्षाप्रयत्नवतस्संयोगः। भरणं धारणम्। अव्ययत्वमागन्तुकविशेषगुणशून्यत्वम्। ऐश्वर्यं संकल्पाप्रतिघात इति। एतेन कूर्मादिविषया अप्यागमा व्याख्याताः॥

[25] संहरणात् खल्वपि। ब्रह्माण्डादि द्व्यणुकपर्यन्तं जगत् प्रयत्नवद्विनाश्यं विनाश्यत्वात् पाट्यमानपटवत्। अत्राप्यागमः—

'एष सर्वाणि भूतानि सम्भिव्याप्य मूर्तिभिः।
जन्मवृद्धिक्षयैर्नित्यं संभ्रामयति चक्रवत्'॥
'सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम्।

णत्वं न स्यादिति। ननु शरीरधृतित्वावच्छिन्नं प्रत्येव यत्नस्य हेतुत्वान्न तस्य धृतिसामान्यव्यापकत्वमिति चेन्न – शरीरधृतित्वस्य प्राणेन्द्रियधृतौ यत्नजन्यायामभावेन कार्यतानवच्छेदकत्वात्। नच भोगोपकरणगतधृतित्वं कार्यतावच्छेदकमिति न दोष इति वाच्यम् – विशेषस्तु विशेषवानिति प्रागुक्तन्यायेन भोगोपकरणधृतित्वस्य बुभुक्षापूर्वकयत्नरूपविशेषकार्यतावच्छेदकतया सामान्यतोयत्नकार्यतावच्छेदकत्वाभावात्। अतो धृतित्वमेव तदवच्छेदकमिति॥

[24] पूर्वं सिद्धसाधनपरिहारायेन्द्राद्यागमनिर्वाहः कथितः। अथ धृतिरूपोक्तहेतोरागमसंवाद उच्यते, उत्तमःपुरुष इति। अत्र बिभर्तीति धृतिरुक्ता। सा न जीवाधीना, किन्त्वीश्वराधीनेति अन्यपदेन प्रकरणवशाद्बद्धमुक्तोभयविधजीवभिन्नत्वबोधकेन स्पष्टमेव ज्ञायते। उत्तमत्वादिविशेषणञ्च भरणोपपादकं निर्दिष्टं जीवव्यावर्तकम्। नन्विन्द्राद्यात्मनां वि[illegible]द्वयसंयोगानङ्गीकारात्कथं तैः ज्ञानचिकीर्षाप्रयत्नवतस्संयोगरूपावेश इति चेन्न – भूतावेशन्यायेनेन्द्राद्यवच्छेदकशरीर एव परमात्मसंयोगस्य विवक्षितत्वेनादोषात्। विभुद्वयसंयोगाङ्गीकारे तु अणुजीववाद इव विभुजीववादेऽप्यात्मसंयोगः परमात्मनोऽक्षत एव। एवं भूम्यादिधारणार्थकूर्मदिग्गजादिप्रतिपादकागमानामपि परंपरयेश्वरधार्यत्वे तात्पर्यात्प्रकृतानुमानसंवादित्वं बोध्यम्॥

[25] अथ कारिकायामादिशब्दग्राह्यं संहरणं तुरीयो हेतुरुच्यते, कार्यजगत् प्रयत्ननाश्यं नाशित्वादिति। अयञ्च नाशस्साक्षाच्छरीरद्वारा वा यथायथमीश्वरेण क्रियते इत्यत्राप्यागमस्संवादी। सर्वभूतानि प्रकृतिं यान्तीत्यस्य सर्वं कार्यजातं परमाणुभावमापद्यते इत्यर्थः, पर-

कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ' ॥ (गी०.९-७)

इत्यादिः । एतेन रौद्रमंशं प्रतिपादयन्तोप्यागमा व्याख्याताः ॥

[26] पदात् खल्वपि—

कार्यत्वान्निरुपाधित्वमेवं धृतिविनाशयोः ॥
विच्छेदेन पदस्यापि प्रत्ययादेश्च पूर्ववत् ॥ ५ ॥

पदशब्देनात्र पद्यते गम्यते व्यवहाराङ्गमर्थोऽनेनेति वृद्धव्यवहार एवोच्यते । अतोऽपीश्वरसिद्धिः । तथाहि – यदेतत् पटादिनिर्माणनैपुण्यं कुविन्दादीनां, वाग्व्यवहारश्च व्यक्तवाचां, लिपितत्क्रमव्यवहारश्च बालानां, स सर्वस्स्वतन्त्रपुरुषाविश्रान्तः व्यवहारत्वात् निपुणतराशिल्पिनिर्मितापूर्वघटघटनानैपुण्यवत्, चैत्रमैत्रादिपदवत्, पत्राक्षरवत्, पाणिनीयवर्णनिर्देशक्रमवच्चेति ॥

[27] आदिमान् व्यवहार एवम्, अयन्त्वनादिरन्यथापि भविष्यतीतिचेन्न – तदासिद्धेः । आदिमत्तामेव साधयितुमयमारम्भः ॥ नचैवं संसारस्यानादित्वभङ्गप्रसङ्गः, तथापि तस्याविरोधात् । न हि–चैत्रादिव्यवहारोऽयमादिमानिति भव-

---

माणुमात्रं शिष्टं भवतीति यावत् । नचाप्रयोजकत्वम्, कार्यत्वान्निरुपाधित्वमेवंधृतिविनाशयोः;एवंकार्यत्वायोजनयोरिवधृतिविनाशयोरपिकार्यकारणभावरूपानुकूलतर्कान्निरुपाधिकत्वमिति

[26] अथ पञ्चमात्पदादपीश्वरस्साध्यः । पदस्यापि निरुपाधित्वं विच्छेदस्वीकाराद्बोद्धव्यम् । वक्ष्यमाणप्रत्ययादिहेतोश्च कार्यत्ववदेव निरुपाधिता । तत्र पदं नाम व्यवहारः । पद्यते गम्यते अनेनार्थ इति पदत्वमर्थगमकत्वम् । अतो वाचिकव्यवहारस्य पदसमुदायरूपत्वेऽपि कायिकादौ तदभावात्कथं पदशब्दप्रयोग इति न शङ्क्यम् । तथाच विमतो व्यवहारस्स्वतन्त्रपुरुषप्रणीतः व्यवहारत्वात्प्रसिद्धव्यवहारवदिति प्रयोगः । व्यवहारश्च मानसो वाचिको वा कायिकः क्रियाविशेषः । पटादिनिर्माणनैपुण्यं मानसम् । व्यक्तवाचां व्यवहारो वाचि-
[49] कः, व्यक्तवाचो मनुष्याः । अव्यक्तवाचो हि तिर्यञ्चः । लिपिरीतिः कायिकी ॥

[27] ननु व्यवहाराणां कार्यत्वात्पुरुषप्रणीतत्वमात्रं सिध्येत्, न स्वतन्त्रपुरुषप्रणीतत्वम् । ततश्च जीवमादाय सिद्धसाधनम् । परव्यवहारनिरपेक्षत्वरूपस्वातन्त्र्यशालिपुरुषप्रणीतत्वे तु साध्ये आदिमद्व्यवहारत्वमुपाधिः, सादिव्यवहार एव तद्दर्शनात् । विमतव्यवहारश्चानादिः पूर्वपूर्वव्यवहारसापेक्ष इति वैषम्यमिति चेन्न – आदिमद्व्यवहारत्वं हि विच्छेदपश्चाद्भाविव्यवहारत्वम् । पक्षेऽपि विच्छेदसद्भावसाधनार्थमेव स्वतन्त्रपुरुषप्रणीतत्वसाधनात्प्रकृतोपाधेरपि साध्यतुल्यत्वात्प्रकृतहेतुना तस्यापि साधनान्न तस्योपाधित्वम् ॥ तर्हि व्यवहारविच्छेदे कथं संसारानादितेति चेत् – चैत्रादिपदव्यवहारविच्छेदेऽपि विजातीयव्यवहारान्तरादिवात्रापि ता-

स्याप्यनादिता नास्ति, तदनादित्वे वा न चैत्रादिपदव्यवहारोप्यादिमानिति अस्त्वर्वाग्दर्शी कश्चिदेवात्र मूलमिति चेन्न – तेनाशक्यत्वात्। कल्पादावादर्शाभासस्याप्यसिद्धेः। साधितौ च सर्गप्रलयौ॥ ननु व्यवहारयितृवृद्धश्शरीरी समधिगतः, नचेश्वरस्तथा। तत्कथमेवं स्यात्–न – शरीरान्वयव्यतिरेकानुविधायिनि कार्ये तस्यापि तद्वत्त्वात्। गृह्णाति हि ईश्वरोपि कार्यवशाच्छरीरमन्तरान्तरा; दर्शयति च विभूतिमिति। अत्राप्यागमः—

पिताऽहमस्य जगतो माता धाता पितामहः॥ (गी. ९-१७)
तथा– यदि ह्यहं न वर्तेयं (य?) जातु कर्मण्यतन्द्रितः।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः॥
उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम्। इति। (गी.३-२३, २४)

एतेन, "नमः कुलालेभ्यःकर्मारेभ्य" इत्यादियजूंषि बोद्धव्यानि॥

[28] प्रत्ययोऽपि (यादपि?)। प्रत्ययशब्देनात्र समाश्वासविषयप्रामाण्यमुच्यते। तथाच प्रयोगः–आगमसंप्रदायोऽयं कारणगुणपूर्वकः प्रमाणत्वात् प्रत्यक्षादिवत्। नहि

दृशसद्भावान्न प्रवाहानादित्वभङ्गः। एवं स्वातन्त्र्यविशिष्टपुरुषप्रणीतत्वसाधनाच्च न जीवमादाय सिद्धसाधनम्। कथञ्चिदपभ्रंशव्यवहारपरंपराया इव जीवमादाय सुवचत्वेऽपि कल्पारम्भकालिकव्यवहारे तद्दुर्वचम्; यस्य दर्शनेन पुंसो व्यवहारकल्पनसंभवः, तस्याऽऽदर्शभूतस्य मातृकात्मनस्तदानीमभावात्। नच कल्पस्यैवाभावः, सर्गप्रलययोर्द्वितीये स्थापितत्वात्। ननु कार्यान्तराणां शरीरं विना संभवेऽपि प्रकृतकायिकादिव्यवहारस्य कथं तद्रहितेश्वरप्रणीतत्वमिति चेन्न–ईश्वरे स्वार्थभोगहेतुशरीराद्यभावेऽपि जीवभोगौपयिकस्य शरीरस्य तदपेक्षकार्यविषयेऽङ्गीकारेणादोषात्। एतदनुमानसंवादिनश्चागमाः, 'नमः कर्मारेभ्य' इत्येवम्। कर्मारो लोहकारः॥

[28] अथ षष्ठात् प्रत्ययादपि हेतोस्साध्यः। प्रत्ययो नाम समाश्वासः। प्रमा[illegible]कज्ञानम्। अत्र विषयभूतं प्रमात्वं हेतुत्वेन विवक्षितम्। तथाचोपदिश्यमान[illegible] कारणगुणपूर्वकं प्रमात्वात्प्रत्यक्षादिप्रमावत्। यथा प्रत्यक्षादिप्रमा सन्निकर्षादिगुणापेक्षा तथा शाब्दबोधोऽपि वक्तृयथार्थवाक्यार्थज्ञानरूपगुणापेक्ष इति। नच साध्ये कारणेति व्यर्थमिति वाच्यम्– श्रोतृनिष्ठमदृष्टं पदार्थोपस्थित्यादिकञ्च गुणमादाय सिद्धसाधनवारणाय विलक्षणगुणग्रहणद्योतनाय गुणे कारणत्वनिर्देशात्। कारणत्वञ्च स्वगतप्रमात्वावच्छिन्नकार्यतानिरूपितकारणतावत्त्वम्। अदृष्टस्य कार्यसामान्यं प्रति पदार्थोपस्थित्यादेः शाब्दसामान्यं प्रति च कारणत्वात्, वक्तृज्ञानस्यैव शाब्दबोधप्रमां प्रति कारणत्वात्। नच योग्यताप्रमामादाय सिद्धसा-

---

१. प्र. 'आगमस्य संप्रदायः प्रवाहो वक्तृगुणजन्यः प्रमाणशब्दत्वात् लौकिकशब्दवदित्यर्थः' इति

प्रामाण्यप्रत्ययं विना क्वचित् समाश्वासः । नचासिद्धस्य प्रामाण्यस्य प्रतीतिः । नच स्वतः प्रामाण्यमित्यावेदितम् । नच नेदं प्रमाणं, महाजनपरिग्रहादित्युक्तम् । न चासर्वज्ञो धर्माधर्मयोस्स्वातन्त्र्येण प्रभवति । नचासर्वज्ञस्य गुणवत्तेति निःशङ्कमेतत् ॥

[29] श्रुतेःखल्वपि । तथाहि—सर्वज्ञप्रणीता वेदाः वेदत्वात् । यत् पुनर्न सर्वज्ञप्रणीतं, नासौ वेदो यथेतरवाक्यम् ॥ ननु किमिदं वेदत्वं नाम? वाक्यत्वस्यादृष्टवि-

---

धनम्, नद्यास्तीरे पञ्च फलानि सन्तीत्यादौ योग्यताप्रमासत्त्वेऽपि शाब्दभ्रमस्य जायमानत्वात् । नहि नदीतीरस्य फलसंबन्धयोग्यता नास्ति; किन्तु योग्यत्वेऽप्यसंबन्धः कारणान्तरादित्येतावदेव । नचार्थासंबन्धाभावः, अर्थसंबन्धएव वा योग्यतेति वाच्यम् — तत्प्रमायाः वाक्यार्थप्रमारूपत्वेन तत्रैव तस्याः कारणत्वायोगात् । नच शाब्दप्रमायां पदार्थमिथस्संबन्ध एव गुणः, नतु वक्तृगतं तज्ज्ञानमिति वाच्यम् — अनागतादिपदार्थसंबन्धस्य पूर्ववृत्तित्वाभावेन कारणत्वायोगात् । अतो वाक्यार्थयथार्थज्ञानमेव वक्तृगतं गुण इति । ननु किमिति लाक्षणिकप्रत्ययशब्दप्रयोग इति चेत् — हेत्वसिद्धिशंकापरिहारार्थम् । लोके आगमार्थे समाश्वासस्य प्रसिद्धत्वात्, आगमार्थज्ञाने प्रमात्वप्रतीत्यभावे च समाश्वासायोगात्, प्रमात्वस्य तत्रानुत्पन्नत्वे च तत्प्रतीत्ययोगात्, स्वतः प्रामाण्योत्पत्तेश्च खण्डितत्वात्, महाजनपरिग्रहबलेन प्रामाण्यस्य स्थापिततयाचाविद्यमानप्रमात्वप्रतीतिर्भ्रान्तिरूपेत्यस्य दुर्वचत्वाद्वास्तवप्रमात्वसिद्ध्यैव समाश्वासस्सर्वजनीन उपपद्यत इति । नच जीवगुणमादाय सिद्धसाधनम् — असर्वज्ञस्य तस्य उपदेशमन्तरा धर्माधर्मज्ञाने सामर्थ्याभावात्, असमर्थगतज्ञानस्य यथार्थज्ञानत्वरूपगुणत्वभाक्त्वे शंकासंभवाच्च । अतो नास्मिन्ननुमानेऽप्यन्यथाशंकाया अवसर इति ॥

[29] अथ सप्तमाच्छ्रुतिहेतोरीश्वरस्साध्यते; वेदाः सर्वज्ञप्रणीताः वेदत्वात्, यन्नैवं तन्नैवं, यथा लौकिकवाक्यमिति। ननु सर्वज्ञस्याप्रसिद्धत्वात्सर्वज्ञप्रणीतत्वं दुस्साधम्। नच विधेयकोटिप्रविष्ट[illegible]विधेयत्वसंभवाद्विशिष्टसाधनान्न दोष इति वाच्यम् — एवमपि प्राक्तदप्रसिद्ध्या सर्व-[49] विषयकव्याप्तिग्रहाभावेनानुमानायोगादिति चेत् — किञ्चिज्ज्ञाप्रणीतत्वचेतनप्रणीतत्वोभयवत्त्वं साध्यमित्यदोषात् । लौकिकवाक्ये किञ्चिज्ज्ञप्रणीतत्वसत्त्वेनोभयवत्त्वं नास्ति, वेदत्वमपि नास्तीति व्याप्तिग्रहस्सुकर इति। अत्रच प्रणीतत्वं प्रकृतानुपूर्वीज्ञानाजन्यज्ञानजन्यत्वम्, अतोऽध्येतृप्रणीतत्वस्य न वेदे प्रसक्तिः । अत्र हेतुर्वेदत्वं न वाक्यत्वमात्रम्; लौकिकवाक्ये साध्याभाववति तत्सत्त्वेन विरुद्धहेत्वाभासत्वापत्तेः । नाप्यदृष्टबोधकवाक्यत्वम्; बुद्धादिवाक्यमादाय तद्दोषतादवस्थ्यात् । नाप्यदृष्टबोधकप्रमाणवाक्यत्वम्; तस्य वेदेऽसिद्धेः ।

---

१. प्र. 'परैस्सर्वज्ञानङ्गीकारात्तत्प्रणीतत्वमसिद्धम्; तथाप्यात्मत्वमसंसारिवृत्ति जातित्वादृपटत्ववदित्यसंसारिसिद्धौ वेदा असंसारिपुरुषप्रणीता इति साध्यम्' इति ।

पप्रवाक्यत्वस्य च विरुद्धत्वात् । अदृष्टविषयप्रमाणवाक्यत्वस्य चासिद्धेः, मन्वादिवाक्ये गतत्वेन विरोधाच्चेतिचेन्न — अनुपलभ्यमानमूलान्तरत्वे सति महाजनपरिगृहीतवाक्यत्वस्य तत्त्वात् । न ह्यरमदादीनां प्रत्यक्षादि मूलम् । नापि भ्रमविप्रलिप्से, महाजनपरिग्रहादित्युक्तम् । नापि परम्परैव मूलं, महाप्रलये विच्छेदादित्युक्तम् ॥

[30] अन्वयतो वा । वेदवाक्यानि पौरुषेयाणि वाक्यत्वादस्मदादिवाक्यवत् । अस्मर्यमाणकर्तृकत्वान्नैवमिति चेन्न — असिद्धेः । 'अनन्तरञ्च वक्त्रेभ्यो वेदा-

---

नच महाजनपरिग्रहात्प्रामाण्यं सिद्धमिति न हेत्वसिद्धिरिति वाच्यम् — एवमपि मन्वादिस्मृतिषु हेतुसत्त्वात्साध्याभावाच्च विरुद्धत्वात् । अतोऽनुपलभ्यमानमूलान्तरकत्वविशिष्टप्रमाणवाक्यत्वं वेदत्वम् । प्रमाणेत्येतत्स्थाने प्रामाण्यग्राहक महाजनपरिगृहीतेतिविशेषणमेव वाऽस्तु ॥ ननु — अन्यन्मूलं मूलान्तरम् । तत्रान्यदिति कस्मादन्यदुच्यते । नचेश्वरप्रमातिरिक्तमूलवत्त्वेनासंभाव्यमानत्व विशेषणदलार्थः; तथासतीश्वरासिद्धया हेत्वप्रसिद्धेः । नचेश्वरेति त्यज्यत इति वाच्यम् — लौकिकप्रमाणवाक्ये शिष्टपरिगृहीते प्रमातिरिक्तमूलाभावेनातिव्याप्तेः । किञ्च बुद्धादिवाक्यस्योपलभ्यमानभ्रमविप्रलिप्सामूलकत्वेन विशेषणदलेनैव वारणे महाजनपरिगृहीतत्वदलं व्यर्थम् । तथा वेदस्य कृत्स्नस्यैकवाक्यरूपत्वाभावेन वाक्यत्वरूपविशेष्यमप्यसिद्धमिति चेत् — न — अनुपलभ्यमानमूलान्तरत्वं नाम जीवाजन्यत्वम् । तद्गगनादावप्यस्तीति वाक्यत्वदलम् । नच तदसिद्धिः; वाक्यसमुदायत्वस्यैव विवक्षितत्वात् । यद्वा वर्णसमुदायत्वमेवेह वाक्यत्वं विवक्षितम् । महाजनपरिगृहीतत्वनिवेशस्तु ईश्वरस्यैव मोहनार्थं बुद्धात्मनाऽवतार इति पक्षे जीवाजन्यत्वविशिष्टवाक्यत्वं तत्रातिप्रसक्तमिति तद्वारणार्थम् । स्मृत्यादिवारणाय जीवाजन्यत्वनिवेशः । नचाध्ययनकाले जीवजन्यत्वात्कथमिदं वेद इति वाच्यम् — जीवाजन्यमहाजनपरिगृहीतवाक्यवृत्त्यानुपूर्व्याश्रयत्वमेव वेदत्वम् , जीवानुक्तप्रथमवाक्यवृत्त्यानुपूर्वी जीवोक्तवाक्येऽप्यस्तीति समन्वयात् । ननु वेदघटकैकैकवाक्यस्यापि वेदत्वापत्तिः तादृशसर्ववाक्यसमुदायत्वविवक्षणे ऋग्वेदयजुर्वेदादेः पृथक्पृथग्वेदत्वानापत्तिः। तदर्थं तत्तद्विभिन्नकृत्स्नानुपूर्व्यभिप्रायेण विलक्षणानुपूर्वीकत्वं वेदत्वमित्युक्तौ पूर्वोक्तदलानां वैयर्थ्यमिति चेत् —सत्यमेकदेशेऽतिव्याप्तिवारणाय ऋग्वेदादेः पृथक्पृथग्वेदत्वायचाभियुक्तैर्वेदशब्दाभिधेयत्वं वेदत्वं वाच्यम् । अथापि प्रकृते हेतुरेकदेशसाधारणोऽपि भवितुमर्हतीति न प्रकृतपरिष्कारे दोषः । अतएव वाक्यत्वमित्यस्य वाक्यसमुदायत्वमिति विवक्षणमपि नापेक्षितामिति ॥

[30] एवं वेदपक्षकव्यतिरेक्यनुमानं श्रुतेरिति निरूपितम् । अथ तत्पक्षकान्वय्यनुमानं वाक्यादिति विव्रियते. वेदः पौरुषेयो वाक्यत्वादिति । ननु मानवादिकर्तृत्वेन मन्वादिमिव न हि वेदविषये पारम्पर्येण कर्तारमध्येतारस्स्मरन्ति । अतोऽस्मर्यमाणकर्तृकत्वान्न पौरुषेय इति

स्तस्य विनिःसृताः ।' 'प्रतिमन्वन्तरश्चैषा श्रुतिरन्या विधीयते ।' 'वेदान्तकृद्वेदविदेव चाहम्' इति स्मृतेः । 'तस्माद्यज्ञात् सर्वहुतः ऋचस्सामानि जज्ञिरे' इत्यादिश्रुतिपाठकर्स्मृतेश्च । अर्थवादमात्रमिदमितिचेन्न – कर्तृस्मरणस्य सर्वत्राविध्यर्थत्वात् । तथाचास्मरणे कालिदासादेरस्मरणात् । एवञ्च कुमारसम्भवादेरकर्तृकत्वप्रसङ्गः; अनैकान्तिकत्वं वा हेतोः ॥

[31] प्रमाणान्तरागोचरार्थत्वात्सत्प्रतिपक्षत्वमिति चेन्न – प्रणेतारं प्रत्यासिद्धेः; अन्यं प्रत्यनैकान्तिकत्वात् । आकस्मिकस्मितबीजसुखानुस्मृतेः कारणविशेषस्यान्यं प्रति प्रमाणान्तरागोचरस्यापि तेनैव वक्त्रा प्रतिपाद्यमानत्वात् ॥

चेन्न – प्रतिपक्षहेतोरसिद्धत्वात् । प्रतिमन्वन्तरं विभिन्नश्रुतिनिर्माणात् । ननु कर्तृबोधिस्मृतिश्रुतिजातमर्थवादमात्रम्, विधिप्रत्ययादर्शनात् । अर्थवादस्य च विधिनिषेधापेक्षितस्तुतिनिन्दापरत्वान्न वाच्यार्थे तात्पर्यमिति चेत् — तर्हि कर्तृस्मरणस्य वाक्यविवक्षितत्वे कीदृशेन वाक्येन भाव्यम् ? लिङादिप्रत्ययवता वाक्येनेति चेन्न – विध्यन्वयार्हे हि विधिप्रत्ययापेक्षा; न पुनरनर्हे स्मरणादावपि । नच विधिवाक्यार्थत्वाभावेन तस्याविवक्षितत्वम्, असति बाधे प्रामाण्यस्यौत्सर्गिकत्वात् । विध्यर्थतया स्मरणस्याभावेचोपाधित्वेन विवक्षिते कालिदासादिस्मरणमपि न विधिवाक्यकृतमिति तस्याप्युक्तरूपस्मरणाभावाद्विध्यर्थभूतस्मरणाविषयकर्तृकत्वहेतुना कुमारसंभवादावप्यकर्तृकत्वं स्यात् । नन्वकर्तृकत्वं बाधितं तत्रेति चेन्न – बाधकस्य विधिवाक्यस्याभावात् । अस्तु वा बाधः; तथापि तत्र साध्यहीने हेतुसत्त्वाद्व्यभिचार इति ॥

[31] ननु तर्हि वेदोऽपौरुषेयः स्वेतरप्रमाणाविषयार्थकत्वात्, यन्नैवं तन्नैवमिति प्रतिपक्षहेतुरस्त्विति चेत् – अत्र वेदार्थस्य प्रमाणान्तराविषयत्वं किं सामान्यतः, उत प्रणेतारं प्रति, अथवाऽन्यं प्रति । नाद्यौ, पौरुषेयत्वं साधयद्भिर्वेदकरणात्प्राक्तदर्थे ईश्वरज्ञानविषयत्वस्यापि साधनाद्धेत्वसिद्धेः । नान्त्यः, तत्रापि किं स्वप्रणेतृभिन्नगतप्रमाणान्तराविषयार्थकत्वा-
49] द्धेतुः, किंवा यत्किञ्चित्पुरुषगतप्रमाणान्तरागोचरार्थकत्वादिति । नाद्यः, भवन्मते वेदप्रणेतुरसिद्धतया तद्घटितहेतुप्रयोगायोगात् । नान्त्यः, पौरुषेयवाक्येऽपि हेतुसत्त्वाद्व्यभिचारात् । नच श्रोतुः पूर्वं पश्चाद्वा प्रमाणान्तरगोचरमेवार्थं पौरुषेयवाक्यं प्रतिपादयतीति निर्बन्धोऽस्ति, केनचिदकस्मात्स्मिते क्रियमाणे बाह्यकारणानधीनस्य तस्य स्मितस्याऽऽन्तरप्राक्तनसुखानुस्मृतिरेव बीजमिति निश्चित्य तत्स्मृतिकारणमप्यनुमाय कीदृशसुखविषयकोऽनुभव इति विशेषमबुध्वा पृच्छन्तं प्रति स्मितकर्त्रैव श्रोतुरज्ञातस्य तस्य विशेषस्य बोध्यमानत्वात् । अतःश्रोतृप्रमाणान्तरागोचरार्थकत्वरूपहेतुरेवमादिस्थले व्यभिचरित इति ॥

---

१. उपाध्यन्तर्गत स्मर्यमाणत्वोपपत्तये ~~श्रुते~~रित्यनुक्त्वैवमुक्तम् । २. प्र. 'स्मृतिरूपकारणस्य'।

[32] वक्तैव प्रकृते न सम्भवति, हेत्वभावे फलाभावात्। चक्षुरादीनां तत्रासामर्थ्यात् अस्मदादीन्द्रियवत्। मनसो बहिरस्वातन्त्र्यात् – न – चेतनस्य ज्ञानस्येन्द्रियस्य मनसो वा पक्षीकरणे आश्रयासिद्धेः प्रागेव प्रपञ्चनात्। नित्यनिराकरणे चासामर्थ्यात्॥ परमाण्वादयो न कस्यचित् प्रत्यक्षाः तत्सामग्रीरहितत्वादिति चेन्न – द्रष्टारं प्रत्यसिद्धेः; अन्यं प्रति सिद्धसाधनात्॥

[33] तथापि वाक्यत्वं न प्रमाणम्; अप्रयोजकत्वात्; प्रमाणान्तरगोचरार्थत्वप्रयुक्तं तत्र पौरुषेयत्वं, न तु वाक्यत्वप्रयुक्तम् — न – सुगताद्यागमानामपौरुषेयत्वप्रसङ्गात्॥ प्रमाणवाक्यस्य सत इति चेन्न — प्रणेतृप्रमाणान्तरगोचरार्थत्वस्य साध्यानुप्रवेशात्; स्वतन्त्रपुरुषप्रणीतत्वं हि पौरुषेयत्वम्; अर्थप्रतीत्यैकवि-

---

[32] ननु वेदोऽपौरुषेयः असंभावितवक्तृकत्वादिति तृतीयप्रतिपक्षहेतुरस्तु। नच हेतुरसिद्धः, एवं साधनात् – ईश्वरो न वेदवक्ता तदर्थज्ञानसामग्रीरहितत्वादिति। नहि चक्षुरादिस्सामग्री, कर्मफलसाध्यसाधनभावादेस्तदग्राह्यत्वात्। नापि मनः, बाह्यविषयेऽक्षान्तरनिरपेक्षसामर्थ्याभावात्। अनुमानस्यावकाश एव न। नतरां प्रत्यक्षभूतेश्वरज्ञाने – इति चेत् — हेतुरसिद्ध एव, ईश्वरपक्षकोक्तानुमानस्य, तथा ईश्वरज्ञानं न वेदार्थविषयकं तद्विषयताप्रयोजकसामग्रीरहितत्वात्, ईश्वरस्य चक्षुरादिकं मनो वा न वेदार्थग्राहि अयोग्यार्थाग्राहकत्वादित्यनुमानानाञ्चाश्रयासिध्द्या निरासस्तृतीयस्तबक एव कृतः। अत्राऽऽद्यानुमानद्वयमप्रयोजकमपि, नित्यस्येश्वरज्ञानस्य सामग्र्यभावेन निराकर्तुमशक्यत्वात्। जन्यज्ञान एव सामग्र्याः प्रयोजकत्वात्। तदिदं कार्यत्वानुमानावसरे विस्तृतम्। ननु नेश्वरादीनां पक्षत्वम्, किन्तु वेदप्रतिपादितातीन्द्रियपरमाण्वादीनाम्। तथाच ते न किञ्चित्समवेतप्रत्यक्षविषयाः प्रत्यक्षसामग्रीसहकृतत्वाभावादिति चेन्न — किञ्चित्पदेनेश्वरग्रहणे सामग्रीरहितत्वस्य जन्यप्रत्यक्षनिवारकत्वेऽपि नित्यनिराकरणायोगादप्रयोजकत्वेन व्याप्यत्वासिद्धत्वात्, जीवग्रहणे च सिद्धसाधनादिति॥

[33] अथ माभूत्सत्प्रतिपक्षत्वम्, हेतुरप्रयोजकस्स्यादिति चेत् — तर्हि पौरु[illegible]योजकः क इति कथ्यताम्। प्रमाणान्तरगोचरार्थकत्वमेवोपाधिः प्रयोजक इति चेत् — तदभावस्य प्रतिपक्षत्वासंभवकथनेन तन्निरासस्सिद्ध एव, अथापि क्रियते। बुद्धाद्यागमानां विप्रलम्भादिमूलकानां बाधितार्थकत्वात्प्रमाणान्तरगोचरार्थकत्वं तावन्नास्ति। तथाच तत्र प्रयोजकाभावात् प्रयोज्यं पौरुषेयत्वं न स्यात्। ननु प्रमाणवाक्यस्य सतो यत् पौरुषेयत्वं तत् प्रमाणान्तरगोचरार्थकत्वप्रयुक्तम्। अतः प्रमाणवाक्यत्वरूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वमुपाधौ विवक्षितम्। बुद्धवाक्ये चोपाध्यभावाद्विशिष्टसाध्याभावो विशेषणाभावपर्यवसित इष्ट इति चेत् – अस्त्वेतत्। प्रमाणान्तरगोचरार्थकत्वमुपाधिर्न भवति, प्रकृतसाध्यघटकत्वात्। पौरु-

षयौ हि विवक्षाप्रयत्नौ स्वातन्त्र्यम् । मन्वादिवाक्यस्यापौरुषेयत्वप्रसङ्गाच्च; तदर्थस्य शब्देतरप्रमाणागोचरत्वात्।। प्रयुज्यमानवाक्येतरगोचरार्थत्वमात्रमितिचेन्न— तस्य वेदेऽपि सत्त्वात् ; एकस्याप्यर्थस्य शाखाभेदेन बहुभिर्वाक्यैः प्रतिपादनात्।। अस्त्वेवं, न तु तेषां मिथोमूलमूलिभाव इति चेन्न — उक्तोत्तरत्वात् ।।

[34] संख्याविशेषात्खल्वपि । द्व्यणुकत्र्यणुके तावत् परिमाणवती द्रव्यत्वात्।

षेयत्वं हि नाम स्वतन्त्रपुरुषोच्चारितत्वम् । उच्चारणे स्वातन्त्र्यञ्च विवक्षाप्रयत्नवत्त्वम् । लोके-चेच्छायत्नयोः, यदर्थविषयकं ज्ञानं, तदर्थविषयकत्वमेव दृष्टमितीच्छायत्नानुमापकहेतोरिच्छादौ विषयनियामकभूतज्ञानानुमापकत्वमपि सिद्धमिति तादृशज्ञानरूपप्रमाणान्तरगोचरार्थकत्वं पक्षेऽव्यक्षतमिति नायमुपाधिरिति । ननु प्रमाणशब्देन प्रमितिकरणं विवक्षितम् । ईश्वरज्ञानस्य नित्यतया तत्करणाभावात्प्रमितिकरणान्तरगोचरार्थविषयकत्वं पक्षावृत्त्येवेति चेत् – तथापि प्रमाणान्तरेत्यत्रान्यत्वं किमपेक्षया । किं वेदातिरिक्तप्रमाणविषयार्थकत्वमुपाधिः, उत यत्र यत्र वाक्ये साध्यसमन्वयः क्रियते, तत्तद्भिन्नप्रमाणगोचरार्थकत्वम्? नाद्यः मन्वादिवाक्ये वेदोपजीविन्यपि प्रकृतोपाध्यभावादपौरुषेयत्वापत्तेः । नान्त्यः, एकस्यैवाग्निहोत्रादिरूपार्थस्य नानाशाखाप्रमितत्वेन एकशाखावाक्यस्य शाखान्तरगोचरार्थकत्वेनोपाधेः पक्षवृत्तित्वात् । ननु प्रमाणान्तरे स्वमूलभूतत्वमपि विशेषणं देयम् । एकशाखावाक्ये च न शाखान्तरं मूलमिति चेत् – अलमधिकेन, उत्तरस्योक्तत्वात् । प्रमितिकरणान्तरगोचरार्थकत्वं हि पुरुषगतजन्यप्रमित्यपेक्षपौरुषेयत्वप्रयोजकम्, नतु नित्यप्रमित्यपेक्षपौरुषेयत्वे । अतो नित्यनिराकरणेऽस्य न सामर्थ्यमिति । तत्सिद्धं निर्दुष्टत्वाद्वाक्यत्वहेतुना पुरुषसिद्धिरिति ।।

[34] अथान्तिमादपि स इत्थं साध्यः। कल्पारम्भे द्व्यणुकारम्भकपरमाणुगतद्वित्वसंख्या त्र्यणुकारम्भकद्व्यणुकगतत्रित्वसंख्याचेश्वरं साधयतः। एतत्संख्याविशेषसिद्धिश्च द्व्यणुकत्र्यणु-
[49] ...रिमाणरूपकार्यबलादिति प्रथममुच्यते। परिमाणं प्रति परिमाणस्य, प्रचयाख्यसंयोगस्य संख्यायाश्च हेतुत्वं दृष्टम् ; यथा कपालपरिमाणस्य घटपरिमाणं प्रति, तूलपिण्डद्वयप्रचयसंयोगस्य विशिष्टतूलावयविपरिमाणं प्रति, तन्तुबहुत्वस्य पटमहत्त्वं प्रति च । प्रकृते च संख्याभिन्नं न हेतुः । तथाहि – द्व्यणुकपरमाणुसिद्धिस्तावदेवम् – त्रसरेणुः कार्यद्रव्यारभ्यः महत्त्वे सति कार्यत्वाद्घटवदिति । अत्र कार्यद्रव्यसिद्धौ तद्गतकार्यत्वबलात्तद्धेतुपरमाणुसिद्धिरपि । तत्र तन्तुबहुत्वात्पटमहत्त्वदर्शनात् द्व्यणुकत्रयाभावे त्रसरेणुमहत्त्वं न स्यादिति त्रसरेणुस्त्रिभिरारभ्यः, द्व्यणुकस्याणुत्रयारभ्यत्वे महत्त्वापत्तिरिति द्वाभ्यामेव ताभ्यां द्व्यणुकोत्पत्तिरिति स्थितिः । तत्रावयवपरिमाणस्यावयविपरिमाणहेतुत्वदर्शनात्परमाणुद्व्यणुकपरिमाणयोर्द्व्यणुकत्र्यणुकपरिमाणहेतुत्वमिष्यते चेत् – तर्हि किं संख्यासापेक्षं तयोर्हेतुत्वमिष्यते, निरपेक्षं वा । आ-

तच्च परिमाणं कार्यं कार्यगुणत्वात् । नच तस्य परमाणुपरिमाणं द्व्यणुकपरिमाणं वा कारणम्; नित्यपरिमाणत्वात्; अणुपरिमाणत्वाच्च । अन्यथा अनाश्रयकार्योत्पत्तिप्रसङ्गात्, द्व्यणुकस्य महत्त्वप्रसङ्गाच्च; त्र्यणुकवदण्वारभ्यत्वाविशेषात्, तत्र कारणबहुत्वेन महत्त्वे अणुपरिमाणस्यानारम्भकत्वस्थितेः।। अणुत्वमेव महदारम्भे विशेष इत्यपि न युक्तम्; महतो महदनारम्भप्रसङ्गात्; अणुत्वमहत्त्वयोर्विरुद्धतया एकजातीयकार्यानारम्भकत्वप्रसङ्गात् । बहुभिरपि परमाणुभिर्द्वाभ्यामपि द्व्यणुकाभ्यामारम्भप्रसङ्गाच्च । एवं सति को दोष इति चेत् — परमाणुकार्यस्य महत्त्वप्रसङ्गः; कारणबहुत्वस्य तद्धेतुत्वात् । अन्यथा द्वाभ्यां त्रिभिश्चतुर्भिरित्यनियमेनाप्यण्वारम्भे तद्वैयर्थ्यप्रसङ्गात् ।। अणुत एव तारतम्याभ्युपगमस्तु

द्वे द्वित्वबहुत्वयोरपि हेतुत्वादीश्वरसाधकहेतुसिद्धिरक्षता । अन्त्यपक्षस्तु न; परमाणुपरिमाणं न परिमाणजनकं नित्यगतपरिमाणत्वाद्गगनीयवदिति । नित्यगतस्यापि जनकत्वे गगनीयादपि परिमाणं स्यात् । ननु गगनजन्यद्रव्याभावात्कुत्र गगनपरिमाणं परिमाणहेतुस्स्यात् । नहि निराश्रयपरिमाणोत्पत्त्यापत्तिः; समवायिकारणरूपसहकार्यभावे कार्यायोगादिति चेत् — तर्हि नित्यगतपरिमाणस्याप्यनित्यगतस्येव परिमाणजनकत्वं चेत्स्यात्, महत्त्वजनकत्वं स्यात् । तथाच द्व्यणुकस्य महत्त्वापत्तिरिति दोषोऽस्तु । एवमस्याजनकत्वे सिद्धे तद्दृष्टान्तेन द्व्यणुकपरिमाणमप्यजनकमणुपरिमाणत्वादित्यनुमीयते । अस्तुवा सकृदुभयपक्षीकारेण उभयमजनकमणुपरिमाणत्वात्, यन्नैवं तन्नैवमिति प्रयोगः । नचाप्रयोजकत्वम्, अणुत्वस्यापि हेतुत्वे त्र्यणुक इव द्व्यणुकेपि परमाण्वणुत्वान्महत्त्वोत्पत्त्यापत्तेः । अथ बहुत्वसंख्या महत्त्वे सहकारिकारणमिति चेत्-तर्ह्यणुत्वस्य हेतुत्वकल्पनं व्यर्थम् । अथ संख्यामुपेक्ष्य परमाणुपरिमाणावृत्तिवैजात्यं स्वीकृत्य तद्विशिष्टाणुत्वं महत्त्वहेतुरिष्यत इति चेत्— तदापि महत्त्वं प्रति क्वचिदणुत्वस्यान्यत्र महत्त्वस्य च हेतुत्वेष्टया व्यभिचारः; अयुक्तश्च विरुद्धयोरेकजातीयकार्यहेतुत्वम् । न... त्वमनुत्कृष्टमहत्त्वे कारणं, महत्त्वतूत्कृष्टमहत्त्व इति चेत्—तदा द्व्यणुकद्वयादपि महाद्रव्यं स्यात्, संख्याया अनपेक्षितत्वात् । द्व्यणुकपरिमाणे विलक्षणपरमाण्वणुत्वस्य हेतुत्वे परमाणुत्रयाद्द्व्योत्पत्तिश्च स्यात् । नचेष्टापत्तिः, कारणबहुत्वात्कार्ये महत्त्वापत्तेः । नच तदपीष्टम्, तथा सतीदं कार्यद्रव्यारम्भ्यं महत्त्वे सति कार्यत्वादित्यनुमानेन परमाणोः कार्यत्वापत्तेः । नचात्राप्रयोजकशङ्का; महाकार्ये द्रव्यमात्रस्य कारणत्वे गगनादपि कार्यद्रव्यापत्तेः । तस्मात्परमाणुकार्ये महत्त्वं न स्वीकार्यम् । ननु न बहुत्वमात्रान्महत्त्वम्, किन्तु विलक्षणपरिमाणद्रव्यबहुत्वादिति न दोष इति चेत् — अनियतसंख्याकपरमाणुनाप्येकरूपाणुकार्यस्वीकारेऽधिकाणुमेलनवैयर्थ्यम् । नहि द्वयसाध्यं त्रयसाध्यञ्चाणुद्रव्यमेकरूपमिति युक्तिसहम् । नन्वस्तु तत्र परि-

संख्यामवधीर्य न स्यात् ।। अस्तु महदारम्भ एव त्रिभिरिति चेन्न – महतः कार्यस्य कार्यद्रव्यारभ्यत्वानियमात् । तथापि वा तारतम्ये संख्यैव प्रयोजिकेति ॥ नच प्रचयोऽपेक्षणीयः, अवयवसंयोगस्याभावात् ॥ तस्मात् परिमाणप्रचयौ महत एवारम्भकाविति स्थितिः ॥

[35] अतोऽनेकसंख्या परिशिष्यते । सा अपेक्षाबुद्धिजन्या अनेकसंख्यात्वात् । न चास्मदादीनामपेक्षाबुद्धिः परमाणुषु संभवति । तद् यस्यासौ स सर्वज्ञः । अन्यथा अपेक्षाबुद्धेरभावात् संख्याऽनुत्पत्तौ तद्गतपरिमाणानुत्पादेऽपरिमितस्य द्रव्यस्यानारम्भकत्वात् त्र्यणुकानुत्पत्तौ विश्वानुत्पत्तिप्रसङ्गः । अस्मदादीनामेवाऽऽनुमानिक्यपेक्षाबुद्धिरस्त्विति चेन्न – इतरेतराश्रयप्रसङ्गात् । जाते हि स्थूलकार्ये तेन परमाण्वाद्यनुमानं, तस्मिन् सति द्व्यणुकादिक्रमेण स्थूलोत्पत्तिः ॥ अस्त्वदृष्टादेव परिमाणं, कृतमपेक्षाबुद्ध्येति चेन्न – अस्तु तत एव सर्वं, किं दृष्टकारणेनेत्यादेरसमाधेयत्वप्रसङ्गादिति ॥

माणतारतम्यमिति चेत् – तर्हि तारतम्यशालिपरिमाणभेदेन कारणवैलक्षण्य वाच्यम् । द्विनिष्ठाणुत्वात्रिनिष्ठाणुत्वादिरूपञ्च वैलक्षण्यं द्वित्वत्रित्वयोर्हेतुत्वमेव स्थापयति । तथा द्व्यणुकद्वयद्व्यणुकत्रयादिजन्यद्रव्यगतमहत्त्वतारतम्यमपि द्व्यणुकसंख्यामादायोपपाद्यम् । सर्वथा संख्यायाः कारणत्वमवर्जनीयमिति परिमाणकारणत्वस्वीकार इह व्यर्थः । अस्तु तर्हि प्रचयः कारणमिति चेन्न–तस्य सावयवद्रव्यवृत्तेः परमाण्ववृत्तित्वात् ; कठिनद्रव्यारम्भकद्व्यणुकानां तादृशसंयोगस्य दुर्वचत्वाच्च । तस्मात्संख्यैवात्र कारणम् । परिमाणप्रचयौ तु महन्निष्ठावेव जनकाविति ।

[35] तथाच प्रयोगः — द्व्यणुकत्र्यणुकपरिमाणे संख्याजन्ये तदितराजन्यत्वे सति जन्यत्वात् । नचावयववर्त्येकत्वसंख्यानामेव परिमाणकारणत्वमिति वाच्यम् — द्व्याभ्यामेकत्वा-[illegible] महत्त्वापत्तेः ॥ बहुत्वयवगतैकत्वानां महत्त्वकारणत्वे च लाघवाद्बहुत्वमात्रस्य कारणत्वं [49] । अतोऽनेकवर्तिसंख्यैव हेतुः। तथाचेयं संख्या अपेक्षाबुद्धिजन्या व्यासज्यवृत्तिसंख्यात्वात् द्वित्वाद्यन्तरवदिति बुद्ध्याश्रयेश्वरासिद्धिः । नचाणुपरिमाणस्याहेतुत्वे तत्सत्त्व एव मानाभाव इति वाच्यम् — गगनादेर्द्रव्यारम्भकत्वाभावेन परिच्छिन्नपरिमाणकद्रव्यस्यैव द्रव्यं प्रति हेतुत्वात्परिमाणावश्यकत्वात् । यत् द्रव्यं तत् सपरिमाणमिति व्याप्तिमत्त्वाच्च । त्रसरेणौ महत्त्वस्य प्रत्यक्षतया तद्धेतोर्बहुत्वस्य द्व्यणुकेष्वावश्यकत्वेनेश्वरसिद्धेर्निष्प्रत्यूहत्वाच्चेति ॥

इति प्रथमयोजना ।

[36] अथवा कार्येत्यादिकमन्यथा व्याख्यायते ।

उद्देश एव तात्पर्यं व्याख्या विश्ववदशस्सती ॥

ईश्वरादिपदं सार्थं लोकवृत्तानुसारतः ॥ ६ ॥

आम्नायस्य हि भाव्यार्थस्य कार्ये पुरुषप्रवृत्तिनिवृत्ती । भूतार्थस्य तु यद्यपि नाहत्य प्रवर्तकत्वं निवर्तकत्वं वा, तथापि तात्पर्यतस्तत्रैव प्रामाण्यम् । तथाहि – विधिशक्तिरेवावसीदन्ती स्तुत्यादिभिरुत्तभ्यते । प्रशस्तं हि सर्वः प्रवर्तते, निन्दिताच्च निवर्तते इति स्थितिः ॥

---

[36] श्रीः । अथेश्वरसाधकवैदिकांशमात्रसंकलनपरतया कार्येत्यादिकारिकाया योजनान्तरं क्रियते । तत्र कार्यादिपदपर्यन्तहेतूपपादनार्था उद्देश एवेति कारिका । अत्र कार्यादित्यस्य कार्यार्थकत्वादित्यर्थः; कार्यपरत्वादिति यावत् । यद्वक्ष्यति **कार्यात्तात्पर्यादपीति** । कार्यं प्रवृत्तिनिवृत्तिरूपम् । तदुच्यते **कार्ये प्रवृत्तिनिवृत्ती** इति । तथाच प्रवृत्तिनिवृत्तितात्पर्यमिह कार्यशब्दविवक्षितम् । आयोजनं समन्ताद्योग्यतानुसारेण योजनं व्याख्यानमिति यावत् । धृतिर्धारणं अयमियानाम्नाय इति । अर्थज्ञानादिकमादिपदार्थः । पदं वेदस्थ ईश्वरादिशब्दः । तत्र तात्पर्यं नाम उद्देशोऽभिप्राय इति, अभिज्ञसंबन्धिव्याख्यानादिकमेव समीचीनमिति, ईश्वरादिपदं निरर्थकं न भवतीति च लोकसमाचारत एव सुग्रहम् । तदेभिरीश्वरसिद्धिः ।

तत्र तात्पर्यात्तावत् – पुंसः प्रवृत्तिनिवृत्तिविषयविवेचनाय हि कृत्स्नोऽप्याम्नायः प्रवर्तते । तदुक्तं, 'आम्नायस्य क्रियार्थत्वा' दिति । सिद्धब्रह्मपराणामुपनिषदामप्यन्ततः प्रवृत्त्यादिपर्यवसानमस्त्येव । नत्वेतावता कार्यान्विते शक्तिरिति गुरुमतमाद्रियते । पदस्य कार्यान्विते शक्त्यभावेऽप्याम्नायस्य सर्वस्य कार्यपर्यवसायित्वमेवोच्यते । तत्र भाव्यं साध्यं क्रियारूपमर्थं प्रतिपादयत आम्नायस्य, यजेत स्वर्गकामः, न कलञ्जं भक्षयेदित्यादेः प्रवृत्तिनिवृत्तिरूपकार्यबोधित्वं स्पष्टम् । ये तु तत्सन्निहितासिद्धार्थबोधका अर्थवादाः, तेषां साक्षात्कार्याबोधित्वेपि भाव्यार्थकाम्नायकृतप्रवृत्तिनिवृत्तितात्पर्यकत्वेनैव प्रामाण्यं वाच्यम् । नच वि[illegible]तत्सिद्धेर्वैयर्थ्यं शंक्यम् – विधिश्रवणे यो यागादौ द्वेषान्न प्रवर्तते, कलञ्जभक्षणादौ चोत्कटरागात्प्रवर्तते, तद्विषये विधिगतप्रवर्तननिवर्तनशक्तिरक्षमा स्थिता स्तवननिन्दनाभ्यां तत्तद्वेषरागविघटने सति क्षमा भवतीति । तेचार्थवादाः स्तुतिर्निन्दा परकृतिः पुराकल्प इति न्यायसूत्रोक्ताश्चत्वारः । परकृतिपुराकल्पौ विधिशेषौ स्तावकौ; निषेधशेषौ निन्दकौ । अतोऽर्थवादानां प्रवृत्तिनिवृत्ती तात्पर्यार्थः । सर्वमिदं न्यायमीमांसादर्शनयोस्स्थितम् । तत्र तात्पर्यपदार्थशोधने सिध्यतीश्वरः ।

---

१. प्र. 'कार्यमुद्देश्यत्वं, उद्देशश्च तात्पर्य' मिति । अत्रपूर्वमेवोद्देश इति ज्ञाने तात्पर्यशोधनं व्यर्थम् ।

[37] तत्र पदशक्तिस्तावदभिधा; तद्बलायातः पदार्थः। आकाङ्क्षादिमत्त्वे सति चान्वयशक्तिः पदानां पदार्थानां वा वाक्यं; तद्बलायातो वाक्यार्थः। तात्पर्यार्थस्तु चिन्त्यते। तदेव परं साध्यं प्रतिपाद्यं प्रयोजनमुद्देश्यं वा यस्य, तदिदं तत्परम्। तस्य भावस्तत्त्वम्। तद् यद्विषयं, स तात्पर्यार्थ इति स्यात्॥

[38] तत्र न प्रथमः, प्रमाणेनार्थस्य कर्मणोऽसाध्यत्वात्। फलस्य च तत्प्रतिपत्तितोऽन्यस्याभावात्। प्रशस्तनिन्दितस्वार्थप्रतिपादनद्वारेण प्रवृत्तिनिवृत्तिरूपं साध्यंपरमुच्यते इति चेन्न — गङ्गायां घोष इत्यत्र तीरस्याप्रवृत्तिनिवृत्तिरूपस्यासाध्यस्यापि परत्वात्॥ तीरविषये प्रवृत्तिनिवृत्ती साध्ये इति तीरस्यापि परत्वमिति चेन्न — स्वरूपाख्यानमात्रेणापि पर्यवसानात्॥

[39] न द्वितीयः, पदवाक्ययोः पदार्थतत्संसर्गौ विहाय प्रतिपाद्यान्तराभा-

---

[37] तथाहि — पदार्थवाक्यार्थापेक्षया कश्चित्तात्पर्यार्थो भिद्यते। शक्तिगम्योऽर्थः पदार्थः। पदार्थानां मिथोऽन्वयो वाक्यार्थः। वाक्यञ्चाकांक्षासन्निधियोग्यताविशिष्टसमभिव्याहारः। स एव पदानामन्वयशक्तिः। तत्र योग्यतादेरर्थनिष्ठत्वात् समभिव्याहारस्य च शब्दनिष्ठत्वादेकतरप्राधान्यविवक्षयाऽन्वयशक्तिरियं पदनिष्ठतया पदार्थनिष्ठतया वा व्यवह्रियते। योग्यतादिमदर्थोपस्थापकपदसमभिव्याहारो वाक्यमिति तत्त्वम्। भाट्टास्त्वभिहितान्वयवादिनः, पदार्था एव करणम्। पदार्थगतान्वयशक्तिरेव वाक्यमित्याशेरते। तत्र पदशक्तेरिच्छारूपत्वे तदाश्रयतयापीश्वरसिध्यति। अथापि तत्र विवादात्तात्पर्यार्थश्चिन्त्यते। तत् परं यस्य तत् तत्परं, तस्य भावस्तात्पर्यम्। तत्र परशब्दस्य कोऽर्थः? साध्यं, प्रतिपाद्यं, फलं, उद्देश्यमिमि वा। तथाच तत्परत्वेन कथ्यमानं पदं वाक्यं वा एषु मध्ये यद्विषयकं, स तात्पर्यार्थः।

[38] तत्र साध्यं न तात्पर्यार्थः; प्रमाणस्य प्रमेयकारकत्वाभावेन कर्मतत्प्रवृत्तिनिवृत्तीनामसाध्यत्वाभावेनार्थवादानां कार्यपरत्वायोगापत्तेः। ननु तर्हि प्रमाणनैष्फल्यम् — न — [49] ...तिरूपफलसंद्भावात्। अतस्तदन्यफलकत्वाभावात्कर्मसाध्यकत्वं न भवति। नन्वर्थवादसाध्यार्थप्रतिपत्तिसाध्यत्वात्प्रवृत्त्यादेः प्रणाडया तत्साध्यकत्वरूपतात्पर्यमक्षतमिति चेन्न — गङ्गायां घोष इत्यत्र गङ्गापदस्य तीरे तात्पर्यस्य वाच्यत्वात्तत्र प्रणाडयापि साध्यत्वाभावात्। ननु स्वपरत्वं नाम स्वविषयकप्रवृत्त्यादिसाध्यकत्वं। लक्षिततीरज्ञानस्य च किञ्चित्प्रवृत्तिनिवृत्त्युपयोगात्तदक्षतमिति चेन्न — पुरा गङ्गायां घोष एक आसीदिति सिद्धपरवाक्येपि तीरपरत्वस्यावश्यकत्वात्। तत्र प्रवृत्त्यादेरप्रसक्तेः। अतो न प्रथमः पक्षः।

[39] नापि कर्मप्रतिपाद्यकत्वं कर्मपरत्वम्। वायुर्वै क्षेपिष्ठेत्याद्यर्थवादस्य कर्मबोधकत्वाभावात्। उक्तपदशक्त्यन्वयशक्तिभ्यां वायुदेवतातत्संबन्धादेरेव बोध्यत्वात्। नच शक्त्या तदबोधनेपि

वात् ॥ पदशक्तिसंसर्गशक्ती विना स्वार्थाविनाभावेन प्रतिपाद्यं परमुच्यते इत्यपि न साम्प्रतम् – न हि यद् यच्छब्दार्थाविनाभूतं तत्र तत्र तात्पर्यं शब्दस्य; अतिप्रसङ्गात् । तदा हि गङ्गायां जलमित्याद्यपि तीरपरं स्यात् ; अविनाभावस्य तादवस्थ्यात् । मुख्ये बाधके सति तत्तथा स्यादिति चेत् – न — तस्मिन्नसत्यपि भावात् । तद् यथा – 'गच्छ गच्छसि चेत् कान्त पन्थानस्सन्तु ते शिवाः । ममापि जन्म तत्रैव भूयाद् यत्र गतो भवान्' इति मुख्यार्थाबाधनेऽपि वारणे तात्पर्यम् । न च परं व्यापकमेव, अव्यापकेऽपि तात्पर्यदर्शनात् । तद् यथा, मञ्चाः क्रोशन्तीति पुरुषे तात्पर्यम् । नच मञ्चपुरुषयोरविनाभावः, नापि पुरुषक्रोशनयोः॥

[40] नापि तृतीयः । तद्धि प्रतिपाद्यापेक्षितं, प्रतिपादकापेक्षितं वा स्यात् । नाद्यः; शब्दप्रामाण्यस्यातदधीनत्वात् । तथात्वे वाऽतिप्रसङ्गात् । यस्य यदपेक्षितं, तं प्रति तस्य परत्वप्रसङ्गात् ॥ तदर्थसाधनत्वेनापेक्षानियम इति चेन्न – कार्यज्ञाप्यभेदेन साध्यस्य बहुविधत्वे भिन्नतात्पर्यतया वाक्यभेदप्रसङ्गात् । धूमस्य हि प्रदेशश्यामलतामशकनिवृत्त्याद्यनेकं कार्यम् ; आर्द्रेन्धनदहनाद्यनेकं ज्ञाप्यम् । तथा चेह प्रदेशे धूमोद्गम इत्यभिहिते तात्पर्यतः को वाक्यार्थो भवेत् ; चेतनापेक्षाया-

---

देवताऽविनाभावात्कर्म गम्यत इति कर्मपरत्वमस्त्विति चेन्न- अविनाभावगम्ये सर्वत्र शब्दतात्पर्याभावात् । गङ्गायां जलमित्यत्राप्यविनाभावतस्तीरस्य गम्यतया तीरपरत्वापत्तेः । ननु मुख्यार्थबाधज्ञानाधीनतत्प्रतिपादकताकत्वं तत्परत्वमिति चेन्न –– मुख्यबाधकेऽसत्यपि तात्पर्यस्येष्टत्वात् । गच्छेति कारिकाह्यबाधितार्थापि मागच्छेति गमनवारणपरा । ननु गमनवारणतात्पर्यकत्वे गच्छेति गमनानुमत्ययोगाद्बाधितार्थकत्वमेवात्रेति चेत् — काकेभ्यो रक्षयतामित्यत्र का गतिः ? अस्त्वेतत् । अन्यार्थगमकत्वमेव कुत इति पृच्छामः । अविनाभावादिति चेन्न – तेन हि व्यापकमेव गम्यं भवेत् । अव्यापकतत्परत्वमपि वाक्ये दृश्यते, मञ्चाः क्रोशन्तीत्यस्य मञ्चक्रोशनाव्यापकपुरुषपरत्वात् ॥

[40] नापि तत्प्रयोजनकत्वं तत्परत्वम् — प्रयोजनं हि यः प्रतिपाद्यपुरुषश्श्रोता तदिष्टं विवक्षितम्, उत यः प्रतिपादको वक्ता तदिष्टम् । नाद्यः, श्रोतृविषये निष्प्रयोजनत्वेपि वाक्यस्य क्वचिदर्थे तात्पर्यप्रामाण्ययोस्सत्त्वात् । अन्यथा सर्वस्यापि वाक्यस्य तत्तच्छ्रोत्रभिमतप्रयोजनपरत्वकल्पनया आप्तानाप्तविभागाद्यनापत्तेः। ननु यत् श्रोतृप्रयोजनं वाक्यार्थसाध्यं तदेव ग्राह्यमिति तत्प्रयोजनसाधकार्थबोधकत्वं तत्परत्वमिति चेन्न – साध्यस्य कार्यज्ञाप्यभेदेन द्विरूपत्वात् कार्याणां ज्ञाप्यानाञ्च बहूनां संभवादेकस्यापि वाक्यस्यानेकपरत्वापत्त्या वाक्यभेददोषापत्तेः । एकस्मिन्वाक्येऽनेकार्थस्वीकारे हि वाक्यभेददोषः । ननु वक्तुरेकत्वात्तदपेक्षितप्रयो-

नियन्तुमशक्यत्वात् । नापि प्रतिपादकापेक्षितं, वेदे तदभावात् ॥

[41] चतुर्थस्तु स्यात् । यदुद्देशेन यश्शब्दः प्रवृत्तः स तत्परः । तथैव लोकव्युत्पत्तेः । तथाहि — प्रशंसावाक्यमुपादानमुद्दिश्य लोके प्रयुज्यते । तदुपादानपरम् । निन्दावाक्यं हानमुद्दिश्य प्रयुज्यते तत् हानपरम् । एवमन्यत्रापि स्वयमूहनीयम् । तस्माल्लोकानुसारेण वेदेऽप्येवं स्वीकारणीयम् ; अन्यथा अर्थवादानां सर्वथैवानर्थक्यप्रसङ्गात् । स चोद्देशो व्यवसायोऽधिकारोऽभिप्रायो भाव आशय इत्यनर्थान्तरमिति तदाधारप्रणेतृपुरुषधौरेयसिद्धिः । तथा च प्रयोगः — वैदिकानि प्रशंसावाक्यानि उपादानाभिप्रायपूर्वकाणि प्रशंसावाक्यत्वात् परिणतिसुरसमाम्रफलमित्यादिलोकवाक्यवदिति । एवं निन्दावाक्यानि हानाभिप्रायपूर्वकाणि निन्दावाक्यत्वात् परिणतिविरसं पनसफलमित्यादिवाक्यवत् । अन्यथा निरर्थकत्वप्रसङ्गश्च विपक्षे बाधकमुक्तम् ॥

[42] अपिच नो चेदेवं, श्रुतार्थापत्तिरपि हीयेत । सिद्धो ह्यर्थः प्रमाणविषयः, न तु तेनैव कर्तव्यः । नच पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्र रात्रौ भुङ्क्त

जनकत्व तत्परत्वमित्यन्त्यपक्षोऽस्त्विति चेत्तदपि न — भवन्मते वेदे वक्तुरभावात् । किञ्च गङ्गापदस्य तीरे तात्पर्यमिति प्रयोगात्तीरप्रयोजनकत्वस्यचाभावादपि नायं पक्षस्संभवति ।

[41] तस्मात्तदुद्देश्यकत्वमेव तत्परत्वत् । तच्च तद्विषयकेच्छाधीनत्वम् । समन्वेति चेदं लौकिकस्तुतिनिन्दावाक्येषु— अयमिदमुपादत्तां, अयमिदं जहात्वित्युपादानहानरूपार्थेच्छया प्रवृत्तत्वात् । एवं परकृतिपुराकल्पयोरपि द्रष्टव्यम् । यद्यपि तीरतत्परत्वं न तीरविषयकेच्छाधीनत्वम् ; तथापि तज्ज्ञानेच्छाधीनत्वमेव तत्परत्वं सर्वत्र बोध्यम् । तथाच वैदिकार्थवादाः कार्याभिप्रायपूर्वकाः कार्यशेषार्थवादत्वाल्लौकिकार्थवादवदित्यभिप्रायानुमितौ तत ईश्वरानुमानम् । अ[illegible]राद्ध्यानपरपुत्रस्तुतिवाक्यादौ व्यभिचारवारणाय हेतौ कार्यशेषत्वनिवेशः । नचाप्रयो-
[49], आम्नायस्य क्रियार्थत्वादतदर्थत्वे आनर्थक्यस्योक्तत्वात् । ननु कार्याभिप्रायकत्वमेव साध्यमस्तु, किमिति तदभिप्रायपूर्वकत्वपर्यन्तम् । तदभिप्रायकत्वञ्चास्माच्छब्दादयमुपादानादिकार्यं गृह्णात्वित्याकारकाभिप्रायविषयताविशेषश्शब्दनिष्ठ इति चेत् — सत्यं, तावदेव साध्यम्, वक्तुरभावात्कस्याभिप्राय इति शङ्कावारणाय साध्यभूताभिप्रायाश्रय एवं वक्तेति ज्ञापनार्थं तदुक्तमिति ॥

[42] एवं तावदर्थविषयकोऽभिप्रायो वेदे दर्शितः । अथ भाट्टानुसारेण शब्दविषयकाभिप्रायोपि दर्श्यते । अभिप्रायपूर्वकत्वञ्चेन्न स्यात्, विश्वजिता यजेतेत्यादौ स्वर्गकामपदादिकल्पिका श्रुतार्थापत्तिर्न स्यादिति । तत्र हि यजेतेतिश्रुतविधिगतप्रवर्तकत्वान्यथानुपपत्त्या भावनायाः पुरुषार्थभाव्यकत्वावसायात्, 'स स्वर्गस्स्यात्सर्वान्प्रत्यविशिष्टत्वा'दिति न्यायेन स्वर्गभाव्य-

इति वाक्यशेषोऽस्ति; अनुपलम्भबाधितत्वात्; उत्पत्त्यभिव्यक्तिसामग्रीताल्वादिव्यापारविरहात्; अयोग्यस्याशङ्कितुमप्यशक्यत्वात्। तस्मादभिप्रायस्थ एव परिशिष्यते, गत्यन्तराभावात्। स चेद्वेदे नास्ति, नास्ति श्रुतार्थापत्तिरिति तद्व्युत्पादनानर्थक्यप्रसङ्गः। तस्मात् कार्यात्तात्पर्यादप्युन्नीयते, अस्ति प्रणेतेति ॥

[43] अयोजनात् खल्वपि। नहि वेदादव्याख्यातात् कश्चिदर्थमधिगच्छति; नचैकदेशदर्शिनो व्याख्यानमादरणीयम्; 'पौर्वापर्यापरामृष्टः शब्दोऽन्यां कुरुते मतिम्' इति न्यायेनानाश्वासात्। त्रिचतुरपदकादपि वाक्यादेकदेशश्राविणोऽन्यथार्थप्रत्ययः स्यात्, किमुतातीन्द्रियादन्तरान्तरा वाक्यसम्भेददुरधिगमात्। ततस्सकलवेदवेदार्थदर्शी कश्चिदेवाऽभ्युपेयः, अन्यथाऽन्धपरम्पराप्रसङ्गात्। स च श्रुताधीतावधृतस्मृतसाङ्गोपाङ्गवेदार्थस्तद्विपरीतो वा न सर्वज्ञादन्यः सम्भवति। को-

---

कत्वमावश्यकमिति स्वर्गकामपदमर्थापत्तिकल्प्यं तदिष्टम्। नन्वेदं तत्कल्प्यत्वं तत्कार्यत्वरूपम्; योह्यर्थ उपायान्तरसिद्धस्स्वतस्सिद्धो वा तमर्थं प्रमाणं ज्ञापयति केवलम्, न करोतीति अर्थापत्तेरपि ज्ञापिकायाः कारकत्वायोगात्। पीनो देवदत्तो दिवा न भुङ्क्ते इति लौकिकश्रुतार्थापत्तिस्थले यथा रात्रौ भुङ्क्ते इति वाक्यशेषो नास्ति, तथैव हि वेदेऽपि। अन्यथा अस्ति चेदुपलभ्येत। भवद्भिरभिव्यक्तिं प्रति अस्माभिरुत्पत्तिं प्रति च सामग्रीत्वेनेष्टस्ताल्वादिव्यापारोऽपि नास्तीति कथं तदस्तित्वम्। अयोग्यस्तु वाक्यशेषश्शशशृङ्गायमाण इति लोक इव वेदेपि नासिद्धस्य संभावना। यद्यपि रात्रौ भुङ्क्ते इति वाक्याभावेपि पीन इत्यादिवाक्यस्यार्थपर्यवसानादर्थापत्त्या रात्रिभोजनरूपार्थकल्पनमात्रं पर्याप्तम्, अथापीह भावनाया भाव्याकांक्षापूरणाभावे साध्यसाधनेतिकर्तव्यतारूपांशत्रयविशिष्टभावनाबोधस्यैवानुत्पत्त्या वाक्यार्थापर्यवसानादगत्या स्वर्गकामादिपदकल्पनमावश्यकमिति कुत्रत्योऽयं शब्द इति विमर्शे अनुच्चारितत्वादभिप्रायस्थ इत्येव वाच्यम्। तत्रच परतन्त्रपुरुषाभिप्रायस्थं शब्दं विहाय वक्त्रभिप्रायस्थं पिधेहीत्य... मादायैवं द्वारमित्यादौ वाक्यनिष्पादनाद्वेदेपि वक्त्रभिप्राय एव स्वीकार्यः। अतोऽभिप्रा... नास्ति, श्रुतार्थापत्तिरपि नास्तीति। अतो वेदस्य कृत्स्नस्य कार्यपरत्वादर्थविषयकश्शब्दविषयकश्चाभिप्राय एष्टव्य इति तदाश्रयवक्तृसिद्धिरिति ॥

[43] एवमायोजनादपि धृत्यादिसहितादीश्वरस्साध्यः। एकदेशश्राविणो हि व्याख्यानं नादर्तव्यम्। किञ्चिच्छब्दपूर्वभूते किञ्चिच्छब्दपरभूते च शब्दे तत्तत्पौर्वापर्यञ्चेदपरामृष्टम्, कथं तदर्थनिश्चयो यथावत्स्यात्। अतस्सर्वज्ञः कश्चिदभ्युपेय एव। देशान्तराध्येत्रन्तराद्यज्ञाने वेदेयत्तावधारणायोगात् परिमितज्ञानशक्तिना सर्ववेदार्थज्ञानज्ञापनायोगाच्च सार्वज्ञ्यस्यावश्यकत्वात्; तच्च सार्वज्ञ्यं श्रवणाध्ययनाद्यायत्तं वा भवतु, वस्तुतस्तादृशपुरुषदौर्लभ्यात्तद्विपरीतं स्वाभावि-

त्प्रत्यक्षीकृतविश्वतदनुष्ठानः, एतावानेवायमाम्नाय इति निश्चिनुयात् । कश्चार्वाग्दृक् निःशेषाः श्रुतीर्ग्रन्थतोऽर्थतोवाऽधीयीत, अध्यापयेद्वा । अत्रापि प्रयोगः—वेदाः कदाचित् सर्ववेदार्थविद्व्याख्याताः, अनुष्ठातृमतिचलनेऽपि निश्चलार्थानुष्ठानत्वात् । यदेवं तत्सर्वं तदर्थविद्व्याख्यातं, यथा मन्वादिसंहितेति । अन्यथात्वनाश्वासेनाव्यवस्थानादननुष्ठानमव्यवस्था वा भवेदनादेशिकत्वात् ॥ अनुष्ठातार एवादेष्टार इति चेन्न—तेषामनियतबोधत्वात् ॥ वेदवद्वेदार्थानुष्ठानमप्यनादीति चेन्न—तद्धि स्वतन्त्रं वा वेदार्थबोधतन्त्रं वा । आद्ये निर्मूलत्वप्रसङ्गः । द्वितीये त्वनियमापत्तिः । नह्यसर्वज्ञाविशेषे पूर्वेषां तदवबोधः प्रमाणं, न त्विदानीन्तनानामिति नियामकमस्ति॥

[44] पदात् खल्वपि । श्रूयते हि प्रणवेश्वरेशानादिपदम् । तच्च सार्थकम् । अविगानेन श्रुतिस्मृतीतिहासेषु प्रयुज्यमानत्वात् घटादिपदवदिति सामान्यतः सिद्धे, कोऽस्यार्थः इति व्युत्पित्सोर्विमर्शे सति निर्णयः, स्वर्गादिपदवत्, 'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः' इत्यर्थवादात्, यववराहादिवद्वाक्यशेषाद्वा । तद् यथा ईश्वरप्रणिधानमुपक्रम्य

कमेव भवतु वा । सर्वथा वेदास्सर्ववेदार्थविद्व्याख्याताः अनुष्ठातृमतिचलनेपि निश्चलस्वार्थानुष्ठानकत्वादित्यायोजनधृत्यादिसिध्येश्वरसिद्धिः । अत्रानुष्ठातृमतिचलनं नामाव्यवस्थितज्ञानार्हानुष्ठातृकत्वम् । इदञ्चाप्रयोजकशङ्कावारणाय, नतु हेतुनिविष्टम् ! यदि सर्वज्ञव्याख्यानं न स्यात्, पुंसामर्थसंदेहात् देशकालभेदेनान्यथान्यथाऽर्थस्फुरणाच्च ज्ञानव्यवस्थाविरहान्निश्चलार्थानुष्ठानत्वं न स्यादिति । यद्वाऽनेन वेदस्य गहनत्वं हेतौ निवेश्यं दलं सूच्यते; अन्यथा व्यभिचारात् । व्याख्यानं हि विवरणरूपश्शब्दः निबन्धरूपो वा वाचिको वा । तत्रापि निश्चलार्थानुष्ठानत्वरूपहेतुसत्त्वात्साध्याभावाद्व्यभिचार इति गहनत्वे सतीति विशेषणमिति । उत्तरोत्तरानुष्ठानस्य पूर्वपूर्वानुष्ठानमूलकत्वेनानुष्ठानानादित्ववर्णने वेदमूलकत्वभङ्गादेद्वितीयस्तवक एवोक्तत्वात्, अनुष्ठातृणामव्यवस्थितबोधार्हत्वेनानाश्वसनीयतया व्याख्यातृत्वायोगादन्य एव सर्वज्ञो व्याख्यातेति ॥

[49] अथ वेदगतात्पदविशेषादपीश्वरस्साध्यः । पदं प्रणवेश्वरपरमात्मादिशब्दः, वैदिकास्मच्छब्दयच्छब्दादि धिगादिनिपातरूपञ्च । प्रणवादिशब्दानामविगानेन निरर्थकत्वशङ्कां विनैव सार्थकपदसमभिव्याहारेण श्रुत्यादिषु प्रयोगात्सार्थकत्वे सिद्धे, यजेत स्वर्गकाम इति विधिस्थस्वर्गपदस्यापूर्वस्य यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम् । अभिलाषोपनीतञ्च तत्सुखं स्वः पदास्पदमित्यर्थवादादिव, यववराहवेतसशब्दानां कङ्गुकाकजम्बूषु लोके विप्र-

१.प्र. 'एकदेशदर्शिव्याख्यातवेदाच्छिष्याणां श्रद्धया प्रवर्तमानानां निश्चलानुष्ठानमस्तीत्यनैकान्तिकम् । अत उक्तमनुष्ठात्रिति । तेषामव्यवस्थितमतित्वाभावात्' इति । २. अनौपदेशिकत्वात् ।

श्रूयते — सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः। अनन्तशक्तिश्च विभोर्विधिज्ञाः षडाहुरङ्गानि महेश्वरस्य ' इति ॥

एवम्भूतोऽर्थः प्रमाणबाधित इति चेन्न — प्रागेव प्रतिषेधात् । तथापि न तत्र प्रमाणमस्तीति चेत् — स्वर्गे अस्तीति का श्रद्धा ? नह्युक्तविशेषणे सुखे किञ्चित् प्रमाणमस्त्यस्मदादीनाम्' याज्ञिकप्रवृत्त्यन्यथानुपपत्त्या तथैव तदित्यवधार्यते इति चेन्न — इतरेतराश्रयप्रसङ्गात् । अवधृते हि स्वर्गरूपे तत्र प्रवृत्तिः. प्रवृत्त्यन्यथानुपपत्त्या च तदवधारणमिति ॥ पूर्ववृद्धप्रवृत्त्या तदवधारणेऽयमदोष इति चेन्न — अन्धपरम्पराप्रसङ्गात् ॥ विशिष्टादृष्टवशात् कदाचित् कस्यचिदेवंविधमपि सुखं स्यादिति नास्ति विरोधः; तन्निषेधे प्रमाणाभावादिति चेत् — तुल्यमितरत्रापि॥

अत्रापि प्रयोगः — यश्शब्दो यत्र वृद्धैरसति वृत्त्यन्तरे प्रयुज्यते स तस्य वाचकः, यथा स्वर्गशब्दः सुखविशेषे प्रयुज्यमानस्तस्य वाचकः । प्रयुज्यते चायं जगत्कर्तरीति । अन्यथा निरर्थकत्वप्रसङ्गे सार्थकपदकदम्बसमभिव्याहारानुपपत्तिरिति । एतेन रुद्रोपेन्द्रमहेन्द्रादिदेवताविशेषवाचका व्याख्याताः ॥

अपिच अस्मत्पदं लोकवद्वेदेऽपि प्रयुज्यते । तस्य च लोके नाचेतनेष्वन्यत्र मदर्थः, तत्र सर्वथैवाप्रयोगात् । नाप्यात्ममात्रमर्थः; परात्मन्यपि प्रयोगप्रसङ्गात् । अपितु यस्तं स्वातन्त्र्येणोच्चारयति, तमेवाह; तथैवान्वयव्यतिरेकाभ्यामवसायात् । ततो लोकव्युत्पत्तिमनतिक्रम्य वेदेऽप्यनेन स्वप्रयोक्तैव वक्तव्यः । अन्यथाऽप्रयोगप्रसङ्गात् । नच यो यदोच्चारयति वैदिकमहंशब्दं, स एव तदा तस्यार्थ इति यु-

---

तिपन्नानां, यवमयश्चरुर्भवति, वाराही चोपानत्, वैतसे कटे प्राजापत्यान्धिनोतीति विधिगतानां, वसन्ते सर्वसस्यानां जायते पत्रशातनम्। मोदमानास्तु तिष्ठन्ति यवाः कणिशशालिनः, वराहं गावोऽनुधावन्ति, अप्सुजो वेतस इति वाक्यशेषेभ्यः ... उत्तमः पुरुष इत्यादितोऽर्थविशेषनिर्णयसंभवात्, ईदृशेश्वरस्य प्रमाणान्तराप्रमितत्वा... दिवदेव श्रुतिप्रमिततया बाधकप्रमाणाभावमात्रेणैव ग्राह्यत्वात्, प्रणवादिशब्दो जगत्कर्तरि शक्तः तत्रैव प्रयुज्यमानत्वादित्यनुमानेनापि तत्सिद्धिरिति॥ एवमस्मच्छब्दस्य स्वतन्त्रोच्चारयितृभिन्ने लोके प्रयोगाभावात्, मामुपासीतेत्यादावपि स्वतन्त्रवक्तृपरत्वस्यावश्यकत्वादुपाध्यायादिवक्तृपरत्वेऽव्यवस्थापत्तेः, तेषामनुवादकर्तृतया तत्परत्वेऽस्मच्छब्दस्य लोकदृष्टव्युत्पत्त्युच्छेदप्रसंगाच्च, वैदिकास्मच्छब्दः स्वतन्त्रवक्तृवचनोऽस्मच्छब्दत्वाल्लौकिकास्मच्छब्दवदितीश्वरासिद्धिः । नच, योऽहमस्मीति जीवपरास्मच्छब्दे व्यभिचारः, अनुवादानन्तर्गतास्मच्छब्दत्वस्यैव हेतुत्वात्॥ एवं वेदे यत्किन्तदादिशब्दानां बुध्युपक्रमप्रश्नपरामर्शाद्युपलक्षितव्यक्तिव्यवस्थितत्वाद्बुध्याद्याश्रयवक्तृसिद्धिः ।

कम् । तथासति मामुपासीतेत्यादौ स एवोपास्यस्स्यात् । अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते, इत्युपाध्यायशिष्यपरम्परैवात्मन्यैश्वर्यं समभिगच्छेत् । तथाचोपासनां प्रत्युन्मत्तकेलिस्स्यात् । लोकव्यवहारश्चोच्छिद्येत । तस्मान्मानुवक्ताऽस्य वाच्यः, अपि तु वक्तैवेति स्थिते प्रयुज्यते वेदे अस्मच्छब्दः स्वप्रयोक्तृवचनः अस्मच्छब्दत्वाल्लोकवदिति ॥

एवमन्येऽपि यः कः स इत्यादिशब्दा द्रष्टव्याः, तेषां बुद्ध्युपक्रमप्रश्नपरामर्शाद्युपहितमर्यादत्वात्; तस्य च वक्तृधर्मत्वात् । बुद्ध्युपक्रमो हि प्रकृतत्वं, जिज्ञासाऽऽविष्करणञ्च प्रश्नः, प्रतिसन्धानञ्च परामर्श इति । एवञ्च संशयादिवाचका अप्युन्नेयाः । न च जिज्ञासासंशयादयः सर्वज्ञे प्रतिषिद्धा इति युक्तम् । शिष्यप्रतिबोधनायाहार्यत्वेनाविरोधात् । को धर्मः कथंलक्षणक इत्यादिभाष्यवदिति । एतेन धिगहो बत हंतेत्यादयो निपाता व्याख्याताः ॥

[45] प्रत्ययादपि । लिङादिप्रत्यया हि पुरुषधौरेयनियोगार्था भवन्तस्तं प्रतिपादयन्ति । तथाहि —

प्रवृत्तिः कृतिरेवात्र, सा चेच्छातो, यतश्च सा ।
तज्ज्ञानं, विषयस्तस्य विधिस्तज्ज्ञापकोऽथवा ॥ ॥ ७ ॥

बुद्ध्युपक्रमः पूर्वबुद्धिविषयत्वम् । किंशब्दो जिज्ञासाविषयत्वोपलक्षितव्यक्तिवाची । परामर्शस्स्मरणम्, तद्विषयवाची तच्छब्दः । किंस्विदादिशब्दास्संशयविषयादिवाचकाः । ईश्वरे वस्तुतो जिज्ञासाद्यभावेपि श्रोतृगतजिज्ञासाद्यारोपेण प्रयोगो घटते । यथा शबरस्वामी मीमांसाभाष्यकारः स्वयं धर्मतल्लक्षणादिकं जानन्नेव स्वस्य वस्तुतो जिज्ञासाऽऽभावेपि परप्रतिबोधनार्थं त जिज्ञासानुवादेन चोदनासूत्रे, को धर्मः कथंलक्षणकः, कान्यस्य साधनानीत्येवमभाषिष्ट,तद्वत् । ननु र्हि जिज्ञासादेर्वक्तृनिष्ठत्वानिर्बन्धे कथं किंशब्दादिभिरीश्वरसिद्धिरिति चेन्न — लोके [49] ...दर्जिज्ञासाश्रय — परगतजिज्ञासासंभवाभिज्ञान्यतरपुरुषाधीनत्वदर्शनाद्वैदिककिंशब्दादावपि तदन्यतरसिद्धावौचित्यादीश्वरसिद्धेरिति ॥ एवं गर्हादिपरधिगादिनिपातेष्वपि द्रष्टव्यम् ॥

[45] एवं विधिप्रत्ययादपि वैदिकादीश्वरस्सिध्यति,तस्य लिङ्लोडादिरूपस्य प्रवर्तकपुरुषगतनियोगापरपर्यायाभिप्रायवाचित्वात् । लिङादिश्रवणे सति पुंसः प्रवृत्तिदर्शनात्प्रवृत्त्यनुकूलकिञ्चिद्वाची लिङादिरिति निर्विवादम् । तत्रप्रवृत्तिः कृतिर्यत्न एव । सा च साक्षादिच्छाजन्या । इच्छा च ज्ञानात् । तत्र यद्विषयं ज्ञानमिच्छाजनकं स विषय एव विधिर्लिङाद्यर्थ इति केचित् । तस्य विषयस्य ज्ञापकः कश्चिदभिप्राय इति तु वयम् । तदिदं विविच्यते —

[46] प्रवृत्तिः खलु विधिकार्या सती न तावत्कायपरिस्पन्दमात्रम्, आत्मा ज्ञातव्य इत्याद्यव्यापनात्। नापीच्छामात्रम् तत एव फलसिद्धौ कर्मानारम्भ-प्रसङ्गात्। ततः प्रयत्नः परिशिष्यते। आत्मज्ञानभूतदयादावपि तस्याः (स्य?) भावात्। तदुक्तं, 'प्रवृत्तिरारम्भः' इति ॥

[47] सेयं प्रवृत्तिर्यतम्भत्तामात्रावस्थितात्, नासौ विधिः; तत्र शास्त्रवैयर्थ्यात्। अप्रतीतादेव कुतश्चित् प्रवृत्तिसिद्धौ तत्प्रत्यायनार्थं तदभ्यर्थनाभावात्। नच प्रवृत्ति-हेतुजननार्थं तदुपयोगः; प्रवृत्तिहेतोरिच्छाया ज्ञानयोनित्वात् ज्ञानमनुत्पाद्य तदु-त्पादनस्याशक्यत्वात् तस्य च निरालम्बनस्यानुत्पत्तेः; अप्रवर्तकत्वाच्च, निया-मकाभावात्। तस्माद् यस्य ज्ञानं प्रयत्नजननीमिच्छां प्रसूते, सोऽर्थविशेषस्तज्ज्ञाप-कोवाऽर्थविशेषो विधिः प्रेरणा प्रवर्तना नियुक्तिर्नियोग उपदेश इत्यनर्थान्तरमिति स्थिते विचार्यते – स हि कर्तृधर्मो वा स्यात्, कर्मधर्मो वा, करणधर्मो वा, नियोक्तृधर्मो वेति। न प्रथमः —

---

[46] तत्र विधेः प्रवर्तनारूपत्वात्प्रवर्तनायाश्च प्रवृत्त्यनुकूलव्यापारात्मकत्वात्तत्र प्रवृत्त्यनु-कूलत्वांशशोधनाय प्रवृत्तिस्वरूपं शोधनीयम् – सा तावन्न चेष्टा. नापीच्छेत्यारम्भात्मकयत्नरू-पैवेति। यथेच्छायाः प्रवृत्तित्वे यागविषयकेच्छामात्रात्फलापत्तिः, न तथा यत्नस्य प्रवृत्तित्वे। इच्छाया हि साध्यमसाध्यञ्च विषयः। यत्नस्य तु साध्यमात्रविषयकत्वाद्यागस्य निष्पाद्यत्वसिद्धिः। नच स्वरूपयोग्यतारूपजनकत्वस्य यागं विनापि यत्ने संभवान्नावश्यानुष्ठानं यत्नपक्षेपि सि-ध्येदिति वाच्यम् – जनकत्वस्य फलोपधायकत्वरूपस्यैव मुख्यत्वादौपचारिकस्वरूपयोग्यत्वस्य शास्त्रार्थत्वे प्रमाण भावेन यागनिष्पत्तिसिद्धेः ॥

[47] अथ तदनुकूलत्वं विधेः किंरूपमिति शोध्यते। न तावत् प्रवृत्तिजनकत्वं तत्; इच्छाया एव तज्जनकत्वात् इच्छा च न विधिः; तस्यास्स्वरूपसत्तया कारणत्वात्। अतश्च तस्यास्सत्त्वे-ऽसत्त्वे च विधिवाक्यं व्यर्थम्, ज्ञानानपेक्षणात्। नापि प्रवृत्तिजनकजनकत्वमनुकूलत्वम् इच्छाया ज्ञानजन्यत्वेन ज्ञानमनुत्पाद्य लिङर्थेन तज्जननायोगात्। नच लिङादिज्ञानं ज[illegible] वेच्छाजनक इति लिङादिजन्यज्ञानमेव विधिरिति वाच्यम्–ज्ञानस्य निर्विषयत्वायोगात्, निर्वि-षयत्वेचात्र प्रवर्तकत्वमन्यत्र नेति व्यवस्थाभावापत्त्या च विषयस्य स्वीकार्यतया स विषय एव लिङर्थः। अतएव व्युत्पन्नानामेव लिङ्श्रवणे प्रवृत्तिः, नान्येषामिति। तथाच लिङर्थनिष्ठमनुकू-लत्वं प्रवृत्तिजनकेच्छाजनकज्ञानविषयत्वरूपं वा प्रवृत्तिजनकेच्छाजनकज्ञानजनकज्ञानविषयत्वरूपं वेति विवेचनीयम्। अतो लिङर्थः क इति शोध्यते। सोऽयं प्रेरणादिपदवाच्यत्वाद्धर्मरूपः कस्य धर्मः, किं कृत[illegible]दिः कर्तृधर्मः, कार्यत्वादिः कर्मधर्मो वा, इष्टसाधनत्वादिः करणधर्मो वा, प्रेरकनिष्ठ आशयविशेष एव वेति। तत्र कर्तृधर्मः स्पन्दः कृतिरिच्छा ज्ञानं वा न विधिः।

[48] इष्टहानेरनिष्टाप्तेरप्रवृत्तेर्विरोधतः ।
असत्त्वात् प्रत्ययत्यागात् कर्तृधर्मो न सङ्करात् ॥ ॥८॥

स हि न स्पन्द एव; आत्मानमनुपश्येदित्याद्यव्याप्तेः ; ग्रामं गच्छतीत्यादावतिव्याप्तेश्च । नापि तत्कारणं प्रयत्नः ; तस्य सर्वाख्यातसाधारणत्वात् ॥

[49] ननु न सर्वत्र प्रयत्न एव प्रत्ययार्थः ; करोतीत्यादौ प्रकृत्यर्थातिरेकिणस्तस्याभावात् । संख्यामात्राभिधानेन प्रत्ययस्य चरितार्थत्वात् । ततो लिङादिवाच्य एव प्रयत्न इति–न–कुर्यादित्यत्रापि तुल्यत्वात् । प्रयत्नमात्रस्य प्रकृत्यर्थत्वेऽपि तस्य पराङ्गतापन्नस्य प्रत्ययार्थत्वान्न तुल्यत्वमिति चेत्–न–तथापि तुल्यत्वात् ॥

[48[तत्र स्पन्दस्य दूषणं प्रथमेन पादेन, कृतेर्द्वितीयेन; इच्छायास्तृतीयेन; ज्ञानस्य चतुर्थेनेति स्थूलरीतिः । **इष्टहानि**रिष्टस्थले स्पन्दरूपविध्यभावः । **अनिष्टाप्तिः** लडादावनिष्टस्थलेऽपि तत्सत्त्वम् । **अप्रवृत्तेः** कृतिज्ञानमात्रेण प्रवृत्त्यभावात् । **विरोधतः** कृतिरूपप्रवृत्तेरेव कृतिसाध्यत्वे विरोधात् । **असत्त्वात्** लिङ्श्रवणकाले इच्छाया अभावात्, प्रत्ययत्यागात् तस्याः लिङ्प्रत्ययाजन्यत्वात् । **संकरात्** निर्विषयकज्ञानासंभवेन विषयसंकरस्यावश्यकतया विषयमात्रवाचकत्वं लिङो युक्तमिति ज्ञानस्यावाच्यत्वादिति ॥ नन्वयं कर्तृधर्मविकल्पो न घटते; यदर्थज्ञानं प्रवृत्तिहेतुस्स एव लिङर्थ इति प्रागुक्तनया स्पन्दादिज्ञानस्य प्रवृत्तिहेतुत्वाभावात् । एतदपेक्षया विप्रत्वराजत्वाद्यधिकारिविशेषणीभूतकर्तृधर्मादिग्रहणं युक्तम् ; अहमीदृश इत्यधिकारज्ञानपूर्वकमेव कर्मणि प्रवृत्तेरिति चेत् – उच्यते — विप्रत्वादीनामनेकत्वादनियतत्वात्प्रमाणान्तरलभ्यत्वाच्च न लिङर्थत्वम् ! प्रवृत्तिं प्रति कार्यताज्ञानस्य हेतुत्वात्, कार्यत्वं क्रियासाध्यत्वं कृतिसाध्यत्वं संकल्पविषयत्वं वा भवति, संकल्पश्चेच्छा ज्ञानं वेति तत्र साध्यत्वाद्यंशस्य संसर्गविधया भानसंभवात्स्पन्दक्रियादिरेव लिङर्थो भवितुमर्हतीति विचिन्त्येत्थं कर्तृधर्मविकल्प इति । तत्र कृतिर्न लिङाद्यर्थः, लडादिसाधारणत्वात् । ततः किमिति चेत्–लडादिश्रवण इव लिङादिश्रवणेपि प्रवृत्तिर्न स्यादिति वक्ष्यते । संप्रति सर्वाख्यातसाधारण्यमेव तावत् सुदृढं विचार्यते ।

[49] ननु यत्नस्य न सर्वाख्यातसाधारण्यम् ; करोतीत्यत्र धातुनैव तदुक्तया पौनरुक्त्यापत्तेः । अतस्सर्वत्राख्यातं संख्यामात्रवाचीति न निरर्थकम् ; विधिप्रत्ययमात्रं यत्नार्थकमिति चेन्न—कुर्यादित्यत्र धातुनैव यत्नोक्त्या लिङस्तदर्थकत्वेपि पौनरुक्त्यस्य तुल्यत्वात् । ननु कुर्यात्, यजेतेत्यादौ लिङर्थः कृतिस्साध्यतासंबन्धेन धात्वर्थविशेषणं, कृञर्थस्तु न तथेति चेत्–तर्हि करोति पचतीत्यादावपि प्रत्ययार्थकृतिः प्रथमान्तार्थविशेषणम् ; कृञर्थस्तु न तथेति तुल्यम् ।

---

१. प्र. 'कुर्यादित्यत्र यत्नमात्रं कृञर्थः, तस्य चैत्रसंबन्धित्वमनुकूलत्वं वा प्रत्ययार्थ इति चेत् — करोतीत्यत्रापि तुल्यमिदम्' इति ।

न चैकस्य तद्वाचकत्वेऽन्यस्य तद्विपर्यय आपद्येत । एको द्वौ बहव एषिषतीत्यादौ व्यभिचारात् । तत्र द्वितीयसंख्येच्छादिकल्पने करोति प्रयतते इत्यादावपि तथा स्यात् । प्रत्येकमन्यत्र सामर्थ्यावधृतौ सम्भेदे तथा कल्पनायास्तुल्यत्वात् ।। रथो गच्छतीत्यादौ तदसम्भवे का गतिरिति चेत्- तन्तवः पटं कुर्वन्तीत्यत्र या । लोकोपचारोऽयमपर्यनुयोज्य इति चेत्तुल्यम् ।। लिङः कार्यत्वे वृद्धव्यवहाराद्व्युत्पत्तौ सर्वं समञ्जसम् । आख्यातमात्रस्य तु न तथेति चेत्–न–विवरणादेरपि व्युत्पत्तेः । अस्ति च तदिह । किं करोति ? पचति, पाकं करोतीत्यर्थः इत्यादिदर्शनात् ।।

[50] तथापि फलानुकूलतापन्नधात्वर्थमात्राभिधाने तदतिरिक्तप्रयत्नाभिधानकल्पनायां कल्पनागौरवं स्यात् । अतो विवरणमपि तावन्मात्रपरमिति चेत् । भवेदप्येवं, यदि पाकेनेति विवृणुयात् । न त्वेतदस्ति । धात्वर्थस्यैव पाकमिति साध्यत्वेन निर्देशात् । ततस्तं प्रत्येव किञ्चिदनुकूलतापन्नं प्रत्ययेनाभिधानीयमिति युक्तम् ।।

[51] तथापि तेन प्रयत्नेनैव भवितव्यं, न त्वन्येनेति कुत इति चेत्--नियमेन

किञ्च पौनरुक्त्यदोषो न वाच्यतापरिपन्थी, एकः एषिषतीत्यादौ प्रकृत्यर्थसंख्येच्छादेरनुपासना चोक्तेः । तत्रैकत्वान्तरेच्छान्तरादिकं प्रत्ययार्थ इति चेत् — करोतीत्यत्रापि कृत्यन्तरमस्तु । वस्तुतः क्रियत इत्यादौ कृञः, पचतीत्यादौ प्रत्ययस्य च कृत्यर्थकत्वे सिद्धे करोतीत्युभयसमाहारस्थलेप्युभयं तदर्थकमिष्यते, यथा एषिषतीत्यत्र ।। नन्वाख्यातस्य यत्नार्थकत्वे रथो गच्छतीत्यत्र कथमिति चेत्—कृञो यत्नार्थकत्वेपि तन्तवः कुर्वन्तीत्यत्रेव लक्षणैव गतिः।। ननु लिङः कृतिवाचित्वे वृद्धव्यवहारः प्रमाणम् । गामानयेत्यादौ गवानयनं कार्यमिति बोधात् । कार्यत्वघटकसाध्यत्वांशस्य संसर्गत्वादिति चेत्— व्यवहारस्येव विवरणस्यापि शक्तिग्राहकतया यत्नस्य सर्वाख्यातवाच्यत्वमिति ॥

[50] ननु पचति गच्छतीत्यादौ धात्वर्थ एव पाकगत्यादिविशेषरूपत्यागेन फलानुकूलव्यापारात्मना सामान्यरूपेणाख्यातेनोच्यत इति वैयाकरणमतमस्तु । पाकं करोतीति विवरणमपि कृञः क्रियासामान्यवाचित्वान्न बाधकमिति चेन्न – आख्यातार्थधात्वर्थयोस्सामान्यविशेषात्मकत्वे ज्योतिष्टोमेन यजेतेति यागविशेषवाचिपदादिव पाकेन करोतीति तृतीयैव विवरणे स्यात् । प्रत्युत पाकमिति द्वितीयाश्रवणात्पाकानुकूलव्यापारान्तरमेवाख्यातार्थ इति । नच पाकं करोतीति स्तोकं पचतीतिवत्क्रियाविशेषणतया कर्मत्वमिति वाच्यम् — तर्हि स्तोकं पच्यत इतिवत् कर्मणि प्रयोगेपि पाकं क्रियत इति द्वितीयापत्तेः । नच पाकशब्दः फलमात्रवाची, भावे घञ्विधानविरोधात् ॥

[51] तर्हि पाकातिरिक्तस्तदनुकूलव्यापारसामान्यमाख्यातार्थ इति पार्थसारथिमिश्रादिमी-

तथा विवरणात् । बाधकं विना तस्यान्यथाकर्तुमशक्यत्वात् । अन्यथाऽतिप्रसङ्गात् ॥ स्यादेतत्—यस्य कस्यचित् फलं प्रत्यनुकूलतापचिमात्रमेव करोत्यर्थः, न तु प्रयत्न एव । सोऽपि ह्यनेनैवोपाधिना प्रत्ययेन वक्तव्यः, न तु यत्नत्वमात्रेण ; प्रयत्नपदे-नाविशेषप्रसङ्गात् । तद्वरं तावन्मात्रमेवास्तु लाघवाय । अन्यथा त्वनुकूलत्वप्रयत्न त्वे द्वावुपाधी कल्पनीयौ; अचेतनेषु सर्वत्र गौणार्थास्त्विङोऽसति बाधके कल्पनीया इति चेत्—अत्रोच्यते—

[52] कृताकृतविभागेन कर्तृरूपव्यवस्थया ।
यत्न एव कृतिः पूर्वा परस्मिन् सैव भावना ॥ ॥ ९ ॥

यत्नपूर्वकत्वं हि प्रतिसन्धाय घटादौ कृत इति व्यवहारात् । हेतुसत्त्वप्रति-सन्धानेऽपि यत्नपूर्वकत्वप्रतिसन्धानविधुराणामङ्कुरादौ तदव्यवहारात् करोत्यर्थो यत्न एव तावदवसीयते । अन्यथा हि यत्किञ्चिदनुकूलपूर्वकत्वाविशेषात् 'घटा-दयः कृताः, न कृतास्त्वङ्कुरादय' इति कुतो व्यवहारनियमः । तेन च सर्वमा-ख्यातपदं विवियते इति सर्वत्र स एवार्थ इति निर्णयः । तथाच समुदिते प्रवृत्तं पदं तदेकदेशेऽपि प्रयुज्यते, विशुद्धिमात्रं पुरस्कृत्य ब्राह्मणे श्रोत्रियपदवत् ॥

मांसकमतमस्तु, नतु यत्नमात्रमाख्यातार्थ इति चेन्न — करोतीति विवरणाद्यत्नपरत्वावसा-यात् । ननु कृञोऽप्यनुकूलसामान्यमेवार्थ इति विवरणोपपत्तिः । अन्यथा पाके यतत इतिवत् पाके करोतीत्यापत्तेः । यदि च तदर्थमनुकूलत्वविशिष्टयत्नः कृञर्थ इत्युच्यते, तदा यत्नस्यापि शक्यतावच्छेदकत्वकल्पनाद्गौरवम् ; एवञ्च रथो गच्छति, तन्तवः कुर्वन्तीत्यादावप्यचेतनसंभ-विकिञ्चिद्व्यापारपरतयाऽऽख्यातं मुख्यमिति मीमांसकमतमेव श्रेय इति चेत्— उच्यते —

[52] घटवत् अङ्कुरे तद्धेतुस्वकीयकृष्यादिव्यापारसत्त्वेपि, 'बीजावापमात्रे नः प्रवृत्तिः बीजा-दङ्कुरोत्पत्तौ तु नास्मत्प्रयत्नः' इति परिशीलयन्तः, घटो मया कृतः, नाङ्कुर इति व्यवहरन्ति । ततो ज्ञायते कृञ्धातुर्यत्नवाचीति । एवं चेतनाचेतनकारकसमुदायेन कार्ये निष्पाद्यमाने चे-तन एव कर्तृत्वव्यवस्थाऽऽनुभविकी । तस्मादपि **पूर्वा** मुख्यभूता कृतिर्यत्न एव । अतः करो-तिविवियमाणत्वादाख्यातमपि यत्नार्थकम् । **परस्मिन्** अन्यत्र जघन्ये गौणे या कृतिर्व्यवहि-यमाणा तन्तवः कुर्वन्तीत्यादौ, सा केवलमनुकूलव्यापारात्मकभावनामात्रमिति । यथा श्रोत्रि-यशब्दो विशुद्धाधीतवेदवाची विशुद्धमात्रे गौणः, तथाऽनुकूलयत्नवाची अनुकूलमात्र इति ॥ अनुकूलसामान्यवाचित्वपक्षेपि अचेतने क्रियमाणः संबोध्यस्वतन्त्रवक्तृत्वाचिमध्यमोत्तमपुरुषव्य-

---

१. प्र. 'परस्मिन्नुत्तरकालवर्तिनि धात्वर्थे पूर्वा साधनीभूता भावना । यद्वा पूर्वापरस्मिन् पूर्वापरीभूतव्यापारात्मकधात्वर्थजनिका पूर्वापरीभूतत्वे सति कृतिराख्यातार्थः' इति ।

अन्यथाऽपि मध्यमोत्तमपुरुषगामिनः प्रत्ययाः, प्रथमे पुरुषे जानाति इच्छति प्रयतते अध्यवस्यति शेते संशेते इत्यादयश्च गौणार्था एवाचेतनेषु । नच वृत्त्यन्तरेणापि प्रयोगसम्भवे शक्तिकल्पना युक्ता; अन्याय्यश्चानेकार्थत्वमिति स्थितेः । अत एवानुभवोऽपि, यावदुक्तं भवति पाकानुकूलवर्तमानप्रयत्नवान , तावदुक्तं भवति पचतीति । एवं तथाभूतातिवृत्तप्रयत्नोऽपाक्षीदिति । एवं तथाभूतभाविप्रयत्नः पक्ष्यतीति । नतु पचतीति पाकानुकूलयत्किञ्चिद्वानिति । अन्यथाऽतिथावपि परिश्रमशयाने पचतीति प्रत्ययप्रसङ्गात् ॥

[53] अपिच कर्तृव्यापार एव कृदर्थः । चेतनश्च कर्ता; अन्यथा तद्व्यवस्थाऽनुपपत्तेः । न ह्यभिधीयमानव्यापारवत्त्वं कर्तृत्वम्, अनभिधानदशायां कुर्वतोऽप्यकर्तृत्वप्रसङ्गात् । नाप्याख्यातप्रत्ययाभिधानयोग्यव्यापारशालित्वं कर्तृत्वं, योग्यताया एवानिरूपणात्। फलानुगुणमात्रस्य सर्वकारकव्यापारसाधारणत्वात्। नापि विवक्षातो नियमः, अविवक्षादशायामनियमप्रसङ्गात् । स्वव्यापारे नेदमनिष्टमिति चेत् — एवं तर्हि, 'स्वव्यापारे च कर्तृत्वं सर्वत्रैवास्ति कारके' इति न्यायेन करणादिविलोपप्रसङ्गः ॥ न स्वव्यापारापेक्षया करणादिव्यवहारः; किन्तु प्रधानक्रियापेक्षया । अस्ति हि काचित् क्रियामुद्दिश्य प्रवर्तमानानां कारकाणामवा-

---

वहारो गौण एव; एवं कृञोऽचेतनेऽगौणत्वेपि जानातीत्यादेर्धातोरचेतने गौणत्वमेव । नच हर्यादिशब्दवदनेकशक्तिकल्पना, अन्यथैव निर्वाहेऽन्याय्यत्वात्। किञ्च पचतीति श्रवणेऽनुकूलत्वांशवद्यत्नत्वांशोऽप्यनुभवारूढः । अपिचानुकूलमात्रार्थकत्वे यं परिश्रमेणान्तर्वेदिकायां शयानमतिथिमुद्दिश्यान्तः पचन्ति, तस्मिन् अयंपचतीति स्यात्, प्रचलतः पाकव्यापारस्य शयनमेवानुकूलम् । अतो बाधकसत्त्वात्कृताकृतविभागेन सिद्धमनुकूलयत्नार्थकत्वम् ॥

[53] एवं कर्तृरूपव्यवस्थयापि—ननु यत्कारकव्यापारो धातुना यदाऽभिधीयते, तदा स कर्ता । अतएव स्थालीपचतीत्यादिप्रयोग इति चेन्न— ईदृशव्यापारविशेषानभिधानकाले अयं पाककर्तेति चेतनस्यैव निर्देशात् । नच चेतनव्यापारस्यापि पचतीत्यभिधानयोग्यत्वात्तथेति वाच्यम् — योग्यत्वस्य स्थाल्यादिव्यापारेपि सत्त्वात् । नच सर्वव्यापारस्याप्यभिधानयोग्यत्वेपि कदाचित्किञ्चिद्विवक्षया व्यवहारनियम इति वाच्यम्—स्वविवक्षां विना स्वरसतश्चेतन एव कर्तृव्यवहारात् । नच चेतनस्य स्वव्यापारं प्रति स्वयमाश्रयतया कर्तृत्वाद्विवक्षाविरहेपि कर्तृत्वं तस्याक्षतमिति वाच्यम् — अस्य स्वस्वव्यापारकर्तृत्वस्य सर्वकारकाविशिष्टत्वादविवक्षादशायां सर्वस्य कर्तृत्वापत्तेः । ननु न स्वव्यापारे स्वस्य करणत्वादिः; किंतु कर्तृत्वमेव । परन्त्वनेकेषां व्यापाराणां मध्ये एका प्रधानक्रिया, अन्ये तु तदर्थाः । तत्र तत्प्रधानक्रियायां चेतने कर्तरि

न्तरव्यापारयोगः, नत्ववान्तरव्यापारार्थमेव तेषां प्रवृत्तिरिति चेत्–तर्हि तदपेक्षयैव कर्तृकर्मादिव्यवहारविशेषनियमे किं कारणमिति चिन्त्यताम् । स्वातन्त्र्यादीतिचेत्– ननु तदेव किमन्यत् प्रयत्नादिसमवायादिति विविच्याभिधीयतामिति । तस्मात् सर्वत्र समानव्यापार एवाख्यातार्थः ॥

[54] तथापि फलानुगुणतैवास्तु प्रत्ययस्य प्रवृत्तिनिमित्तं; प्रयत्नस्त्वाक्षेपतो लप्स्यते इतिचेन्न —भावनैव हि यत्नात्मा सर्वत्राख्यातगोचरः ।

तया विवरणध्रौव्यादाक्षेपानुपपत्तितः ॥ ॥ १० ॥

केन हि तदाक्षिप्येत । नतावदनुकूलत्वमात्रेण ; तस्य प्रयत्नत्वेनाव्यापनात् । नहि यत्नत्वैकार्थसमवाय्येवानुकूलत्वम् ॥ अत एव न संख्यया ; तस्याः संख्येयमात्रपर्यवसायित्वात् ॥ कर्त्रेति चेत्–न–द्रव्यमात्रस्याकर्तृत्वात् । व्यापारवतश्चाभिधाने व्यापाराभिधानस्यावश्याभ्युपगमनीयत्वात् ॥ नापि धात्वर्थेन तदाक्षेपः ; विद्यते इत्यादौ तदसम्भवात् । न ह्यत्र धात्वर्थो भावनाऽपेक्षी; सत्ताया नित्यत्वात् ॥ तत्र न भविष्यतीतिचेत्–न–पूर्वापरीभूतभावनाऽनुभवस्याविशेषात् । भावनोपरागेण ह्यतथाभूतोऽप्यर्थस्तथा भासते इति । नच पदान्तरलब्धया भावनयाऽनुकूल-

---

सति काष्ठादयः करणादयो भवन्तीति चेत् – सत्यमेतत् । तथा चेतनव्यापारं प्रधानीकृत्य चेतनस्य कर्तृतया काष्ठादीनां करणादितया च स्वारसिके व्यवहारनियमे कोहेतुः? चेतनस्यैव स्वतन्त्रः कर्तेत्यनुशासितस्वातन्त्र्यं हेतुरिति चेत् — तर्हि चिकीर्षाप्रयत्नवत्त्वमेव स्वातन्त्र्यं नामेति सिद्धं यत्नवत्त्वं कर्तृत्वं, कृत्यर्थश्च यत्न इति । तस्मान्मध्यमोत्तमयोरिव प्रथमपुरुषेपि कृत्यर्थयत्नव्यापार एवाख्यातार्थ इति ॥

[54] ननु यत्नस्य कृत्यर्थत्वं, यत्नरहितस्थले आख्यातस्य गौणत्वञ्च काममस्तु ; अथाप्यनुकूलमात्रमाख्यातार्थः, पचति पाकं भावयतीति भावनया विवरणात् । यत्नलाभस्त्वाक्षेपादिति चेत् – उच्यते — भावयतिविवरणबलाद्भावना अनुकूलव्यापारोऽर्थः; तावता यत्ने आक्षेपलभ्यत्वस्यानुपपन्नत्वाद्यत्नात्मार्थ इत्यनुकूलत्वयत्नत्वविशिष्टमाख्यातार्थः । नहि यत्नत्वमाक्षेपलभ्यम् , व्यापकं ह्याक्षिप्येत; नतु व्याप्यम् । यत्नश्च नानुकूलत्वादिव्यापक इति । नच धात्वर्थस्य भावनासाध्यत्वाद्व्यापिका सा तेनाक्षिप्यतामिति वाच्यम् — विद्यते, अस्तीत्यादिधात्वर्थस्यासाध्यत्वात् । नच यो धात्वर्थः पाकादिस्तत्रैव तदाक्षेप इति वाच्यम् —— तिङन्तस्थले सर्वत्र धात्वर्थक्रिया साध्यावस्थापन्ना प्रतीयत इति वैयाकरणैरभ्युक्ततया सत्ताया अपि हि तथैव प्रतीतिः ! परन्तु तस्याः नित्यत्वादाक्षेपशक्तिर्नास्ति । यद्याख्यातार्थो भावना, तर्हि धात्वर्थं प्रति पूर्वभूता कर्तारंप्रत्यपरभूता च या भावना पूर्वभूतमात्मानं प्रत्यपरभूतधात्वर्थविष-

तायाः प्रत्ययार्थस्यान्वयः; तदसम्भवात्। नखलु प्रकृत्यैव साऽभिधीयते। धातूनां क्रियाफलमात्राभिधायित्वात्। अन्यथा पाक इत्यादावपि भावनाऽनुभवप्रसङ्गात्। नापि चैत्र इत्यादिना पदान्तरेण; प्रकृतिप्रत्यययोरुभयोरप्यकारकार्थत्वात्॥ ओदनमित्यादेः कारकपदत्वात् तस्य च क्रियोपहितत्वात्तेनाभिधानमाक्षेपो वा। कथमन्यथा ओदनमित्युक्ते किं भुङ्क्ते पचति वेति विशेषाकाङ्क्षेति-चेत्–न–पचतीत्युक्ते किमोदनं तेमनं वेति विशेषाकाङ्क्षादर्शनात्। सा चाक्षेपाभिधानयोरन्यतरमन्तरेण न स्यात्। तस्यां दशायां न चेदाक्षेपः, नूनमभिधानमेवेति॥

[55] स्यादेतत्–अभिधीयतां तर्हि कर्ताऽपि। तदनभिधाने हि सङ्ख्येयमात्रमाक्षिप्य सङ्ख्या कथं कर्तारमन्वियात्, न तु कर्म्मादिकमपि। शाकसूपौ पचति शाकसूपौदनान् पचतीत्यादौ विरोधनिरस्ता सङ्ख्या चैत्र इति कर्तारमविरुद्धमनुगच्छतीति चेत्–चैत्र ओदनं पचतीत्यत्र का गतिः। एकत्र निर्णीतः शास्त्रार्थोऽपरत्रापि तथा, यववराहादिवदिति चेन्न–पच्यते इत्यादावपि तथाभावप्रसङ्गात्। चैत्राभ्यां चैत्रैरिति विरोधनिरस्ता सूप इत्यविरुद्धं कर्म्म समनुक्रामतीति चेत्।

यिणी च, तस्यास्सत्तायामारोपादसाध्यापि साध्यात्मना प्रतीयत इति सुवचमिति॥ ननु कारकेण भावनाक्षिप्यताम्। चैत्र ओदनं पचतीत्यादौ प्रथमाया अकारकविभक्तित्वात्प्रातिपदिकार्थमात्रे पाणिन्यनुशिष्टतया प्रातिपदिकप्रत्ययोः कारकार्थकत्वाभावेपि ओदनमित्यादेः कारकविभक्तित्वात् कारकत्वस्य क्रियानिर्वर्तकत्वरूपतया भावनारूपक्रियापि द्वितीयादिनाऽभिधीयताम्। यदितु कर्मत्वादिर्निष्कृष्टशक्तिविशेष एव द्वितीयाद्यर्थः; तदाप्यविनाभूतत्वाद्भावनाऽऽक्षिप्यतामिति चेत्— कारकं विना क्रियामात्रप्रयोगेपि क्रियया कारकाकांक्षादर्शनात्तदा भावना कथं ज्ञाता कारकाक्षेपिणी? नहि तदा सा केनचिदाक्षिप्ता; आक्षेपकस्य कारकस्याश्रवणात्। अत आख्याताभिहितेति वक्तव्यमिति सिद्धमनुकूलयत्न आख्यातार्थ इति॥

[55] नन्वाख्यातस्य कर्ताऽर्थ इति वैयाकरणमतमेव युक्तम्, पचतीत्येतावच्छ्रवणे भावनाप्रतीत्या तस्या इव, पाककर्तेति, एकः पाककर्तेति च प्रतीतिबलात्कर्तुरप्याख्यातवाच्यत्वं ह्यावश्यकम्। नच भावनाप्रतीत्या कर्तुः, संख्याप्रतीत्या तदाश्रयस्य चाक्षेपमात्रं, नतु वाच्यत्वमिति वाच्यम्—संख्यायास्संख्येयाविनाभावात्सामान्यतस्तदाक्षेपेपि कर्मादेरपि संख्येयत्वसंभवेन कर्तर्येवान्वय इत्यसिद्धेः। शाकसूपौ पचतीत्यादौ कर्मादेर्विरुद्धसंख्यावरोधादेकत्वान्वयायोगेपि चैत्र ओदनं पचतीत्यत्र कर्मण्यप्यन्वयसंभवात्। किञ्चिद्विधिगतवाक्यशेषनिर्णीतदीर्घशूकादिरूपार्थविशेषस्य यवैर्यजेतेत्यादिविध्यन्तरेपि यवशब्दे स्वीकारवत् विरुद्धसंख्यावरोधस्थलकृतनिर्णयानुसारेण सर्वत्र तिङुपात्तसंख्यायाः कर्तर्यन्वयस्वीकारे कर्मणिप्रयोगेपि तथा

चैत्रमैत्राभ्यां शाकसूपौ पच्येते इत्यत्र का गतिः । अन्यत्र निर्णीतेनार्थेन व्यवहार इति चेन्न — पचतीत्यादावपि तथाभावप्रसङ्गात् ।। तत्र पूर्वकएव निर्णयः, पच्यते इत्यत्रत्वपर इति चेन्न — विशेषाभावात् । आत्मनेपदपरस्मैपदाभ्यां विशेष इति चेन्न — पच्यते पचते पक्ष्यते इत्यादौ विप्लवप्रसङ्गादिति ॥

[56] दृश्यते च समानप्रत्ययाभिहितेनान्वयस्सङ्ख्यायाः । तद्यथा, भूयते सुप्यते इत्यादौ । नहि तत्र कर्त्रा कर्म्मणा वाऽन्येनैव वा केनचिदन्वयः, किन्तु भावेनैव । अनन्वये तदभिधायिनोऽनर्थकत्वप्रसङ्गात् । आक्षिप्तेनचान्वये तत्रापि कर्त्रैवान्वयापत्तेः । कोहि सुप्यते स्वपितीत्यनयोः कर्त्राक्षेपं प्रति विशेषः । स्यादेतत् (अ. १ - ३ - १३) भावकर्म्मणोरित्याद्यनुशासनबलात्तावत् भावकर्म्मणी प्रत्ययवाच्ये । ततस्तदभिहिता सङ्ख्या ताभ्यामन्वीयते । यस्तु प्रत्ययो न तत्ो-

---

स्यात् । आत्मनेपदप्रत्ययार्थसंख्यायाः कर्मणि, परस्मैपदोपात्तायाः कर्तरीति नियमे तु पच्यत इत्यत्रेव पचत इत्यत्रापि कर्मान्वयस्स्यात् । ननु विशिष्य तत्तत्पदनिर्देशेन पच्यतेपदोपात्तसंख्या कर्मणि, पचतेपचतीत्याद्युपात्ता कर्तरीति नियमः कल्प्यत इति चेत् — कर्मणि कर्तरि च लृटि पक्ष्यत इति रूपस्यैकतया पक्ष्यतेपदोपात्तायाः कुत्रान्वयनियमः ? अनियम इति चेत् — चैत्रेणौदनः पक्ष्यत इत्यत्रापि चैत्रेन्वयापत्तिरिति ॥

[56] किञ्चाख्यातोपात्तसंख्यायास्तदेकप्रत्ययोपात्तसंख्येयान्वयस्य क्लृप्तत्वात्तादृशव्युत्पत्त्यनुसारेणापि कर्तरि संख्यान्वयाय कर्तृवाचित्वमावश्यकम् । भावेप्रयोगे हि प्रत्ययार्थभूते भावे धात्वर्थे संख्यान्वयः । नच स नेष्टः; अभिहितस्य कुत्राप्यन्वयावश्यकत्वात् । न केवलमत्र व्युत्पत्त्यनुरोधमात्रम्; अक्षिप्तेनापि सह संख्यान्वये तु संख्येयसामान्यस्याक्षेपात्सर्वत्रान्वयस्स्यात् । भावनाक्षिप्ततदाश्रयान्वयस्वीकारे च सुप्यत इत्यादावपि कर्तर्यन्वयस्स्यात् । नच स्वापस्य ज्ञानाभावरूपतया तदनुकूलभावना नास्तीति वाच्यम् — स्वपितीत्यादावपि कर्तुरभावप्रसंगात् । ननु कारकाणां मध्ये मुख्यः कर्ता, तस्यैव प्रथमं व्यापारशालित्वात्, तदधीनव्यापारकत्वादन्येषाम् । तस्मात्संख्या मुख्ये कर्तर्येवान्वेति, 'मुख्यं वा पूर्वचोदनाल्लोकव' दिति (मी. १२-२ - २३) न्यायात् । यत्रोभयोर्धर्मसमर्पणेनानुग्राह्ययोरेकप्रयोगविषयतया तन्त्रानुष्ठानवलात्कस्यचिद्धर्मत्यागेन कस्यचिदेव धर्मो ग्राह्यो भवति, तत्र प्रथमस्य सधर्मत्वं, न तु परस्य; यथा लोके केनचित्प्रथमाक्रान्ते स्थाने पश्चादागतस्य नावकाशस्तथेति हि तत्र स्थितम् । अतः प्रथमोपस्थितसंबन्धस्य दुस्त्यजत्वात्कर्तर्येवान्वयः । यत्रतूक्तमुख्यत्वन्यायस्य भूयसान्यायः अङ्गगुणविरोधन्यायश्चैव किञ्चिद्बाधकम्, तत्र प्रयाजादीनां प्राकरणिकक्रत्वत्वरोधात्, यस्य पर्णमयी जुहूर्भवतीत्युक्तपर्णतादेर्वाक्योपात्तजुह्वाद्युद्देश्यावरोधाच्च फलान्तरसंबन्धाकल्पनवत् स-

त्पन्नः, तदभिहिता सङ्ख्या, 'मुख्यं वा पूर्वचोदनाल्लोकवत्' (मी०. १२, २, २३,) इति न्यायेन कर्तारमेवाश्रयते इति नियमः — न – विपर्य्ययप्रसङ्गात् । 'शेषात् कर्तरि परस्मैपदं' (अ०. १, ३, ७८), (३-१-६८) 'कर्तरिशबि' त्यनुशासनबलाद्भावकर्तारौ प्रत्ययवाच्यौ, ततस्तदभिहिता सङ्ख्याऽपि ताभ्यामन्वीयते; यस्तु प्रत्ययो न तत्रोत्पन्नस्तदभिहिता संख्या तेनैव न्यायेन कर्म्मैव समाश्रयेदिति नियमोपपत्तेः ॥ तस्मान्मतिकर्दमपहाय यथाऽनुशासनमेव युज्यते इति प्राप्तम् । एवं प्राप्तेऽभिधीयते —

[57] आक्षेपलभ्ये सङ्ख्येये नाभिधानस्य कल्पना ।
सङ्ख्येयमात्रलाभेऽपि साकाङ्क्षेण व्यवस्थितिः ॥ ११ ॥

सङ्ख्याऽपि तावदियं भावनानुगामिनी; यं यं भावनान्वेति, तं तं सङ्ख्याऽपीति स्थितेः; एकप्रत्ययवाच्यत्वनियमात् । भावनाच शुद्धं प्रातिपदिकार्थमात्रमाका-

---

मानप्रत्ययोपात्तभावकर्मान्यतरावरोधात्कर्त्रन्वयो न कल्प्यते । भावस्य कर्मणश्च संख्यावाचिप्रत्ययोपात्तत्वञ्च भावकर्मणोरात्मनेपदविधाय्यनुशासनादिनि — अत्रोच्यते — भावकर्मणोरिव कर्तर्यपि आत्मनेपदनिमित्तरहिताद्धातोः परस्मैपदाद्यनुशासनमविशिष्टम् । तत्र भावकर्त्रोरेवोपात्तत्वं स्वीकृत्य कर्मण्यनुशासनमेवोपेक्ष्य, 'कर्मण्यन्वय औत्सर्गिकः, तत्र बाधकं तु प्रत्ययेन भाव कर्त्रभिधान' मिति किं न स्यात्? कर्मान्वयस्यौत्सर्गिकत्वेको न्याय इति चेत् — मुख्यंवेति प्रागुक्त एव । यथाच कारकाणां कर्त्रधीनत्वात्कर्तुर्मुख्यत्वं, तथा भावनाया भाव्याकांक्षेव प्राथमिकीति कर्मण एवान्वयप्राथम्यमिति मुख्यत्वम् । यद्यपि 'फलञ्च पुरुषार्थत्वा' दिति न्यायेन भोक्तुः प्राधान्यम्, अथापि कर्तृत्वदशापन्नपुरुषात्फलस्यैव प्राधान्यमिति । तस्माद्युक्तेरप्रतिष्ठितत्वाद्विनिगमनाविरहात्सर्वत्रानुशासनं स्थितमनुपेक्ष्याख्यातार्थसंख्या तद्वाच्यसंख्येयान्वयिनीति नियम एव कार्य इति सिद्धं कर्तृवाचित्वमिति ॥

[57] अत्राभिधीयते — संख्यान्यथानुपपत्त्यैव तदाश्रयाक्षेपसंभवान्न तस्य वाच्यत्वम् । यद्यपि संख्येयमात्राक्षेपः, अथाप्युभयाकांक्षाया एवान्वयप्रयोजकत्वाद्यत् संख्येयमन्वयसाकांक्षं, तत्रैव संख्यान्वय इति न कर्त्राद्यन्वयनियमहानिः । ननु चैत्रः पचतीत्यादौ सुबुपात्तसंख्यान्वयेन कर्तुर्निराकांक्षत्वात्कथमुभयाकांक्षेति चेत् — श्रूयतामाकूतम् । आख्यातश्रुतसंख्याया अन्वयस्थलाकांक्षायां, तेनैव प्रत्ययेन भावनाया अप्युपात्तत्वाद्यत् भावनाविशेष्यं, तदेव संख्याविशेष्यमित्युपस्थितिलाघवमनुसृत्य कल्प्यते । भावनाविशेष्यमेव किमिति चेत् भावनाया व्यापाररूपत्वादाश्रयाकांक्षायां यस्य भावनान्वयात्प्रागेव किञ्चिद्व्यापारसंबन्धो नावगतस्तस्य व्यापारसाकांक्षस्याश्रयत्वमुभयाकांक्षावलादिष्यते । अतश्च संख्याविषये उभयाकांक्षा पृथङ्नापेक्ष्यते।

इति । नहि व्यापारवन्तं व्यापार आश्रयते, [1]आत्माश्रयात् । समवायं प्रति तदनुपयोगात् । विजातीयव्यापारवतोऽकर्तृत्वाच्च । नच द्वितीयाद्याः प्रातिपदिकविभक्तयः । ततः प्रथमानिर्दिष्टेनैव भावनाऽन्वीयते इति तस्यान्वययोग्यतानियमात् सङ्ख्याऽपि तदनुगामिनी तेनैवान्वीयते इति नातिप्रसङ्गः, नञर्थवत् । यथा हि चैत्रो न ब्राह्मणो न गौरो न स्पन्दते न कुण्डलीत्यादौ विशेषणविशेष्यसमभिव्याहाराविशेषेऽपि नञा तदनभिधानाविशेषेऽपि नञर्थस्य विशेषणांशैरेवान्वयः न विशेष्यांशेन । ननु बाधात्तत्र तथा । नहि विशेष्येण तदन्वये विशेषणोपादानमर्थवद्भवेत्, तन्निषेधेनैव विशेषणनिषेधोपलब्धेः । उभयनिषेधे चावृत्तौ वाक्यभेदात्; अनावृत्तौ निराकाङ्क्षत्वादिति चेत् — न — तुल्यत्वात् । सामानप्रत्ययोपात्तभावना-

---

ननु किञ्चिद्व्यापारवत्येव भावनाव्यापारान्वयः किन्न स्यादिति चेत् — किं विशेषणीभूते व्यापारे भावनायास्सामानाधिकरण्यादिनाऽन्वयाय तथोच्यते, किंवा धर्मिस्वरूपे समवायेन । नाद्यः, व्यापारे व्यापारान्वये आत्माश्रयदोषात् ! नान्त्यः, धर्मिणि भावनासमवायं प्रति तत्र व्यापारवैशिष्ट्यस्यानुपयुक्तत्वात् । नच स्वभिन्नव्यापारे सामानाधिकरण्यादिना भावनान्वये कथमात्माश्रय इति वाच्यम् — तर्हि कारकान्तरव्यापारस्य भावनायाश्च विरोधात्सामानाधिकरण्याद्ययोगात् । तस्माद्द्वितीयादिविभक्तिनिर्दिष्टकर्मादिव्यापारान्तरान्वितमोदनादि विहाय प्रथमान्तोपात्तं शुद्धं कारकान्तरव्यापारासंबद्धं चैत्रादिकमेव भावनाऽन्वेति । धर्मधर्मिणोर्मध्ये धर्मिणो विशेष्यत्वस्य स्वरसत्वाच्चैत्रादेर्विशेष्यत्वम् । तथाच भावनाविशेष्यस्यैव संख्याविशेष्यत्वात्संख्यापि तत्रैवान्वेति । (एवं चैत्रेणौदनःपच्यत इत्यादावपि तृतीयया कर्तृकारकव्यापारोपादानाच्चैत्रो नाख्यातोपात्तभावनाविशेष्यः; किन्तु प्रातिपदिकार्थानुशिष्टप्रथमानिर्दिष्ट ओदन एव । इयान्विशेषः, कर्तरिप्रयोगे भावना प्रथमान्तार्थे आश्रयतासंबन्धेनान्वेति; कर्मणिप्रयोगे चौचित्यादुद्देश्यतासंबन्धेन । भावप्रयोगे च कर्मणोऽभावात् चैत्रेणेति तृतीयया कर्तृव्यापारस्योक्तत्वाच्च धात्वर्थे जन्यत्वादिसंबन्धेन भावनान्वयः । तथाच कर्मकर्तृभावेषु लकारानुशासनस्यापि लकारार्थभावनाया यथायथं कर्मकर्तृधात्वर्थेष्वन्वयमात्रे तात्पर्यमिति न कर्मादिशक्तिग्राहकत्वम् । नच तर्हि भावेप्रयोगेपि चैत्रमैत्रादिकर्तृभेदेन क्रियाभेदाच्चैत्रमैत्राभ्यां सुप्येते इति द्विवचनाद्यापत्तिरिति

---

१. प्र. तद्व्यापारविशिष्टेऽन्वये आह आत्माश्रयादिति । व्यापारान्तरविशिष्टेऽन्वयेऽनवस्थितिरिति भावः युक्त्यन्तरमाह समवायमिति । भावनाया इव समवायस्यापि विशिष्टनिराकांक्षत्वादिति भावः । यद्वा समवायो मेलक ' इति । २. प्र. ' न चैत्र इत्यादिनाक्रमेण जातिगुणकर्मद्रव्याणां विशेषणानां निषेध्यत्वमुक्त ' मिति वाक्यदर्शनात् नचैत्रो ब्राह्मणो न गौरइति पाठ ऊह्यते । उपरितनपाठस्तु क. पु. । ख. पाठस्तु, ' यथाहि चैत्रो न गौर ' इति ।

ऽक्षितान्वयोपपत्तौ बाधकं विना सन्निहितत्यागेन व्यवहितपरिग्रहस्य गुरुत्वात्। भावनायाश्च सामान्याक्षेपेऽपि साकाङ्क्षपरित्यागे निराकाङ्क्षान्वयानुपपत्तेः। नह्य-न्यतराकाङ्क्षा अन्वयहेतुः, अपितूभयाकाङ्क्षा। प्रातिपदिकार्थो हि फलेनान्वयम-लभमानः क्रियासम्बन्धमपेक्षते, भावनाऽपि व्यापारभूता सती व्यापारिणमित्युभ-याकाङ्क्षा अन्वयहेतुः। कटं कटेनेत्यादि तु कारकतयैव फलसमन्वितं न व्यापारान्तरमपेक्षत इति निराकाङ्क्षमिति॥ अत एवास्यते सुप्यते इत्यादौ नाक्षिप्तेनान्वयः। न हि चैत्रेणेति तृतीयान्तशब्दस्य भावनायामाकाङ्क्षाऽस्ति। भाव्याकाङ्क्षाऽस्तीति चेत् — न — फलेन शयनादिधात्वर्थेनान्वयात्। फलसंबन्धिनश्चात्र कर्त्रनतिरेकात्। नहि शयनादयो धात्वर्थाः कर्त्रतिरे-

---

वाच्यम् — एककर्तृकस्थलेपि पूर्वापरीभूतगमनक्रियादेरवान्तरभेददर्शनेन चैत्रेण गम्यन्त इत्या-द्यनेकवचनापत्त्या तत्परिहाराय भावानुशासनस्य धात्वर्थगतजात्यनुशासनतात्पर्यस्वीकारात्कर्तृ-भेदेपि धात्वर्थगतजात्यैक्यबलादेकवचनमात्रोपपत्तेः। नच कर्मणिप्रयोगादौ भावनाया आ-ख्यातोपात्तत्वे मानाभावः; पच्यते, पाकः क्रियत इति विरणस्यैव प्रमाणत्वात्। नच कर्म-प्रत्ययस्य क्रियाजन्यफलमर्थः, तत्रैवाख्यातबोध्यतया भावनावाचोयुक्तिरिति वाच्यम् — करोति क्रियत इति विवरणवशान्मुख्यभावनाया एव सर्वत्र वाच्यत्वात्) तथाच सर्वत्र भावनाविशेष्य एव संख्यान्वयः। यथा विशेष्यविशेषणोभयसमभिव्याहारेपि नञो विशेषणनिषेधपरत्वम्, तथा भावनाविशेष्यतदविशेष्यसमभिव्याहारेप्याख्यातस्य भावनाविशेष्यान्वयिसंख्यापरत्वम्! ननु नञो विशेष्यनिषेधपरत्वे विशेषणनिर्देशवैयर्थ्यात्, विशेष्यनिषेधेनैव विशेषणविशिष्टतद्विशेष्य-निषेधसिद्धौ विशेषणनिषेधस्यानावश्यकत्वात्, पृथग्विशेष्यनिषेधविशेषणनिषेधोभयकल्पने नञ उभयत्रान्वयायाऽऽवृत्तिप्रसंगात्। आवृत्त्यभावेचैकत्रान्वयेन शान्ताकांक्षस्यान्यत्रान्वयायोगाद्विशे-षणनिषेध एव तात्पर्यम्, विशेष्योक्तिश्चानुयोगिनिर्देशायेति विवेचनाद्बाधकबलान्नञ्स्थले स नियम इति चेन्न—एवमविवेचनेपि नञो विधेयान्वयस्येव प्रकृतेपि शीघ्रोपस्थितभावनाविशे-ष्यान्वयस्यौत्सर्गिकत्वात्। आकांक्षितेनान्वय इत्यस्योभयत्र तुल्यत्वाच्च। ननु चैत्रः कटमान-यतीत्यादौ चैत्रः आनयनक्रियायां कुतो नान्वेतीति चेत् — कारकाणामेव क्रियान्वयात् प्रथ-मान्तार्थस्यचाकारकत्वात् भावनाफलभूतया क्रिययान्वयमलभमानो व्यापारसाकांक्ष इति, द्वि-तीयादिकं तु कारकवाचीति तत्र भावनाफलभूतक्रियान्वयः॥ यत्तु भावेप्रयोगेपि कर्तरि सं-ख्यान्वयापादनं, तत् तृतीयान्तनिर्दिष्टचैत्रादेर्व्यापारानिराकांक्षत्वोपपादनेन निरस्तम्। ननु भा-व्याकांक्षाशालिनी भावना भाव्येनान्वेतु, नतु भावेनेति चेत् — किमिदं भाव्यं नाम? फलं वा फलसंबन्धि वा। आद्ये क्रियायाः भावनाफलत्वात्फलान्वयस्सिद्धः। अन्त्ये क्रियाश्रय

किंसंबद्धाः । नच फलतत्संबन्धिव्यतिरेकेणान्यो भाव्यो नाम, यमपेक्षेत ॥

[58] स्यादेतत् – किमिति न प्रयुज्यते कटः करोति चैत्रमित्यादि, अभिहितानभिहितव्यवस्थाऽभावादिति चेत् – न चैत्रमिति प्रथमान्तस्यासाधुत्वात्। द्वितीयान्तस्य तु कर्म्मवचनत्वेन तत्संबन्धाद्भाव्यानपेक्षिणी भावना भावकमात्रमपेक्षेत । नच कटस्य चैत्रं प्रतिभावकत्वं, विपर्ययात् । अनाप्तेन तु विवक्षायां प्रयुज्यत एव । प्रयुज्यतां तर्हि कटः करोति चैत्र इत्यादि – न – नित्यसन्दिग्धत्वेन वाक्यार्थासमर्पकत्वात् । ततस्तदुपपत्तये विशेषस्य व्यञ्जनीयत्वात् ॥ व्यज्यतां तर्हि तृतीयया चैत्रेणेति, एवं देवदत्तः क्रियते कटमिति व्यज्यतां द्वितीययेति चेत् – न – अप्रयोगात् । नह्यनाप्तेनाप्येवंप्रायाणि प्रयुज्यन्ते । लक्षणाविरोधेन कुत एतदेवेति चेत्–लोकस्यापर्यनुयोज्यत्वात् । नहि गार्गिकयेति पदं साध्विति श्लाघाऽभिधायिपदसन्निधिमनपेक्ष्य प्रयुज्यते ॥ तस्य तदुपाधिनैव विहितत्वादिति चेत् — एतदेव कुतः? लोके तथैव प्रयोगदर्शनादिति चेत् – तुल्यम् ।

एव फलाश्रयः, स च निराकांक्ष इत्युक्तम् । तत्सिद्धं लाघवाद्भावनाविशेष्य एव संख्यान्वयान्न कर्तुर्वाच्यत्वमिति ॥

[58] ननु तर्हि कर्तृकर्माद्यभिधानस्य कुत्राप्यस्वीकृतत्वादभिहितानभिहितव्यवस्थाया अनादृतत्वात् कटः करोति चैत्रमिति प्रयोगः कुतो नेति चेत् — किमाप्तस्य प्रयोग आपाद्यते, उतानाप्तस्य? आद्येपि किं चैत्रमिति प्रथमान्तं द्वितीयान्तं वा । पूर्वत्रासाधुत्वं पदस्य, तस्य पुल्लिङ्गत्वात् । उत्तरत्र द्वितीयायाः कर्मार्थकत्वाच्चैत्रस्य भाव्यत्वं वाच्यम् । नच चैत्रकटयोर्मिथोभाव्यभावकभावः । चैत्रस्यैव कटभावकत्वदर्शनात् । अन्त्यस्त्विष्यत एव, अनाप्तस्याशृङ्खलत्वात् । एवं कटःकरोति चैत्र इत्यपि न प्रयोगः भाव्यभावकानिर्णयात् । ननु तृतीयया कर्तृत्वस्य, द्वितीयया कर्मत्वस्य च बोधनाच्चैत्रेणं कटः करोति, चैत्रः कटं क्रियत इति प्रयोगस्स्यादिति चेत् — श्लाघाद्यसन्निधानेपि गार्गिकाशब्दः कुतो न प्रयुज्यत इति पृच्छामः। ननु 'गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु (अ० ५-१-१३४)इति सूत्रेण गोत्रप्रत्ययान्ताच्चरणवाचिनश्चशब्दात् श्लाघादिषु विषयभूतेषु भावे कर्मणि च वुञ्विधानात् गार्ग्य शब्दाद्भावे वुञि गार्ग्यात्वेन विकत्थत इत्यर्थे गार्गिकया श्लाघत इति प्रयोगः । अत्याकारोऽधिक्षेपः । तदवेतः ते भावकर्मणी प्राप्तो ज्ञातवान्वा । एवं श्लाघाद्यसन्निधानेचानुशासनाभावान्नतत्प्रयोग इति चेत् — अनुशासनमेवान्यविषयेपि कुतो नेति पृच्छामः । अथ पाणिनिरन्यो वा न स्वेच्छाया शब्दप्रयोगं शास्ति; किन्तु लोकप्रयोगनियमं दर्शयति केवलमिति चेत् – तर्हि

१. प्रकाशानुसारेणशोधनम् । दृश्यमानपाठः 'भाव्यानपेक्षिणी भावेन' इति ।

करोतीत्यादि कर्मविभक्तिसमभिव्याहारेणैव प्रयुज्यते, क्रियते इति कर्तृविभक्ति-समभिव्याहारेणैवेति किमत्र क्रियताम् ॥

[59] इममेव विशेषमुररीकृत्यानभिहिताधिकारानुशासनेन ह्येतावान् परामर्शस्सर्वेषां हृदि पदमादधातीत्यभिधानानभिधानविभाग एव व्युत्पादनदशायां पेशल इति ॥

[60] स्यादेतत् – भवतु सर्वाख्यातसाधारणी भावना; कालविशेषसंबन्धिनी सा लडाद्यर्थः, कालत्रयापरामृष्टा लिङर्थ इति चेत् – न यत्नपदेन समानार्थत्व-

---

गार्गिकया श्लाघन इतिवत् चैत्रः कटं करोति, चैत्रेण कटः क्रियत इत्येव लोकस्थानादिः प्रयोग इति कथमन्यथापादनस्यावसरः । तस्मात्पाणिनेरिव सर्वेषामपि पूर्वव्यवहार एव शरणम् ॥

[59] ननु सत्यमेतत् । अथाप्यभिहितानभिहितव्यवस्थानुशासनस्य कोऽर्थ इति चेत् – इमं लोकसिद्धविशेषमेव मनसिकृत्य कयाचिद्भङ्ग्या तद्व्युत्पादनायासत्यभूतप्रकृतिप्रत्ययविभागेन शब्दनिष्पादनमिवावास्तवभूताभिधानानभिधानविभागेन व्युत्पादनं सौकर्याय समाद्रियतेति ॥ यद्वा शब्दानित्यत्ववादिभिः प्रकृतिप्रत्ययविभागादेरपि सत्यत्वस्वीकारसंभवात् तत्र पाणिन्याद्यनेकाभिमतनैकविधप्रकृतिप्रत्ययविभागवैयाकुलीत्यागेन श्रूयमाणानुपूर्व्यां रामः, राममित्यादौ यथायथं प्रकृतिप्रत्ययांशशोधनमिष्यते । अनभिधानानुशासनञ्चेमं प्रागुक्तं विशेषमूरीकृत्यैव । तदयमर्थः — कर्तृकर्मादिषु अनभिहितेषु भावनाविशेष्यत्वेनाबोधितेषु तृतीयाद्वितीयादिकं कर्तृत्वकर्मत्वादिकारकार्थे भवतीति । विशेष्यत्वविवक्षायां तु चैत्रः पचति, काष्ठं पचति, स्थाली पचतीत्यादिः प्रयोगः । सर्वत्र कृतिराख्यातार्थः । तस्यास्स्वारसिकाश्रयतासंबन्धेनान्वयश्चैत्रः पचतीत्यत्र । अतस्स मुख्यकर्ता । काष्ठस्थाल्यादौ कृतेरुचितपरम्परासंबन्धेनान्वयः । अतस्तत्र वैवक्षिककर्तृत्वम् । ओदनः पचतीति प्रयोगस्तु कर्मणः कर्तृत्वविवक्षया नेष्यते । कर्मणः प्रथमान्तनिर्देशे चैत्रेणेति कर्तुस्तृतीयया निर्देशस्य पच्यत इति प्रयोगस्य च लोकसिद्धत्वात् । कर्मणोऽपि कर्तृत्वविवक्षया कर्मकर्तरिप्रयोगस्त्विष्यत एवेति ॥ अथवा 'लः कर्मणि च भावे चाकर्मकेभ्य' इत्यादिसूत्रैः 'द्व्येकयोर्द्विवचनैकवचने,' 'बहुषु बहुवचन' मित्येतदेकवाक्यभूतैः कर्मकर्तृसंख्याभिधायित्वस्य लकारे बोधनादनभिहिताधिकारेण्याख्यातेन कर्त्रादिसंख्यानभिधान एव तृतीयादिविधानमिष्टमितीममेव विशेषमूरीकृत्यानभिहितानुशासनमिति; यद्वक्ष्यति करणधर्मशोधनावसरे, 'तत्संख्याभिधानं हि तदभिधानमाख्यातेनेति ॥ सर्वथाऽऽख्यातस्य कर्त्रभिधायित्वं नास्ति, किंतु कृतिमात्राभिधायित्वमिति सिद्धं प्रवृत्तेस्सर्वाख्यातसाधारण्यम् ॥

इत्थं कृतेस्तिङर्थत्वे प्रथमान्तेन चान्वये ।
व्याकृतेश्चापि निर्वाहे न्यायाचार्यमतं मतम् ॥

[60] अस्तु तावत् सर्वाख्यातसाधारण्यम् । ततः किमिति चेत् – विशेषतो लिङर्थत्वा-

प्रसङ्गात्।। विषयोपरागानुपरागाभ्यां विशेष इति चेन्न—यागयत्न इत्यनेन पर्यायतापत्तेः।। कर्तृसङ्ख्याभिधानानभिधानाभ्यां विशेष इति चेन्न- यागःयत्नवानित्यनेन साम्यापत्तेः।। इष्टएवायमर्थ इति चेन्न-इतो वत्सरशतेनाप्यप्रवृत्तेः ।। फलसमभिव्याहाराभावान्न प्रवर्त्तते इति चेन्न—स्वर्गकामो यागयत्नवानित्यतोऽप्यप्रवृत्तेः । तत् कस्य हेतोः ? न हि यत्नो यत्नस्य हेतुर्यत्नप्रतीतिर्वा यत्नस्य कारणं; अपि त्विच्छा।।

[61] न च साऽपि प्रतीता यत्नजननी — येन सैव विध्यर्थ इत्यनुगम्यतां— अपितु सत्तया । नच लिङः श्रुतिकाले सा सती । नच लिङेव तां जनयति; अर्थविशेषमप्रत्यायायन्त्यास्तस्यास्तज्जनकत्वे व्युत्पत्तिग्रहणवैयर्थ्यात् । अनुपलब्धलिङोऽपीच्छानुत्पत्तिप्रसङ्गादिति । एतेन – वृद्धव्यवहाराद्व्युत्पत्तिर्भवन्ती बालस्यात्मनि प्रवृत्तिहेतुर्योऽवगतस्तमेवाश्रयेत्, स्वयञ्च कुर्यामिति सङ्कल्पादेवायं प्रवृत्तः, ततस्सएव लिङर्थ इति निरस्तम् । कुर्यामिति प्रयत्नो वा स्यादिच्छा वा ? नाद्यः, स्वात्मनि वृत्तिविरोधात् । न द्वितीयः; सा हि सत्तयैव प्रयत्नोत्पादिनी । न च लिङः श्रुतिकाले सा सतीत्युक्तम् ॥ फलेच्छा तु निसर्गवाहितया सत्यपि न प्रयत्नं प्रति हेतुः; अन्यविषयत्वात् । तदर्थञ्च शास्त्रवैयर्थ्यात् । तस्याः कारणान्तरतएव सिद्धेस्तत्प्रतीत्यर्थमपि शास्त्रानपेक्षणात् । तस्याः मनोवेद्यत्वात् । अ-

---

भावाद्विधित्वं न भवतीति । ननु लडादिभिर्वर्तमानकालादिविशिष्टतयोच्यते, लिङादिना तु शुद्धतयेति विशेषात्स एव विधिरिति चेन्न— अप्रवृत्तेः – यत्नपदश्रवणादिव लिङश्रवणेपि प्रवृत्तिर्न स्यादिति; विरोधतश्च – यत्नवत् यत्नप्रतीतिरपि हि न यत्नहेतुः; अन्यथा इच्छामात्रात्तदुत्पत्तिर्विरुध्येतेति ॥

[61] नचेच्छैव विधिः, तस्यास्सत्तामात्रेण हेतुत्वात्, लिङर्थत्वे च तस्याः ज्ञायमानत्वमेव, नतु सत्त्वमिति । प्रत्ययत्यागाच्च -- लिङ इच्छाजनकत्वस्वीकारेणेच्छासत्त्वोपपादने अव्युत्पन्नानामपि तत इच्छा स्यादिति किञ्चिदर्थज्ञानस्य तदर्थगोचरेच्छाहेतुत्वत्यागप्रसंगात् । लिङ्प्रत्ययं विनाप्यर्थज्ञानादिच्छादर्शनाल्लिङ्प्रत्ययत्यागस्यैव दृष्टत्वात् ॥ एवं प्रवृत्तीच्छयोर्निरासेन — लोके स्वसंकल्पात्स्वयं प्रवृत्तिदर्शनात्संकल्प एव लिङर्थ इत्यपि – निरस्तम् । नहि स प्रयत्नः ; स्वस्मिन्नेव स्वस्य ज्ञायमानतयापि जनकत्वाभावात् । नचेच्छा ; असत्त्वादित्युक्तत्वात् । ननु यजेत स्वर्गकाम इति लिङ्श्रवणकाले यागेच्छा तावत्स्वरसतो माभूत् । स्वर्गरूपफलज्ञानात्फलेच्छा स्वरसतोऽस्तीति सैव लिङर्थ इति चेत्— न — यागविषययत्नस्य फलेच्छयाऽनुत्पाद्यत्वात् ; भिन्नविषयकत्वादिति । किञ्च तदा विधिवाक्यवैयर्थ्यात् ; इच्छाया-

---

१. लकाराणां स्त्रीलिङ्गनिर्देशः प्राच्यग्रन्थेषु ।

[1]प्राप्ते च शास्त्रमर्थवत् ; प्राप्ते च शास्त्रानवकाशात्* । तदभिधाने च स्वर्गकाम इति कर्तृविशेषणपौनरुक्त्यात् । तदा हि यजेतेत्यस्यैव यागकर्ता स्वर्गकाम इत्यर्थस्स्यात् ॥

[62] यदि च फलविषयैव साधनविषयं प्रयत्नं जनयेत् , अन्यत्रापि प्रसुवीत. नियामकाभावात् ॥ हेतुफलभाव एव नियामक इति चेन्न — अज्ञातस्य तस्य नियामकत्वे लिङं विनाऽपि स्वर्गेच्छातो यागे प्रवृत्तिप्रसङ्गात् । ज्ञातस्य तु तत्साधनत्वस्य नियामकत्वे तदिच्छैव तत्र प्रवर्तयतु; यो यत्कामयते स तत्साधनमपि कामयतएवेति नियमात् । नच सा तदानीं सती । नच तज्ज्ञानमेव प्रयत्नजनकं, तच्च लिङा क्रियते इति युक्तम् ; स्वर्गकामो यागचिकीर्षावानित्यतोऽपि प्रवृत्तिप्रसङ्गात् । लिङोवेच्छां प्रतीत्यानिच्छन्नपि सर्वः प्रवर्तेत ॥ स्वसंबन्धितया तदवगमस्तथा न तु सामान्यत इति चेन्न — प्रथमपुरुषेण तदनभिधाने तस्याविध्यर्थत्वप्रसङ्गात् । ओदनकामस्त्वं पाकचिकीर्षावानित्यतोऽपि प्रवृत्त्यापत्तेश्च (त्तेः) अपिच सङ्कल्पज्ञानाद्यदि प्रयत्नो जायेत, तथापि सङ्कल्पस्य कुतो जन्म किमर्थञ्च?

स्वहेतुत एवोत्पत्तेर्वाक्याजन्यत्वात् । नचेच्छाप्रतीत्यर्थं वाक्यम् ; जातायास्तस्याः मनसैव प्रत्यक्ष्यत्वात् । अज्ञातज्ञापकं हि शास्त्रम् । किञ्च फलेच्छाया लिङैव ज्ञातत्वे स्वर्गकाम इति तद्बोधकपदं पुनरुक्तम् ! अतो मनसा स्वर्गकामपदेन च संकरान्न लिङा सोच्यत इति ॥

[62] अपिचेच्छापक्षमात्रे कृत्स्ना कारिका योज्या । अन्येच्छाया अन्यत्र प्रवर्तकत्वे सर्वत्र प्रवृत्तिप्रसंग इत्यनिष्टाप्तिः । अतः फलेच्छया यागप्रवृत्तिं वदता फलयागयोः स्थितस्साध्यसाधनभाव एव व्यवस्थापको वाच्यः । तस्य स्वरूपसत्तया हेतुत्वे लिङादिनिरपेक्षमपि तदिच्छाबलात्प्रवृत्तिस्स्यादिति भवतीष्टहान्यादि । अतोऽप्रवृत्तेर्नासौ लिङर्थः । ततस्साध्यसाधनभावस्य ज्ञायमानतया नियामकत्वे तु यागनिष्ठफलसाधनताज्ञानमुपायेच्छाद्वारा प्रवर्तकमित्युक्तं भवति; उपायेच्छाया अप्यानुभविकत्वात् । अत उपायेच्छैव लिङर्थ इति वाच्यम् । नच लिङ्श्रवणमात्रादुपायेच्छा जायते । तदर्थमुपायेच्छाज्ञानस्य प्रवर्तकत्वोक्तौ विरोधः, इच्छयैव प्रवृत्तिदर्शनात् । नन्विच्छाया इव स्वगतत्वेनेच्छाविषयकज्ञानस्यापि प्रवर्तकत्वमिष्यते, प्राय इच्छाकाल एव तत्सभवादिति चेन्न — यजेत स्वर्गकाम इति प्रथयपुरुषेणेच्छायास्स्वनिष्ठत्वानभिधानात्तस्य प्रथमपुरुषस्य विध्यर्थकत्वाभावप्रसंगात् ! ओदनकामस्त्वं पाकचिकीर्षावानिति वाक्यात्स्वनिष्ठतया ज्ञानेप्यप्रवृत्तेश्च । अपिच संकल्पज्ञानत एव प्रवृत्तौ संकल्पो यत्नात्प्राङ् न स्यात् , हेत्वभावाद्वैयर्थ्याच्च । अथ संकल्पज्ञानं संकल्पद्वारा यत्नहेतुरिति न हेत्वभावो नापि वैयर्थ्यमिति

---

१. अप्राप्तेचशास्त्रानवकाशादिति क. ख. पा. 'अप्राप्ये (च) तु शास्त्रावकाशादिति क. २ पा. । प्र.'अप्राप्तेचेति । अवकाशेवा....' इति । विमृश्य शोधितमुपरितनम् ।

सङ्कल्पज्ञानादेव, प्रयत्नार्थश्चेति चेत् — नन्विच्छाविशेषः सङ्कल्पः; स तावत् सुखे स्वभावतः, तत्साधने चौपाधिकः, सङ्कल्पविषयस्तु कथम्? तत्साधनत्वादेवेति चेत् — तर्हि तत्साधनत्वज्ञानात्, नतु सङ्कल्पस्वरूपज्ञानाद्भवितुमर्हतीति । अन्यथेष्टसाधनताज्ञानमप्यनर्थकमापद्येत । तस्मात्, सङ्कल्पः प्रवर्तक इत्यभ्युपेयते, किन्तु सत्तामात्रेण, न तु ज्ञात इति नासौ विधिः ॥ ज्ञानञ्च विषयोपहारेणैव व्यवहारयतीति तद्विषय एवावशिष्यते । इति कर्तृधर्म्मव्युदासः ॥

[63]　अस्तु तर्हि कर्म्मधर्म्मः । नेत्युच्यते

अतिप्रसङ्गान्न फलं नापूर्वं तत्त्वहानितः ॥
तदलाभान्न कार्यञ्च न क्रियाऽप्यप्रवृत्तितः ॥ १२ ॥

कर्म्म हि फलं वा स्यात्, तत्कारणमपूर्वं वा, तत्कारणं क्रिया वा? न प्रथमः, फलेच्छायाः प्रवृत्तिं प्रत्यहेतुत्वात्; अतिप्रसङ्गादित्युक्तत्वात् । न द्वितीयः, अव्युत्पत्तेः । लिङो हि प्रवृत्तिनिमित्तमपूर्वत्वं वा स्यात्, कार्यत्वं वा स्यात् .

चेत् — उच्यते । संकल्पो हीच्छा ; सा च सुखेऽन्येच्छाधीना, सुखसाधने सुखेच्छाधीना च तत्तद्विषयकज्ञानजन्या दृष्टा । अतस्तत्तद्विषयकज्ञानात्तत्तत्रेच्छेति संकल्पज्ञानात्संकल्पविषयिणीच्छेति वक्तव्यम् । संकल्पश्चैवमिच्छात्मकसंकल्पविषयः कथं भवति सुखतत्साधनभिन्नत्वादिति । अथ संकल्पोऽपि यागद्वारा सुखसाधनमिति साधनत्वादेव संकल्पविषय इति चेत्— तर्हि संकल्पस्वरूपज्ञानं न संकल्पजनकम्, किन्त्विष्टसाधनताविशिष्टसंकल्पज्ञानम्, तत्र च विशेष्यं संकल्पो वा भवतु, अन्यद्वा । किं तेन? इष्टसाधनताज्ञानं संकल्पजनकमित्येव वाच्यम् । स्वरूपत एव संकल्पज्ञानस्य हेतुत्वेत्विष्टसाधनताज्ञानहेतुता क्लृप्ता भज्येत । तथाचेष्टसाधनताज्ञानात्संकल्पो जातः प्रवृत्तिं जनयतीत्येतावदेव, नतु संकल्पज्ञानमपेक्षितमिति इष्टसाधनतापरित्यागप्रसंगात् इष्टसाधनतासंकराच्च न संकल्पो विधिरिति ॥ एवं स्पन्दप्रवृत्तीच्छावत् ज्ञानमपि न विधिः; निर्विषयज्ञानस्याभावादजनकत्वाच्चेष्टसाधनत्वादिसांकर्ये तावत एव लिङर्थत्वौचित्यादिति । तत्सिद्धं विधिर्न कर्तृधर्म इति ॥

[63] एवं चतुर्धा विकल्पितेषु विधिषु प्रथमपक्षासंभवेऽपि द्वितीयः कर्मधर्मपक्षोऽस्त्विति चेत् — उच्यते । क्रियत इति कर्म फलतज्जनकापूर्वतद्धेतुक्रियान्यतमम् । तद्धर्माश्च फलत्वापूर्वत्वकार्यत्वरूपाः । तत्र फलत्वमिच्छाविषयत्वमितीच्छैव लिङर्थः । अपूर्वे चापूर्वत्वं कार्यत्वमिति धर्मद्वयम् । फलादिवदपूर्वस्य पदान्तरागम्यत्वादेतत्पक्षे धर्मविशिष्टधर्मिपर्यन्तं लिङर्थः । इदं प्राभाकरमतम् । तदत्र पक्षेऽपूर्वं कार्यं वाऽपूर्वत्वकार्यत्वोभयविशिष्टं वा विधिर्भवति । क्रियापक्षे च तद्गतं कार्यत्वं विधिरिति ॥ तत्र न फलधर्मपक्षः, तस्येच्छारूपस्य फलविषयकत्वा-

उभयं वा। न प्रथमः।[1] शब्दप्रवृत्तिनिमित्तस्यापूर्वत्वस्य प्रमाणान्तरादवगतावपूर्वत्वव्याघातात्। अनवगतावव्युपत्तेः। संबन्धिनोऽनवगमे संबन्धस्य प्रत्येतुमशक्यत्वात्। ततएवावगतावितरेतराश्रयदोषात्। नच गन्धवत्त्वेनोपनीतायां पृथिव्यां पृथिवीशब्दवत् अदूरविप्रकर्षेण कार्यत्वेनोपनीतेनापूर्वत्वेन निमित्तेनापूर्वे प्रवर्तते लिङिति युक्तम्। तत्रोभयोरपि प्रतीयमानत्वेन सन्देहे कल्पनागौरवपुरस्कारेण पृथिवीत्वएव सङ्गतिविश्रान्तेरुपपत्तेः। न त्वत्रापूर्वत्वप्रतीतिः॥

[64] स्यादेतत् – कार्यत्वमुपलक्षणीकृत्य तावदेषा लिङ् प्रवृत्ता। तदुपलक्षितश्च यागो वा यत्नोवाऽन्यो वा शब्देतरप्रमाणगोचरो नाधिकारिविशेषणस्वर्गसाधनसमर्थः। न चाकाम्यफले कामी नियोक्तुं शक्यते। ततोऽन्यदेवालौकिकं

त्तो यगकृत्यसंभवात्; अन्यविषयकत्वात्; अन्यथा सर्वत्र प्रवृत्तिस्स्यादित्युक्तत्वात्। द्वितीयेचापूर्वमर्थ इति पक्षो न घटते। लोकव्यवहाराद्धि सर्वशब्दव्युत्पत्तिग्रहः। अपूर्वस्यचापूर्वत्वं प्रमाणान्तराज्ञातपूर्वत्वात्। तथाच तत्र वैदिकलिङर्थे कथं लोकतो व्युत्पत्तिः; शब्दतदर्थसंबन्धग्रहरूपायां व्युत्पत्तेस्संबन्धिद्वयज्ञानाधीनत्वात्; अर्थस्यचापूर्वस्यानवगमात्। अथ ततएवापूर्वमवगत्य तस्यापूर्वे संबन्धग्रह इति चेत्– तर्हि ततस्तदवगमस्य संबन्धग्रहाधीनत्वादन्योन्याश्रयः। पूर्वमेवापूर्वस्य ज्ञातत्वेचापूर्वत्वहानिरिति। अथ यथा गन्धवती पृथिवीति वाक्यात्पृथिवीत्वस्यानवगमेपि तत्र पृथिवीपदप्रवृत्तिनिमित्तत्वग्रहः। तद्वल्लिङोऽपूर्वानवगमेप्यपूर्वत्वे तद्ग्रहोस्त्विति चेन्न—वैषम्यात्; प्रकृतवाक्यादनवगमेपि प्राग्गन्धपृथिवीत्वयोर्ज्ञातत्वाल्लाघवाज्जातौ पृथिवीत्वे तद्ग्रह उपपन्नः, इहत्वपूर्वत्वं प्रागनवगतमिति॥

[64] ननु यजेत स्वर्गकाम इत्यादौ लिङो नियोगः प्रतीयते। नियोगस्यैव नियोज्यसंबन्धौचित्यात्स्वर्गकामपदार्थस्तत्रान्वेति। यस्य फलं निमित्तं वा विशेषणं स नियोज्यः, यथा— यजेत स्वर्गकामः, यावज्जीवं जुहोतीति। तत्र जीवनं निमित्तं साक्षादेव विशेषणम्। स्वर्गादिफलं तु तदा तस्मिन्नसत्त्वात्कामनाद्वारा विशेषणमिति विवेकः। नियोज्यस्य च तदैव नियोगसंबन्धः, यदि स ममेदं कार्यमिति बुध्येत। अतो लिङ् कार्यत्वमुखेन नियोगं दर्शयति। तच्च नियोगभूतं कार्यं यागो वा तद्विषयकयत्नो वा फलादिकं वा न भवितुमर्हति। फलकामिनो हि फलसाधनभूत एव ममेदं कार्यमिति बुद्धिर्भवति। नच काम्यफलासाधने कामी नियोक्तुं शक्यते। यागादि च कालव्यवधानादिना न फलसाधनंभवितुमलमिति तद्विलक्षणं लोकानवगतमेव कार्यत्वेनोपलक्ष्यम्। स एव च लिङाद्यर्थ इत्यपूर्वव्युत्पत्तिसंभव इति चेत्—

---

१. अयं क. पाठः। तत्रापि **दूरविप्रकर्षेणे**त्यस्ति। ख. पुस्तकेत्वेकपङ्क्तित्यागेन **पृथिवीशब्दवत् पूर्वे प्रवर्तत** इति मुद्रितम्।

किञ्चिदनेनोपलक्ष्यते, यो लिङ्गादिप्रवृत्तिगोचर इति किमनुपपन्नमिति चेत् – नं – उपलक्षणं हि स्मरणमनुमानं वा । उभयमप्यनवगतसंबन्धेनाशक्यम् । नहि संस्कारवन्मनोवददृष्टवद्वा कार्यत्वमपूर्वत्वमुपलक्षयति, ज्ञानापेक्षणात् । ततो हस्तीव हस्तिपकं, धूमइव धूमध्वजं, तत्संबन्धज्ञानादुपलक्षयेत्, नत्वन्यथा । तथाच न्यायसम्पादनाऽप्यरण्येरुदितम् । नहि युक्तिसहस्रैरपि अविदिते सङ्गतिग्रहोऽविदितसङ्गतिर्वा शब्दः प्रवर्त्तते इति ॥ एतेन भेदाग्रहात् क्रियाकार्ये व्युत्पत्तिरिति निरस्तम् , न ह्यज्ञाते भेदाग्रहो व्यवहाराङ्गम् , अतिप्रसङ्गात् ॥ किञ्चापूर्वत्वे प्रवृत्तिनिमित्ते कल्प्यमाने लौकिकी लिङनर्थिका प्रसज्येत । तत्रोपलक्षणीयाभावात् । तत्र कार्यत्वमेव प्रवृत्तिनिमित्तमिति यदि, प्रकृतेऽपि तथैवास्तु क्लृप्तत्वात् सम्भवाच्चेति ॥

अपूर्वस्य कार्यत्वोपलक्ष्यत्वमिदं किं तत्स्मार्यत्वं तदनुमेयत्वं वा । एकेनान्यस्य स्मृतिर्वाऽनुमितिर्वा तयोर्वस्तुनोः प्राक् संबन्धग्रहं विना दुर्घटा । अपूर्वस्य च प्रागगृहीतत्वात्संबन्धो दुर्ग्रहः । ननु संस्कारेण मनसा अदृष्टेन च कस्यचित्स्मृतिर्जन्यते । नहि तत्र संस्कारादिना सह वस्तुनस्संबन्धो गृहीतोऽस्ति । अतः कथमयं नियम इति चेन्न – संस्कारादिकं हि स्वरूपसत् स्मृत्यादिहेतुः; कार्यत्वं तु ज्ञायमानं हेतुः । ज्ञायमानतया यस्य हेतुत्वं तत्र संबन्धग्रह आवश्यकः, यथा हस्तिनो धूमस्य चेति । तथाच कार्यत्वस्योपलक्षकत्वासंभवे सति, ‘नचाकाम्यफले कामी नियोक्तुं शक्यत इति युक्तिसंपादनं व्यर्थम् । अर्थस्याविदितत्वे संगतेरविदितत्वाल्लिङो बोधकत्वायोगात् ॥ एतेन प्राभाकरसंमतापूर्वव्युत्पत्त्यसंभवोपपादनेन लोकसिद्धक्रियाकार्यव्युत्पत्तेस्तत्कृतो भेदाग्रहमादाय निर्वाहोपि निरस्तः । यद्यपूर्वं लिङर्थः, तर्हि कथं गामानयेरित्यादौ आनयनादौ क्रियारूपकार्ये लोके व्युत्पत्तिरिति पृष्टः कश्चित् प्राभाकर आह— अपूर्वमेवार्थः; क्रियारूपकार्ये तद्भेदाग्रहात्तु तत्र व्युत्पत्तिरिति ! तदपि निरस्तम् – नह्यज्ञातवस्तुभेदाग्रहः कार्यक्षमः । पूर्वगृहीतरजतभेदाग्रहो हि शुक्तौ प्रवृत्तिहेतुः ! अतो भेदाग्रहकाले रजतादिवस्तुस्मृतिरप्यपेक्षिता । अन्यथाऽनुपस्थितरङ्गभेदाग्रहस्यापि सत्त्वान्निवृत्तिरपि स्यात् । अतो लोकेऽपूर्वानुपस्थित्या न तद्भेदाग्रहाद्व्युत्पत्तिरिति ! किञ्च कार्यत्वमुपलक्षकं, नतु लिङ्शक्यतावच्छेदकमिति वेदेऽपूर्वत्वं शक्यतावच्छेदकं कल्पयतस्ते लोके गामानयेरित्यादौ कार्यत्वोपलक्ष्याभावाल्लौकिकलिङामर्थो न स्यात् । तत्रचेत्कार्यत्वं प्रवृत्तिनिमित्तं, वेदेपि तदेव तथाऽस्तु; अन्यथाऽनेकशक्तिकल्पनापत्तेः । नच लोके लक्षणेति तन्मतं युक्तम् , कार्यत्वमुखेनैवापूर्वस्य ज्ञातव्यत्वादवश्यज्ञेये तत्र शक्तेरेव युक्तत्वात् शक्तिग्राहकस्य व्यवहारस्य कार्यत्वविषयकतया तदुपेक्षणायोगाच्च । तत्सिद्धं, अतिप्रसंगान्नफलं नापूर्वं तत्त्वहानित इति ॥

१. ख. पु. नेति नास्ति । २. अयं क. २. पा०. अन्यत्र कार्यमेव ।

[65] अस्तु तर्हि तदेव प्रवृत्तिनिमित्तं, तर्कसम्पादनयात्वपूर्वव्यक्तिलाभ इति चेन्न — नित्यनिषेधापूर्वयोरलाभप्रसङ्गात्। नचास्मिन् पक्षे एकत्र निर्णीतेव वाक्यार्थेनान्यत्र तथैव व्यवहार इति सम्भवति, कार्यत्वस्यैव प्रवृत्तिनिमित्तत्वेन निर्णीतत्वात्, नत्वपूर्वत्वस्य। न्यायसम्पादनायाश्च तत्रासम्भवात्। फलानुगुण्येन हि व्यक्तिविशेषो लभ्यते। नच तत्तत्र श्रूयते। न चाश्रुतमपि कल्पयितुं शक्यते। बीजाभावात्। तद्धि विध्यन्यथाऽनुपपत्त्या कल्प्येत, कार्यत्वमत्ययान्यथाऽनुपपत्त्या वा लोकवत्। न प्रथमः; भवतां दर्शने तस्योपिंयरूपत्वात्। यतः श्रुतस्वर्गफलत्वेऽपि साध्यविवृद्धिरुच्यते। न द्वितीयः; शब्दबलेन तत्प्रत्यये तदनपेक्षणात्। लोके हि तत्प्रत्यय इष्टाभ्युपायताधीनः, न तु वेदे इत्यभ्युपगमात्। अन्यथेष्टाभ्युपायतैव प्रथमं वेदादवगन्तव्या; प्रमाणान्तराभावात्; ततः कार्यतेत्यानुमानिको विधिस्स्यात्, न शाब्दः॥ आनुमानिकं फलमस्तु, यत्कर्तव्यं तदिष्टाभ्युपाय इति व्याप्तेरित्यपि न युक्तम्; सुखेन व्यभिचारात्॥ अन्यत्वे सतीति चेन्न —

---

[65] अस्तु कार्यत्वविशिष्टमेव लिङर्थः। उक्तन्यायसंपादना च वेदे यागादिविलक्षणापूर्वव्यक्तिलाभाय भविष्यति। यथा ज्ञानादिना द्रव्यमात्रानुमानेपीतरबाधचिन्तया कृतविलक्षणात्मव्यक्तिलाभः, तद्वदिति चेत् — न — अपूर्वत्वविशिष्टं कामाधिकारिषु लिङ्वाच्यं यदि स्यात् — तस्मिन् पक्षे एकत्र कृतनिर्णयानुरोधेन यावज्जीवं जुहोतीति नित्यस्थले, न कलञ्जं भक्षयेदित्यादिनिषेधस्थलेचापूर्वमेव लिङर्थ इति प्रभाकराभिमतं सिध्येत्। यदि फलसाधनत्वयुक्त्यैवापूर्वव्यक्तिलाभः, तदाऽस्मिन् कार्यत्वविशिष्टमर्थ इति पक्षे नित्यनिषेधस्थलयोस्तादृशयुक्त्यभावात्तदपूर्वयोरसिद्धिस्स्यात्। नन्व तत् फलं नित्यनिषेधस्थलयोश्श्रूयते। नचाश्रुतमपि विश्वजिन्न्यायेन कल्प्यम्, त्वया तत्र कल्पकस्य दुर्वचत्वात्। किं लिङर्थविधिस्वरूपं फलं विनाऽनुपपन्नं तत्कल्पकम्, उत तद्गतकार्यत्वप्रत्ययः। न प्रथमः, कृतिपरमोद्देश्यभूतमपूर्वमिति त्वन्मतेऽन्येच्छानधीनेच्छाविषयस्यापूर्वस्य फलान्तरकल्पकत्वायोगात्। यत्र हि स्वर्गकाम इति फलश्रवणं, तत्राप्यपूर्वाख्यो विधिः स्वोद्देशेन यागे प्रवृत्तं पुरुषं स्वयं स्वर्गादि प्रदायानुगृह्णातीति अपूर्वं स्वयं साध्यं फलात्मनापि वर्धत इति ह्युच्यते। अतो न विधिस्वरूपं फलकल्पकम्। न द्वितीयः — तत्र किं कार्यत्वप्रत्यय इष्टसाधनताप्रत्ययजन्य इति तदर्थमिष्टकल्पनम्, किंवा कार्यत्वमिष्टसाधनत्वमन्तरा न भवतीति तत्कल्पनम्? नाद्यः, यत्रहि प्रागिष्टसाधनताज्ञानं पश्चात्कार्यत्वप्रत्ययस्तत्र तथा। अत्र तु लिङ्शब्द एव कार्यत्वप्रत्ययं जनयतीति किमितीष्टकल्पनत्? अन्यथा शब्देनापीष्टसाधनताप्रतीतिद्वारैव कार्यत्वप्रतीतिजनने इष्टसाधनत्वमेव लिङर्थः, तज्ज्ञानात्कार्यताज्ञानं, लोके कयापि विधयेष्टसाधनताज्ञाने सति कार्यताज्ञान-

दुःखाभावेन व्यभिचारात् ॥ फलं विहायेति चेत् — तदेव किमुक्तं स्यात् । इष्टं स्वभावत इति चेत् — तर्हि ततोऽन्यदनिष्टं स्यात्, तच्च कर्तव्यमिति व्याघातः ॥ तत्साधनमिति चेत् -- तत्साधनत्वे सतीति साध्याविशिष्टं विशेषणम् ॥ ' स्वभावतो नेदमिष्टं कर्तव्यञ्च, ततो नूनमिष्टसाधनमिति साधनार्थ इति चेन्न — स्वभावतो नेदमिष्टमित्यसिद्धेः । अनन्योद्देशप्रवृत्तकृतिव्याप्यत्वात् । अन्यथा तदसिद्धेः । ततो व्याघातादन्यतरापाय इति ॥

[66] अस्तु नित्यनिषेधापूर्वयोरलाभः, किं नश्छिन्नमिति चेत् — किं नश्छिन्नं, यदा कामाधिकारेऽपि तदलाभः । नहि लिङा कार्यं स्वर्गसाधनमुक्तम् । नापि स्वर्गकामपदसमभिव्याहारान्यथाऽनुपपत्त्या तल्लब्धं, ब्राह्मणत्वादिवदधिकार्यवच्छेदमात्रेणैवोपपत्तेः । नचेदमनुमानं — यस्य यदिच्छातो यत्कर्तव्यं, त-

---

वदितिकार्यस्य विधेरनुमेयत्वादशाब्दता स्यात् । नान्त्यः, यत्रयत्र कार्यत्वं, तत्रतत्रेष्टसाधनत्वमिति नियमाभावात् । सुखे व्यभिचारात् । कार्यत्वे फलभिन्नत्वे सतीति विशेषणं देयमिति चेत् — किन्नाम फलम् ? स्वभावत इष्टं फलमिति चेत् — तर्हीष्टभिन्नत्वे सति कार्यत्वं यत्र तत्रेष्टसाधनत्वमितिनियमः, उतेष्टभिन्नमिष्टसाधनत्वेन गृहीत्वा इष्टसाधनत्वे सति कार्यत्वं यत्र तत्रेष्टसाधनत्वमिति, यद्वा स्वभावशब्दार्थघटनेनान्येच्छानधीनेच्छाविषयभिन्नत्वे सति कार्यं यत् तदिष्टसाधनमिति । नाद्यः, इष्टभिन्नत्वकार्यत्वयोर्विरोधात् । यागादिकार्येपीष्टत्वसत्त्वात् । न द्वितीयः, साध्याविशिष्टत्वात् । न तृतीयः, त्वन्मतेऽपूर्वस्य स्वतइष्टत्वेनान्येच्छानधीनेच्छाविषयभिन्नत्वासिद्धेः । अनन्योद्देशप्रवृत्तकृतिसाध्यं हि तत् । अन्यथा भिन्नत्वस्वीकारे ईदृशकृति साध्यत्वासिद्धिः; एतत्स्वीकारे च तदसिद्धिरिति ! अतोऽपूर्वस्य स्वतउपेयत्ववादिनस्ते अश्रुतफलस्थले फलकल्पकाभावान्न्यायसंपादनानवकाशात्कार्यत्वप्रवृत्तिनिमित्तपक्षे नित्यनिषेधस्थलयोरपूर्वालाभ इति ॥

१ [66] ननु माभूत्तत्र तदलाभः, अथापि फलवाक्येषु तत्सिद्धिरिति चेन्न—तत्राप्यसिद्धेः । नहि लिङः फलसाधनत्वविशिष्टकार्यमर्थः, येन साधनत्वबलादपूर्वसिद्धिः । नच स्वर्गकामपदसमभिव्याहारात्स्वर्गसाधनत्वावगमः, ब्राह्मणो यजेतेत्यादौ ब्राह्मणत्वादिवत् स्वर्गकामनायाः कर्तृविशेषणत्वमात्रतया साधनत्वबोधाभावात् । नच साधनत्वधीरानुमानिकी, यदिच्छाधीनं यस्य कार्यत्वं तदिष्टसाधनं तदिति व्याप्तौ यत्पदद्वयेनैकग्रहणे सुखे हेतुमत्त्वाद्व्यभिचारः, विभिन्नग्रहणे च तत् कार्यत्वं किञ्चिन्निष्ठमन्येच्छाधीनं स्वाभाविकं न भवतीत्यौपाधिकमेव वाच्यम् । तादृशञ्च कार्यत्वमिष्टसाधनत्वज्ञानमन्तरा न ज्ञेयं भवतीति कथं कार्यत्वहेतुना इष्टसाधन-

---

१. प्र. ' उद्देश्यफलान्तरसद्भावे नित्यनिषेधापूर्वासिद्धेरित्यर्थः ' इति ।

त्तस्येष्टसाधनमिति । अन्येच्छया स्वाभाविककर्तव्यत्वासिद्धेः । तदिच्छयैव तत्कर्तव्यतायास्सुखेनानैकान्तिकत्वात् । औपाधिककर्तव्यतायाश्चेष्टसाधनत्वमप्रतीत्य प्रत्येतुमशक्यत्वात् ॥ किमनया विशेषचिन्तया । प्रतीयते तावच्छब्दादन्यदिच्छतोऽन्यत्कार्यमिति । एतावतैवानुमानमिति चेत् – नन्वन्वितमभिधानीयं, योग्यश्चान्वीयते । अन्यदिच्छतश्चान्यत् कर्तव्यमन्वयायोग्यम् , तत्कथमभिधीयताम् ॥ ततएव तत्साधनत्वसिद्धिरिति चेत् — एवं तर्हीष्टसाधनतैकार्थसमवायिकर्तव्यत्वाभिधानादनुमानानवकाशः । नचान्विताभिधानेऽपि तत्साधनत्वासिद्धिः; अधिकार्यवच्छेदमात्रेणाप्यन्वययोग्यतोपपत्तेः ॥

[67] नच कार्यत्वमपूर्वे सम्भवति । तद्धि कृतिव्याप्यता चेत्– व्रीह्यादिष्वेव; सिद्धत्वात् । कृतिफलत्वं चेत् — यागस्यैव; ततस्तस्यैवाहत्योत्पत्तेः । कृत्युद्देश्यता चेत् — स्वर्गस्यैव; निसर्गसुन्दरत्वात् । न त्वपूर्वस्य; तद्विपरीतत्वात् ॥ स्तन-

---

त्वानुमानम् ॥ ननु फलकामस्य फलादन्यत्र कार्यताधीर्यत्र मानान्तरात्, तत्र तदौपाधिकत्वविवेकस्येष्टसाधनताज्ञानस्य चापेक्षा । शब्दस्तु श्रुतानुपूर्व्यनुरोधेनेतरानिरपेक्षमर्थबोधक इति, यजेत स्वर्गकाम इति वाक्यात् स्वर्गकामकार्यत्वेन किञ्चित्प्रतीतिरनपलप्या । अथत्विष्टसाधनत्वमन्तरा कार्यत्वादर्शनाच्छ्रुतकार्यत्वेनेष्टसाधनत्वानुमानमिति चेन्न— अन्विताभिधानवादिनापि योग्यतादिपरिशीलनात्परमेवान्विताभिधायकत्वस्य पदे स्वीकाराद्यावदिष्टसाधनत्वं न ज्ञातं, तावदन्यकामं प्रत्यन्यकार्यत्वस्यायोग्यत्वाच्छाब्दबोधस्यैवाभावात्कथमनुमानमिति । ननु तर्हि ततएव कार्यताबोधकाच्छब्दादिष्टसाधनताविशिष्टकार्यतासिद्धिश्शाब्दी स्यादिति चेत् — तर्हीष्टसाधसत्वमनुमीयत इति न युक्तम् । लिङः कार्यमात्रार्थकत्वसिद्धान्तभङ्गश्च ॥ नन्विष्टसाधनत्वज्ञाने सति अन्यकामस्यान्यकार्यताधियः प्रमात्वेनेष्टत्वात् सामान्यतः, अन्यकामस्यान्यकार्यत्वं कथमयोग्यं भवेत् । अतोऽन्विताभिधानसंभवादिष्टसाधनत्वानुमा भवत्येवेति चेन्न – एवमन्विताभिधानेपीष्टसाधनत्वकल्पनायोगात् । स्वर्गकामनावत इदं कार्यमित्येव हि प्रतीतिः । अत्र च ब्राह्मणत्वादिवत् कामनाया विशेषणत्वमात्रमवगम्यते । अतःकार्यतायां कामनाप्रयोज्यत्वानवगमान्नेष्टसाधनत्वानुमानमिति पूर्वोक्तन्यायसंपादनाऽभावाद्याग एव कार्यं भवितुमर्हतीति नित्यनिषेधस्थलयोरिव कामाधिकारेप्यपूर्वं लिङर्थतया न सिध्येदिति ॥

[67] ननु विधेयोद्देश्यतावच्छेदकयोरसति बाधके प्रयोज्यप्रयोजकभावस्यानुभविकत्वात् धनिनस्सुखमित्यादौ सुखे धनप्रयोज्यतावत् स्वर्गकामस्येदंकार्यमित्यत्र कार्ये कामनाप्रयोज्यत्वं सिध्यति । अतस्तद्बलादिष्टसाधनत्वानुमानमिति चेत्– अस्त्वेतत् । कार्यत्वप्रवृत्तिनिमित्तपक्षे न्यायसंपादनयाऽपूर्वव्यक्तिलाभ एव न भवति, अपूर्वेऽसंभवादन्यत्र संभवाच्च । कार्यत्वं हि कृत्यधीनव्यापा-

पानादिवदौपाधिकीति चेन् – साऽपि यागस्यैव । स्वर्गस्य साध्यत्वस्थितौ यागस्यैव साधनत्वेनान्वयात् ॥ कालव्यवधानान्नैतन्निर्वहतीति चेत्— यथा निर्वहति, श्रुतानुरोधेन तथा कल्प्यताम् ॥ 'व्यापारद्वारा कथञ्चित् स्यात् । न तु भिन्नकालयोर्व्यापारव्यापारिभावः । कारणत्वञ्च व्यापारेण युज्यते । अव्यवधानेन पूर्वकालनियमश्च तत्त्वम् । अन्यथाऽतिप्रसङ्गा' दिति चेत् – न – पूर्वभावनियममात्रस्य कारणत्वात् । कार्यानुगुणावान्तरकार्यस्यैव व्यापारत्वात् । कृषिचिकित्सादौ बहुलं तथा व्यवहारात् ॥ लाक्षणिकोऽसाविति चेन्न – मुख्यार्थत्वे विरोधाभावात् ॥ अस्तु तर्हि पुत्रेण हते ब्रह्मणि चिरध्वस्तस्य पितुस्तमवान्तरव्यापारीकृत्य कर्तृत्वम् । तथाच लोकयात्राविप्लव इति चेत् – न — सत्यपि सुते कदा-

---

राश्रयत्वरूपकृतिव्याप्यत्वं वा, स्वाभाविककृत्युद्देश्यत्वं वा, कृत्युद्देश्य साधनत्वरूपौपाधिककृत्युद्देश्यत्वं वा । आद्यं व्रीहीनवहन्तीत्यादिश्रुतव्रीह्यादिसिद्धद्रव्यनिष्ठमपूर्वेऽसंभवि । द्वितीयमपि स्वर्गादिसुखादिमात्रगम् । तृतीयं तु यागस्यैव संभवतीति न कार्यत्वान्वयायापूर्वव्यक्तिकल्पना ॥ ननु फलकालावृत्तिर्यागः कथं साधनमिति चेन्न — लोक इव वेदेऽपि क्रियाकार्यत्वेऽवगते तत्कल्पितसाधनतायाः व्यवहितसाधनत्वरूपाया एव स्वीकारसंभवात् । ननु वस्तुनः कारणत्वं साक्षात्त्वरसम ; व्यापारद्वारा वा कथञ्चित् । तत्र व्यापारेण कार्यजननकाले व्यापारिणोऽपि भ्रमिविशिष्टदण्डस्येव सत्त्वमपेक्षितम् । अन्यथा व्यापारत्वाभिमतं यत्तन्मात्रे कारणत्वं युक्तम् , नत्वतीते, अव्यवहितपूर्वकालवर्तित्वरूपकारणत्वस्य तत्राभावात् । अन्यथा पुत्रकृतब्रह्महत्यायां मृतस्य पितुरपि कारणत्वप्रसंगादिति चेन्न– कारणताशरीरेऽव्यवहितत्वानिवेशात् । तज्जन्यत्वे सति तज्जन्यजनकत्वरूपव्यापारत्वस्य, व्यापारिणि नष्टेऽपि, व्यापारे संभवेन व्यापार्यनुवृत्तेरनपेक्षितत्वात् । कृषिचिकित्सादौ भिन्नकालिकयोरपि लोके कार्यकारणभावव्यवहारात् । संस्कारद्वाराऽनुभवस्य स्मृतिकारणत्वात् व्रीह्यादेः पुरोडाशादिद्वारा यागं प्रति, कृतेर्यागादिद्वाराऽपूर्वं प्रति च कारणतायास्त्वदिष्टत्वात् । ननु व्यवहिते कारणत्वव्यवहारो न मुख्य इति चेत् – यस्य यदनुत्पाद्य यत्कारणत्वाभावः, तस्य तद्व्यापारकत्वं तत्कार्ये । यथा हि पितुर्जातोपि पुत्रः कश्चिद्ब्रह्महत्यां न करोति, तथा पुत्रमनुत्पाद्यापि पिता करोतीति न तत्र पितुर्व्यापारित्वम् । तथाच स्वजन्यतदभावप्रयुक्तकार्यानुपाधायकतावत्त्वमेव तद्व्यापारकत्वम् । यदि च कार्याव्यवहितप्राक्क्षणवर्तिन एव कारणत्वं कार्यकालवर्तिनः कार्यकारणकारणस्य सर्वस्य च व्यापारित्वमिष्यते – तर्हि शरविमोककालमृतस्य शरकृतब्राह्मणभेदनकालेऽसत्त्वादकारणत्वं, जीवतो निर्व्यापारस्य पितुर्ब्रह्महत्याकारणत्वञ्च स्यात् । अतो यागस्यैव स्वर्गसाधन-;

---

१. प्र. 'तथापि देवताप्रीतिर्यागव्यापारोऽस्तु । अत्राहुः–यज देवपूजायामिति न प्रमाणम्' इति ।

चित्तदकरणात्. तस्मिन्नसत्यपि कदाचित्कारणादनिर्वाहकतया तस्य व्यापारत्वायोगात्। यं जनयित्वैव हि यं प्रति यस्य पूर्वभावनिर्वाहः, सएव तं प्रति तस्य व्यापारो नापरः। यथाऽनुभवस्य स्मरणं प्रति संस्कारः। तस्य ह्यन्वयव्यतिरेकानुविधाने सिद्धे तदन्यथाऽनुपपत्त्या संस्कारः कल्प्यते, न त्वन्यथा— तथेहापि। न चेदेवं, तत्रापि ब्रह्मभिदुरंशरविमोक्षसमसमयहतस्य हन्तृत्वं न स्यात्। स्याच्च स्वनिवेशनशयानस्य तत्पितुरिति॥ एतेनोभयं नेति निरस्तम्॥

[68] अस्तु तर्हि क्रियाधर्म्म एव कार्यत्वं विधिः। सर्वोहि कर्तव्यमेतदिति प्रत्येति। ततः कुर्यामिति सङ्कल्प्य प्रवर्तते इति चेत् – न – कर्तव्यं मयेति कृत्यध्यवसायार्थो वा स्यात्, कर्तव्यं मयेत्युचितार्थो वा स्यात्? तत्र प्रथमस्सङ्कल्पान्न भिद्यते। व्यवहितकार्यसङ्कल्पो हि कर्तव्यो मयेति, सन्निहितकार्यसङ्कल्पस्तु कुर्यामिति। सच न लिङर्थः; सप्तम्यभावेण प्रवर्तनादित्युक्तम्। तदेतत् कर्तव्यतायां जातायां प्रवर्तते इति वस्तुस्थितौ भ्रान्तैर्ज्ञातायामिति गृहीतम्। औचित्यन्तु क्रियाधर्म्मः प्रागभाववत्त्वं, तस्मिन् सति शक्यत्वं वा, तस्मिन् सति कर्तारं प्रत्युप-

---

तया कार्यत्वमिति नापूर्वव्यक्तिलाभः। (कस्तर्ह्यत्र व्यापार इति चेत् – अपूर्वमेव। नहि तन्निषिध्यते, किंतु तस्य कार्यत्वं लिङर्थत्वञ्च। ननु यज देवपूजायामित्यादिना यागादेर्देवताप्रीत्यर्थत्वावसायात्, स एवैनं भूतिं गमयतीत्यादिश्रुत्यनुसारेण देवताप्रीतिरेव व्यापारोऽस्तु। किमित्यर्धनास्तिकामीमांसकाऽऽदृतापूर्वग्रहेणेति चेत्— उच्यते – देवतोद्देश्यकद्रव्यत्यागरूपस्य यागस्य देवताप्रीतिजनकत्वेपि प्रक्षेपप्रधानकहोमस्य विप्राचर्थगोदानादेस्तपश्चर्यादेरचिदुपासनस्वात्मोपासनादेश्च देवताप्रीतिहेतुत्वे मानाभावात्, नित्यज्ञानेच्छाकृतिमात्रसंपन्नेश्वरपक्षे चेश्वरप्रीतेर्दुर्वचत्वात्, निषेधस्थले देवताप्रसक्त्यभावेन सुरापानादिजन्यपापापूर्वस्यावश्याभ्युपेयत्वादौचित्याच्च फलसमानाधिकरणं प्रथमस्तबकोक्तमपूर्वमेव सर्वत्र व्यापारः। देवताप्रीतिश्रवणे तु प्रीतिपर्यवसायिनः कर्मणएवापूर्वजनकत्वमिति न श्रुतार्थे नास्तिक्यम्। एवमपि न तस्य लिङर्थत्वम्, क्रियाकार्यताविषयकशाब्दबोधानन्तरकल्प्यत्वादिति)॥ एतेनापूर्वत्वकार्यत्वपृथङ्निमित्तत्वदूषणेनोभयविशिष्टं लिङर्थं इति तृतीयमपि निरस्तम्। तत्सिद्धं तदलाभान्नकार्यश्चेति॥

[68] अतः क्रियाकार्यत्वपक्ष एवावशिष्यते तच्च कार्यत्वं किमिच्छापरपर्यायसंकल्पात्मककृत्यध्यवसायः, उत कृत्यर्हत्वम्। ननु कर्तव्यतायास्संकल्पत्वं कथम्; कुर्यामिति हि संकल्प इति चेत् – व्यवहितकार्यसंकल्पः कर्तव्यता, कुर्यामिति शीघ्रभाविकार्यसंकल्प इति भेदः, अनुष्ठानाव्यवहितप्राक्क्षणे कुर्यामित्यनुसंधानादिति। तत्र संकल्पपक्षः प्रागेव निरस्तः। कृत्यर्हत्वञ्चोत्पादनार्हत्वं प्रागभावप्रतियोगित्वरूपं, यद्वा प्रागभावप्रतियोगित्वे सति पर्वतादिवैल-

कारकत्वं वा ? प्रथमे कुतश्चिदपि न निवर्तेत । द्वितीये दुःखेऽपि तथाविधे प्रवर्तेत । तृतीये तु वक्ष्यते ॥

[69] अस्तु तर्हि करणधर्मः — न — करणं हि शब्दः, तद्धर्मोऽभिधा वा स्यात्; तदर्थो भावनादिर्वा, तद्धर्म इष्टसाधनता वा । न प्रथमः —

असत्त्वादप्रवृत्तेश्च नाभिधाऽपि गरीयसी ।
बाधकस्य समानत्वात् परिशेषोऽपि दुर्लभः ॥ १३ ॥

सङ्गतिप्रतिसन्धानाधिकायां तस्यां प्रमाणाभावात् । अन्यसमवेतस्यापूर्वत्व-

---

क्षण्येन पुरुषशक्यत्वरूपं वा पुरुषोपकारकत्वरूपं वा । तत्रोत्पाद्ये शक्ये सर्वत्र प्रेरणाऽयोगादुपकारकत्वमेवावशिष्यते । तच्चेष्टसाधनत्वमेवेति करणधर्मनिरासेनैव निरस्तं भविष्यतीति ॥

[69] अथ करणधर्मपक्षः । तत्र करणपदेन किं शब्दबोधकरणत्वाच्छब्दभावनां प्रति करणत्वेन व्यवहाराच्च यजेतेतिलिङाद्याख्यातशब्दो विवक्षितः, उत फलकरणत्वात्तदर्थो भावनायागादिः । आद्ये करणधर्मः शब्दनिष्ठाभिधा स्यात्, अन्त्ये भावनादिनिष्ठा इष्टसाधनता स्यात् । तत्र भावनानिष्ठा साधनता परम्परात्मिका, यागनिष्ठा तु साक्षादिति । तत्राभिधाया शब्दधर्मभूताया मीमांसकोपगताया असत्त्वात्, प्रसिद्धायाश्चाभिधायाश्शब्देऽसत्त्वात्, अतिरिक्ताभिधासत्त्वेपि तज्ज्ञानादप्रवृत्तेश्च नाभिधापक्षश्श्रेयान् । नन्वितरसर्वबाधात्परिशेषात्तत्पक्ष इति चेत् — अभिधापक्षेपि बाधकं तदेवास्तीति ।

तथाहि — अपौरुषेये वेदे लिङ् मां प्रवर्तयतीति व्यवहारानुसारेण लिङ्निष्ठः प्रवर्तनारूपो धर्मस्स्वीकार्यः । तत्र लिङादौ विलक्षणधर्मस्य, तस्य लिङ्निष्ठत्वलिङ्वाच्यत्वप्रवृत्त्यनुकूलत्वानाञ्च कल्पनामपेक्ष्य लिङ्निष्ठत्वेन क्लृप्तस्यार्थभावनाभिधानरूपव्यापारस्यैव लिङ्वाच्यत्वप्रवर्तनात्वमात्रकल्पनं युक्तम् । अत एवेष्टसाधनत्वमपि न विधिः, तस्य लिङ्निष्ठत्वाभावात्; याग इष्टसाधनं तस्मात्कुर्विति सहप्रयोगानुपपत्तेश्चेत्यभिधैव विधिः । यथाऽऽह वार्तिककारः, 'अभिधाभावनामाहुरन्यामेव लिङादयः' इति पक्षमेतं पार्थसारथिमिश्र उपापीपदत् । प्राचीनतरो मण्डनमिश्रश्चेष्टसाधनतापक्षम् । तत्र न प्रथमः — अभिधा हि नाम शब्दादर्थज्ञानेऽपेक्षितो व्यापारः । तच्च शक्तिस्मरणम् । तच्चात्मनिष्ठमिति न शब्दनिष्ठाभिधाकल्पने किञ्चित्प्रमाणम् । नन्वात्मनिष्ठस्य कथं शब्दव्यापारत्वमिति चेन्न — आत्मनिष्ठापूर्वस्य यागावृत्तेर्यागव्यापारत्ववदुपपत्तेः । ननु यागस्य द्रव्यत्यागस्य ज्ञानादिरूपतयाऽऽत्मनिष्ठत्वादपूर्वात्मकव्यापारकारणत्वं युज्यते, सामानाधिकरण्यात् । लिङादेस्तु शब्दत्वादनात्मगतस्य कथमात्मनिष्ठाभिधाव्यापारकारणत्वमिति चेन्न — अनात्मनिष्ठत्वेपि केवलमात्मनिष्ठज्ञानविषयतायामेव सत्यामपि तथैव विष-

---

१. प्र. ' अत्र करणमित्यनुषञ्जनीयम् '

दन्यव्यापारत्वेनाप्युपपत्तेः। विषयतयाऽपि (विषयतायामपि) च स्वव्यापारं प्रति लिङ्गवद्धेतुभावाविरोधात्। अधिकत्वेऽपि ततोऽप्रवृत्तेः। बालानां तदभावेऽपि तद्भावात्। शब्दान्तरेण तच्छ्रावणामप्यप्रवृत्तेः॥ नच विलक्षणैव सा लिङो विषयः। तद्वैलक्षण्यं प्रतीतिं (प्रतिपत्तिं) प्रति चेत्, अर्थविशेषोऽपि स्यात्। प्रवृत्तिमात्रं प्रति चेत्, अभिधासमवेतं तदिति कुतः? तत्सन्निधानादिति चेन्न-अनियमात्॥ अन्यस्य सर्वस्य निषेधादिति चेन्न – प्रवृत्तिहेतुत्वनिषेधस्य तुल्यत्वात्। तत्स-

---

यतया ज्ञायमानतारूपया, अनात्मगतधूमादिलिङ्गस्य ज्ञायमानतया आत्मगतपरामर्शं प्रतीव, कारणत्वोपपत्तेः। ननु शब्दोऽर्थमभिधत्त इति व्यवहाराच्छब्दनिष्ठधर्म एवाभिधा संगतिरूपा। नचेयमीश्वरेच्छा; तत्र मानाभावात् औत्पत्तिकशब्दार्थसंबन्धस्य स्थापितत्वाच्चेति चेत् – अस्तु शब्दगता काचिदभिधा। अथापि न सा विधिः, अभिधाज्ञानस्य प्रवृत्त्यकारणत्वात्। बालानामभिधाऽभावेऽपि स्तनपानादाविष्टसाधनतामात्रात्प्रवृत्त्या व्यतिरेकव्यभिचारात्, लिङादिनेवाभिधाशब्दादिनाऽभिधाज्ञाने सति प्रवृत्त्यभावेनान्वयव्यभिचाराच्च॥ ननु विलक्षणतयाऽभिधा लिङ्विषयः, नत्वभिधात्वरूपेण। अतो नाभिधाशब्दादिश्रवणे प्रवृत्त्यापत्तिः। नच बालप्रवृत्तौ व्यभिचारः, पराधीनप्रवृत्तिं प्रत्येवाभिधाज्ञानस्य हेतुत्वादिति चेत् – किमिदं वैलक्षण्यं लिङ्जन्यार्थप्रतीत्यन्यथानुपपत्त्या स्वीकृतम्, उत प्रवृत्त्यन्यथानुपपत्त्या। नाद्यः, तथासति धियामर्थाधीनविशेषशालितया वाच्यतावच्छेदकवैलक्षण्यस्य वक्तव्यत्वापत्तेः। नान्त्यः, अभिधाज्ञानादेव प्रवृत्तिरित्यस्यासिद्धतया प्रवृत्त्यन्यथानुपपत्तिकल्पितवैलक्षण्यस्याभिधानिष्ठत्वे मानाभावात्। नन्वभिधाया लिङ्सन्निहितत्वाद्वैलक्षण्यमभिधासमवेतमिति चेत्, वाच्यतया सन्निधानमर्थभावनादावपि तुल्यम्, आधेयतया सन्निधानं संख्याद्यभिधान-लिङ्निष्ठानुपूर्व्यादावपि तुल्यमित्यनियमादभिधाया एव कथं तद्वैलक्षण्यम्? अतो विनिगमकाभावादन्यदपि प्रवर्तनात्वेन ग्राह्यं स्यात्। नन्वितरबाधादभिधापरिशेष इति चेत् — कथमितरबाधः, किं प्रवृत्तिहेतुत्वाभावात् उतासन्निहितत्वात्। नाद्यः, तत्तद्धर्मज्ञानादिवाभिधाज्ञानादप्यप्रवृत्तेः। नान्त्यः, असंभवात्। ननु लिङा येन रूपेणाभिधोच्यते, न तेनरूपेण शब्दान्तरेणेत्यर्थवैलक्षण्यस्वीकारान्न शब्दान्तराधीनज्ञानात्प्रवृत्त्यापत्तिरिति चेत्–उक्तमुत्तरं अभिधासमवेतं तदिति कुत इति। किञ्च वैदिकशब्दवेद्यत्वे तादृशाभिधायाः, प्राभाकरसंमतापूर्वपक्ष इव व्युत्पत्त्यलाभो दोष इति॥ नन्वभिधायाः अभिधात्वरूपेण वाऽन्यादृशवैलक्षण्येन वा न लिङ्वाच्यत्वम्; किंतु लोकव्युत्पत्तिलभ्यप्रवर्तनात्वरूपेण। तथाच प्रवृत्त्यन्यथानुपपत्त्या लोकवत् किञ्चिद्व्यापारसिद्धौ अन्यनिष्ठापेक्षया लिङ्निष्ठे तत्त्वौचित्यात्, तत्रापि लिङ्लोडादिसर्वविधिविभक्तिवचनानुगतत्वाच्छाब्दबोधात्पूर्वं नियमेन स्मर्यमाणाया अर्थभावनाविषयकाभिधाया एव तदौचित्याच्च प्रवर्तनात्वेन रूपेण तत्र व्युत्पत्ति-

न्विधिनिषेधस्य चाशक्यत्वात् ॥ शब्दैकवेद्यत्वे चाव्युत्पत्तेः ॥ 'प्रवृत्त्यन्यथाऽनुपपत्तिसिद्धे व्युत्पत्ति' रित्यपि वार्तम्—नहि प्रवृत्तिहेतुः कश्चिदस्तीति प्रवर्तते॥

[70] इष्टसाधनता तु स्यात् । सर्वो हि मया क्रियमाणमेतन्मम समीहितं साधयिष्यतीति प्रतिसन्धत्ते, तत इच्छति कुर्यामिति, ततः करोतीति सर्वानुभवसिद्धम् । तदयं व्युत्पित्सुर्यज्ज्ञानात् प्रयत्नजननीमिच्छामवाप्तवान, तज्ज्ञानमेव लिङ्श्राविणः प्रवृत्तिकारणमनुमिनोति । ततश्च कर्तव्यतैकार्थसमवायिनी इष्टसाधनता लिङर्थ इत्यवधारयति । नच वाच्यम् एवञ्चेत् वरं कर्तव्यतैवास्तु, अवश्याभ्युपगमनीयत्वात् ; कृतमिष्टसाधनतयेति—यथा हि नेष्टसाधनतामात्रं प्रतीत्य प्रवर्तते, असाध्येषु व्यभिचारात्—तथा प्रयत्नविषयसमवायिनीमिष्टसाधनतामधिगम्याधिकारी प्रवर्तते इत्यनुभवः॥ तत्र विषयो धातुना, भावनाऽऽख्यातमात्रेण, शेषन्तु तद्विशेषेण लिङा इत्येवमिष्टाभ्युपायतायामधिगतायामन्वयबलात् तद्विषयस्येष्टसाधनत्वावगतिरिति कर्तव्यतैकार्थसमवायिनीष्टाभ्युपायता लिङः प्रवृत्तिनिमित्तमित्युक्तम् ॥

पर्यवसानं वेदे; लोके तु तेन रूपेण पुरुषाशयग्रहणमित्येकव्युत्पत्तिसिद्धिरिति चेन्न — प्रवर्तनात्वेन प्रवर्तनाज्ञानस्य प्रवृत्तिहेतुत्वाभावात् । प्रवर्तना हि प्रवृत्तिप्रयोजको व्यापारः । नच तस्य प्रवृत्तिप्रयोजकत्वं प्रवृत्तिप्रयोजकत्वरूपेणैव सुवचम् आत्माश्रयात् । नहि घटकारणत्वेन कपालस्य घटकारणत्वम् । अतो यद्धर्मावच्छिन्नज्ञानात्प्रवृत्तिरानुभविकी, तद्धर्म एव लिङ्शक्यतावच्छेदकः, नतु प्रवर्तनात्वम् । एतेनेष्टसाधन ताविधिपक्षमेवावलम्ब्य सापि न तत्त्वेन लिङर्थः, किंतु प्रवर्तनात्वेन रूपेणेत्यप्यपास्तम् । एवञ्च लिङ्श्रवणे मत्प्रवृत्त्यनुकूलव्यापारवानयमिति नियमेन प्रतीयमानत्वात्प्रवृत्त्यनुकूलव्यापारो लिङर्थः इत्यपि न शंक्यम् — प्रवृत्त्यनुकूलत्वस्य विधौ भावनान्वयबललभ्यत्वात् । व्यापारस्य विशिष्य किंचिद्रूपेण लिङ्वाच्यत्वस्यावश्यकत्वात् । नहि सामान्यतो ज्ञानाल्लोके प्रवृत्तिः, नचाभिधात्वादिना विशेषरूपेण । तस्मान्नाभिधापक्ष इति ॥

[70] तस्मादिष्टसाधनतारूपद्वितीयकरणधर्मपक्ष एव ग्राह्यः । तत्रापीष्टसाधनतात्वेनेष्टसाधनताज्ञानस्य प्रवृत्तिहेतुताया अनुभवसिद्धत्वाद्विशिष्येष्टसाधनताज्ञानमेव प्रयोज्यवृद्धप्रवृत्तिहेतुरिति निश्चित्य व्युत्पित्सुर्लिङ इष्टसाधनत्वमर्थ इति निश्चिनोति । तत्रासाध्यगतेष्टसाधनताज्ञानस्याप्रवर्तकत्वात्कर्तव्यनिष्ठमिष्टसाधनत्वं लिङर्थः । नच कर्तव्यताया अप्यर्थकोटाववश्यनिवेश्यत्वे पूर्वोक्तकर्तव्यताविधिवाद एव श्रेयानिति वाच्यम् — इष्टासाधनविषभक्षणादिगतकर्तव्यतायाः प्रवर्तनात्वप्रसंगात् । तावता कर्तव्यताविशिष्टं साधनत्वं लिङर्थ इति न मन्तव्यम् — कृतिविषययागादेर्धातुना कृतेराख्यातेनचोक्ततया समभिव्याहारात्कृतिविषयत्वस्य, भावनायामिष्टसाधनत्वान्वयबलादर्थात्कृतिविषयेपि तस्य च लाभ इतीष्टसाधनतामात्रं लिङ्वाच्यमिति ॥

१. प्र. "भावनाया इष्टसाधनतया तत्करणको यागोपि तथे"ति । अत्र नव्यवैलक्षण्यं द्रष्टव्यम् ।

[71] करणस्येष्टसाधनताऽभिधाने ज्योतिष्टोमेनेति तृतीयया न भवितव्यमिति तु देश्यमवैयाकरणस्यावधीरणीयमेव। तत्सङ्ख्याभिधानं हि तदभिधानमाख्यातेन। न च तत् प्रकृते। न च यागेष्टसाधनताऽभिधानं लिङा; किन्त्वन्वयबलात्तल्लाभ इत्युक्तम्॥

[72] यत्तु सिद्धा (द्धो) पदेशादपि प्रतीयते इष्टसाधनता; न चातः सङ्कल्पात्मा प्रवृत्तिरस्तीति देश्यम्—तत्र समुत्कटफलाभिलाषस्य समर्थस्य तत्साधनताऽवगमेऽपि न[1] प्रवृत्तिरिति कः प्रतीयात्। सर्वपक्षसमानश्चैतत् समानपरीहारश्चेति किं तेन॥

[73] अत्राभिधीयते— अस्तु प्रयत्नविषयसमवायिनीष्टसाधनता प्रवृत्तिहेतुः;

---

[71] यत्तु नेष्टसाधनत्वं लिङर्थः, तथासति यागकरणत्वस्याख्याताभिहितत्वात् ज्योतिष्टोमेन यजेतेति तृतीयानुपपत्तेः। नहि संभवति याग इष्टसाधनं ज्योतिष्टोमेनेति। किञ्चापुरुषार्थत्वे हि यागस्साध्यत्वेन नान्वेति, किंतु करणत्वेनेत्युच्यते। इष्टसाधनत्वेन च यागे ज्ञाते पश्वादिवदिष्टत्वात्साध्यत्वेनैवान्वयस्स्यादिति तृतीयाऽनुपपन्नेति – तन्न — चोद्यमिदमवैयाकरणस्यैव भवेत्। तद्गतसंख्याभिधाने हि तद्वाचकपदात्प्रथमा स्यात्; अन्यत्र यथायथं तृतीयादीन्यनभिहितानुशासनसिद्धम्। तदत्र करणत्वाभिधानेपि भावनान्वयिगतसंख्याभिधायिनाऽऽख्यातेन ज्योतिष्टोमगतसंख्यानभिधानात्स्वर्गं प्रति तस्य करणत्वाच्च तृतीयेति। यत्तु साध्यत्वेनान्वय एवोचित इति—तन्न—लिङा यागगतत्वेनेष्टसाधनत्वाबोधनात्। यागस्य भावनायां स्वर्गभाव्यकायां करणत्वेनान्वये तत्र भावनायामिष्टसाधनत्वस्यापि समानपदोपात्ततया प्रयोज्यत्वसंबन्धेनाश्रयतासंबन्धेन संबन्धसामान्येनवाऽन्वयेन बोधे वृत्ते तादृशान्वयबलादर्थाद्याग इष्टसाधनमिति लप्स्यमानत्वात्। इदञ्च '**तदर्थो भावनादिर्वा तद्धर्म इष्टसाधनता वा**' '**अन्वयबलात्तद्विषयस्येष्टसाधनत्वावगति**' रिति पङ्क्तिभ्यां दर्शितम्। एवञ्च ज्योतिष्टोमेन यजेतेत्यादौ करणत्वेनान्वयः। अग्निहोत्रं जुहोतीत्यादौ नासाधितं करणमितिन्यायेनार्थसिद्धसाध्यत्वेनेति।

[72] ननु तर्हि लिङं विना इदमिष्टसाधनमिति वाक्यनिर्देशे ततोऽपि प्रवृत्तिरस्यादिति चेत् – भवत्येव। क्वचिदप्रवृत्तिस्तूत्कटफलाभिलाषाभावादिति। वस्तुत इदं दूषणं कार्यत्वाभिधादीनां विधित्वपक्षेऽप्यस्ति; शब्दान्तरेण तदभिधाने प्रवृत्त्यभावात्। यदितु लिङ्जन्यत्वविशिष्टं विधिज्ञानत्वं प्रवृत्तिप्रयोजकतावच्छेदकमित्युक्त्वा तद्दूषणपरिहारः क्रियते, तदत्रापि तुल्यम्। परन्त्वभिधात्वादिना तज्ज्ञानस्य कारणताया अक्लृप्तत्वात् कर्तव्यतायाश्च धात्वाख्यातसमभिव्याहारलब्धत्वात्पूर्वमेव च पक्षान्तरनिरासादिष्टसाधनत्वमेव लोकक्लृप्तकारणताकं विधिरिति॥

[73] एवं करणधर्मपक्षे द्वितीयपक्षोऽवशेषितः। तत्र तत्त्वमभिधीयते। सत्यमिष्टसाधनत्वज्ञानं प्रवर्तकम्। तच्च ज्ञानं क्वचित्साक्षादेव भवति; यथा बालस्य पीतस्तनस्य स्तनपानमिदमिष्ट

---

१. सर्वत्र नञं विनापाठः।

तथापि नासौ लिङर्थः सन्देहात् । सा हि किं साक्षादेव लिङाऽवगम्यते, स्तनपानादाविवानुमानादिव बालेन; किंवा तत्प्रतिपादितात् कुतश्चिदर्थादनुमीयते, चेष्टाविशेषानुमितादिवाभिप्रायविशेषात् समयाभिज्ञेनेति सन्दिह्यते । एवञ्च सति सा नाभिधीयते इत्येव निर्णयः— हेतुत्वादनुमानाच्च मध्यमादौ वियोगतः ॥

अन्यत्र क्लृप्तसामर्थ्यान्निषेधानुपपत्तितः ॥ १ ॥

[74] तथाहि – अग्निकामो दारुणी मथ्नीयादिति श्रुत्वा कुत इत्युक्ते वक्तारो वदन्ति, यतस्तन्मन्थनादग्निरस्य सिध्यतीति ॥ (तरतिमृत्युं?) तरति ब्रह्महत्यां योऽश्वमेधेन यजते इत्यादाविष्टाभ्युपायतायामेवावगतायामनुमिमते तान्त्रिकाः यत् , 'अश्वमेधेन यजेत मृत्युब्रह्महत्यातरणकाम ' इत्यादिविधिम् ; निन्दया च निषेधम् ; तद्यथा—' अन्धं तमः प्रविशन्ति ये के चात्महनो जनाः ' इत्यतः नात्मानं हन्यादिति॥ कुर्य्याः कुर्य्यामित्यत्र विधिविहितैव लिङ् नेष्टाभ्युपायतामाह; किन्तु वक्तृसङ्कल्पम्। नहीष्टाभ्युपायो ममायमिति कुर्यामिति पदार्थः, किन्तु तत्प्रतिपत्तेरनन्तरं योऽस्य सङ्कल्पः कुर्यामिति, स एव ॥ सर्वत्र चान्यत्र वक्तुरेवे[illegible]च्छाऽभिधीयते लिङित्यवधृतम् । तथाह्याज्ञाऽध्येषणाऽनुज्ञासंप्रश्नप्रार्थनाऽऽशंसा[illegible] नान्यच्चकास्ति। यां वक्तुरिच्छामननुविदधानस्तत्क्षोभाद्बिभेति, सा आ[illegible]या तु श्रोतुः पूजासम्मानव्यञ्जिका, सा अध्येषणा। वारणाभावव्यञ्जिका [illegible]नुज्ञा। अभिधानप्रयोजना संप्रश्नः । लाभेच्छा प्रार्थना। शुभाशंसनमाशीरिति॥

[75] नच विधिविकल्पेषु निषेध उपपद्यते । तथाहि — यदाऽभिधा विधिः,

---

साधनं स्तनपानत्वादित्यनुमानात् ; क्वचित्परम्परया, यथा चेष्टासंकेतज्ञस्याह्वानचेष्टादर्शनेनाभिप्राये ज्ञाते, इदमाह्वानमिष्टसाधनं आप्ताभिप्रायविषयत्वादित्यनुमानात् । तथा लिङादिकमनुमानवत् साक्षादिष्टसाधनताबोधकं, किंवा चेष्टावदभिप्रायज्ञानद्वारेति विशये – साक्षादिति प्राप्तम् । तत्रेष्टसाधनता नाभिधीयत इति हेतुत्वादिभिः पञ्चभिर्हेतुभिर्निर्णयः ॥

[74] यस्मान्मन्थनमग्निसाधनं तस्मादग्निकामो दारुणी मथ्नीयादिति लोके क्रियागतेष्टसाधनताया विधिं प्रति हेतुत्वेन प्रयोजकत्वेन निर्देशात् , निन्दाया निषेधं प्रतीवेष्टसाधनताया मीमांसकोक्तरीत्या विधिं प्रत्यनुमापकत्वात् , मध्यमोत्तमपुरुषयोरिष्टसाधनत्वार्थकत्वविरहात् प्रत्युत तज्ज्ञानानन्तरभाविसंकल्पार्थकत्वात् , लोकेप्याज्ञादिपरायां लिङीच्छायामेव शक्तेः क्लृप्तत्वात् , न ब्राह्मणं हन्यादित्यादिनिषेधवाक्येष्विष्टसाधनतानिषेधस्य वक्ष्यमाणरीत्याऽनुपपन्नत्वाच्च नेष्टसाधनत्वं विधिरिति ॥

[75] न केवलमिष्टसाधनतायां, प्रागुक्तविधिप्रभेदेषु सर्वत्रैव निषेधानुपपत्तिः । तथाहि– प्रकृतेष्टसाधनतावत् करणधर्मत्वेनोक्ताभिधाविधिपक्षे हननभावनाभिधानं नास्तीत्यर्थस्स्यात् ।

तदा, न हन्यात् – हननभावना नाभिधीयते इति वाक्यार्थो व्याघातान्निरस्तः ॥ यदा कालत्रयापरामृष्टा भावना, तदा नेति संबन्धेऽत्यन्ताभावो मिथ्या ॥ यदा कार्यं, तदा, न हन्यात्–न हननं कार्यमित्यनुभवविरुद्धम्; क्रियत एव यतः ॥ न हननेन कार्यं – हननकारणकं कार्यं नास्तीत्यर्थ इत्यपि नास्ति । दुःखनिवृत्ति-सुखाप्त्योरन्यतरस्य तत्र सद्भावात् ।

[76] हननकारणकमदृष्टं (मपूर्वं) नास्तीत्यर्थ इति तु निरातङ्कं दृष्टार्थिनं प्रवर्तयेदेवेति साधु शास्त्रार्थः ॥ अहननेनापूर्वं भावयेदिति त्वशक्यम् कारण-स्यानादित्वेन कार्यस्यापि तथाभावप्रसङ्गात्, भावनायाश्च तद्विषयत्वात् ॥ अहननसङ्कल्पेनेति यावज्जीवमविच्छिन्नतत्सङ्कल्पस्स्यात् । सकृत्कृत्वैव वा निवृत्तिः; पश्चाद्धन्यादेवाविरोधात् । सम्पादितो ह्यनेन नियोगार्थः ॥ 'यावद्यावद्धननसङ्कल्पवान् तावत्तावद्विपरीतसङ्कल्पेनापूर्वं भावयेदिति वाक्यार्थः, तथाभूतस्याधिकारित्वा' दित्यपि वार्तम् – तदश्रुतेः ॥ प्रसक्तं हि प्रतिषिध्यते, नाप्रसक्तमिति

धात्वाख्याताभ्यां हननभावनाभिधानाच्च तद्व्याहतम् । एवं प्रथमोक्तकर्तृधर्मपक्षेपि हननभावनाद्यभावोऽर्थस्स्यात् । अयञ्च रागादीहमाने व्याहतः, ध्वंसप्रागभावाधिकरणेऽत्यन्ताभाव[illegible]तु साध्यत्वात्; ध्वंसादेश्च तदा दुर्वचत्वात्; कालान्तरे सत्त्वेन प्रामाण्ये, ज्योतिष्टोमेन न[illegible]वनायां स्वर्गभा[illegible]स्यापि प्रामाण्यापत्तेः; हननकाले तद्वारणासिद्धेश्च । यदि कर्मधर्मपक्षः, तदा का[illegible]योऽन्वयः संबन्धे[illegible]निष्ठं फलनिष्ठं वा । आद्ये हननं न कार्यं कृत्यविषय इत्यर्थः । अन्त्ये हननेन कार्यं [illegible]साधनं[illegible] नास्तीत्यर्थः । लोके च किञ्चित्फलमुद्दिश्य हननस्य करणात् द्वयमपि बाधितम् ।

[76] नन्वपूर्वकार्यत्वस्य प्राग्दूषितत्वेऽपि तदेवेष्यत इति चेत् – अस्तु । तदापि न[illegible]र्थस्य किं कार्येऽन्वयः, उत धात्वर्थे । आद्ये हननकार्यमपूर्वं नास्तीत्यर्थः । तत्र पुण्यापूर्वनिषेधे भोजनादाविव दृष्टफलोद्देशेन प्रवृत्तिर्न वार्येत; पापापूर्वनिषेधे च निर्भयं प्रवर्तेतेति विपरीतश्शास्त्रार्थः । पक्षेस्मिन् सिध्यसिद्धिभ्यां व्याघातश्च । अन्त्ये, अहननेनापूर्वं भावयेदिति वा, नेक्षेतोद्यन्तमादित्यमिति स्नातकव्रतादाविव अहननसंकल्पेनापूर्वं भावयेदिति वाऽर्थस्स्यात् । तत्र नाद्यः, अहननस्याभावरूपस्य सर्वदा सत्त्वेनापूर्वस्यानादित्वापत्तेः, कृतेस्साध्यविषयिण्या अभावविषयकत्वाच्च । नान्त्यः, यावज्जीवसंकल्पविवक्षायां कार्यान्तरानवकाशात् । सकृत्संकल्पपक्षे सकृत्कृतश्शास्त्रार्थ इति न्यायेन सकृत्संकल्प्य पश्चात्कदाचिद्धननकरणेपि न दोषस्स्यात् । हननस्य पापहेतुत्वे प्रमाणाभावात् । ननु हननसंकल्पप्रसक्तिकालो योयस्तदातदा अहननसंकल्पं कुर्यादिति शास्त्रार्थः । अतः कदापि न हननप्रसक्तिः, नाप्यन्यकर्मानवकाश इति चेत् – इदमसारम् – तावद्बोधकपदाभावात् । ननु प्रसक्तस्यैव प्रतिषेध्यत्वात्तत्र कदाचित्परं प्रतिषेधे गमकाभावादौचित्यादयमर्थो निश्चीयत इति चेत् – प्रतिषेधपक्षे हि तथाकल्पनम् ।

चेत्— न वै किञ्चिदिह प्रतिषिध्यते; तदभावः प्रतिपाद्यते इति निषेधार्थः; अहनन[1]संकल्पकरणकमपूर्वं वाक्यार्थः ॥ किञ्च न हन्यादिति अहननेनापूर्वस्य कर्तव्यताप्रत्ययो जातो वेदात्; जातश्च हननक्रियायां रागात् । निष्फलाच्च कार्याद्दपेक्षितफलं गरीय इति न्यायेन हन्यादेवेत्यहो वेदव्याख्याकौशलमास्तिक्याभिमानिनो मीमांसकदुर्दुरूट[2]स्य ।

[77] इष्टसाधनतापक्षेऽपि, न हन्यात् — न हननभावना इष्टाभ्युपाय इति वाक्यार्थः । तथाचानिष्टसाधनत्वं कुतो लभ्यते । न हीष्टसाधनं यन्न भवति तदवश्यमनिष्टसाधनं दृष्टम्, उपेक्षणीयस्यापि भावात् ॥ 'यत् रागादिप्रसक्तं प्रतिषिध्यते तदवश्यमनिष्टसाधनं दृष्टम्, यथा सविषमन्नं न भुञ्जीथा इति । तेन वेदेऽप्यनुमास्यते ' इत्यपि न साधीयः — प्रतिषेधार्थस्यैव चिन्त्यमानत्वात् । न हि कर्तव्यत्वस्येष्टसाधनत्वस्य भावनाया वाऽभावः प्रतिपादयितुं शक्यते; लौकिकानां लौकिकप्रमाणसिद्धत्वात् ॥ तथापि प्रतिपाद्यते तावदिति चेन्न — पाषण्डागमनिदर्शनेनानेकान्तात् ॥ नासौ प्रमाणमिति चेन्न— अर्थविपर्ययप्रतिपादनाविशेषेऽस्या-

---

...धे हि किञ्चित्प्रतियोगिकाभावस्य प्रतिपादनम् । अत्रत्वहननसंकल्पक्रिया अपूर्वमुद्दिश्य ...ति कथमयं प्रतिषेधः ॥ ननु माभूत्प्रतिषेधः । अर्थान्तरपक्षे हनननिवृत्त्यसिद्ध्या... कल्प्यत इति चेत्— निवृत्तिसिद्धेरावश्यकत्व एव न प्रमाणम् । अस्तुवाऽऽवश्यक...तदर्थस्वीकारेपि न तत्सिद्धिः; संकल्पसाध्यापूर्वस्य फलान्तरजनकत्वेऽपि तदनिच्छया ...र्थं हननसंभवात् । प्राभाकरपक्षेत्वपूर्वस्यैव परमोद्देश्यत्वमिति लोकापेक्षितफलभावा...मुपेक्ष्य दृष्टफलं हननं सुतरामेव कुर्यादिति । तस्मान्न कर्मधर्मपक्षेपि निषेधोपपत्तिः॥ एवं पक्षान्तरेष्विष्टसाधनतापक्षेप्यनुपपत्तिरेव । हननमनिष्टसाधनमिति बोधो ...नचायं वाक्यार्थः । हननभावनायामिष्टसाधनत्वाभाव एव हि प्रतीयते । नन्विष्टसाधन...वेन हेतुनाऽनिष्टसाधनत्वं कल्प्यत इति चेन्न— उपेक्षणीये वस्तुनि हेतुमति साध्याभावाद्व्यभिचारात् । नच प्रतिषिध्यमानत्वेन हेतुनाऽनिष्टसाधनत्वानुमानमिति वाच्यम्— प्रतिषेधः क इत्येव विचार्यमाणत्वात्; त्वन्मते इष्टसाधनत्वाभावातिरिक्त प्रतिषेधाभावात् ॥ तस्य चानुमापकत्वात् । अस्त्विष्टसाधनत्वाभावमात्रमेवेष्टमिति चेन्न — हननादौ दृष्टसाधने तद्बाधात् । ननु प्रमाणसिद्धाविपरीतमपि शब्दो बोधयत्विति चेत्— तर्हि यागादिकं न कुर्यादिति पाषण्डागमोपीष्टसाधनत्वाभावं वास्तवं बोधयतु । नन्वप्रामाणत्वादसावबोधक इति चेत् —

---

१. अयं क. २. पाठः । प्र. 'किंतु हननाभावसंकल्पकारणकमपूर्वं विधीयते' । क. ख. पा. हननकरणकम् । २. दुल उत्क्षेपे; दुरुपसर्गः, कूटप्रत्ययः । दुरुत्क्षेपको नास्तिकः ।

पि तथाभावात् ॥ तात्पर्यतः प्रामाण्यमिति चेन्न—विधिनिषेधयोरनन्यपरत्वात्; न विधौ परः शब्दार्थ इति वचनात् ॥ तथापि निषेधे तथा भविष्यतीति चेन्न— अविनाभावतदुद्देशप्रवृत्त्योरभावात् ॥ नाप्यसुराविद्यादिवदस्य नञो विरोधिवचनत्वम् । क्रियासङ्गतत्वात्; असमस्तत्वाच्च ॥ तस्मात्—

[78] विधिर्वक्तुरभिप्रायः प्रवृत्त्यादौ लिङादिभिः ॥
अभिधेयोऽनुमेया तु कर्तुरिष्टाभ्युपायता ॥ १५ ॥

तत्र स्वयङ्कर्तृकक्रियेच्छाभिधानं कुर्यामिति । सम्बोध्यकर्तृकक्रियेच्छाभिधानं कुर्या इति । शेषकर्तृकक्रियेच्छाऽभिधानं कुर्वीतेति । तथाचाग्निकामो दारुणी मथ्नीयादित्यस्य लौकिकवाक्यस्यायमर्थस्संपद्यते, अग्निकामस्य दारुमथने

प्रामाणिकविपरीतबोधकत्वाद्यप्रमाणत्वम् । तत् वैदिकनिषेधवाक्येपि प्रकृतपक्षे तुल्यम् । अथ वस्तुत इष्टसाधनत्वाभावस्यैव शब्दतः प्रतीतावप्यनिष्टसाधनत्वे तात्पर्यमिति चेत्— ' न विधौ परश्शब्दार्थ ' इति हि न्यायः । प्रवर्तकवाक्यवन्निवर्तकवाक्यमपि विधिरित्येव प्रसिद्धम्, अज्ञातज्ञापकपुरुषार्थपर्यवसायिवाक्यत्वात् । अतो नार्थवाद इव मुख्यादन्योऽर्थस्स्वीकार्यः [illegible] ननु विधिशब्दो न्यायघटकः प्रवर्तकवाक्यमात्रपरोऽस्त्विति चेत् — एवमपि निषेधस्थलेऽनिष्टसाधनत्वे तात्पर्यमित्यत्र किमिदं तात्पर्यम् ? न तावदविनाभावः, इष्टसाधनत्वाभाववल[illegible]णीयेऽनिष्टसाधनत्वासत्त्वेनाव्यापकत्वात् । नापि प्राङ्निष्कृष्टं तदुद्देशप्रवृत्तत्वं तत्—त्वन्म[illegible] भावात् । तदुद्देशग्राहकप्रमाणाभावाच्च । अथासुरः अविद्येत्यादौ सुराविरोधि विद्याविरो[illegible] प्रतीतिवत् अत्रापीष्टसाधनत्वविरोध्यनिष्टसाधनत्वस्य स्वरसत एव प्रतीतिरस्त्विति चेन्न ' प्रसज्यप्रतिषेधोऽयं क्रियया सह यत्र नञ् ' इति प्रकृतेऽभावार्थकत्वाद्विरोध्यर्थकत्वाभावा[illegible] नामादियोग एव तत्सत्त्वात् । तत्रापि समासस्थल एव विरोध्यर्थस्य स्वरसप्रतीतिः; [illegible] तु तात्पर्यचिन्तयैव । अतः प्रतिषेधस्थल इहानिष्टसाधनत्वालाभान्निषेधानुपपत्तिरेव ॥ [illegible]ति त्रि-

[78] तस्मादिष्टसाधनत्वस्य लिङादिना साक्षादनभिधेयत्वाच्चेष्टावत् अभिप्रायज्ञापनेन त[illegible]नुमेयत्वमेव स्वीकार्यमिति लिङादिभिरभिधेयो विधिरनुवक्तृभिन्नस्य वक्तुः प्रवृत्त्यादिविषयःऽभिप्राय एवेति । (ननु प्रवृत्त्यादीत्यादिपदार्थः कः? न तावन्निवृत्तिः । तथासति विधिस्थले प्रवृत्तिविषयकोऽभिप्रायः, निषेधस्थले प्रवृत्त्यभावरूपनिवृत्तिविषयक इति सिध्यति । तथाच नञर्थस्य भावनान्वय इष्टो भवति । यद्यपि विधिनिषेधयोर्द्वयोर्विधित्वव्यवहारादभिप्रायप्राधान्यमुभयत्र युक्तम् – अथापि प्रतिषेधस्य विध्यभावरूपत्वौचित्यात्, उपरि **विषभक्षणगोचरा प्रवृत्तिर्मम** नेष्टेति लिङर्थेन नञर्थान्वयस्यैव वक्ष्यमाणत्वाच्च न निवृत्तिविषयकाभिप्रायस्तत्र लिङर्थ इति चेत् — सत्यम् ।) आदिपदाद्यागादिर्धात्वर्थो गृह्यते । तेन भावनाविषयकोयागादिविषयकश्चाभिप्रायस्तत्रतत्रोचितेष्टसाधनत्वानुमापक इति ज्ञाप्यते; प्राग्विधेष्टसाधन-

प्रवृत्तिर्ममेष्टेति । ततः श्रोताऽनुमिनोति, नूनं दारुमथनयत्नोऽग्नेरुपाय इति । यद्विषयो हि प्रयत्नो यस्याप्तेनेष्यते, स तस्यापेक्षितहेतुः; तथा तेनावगतश्च; यथा ममै (यै?) व पुत्रादेर्भोजनविषयः इति व्याप्तेः । विषं न भक्षयेदित्यस्य तु विषभक्षणगोचरा प्रवृत्तिर्मम नेष्टेत्यर्थः । ततोऽपि श्रोताऽनुमिनोति, नूनं विषभक्षणभावना अनिष्टसाधनम्; यद्विषयो हि प्रयत्नः कर्तुरभिमतसाधकोप्याप्तेन नेष्यते, स ततोऽधिकतरानर्थहेतुः, तथा तेनावगतश्च; यथा ममै (यै?) व पुत्रादेः क्रीडा — कर्दमविषभक्षणादिविषय इति व्याप्तेः ॥

[79] लौकिक एव वाक्येऽयं प्रकारः कदाचिद्बुद्धिमधिरोहति, नतु वैदिकेषु, तेषु पुरुषस्य निरस्तत्वादिति चेन्न – निरासहेतोरभावात् ॥ तदस्तित्वेऽपि प्रमाणं नास्तीति चेत् – मा भूदन्यत्; विधिरेव तावत् गर्भ इव पुंयोगे प्रमाणं श्रुतिकुमार्याः; किमत्र क्रियताम्? लिङो वा लौकिकार्थातिक्रमे, 'यएव लौकिकास्तएव वैदिकास्तएव चैषामर्थाः' इति विप्लवेत. । तथाच जरगडदशादिवदन[illegible] इति भव सुस्थः ॥ स्यादेतत् । तथापि वक्तॄणामुपाध्यायानामेवाभिप्रायो वेदे [illegible]स्तु । कृतं स्वतन्त्रेण वक्त्रा परमेश्वरेणेति चेत् – न – तेषामनुवक्तृत-

[illegible] । एवञ्च त्रिधिस्थले यागो मदिष्टसाधनं मत्कृतिविषयत्वेनाप्तेष्टत्वादिति, नि[illegible]बलवन्मदनिष्टसाधनं इष्टसाधनत्वे सत्यपि मत्कृतिविषयत्वेनाभिज्ञाप्तेनेष्टत्वा[illegible]कारः । अयमत्र प्रवर्तताभित्याकारकत्वादिच्छायाः प्रवृत्तिविषयत्वेनेच्छाविषयत्वं [illegible] । अत्रेष्टसाधनत्वे सतीति हेतुविशेषणमिष्टानिष्टोभयासाधने उपेक्षणीये [illegible]य । सर्वत्र सामान्यमुखी व्याप्तिः ॥

[illegible]पौरुषेयलिङोऽभिप्रायार्थकत्वेप्यपौरुषेये वेदे कथमिति चेन्न – वेदे पौरुषेयत्व[illegible]त् ; पौरुषेयत्वसाधकहेतोश्च प्रागुक्तत्वात् । किं साधकान्तरचिन्तया; अभि[illegible]र्थस्यैव तत्साधकत्वात् । पुंयोगानर्हा कुमारीयमिति भवतोच्यते । गर्भस्तु वि[illegible]पयति । अतो भवता पुंयोगाकल्पनेपि स्वयं पुंयुक्तैवासौ । ननु वैदिकालिङो नाभिप्रायोऽ[illegible]इति चेत् — तर्हि लोकवेदाधिकरणविरोधः ; अर्थान्तरवाचित्वे व्युत्पत्त्यसिद्धेरनर्थकत्वापत्तिश्चेति । तस्मादिच्छात्वेनेच्छायामेव लिङो व्युत्पत्तिरिष्टसाधनत्वानुमितिश्चेति सिद्धमिच्छापरत्वम् ॥ नचेयमनुवक्तिरिच्छा भवितुमर्हति; शुकपक्ष्यादिवदुच्चारणानूच्चारणरूपाध्यापनवतामिच्छाप्रमक्त्यभावात् । केषाञ्चिदर्थज्ञानां इच्छासंभवेऽपि नासौ लिङर्थः; राजोक्तानु-

१. प्र. 'यथा मत्पित्रा मत्प्रयत्नविषयतयेष्यमाणं भोजनं मदिष्टसाधन'मिति । एवंसति नावश्यं सामान्यमुखी व्याप्तिः । पुत्रादिरूपस्य ममेत्यर्थापेक्षया मदीयपुत्रादेरित्यर्थ उचितः । अवगम[illegible]नायकयनमिष्टसाधनत्वद्रढ्याय । अत्रोपरि च ममेत्यत्र मयेति पाठस्स्यात् ।

चाऽभ्यासाभिप्रायमात्रेण प्रवृत्तेः शुकादिवत् तथाविधाभिप्रायाभावात् । भावे वा न राजशासनानुवादिनोऽभिप्राय आज्ञा, किंनाम राज्ञ एवेति लौकिकोऽनुभवः ॥

[80] श्रुतेः खल्वपि – कृत्स्न एव हि वेदोऽयं परमेश्वरगोचरः ।
स्वार्थद्वारैव तात्पर्यं तस्य स्वर्गादिवद्विधौ ॥ १६ ॥

न सन्त्येव हि वेदभागाः; यत्र परमेश्वरो न गीयते । तथाहि— स्रष्टृत्वेन पुरुषसूक्तेषु, विभूत्या रुद्रेषु, शब्दब्रह्मत्वेन मण्डलब्राह्मणेषु, प्रपञ्चं पुरस्कृत्य निष्प्रपञ्चतयोपनिषत्सु, यज्ञपुरुषत्वेन मन्त्रविधिषु, देहाविर्भावैरुपाख्यानेषु, उपास्यत्वेन च सर्वत्रेति ॥ सिद्धार्थतया न ते प्रमाणमिति चेन्न — तद्धेत (तोः) कारणदोषशङ्कानिरासस्य भाव्यभूतार्थसाधारणत्वात् ॥

[81] अन्यत्रामीषां तात्पर्यमिति चेत् – स्वार्थप्रतिपादनद्वारा, शब्दमात्रं तत्र

वादिनि हि भृत्ये नायं भृत्यस्याभिप्रायः किन्तु राज्ञ इति लोकानुभवः । अतः स्वतन्त्रवक्त्रिच्छा लिङर्थः । तत्सिद्धं वैदिकविधिप्रत्ययः स्वतन्त्रवक्तृच्छावाची विधिप्रत्ययत्वाल्लौकिकवदित्यनुमानमीश्वरसाधकमिति ॥

[80] श्रुतेः खल्वपीश्वरस्सिद्ध्यति । पूर्वं श्रुतित्वरूपहेतुनेश्वरानुमानमुक्तम् । अत्र कृत्स्ना शब्दविधया तत्र प्रमाणमित्युच्यते । स्रष्टृत्व विभुत्व शब्दैकसमधिगम्यविशेष साध्यत्व कर्तृत्वविशिष्टप्रपंचदोषलेपराहित्य यज्ञाराध्यत्व साधुपरित्राणाद्यर्थानेकावतारशालि नायं स्वर्गभ पासनाविषयत्वादिना तस्यैव सर्वत्र वर्णनात् । यद्वा श्रुतिलिंगविधयैव प्रमाण ...सम्बन्ध ईश्वरसृज्यत्वाद्याकारविशिष्टं तथा श्रुतिगम्यत्वात्, यद्यथा श्रुतिगम्यं तत् तदाकारवत् साधनं मादीति । ननु व्यवहारात्कार्यान्वित एव व्युत्पत्तिरिति तदप्रतिपादकानां पुरु प्रामाण्यमेव नेति चेन्न—कार्यपराणामपि बौद्धाद्यागमानामप्रामाण्यात् कार्यपरत्वं न प्रयोजकम्; किन्तु भ्रमप्रमादादि पुरुषदोषराहित्यमिति तस्य साध्यार्थकवाक्य इव सिद्धार्थ विषयादौ सत्त्वादप्रामाण्यायोगात् । कार्यान्वित एव व्युत्पत्तिरिति गुरुमतस्यानभ्युपगमादिति

[81] ननु सत्यं सिद्धार्थबोधकत्वमपि वाक्यस्य; अथापि वैदिकवाक्यानां प्र निवृत्त्यन्यतरापर्यवसायित्वे निष्प्रयोजनत्वापत्त्या अन्ततस्तत्र तात्पर्यादर्थवादानां स्व नास्तीति भाट्टमतं स्यादिति चेत्— अन्यत्र तात्पर्यमपि स्वार्थद्वारैव वाच्यम् । अन्यथा स्य श्रूयमाणत्वमात्रेण अन्यत्र तात्पर्येऽव्युत्पन्नानामपि तात्पर्यग्रहप्रसंगात्, विनिगमनाविरहेण सर्वत्र तात्पर्यप्रसंगाच्च । अतः प्रतिपाद्यार्थद्वारैव तत्सम्बन्धिनि प्रवृत्तिनिवृत्तिगोचरे तात्पर्यं वाच्यम् । अतः 'यन्न दुःखेन संभिन्नं' मित्यादिस्वर्गनरकादिस्वरूपबोधकवाक्यानां विधिघटकस्वर्गादिपदव्युत्पादकत्ववत्पुरुषसूक्तादेरपि कतिपयविधिगतेश्वरादिपदार्थस्वरूपबोधकत्वम् ।

१. स्पष्टत्वात्परानुक्तत्वाच्च द्वितीयकल्पदूषणं न कृतम् ।

वा ? प्रथमे स्वार्थेऽपि प्रामाण्यमेषितव्यम् , तस्यार्थस्यानन्यप्रमाणकत्वात् ॥ अत एव तत्र तस्य स्मारकत्वमित्यपि मिथ्या ॥ तत्प्रतिपादकत्वेऽपि न तत्र तात्पर्यमिति चेत् — स्वार्थापरित्यागे (गेन?) ज्योतिश्शास्त्रवदन्यत्रापि तात्पर्ये को दोषः ? अन्यथा स्वर्गनरकव्रात्यश्रोत्रियादिस्वरूपप्रतिपादकानामप्रामाण्ये बहु विप्लवेत ॥ तत्राबाधनात्तथेति चेत्—तुल्यम् ॥ न तादृशोऽ(ग)र्थः क्वचित् दृष्ट इति चेत् — स्वर्गादयोऽपि तथा ॥ तन्मिथ्यात्वे तदर्थिनामप्रवृत्तौ विधानानर्थक्यप्र... ति चेत् — इहापि तदुपासनाविधानानर्थक्यप्रसङ्गः । तन्मिथ्यात्वे हि सा... ज्यादिफलमिथ्यात्वे कः प्रेक्षावांस्तमुपासीतेति तुल्यमिति ॥

...क्यादपि । संसर्गभेद (विशेष) प्रतिपादकत्वं ह्यत्र वाक्यत्वमभिप्रे... यत्पदकदम्बकं यत्संसर्गभेदप्रतिपादकं, तत् तदनपेक्षसंसर्गज्ञान... लौकिकं; तथा च वैदिकमिति प्रयोगः । विपक्षे च बाधकमुक्तम् ॥

...ङ्ख्याविशेषादपि---स्यामभूवं भविष्यामीत्यादिसङ्ख्या च वक्तृगा ।
समाख्याऽपि न शाखानामाद्यप्रवचनादृते ॥ १७ ॥

...य लोकसिद्धत्वं, येनानधिगतार्थगन्तृत्वरूपप्रामाण्यं तत्र प्रसिद्धार्थबोधकार्थवादानामिव ... अतोऽनन्यप्रमाणकत्वात्प्रामाण्यमेव । एवमेतानि पदजातानि विशकलितपदार्थ... नतु विशिष्टार्थप्रतिपादकानीति कार्यवाक्यमात्रेऽन्विताभिधानवादिहठवादोऽपि ...यतावशाद्विशिष्टबोधस्यानुभवात् । नच प्रतिपादितोप्यर्थः तात्पर्यविषयार्थान्तरा...ः मानाभावात् ; कालस्वरूपबोधिज्योतिश्शास्त्रस्य तदनुपेक्षया तत्तत्कालकर्तव्य...त्ववत् पुरुषसूक्तादेरपि स्वप्रतिपाद्यार्थसम्बन्धिकर्तव्यबोधकविधिवाक्यशेषत्वसम्भवे...पत्तेः । न चेत् – स्वर्गादिस्वरूपबोधकवाक्यानामपि स्वार्थे प्रामाण्यं मा भूत् । ...ात्तज्जनितार्थज्ञानं प्रमेति चेत् – इहापि तुल्यम् । अस्मददृष्टत्वमात्रेणानाश्वासे ...स स्यात् । विध्यवैयर्थ्याय तत्रानाश्वासत्यागेऽत्रापि सालोक्याद्यर्थेश्वरोपासनाविध्य... । नन्वतथ्यमप्युपास्यं भवेत् । न, तन्मिथ्यात्वे तत्सालोक्यादेरपि मिथ्यात्वापातात् ॥

...एवं वाक्यादपि । शब्दस्य पृथक्प्रामाण्यं तावत् प्रागेव स्थापितम् । अतो विशि...दकत्वं दृष्ट्वाऽनुमीयते – वैदिकवाक्यानि स्मारितार्थसंसर्गज्ञानपूर्वकाणि वाक्यत्वात् ...ाक्यवदिति । अत्र वाक्यत्वं विशिष्टार्थप्रमितिजनकत्वरूपं अनाप्तवाक्यादिव्यावृत्तं सद्धेतुः । नचास्मदनूच्चारितवैदिकवाक्येषु साध्याभावाद्बाधः, सामानाधिकरण्येन साध्यसिद्धेरुद्देश्यत्वात्क...ल्पाद्यकालिकवाक्यमादायानुमाननिर्वाहात् । यद्वा आद्यत्वं पक्षविशेषणमस्तु । नच हेतोरप्रयोजक...त्वम् ; प्रमायाः परतन्त्रत्वादिति प्रागुक्ततया वक्तृगुणाभावे प्रमितिजनकत्वायोगादिति ॥

[83] संख्याविशेषादपि । अनुवादरूपवाक्यातिरिक्तवैदिकवाक्यगतोत्तमपुरुषार्थसंख्या वक्तृ-

कार्यतया हि प्राक् सङ्ख्योक्ता, सम्प्रति तु प्रतिपाद्यतयोच्यते । तथाहि—उत्तमपुरुषाभिहिता सङ्ख्या वक्तारमन्वेतीति सुप्रसिद्धम् । अस्ति च तत्प्रयोगः प्रायशो वेदे । ततस्तदभिहितया तयाऽपि स एवानुगन्तव्यः । अन्यथाऽनन्वय-प्रसङ्गात् ॥ अथवा समाख्याविशेषः सङ्ख्याविशेष उच्यते । काठकं कालाप-कमित्यादयो हि समाख्याविशेषाः शाखाविशेषाणामनुस्मर्यन्ते । ते च न प्रवच-नमात्रनिबन्धनाः, प्रवक्तॄणामनन्तत्वात् । नापि प्रकृष्टवचननिमित्ताः; उपाध्याये-भ्योऽपि प्रकर्षे प्रत्युतान्यथाकरणदोषात् । तत्पाठानुकरणे च प्र[illegible] कति चानादौ संसारे प्रकृष्टाः प्रवक्तार इति को नियामक इति । न[illegible] तो[illegible] चतुः समाख्येति युक्तम् ; भवद्भिस्तदनभ्युपगमात् । अभ्युपगमे वा [illegible] वेदकार इति, वृथा विप्रतिपत्तिः ॥

[84] स्यादेतत् ; ब्राह्मणत्वे सत्यवान्तरजातिभेदा एव कठत्वाद[illegible] ध्येया तदनुष्ठेयार्था च शाखा तत्समाख्यया व्यपदिश्यते इति किम[illegible]

[illegible]दमाश्रतथा
स्वतन्त्रवक्त्र-
[illegible]बालौकिकव-

गामिनीति तदाश्रयवक्तृसिद्धिः; काठकादिसमाख्या आद्यप्रवचनं विना नान्येन [illegible] प्रवर्तेत इति तत्कर्तृतयापि तत्सिद्धिः । प्रयोगश्च – विवादगोचरसंख्या वक्तृगा अ[illegible] वयान्यवाक्यगोत्तमपुरुषोक्तसंख्यात्वात् लौकिकवदिति, काठकादिसमाख्या आ[illegible] मित्तका अन्यानिमित्तकत्वे सति सनिमित्तकत्वात् यन्नैवं तन्नैवमिति च । नच [illegible] निमित्तत्वसंभवे आद्यत्वविशेषणं व्यर्थमिति वाच्यम् – यद्यध्यापनमात्रं प्रवचनम् [illegible]न्तनाध्यापकमादायापि समाख्या स्यादिति प्रकृष्टवचनं प्रवचनमिति वक्तव्यम् । कर्षो न शिक्षकाध्यापकोक्तस्वरवर्णाधिकस्वरवर्णवत्त्वरूपः, तथासति वक्तुस्समाख्या[illegible] नीययशोगुणप्रतिकोटितयाऽन्यथाकरणदोषस्यैवापातात् । यावदुपाध्यायोक्तमात्रानुवा[illegible] कर्षः । ननु सर्वस्य समानस्वरवर्णप्रयोक्तृत्वेपि क्वचिदेव अद्रुतत्वाविलम्बितत्वस्फुटत्वे वि-वचनगुणानुभवः । ईदृशप्रकर्षकं वचनं कठकलापादिमात्र इति चेन्न—अनादौ [illegible]दिति कशाखाविषयेपि बहवस्तादृशा इति नात्रैकस्समाख्यानियामक इति । नच तत्राद्यमादा[illegible] ति भवद्भिस्सुवचम्—सर्गप्रलयानङ्गीकारात्कस्यचिदाद्यत्वायोगात् । यदि सर्गाद्यभ्युप[illegible] चिदाद्यत्वमुच्यते, तर्हि सर्गारम्भप्रभृतिस्थिते वेदे पश्चात्कालिकस्य कस्यचित्प्रवक्तु[illegible] काठकसमाख्यादर्शनस्यानुपपन्नत्वात्, यः श्रुतित्वादेवाध्याप्य ज्ञापनीयां प्रथमतः प्रो[illegible]विरहेण प् एव कठादिरिति सिद्ध ईश्वरः ॥

[illegible]वाक्यं

[84] ननु कठप्रोक्ता शाखेति न काठकसमाख्यार्थः; किन्तु कठाध्येया कठानुष्ठेयार्था वा शाखेति । कठत्वञ्च नैकमात्रनिष्ठम् ; किन्तु तच्छाखाध्येतृसर्वब्राह्मणगतो ब्राह्मणत्वव्याप्यजाति-विशेष इति चेन्न – स्वत्रैवैश्यान्यामपि तच्छाखाध्ययनात् कठत्वस्य ब्राह्मणत्वव्याप्यस्य तच्छा-

क्षत्रियादेरपि तत्रैवाधिकारात् । न च यो ब्राह्मणस्य विशेषः, स क्षत्रियादौ
वति । न च क्षत्रियादेरन्यो वेद इत्यस्ति । नच कठाः काठकमेवाधीयते, त-
मेवानुतिष्ठन्तीति नियमः; शाखासङ्करस्यापि प्रायशो दर्शनात् ॥ प्रागेवं
यं) नियम आसीत्; इदानीमयं विप्लवते इति चेत्—विप्लव एव तर्हि सर्वदा,
ाद्यवान्तरजातिविप्लवादित्यगतिरेवेयम् । तस्मादाद्यप्रवक्तृवचननिमित्त एवायं
्याविशेषसंबन्ध इत्येव साध्विति ॥ ॥ श्रीः ॥

सर्वनिष्ठत्वायोगात् । नहि काठककालापकादिसमाख्यातानां सर्वासामध्येतॄणां वि-
भ्रान्तत्वे क्षत्राद्यध्येयो वेदः कश्चिदन्योऽस्ति; येन क्षत्रादेरत्रानधिकारस्स्यात् । नच क्ष-
तत्वेपि कठब्राह्मणाधीतत्वान्न काठकत्वहानिरिति वाच्यम्—तथासति क्षत्रमादायापि समा-
पत्तेः । शाखायां कठविशेषणं हि कठान्ययोगव्यवच्छेदाय वाच्यम् । तत् क्षत्रादेरध्येतृत्वा-
। ननु तर्हि कठब्राह्मणेषूतच्छाखान्यशाखायोगव्यवच्छेदज्ञापनेन काठकसमाख्या सफ-
त् । क्षत्रियास्तु सह शाखान्तरमधीयत इति । तथाचेतरशाखानध्ययनविशिष्टकठकर्तृ-
ध्ययनविषयत्वं काठकत्वमिति चेन्न — ब्राह्मणैरपि सह शाखान्तराध्ययनार्थानुष्ठानयोः कर-
दर्थबाधात् । ननु प्राक् तैरन्यशाखाध्ययनं न कृतम् । इदानीमेव तु स नियमो विप्लुत-
त् — अथ नियमविप्लवस्वीकारे समाख्याविप्लवः प्राप्त एव । तत्तच्छाखाध्यायिसर्व-
त्वात्कठत्वादिजातेः काठककालापकाद्यनेकाध्येतृषु संकरात् काठकादिसमाख्या वि-
संकीर्णा भवेदिति । नच तच्छाखाध्यायिब्राह्मणसामान्ये सा जातिर्नेष्यते; किन्तु अ-
खायोगव्यवच्छेदौचित्याय तच्छाखामात्राध्यायिब्राह्मणमात्रे इति कथं विप्लव इति वा-
— इदानीमेव शाखासङ्करस्वीकारे आयुरारोग्यादिपौष्कल्यशालिनि प्राक्काले एकशाखा-
ध्ययनस्य दुर्वचतया सर्वदापि हि नियमविप्लव एव । अतस्तन्मात्राध्येतृगतं कठत्वमिति
म् । प्रमाणाभावाच्च न कठत्वं जातिः । नच कठा इति व्यवहारः प्रमाणम् — तस्य
क्तां शाखामधीयत इति कठाः इति, 'कठचरकाल्लुक्' (अ० ४ - ३ - १०७)
सनबलात्तच्छाखाध्येतृसर्वसाधारण्यात् । अतो मूलभूतः प्रवचनकर्ता एक एव मुख्य-
श्रयः । ननु व्यासविभक्ततत्तच्छाखामात्राध्येतृतया कठकालापादीनां पुराणप्रसिद्धत्वात्
ाविभागसमनन्तरकालिककठमात्रकर्तृकाध्ययनविषयत्वं तत्कालिककठमात्रकर्तृकाध्यापन-
षयत्वं वा काठकत्वमस्तु । तथाच न कठ ईश्वर इति चेन्न — ईदृशाल्पशक्त्यर्वाचीनपुरु-
त्यमादाय प्राचीनवैदिकसमाख्यानिर्वचनायोगात् । तस्माद्गत्यन्तराभावादीश्वर एव तत्तच्छाखा-
मादाय प्राचीनवैदिकसमाख्यानिर्वचनायोगात् । शाखाविभागानन्तरमध्यापकेषु कठादि-
ध्यापनौपयिकशरीरपरिग्रहः कठकलापादिपदवाच्यः; शाखाविभागानन्तरमध्यापकेषु कठादि-
व्यपदेशस्तु पुराणकृतः तादृशेश्वरगतगुणयोगादौपचारिक इति । तस्मादाद्यप्रवचनमेव निमि-
त्तमिति तस्यान्यत्र बाधादीश्वरसिद्धिरिति ॥ इति द्वितीययोजना ॥ ॥ श्रीः ॥

[85] स एवं भगवान् श्रुतोऽनुमितश्च कैश्चित् साक्षादपि दृश्यते प्रमेयत्वाद्- घ(त्वात् घ)टवत् ॥ ननु तत्सामग्रीरहितः कथं द्रष्टव्यः? सा हि बहिरिन्द्रियप्रयोगः मनोगर्भा वा तत्र न सम्भवति; चक्षुरादेर्नियतविषयत्वात्; मनसो बहिर... तन्त्र्यात्। तदुक्तं, 'हेत्वभावे फलाभावा' दित्यादि – न – कार्यैकव्यङ्ग्यकालाप-... स्सामग्र्या निषेद्धुमशक्यत्वात् ॥

[86] अपिच दृश्यते तावद्बहिरिन्द्रियोपरमेऽपि असन्निहितदेशकालार्थपाध्यार्थ... त्कारः। न च स्मृतिरेवासौ पटीयसी, 'स्मरामि' 'स्मृतं' वेति स्वप्नानुस... भावात्; 'पश्यामि,' 'दृष्ट' मित्यनुव्यवसायात्। नचारोपितं तत्रानुद्भ... तो... अबाधनात्। अननुभूतस्यापि स्वशिरश्छेदनादेरवभासनाच्च॥ स्मृतिविपर्या... विति चेत् – यदि स्मृतिविषये विपर्यास इत्यर्थः, तदाऽनुमन्यामहे। अथ... वेवानुभवत्वविपर्यासः इति; तदा प्रागेव निरस्तः॥ न च सम्भवत्यपि। स्वतन्त्रबहिर्-

[85] एवं पञ्चभिस्स्तबकैः विशिष्य च पञ्चमेन कार्यत्वादिभिस्समाख्याविशेषान्तैर्हेतुभिः... लौकिकव- स्मृतीतिहासादिश्रुतो भगवान् यथावदनुमितः। सोऽयं कतिपयदृश्यश्च प्रमेयत्वाद्वाच्यत्वा... त्वाद्घटवदिति। ननु हेतुरयं, ईश्वरो न दृश्यः प्रत्यक्षसामग्रीराहित्यादिति सत्प्रतिपक्षित... सामग्रीराहित्यञ्च बहिरिन्द्रियघटितसामग्र्यभाव मनोघटितसामग्र्यभावरूपाविशेषाभावकूट... साध्यत- मिति चेन्न – दृश्यत्वानुमानस्य दर्शनसामग्र्यनुमानेपि तात्पर्यात्सामग्रीराहित्यस्यासि... ...यां स्वर्गभ-

[86] ननु विशेषाभावकूटस्य सामान्याभावव्याप्यत्वध्रौव्यात्कथं तदसिद्धिरिति ...यत्संबन्धि- मनोघटितसामग्रीसत्त्वाद्विशेषाभावकूटमेवासिद्धम्। ननु मनसस्स्वात्मतत्समवेतातिरि... साधन- स्वातन्त्र्याभावात्कथं मनोघटितसामग्रीसत्त्वमिति चेन्न – बाह्यपदार्थेषु बहिरिन्द्रियव्य... भावकालेपि स्वप्ने मनसः प्रवृत्तिदर्शनाद्बहिस्स्वातन्त्र्याभावासिद्धेः। तथाच स्वप्न इव... सहकार्यन्तरविशिष्टं सत् मनः अन्यविषयं प्रत्यक्षमपि जनयेत्। तथाहि व्यवहितविप्रकृष्ट- भूतभाविनामर्थानां साक्षात्कारस्स्वप्ने मनसा भवति; तत्र बहिरिन्द्रियाणामसामर्थ्याददिति... त्वाच। नच स्वप्नस्य साक्षात्काररूपत्वाभावादनुभूतस्मृतिमात्ररूपत्वात् केवलं दृढ... साध्यतया भावनाबलजप्रत्यक्षस्येव पटीयस्त्वमात्रेण प्रत्यक्षवदवभासाद्दृष्टान्तासिद्धिरिति वे... स्मरामीत्यनुव्यवसायस्य, स्मृतमित्यनुसन्धानस्यचाभावात्, रथादिकं पश्यामीति स्व... शायामनुव्यवसायस्य, रथादिकं दृष्टमिति जागरितावस्थायामबाधितानुसन्धानस्य च ...शिरश्छेद साक्षात्कारत्वस्यावश्यकत्वात्। नहि जाग्रद्दशायामप्यबाधितस्य साक्षात्कारत्वस्यारोपितत्वे प्रमा- णमस्ति। स्मृतित्वञ्चायुक्तम् अननुभूतस्यापि ग्रहणात्। नन्वसंभावितस्य स्वशिरश्छेदस्य ग्रहणं विपर्यासरूपमेवेति चेत् — सत्यं, परशिरश्छेद एवानुभूतस्स्वशिरस्संबन्धितया गृह्यते; तथापि तत्र साक्षात्कारतारूपमनुभवत्वं गृह्यमाणमबाधनादनारोपितमिति नास्य स्मृतित्वम्।

णाध्यवसितोऽन्येन ज्ञानावच्छेदकतयाऽध्यवसीयते । तथाच स घट इत्यु-
यां स्मृतौ भ्राम्यतस्तं घटमनुभवामीति स्यात्, न त्विमं घटमिति । नह्ययं
ति स्मृतेराकारः । तस्मादनुभव एवासौ स्वीकर्तव्यः ॥

37] अस्ति च स्वप्नानुभवस्यापि कस्यचित् सत्यत्वम्, संवादात् । तच्च काक-
मपि न निर्निमित्तम्; सर्वस्वप्नज्ञानानामपि तथात्वप्रसङ्गात् । हेतुश्चात्र धर्म
च कर्मजवत् योगजोऽपि योगविधेरवसेयः; कर्मयोगविध्योस्तुल्ययोग-
। तस्मात् योगिनामनुभवो धर्मजत्वात् प्रमा, साक्षात्कारित्वात् प्रत्य-
र्मानुगृहीतभावनामात्रप्रभवस्तु न प्रमेति विभाग इति । अतस्तत्सा-
ोऽसिद्धः ॥

तथापि विपक्षे किं बाधकमिति चेत्– 'द्वे ब्रह्मणी वेदितव्ये' इत्यादि-
वैयर्थ्यप्रसङ्गः, अशक्यानुष्ठानोपायोपदेशकत्वात् । न चासाक्षात्कारि-
ानमेतत्; अर्थज्ञानावधिनाऽध्ययनविधिनैव तस्य गतार्थत्वादिति ॥

संभवादपि नास्य स्मृतित्वम् – तं घटमनुभवामीति स्मृत्याकारोल्लेखे हि स्मृतित्वम् ।
आकारेण गृहीतं तस्य तेनाकारेणानुव्यवसायविशेषणतया भानं भवति । नहि स्मृतौ
तमिदन्त्वेनानुव्यवसायविशेषणतया भासेत । अत इमं घटमनुभवामीति स्वप्नानु-
स्वप्नस्य स्मृतित्वं वारयतीति ॥

नन्वस्तु स्वप्नस्य भ्रमत्वाद्दोषसहितमनस्सामग्र्या इन्द्रियनिरपेक्षं बाह्यप्रत्यक्षजन-
। अतएवेन्द्रियासन्निकृष्टरजतप्रत्यक्षमपि शुक्तौ घटते । तथाचेश्वरः प्रत्यक्षप्रमितिहेतु-
ग्रीरहितत्वान्न यथावत्प्रत्यक्ष्य इति चेन्न – बहूनां भूतभाविनामर्थानां यथावदेव स्व-
चिद्ग्रहणात्स्वप्नसामान्यस्य भ्रमत्वायोगात् । ननु भाव्यर्थानुभवस्स्वप्ने भवन् वर्तमा-
भासयति । तस्माद्भ्रमत्वमेवेति चेन्न–तत्र वर्तमानत्वांशस्यावास्तवत्वेपि, लोके प्रत्य-
स्य वर्तमानवस्त्ववगाहितया तन्न्यायेनात्रापि वर्तमानत्वस्य स्वयं कल्पितत्वेपि वस्तु-
स्य दुर्वचत्वात् । अतस्तत्र दोषस्य हेतुत्वायोगात् हेत्वन्तराभावाच्च पूर्वकर्मजन्यो
हेतुर्वक्तव्यः । तथाच स्वप्ने कर्मजस्येवेश्वरादिप्रत्यक्षे योगजस्य धर्मस्य मनस्सहका-
वात्सामग्रीराहित्यमसिद्धमिति ॥

[88] ननु दृश्यत्वसाधकप्रमेयत्वादिहेतोरप्रयोजकत्वमिति चेन्न – दृश्यत्वास्वीकारे 'द्वे ब्र-
ह्मणी वेदितव्ये' इति जीवेश्वरयोगविधिवैयर्थ्यमित्यनुकूलतर्कसद्भावात् । नचात्रोक्तं वेदनं
वाक्यार्थज्ञानमात्रम् – तस्याध्ययनविधिसिद्धत्वात् । स्वाध्यायोऽध्येतव्य इति विधिर्हि दृष्टफल-
संभवेऽदृष्टकल्पनायोगादर्थज्ञानसाधनीभूतस्वाध्यायोद्देशेनाध्ययनविधायक इति भवन्मतम् । अ-
तः द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति वाक्यान्तरानुरोधेन श्रवणमननाति-

एतेन परमाण्वादयो व्याख्याता इति ।। तथाहि

[89] तदेनमेवम्भूतमधिकृत्य श्रूयते – 'न द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते' इ... 'एकमेवाद्वितीय' मिति, 'पश्यत्यचक्षुः स शृणोत्यकर्ण' इति, 'द्वे ब्रह्मणी ... दितव्ये परश्चापरमेव चे' ति, 'यज्ञेन यज्ञमयजन्त देवा' इति, (यज्ञो वै देवा इ... प्रवच- 'यज्ञो वै विष्णु' रित्यादि । स्मर्यते च – (गी.) 'सर्वधर्मान् परित्यज्य मामेकं ... शरणं व्रज' इति, 'मदर्थं कर्म कौन्तेय मुक्तसङ्गस्समाचर' इति, 'यज्ञार्थात् ... कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः' इति, 'यज्ञायाचरतः कर्म समग्रं प्रवि... इत्यादि । अनुशिष्यते च साङ्ख्यप्रवचने ईश्वरप्रणिधानम् । तमिमं ज्योति... दिभिरिष्टैः, प्रासादादिना पूर्तेन, शीतातपसहनादिना तपसा, अहिंसादिभि... शौचसन्तोषादिभिर्नियमैः, आसनप्राणायामादिना योगेन महर्षयोऽपि वि... षन्ति । तस्मिन् ज्ञाते सर्वमिदं ज्ञातं भवतीत्येवं विज्ञाय श्रुत्वैकतानस्तत्परो ... यत्रेदं गीयते—'मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु । मामेवैष्यसि यु... वमात्मानं मत्परायणः' ।। 'भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् । सुहृदं स... भूतानां ज्ञात्वा मां शान्तिमृच्छति' इति ।।

तत्प्रयोगः ... तदमात्रं तथा ...

स्वतन्त्रवक्त्र- वाल्लौकिकव- ... तु साध्यत-

रिक्तं ध्यानरूपं दर्शनोपायमयं विधत्त इति । नन्वेवमपि परमाण्वादावतीन्द्रिये साध्याभावनायां स्वर्गभ... हेतुसत्त्वाद्व्यभिचार इति चेन्न – योगजधर्मस्य सर्वसाक्षात्कारहेतुत्वप्रतिपादकशास्त्रबलेऽन्यत्र संबन्ध... माण्वाद्यपि पक्षीकृत्य साध्यसाधनाद्व्यभिचाराभावादिति ।। ...साधन...

[89] सोऽयं लाघवप्रमाणसिद्धैकत्वनित्यज्ञानादिः परमात्मैव, अनपायिज्ञानसंपन्नः स... जातीयेश्वरान्तररहितः इन्द्रियानधीनसर्वविषयकानादिसाक्षात्कारशाली, जीवातिरिक्तस्सर्वज... समाराध्यो विभुर्विष्णुनामेति श्रूयते । गीयते च तस्यैव भगवतो वासुदेवस्य सर्वजनप्रपत्तव्य... मदर्थमित्यादिना फलाभिसन्धिरहितकर्मसमाराध्यत्वं, यज्ञार्थादित्यादिना विष्ण्वर्थकर्मा... क्तानां कर्मणां बन्धकत्वं, यज्ञायेत्यादिना विष्णुप्रीत्यर्थकर्माऽऽचरणस्य सञ्चितसर्वकर्मबन्... क्षयहेतुत्वञ्च । एवं कर्मयोगसमाराध्यस्येश्वरस्य सात्त्विककर्माचरणनिर्मलीकृतेन मनसा... नमपि पातञ्जले प्रसिद्धम्; 'ईश्वरप्रणिधानाद्वे' त्यारभ्य 'तज्जपस्तदर्थभावन' मित्या... प्रणवजपविशिष्टेश्वरभावनरूपस्य, 'तपस्स्वाध्यायेश्वरप्रणिधानानि क्रियायोग' इत्यादिना स... कर्मणां तस्मिन्नर्पणरूपस्य च प्रणिधानस्योक्तत्वात् । एवमत्र 'इष्टापूर्तं बहुधा जातं जा... यमानं विश्वं बिभर्ति भुवनस्य नाभिः', 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेन' 'यस्मिन् विज्ञाते सर्वमिदं विज्ञातं भवती' त्यादयः श्रुतय एतदुपबृं- हणभूतास्स्मृतयश्च भाव्या इति । इष्टं यागादिः पूर्तं प्रासादापरपर्यायदेवालयादि ।।

...पूर्वे- ...त्रि- ...दिति ...विरहेण ...वाक्यं

१. इदं वाक्यं क्वचिन्नास्ति। २ अष्टाङ्गयोगे आसनादेर्योगानुष्ठानकालमात्रोपयोगमयमादितोविशेषः।

[90] इत्येवं श्रुतिनीतिसंप्लवजलैर्भूयोभिराक्षालिते
येषां नास्पदमादधासि हृदये ते शैलसाराशयाः।
किन्तु प्रस्तुतविप्रतीपविधयोऽप्युच्चैर्भवच्चिन्तकाः
काले कारुणिक! त्वयैव कृपया ते भावनीया नराः ॥१८॥
अस्माकं तु निसर्गसुन्दर! चिराच्चेतो निमग्नं त्वयी
त्यद्धाऽऽनन्दनिधे! तथापि तरलं नाद्यापि संतृप्यते।
तन्नाथ! त्वरितं विधेहि करुणां येन त्वदेकाग्रतां
याते चेतसि नाप्नुवाम शतशो याम्याः पुनर्यातनाः ॥१९॥
…नीतिकुसुमाञ्जलिरुज्ज्वलश्रीर्यद्वासयेदपि च दक्षिणवामकौ (गौ) द्वौ।
ततः किममरेशगुरोर्गुरुस्तु प्रीतोऽस्त्वनेन पदपीठसमर्पितेन (र्पणेन?) ॥२०॥
इति न्यायाचार्यपदाङ्कितश्रीमदुदयनविरचितं

…] इत्येवमिति। इति पञ्चस्तबकानुपूर्व्या। एवं उक्तप्रकारेण। श्रुतिनीतिसंप्लवेत्य- …प्रमाणानि प्रमेयमभिसंप्लवन्ते उत व्यवतिष्ठन्त' इत्यत्र एकप्रमेये नानाप्रमाणसमावेशरूप- …प्लवः, तथा श्रुत्युपष्टम्भतयाऽनुमानस्य, तर्कानुगृहीततया श्रुतेश्च प्रकर्षो दर्शितः। प्रस्तुतेति। …शिलामयहृदयपुरुषाविरुद्धाचरणा इत्यर्थः। अपिरिश्चिन्तकत्वरूपविशेषणसमुच्चये। ये पुन- …ऽनुग्राह्या इति विशिष्टार्थः। यद्वा प्रस्तुत उक्तो विरुद्धप्रकारो येषां तादृशा अपि। अपि- … काले प्राचीनयदृच्छासुकृतलवायत्तपुण्यजन्मसंपत्तिकाले; अथवा आपत्तिकाले। त्वया …कृपया उच्चैर्भवच्चिन्तकत्वेन भावनीयाः चिन्तकनिर्विशेषं परिपाल्या इति कवेः कारुण्यकलि- …ार्थना॥ निसर्गसुन्दरेति निर्मलत्वं, निर्माणकायानामिच्छागृहीतानां सौन्दर्यमेव वा विव- …म्। आनन्दनिधे इति स्वाभाविकसुखाभिव्यक्तिपक्षादरणं वा। तरलमित्यस्य चेतो …म्। याम्याः यातनाः नरकबाधाः नाप्नुवामेति॥ दक्षिणः अनुकूलः; वामः …लः। वामगेति वा पाठः। प्रतिकूलगामीत्यर्थः। उभयविधावपि जनौ कुसुमाञ्जलि- …लौ स्थितः केतक्यादिकुसुमं वस्त्रमिव वासयेत्, मननहेतूनां बहूनामुपन्यसनादीश्वरे …संस्कारमुत्पादयेदिति, नोत्पादयेदिति वा यत् ततः किमिति। सेश्वरवादिनां निरीश्वरवा- …श्वरे धियं स्थापयेद्वा, यद्वा सेश्वरवादिभिः, किमत्र नूनमुक्तमित्युपेक्षाकरणसंभवात् …प्रकारनिरूपणपद्धतेर्विषमत्वचिन्तनाच्च, निरीश्वरवादिनां निरवधिकपङ्कलितानामेतत्तत्त्वप्रह्व …भवाच्च न वासयेत् — उभयथापि न नः किञ्चिदिति। अमरेशगुरोरिति। इन्द्रगुरोः

१. प्र० 'शैलसारः पाषाणं लोहं वा। तद्वदाशयो येषां ते'। २. प्र. 'भावनीयाः कलङ्काकलङ्कशून्याः कर्तव्या इति। ३. प्र 'तृपेः क्वचित्सकर्मकत्वात्कर्मकर्तरि रूपम्' इति। ४. अयं क. २ पाठः। प्र. 'यत् समर्पणं तेने' ति।

न्यायकुसुमाञ्जलिप्रकरणं संपूर्णम् ॥

॥ ॐ तत्सत् । ब्रह्मार्पणं भवतु । शुभमस्तु । श्रीरस्तु ॥

बृहस्पतेर्गुरुर्ब्रह्मा । यद्वा छन्दोग्ये प्रजापतिविद्यायामिन्द्रविरोचनयोश्चतुर्मुखोपसंपत्तेः तत आत्मविद्यासंपत्तेश्च श्रुततया इन्द्रगुरुर्ब्रह्मा, तस्य गुरुः, ' यो ब्रह्माणं विदधाति यो वै वेदांश्च प्रहिणोति तस्मै ' इति श्रुतो भगवानिति । लौकिककर्मरूपं वा शास्त्र तमननरूपं वा प्रबन्धनिर्माणं, यत्करोषीति गीतोक्तरीत्या भगवतेऽर्पयति पदप

इत्थं श्रीशैलमणिश्रीनिधिकृपयेह पञ्चमं स्तबकम् ।
पूर्वोत्तरतन्त्रादौ प्रथितः श्रीवीरराघवो व्याख्यत् ॥
सच्चक्रवर्तिकुलभूः उत्तमनल्लूर् तथोत्तमूरिति च ।
काञ्चीप्रान्तेऽभिजनः ख्यातो यस्यैष विस्तरं व्यधित ॥
जयति जगदादिहेतु र्जयति तदाज्ञा श्रुतिर्हिता जगताम् ।
जयति च दर्शिततदुभयमहिमोदयनः प्रबन्धोऽयम् ॥

जयत्वन्यभ्रमच्चेतोभृङ्गकर्षिरसप्रदः । श्रीवीरराघवीयोऽयं **कुसुमाञ्जलिविस्तरः** ।
न्यायाचार्योदयनरचितं नीतिपुष्पाञ्जलिं कश्शक्तो बोद्धुं तदिह महिताद्वार्धमानात्प्रकाशा
बुध्वाऽध्याप्याप्यवहितमनाः भूरिकृत्वोऽथ तत्त्वं साञ्चिन्त्यैवं व्यरचयमिमं विस्तरं सर्वसु साध्य

कार्त्स्न्येन लभ्यापि कथञ्चिदासीद्व्याख्या तृतीयस्तबकान्तलब्धा
या बोधनी मूलविशुद्धपाठमलम्भयत्सा बहुलं विशिष्य ॥
व्याख्यांशसंक्षेप विशेषचिन्ताव्यग्रः प्रकाशस्स तु वार्धमानः ।
विचारहीनापि वचोऽर्थवक्त्री सा बोधनी वारदराजसूक्तिः ॥
चिरन्तनश्लाघ्यतमप्रबन्धप्रचारबद्धादरयत्नमित्थम् ।
सुबोधरूपं बहुभव्यमेयं व्याख्यानमेतत्सफलं विधत्ते ॥
अनधिगतमनुक्तं यत् परैस्तच्च भूरि प्रकटयितुमिहैवं कर्तुमेतं सुबोधं
व्यरचयमहमित्थं विस्तरं वत्सलश्रीहयमुखशुभवीक्षोल्लासवश्याखिलात्मा
वात्स्यस्सच्चक्रवर्ती विनतबहुगुरुश्चक्रवर्त्यार्यजो यो-
ऽलमेल्मङ्गातनूजः कृतविविधकृतिः श्रीशदृष्ट्याऽऽत्तवासः ।
श्रीशैलोपत्यकाश्रीपदपुरि स नभस्तर्कवस्वब्ज (१८६०) मेये
प्रक्रम्यैनं शकाब्देऽर्पयति भगवते पूरयित्वा क्रमेण ॥ .... ॥

इति

कुसुमाञ्जलिविस्तरस्संपूर्णः ॥

श्रीरस्तु - शुभमस्तु.

पु. महाव्रतीया इति। बोधन्यां (काशीराजकीय संस्कृतपुस्तकालयमुद्रितपुस्तके ३१
महाव्रतः—कुसुमे बीजपूरादेर्यल्लाक्षाद्यवसिच्यते । शक्तिराधीयते तेन काचित्तां किं
ति' इति श्लोक उपात्तः । सर्वदर्शनसंग्रहे आर्हतदर्शने एतच्छ्लोकात्पूर्वं, 'यस्मिन्नेव
आहिता कर्मवासना । फलं तत्रैव बध्नाति कार्पासे रक्तता यथा ॥ इति श्लोको
एवमेव चेच्छ्लोकक्रमः, तर्हि उत्तरश्लोकस्य संतानविषयकतया क्षणसंतानवादि
दकत्वे महाव्रतो बौद्ध इति ज्ञायते। न्यायलीलावत्यां ७२, ७३ पुटयोः महाव्रत-
युपात्ताः । सोऽयं कविः पद्यरूपेण किञ्चिद्ग्रन्थकृदित्यूह्यते। एवञ्च महाव्रतीया-
। परन्तु मीमांसकसंमतज्ञाततामवलम्ब्येह मूले विचारविधानादिदं प्रकरणं बौ-
यग्रहणेन व्याख्येयमित्यालोच्य विस्तरे तदनुगुणं व्याख्यातम् ।
धचन्द्रोदये द्वितीयाङ्कतृतीयश्लोकदर्शनादयं महाव्रतो मीमांसक इति निश्चीयते।
णिडल्लगोपमन्त्रिशेखरकृते विशेषोपि द्रष्टव्यः।
हेतुव्यावृत्तिरिति हेतुव्यावृत्तिर्हेत्वभावः सहेतुकत्वाभावः । कर्तृव्यावृत्तिस्सक-
वः - शरीररूपहेतुव्यावृत्तिश्शरीरहेतुकत्वाभावः । १०६ पु. रुद्रेष्विति। रुद्रनामकाः
: प्रसिद्धाः । १०६ पु. मण्डलब्राह्मणेष्विति । शुक्लयजुर्वेदमाध्यन्दिनशाखाशतपथा-
लब्राह्मणाभिधानं त्रयीमयसूर्यरूपप्रतिपादकम् । अत एव शब्दब्रह्मत्वेनेत्युक्तम्।
पतीति मण्डलब्राह्मणारम्भः । १११ पु. काकतालीयम् — यादृच्छिकम्.
व भवत् । ११२ पु. साङ्ख्यप्रवचन इति । यद्यपि साङ्ख्यसूत्रमपि एतन्ना-
याप्यत्र पातञ्जलयोगसूत्रमेव विवक्षितम् , विषयानुरोधात् । अस्यापीदं नामेति

शोधनिका

पु.	पं.	शुद्धम्	पु.	पं.	शुद्धम्
26	22	सहकारित्वसंभवा	123	10	बाधक
33	25	तया सहजशक्ति	148	19	द्रव्यानारम्भ
36	23	पृथिवीत्वव्याप्यजाति	151	18	भवति
40	12	कार्पासबीज	153	25	रौप्यादि
41	2	संसर्गविशेषैः	155	7	रूपस्वभा
45	10	परीक्ष्यसमवेतं	159	3	निश्चेयः
50	15	कारणमिति	160	10	कदाचि
50	20	तावद्धी हि	164	10	श्वरस्सिद्ध
52	20	भेदाग्रहणं	165	10	मदज्ञाता
60	17	बीजत्वावच्छिन्नकार्यतायाः	165	16	प्रत्यक्षं स्वतन्त्रवक्त्र-
61	25	बाधकदर्शनं	166	6	ष्टिदशा वाल्लौकिकव-
61	26	दर्शने तु	166	14	क्रोशन्निवर्त
62	19	सामग्रीकत्वस्य	167	24	स्यैवासिद्धेः
69	14	भुद्रयासंयोगा	167	27	टादेर्विषय
83	26	विदर्थापत्ति	168	20	त्यन्नमत
87	3	ये त्वेकदेशिनो	168	22	अदृष्टिवा
94	5	कालानियमात्	168	23	लब्धिहेतु
96	13	किंचिद् दृश्यदेश	170	26	क्षासत्त्वेनानि
97	18	त्येतत्साध	171	4	मर्थ्योऽप्रयो
112	6	न। तदस	175	23	धूमोपलम्भ ति नि-
112	11	व्याप्तिसिद्धिः	188	22	सिद्ध्या चेदिति
114	2	तथैवास्तु, किं	189	8	क्वचिद्बाध
115	10	तत्रैकस्याः	202	30	प्रत्यक्षशाब्द
118	14	वृत्तिनिरोध	212	19	ऽनुवादभूतः
119	9	स्थितिरुपाधि	216	28	संगतेश्चाकरण
122	5	कायाधिष्ठा	219	13	एवेति
122	28	मित्यस्याग्	219	20	बलात्स्व
123	2	व्युत्पद्यते	220	1	वक्त्रैवावच्छे

शोधनिका

पृ.	पं.	शुद्धम्	पृ.	पं.	शुद्धम्
[illegible]	7	तमापा	313	21	परत्वायोगापत्तेः
[illegible]	19	व्याप्यत्वरूप	315	5	स्वीकरणीयम्
[illegible]	16	संपादनादिति.	315	16	तत्परत्वम्
[illegible]	3	व्यतिरेकाभ्या	315	25	श्रय एव वक्तेति
[illegible]	1	कथमैन्द्रियको	317	25	श्रुत्यादिषु
[illegible]	[illegible]9	अतीतत्वादिति । कथं	321	21	कृतिर्न
[illegible]	25	प्रत्यक्षमपि	323	21	व्यवहरन्ति
[illegible]	17	तथैव	324	11	फलानुगुण्य
[illegible]	[illegible]8	कंचन	326	15	प्रत्यययोः
[illegible]	18	रूपसाध्य	328	25	आख्यातश्रुत
[illegible]	15	ईश्वरो	329	16	धर्मधर्मिणो
[illegible]	1	आत्मलाभा	331	25	गार्ग्यत्वेन
[illegible]	2	सिध्यत्येवेति	334	11	त्वप्रसङ्गात्
[illegible]	[illegible]	जन्यं बुद्ध्या	334	14	पुनरुक्तम्
[illegible]	23	आयोजनं	334	15	प्रवर्तकत्वे
[illegible]	26	विषभक्षणा	334	23	प्रथमपुरुषेणे
[illegible]	17	सर्वशरीर	335	26	मितीच्छैव
[illegible]	20	पुरुष	337	4	धूम इव
[illegible]	3	न ह्यस्मदादीनां	338	16	स्यात्
[illegible]	26	नापेक्षितमिति	338	28	तोष्टकल्पनम्
[illegible]	29	पौरुषेय	340	19	धनत्वमनु
[illegible]	23	योजकः कः	341	23	तद्व्यापारकत्वं
[illegible]	13	तर्हि	342	17	नास्तिकमीमांसका
[illegible]	15	भाट्टास्त्वभि	342	24	निरस्तम्
[illegible]13	18	उद्देश्यमिति	344	29	प्रवर्तनात्वेन

ग्राहि
प्रयोगः
लाप-
प्रवच
ध्यायो
तन्त्रवक्त्रि-
लौकिकव-
साध्यत
यां स्वर्गभ
संबन्धे
धनं
त्रि-
ति
विरहेण

ङ्गम-

ाहि

योगः

लाप-

पवच-

ध्यायें

त (तो

माश्रंतथा

तन्त्रवक्रि-

लौकिकव-

ाध्यद

यां स्वर्गभ

संबन्धे

धन

त्रि-

लि

विरहेण

पवं

17. Jñāpaka-Saṅgraha. Ed. Dr. N. S. Ramanuja Tatacharya (1973) 17 00

18. Pratihāra-Sūtra. Ed Dr. B. R. Sharma (1975) 25 00

19. Tattvacintāmaṇi with two commentaries. Ed. Dr. N. S. Ramanuja Tatacharya (1973) 37 00

20. Bhāratīyam-Vṛttam. 'India's Past' by A. A. Macdonell translated into Sanskrit by Sri V. S. Venkataraghavacharya (1968) 19 00

21. Vedakālīnajana-tantrasthānāni by Sri Agnihotram Ramanuja Tatacharya (1970) 7 00

22. Educational Psychology (in Sanskrit) by Sri V. S. Venkata Raghavacharya (1972) 12 00

23. Nyāya-Kalpalatikā Vol. II. Ed. Sri V. Subrahmanya Sastri (1976) 58 00

24. Nyāya-Pariśiṣṭa. Ed. Sri Srirama Desikan (1976) 29 00

25. Pañcalakṣaṇī and Siṁhavyāghralakṣaṇe. Edited with the commentary 'Bālabodhinī' by Dr. N. S. Ramanuja Tatacharya (1979) 25 00

26. Malaya-Māruta (Part I). A collection of minor work in Sanskrit. Ed. Dr. V. Raghavan (1966) 5 00

27. Malaya-Māruta (Part II) Ed. Dr. V. Raghavan (1971) 5 00

28. Siddhānta-Śiromaṇi. Translation with annotations in English. by Dr. Aska Somayagi (1980)

29. Amarakoṣa-Saṅgraha (Revised edn., 1980)

30. Nyāya-Kusumañjali with Vistara commentary by Sri Uttamur T. Viraraghavacharya (1980)